No. 14.]

THE

VIZIANAGRAM SANSKRIT SERIES

UNDER THE SUPERINTENDENCE OF

ARTHUR VENIS M. A. Oxon.

PRINCIPAL, SANSKRIT COLLEGE, BENARES.

THE

VEDÂNTAKALPATARUPARIMALA

OF

APPAYADÎKSHITA

EDITED BY

RÂMAS'ÂSTRÎ TAILAṄGA

PROFESSOR, SANSKRIT COLLEGE, BENARES.

VOL. XII.

Part I.

PRINTED, PUBLISHED AND SOLD BY

E. J. LAZARUS & Co., BENARES.

MAY BE HAD FROM GANESH DAS AND CO., CHOWK, BENARES:
JAYESTHARAM MUKUNDJI AND CO., BOMBAY:
OTTO HARRASSOWITZ AND M. SPIRGATIS LEIPZIG:
LUZAC AND CO., LONDON.

1895.

वेदान्तकल्पतरुपरिमलः ।

भगवदमलानन्दयतीन्द्रविरचितवेदान्तकल्पतरुव्याख्यारूपः
अद्वैतविद्याचार्यसकलतन्त्रनिबन्धकृच्छ्रीमदप्पयदीक्षित-
विरचितः ।

तत्र प्रथमो भागः प्रथमाध्यायगतप्रथमपादान्तः ।

वाराणसेयराजकीयप्रधानसंस्कृतपाठशालायां साहित्यशास्त्राध्यापकेन
मानवल्ल्युपाह्वतैलङ्गरामशास्त्रिणा सपरिष्कारं संशोधितः ।

काश्याम् ।

मेडिकल् हाल् नाम्नि यन्त्रालये
ई. जे. लाजरस् कम्पन्याख्येन मुद्रयित्वा प्रकाशितः ।

वैक्रमसंवत् १९५२ ।

श्रीः ।

वेदान्तकल्पतरुपरिमलभूमिका ।

अथ प्रस्तूयते तावदद्वैतवेदान्तसिद्धान्तविवेचनविचक्षणो निखिलतन्त्रस्वतन्त्रपरमहंसपरिव्राजकाचार्यवर्यभगवदमलानन्दविरचितवेदान्तकल्पतरुव्याख्यारूपो वेदान्तकल्पतरुपरिमलनामा ग्रन्थो मुद्रयित्वा प्रकाशयितुम् ।

अस्य च निर्माता सकलदर्शननिबन्धकृदद्वैतविद्याचार्यो रङ्गराजाध्वरीन्द्रपुत्ररत्नं द्राविडजातीयः काञ्चीमण्डने परः पिनाकपाणिरिवावतीर्णः परममाहेश्वरः श्रीमानप्पयदीक्षितो नाम । अलं तावद्दीक्षितवर्यनामेव तत्कृतग्रन्थसौभाग्यवर्णने ।

सोऽयं ग्रन्थोऽद्य यावदमुद्रिततया स्वगुणैः परीक्षकजनचक्षुःप्रीणनाक्षमो वन्ध्य इव क्रमशश्चोच्छिद्यमान इव महता प्रयासेन गवेष्यमाणः केषांचिदेव महाभागानां संनिधौ कृतावस्थानः संकुचित इवावतिष्ठते इति विचार्य स्थिरीभूते चेतन्मूलभूतकल्पतरुमुद्रणे विना परिमलं तस्य सहृदयहृदयधारणे कुणित्वमाकलयन् सुतरामेतत्प्रकाशनावश्यकतां विभाव्य तन्मुद्रणे कृतमतिः काशीस्थराजकीयपाठालयपुस्तकालयस्थे द्वे पुस्तके तयोश्चैकं समग्रं शुद्धं प्राचीन,मपरं च किंचिदूनसमाप्तिग्रन्थं नातिप्राचीनं शुद्धं च, परं च बालसरस्वतीभवनपुस्तकं नवीनमशुद्धप्राय,मितरच्च चतुस्सूत्र्यन्तं सकल्पतरु तारकाश्रममठस्थं प्राचीनं शुद्धप्राय,मन्तिमं च काशीस्थपण्डितवरशिवकुमारमिश्रपुस्तकमित्येवं पुस्तकानि सङ्कलय्य तत्र तत्रोपलब्धान् पाठभेदानधो निर्दिश्य, प्रदर्श्य चान्तरान्तरा बहुलं समागतानां पूर्वोत्तरमीमांसाधिकरणानामाकरस्थानानि, निरूप्य च प्रतिपृष्ठं तद्गतं विषयं शिरसि, (Heading) प्रत्यधिकरणं चान्ते तन्नामसंख्ये विलिख्य, निवेश्य च प्रतिपृष्ठं द्विचप्रतीकेषु मूले तेषां सुखेन लाभाय पार्श्वे (Margin) कल्पतरुपृष्ठपङ्-

त्यङ्कान्, प्रतिप्रतीकं चाभ्यासिजनसौकर्यायावस्थाप्य स्थूलान्यक्षराणि सुपरिष्कृत्य समुपक्रान्तो ऽस्म्येतन्मुद्रणे ।

श्रुत्वा चैतन्मुद्रणारम्भं पुरःस्थितभक्ष्याणामिवाशनायावसन्नानां कालातिपाताऽसहिष्णूनां तत्प्राप्तये ताम्यतां बुधवराणां चित्तसमाधानायाऽद्ययावत्सिद्धं प्रथमाध्यायप्रथमपादान्तं ग्रन्थ,मेतत्सहमुद्रितकल्पतरुप्रथमाध्यायान्तप्रथमभागसममाकलय्य तावन्तमेवामुम्भागं प्रकाशनयोग्यं निर्धार्य यथामति संशोध्य मुद्रणसमये क्वाचित्काशुद्धिपरिबोधनेन नितान्तमनुगृहीतो ऽस्मद्भ्रातृचरणैर्महामहोपाध्यायश्रीदगङ्गाधरशास्त्रिभि, र्मुद्रणोत्तरमप्यवशिष्टा विरला अशुद्धीः पृथक् शुद्धिपत्रे निर्दिश्य प्रदर्श्य चाधिकरणसूचीं प्रकाशितवानस्म्यमुं भागम् । अभ्यर्थये च निष्प्रत्यूहं क्रमादवशिष्टभागप्रकाशनं जगदीश्वरात् ।

एतद्ग्रन्थकर्तुरप्पयदीक्षितस्य कालदेशवंशवर्णनविस्तरस्तु तत्कृतसिद्धान्तलेश*मुद्रणावसरे ऽस्मद्भ्रातृचरणैर्भूमिकायां सुकृत इति नेदानीमयं मत्प्रयत्नमपेक्षते । एवं तत्कृतग्रन्थावल्यपि यथोपलब्धा लिखितैव काव्यमालायां १ गुच्छे ६१ पृष्ठे, इति सापि न मल्लेखनीव्यापारमपेक्षते इति पुनरुक्तत्वपात्तद्विचाराचरणाद्विरतो ऽस्मि ।

तदेवं भूयसा ऽऽयासेन सुपरिष्कृत्य संशोधिते ऽप्यत्र मामकीनमतिनयनदोषादक्षरयोजकादिदोषाद्वा सम्भाविता अवशिष्टा अशुद्धीरुपेक्ष्य गुणमात्रदृष्टिमवलम्ब्य समनुभवन्त्वद्वैतवेदान्तविद्यासिद्धान्तशुद्धान्तनिरर्गलसञ्चारानन्दममन्दमन्तरङ्गे ऽन्तर्वाणिवरेण्याः सहृदयवरा इति सप्रश्रयमभ्यर्थ्य प्रसादयामि सर्वान्तरं किमपि ज्योतिरिति शम् ।

वाराणस्याम्
संवत् १९५२ । } मानवल्ल्युपाख्यस्तैलङ्गरामशास्त्री ।

---

* अयं ग्रन्थो विजयनगरसंस्कृतपुस्तकावल्यां (Vizianagrm Sanskrit series) मुद्रितः ।

प्रथमाध्यायप्रथमपादाधिकरणसूची ।

परिमलपुस्तके सांकेतिकानि चिन्हानि ।

अ॰	अध्यायः
पा॰	पादः
सू॰	सूत्रम्
अधि॰	अधिकरणम्
जै सू॰ जैमिनिसू॰	जैमिनिसूत्रपाठः
व्या॰ सू॰ व्यास॰ सू॰	व्याससूत्रपाठः
पु॰	पुस्तकम्
पा॰	पाठः
कल्प॰	कल्पतरुः
श्लो॰	श्लोकः
टि॰	टिप्पणी
१ पु॰	काशिकराजकीयपाठालयपुस्तकालयपुस्तकम्
२ पु॰	तथा
३ पु॰	बालसरस्वतीभवनपुस्तकम्
४ पु॰	काशीस्थतारकाश्रममठस्थं चतुःसूत्र्यन्तम्
५ पु॰	काशीस्थपण्डितवरशिवकुमारमिश्रपुस्तकम्

टि० प्रान्त (Margin) गता अङ्का विजयनगरसंस्कृतपुस्तकावली (Viziangram Sanskrit series) मुद्रितमत्पं रशोधितकल्पतरुपुस्तकानुसारेण स्थापितास्ते च स्थूलाः पृष्ठाङ्काः सूक्ष्माश्च पङ्क्त्यङ्का ज्ञेयाः ।

शुद्धिपत्रम् ।

पृ॰	प॰	अशुद्धम् ।	शुद्धम् ।
३	७	श्वेताश्ववरो-	श्वेताश्वतरो-
६	६	ऽऽप्यालोक-	ऽप्यालोक-
११	१५	पवृत्ता	प्रवृत्ता
२७	११	व्याख्याम्	व्याख्यातम्
३१	८	व्य वहित-	व्यवहित-
३३	११	नापोक्षित-	नापेक्षित-
४६	१४	प्रगुक्त-	प्रागुक्त-
४८	२७	नान्यथा । तस्य	नान्यथा तस्य
५१	शिरसि Heading	आनन्दारि-	आनन्दादि-
५५	शिरसि Heading	सूतारम्भः	सूत्रारम्भः
५५	६	प्रारम्भाय	प्रारम्भार्थं
६२	२५	वी र्यकाम-	वीर्यकाम-
६५	५	युक्तम्	न युक्तम्
६७	१०	सत्त्वपि	सत्त्वे ऽपि
६९	१२	वृत्ति-	वृत्तिः
७१	२५	ष्ठामो-	ष्ठानो-*
७६	२४	शब्दे ा-	शब्दो-*
८३	२६	प्रसिद्धि-	प्रसिद्ध-
८८	२१	चतुर्था-	चतुर्थी-*
९१	२६	विवक्षता-	विवक्षिता-
९३	४	सकारणं	स कारणं
९६	२	औत्पत्तिक	औत्पत्तिक-
१०६	२३	श्च रूप-	श्चयरूप-*
१०९	५	सूत्रा र्था-	सूत्रार्था-*

पृ॰	प॰	अशुद्धम् ।	शुद्धम् ।
१११	२	वैशिष्ट्या-	वैशिष्ट्या*-
११५	२१	कामितासा-	कामिता सा-
११६	१५	योगा	योगी
१२०	३	प्रताति-	प्रतीति-
१२३	१३	त एता	तएता
१२३	१८	त्यात्त	त्यात्
१२७	१३	निवरणा-	निवारणा-
१३२	‡टि॰	पा॰ आ॰	आ॰
१३४	१३	फलवत् कर्म-	फलवत्कर्म-
१३४	२५	बाजं	बीजं
१३६	२	निर्णायार्थं	निर्णयार्थं
१३९	शिरसि Heading	येत्वाप-	येत्वोप-
१४१	१५	प्रवृत्तः	प्रवृत्तिः*
१४७	१३	रह-	हर-
१६२	२६	निवृत्ते-	निवृत्ते-*
१६६	७	भावनां	भावना*
१७२	१	वृात	वृति
१७८	६	दित्यर्थः'	दित्यर्थः*
१८३	१	छान्दसत्वोक्ति-	छान्दसत्वोक्ति-
१८७	२८	कस्व-	कत्व-
१९८	१३	रांत्यो-	रीत्यो-*
२००	७	पृथिवा-	पृथिवी-*
२०१	२७	प्रत्युद्धतः	प्रत्युद्धृतः
२०४	८	निर्वृत्ति-	निर्वृत्ति-
२०८	३	दत्तस्य	दत्तस

टि॰ एतच्चिन्हाङ्कितेषु अशुद्धयो ऽस्पष्टत्वमूलाः केषु चिदेव पुस्तकेषु न सर्वेषु ।

प्रथमाध्यायद्वितीयपादाद्द्वितीयाध्यायान्तभागाधिकरणसूची ।

प्रथमाध्यायस्य द्वितीयपादे ।

प्रथमाध्यायस्य तृतीयपादे ।

प्रथमाध्यायस्य चतुर्थपादे ।

द्वितीयाध्यायस्य प्रथमपादे ।

द्वितीयाध्यायस्य द्वितीयपादे ।

द्वितीयाध्यायस्य तृतीयपादे ।

शुद्धिपत्रम् ।

पृ॰ ।	पं॰	अशुद्धम् ।	शुद्धम् ।
२३१ ।	*टि॰	व्या॰ अ॰ १ पा॰ १ सू॰ सू॰	व्या॰ सू॰ अ॰ १ पा॰ १ सू॰
२३४ ।	२१	श्रितत्वास्या-	श्रितत्वस्या-
२३६ ।	*टि॰	स्वाभिमवि-	स्वाभिमतमवि-
२४६ ।	१४	तदाण्डं	तदण्डं
२४६ ।	२२	अग्निर्ज्याति	अग्निर्ज्योतिः
२५६ ।	५	द्युभ्वाद्यायन-	द्युभ्वाद्यायतन-
२६० ।	११	नस्पृष्टा	न स्पष्टा
२६४ ।	१८	प्रतिष्ठात्व-	प्रतिष्ठत्व-
२६६ ।	२२	विभुत्वपक्ष	विभुत्वपक्षे
२७६ ।	१६	ब्रह्मपरत्व-	ब्रह्मपुरत्व-
२७६ ।	१०	मुपास्यत्व	मुपास्यत्वे
२८० ।	१३	विषये	विषये
२८२ ।	१७	कालत्व	कालत्वे
२८२ ।	२४	दाष्टान्तिके	दार्ष्टान्तिके
२८५ ।	१६	भमानुवृतेः	भमानुवृत्तेः
२९० ।	४	सिद्धः	सिद्धेः
२९७ ।	१८	जाव-	जीव-
२९९ ।	१६	धिकरा-	धिकारा-
३१० ।	१८	सृष्ट	सृष्टे-
३१५ ।	१३	वाएता	वा एता
३१८ ।	१८	विशिष्ट	विशिष्टे
३२१ ।	२५	स्तिरपवित्रं	स्तिरःपवित्रं
३२५ ।	१२	तद्व्यस्थापनं	तद्व्यवस्थापनं
३२७ ।	२३	दर्ि तः	दर्शितः
३२९ ।	§टि०	पाठन्तरम्	पाठान्तरम् ।
३३८ ।	६	तद लम्बनं	तदालम्बनं
३४० ।	१२	महत्तत्वा-	महात्तत्वा-
३४१ ।	२६	तद्रूपा-	तद्रूपा-

पृ॰ ।	पं॰	अशुद्धम् ।	शुद्धम् ।
३४३ ।	२२	शब्देन	शब्देन
३४४ ।	२०	कतव्य-	कर्तव्य-
३४५ ।	११	विपरात-	विपरीत-
३४६ ।	१	बीजाङ्कर-	बीजाङ्कुर-
३५३ ।	२०	मणमयो	मन्मयो
३५७ ।	२६	सिद्धेरति	सिद्धेरिति
३७७ ।	३	मणमया-	मन्मया-
३७७ ।	६	मणमय-	मन्मय-
३८१ ।	१५	वेदी-	वेदि-
३८७ ।	२२	नोपपत्तः	नोपपत्तेः
३९८ ।	२२	प्रसरोदति	प्रसरेदिति
४०२ ।	२०	दङ्कोक-	दङ्कोक-
४०५ ।	१०	न्यायोपन्यास	न्यायोपन्यासः
४०७ ।	२०	श्चेऽत्यने-	श्चेत्यने-
४२४ ।	†टि०	न तु ददि-	न तु तदि-
४२६ ।	१	यो ऽभनि-	यो ऽभिनि
४३० ।	६	त्वामति	त्वमिति
४३५ ।	८	वर्तिनं	वर्ति
४४३ ।	१६	विषेवणा-	निषेवणा-
४४७ ।	२८	मनुत्वति	मनुत्वेति
४५३ ।	१३	न हि नि-	नहिनि-
४५५ ।	१४	प्रापप्य	प्रापप्य
४५७ ।	शिरसि Heading.	विपदु	वियदु-
४६९ ।	२५	कर्मागयव	कर्माणयेव
४७० ।	१४	ऽपीत	ऽपीति
४७४ ।	१६	मनुपे-	मनपे-
४७६ ।	११	धारणा-	धारणा-

प्रान्ताङ्कशुद्धिपत्रम् ।

अशुद्धाः अङ्काः ।	शुद्धाः अङ्काः ।	पङ्क्तौ ।	पृष्ठे
१५८ । १७	१५८ । १९	१७	२७९
१५९ । ४	१५९ । ३	२	२८१
१६३ । १०	१६३ । ११	१	२९०
१७३ । २४	१७२ । २४	२१	३०९
१७२ । २४	१७२ । २५	८	३१०
१७२ । २५	१७२ । २६	२	३११
२०७ । १	२०७ । २	२२	३५८
२०७ । २०	२०७ । १४	७	३५९
२२४ । ७	२२४ । १	१३	३७४

अशुद्धाः अङ्काः ।	शुद्धाः अङ्काः ।	पङ्क्तौ ।	पृष्ठे
२११ । २५	० । ०	१४	३८४
० ०	२३१ । १२	१८	३८४
,, । २३	,, । २२	२२	३८७
२४१ । ६	२४१ । ७	२६	३९८
२४४ । १७	२४४ । १६	२३	४०२
२७८ । १२	२७८ । १०	४	४३१
० ०	३०२ । ९	२५	४४५
३२ । २२	३२१ । २२	७	४७१

वेदान्तकल्पतरुपरिमलः ।

ॐ नमः परमात्मने ।

गुरुभिरुपदिष्टमर्थं विस्मृतमपि तत्र बोधितं प्राचैः ।
अवलम्ब्य शिवमधीयन् यथामति व्याकरोमि कल्पतरुम् ॥ १ ॥
कल्पकतरुमुपकुर्यां कमधिकमाकाङ्क्षितार्थमुपहृत्य ।
तद्वृत्तेरेवार्थैर्मम मतिमीहे परिष्कर्तुम् ॥ २ ॥
यावन्तो निविशन्ते विदुषां व्याख्यानचातुरीभेदाः ।
सर्वेषामपि तेषामयमवकाशं ददाति पुष्पकवत् ॥ ३ ॥
इत्थमिहातिगभीरे कियदाशयवर्णनं मया क्रियते ।
तुष्यन्ति ततोऽपि बुधाः कतिपयरत्नग्रहादिवाम्बुनिधेः ॥ ४ ॥

यदिति । अत्र प्रत्यगिति ब्रह्मविशेषणेन शास्त्रस्य विषयं प्रदर्श्य तत्र सर्वेषां वेदान्तानां समन्वयः प्रथमाध्यायार्थः श्रुतिशतेत्यादिविशेषणेन दर्शितः । शतशब्द आनन्त्यपरः । विश्वं शतं सहस्रं च सर्वमक्षयवाचक*-मिति महाभारतवचनात् । ब्राह्मणशतं भोज्यतामित्यत्र भोजनस्येव शिरसां संख्योपसर्जनसंख्येयेनान्वयः । सकलप्रपञ्चाश्रयस्य ब्रह्मणः परिमितकर्तृत्वाद्याश्रयस्य जीवस्य चाभेदमविरोधेनोपपादयितुमुभयत्र विरुद्धधर्माणां मिथ्यात्वं यदज्ञातमित्यादिविशेषणेन दर्शितम् । जीवैर्यदविज्ञाततत्त्वं सद्† बहुविधस्य प्रतिजीवं व्यवस्थितकर्तृत्वादिरूपस्य साधारणस्य घटपटादिरूपस्य च प्रपञ्चविलासस्य धरं धारकम् । कलितम् अहं कर्ताऽहं भोक्ता सन् घटः सन् पट इत्यादिरूपेणावगतम् । यथा वियद् बालैरविज्ञाततत्त्वं सत् तलमलिनतायोगि कलितमित्यर्थः । एवम् अव्याख्यायामुपमानोपमेये वैरूप्येण निर्दिष्टे स्यातां नेयार्थत्वदोषश्च प्रसज्यते । स्फुटं हि वैरूप्यं यद् ब्रह्म जीवैरज्ञातं सद् बहुविधानां जगद्विषयविभ्रमाणां धारकं यथा वियद् बालैः तलमलिनतायोगित्वेन कलितं भ्रान्त्याऽनुभूतमिति यथाश्रुतयोजनायामत्र जीवास्तावदुपमेयब्रह्मविषयाऽज्ञानाश्रयत्वेन निर्दिष्टाः बालास्तूपमानवियदध्य-

* अक्षय्यवाचकमिति ४-५ पु॰ पा॰   † अविज्ञातं सदिति पाठः २-५ पु॰ ।

स्ततलमलिनताविषयविभ्रमाश्रयत्वेनेत्येकं वैरूप्यम् । ब्रह्म प्रपञ्चविषयविभ्रमधरत्वेन निर्दिष्टं वियत्तु* तलमलिनतायोगित्वेन तद्विषयविभ्रमस्तु कलितमिति पश्चात्तदन्वयी निर्दिष्ट इत्यन्यद्वैरूप्यम् । ब्रह्म विभ्रमधरमिति क्रियायां कर्तृत्वेन निर्दिष्टं वियत्तु कलितमिति तस्यां कर्मत्वेनेत्यपरं वैरूप्यम् । विभ्रमधरशब्दश्च विभ्रमविषये न शक्तः अप्रसिद्धौ तादृशलक्षणा च नेयार्था । एवंविधमुपमानोपमेययोर्निर्देशवैरूप्यं नेयार्थलक्षणां च काव्यसरणिविदो नानुमन्यन्ते इत्येवमाशङ्कास्पदं दोषचतुष्टयमप्यज्ञातमित्यस्य वियत्यप्यन्वयेन कलितमित्यस्य ब्रह्मण्यप्यन्वयेन जगद्विभ्रमशब्दस्य जगद्रूपकार्यपरत्वेन च परिहृतं भवति । वियदुदाहरणेन विरुद्धधर्माणामध्यस्तत्वविभावनमनैन्द्रियके कथमपरोक्षाध्यास इति शङ्कानिराकरणं च कृतम् । यद्यप्यज्ञातमित्यस्य मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमानार्थेविहितक्तप्रत्ययान्तत्वे क्तस्य च वर्तमाने इति षष्ठ्या भाव्यं तथापि भूतार्थक्तप्रत्ययान्तत्व†मिह ग्राह्यम् । न च क्तस्य मत्याद्यर्थेभ्यो विशिष्य वर्तमानार्थे विधानात् तक्रकौण्डिन्यन्यायेन भूतार्थत्वबाधः स्यादिति वाच्यम् । तेनेत्यधिकारे दृष्टं साम उपज्ञाते इति सौत्रनिर्देशेन भाष्यादिषु कलिना दृष्टं साम कालेयं पाणिनिना उपज्ञातं पाणिनीयमिति तदुदाहरणदर्शनेन च बुद्ध्यर्थेभ्यो भूतार्थेऽपि क्तप्रत्ययानुमत्यवगमात् । केन चिद्रूपेणावगते रूपान्तरेणानवगते शुक्त्यादावध्यासो दृष्टः अतो निर्विशेषे स न सम्भवतीत्याशङ्कानिरासायोन्मुद्रेत्यादिविशेषणम् । न केवलं सदेव ब्रह्म किं तु चिदानन्दरूपमपि । यद्यपि‡ तच्च चिदानन्दरूपत्वमपि§ बाह्याध्यात्मिकसकलविषयसाक्षित्वात् परमप्रेमास्पदत्वाच्च कर्तृत्वाद्यध्यास‖काले ऽपि भासतएव तथापि ज्ञानं विषयविशेषानवच्छिन्नं सुखमपरिच्छिन्नं च सत् तदा न भासतइति दर्शयितुमुन्मुद्रत्वप्रततत्वविशेषणे ॥ १ ॥

यद्यपि सकलप्रपञ्चकारणं मायाशबलं सविशेषमीश्वररूपं ब्रह्म नमस्कार्यं न तु निर्विशेषं निरस्तकर्तृकर्मभावं तथापि तच्च तत्त्वदृष्ट्या प्रत्यगभे-

---

* तुशब्दो नास्ति ५ पु० ।
† क्तप्रत्ययान्तत्वमिति २ पु० ।
‡ यद्यपीति नास्ति ४ पु० ।
§ चिदानन्दरूपमपीति ४ पु० पा० ।
‖ कर्तृत्वाध्यासेति १-३-४ पु० पा० ।

दानुसंधानं युज्यते । अत एवाहंग्रहोपासनासु सर्वास्वभेदानुसंधानमिष्यते चिदानन्दघनस्य ब्रह्मणः प्राप्तौ साधनं फलमत उपपत्तेरिति न्यायेनोपासनाप्रसादितं ब्रह्मैवेति दर्शयति **बोधेति** । अथ शङ्करमित्यनेन मुक्तिसुखप्रदत्वं संसारेत्यादिविशेषणेन मुक्तिसुखाभिव्यक्त्युपपादकं तदावरकानर्थनिवृत्तिहेतुत्वं निर्मलेत्यादिविशेषणेनोक्तफलार्थं संसारोद्विग्नैर्भजनीयत्वं दक्षिणामूर्तिमित्यनेनोक्तार्थस्य अजात इत्येवं कश्चिद् भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यमिति श्वेताश्वरोपनिषन्मन्त्रप्रमाणकत्वं च दर्शितम् । उक्तफलं न श्रवणादिकं विनेति तत्संपादकत्वं पूर्वार्द्धेन दर्शितम् । यथा खल्वमृतांशुस्तत्तद्गगनप्रदेशावच्छिन्नस्वांशरूपैरंशुभिर्गगनगतं तिमिरमपनयन् वारिधिं चोद्वेलयन् प्रतिदिनमुदेति एवं* बहुशो ऽनेक†वेदान्तवाक्यश्रवणजन्यान्तःकरणवृत्त्यवच्छेदककृतभेदस्वांशरूपचित्प्रतिबिम्बैरन्तःकरणगततत्तद्वाक्यार्थाऽज्ञानमपनयन् ऊहापोहकौशलसाध्यमननचित्तैकाग्र्यसाध्यनिदिध्यासनरूपां प्रज्ञां चाभिवर्द्धयन्नुमया तचाकाशे स्त्रियमाजगाम उमां हैमवतीं बहु शोभमानामिति तलवकारिणामुपनिषदि ब्रह्मविद्याप्रदत्वेन प्रसिद्धया सहितः सन् यः सदोदेति नित्यमेव स्फुरतीति तदर्थः । अत्र सोम इति श्लेषोत्थापितो बोधाभीष्वित्यादिषु रूपकालङ्कारः ॥ २ ॥

अथ कृतश्रवणमनननिदिध्यासनस्य साक्षात्कारोदयेन प्राप्यं फलमपि ब्रह्मैवेति दर्शयति **माद्यदिति** । माद्यन् प्रपञ्चरूपेणोज्जृम्भमाणो मोह एव महेभः तस्य कुम्भ इव कुम्भः मूलाविद्याभागः । वक्ष्यमाणमौक्तिकद्योतालङ्कार्यकर्तृकदलनविषयत्वसाम्यात् । अत एव महेभत्वरूपणस्य मोहवत्कुम्भत्वरूपणस्याधिष्ठानरूपः कश्चित्तदंशो नोक्त इति न्यूनता न शङ्कनीया । मयूखनखरत्रुटत्तिमिरकुम्भिकुम्भस्थलोच्चलत्तरलतारकाकपटकीर्णमुक्तागण इत्यत्र प्रत्यग्रोदितचन्द्रमयूखसंस्पृष्टतिमिरपुरोभागस्येवात्र ब्रह्मसाक्षात्कारदलनीयमूलाविद्याभागस्यातिशयोक्त्या कुम्भत्वेनाध्यवसानात् । तस्य दलनं निवर्तकम् । प्रोद्भूतं जननं यस्य तथाभूतः सन्नुत्तमो मौक्तिको मुक्तिप्रयोजनः द्योतः प्रकाशो वृत्तिसाक्षात्कारः तेनालंकृतमभिव्यक्तं सत् सुखात्मकं‡ वपुः

---

* एवं चेति ५ पु॰ पु॰ । † अनेकेति न दृश्यते ४ पु॰ ।
‡ सुखाद्वयमिति ५ पु॰ पा॰ ।

स्वरूपमस्येति तथोक्तः। मुक्तिः प्रयोजनमस्येत्यर्थे प्रयोजनमिति सूत्रेण ठक्प्रत्ययान्तो मौक्तिकशब्दः। यद्वा माद्यन्मोहमहेभकुम्भस्य दलनेन निवर्तनेन प्रोद्भूतः अभिव्यक्तः सन्मौक्तिकसदृशः घर्षणनिर्मलीभूतमुक्ताफलसदृशः द्योतः स्वरूपसाक्षात्कारः तेनालंकृतं प्रकाशमानं सत् सुखाद्वयं वपुरस्येति तथोक्तः। सन्मौक्तिकद्योतेत्यत्र शाकपार्थिवादिवद् मध्यमपदलोपिसमासः। द्योतस्य सुखाऽभेदे ऽपि राहोः शिर इतिवद् भेदव्यपदेशः। माद्यन्मदशाली मोहयति मदगन्धमात्रेण प्रतिगजादीनिति मोहः। मोहयतेः पचाद्यच्। णेरनिटीति णिलोपः। तथाभूतस्य महेभस्य कुम्भदलनेन प्रोद्भूतानां निर्गतानां शुद्धमौक्तिकानां नखाग्रलग्नानां प्रकाशेनालंकृतं सत् सुखं रिपुसंहरणेन जायमानानन्दम् अद्वयं शौर्यं द्वितीयरहितं वपुरस्येति तथोक्तः। पूर्ववदलंकारः। एवमेभिस्त्रिभिर्नमस्कारश्लोकैः सामान्यतः शास्त्रस्य विषयो ऽध्यायानां चार्थः सूचितः॥ ३॥

ललितैरिति। अत्र वदनरङ्गादिरूपणस्य शाब्दतया विशिष्य वाच्यत्वेन वर्तमानत्वात् सरस्वत्यां नर्तकीरूपणस्य तद्गम्यत्वाच्चैकदेशविवर्तिरूपकालङ्कारः॥ ४॥

भजमानेति। भजमानानां विघ्न एव भित्तिः तस्याः प्रभित्तिः नाशकरणं कुद्दालमिवेति स्वरूपोत्प्रेक्षा। दशभुजस्य महागणपतेर्वामाधःकरेण स्वविषाणधारणं शुण्डाग्रधृतकलशस्थितरत्नवर्षेण भक्तेभ्यः सकलसंपत्प्रदानं च मन्त्रशास्त्रप्रसिद्धम्। प्रभिद्यते नाश्यते ऽनेनेति प्रभित्तिशब्दो ऽत्र नाशकरणवाची न तु विदारणक्रियावाची। अतो विदारणे भिदा ऽन्यत्र भित्तिरिति शाब्दिकमर्यादाया न विरोधः॥ ५*॥

ग्रन्थेति। ग्रन्थग्रन्थय इत्यभिधानमात्रेण भेदः। मुकुला एवैते इत्यनभिव्यक्तत्वसाम्याद् मुकुलत्वाध्यवसानरूपा ऽतिशयोक्तिः। यस्योदये स्फुटन्तीत्यनेनास्योदयात् पूर्वं शास्त्रेषु के चन कठिनप्रदेशाः केनापि नोद्घाटिता मुद्रिता एव स्थिता इति प्रतीतेरस्यान्येभ्यो व्याख्यातृभ्य उत्कर्षरूपो व्यतिरेकालंकारो व्यज्यते। **व्याकुर्वत्यपीति**। अनेनास्य शब्दश्रवणतो ऽपि तिमिरं शाम्यति न तु प्रादुर्भावमपेक्षते इति प्रसिद्धचन्द्रादुत्कर्षरूपो व्यतिरेका-

* इतो ऽग्रे ६-७-८-९ श्लोकानां विशदार्थत्वात्ते न व्याख्याताः।

लंकारो व्यज्यते* । **प्रोद्यदिति** । प्रोद्यन्ती प्रसर्पन्ती तारकेषु प्रणवेषु दिव्यस्य द्युसम्बन्धिनः यः पुनरेतं त्रिमात्रेणेतिश्रुतौ ब्रह्मलोकाख्योक्तद्युलोकप्राप्तिफलकत्वेन श्रुतस्य त्रिमात्रप्रणवस्य दीप्तिः प्रकाशनशक्तिर्यस्मिन् तत्तथोक्तम् । यद्वा प्रोद्यन्ती तारकशब्दोपलक्षितानां न तत्र सूर्यो भातीत्यादिश्रुत्युक्तानां सूर्यचन्द्रविद्युन्नक्षत्राणां दिव्या दिवि भवा गगने प्रसृता† दीप्तिर्येन तत्तथोक्तम् । यद्वा प्रोद्यन्त्यः उन्नमन्त्यः तारकाः जनानामक्षिकनीनिकाः यया सा तथोक्ता तथाभूता दिव्या दिवि प्रसृता दीप्तिर्यस्य तत्तथोक्तम् । अथ यदतः परो दिवो ज्योतिर्दीप्यतइति श्रुतौ हि ब्रह्मणो दिवि प्रसृता दीप्तिरुक्ता तद्विशिष्टब्रह्मोपासनस्य फलं श्रुतं चक्षुष्यः श्रुतो भवतीति अत इयं दीप्तिरुपासकस्य चक्षुष्यत्वफलप्रदानद्वारा तमवलोकयतां सुन्दरवस्तुदर्शनकौतुकेन चक्षुर्विस्फारणहेतुर्भवतीत्ययमर्थः प्रोद्यत्तारकेति दीप्तिविशेषणेनोक्तः । **परमं व्योम** सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठितेति श्रुतिप्रसिद्धं परं ब्रह्म । चन्द्रपक्षे प्रोद्यन्त्या नक्षत्राणां दिव्यया स्वर्लोकभवया दीप्त्या परा प्रकृष्टा मा शोभा यस्य तथाभूतं व्योमेति योज्यम् । **नीराज्यते** प्रकाश्यते ॥ १०‡ ॥

रूढ इति§ । वेदस्यैकदेशः काण्डं ब्रह्मकाण्ड एव काण्डः समुद्रसलिलं तस्मात्प्रादुर्भूतः । काण्डो ऽस्त्री दण्डबाणार्ववर्गावसरवारिषु इति निघण्टुः । वृक्षपक्षे भूरिः शाखासु वीनां पक्षिणां चारो ऽस्येत्यर्थः । **वीन्द्र इति** । जीवेश्वरयोः प्रधानपक्षित्वोक्त्या वृक्षपक्षे तेन‖ विशेषणेनापौनरुक्त्यम् । कल्पवृक्षः सर्वेषां विबुधानामिवायं ग्रन्थः सर्वेषां वेदान्तानां तात्पर्यविषयस्यार्थस्य प्रतिपादने समर्थं इति कल्पवृक्षत्वाध्यवसानम् ॥ १२¶ ॥

ईश्वरायेति । सर्वज्ञायेत्यपि शक्यं व्याख्यातुम् । मेधावी तु ३
विधाता स्याद्बुधः सर्वज्ञ उच्यते इति वेधास्त्रिषु स्यात्सर्वज्ञे नरि विष्णुविरिञ्चयोरिति च नैघण्टुकाः ।

अवतारः प्राप्तिर्यस्मिन्निति । ननु ज्ञानशक्त्यवतारायेत्यत्र अवतारशब्दस्य प्राप्त्यर्थत्व**माश्रित्य बहुव्रीहिसमासप्रदर्शनमयुक्तं समानाधि-

---

* व्यतिरेको व्यज्यते इति २ पु॰ पा॰ । † प्रवृत्तेति २ पु॰ पा॰ ।

‡ एतदुत्तरं ११ श्लोकोपि स्फुटत्वान्न विवृतः । § अयं ग्रन्थो नास्ति २–५ पु॰ ।

‖ वृक्षे तेनेति २–५ पु॰ पा॰ । ¶ एतदुत्तरं १३ श्लोको ऽपि स्पष्टत्वान्न व्याख्यातः ।

** प्राप्त्यर्थमिति ४ पु॰ पा॰ ।

करणानां बहुव्रीहिरिति वार्त्तिककारेण नियमितत्वात् । न धातुलोप आर्द्धधातुके इति पाणिनिसूत्रे धातुलोपशब्दे षष्ठीगर्भव्यधिकरणबहुव्रीह्याश्रयणात् तद्वदिह तदुपपादने ऽपि ऋदोरबित्यबन्तस्यावतरशब्दस्येव घञन्तस्यावतारशब्दस्य भावार्थत्वाभावात् । अवे तॄस्त्रोर्घञिति सूत्रेणावपूर्वात्तरतेः करणाधिकरणयोरेव घञ्विधानात् । अतो ऽवतारशब्दस्याधिकरणार्थत्वमाश्रित्य ज्ञानशक्तेरवतारायेति षष्ठीतत्पुरुषः प्रदर्शयितुं युक्त इति चेद् यद्येवं स एवाचाचार्यैः प्रदर्शित इति ब्रूमः । प्राप्तिर्यस्मिन्नित्युभयमप्यवतारपदव्याख्यानार्थं न तु प्राप्तिपदमात्रं प्राप्तिर्यस्मिन् सो ऽवतार इत्यर्थः ॥

४ । ६ अथशब्द इति । मङ्गलश्लोके शास्त्रीयविषयप्रयोजनप्रदर्शनेन तथाभूते* ब्रह्मणि भाष्यस्य तात्पर्यमिति कृत्स्नं भाष्यं सामान्यतो व्याख्यातम् । इदानीं प्रतिग्रन्थं व्याख्यानं प्रारभ्यते इत्येतदर्थो ऽथशब्द इत्यर्थः। यद्यपि प्रारभ्यतइत्यनुक्ते ऽपि प्रारम्भादेवेदं प्रारभ्यतइत्यवगन्तुं शक्यं तथापि श्रोतॄणां श्रद्धेयत्वप्रतिपत्त्यर्थं तदुक्तिः । दृश्यते हि तदर्थमेव लोके ऽप्याप्ताः किं चिदहं वक्ष्यामीत्युक्त्वा हितमुपदिशन्तीति ।

,, । ११ मुमुक्षुणेति । ननु हेतुसाध्ययोर्मुमुक्षुविशेषणं किमर्थम् । न च अमुमुक्षोः सर्वप्रपञ्चविषयो येन केन चित्प्रकारेण संदेहस्तन्निवर्तनार्थं विचारश्च सम्भवतीति कुम्भाहमर्थयोरपि तद्विषयत्वावश्यम्भावाद् दृष्टान्ते हेतुसाध्यवैकल्यं पक्षे हेत्वसिद्धिबाधौ च स्यातामिति तद्वारणार्थं मुमुक्षुविशेषणमिति वाच्यम् । मुमुक्षोरपि तथाविधसन्देहविचारयोः सम्भवेन तत उक्तदोषाऽनिवारणात् । न च यस्य मुमुक्षोस्तौ न स्तः सो ऽत्र विशेषणमिति वाच्यम् । ब्रह्मविचारार्थम् इदं शास्त्रमारम्भणीयमिति वदतः सिद्धान्तिनो मते प्रपञ्चः सत्यो मिथ्या वा सन् असन्वा जीवः स्वाभाविकचैतन्य आगन्तुकचैतन्यो वेत्यादिसंदेहस्य तत्तदधिकरणनिरूपितन्यायानुसन्धाननिवर्त्तनीयस्यावश्यम्भावेन प्रतिवादिनं प्रति पक्षदृष्टान्तयोर्हेत्वसिद्धेरनिवारणात् । मुमुक्षुज्ञातव्येन रूपेणासन्दिग्धत्वं हेतुर्विवक्षित इति चेद् न । स्वाभाविकचैतन्यत्वादेरपि मुमुक्षुज्ञातव्यतायाः सिद्धान्तिना वाच्यत्वात् । अन्यथा तेन मोक्षार्थमारभ्यमाणे ऽस्मिन् शास्त्रे तद्विचारानुपपत्तेरिति चेत् । उच्यते । मोक्षजनकत्वाभिमतज्ञानविषयेण रूपे-

* तत्तथाभूते इति १-३-४ पु॰ पा॰ ।

णासन्दिग्धत्वं हेतुः । न चाहन्त्वादन्यद् मोक्षजनकत्वाभिमतज्ञानविषय इति सिद्धान्तिना वक्तुं शक्यम् । ब्रह्मज्ञानं मोक्षहेतुरिति वदतः सिद्धान्तिनो मते अहमिति ज्ञानमेव मुक्तिहेतुः स्यादित्यापाद्य पूर्वपक्षप्रवृत्तेः । पक्षदृष्टान्तयोर्बाधसाध्यवैकल्यपरिहारार्थं साध्ये ऽपि मुमुक्षुविशेषणम् । अन्यथा सर्वप्रपञ्चविषयसत्यत्वमिथ्यात्वारम्भपरिणामादिविचारं मुमुक्षवमुमुक्षुकृतं प्रतिपक्षदृष्टान्तीकृताऽहमर्थकुम्भव्यक्त्योरपि विषयत्वावश्यम्भावाद् बाधसाध्यवैकल्ये स्याताम् । न च मुमुक्षुविशेषणलभ्ये मोक्षजनकत्वाभिमतज्ञानविषयेण रूपेण विचार्यत्वाभावे विवक्षिते ऽपि साध्ये दोषतादवस्थ्यम् । पक्षे अहन्त्वस्य दृष्टान्ते तद्व्यतिरेकस्य च लोकसिद्धत्वे ऽप्यनुमित्सया विचारसम्भवादिति वाच्यम् । मोक्षजनकज्ञानप्रकारप्रकारकसंदेहनिवृत्त्यर्थविचारविषयत्वाभावस्य साध्यार्थस्य विवक्षितत्वात् । एवं चाहमिति सदा ऽवभासमानं ब्रह्म नाहन्त्वप्रकारकसंदेहनिवर्तकविचारविषयः अहन्त्वेन निश्चीयमानत्वाद् यो यदा येन प्रकारेण निश्चीयते स तदा न तत्प्रकारकसंदेहनिवर्तकविचारविषयः यथा समनस्केन्द्रियसंनिकर्षे स्फीतालोकमध्यवर्तितादशायां घट इत्यनुमाननिष्कर्षः । न च प्रतियोग्यप्रसिद्ध्या साध्याऽप्रसिद्धिर्दोषः । साध्यविशेषप्रसिद्धिं विना ऽपि घटे सामान्यव्याप्तिग्रहोपपत्तेः । विशिष्टवैशिष्ट्यज्ञानरूपायाः प्रतियोगिविशिष्टाभावरूपसाध्यविशिष्टानुमितेः अहन्त्वप्रकारकत्वसंदेहनिवर्तकविचारविषयत्वयोर्विशकलितप्रसिद्ध्या विशेष्ये विशेषणं तत्र च विशेषणान्तरमित्युक्तरूपविशिष्टवैशिष्ट्यज्ञानसामग्र्योपपत्तेः* । न च प्रतियोग्यप्रसिद्धिरपि । देहेन्द्रियेषु तत्प्रसिद्धेः सुलभत्वात् ।

देहादात्मन इति । मम देह इत्यभिज्ञारूपेपि भेदग्रहो ४ । १
विवक्षितः । **परिमाणभेदे ऽपीति** । काष्ठपाषाणादिषु तक्षणादिना शरीरेषु कालभेदेन च परिमाण†भेदे ऽप्यभेदप्रत्यभिज्ञोदयस्तथाऽभिमानबीजम् । **कृत्रिमेति** । योगमहिम्ना ।

ह्रस्वता स्थूलता बाल्यं वार्द्धकं यौवनं तथा ।
नानाजातिस्वरूपं च तथा सुरभिगन्धता ॥
पार्थिवांशं विना भूतैश्चतुर्भिर्देहधारणम् ।
गन्धतन्मात्रतत्त्वोत्थमेतदष्टगुणं महत् ॥

---

* साम्यत्वोपपत्तेरिति ४ पु० । † परिणामेति ४ पु० ।

इत्युक्तरूपपार्थिवैश्वर्याष्टकलाभाल्लीलाद्यर्थं * व्याघ्रशरीरं कृत्वा तदभिमन्यमान इत्यर्थः । तद् व्याघ्रशरीरं योगिसङ्कल्पकरणेन कृत्रिमम् † ।
१ । १० पटः शुक्ल इति । गुणशब्दः तद्वति निरूढलक्षणया प्रयुज्यते । रथाङ्गशब्दश्चक्रवाकशब्दैकदेशपर्यायस्तद्वाच्ये साम्प्रतिकलक्षणया प्रयुज्यते । एवं चाहमेव त्वमित्यत्रेव भाष्यकारीये ऽपि युष्मत्प्रयोगे साम्प्रतिकी गौणी वृत्तिः । सा चात्यन्तभेदावभासद्योतनार्था । इदङ्कारस्याहङ्काराऽविरोधशङ्कया‡ स्फुटभेदानवभासादिति भावः । अयमहमस्मीति छन्दोगतैत्तिरीयाणां श्रुतिः । अविवेकादिति । येषां तु तमःप्रकाशयोर्विवेको भेदग्रहो ऽस्ति तेषां तयोरन्योन्यात्मत्वेनाऽस्फुरणं नियतमेवेति भावः । नन्वितरेतरभावानुपपत्तिस्तत्प्रतीत्यनुपपत्तिरिति किमर्थमिदं क्लिष्टव्याख्यानम् । अधिष्ठानसामान्यांशाध्यस्यमानविशेषांशयोः क्व चिद्वास्तवतादात्म्ये सत्येव तत्प्रमितिजन्यसंस्कारापेक्ष इदं रजतमित्याद्यध्यासो दृष्टस्तदसम्भव इहाध्यासाऽसंभवहेतुत्वेनोच्यतइत्यस्त्वित्याशङ्क्याह तन्मात्रानुपपत्तिसाधने इति । आत्मानात्मनोर्वास्तवतादात्म्यासम्भवस्य सिद्धान्तिना ऽप्यङ्गीकृतत्वाद् विरोधहेतुना तत्साधनं सिद्धसाधनदूषितमित्यर्थः । ननु बुद्धिपूर्विकायां गृहक्षेत्रादिपरिवर्तनायां प्रसिद्धस्य विनिमयशब्दस्य कथमत्र प्रयोग इत्याशङ्क्य व्यत्यासमात्रे लक्षणयेत्याह
१ । २० विनिमय इति ।

ननु रूपवत एव प्रतिबिम्ब इति नास्ति नियमः । जानुदघ्ने कूपजले दूरविशालतलमलिनतादियुक्तगगनप्रतिबिम्बदर्शनादित्याशङ्क्याह गगनस्येति । ननु रूपवत एव प्रतिबिम्ब इति नियममादृत्याऽऽलोकप्रतिबिम्बे गगनप्रतिबिम्बत्वविभ्रममात्रं न तु गगनस्य प्रतिबिम्बो ऽस्तीति कल्पने रूपवत एव चाक्षुषत्वमिति नियममनुरुध्य गगनप्रसृतालोके एव तलमलिनताध्यासः गगने तलमलिनताध्यास इति विभ्रममात्रमित्यपि कल्प्येत तथा चाप्रत्यक्षे ऽपि ह्याकाशे बालास्तलमलिनताद्यध्यस्यन्तीति भाष्यविरोधः । यदि रूपवदेव चाक्षुष§मिति न नियमः किं तु रूपवदरूपं वा रूपोपधानेन चाक्षुषमिति नियमः अतो नीरूपस्यापि गगनस्याध्यस्यमानतलमलिनताद्युपधानेन चाक्षुषत्वमुपप-

---

* तल्लीलाद्यर्थमिति १-३ पु॰ पा॰ । † संकल्पकरणेन कृतमिति कृत्रिममिति ५ पु॰ पा॰ ।
‡ अहङ्काराविरोधकतयेति २ पु॰ पा. । § रूपवत-एवेति ५ पु॰ वर्जं सर्वेषु पाठः ।

द्यतइत्युच्येत तर्हीहापि रूपवतः प्रतिबिम्ब इति न नियमः किं तु रूपोपधानेन प्रतिबिम्बविभ्रम इति । अतो ऽध्यस्यमानतलमलिनताद्युपधानेन गगनप्रतिबिम्बविभ्रम उपपादयितुं शक्यः । तथैव देहे चेतनप्रतिबिम्बविभ्रमो ऽप्युपपादयितुं शक्यः। चेतने ऽपि देहगतरूपेणैव रूपोपधानसम्भवाद् मलिनदर्पणादिषूपाधिगतश्यामिकोपधानेनापि प्रतिबिम्बविभ्रमदर्शनादिति चेत् । उच्यते । जले गगनप्रतिबिम्बमभ्युपगच्छता ऽऽप्यालोकप्रतिबिम्बो ऽवश्यमभ्युपगन्तव्यः। अन्यथा कूपाधिकपरिमाणरूपस्य प्रतिबिम्बगतविशालत्वस्याचाक्षुषत्वप्रसङ्गात्। यत्र रूपं भासते तत्रैव परिमाणस्य चाक्षुषत्वात् । एवं च गगनालोकयोरुभयोरपि प्रतिबिम्बावङ्गीकृत्यालोकप्रतिबिम्बे भासमानस्य विशालत्वस्य गगनप्रतिबिम्बगतत्वेन विभ्रम इति कल्पनाद्वरमालोकप्रतिबिम्बएवाधःप्रदेशे तलमलिनताद्यध्यासः* । अन्यच्च तदीयरूपविशालताभ्यां सह स्फुरणं तत्रैव गगनप्रतिबिम्बत्वविभ्रम इति कल्पनम् । बहिस्तु नीलं नभः विशालं नभ इत्यादिप्रत्ययस्यालोकविषयत्वं न कल्पनीयम् । जलमध्ये नभःप्रतिबिम्बस्येव बहिर्नभसो ऽसम्प्रतिपत्त्यभावेन यथाव्यवहारं नभसि नीलिमाध्यासस्य तस्मिन्नेव तत्प्रसृतालोकगतरूपाध्यासेन तदीयविशालतानुभवस्य चाङ्गीकारे बाधकाभावात् । अतो रूपवत एव प्रतिबिम्ब इति नियमे व्यभिचाराभावाद् नात्मनः प्रतिबिम्बो घटतइति भावः । गगनप्रतिबिम्बत्वविभ्रमविषयाऽऽलोकप्रतिबिम्बवद् आत्मप्रतिबिम्बत्वभ्रमविषये देहादौ रूपवतः कस्य चित् प्रतिबिम्बो ऽस्ति चेत् तस्माच्च प्रतिबिम्बोपाधेर्देहस्य जपाकुसुमप्रतिबिम्बात्स्फटिकस्येव विवेकाऽग्रहो ऽप्यस्ति चेदध्यस्तगगनधर्मस्य नीलिम्नो जलमध्ये भासमानस्यालोकप्रतिबिम्बधर्मत्वेनेवाध्यस्तात्मधर्मस्य चैतन्यादेर्देहमध्ये भासमानस्यात्मप्रतिबिम्बत्वभ्रमविषयान्यप्रतिबिम्बधर्मत्वेन प्रतिभासः सम्भवेत् । एवंप्रतिभासतस्तद्धर्मस्य चैतन्यादेः प्रतिबिम्बग्राहिणि देहादावध्यासश्चोपपद्यते । जपाकुसुमप्रतिबिम्बारुणिम्न इव स्फटिके न तवात्मप्रतिबिम्बत्वभ्रमविषयः कस्य चित्प्रतिबिम्बो ऽस्ति देहादावित्याह **आत्मनस्त्विति** । ५ । ः

नन्वितरेतरभावानुपपत्तिरितरेतरभावप्रतीत्यनुपपत्तिरिति व्याख्यातम् । अतः सैवाध्यासाभाव इति तेनैव तत्साधने साध्याऽवैशिष्ट्यमित्याशङ्क्य हेतुसाध्य-

* मलिनताध्यास इति १-४ पु॰ पा॰ ।

योर्भेदं दर्शयति **अध्यासानुपपत्तिमुक्त्वेति ।** अनुपपत्तिरन्योन्यानात्मतास्फुरणेन* प्रतिबन्धादुत्पत्त्यनर्हत्वं स हेतुः अध्यासाभावस्ततो भिन्नः साध्य† इति भावः । अथ वा अहं मनुष्य इत्यादिप्रतीतावतस्मिंस्तत्प्रतीतित्वस्याध्यासलक्षणस्याभावे उक्ते लक्ष्याध्यासरूपत्वस्याभावप्रदर्शनार्थमतो ऽस्मत्प्रत्ययेत्यादिभाष्यमिति व्याख्यान्तरं केषु चित्कोशेषु दृष्टम् । अस्यां व्याख्यायामतो ऽस्मत्प्रत्ययेत्यतः प्राचीनग्रन्थो ऽहं मनुष्य इत्यादिप्रतीतावध्यासलक्षणाभावसमर्थने‡ फलतः पर्यवसन्नो द्रष्टव्यः ।

६ । ८ **ज्येष्ठस्यापीति ।** अपच्छेदन्यायेन§ पूर्वस्य परेण बाधमाशङ्क्य तदपेक्षस्येति‖ विशेषितं तेनोत्तरस्य पूर्वापेक्षायामुपक्रमाधिकरणन्याय एव प्रवर्तत इति सूचितमित्यर्थः । **आद्यद्वयं निरस्येति ।** अपौरुषेयतयेत्यादिषष्ठ्यन्तविशेषणद्वयेनेति शेषः । **एवमप्रामाण्यं निराकृत्येति ।** ननूत्पादकाऽप्रतिद्वन्द्वित्वादित्यप्रामाण्यनिराकरणहेतुनैवोपचरितार्थत्वमपि निराकृतं किमर्थं पुनस्तन्निराकरणाय प्रागुपपादितमनन्यपरत्वं स्मार्यत इत्याशङ्क्याह

, । १४ **पूर्वमिति ।**

नन्विह का पुनरप्युपजीव्यविरोधशङ्का यन्निरासायानन्यपरत्वहेत्वन्वेषणम् । उत्पादकाऽप्रतिद्वन्द्वि¶हेतुविवरणग्रन्थएव हि यदुपजीव्यं न तेन विरोधः येन विरोधः न तदुपजीव्यमित्युपजीव्यविरोधशङ्का निरस्ता । उच्यते । उपजीव्योपजीवकविरोधो ऽत्र द्वेधा समाधातुं शक्यते । उपजीव्यं प्रत्यक्षमौत्सर्गिकात् तत्त्वावेदकप्रमाणभावात् प्रच्याव्य तस्य सांव्यवहारिकविषयसमर्पणेन वा उपजीवकं वाक्यजातमौत्सर्गिकान्मुख्यार्थात्प्रच्याव्य तस्यौपचारिकविषयसमर्पणेन वा तत्रोपजीव्योपमर्दादुपजीवकोपमर्दो वरमिति न्यायमवलम्ब्य शङ्कायां तत्समाधानार्थमनन्यपरत्वस्य पुनरनुकीर्तनम् । इत्थं च तत्समाधानप्रकारो विवक्षितः। अस्त्युपजीव्यस्यापि बलवता उपजीवकेनोपमर्दः पूर्वतन्त्रे निर्णीतः।

यथा—विप्रतिषेधे करण**समवायविशेषादितरमन्यस्तेषां यतो विशेषः

* अन्योन्यात्मनेति शोधितं ५ पु· ।
† भिन्नसाध्य इति २ पु· ।
‡ अध्यासलक्षणाभावलक्षणसमर्थने इति ४ पु· पा· ।
§ जैमिनिसू· अ· ६ पा· ५ सू· ५४ ।
‖ सापेक्षस्येतीति ४–पु· पा· ।
¶ अप्रतिद्वन्द्वित्वेति ५ पु· ।
** सौत्रः पाठः करणः इति दृश्यते परं सर्वेषु पुस्तकेषु करणेत्येवोपलम्भात् स एवोपरि धृतः ।

स्या*दित्यधिकरणे चिन्तितम् । कुण्डपायिनामयने श्रूयते यो होता सो ऽध्वर्युरिति । तत्र होत्रध्वर्युशब्दयोर्भिन्नपुरुषवाचिनोर्मुख्यसामानाधिकरण्याऽयोगादन्यतरस्य लक्षकत्वे कल्पनीये प्रथमश्रुतस्य होतृशब्दस्य मुख्यवृत्त्या† चरमश्रुतस्याध्वर्युशब्दस्याध्वर्युकर्मलक्षकत्वमिति तल्लक्षिते ऽध्वर्युकर्मणि कर्तृत्वेन होतुर्विधिः । तेन प्रकृतितः प्राप्तयोरध्वर्युहोत्रोरध्वर्योर्निवृत्तिः । होत्रैवाध्वर्यवमपि कर्तव्यमिति व्यवस्था । तत्र यूपपरिव्याणकाले परिवीरसि युवा सुवासा इत्यनयोः परिव्याणे क्रियमाणानुवादिकरणमन्त्रयोरध्वर्युणा होत्रा च प्रयोज्ययोः परिव्याणसङ्कल्पप्रभृति तत्समाप्तिपर्यन्तमनुवर्तमानः क्रियमाणानुवादी तन्मध्यपाती परिव्याणारम्भसंनिपाती करणमन्त्र इति कालैक्यमापन्नयोस्तथैव कुण्डपायिनामयने ऽपि प्राप्तावेकेन होत्रा युगपदुभयोः प्रयोक्तुमशक्यतया ऽवश्यमन्यतरबाधे वक्तव्ये प्रत्यक्षश्रुतिविधीयमानाध्वर्युकर्मबाधाऽयोगादानुमानिकप्रकृतिवच्छब्दप्राप्तहोतृकर्मबाध इति तत्र होतुः प्रकृतिवच्छब्देन प्राप्तिः प्रत्यक्षवचनस्योपजीव्या विकृतौ पदार्थप्राप्तिरुपकारमुखेनेति होतृकर्मप्राप्तिरपि होतृप्राप्त्यर्थत्वेनोपजीव्या । सा चोपजीव्यहोतृकर्मप्राप्तिरविशेषप्रवृत्ता युवा सुवासा इति मन्त्रप्रयोगमपि स्पृशति । अध्वर्युशब्दश्चाध्वर्युकर्माणि लक्षयन् परिवीरसीति मन्त्रप्रयोगमपि स्पृशति । उभयोरप्युदाहृतमन्त्रद्वयप्रयोगातिरिक्तविषयत्वेन सावकाशता ऽप्यस्ति । एवं सत्यप्युपजीवकस्य प्रत्यक्षवचनत्वेन प्राबल्यादुपजीव्यस्यैवोपमर्दः संश्रितः ।

तथा–हिरण्यगर्भे पूर्वस्य मन्त्रलिङ्गा‡दित्यधिकरणे चिन्तितम् । वायव्यपशौ श्रूयते हिरण्यगर्भः समवर्तताग्रइत्याघारमाघारयतीति । तत्र किममन्त्रके प्रजापतिदेवताके प्रथमाघारे मन्त्रो विधीयते उत मन्त्रवतीन्द्रदैवत्ये द्वितीयाघारे प्राकृतमन्त्रापवादकं मन्त्रान्तरं विधीयतइति संशये हिरण्यगर्भशब्दस्य प्रजापतिनामत्वप्रसिद्धेः प्रजापतिर्वै हिरण्यगर्भ इति वाक्यशेषाच्च विनियोज्यमन्त्रस्वारस्यानुरोधेन प्रथमाघारइति पूर्वः पक्षः । द्वितीयाघारे मन्त्रकार्यनियमादृष्टस्य क्लृप्तत्वादक्लृप्तत्वाच्च प्रथमाघारे तदकल्पना लाघवानुसारेण द्वितीयाघारे मन्त्रविधिरिति सिद्धान्त इति । अत्राघारमन्त्र-

* जैमिनिसू॰ अ॰ ३ पा॰ ८ सू॰ २१ ।
† मुख्यवृत्ततयेति २ पु॰ पा॰ । मुख्यवृत्तितयेति ४ पु॰ पा॰ ।
‡ जैमिनिसू॰ अ॰ १० पा॰ ३ सू॰ १३ । हिरण्यगर्भः इति सौत्रः पाठः ।

विधौ मन्त्र उपजीव्यः प्रसिद्धं मन्त्रमादाय तद्विनियोगस्य कार्यत्वात् । आघारे तद्विधिरुपजीवकः तत्र मन्त्रः कथं चिदिन्द्रे योगकल्पनया सावकाशः । तदुपजीवकविधिगताघारशब्दस्तु द्वितीयाघारइव प्रथमाघारे ऽपि प्रसिद्धवृत्त्यैव सावकाशः । एवं सत्यपि लाघवानुगृहीतस्योपजीवकस्य प्राबल्येनोपजीव्यस्य क्लिष्टवृत्तिराश्रिता । एवमिहाप्यद्वैतवाक्यजातस्योपक्रमादितात्पर्यलिङ्गयुक्तत्वेन प्राबल्यात्तदुपजीव्यस्य प्रत्यक्षस्यैव व्यावहारिकविषयसमर्पणेनोपमर्दः कल्पयितुं युक्त इति । एतेनोपजीव्यविरोधे तात्पर्यवत्त्वमेव न सिध्यतीत्यपि शङ्का निरस्ता । तदुपजीव्यविरोधे ऽपि तात्पर्यवता वाक्येनोपजीव्योपमर्दस्य दर्शितत्वात् ।

। १५ **विधायके इति** । नन्वेतदयुक्तम् । सोमेन यजेतेति विधिवाक्ये सोमवता यागेनेति मत्वर्थलक्षणाङ्गीकारात् तत्तुल्यमित्येदप्ययुक्तम् । तत्त्वमसिवाक्ये भागत्यागलक्षणाङ्गीकारादिति चेत् । उच्यते । विधिवाक्यं तत्तुल्यं वा तात्पर्यवद्वाक्यं यत्किं चिदनुग्रहार्थम् अन्यमर्थं नेतुमयुक्तमिति तदभिप्रायः । एवं च विशिष्टविधिपरे सोमवाक्ये सोमद्रव्यतादात्म्यविशिष्टयागविध्यभ्युपगमे तस्य विशिष्टस्य विधेयस्य दध्यादिवद् लोकसिद्धत्वाभावेन विधिवाक्यादेव देवताधिकरणो*दाहरिष्यमाणरेवत्याधारवारवन्तीयविशेषणस्येव विना तात्पर्यं सिद्धिरेष्टव्या । न च तात्पर्यरहितादागमाद्यागसोमलताभेदग्राहिप्रत्यक्षविरुद्धार्थः सिध्यतीति तत्र तदविरोधाय मत्वर्थलक्षणाश्रयणम् । अद्वैतश्रुतेस्तु तात्पर्यविषयादन्यत्र नयनमेव नास्तीति न कश्चिद्दोषः । ननु प्रत्यक्षज्ञानप्रामाण्यं ज्ञानसमानवित्तिवेद्यतया ज्ञाने प्रकाशमाने विशिष्य नियमेन प्रतीतं नाद्वैतश्रुत्या बाधनमर्हतीत्याशङ्क्य विशिष्य नियमेन प्रतीतस्यापि पूर्वस्य परेण बाधे टीकाया†मपच्छेदन्यायो‡दाहरणं कृतम् । तत्र पूर्वस्य परोपजीव्यत्वं नास्तीति वैषम्याशङ्कानिराकरणपूर्वकं तदवतारयति **एवं तावदिति** । किमद्वैतश्रुतेः प्रत्यक्षं प्रमाणं सदुपजीव्यमिति प्रामाण्यस्य प्राबल्यमुच्यते उतानुपजीव्यत्वे ऽपि प्रथमप्रतीतत्वमात्रेण । आद्यपक्षो न शङ्कार्ह इत्याह

---

* व्याससू॰ अ॰ १ पा॰ ३ सू॰ ३३ ।

† टीकायाम्=भाष्यटीकायां भामत्यामित्यर्थः । एवमग्रे ऽपि । दीक्षायामिति ५ पु॰ ।

‡ जैमिनिसू॰ अ॰ ६ पा॰ ५ सू॰ ५४ ।

उपजीव्यत्वमिति । प्रत्यक्षस्य प्रमाणस्य सत इति शेषः । द्वितीयपक्षनिराकरणार्थमुत्तरग्रन्थ इत्याह **मुख्यत्वमात्रस्येति ।** ६ । १९

ज्योतिष्टोमे बहिष्पवमानार्थं हविर्द्धानाद् निर्गच्छतां ऋत्विग्यजमानानामन्वारम्भणं विहितम् । अध्वर्युं प्रस्तोतान्वारभते प्रस्तोतारमुद्गातोद्गातारं प्रतिहर्त्तेत्यादिना । तद्विच्छेदे प्रायश्चित्तमाम्नायते यद्युद्गाता ऽपच्छिद्येतादक्षिणं तं यज्ञमिष्ट्वा तेन पुनर्यजेत तत्र तद् दद्यात् यत् पूर्वस्मिन् दास्यन् स्यात् यदि प्रतिहर्त्ता ऽपच्छिद्येत सर्ववेदसं दद्यादिति । तत्र पूर्वनिमित्तकर्त्तव्यताबुद्धिः परनिमित्तकर्त्तव्यताबुद्ध्या यथा बाध्यते तथा श्रुतिजन्याऽद्वैतबुद्ध्या परया पूर्वप्रत्यक्षजन्या कर्तृत्वादिबुद्धिर्बाध्यते । बाधिता ऽपि सा तदुचितविषयसमर्पणेन शुक्तिरूप्यादिबुद्धिवदनुग्राह्येति यावद्ब्रह्मज्ञानाऽबाध्यव्यावहारिकविषयाङ्गीकारात् तद्विषयं प्रत्यक्षादि व्यावहारिकप्रमाणमिति व्यपदिश्यते । व्यावहारिकमेव* प्रत्यक्षादिसिद्धं तत्तत्कारणस्वरूपं प्रमित्युत्पत्तावपेक्षितमिति तदबाधात् तद्गततात्त्विकांशबाधे ऽपि शरशास्त्रस्य वेद्यास्तरणप्राप्त्यर्थं प्रकृतिवच्छब्दापेक्षस्य† तत्प्राप्तकुशांशबाधइव अपरामृष्टप्रकृतिवच्छब्दजन्यबुद्धौ कुशांशप्रामाण्यबाधइव च नोपजीव्यविरोध इत्याशयः ।

यत्त्वेकस्मिन्नपि प्रयोगे क्रमिकाभ्यां निमित्ताभ्यां तत्तन्नैमित्तिककर्त्तव्यतयोर्बदरफले श्यामरक्तरूपयोरिव क्रमेणोत्पादाद्रूपज्ञानद्वयवत् कर्त्तव्यताज्ञानद्वयमपि प्रमाणमेवेति न परेण पूर्वज्ञानबाधे ऽपच्छेदन्याय उदाहरणमिति । तन्न । अङ्गस्य सतः कर्तव्यत्वं न च पश्चाद्गाविप्रतिहर्त्रपच्छेदवति पूर्ववृत्तोद्गात्रपच्छेदप्रायश्चित्तस्याङ्गत्वमस्ति । आहवनीयशास्त्रस्य पदहोमातिरिक्तहोमविषयत्ववत् तदङ्गत्वबोधकशास्त्रस्य पश्चाद्गाविप्रतिहर्त्रपच्छेदरहितक्रतुविषयतायाः सिद्धान्तितत्वात् । उक्तं हि न्यायरत्नमालायाम् । तत्रैवं सति शास्त्रार्थो भवति पश्चाद्गाव्युद्गात्रपच्छेदविधुरप्रतिहर्त्रपच्छेदवतः क्रतोः सर्ववेदसदानमङ्गमेवमुद्गात्रपच्छेदे ऽपि द्रष्टव्यमिति । न च मीमांसकमर्यादामतिक्रम्य परकर्त्तव्यतानिवर्त्यं पूर्वकर्त्तव्यत्वं नि-

* एव चेति ५ पु॰ पा॰ ।   † शब्दाद्यपेक्षस्येति पाठः ४ पु॰ ।

वक्तुमपि शक्यम् । न हि कृतिसाध्यत्वयोग्यत्वं तत् । तस्य पश्चादपि सत्त्वात् । नापि फलमुखकृतिसाध्यत्वम् । तस्य पूर्वमप्यजननात् । नाप्यङ्गत्वम् । तस्य संनिपत्योपकारकत्वफलोपकारकत्वान्यतररूपकारणताविशेषत्वेन तत्र योग्यत्वफलमुखत्वविकल्पे पूर्वोक्तदोषानतिवृत्तेः । न च कर्तव्यत्वं नाम धर्मान्तरमागमापायि कल्पनीयं मानाभावात् । सत्यपि प्रत्यक्षे संनिहिते शराम्नाने कल्प्यातिदेशवाक्यप्रापणीयानां दूरस्थितानां कुशानां ततः प्रागेव ग्रहणे हेतुगर्भं विशेषणम् ।

९ । ४ **उपकाराकाङ्क्षिण्यामिति ।** अस्यार्थः । फलजनकत्वेन कर्माणि बोधयतां प्रधानविधीनां कथमनेन फलं जननीयमित्यनिर्ज्ञातप्रकारतया प्रधानगतफलजननसामर्थ्याद्बोधकाङ्क्षाजन्यदृष्टादृष्टकार्यसमुदायरूपे उपकारे एव प्रथममाकाङ्क्षा भवति तन्मुखेनोपकारजनकपदार्थरूपेष्वङ्गेष्वाकाङ्क्षा । एवं च प्राकृतप्रधानविधिः प्रथमाकाङ्क्षितमप्युपकारं क्वचिदपि क्लृप्तमपश्यन्नगत्या प्रकरणाम्नातान् पदार्थान् गृहीत्वा तत्पदार्थशक्त्यनुसारेण दृष्टाऽदृष्टकार्यविशेषकल्पनया तत्समुदायरूपमुपकारं लब्ध्वा निर्वृत्तो* भवति । वैकृतविधयस्तु स्वसंनिधौ क्लृप्तमुपकारमपश्यन्तोऽपि प्रकृतौ क्लृप्तं तं पश्यन्तः स्वाकाङ्क्षया दूरस्थितमपि तमेव गृह्णन्तः तन्मुखेन तज्जननशक्तत्वेनावधृतं प्राकृतपदार्थजातमेव प्रथमं गृह्णन्ति । यदाहुः ।

क्लृप्तोपकारसाकाङ्क्षाः प्रथमं प्राकृतैः सह ।
संबध्यन्ते समीपस्थं विकाराः प्रोज्झ्य चोदितम् । इति ।

ततश्च वैकृतविधिसंनिध्याम्नातस्य† शरादेर्वैशेषिकाङ्क्षाजातस्य पश्चादन्वय इति ।

११ । ४ **निरपेक्षैरिति ।** प्रत्यक्षश्रुतत्वेन पुरुषबुद्धिमूलप्रापकप्रमाणकल्पनाऽनपेक्षैरित्यर्थः । यद्वा शरप्राप्ति‡निरपेक्षैरित्यर्थः । ननु पूर्वनिमित्तवति प्रयोगे तन्निमित्तककर्तव्यताबुद्धेः परनैमित्तिककर्तव्यताबुद्ध्या भ्रमत्वापादनेऽपि पूर्वनैमित्तिकशास्त्रस्य नात्यन्तबाधः । पूर्वनिमित्तमात्रवति प्रयोगान्तरे चारितार्थ्यात् । अहंप्रत्ययस्य कर्तृत्वभोक्तृत्वादिविषयस्यात्मन्यद्वैत-

---

* निवृत्त इति १–४ पु· पा· । † सांनिध्याम्नानस्येति ४ पु· पा· ।
‡ अङ्कुरप्राप्तीति ४ पु· पा· । कुशप्राप्तीति २–५ पु· पा· ।

वाक्यजातेन बाधे तु तन्मूलस्य प्रमाणस्य न क्व चिदपि चारितार्थ्यम् । न च व्यावहारिकविषयालम्बनतया तत्रैव चारितार्थ्यं स्यादिति वाच्यम् । व्यावहारिकविषयस्य शुक्तिरूप्यादिवत् कदा चिद् बाध्यत्वाभ्युपगमाद्बाध्यविषये च व्यावहारिकं प्रमाणमिति व्यवहारस्याद्वैतपरिभाषामात्रसिद्धत्वादित्याशङ्क्य निर्दोषत्वेन क्लृप्त*शास्त्रस्यैव विषयान्तरप्रदर्शनेन चारितार्थ्यमुपपादनीयं न तु दोषमूलस्याहंप्रत्ययस्य तस्य पश्चाद्भाव्युद्गात्रपच्छेदवत्प्रयोगविषयतदपरामर्शदोषमूलसर्वस्वदानकर्तव्यताबुद्ध्यादिवद् भ्रान्तित्वोपपत्तेरिति विवेचनाय तस्य दोषमूलत्वं दर्शयितुं प्रवृत्तमुत्तरग्रन्थमवतारयति **एवं तावदिति** ।

तादर्थ्यप्रकृतिविकारयोरिति । तादर्थ्यप्रकृतिविकारभावयो- १
रित्यर्थः । पूर्वमीमांसकमते हविषो देवतार्थत्वं हविर्देवतयोर्हिरण्यकुण्डलवत् प्रकृतिविकारभावश्चेत्युभयमपि नास्ति । सिद्धान्ते हविषो देवताभोज्यस्य तादर्थ्यसद्भावे ऽपि हविर्देवतयोः प्रकृतिविकारभावो नास्तीत्यर्थः । नन्वत्र पूर्वपक्षिणा अग्नये होत्रमस्मिन्निति बहुव्रीहिसमासः शङ्कितः । ननु बहुव्रीहौ तादर्थ्यप्रकृतिविकारापेक्षा ऽस्ति तत्पुरुषाधिकारे एव चतुर्थी तदर्थार्थेत्यादिसूत्रेण तदर्थसमासस्य विहितत्वात् । तस्यैव च तदर्थसमासस्य तस्मिन् सूत्रे बलिरक्षितग्रहणेन ज्ञापकेन प्रकृतेस्तादर्थ्यस्य स्फुटत्वेन वार्तिककृद्वचनेन च प्रकृतिविकृतिविषयत्वनियमसिद्धेः । समानाधिकरणानां बहुव्रीहिरिति शाब्दिकनियमादलाक्षणिकश्चतुर्थीगर्भव्यधिकरणबहुव्रीहिरिति चेत् तर्हि स एव शङ्कितसमासासम्भवे हेतुर्वक्तव्यो न तादर्थ्यप्रकृतिविकारभावाभावे† इति चेत् । सत्यम् । यदि पूर्वपक्षी चतुर्थीगर्भव्यधिकरणबहुव्रीहिमलाक्षणिकं मन्यमानः सन् प्रत्ययस्य भावार्थतामवलम्ब्याग्नये होत्रं हवनमिति चतुर्थीतत्पुरुषमाश्रयेत तदा तदसम्भवे हेतुराचार्यैरुपन्यस्त इति न विरोधः । ननु सिद्धान्ते प्राप्तदेवतासंबन्धप्रवृत्तिनिमित्तकं यौगिकमग्निहोत्रनामेष्यते बहुव्रीहिसमासश्च प्रदर्श्यते स कथमुपपद्यतइति चेत् । उच्यते । नात्यन्तं व्यधिकरणबहुव्रीहेरसम्भवः । सप्तमीविशेषणे बहुव्रीहाविति सप्तमीग्रहणेन ज्ञापकेन कण्ठेकाल इत्यादौ तस्याभ्युपगमात् । तदेव व्याप्तिन्यायेन विभक्त्यन्तरगर्भव्यधिकरणबहुव्रीहेरपि

---

* निर्दोषस्य क्लृप्तेति ५ पु॰ पा॰ । † विकारभाव इति ४ पु॰ पा॰ ।

ज्ञापकमाश्रित्य वामनेनावर्त्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदइति सच्छास्त्रजन्मा हि विवेकलाभ इत्यादिप्रामाणिकप्रयोगदृष्टस्य पञ्चम्यादिगर्भव्यधिकरणबहुव्रीहेः साधुत्वप्रतिपादनाच्च । किं त्वेवंज्ञापकसिद्धो व्यधिकरणबहुव्रीहिः प्रामाणिकप्रयोगदर्शने सति समर्थनीयो न सर्वत्र । अन्यथा शेषो बहुव्रीहिरिति सूत्रे शेषग्रहणेनाहत्य वार्त्तिकवचनेन च सिद्धस्य समानाधिकरणानां बहुव्रीहिरित्यौत्सर्गिकनियमस्य निर्हेतुकभङ्गापत्तेः । ततश्च सिद्धान्ते यदग्नये चेत्यादिवाक्यान्तरप्राप्ताग्निदेवतासंबन्धानुवादकं यौगिकमग्निहोत्र-
६ नामेति प्रतीतेः तदुपपादनार्थः प्रमाणमूलो युज्यते व्यधिकरणबहुव्रीहिः । गुणविधिरिति पूर्वपक्षे तु यदग्नये चेत्यादि शास्त्रमग्निप्रजापतिरूपानेकगुणविशिष्टहोमान्तरविधायकम् अग्निर्ज्योतिरिति मन्त्रस्त्वस्यैव होमान्तरस्याङ्गमिति तयोर्विषयान्तरप्रदर्शनेन विधित्सितगुणप्रापकत्वाभावस्य समर्थनीयत्वादग्निदेवताया अप्राप्तेरकस्मादभ्युपगम्यमानो व्यधिकरणबहुव्रीहिर्न प्रमाणमूल इति स न युज्यते । तत्प्रख्यसूत्रे* यस्मिन् गुणोपदेश† इति पूर्वसूत्राद्यस्मिन्नित्यस्यापि वा नामधेय‡मिति तत्पूर्वसूत्रान्नामधेयमित्यस्य चानुषङ्गः । तया च तस्य विधित्सितगुणस्य प्रख्यं प्रख्यापकमन्यत् शास्त्रं यस्मिन् तदग्निहोत्रादिकं§ नामधेयमित्यर्थः ।

७ । २५ **कुण्डेति** । कुण्डपायिनामयनाख्ये सत्रे श्रुतं यन्मासमग्निहोत्रं जुहोतीति वाक्यं तत्रेत्यर्थः । अस्मिन् वाक्ये श्रुतगुणस्य विधेयत्वसम्भवे विशिष्टविधिगौरवपरिहारार्थं विधिशक्तेर्गुणसंक्रान्त्या धात्वर्थाविधानात्तद्विधानापेक्षः कर्मभेदो न सिध्येदतो धात्वर्थविधानसिद्ध्यर्थं मासगुणस्य विध्यनर्हत्वमाह **न तावदिति** । ननु कालस्याऽविधेयत्वे ऽपि विहितमेव नित्याग्निहोत्रं कालसंबन्धसिद्ध्यर्थं तदुद्देशेन पुनर्विधीयतां सायं प्रातश्च जुहोतीति वाक्ये इवेत्याशङ्क्य तद्वैषम्यमाह **नापीति** ।

सिद्धार्थबोधिना नाम्नेति ।

यदा त्वाद्यपरिस्पन्दात्प्रभृत्या फललाभतः ।
क्रिया पूर्वापरीभूता लक्ष्यते वर्तते तदा ॥

---

* जैमिनिसू॰ अ॰ १ पा॰ ४ सू॰ ४ । † जैमिनिसू॰ अ॰ १ पा॰ ४ सू॰ ३ ।
‡ जैमिनिसू॰ अ॰ १ पा॰ ४ सू॰ २ । § अग्निहोत्रशब्दादिकमिति २-५ पु॰ पा॰ ।

इत्युक्तरीत्या पूर्वापरीभूतेन क्रियारूपेण स्वार्थं धातुरुपस्थापयति न तेन रूपेण नाम तदर्थमुपस्थापयितुं शक्नोतीति न नाम्ना धात्वर्थप्रत्यभिज्ञा सम्भवतीत्यर्थः । उक्तं च वार्त्तिके ।

यादृशी भावना ऽऽख्याते धात्वर्थश्चापि यादृशः ।
नासौ तेनैव रूपेण कथ्यते ऽन्यैः पदैः क्व चित् ॥ इति ।

भावनान्यत्वमिति । नित्याग्निहोत्रस्य मासाग्निहोत्रस्य च ८ ।
जुहोतिधात्वर्थस्य भेदो भेदलक्षणद्वितीयाध्यायार्थभावनाभेदोपपादकतया प्रसाधित इति तत्प्रयोजनभूतो भावनाभेदः प्रयोजनान्यत्वमिति सौत्रपदेन विवक्षित इत्यभिप्रेत्यैवं व्याख्यातम् । यद्वा नाम्ना यथा कथं चिद् नित्याग्निहोत्रप्रत्यभिज्ञया धात्वर्थाऽभेदोपपादने ऽप्यग्निहोत्रहोमस्य नित्यत्वेन प्राधान्ये कुण्डपायिनामयनाङ्गत्वे च भाव्यभेदेन भावनाप्रत्यभिज्ञापकाभावेन च भावनान्यत्वमनिवार्यमित्यभिप्रेत्यैवं व्याख्यातम् । उक्तं च शास्त्रदीपिकायाम् । ननु नामधेयेन भवति* पूर्वकर्मोपस्थापनम् । भवतु । धात्वर्थस्य भावना तु तेनाऽनुपस्थानाद् भिद्यतएव । धात्वर्थो ऽपि यादृशो धातुना ऽऽख्यातवर्तिना पूर्वापरीभूतो विधेरुपनीयते न तादृशो नाम्नोपस्थाप्यतइति तस्यापि युक्तो भेदः । तदभेदे ऽपि भावना तावद्भिन्नेति सिद्धमिति । धात्वर्थस्य नाम्ना प्रत्यभिज्ञानमाचार्यैरपि वैधाद्यधिकरणे† स्वीकृत्य व्यवहृतम् । तत्रैव तदुपपादनं करिष्यामः । **तत्र सिद्धे‡ कर्मभेदे इति** । यदि प्रकरणभेदेन भावनामात्रभेदस्तदा साप्तमिकाधिकरणे§ ऽग्निहोत्रशब्दस्य मासाग्निहोत्रे गौणत्वाभिधानमेव गौणमित्येतदपि वैधाद्यधिकरणे एवोपपादयिष्यामः । **अभिज्ञारूपेति** । मम देह इति देहत्वाकारेण विवेकग्रहः परिच्छिन्नत्वाकारेण देहभेदाध्यासेन विरोधी चैत्रमैत्रयोः संनिहितयोरयमस्माद्भिन्न इति स्वरूपेण भेदग्रहे इव मैत्रचैत्रत्वाकारेण तदभेदाध्यासे । **अर्थः** विषयः ।

भिन्नाभ्यामिति । बालस्थविरशरीरयोः परस्परभिन्नत्वं ताभ्याम् ९ ।
एकस्यात्मनो भेदश्चेत्युभयमप्यनुमानादित्यर्थः । परिमाणभेदे तस्यावयवापचयोपचयसाध्यत्वादवयवापचये समवायिकारणनाशात् पूर्वावयविनाशतः

---

* भवतीति नास्ति २ पु० ।
† व्याससू० अ० ३ पा० ३ सू० २५ ।
‡ तत्सिद्धे इति १-२-पाठः ।
§ जैमिनिसू० अ० ७ पा० ३ सू० १ ।

स्थितावयवैः सूक्ष्मावयव्यन्तरोत्पत्तिरवयवोपचये पश्चादापततामवयवानां पूर्वसिद्धे ऽवयविनि कारणत्वायोगतः पूर्वसिद्धावयविसहितैरवयवान्तरैर्महावयव्यन्तरोत्पत्तिश्चावश्यंभाविनीति बालस्थविरशरीरयोर्भिन्नत्वं तावदानुमानिकं न प्रत्यक्षम्। प्रत्यक्षेण तु यो ऽयं मम देहो बाल्ये तथा पुष्ट आसीत् स एवेदानीं वार्द्धके कृश इत्यभेद एव तयोः प्रतीयते ततश्च बाल्यस्थाविरदशयोर्भिन्नाभ्यां देहाभ्यां दशाद्वयाभिन्न आत्मा भिन्न इति विरुद्धधर्मलिङ्गकभेदज्ञानमप्यानुमानिकमिति भावः। ननु देहयोः परस्परभेदस्यानुमानिकत्वे ऽपि ताभ्यामात्मनो भेदकस्यैक्यस्य प्रत्यक्षत्वादात्मनि देहभेदः प्रत्यक्ष एव स्याद् भेदकसाक्षात्कारस्य भेदसाक्षात्कारनियतत्वात्। अतो न तत्र परीक्षककृत्या ऽनुमानापेक्षेति चेद् मैवम्। तथापि प्रथमानुमानापेक्षत्वेन परीक्षककृत्यत्वानपायात्। वस्तुतस्त्वत्र प्रत्यभिज्ञामात्रेण निर्वि-
। ८ चिकित्समैक्यं न सिध्यतीति न भेदकसाक्षात्कारशङ्कापीत्याह **तच्च शास्त्रादृते इति**। तत्प्रत्यभिज्ञाविषयभूतमप्यात्मैक्यं शास्त्रं विना न सिध्यति परिमाणभेदेन देहभेदे सत्यपि तदभेदप्रत्यभिज्ञादर्शनेन यो ऽहं बाल्ये पुष्टः पितरावन्वभूवं स एव स्थाविरे कृशः प्रणप्तॄननुभवामीति परिमाणभेदभिन्नधर्मिगततयैव पितृप्रणप्त्रनुभवविषयाभेदप्रत्यभिज्ञादर्शनेन च तथाभूतप्रत्यभिज्ञामात्रादैक्याऽसिद्धेरिति भावः। ननु तथापि योऽहं स्वप्ने व्याघ्रदेहः स एवेदानीं मनुष्यदेह इति प्रत्यभिज्ञया स्फुटतरभेदाभ्यां देहाभ्यां तदुभयानुवृत्तस्यात्मनो भेदः प्रत्यक्ष एव स्यात् तत्र निर्विचिकित्सभेदकसाक्षात्कारसत्त्वादिति चेद् न। भेदकसाक्षात्कारस्य भेदसाक्षात्कार*नियतत्वाभावात्। अपीतत्वव्याप्यशङ्खत्वदर्शने ऽपि तत्साक्षात्काराऽनुदयात्। स्वप्नदृष्टेषु लौकिकानां मिथ्यात्वसंप्रतिपत्त्या यो ऽयं स्थाणुः पुमानेष इतिवत् तत्र बाधायां सामानाधिकरण्यं न त्वभेद इति भेदकसाक्षात्कारासिद्धेश्च।

काकतालीयेति। यद्यपि समासाच्च तद्विषयादिति सूत्रेणेवार्थविषयात्समासादिवार्थेन छप्रत्ययेन निष्पादितः काकतालीयशब्द उपमाद्वयगर्भः तथा च काकतालयोरिव यादृच्छिको दस्युदेवदत्तयोः समागम इत्येका समासार्थोपमा तदानीमेव पतता तालेन काकस्येव दस्युना

---

* भेदाभेदसाक्षात्कारेति २-३ पु. पा.।

देवदत्तस्य वधः कृत इत्यन्या तद्धितार्थोपमा चेति यद्योपमाद्वयं तच्चैवास्य शब्दस्य सम्पूर्णार्थता तथापि यादृच्छिकसमागममात्रे ऽप्यस्य प्रचुरः प्रयोगो दृश्यतइत्ययमपि प्रयोगो यादृच्छिकसमागममात्रविषयः ।

ननु कृशो ऽहमन्धो ऽहमित्यादीनामध्यासत्वोक्तिर्न युक्ता परस्परभिन्नत्वेन निश्चितानां देहेन्द्रियाणां रङ्गरजतादीनां शुक्तिशकले इवैकस्मिन्नात्मन्यध्यासाऽसम्भवात् * । अतस्तेषां गौणत्वमेव युक्तमित्याशङ्कां निवर्त्तयति **विवेकाऽसिद्धाविति** † । गौणत्वे हि न देवदत्तः सिंह इति- ९ । ६
वत् कदा चिदपि नाहं कृशो नाहमन्ध इत्यादिरूपेण विवेको लौकिकसाधारणो दृश्येत अतो ऽध्यास इत्येवाभ्युपेयम् । भेदकसाक्षात्कारे‡ ऽपि दोषबलादभेदाध्यासः पीतशङ्खादिस्थले सम्प्रतिपन्नः । किं च येन रूपेण देहत्वचक्षुष्ट्वादिना देहेन्द्रियभेदनिश्चयः तेन रूपेणात्मनि तदुभयाऽध्यासासम्भवे ऽपि कृशत्वान्धत्वादिरूपान्तरेण तदुभयाभेदाऽध्यासे न का चिदनुपपत्तिः§ । न हि कृशादन्धो ऽन्य इत्यादिरूपो ऽस्ति भेदप्रत्ययः । दृश्यते च देवदत्तसमीपगतयोरधीयानाऽनधीयानयोः पुरुषत्वसामान्येन|| गृह्यमाणयोश्चैत्रमैत्रयोः परस्परभेदग्रहे ताभ्यां देवदत्ते दृश्यमानेन रूपेण भेदग्रहे च सत्यप्यधीयानो ऽयं मैत्रस्तिष्ठतीत्यधीयानत्वमैत्रत्वाकारद्वयेन देवदत्ते तदुभयाध्यासः । ननु¶ तथाप्यन्धो बधिरः काणो मूक इत्यादीनामात्मनि तत्तदिन्द्रियाध्यासरूपत्वं न सिध्यति अर्शआदिगणसंगृहीताद्विकलाङ्गवाचिनो ऽन्धादिशब्दादर्शआदिभ्यो ऽजिति सूत्रेण मत्वर्थीयस्याचः प्रत्ययस्य विधानादहंशब्दसमानाधिकरणान्धादिव्यवहारस्य मत्वर्थीयप्रत्ययान्ताऽन्धादिपदयुक्तत्वेन विकलचक्षुरादिवैशिष्ट्यपरत्वोपपत्तेः कृशो ऽहमित्यादीनामप्यर्शआदेराकृतिगणत्वेन मत्वर्थीयप्रत्ययान्ततया कृशादिरूपदेहवैशिष्ट्यविषयत्वोपपत्तेर्नाध्यासरूपत्वं कल्पनीयमिति शङ्कानिवर्त्तनार्थे टीकायामुपन्यस्तं गच्छामीत्येवमादिकमुदाहरणान्तरं कृशो ऽहमित्यादीनामित्यादिशब्देन संगृहीतम् । गच्छामि कृश्यामीत्याद्याख्यातप्रयोगे गन्तृकृशा-

* आत्मन्यसंभवादिति ४ पु॰ पा॰ ।

† यद्यप्येतत्प्रतीकोल्लेखः समनन्तरप्रतीकात् पूर्वं क्रमप्राप्तस्तथापि वृत्तस्यैव प्रसङ्गादत्रोल्लेख इति भाति ।

‡ भेदसाक्षात्कारे इति ४ पु॰ पा॰ ।

§ अध्यासे का ऽनुपपत्तिरिति ५ पु॰ पा॰ ।

|| साम्येनेति ४ पु॰ पा॰ ।

¶ नन्विति नास्ति ५ पु॰ ।

दिरूपदेहाभेद एवार्थो वाच्यः । तथा कुणिरहमित्यादिव्यवहारे विकलेन्द्रियाभेद एवार्थो वाच्यस्तादृक्षु प्रयोगेषु मत्वर्थीयप्रत्ययाभावात् । तत्सामान्यादन्धो ऽहमित्यादिप्रयोगाणामप्यध्यासमूलत्वमेव युक्तमित्यर्थः । अर्शआद्य*-ज्विधानं चित इत्यन्तोदात्तस्वरार्थं न त्वात्मनि प्रयोगनिर्वाहार्थमिति योज्यम् । दृश्यते च स्वरविशेषसिद्ध्यौपयिकतयैव तद्विधानार्थं गुणविशेषवाचिनां शुक्लादिशब्दानामप्यर्शआदिगणे संग्रहः । न हि शुक्लादिगुणवैशिष्ट्यप्रतीतिनिर्वाहार्थं तत् । गुणान्तरवाचिसाधारण्येन गुणवचनेभ्यो मतुपो लुग्विधानेनैव तन्निर्वाहात् । न च शुक्लादिगुणशालिभिः प्रासादैर्विशिष्टे नगरे शुक्लं नगरमित्यादिप्रयोगनिर्वाहार्थं शुक्लादिशब्देभ्यो मतुब्लोपानन्तरमज्विधानमिति वाच्यम् । संख्यासंनिवेशविशेषविशिष्टानां गृहाणामेव नगरशब्दवाच्यत्वे साक्षादेव नगरे शुक्लादिगुणवैशिष्ट्यसत्त्वेन तथाभूतगृहाधिकरणस्थलस्य नगरत्वे तदभेदोपचारसम्भवेन च तदर्थमज्विधानाऽनपेक्षणात् । अन्यथा ह्यश्वेतन्नगरमपुष्प्यद्वनमित्याद्याख्यातप्रयोगे का गतिः । एवमहंप्रत्ययस्य केषु चिदंशेषु† दृष्टविसंवादतया दृष्टकोटसाक्ष्यपुरुषवचनवदप्रामाण्यशङ्काकलुषितस्य परिमाणत्वग्रहणप्रतिबन्धक‡दूरत्वदोषसद्भावसमुदिताऽप्रामाण्यशङ्काकलङ्कितचन्द्रप्रादेशिकत्वज्ञानवदागमबाधनाक्षमत्वे सत्यागमेनैव तद्बाध्यते । आगमबाधितस्य च तस्य पूर्वापच्छेदशास्त्रस्येव§ प्रामाण्यसंरक्षणाय न विषयान्तरं गवेषणीयम् । चन्द्रप्रादेशिकत्वज्ञानवद्‖ दोषजन्यत्वेन सर्वथैवाऽप्रामाण्योपपत्तेरित्येतावदस्मिन्नधिकरणे शास्त्रारम्भोपयोगिविषयप्रयोजनसमर्थनार्थं सूत्रसूचितं व्युत्पाद्यम् । इत्थं तत्त्वावेदकप्रमाणाभावात् प्रच्यावितस्य कर्तृत्वभोक्तृत्वादिप्रत्यक्षस्य प्रवृत्तिनिवृत्त्यादिव्यवहारोपयोगिसांव्यवहारिकं प्रामाण्यं सर्वप्रपञ्चसाधारण्येनारम्भणाधिकरणे¶ व्युत्पादनीयम् । श्रोतृबुद्धिसौकर्यार्थं प्रागनूदितमित्यनुसंधेयम् ।

। ७ **अध्यासाभिधानक्रिययोरिति** । अध्यासक्रियैव तावन्न सम्भवति दूरे ऽध्यासाभिधानक्रिययोः पौर्वापर्यं क्रियाया आश्रयाधीनात्मलाभत्वात् शुद्धाया निर्विकारायाश्चितः क्रियाश्रयत्वायोगाद् अध्यसनीयबुद्धिता-

* युक्तमित्यर्थः अर्शआद्यजिति ४ पु॰ पा॰ ।
† केषु चिदर्थेष्विति ४ पु॰ पा॰ ।
‡ ग्रहप्रतिबन्धकेति ४ पु॰ ।
§ जैमिनिसू॰ अ॰ ६ पा॰ ५ सू॰ ५४ ।
‖ चन्द्रप्रादेशिकसंज्ञानवदिति ५ पु॰ पा॰ ।
¶ व्याससू॰ अ॰ २ पा॰ १ सू॰ १४ ।

दात्म्यापन्नायाश्च चितो ऽध्यासाधीनसिद्धिकत्वादिति प्रथमाशङ्कार्थः । इमां शङ्कां स्वयं परिहरति **पूर्वपूर्वेति** । १० । ९

ननु मिथ्याज्ञाननिमित्तविशेषणविवरणटीकया द्वितीयशङ्काया इव नैसर्गिकविशेषणविवरणटीकया ऽस्याः प्रथमशङ्कायाः परिहारो लभ्यते । यद्यप्यध्यासो वस्तुसतोर्भेदाग्रहाधीनः न च देहेन्द्रियादिकं त्वया वस्तुसदिष्यत इत्यध्यासासम्भवशङ्कायां* प्रातीतिकेनापि सत्त्वेनारोप्याधिष्ठानयुगलसम्पादनमुपपद्यते इत्येवं सत्यानृते मिथुनीकृत्येत्यनेन परिहृतायां प्रातीतिकसत्त्वमप्यध्यासाधीनमिति पुनरन्योन्याश्रयशङ्का नैसर्गिकविशेषणेन परिहृतेति योजयता टीकाग्रन्थेन देहेन्द्रियबुद्ध्यादेः स्वरूपमात्रस्य पूर्वपूर्वाध्यासतः सिद्धिरुक्ता न चितो बुद्धितादात्म्यापत्तेरपि । तथापि तत एव साप्यर्थात्सिध्यति† प्रवाहाऽनादित्वेनोच्यमानस्याध्यासस्य परत्र परतादात्म्यावभासरूपत्वादिति चेत् । उच्यते । नैसर्गिकत्वोक्त्या नोक्तशङ्कायाः परिहारो लभ्यते सर्गादौ प्रथमाध्यासात् पूर्वमाध्यासिकस्य बुद्धितादात्म्यस्यासिद्धेः । न च तदभावे ऽपि पूर्वाध्याससंस्कारसत्त्वात् तदुपधानेन चितः प्रथमाध्यासक्रियाश्रयत्वं स्यादिति वाच्यम् । प्रथमाध्यासे ऽध्याससंस्कारोपधानं प्रयोजकं द्वितीयाद्यध्यासेष्वध्यासपरिनिष्पन्नं बुद्धितादात्म्यं प्रयोजकमित्यननुगमापत्तेः । संस्कारस्य च निराश्रयस्य प्रलये स्थित्यसम्भवात् शुद्धचितस्तदाश्रयत्वायोगाद् बुद्धीन्द्रियादीनां सर्गादावुत्पत्तिश्रवणेन प्रलये ऽध्याससन्तानविच्छेदेन च तदानीमाध्यासिकबुद्धितादात्म्यापन्नचितो ऽपि तदाश्रयतया वक्तुमशक्यत्वादित्येतावत्पर्यन्तं प्रथमशङ्का धावेदित्यालोच्याचार्यैः स्वयं परिहारो ऽभिहितः । तत्रायमाशयः । प्रलये संस्काराश्रयस्य तावन्नासम्भवः । अविद्यायाः सत्त्वात् । सर्वो ऽपि हि प्रपञ्चस्तदानीमविद्याचित्रभित्तौ संस्कारमात्रशेषं स्थित्वा पुनरुद्भवतीत्यङ्गीक्रियते । अत एव बीजाङ्कुरप्रवाहानादिताया अपि प्रलये तत्संस्कारसत्त्वेनैव निर्वाहः । नाप्यननुगमः । सर्वेष्वप्यध्यासेषु पूर्वपूर्वभ्रमसंस्कारसचिवाऽविद्योपधानमेव प्रयोजकं न तु बुद्धितादात्म्यापत्तिरपीत्यभ्युपगमे दोषाभावादिति ।

प्रतीयमानतैव परमार्थसत्तेति मन्यमानस्य शङ्कावादिनः प्रतीतिमात्रमारोपोपयोगि न परमार्थसत्तेत्यभ्युपगमो विरुद्ध इत्याशङ्क्य परमार्थसत्ते-

* अध्यासाशङ्कायामिति ४ पु० । † सामर्थ्यात्सिध्यतीति १ पु० पा० ।

त्येतदन्तः सिद्धान्त्युक्तानुवादः तत्राद्धेत्येनेन सूचितः प्रतीतिमात्रमारोपे उपयुज्यते इति युक्तं प्रतीयमानस्य सत्ता नोपयुज्यतइति तु न युक्तमित्येवंरूपोऽर्द्धाङ्गीकारः प्रतीतिरेव त्वित्यादिना स्फुटीकृत इति विभज्य तात्पर्यं
११ । ८ प्रदर्शयन्नवतारयति **सत्यानृते मिथुनीकृत्येत्यत्रेति । उक्तमिति ।** तदिहाऽनूदितमिति शेषः । **विवेकाग्रहादिति ।** अनृतस्य प्रतीतिमङ्गीकृत्य भेदग्रहादध्यासाक्षेपः पूर्वं कृतः इदानीं प्रतीतिविषयस्यानृतत्वमेव न युक्तमित्याक्षेप इति भेद इत्यर्थः । **प्रकाशमानत्वमितीति ।** प्रतीतिवि-
,, । १५ षयत्वमित्यर्थः । असतः प्रतीतिविषयत्वं पूर्वपक्षी न मन्यते । **अध्याससामान्यलक्षणकथेति ।**

ननु सामान्यलक्षणत्वे गोत्वादिप्रत्यभिज्ञा ऽपि द्वैतवस्त्ववभासत्वेन व्यावहारिकाध्यासरूपा तेन संग्राह्येति कथमग्रे तत्रातिव्याप्तिशङ्का । न च सामान्यलक्षणत्वोक्तिरियं संक्षिप्तलक्षणविषया विस्तृतलक्षणं तु प्रातिभासिकाध्यासमात्रविषयमिति तदतिव्याप्तिकथनं युज्यतइति वाच्यम् । तस्योपव्याख्यानमिति टीकाग्रन्थेन तद्व्याख्यानेन च संक्षिप्तविस्तृतलक्षणयोरेकविषयत्वावगमात् सन् घट इत्याद्यवभासे सत्यानृततादात्म्यावभासत्वे पर्यवसन्नस्य विस्तृतलक्षणस्य सत्त्वेनातिव्याप्त्यापत्तेश्चेति चेत् । सत्यम् । स्मृतिप्रत्यभिज्ञातिव्याप्तिकथनं तयोरधिष्ठानसद्रूपब्रह्मतादात्म्यापन्नानृतवस्तुविषयतयैवाध्यासरूपत्वं न तु समानसत्ताकजातिव्यक्तितादात्म्यविषयतयेति तेन रूपेण तयोरलक्ष्यत्वाभिप्रायम् । यदि जातिव्यक्तितादात्म्यविषयत्वांशे सत्यानृतमिथुनीकरणाभावे ऽपि बाध्यत्वरूपसंक्षिप्तलक्षणानुगतिसद्भावात् तत्र विस्तृतलक्षणेनापि भाव्यं तदा पूर्वदृष्टस्य परत्रावभास इत्येतल्लक्षणं परमते गोत्वादिप्रत्यभिज्ञाया इव प्रमात्वेनाप्युपपद्यतइति तेन स्वाभिमताध्यासरूपत्वसिद्ध्यभावाभिप्रायं योज्यम् । एवमपि हि लक्षणदूषणमाकरग्रन्थेषु दृश्यते । यथा स्वश्चासौ प्रकाशश्चेति स्वप्रकाशनिर्वचनं ज्ञानस्य वेद्यत्वे ऽप्युपपद्यते स्वशब्दार्थस्य ज्ञानस्य परवेद्यत्वे ऽपि प्रकाशत्वाऽक्षतेः । ब्रह्मभिन्नत्वं मिथ्यात्वमिति लक्षणं सत्यत्वे ऽप्युपपद्यते वियदादेः सत्यत्वपक्षे ऽपि ब्रह्मभिन्नत्वाक्षतेरित्याद्यस्मिन् दूषणे ऽतिव्याप्तित्वव्यवहारश्च तत्र तत्र दृश्यते ।

उच्छेदो बाधकज्ञानोदयानन्तरं भ्रमवृत्त्यन्तरो*त्पत्तिप्रतिबन्धः । स पीतश-
ङ्खविभ्रमादिष्वव्याप्त इति तत्साधारणं पक्षान्तरमुक्तं टीकायाम् अवमनो वेति ।
तत्रावमानशब्दार्थमाह **यौक्तिकेति** । तिरस्कारः इच्छाप्रवृत्त्यादिकार्या- ११
क्षमत्वापादनम् ।

ननु संक्षिप्तलक्षणेनैवेतरव्यावृत्तलक्ष्यव्यवहारसिद्धेः किं विस्तृतलक्षणे-
नेत्याशङ्क्य तत्प्रयोजनमाह **परत्रेत्यादिपदैरिति** । परत्रासंनिहितस्याव-
भास इति लक्षणवाक्यघटकपदैरित्यर्थः । **लक्षणवाक्यार्थे ऽतिव्याप्ति-
माहेति** । एवं लक्षणवाक्यार्थे वर्ण्यमाने प्रत्यभिज्ञायामतिव्याप्तिमाहेत्यर्थः ।
तादात्म्यावभास इति । धर्म्यध्यासलक्षणवाक्यार्थमभिप्रेत्यातिव्याप्ति-
माहेति पाठो दृष्टश्चेदृजुः स पाठः । **असंनिधानसिद्धवत्कारेणेति** ।
असंनिधानमधिष्ठाने परमार्थतो ऽसत्त्वमिति वक्ष्यते तेनानृतत्वलाभः ।
एतेन टीकायां परत्रेत्यस्य सत्ये इत्यर्थस्योक्तत्वात् स्मृतिरूपविशेषणरहि-
तस्य सत्ये पूर्वदृष्टस्यावभास इति लक्षणस्य पूर्वं यस्यां गवि गोत्वं दृष्टं
तस्यामेव गोत्वज्ञाने ऽतिव्याप्तौ शङ्कितुं शक्यायामतिव्याप्त्यर्थं गोव्यक्त्यन्तरे
गोत्वज्ञानस्यान्वेषणं व्यर्थमित्यपि शङ्का निरस्ता । आरोप्या ऽनृतत्वसमर्पक-
स्मृतिरूपपदसमभिव्याहारे हि परशब्दस्य तत्प्रतिद्वन्द्विसत्यार्थकत्वं लभ्यते
तदभावे तु पूर्वदृष्टपदसमभिव्याहारात् परशब्दः पूर्वदृष्टदेशादन्यदेशं बोध-
येदित्यतिव्याप्त्यर्थं गोव्यक्त्यन्तरविषयगोत्वप्रत्यभिज्ञान्वेषणं युक्तमेवेति ।

ननु स्मृतावतिव्याप्तिवारणार्थं परत्रेति विशेषणमित्ययुक्तम् । प्रत्य-
भिज्ञायामिव स्मृतावप्यतिव्याप्तेरतिव्याप्तिशब्दलक्षितायाः प्रमात्वेनान्यथासि-
द्धेर्वा स्मृतिरूपविशेषणेनैव वारणात् तदर्थस्याधिष्ठाने परमार्थतो ऽसत्त्वमिति
निरुक्तस्याधिष्ठानसमसत्ताकत्वाभावरूपस्य प्रत्यभिज्ञाविषयगोत्वइव तत्ताया-
मप्यभावाद् उभयोरपि गोव्यक्त्यन्तरस्मर्यमाणधर्मिरूपाधिष्ठानसमसत्ताक-
त्वाद् अधिष्ठानसत्यत्वार्थकेन परत्रेत्यनेन स्मृतिव्यावर्तनासम्भवाच्च । तत्रा-
धिष्ठानस्य स्मर्यमाणस्याप्यप्रातिभासिकतया शुक्तिकादेरिव सत्यशब्दार्थत्वा-
दित्याशङ्क्याह **स्मृतिरूपपदेन चेति** । यदि यथाश्रुतटीकानुसारात् १२
स्मृतिरूपपदेनासंनिहितविषयत्वमात्रं विवक्षितं न त्वाचार्यैर्निर्वक्तव्यमधिष्ठान-

* भ्रमव्यक्त्यन्तरेति १-२-३ पु॰ पा॰ ।

समसत्ताकत्वरहितविषयत्वं तदेयं स्मृतावतिव्याप्तिशङ्का परत्रेत्यनेन तन्निरासो ऽपि भवति । अनृतोपस्थापकपदसमभिव्याहाराभावेन परशब्दस्य पूर्वदृष्टदेशान्यदेशपरत्वस्यासंनिहितसमभिव्याहारात् सन्निहितपरत्वस्य वा प्राप्तिरिति भावः । एवं चापसिद्धान्तपरिहारार्थमसन्निहितत्वमधिष्ठाने परमार्थतो ऽसत्त्वमित्यवश्यं विवक्षणीयत्वात् तत एव प्रत्यभिज्ञाया इव स्मृतेरपि व्यावृत्तिसिद्धेः परत्रेति विशेषणानपेक्षणेन लक्षणे तदनिवेशनसूचनात् शङ्कान्तरमपि व्यावर्तितं भवति । तन्निवेशने हीत्थं शङ्का स्यात् । यदि परशब्दः पूर्वदृष्टसमभिव्याहारात् पूर्वदृष्टदेशान्यदेशपरः तदा ऽहङ्काराध्यासाऽव्याप्तिः । तदधिष्ठानस्य साक्षिणः पूर्वदृष्टदेशत्वात् । रजताद्यध्यासाव्याप्तिश्च । तत्राध्यसनीयस्य पूर्वदृष्टत्वाभावात् । पूर्वदृष्टसजातीयत्वविवक्षायां यथा कथं चित्साजात्यस्य सर्वत्र सत्त्वेन पूर्वदृष्टविशेषणस्याव्यावर्तकत्वापत्तेः । यद्धर्मावच्छेदेनावभासविषयत्वं तेन धर्मेण साजात्यविवक्षायां गोव्यक्त्यन्तरे गोत्वस्य किंचिद्धर्मावच्छेदेनानवभासमानतया तत्प्रत्यभिज्ञायामतिव्याप्त्युक्तेरसामञ्जस्यापत्तेः । यदि त्वनृतोपस्थापकपदसमभिव्याहारात् परशब्दः सत्यार्थकः तदा वियदादिविषयानुमितिशाब्दज्ञान*रूपव्यावहारिकाध्यासेष्वव्याप्तिः । तेषु प्रत्यक्षेष्वपि† सद्रूपाधिष्ठानब्रह्मस्फुरणाभावात् । देहादावनात्मन्यात्माध्यासे चाव्याप्तिः । तत्र स्वरूपतो ऽप्यध्यस्तो देहादिः सत्यः शबलितरूपमात्रेणाध्यस्त आत्मा त्वसत्य इत्येवं सत्ये अनृतावभास इति लक्षणानुगमस्य कर्तुमयुक्तत्वात् । अध्याससंक्षिप्तलक्षणक्रोडीकृतेषु विस्तृतलक्षणानुगत्यवश्यम्भावाच्चेति । तस्मादधिष्ठानसमसत्ताकस्यावभासो ऽध्यास इत्येवानुगतं लक्षणम्‡ । यद्गतमवभास्यं तदधिष्ठानम् । तथा च गोत्वादिषु गोव्यक्त्यादिरूपाधिष्ठानसमसत्ताकत्वसद्भावे ऽपि ब्रह्मरूपाधिष्ठानसमसत्ताकत्वसद्भावो नास्तीति§ लक्षणस्य न क्वाप्यध्यासे अननुगतिः ।

एवं परत्रेति विशेषणरहितमसंनिहितस्यावभास इत्येतावदेव लक्षणमित्याचार्यैरसंनिहितपदस्याधिष्ठाने परमार्थतो ऽसत्त्वमित्यर्थविवक्षायां
१२ ।.१४ परत्रेति विशेषणस्य फलं नास्तीति सूचनेन अथ वा ऽसंनिधानेनेति

* शब्दज्ञानेति ४ पु० पा० ।
† प्रत्यक्षेष्वेवेति ५ पु० पा० ।
‡ तल्लक्षणमिति ३ पु० पा० ।
§ समसत्ताकत्वाभावो ऽस्तीति २-३ पु० पा० ।

श्लोके असंनिधानावभासाभ्यामेव परत्रेति विशेषणनिरसनीयत्वेन टीकोक्ताया असत्ख्यातेरनभिमतसकलख्यात्यन्तराणां च निरसनेन च सूचितं टीकाकाराभिमतं परत्रेति विशेषणसहितं लक्षणं प्राक् प्रदर्शितम् । इदानीं तद्रहितलक्षणं स्वाभिमतमभिप्रेत्य तदनुप्रविष्टाभ्यामसंनिधानावभासाभ्यामेवानभिमतसकलख्यात्यन्तरनिरसनं क्रियतइति टीकाकारमतात् स्वमतस्य भेदं सूचयितुम् अथ वेत्युक्तिः । अथ वा असंनिहितस्यावभास इत्येतावदेव लक्षणम् । तत्रासंनिधानेनासत्ख्यातिव्यतिरिक्ताख्यात्यादिसकलसत्ख्यातिवारणम् अवभासेनासत्ख्यातिवारणमिति श्लोकार्थः । भ्रमविषयरजतादिकं तादात्म्येन वा तद्धर्म्येण वा यद्गतं तदधिष्ठानं तथा चाऽख्यात्यन्यथाख्यातिमतयोर्देशान्तरस्थमधिष्ठानम् । आत्मख्यातिमते ज्ञानम् । सत्ख्यातिमते पुरोवर्ति शुक्त्यादिकम् । अस्मिन्मतचतुष्टये ऽपि सदेव रजतादिकं तत्तदधिष्ठानसमसत्ताकमित्यसंनिधानविशेषणेन चतुर्विधा ऽप्येषा ऽसत्ख्यातिर्वार्यतइत्यर्थः । **अवभासाद्** इत्यस्यापरोक्षावभासादित्यर्थः । अत एवाह **नृशृङ्गे तददर्शनादिति** । नृशृङ्गेपि हि परोक्षावभासः प्रागाचार्यैरङ्गीकृतः । यद्यप्यापरोक्ष्यं न लक्षणानुप्रविष्टं तथापि रजताध्यासे लक्षणानुगतौ क्रियमाणायां तत्र लक्षणस्थमवभासपदं वस्तुतो ऽपरोक्षावभासे पर्यवस्यदापरोक्ष्यस्फुरणनियतमिति तल्लाभः । इदं त्ववधेयम् । शुक्तावसद्रजतं भासतइति सदुपरक्तासत्ख्यातेरपरोक्षावभासेन निरासः । शून्यवाद्यभिमतनिरधिष्ठानाऽसत्ख्यातेस्त्वसंनिधानेनापि निरासः । तदर्थस्य स्वाधिष्ठानेन समसत्ताकत्वाभावस्यासति स्वाधिष्ठानाऽप्रसिद्ध्या निरूपयितुमशक्यत्वात् । एवं च सिद्धान्त्यभिमता शशशृङ्गादिशब्दजन्या असत्प्रतीतिः न शुक्तिरजतादिज्ञानवदध्यासो नापि घटादिज्ञानवत् प्रमा किं तूभयविलक्षणं ज्ञानमात्रमिति ।

पूर्वदृष्टग्रहणं तु न ख्यात्यन्तरनिरासार्थं पूर्वदृष्टिसद्भावप्रतिपादनार्थं वा रजतविभ्रमादिषु पूर्वदृष्ट्यपेक्षायाः सर्वसंप्रतिपन्नत्वात् किं तु टीकोक्तप्रयोजनमात्रार्थमित्याह **असंनिहितस्येति** । पूर्वप्रमितत्वशब्देन पूर्वप्रमितत्व- १२
सहचरिता सत्ता लक्ष्यते आक्षेपभाष्यटीकानुसारात् । **स्वप्नज्ञाने इति** । स्वप्नः प्रातिभासिकविभ्रम इति न तत्रात्मा ऽधिष्ठानं पारमार्थिकाधिष्ठानत्वे वियदा-

दिविभ्रमवद् व्यावहारिकाध्यासत्वापत्तेः न* रजतविभ्रमादिषु शुक्तिकादिवत् तत्र व्यावहारिकमधिष्ठानमस्तीत्यव्याप्तिशङ्का ।

१२ । १९ **अनुभूयमाने इति** । प्रागनुभूयमाने पित्रादौ यत्संनिहितत्वमनुभूतं तत्स्वप्ने तात्कालिकत्वेनानुभूयते अतः पाकरक्ते घटे इदानीं श्याम इति प्रत्ययवत् स्वप्नस्य विभ्रमत्वमिति भावः । नैयायिकमतेनायमव्याप्तिपरिहारः । स्वमते तु स्वप्नदृष्टः पित्रादिः स्वरूपत एव प्रातिभासिकः तस्यात्मा ऽधिष्ठानम् । न च तावता व्यावहारिकत्वापत्तिः । अप्रयोजकत्वात् । साक्षिण्यध्यस्तानामविद्यान्तःकरणतद्धर्मादीनां यावत्सत्त्वं प्रतिभासमानानां प्रातिभासिकत्वाभ्युपगमाच्च । तदेतदात्मनि चैवं विचित्राश्च हीति† सूत्रव्याख्यानेन स्फुटं भविष्यतीत्यत्र नोद्घाटितं टीकायाम् । पीतशङ्खविभ्रमादिस्थले संनिकृष्टपित्तपीतिमादिविशिष्टशङ्खादिविषयम्‡ अध्यासरूपमेव ज्ञानं§ जायते न तत्रारोप्यस्य पीतिमादेः पूर्वदर्शनमस्ति|| । न च तत्र कनकादिषु पीतिमानुभवरूपं पूर्वदर्शनमस्तीति वाच्यम् । अननुभूतपीतवर्णस्य पित्तोपहतनयनस्य पुंसः प्रथमं पीतशङ्खविभ्रमात्मके एव जायमाने पीतिमानुभवे तदसम्भवादित्याशङ्क्य तत्रापि पूर्वदर्शनसद्भावः समर्थ्यते ।

इदं किमर्थं तस्य लक्षणानुप्रविष्टत्वेन तदभावे ऽपि लक्षणाव्याप्त्य-
„ । २० प्रसक्तेरित्याशङ्क्यावतारयति **अन्यार्थमिति** । अध्यासेषु पूर्वदृष्टिमात्रमपेक्ष्यते न तु सत्तेत्यध्यसनीयसत्तानिराकरणार्थं तेषु पूर्वदृष्टिः सार्वत्रिकी व्यवहृता तत्सार्वत्रिकत्वाभ्युपगमो न युक्त इत्याशङ्क्य परिहरतीत्यर्थः । टीकायां पीतशङ्खविभ्रमस्थले तदानीन्तनं नयनरश्मिगतपित्तपीतिमानुभवरूपं प्राचीनं तपनीयपिण्डादिगतपीतिमानुभवरूपं च पूर्वदर्शनमस्तीति समर्थितम् । तत्राद्यपक्षो न युक्तः । नयनरश्मिभिर्निर्गत्य शङ्खमावृण्वतः पित्तद्रव्यस्य पीतिमा ऽनुभूयतइत्यङ्गीकारे कनकलिप्तशङ्ख इव अन्येषामपि पीतशङ्खविभ्रमप्रसङ्गात् । शङ्खनयनान्तरालवर्तिरश्मिगतपित्तपीतिमा ऽनुभूयतइत्यङ्गीकारे ऽन्तरालदेशे ऽन्येषामपि तद्ग्रहणप्रसङ्गात् । अतो ऽतीन्द्रियनयनरश्मिगतपित्तपीतिम्नो नानुभवः सम्भवतीत्यस्वारस्यात्प्राचीनानुभवपक्ष उपन्यस्त इत्येतत्सूचयति

* न चेति ३–५ पु० पा० ।
† व्याससू० अ० २ पा० १ सू० २८ ।
‡ शङ्खविषयमिति ५ पु० पा० ।
§ अध्यासरूपभेदज्ञानमिति ४ पु० पा० ।
|| पूर्वं दर्शनमिति ५ पु० पा० ।

गृह्यमाणविषयत्वेन* प्रसिद्धभ्रमे†ष्विति । गृह्यमाणविषयतया ता- १२ । २१
र्किकप्रसिद्धिमात्रं वस्तुतः पीतशङ्खविभ्रमो न तथेति भावः । न च तस्य गृह्यमाणारोपत्वाभावे स्मर्यमाणारोपत्वं वक्तव्यं न तु तदुच्यते स्मरणस्यानियततया कदा चित्पित्तोपहतनयनस्य पीतिमस्मृत्यनुदये श्वेतः शङ्ख इत्यनुभवप्रसङ्गादिति वाच्यम् । अतिधवलसिकतातलप्रवहदच्छनदीजलनैल्याध्यासे नीलिम्न इवात्रापि पीतिम्नः स्मृतिनियमकल्पनोपपत्तेः । पूर्वानुभवजन्य‡संस्कारमात्रेण नैल्याध्याससमर्थने त्विहापि तथास्तु । अननुभूतपीतवर्णस्य पीतशङ्खविभ्रमे तु जन्मान्तरानुभूतपीतिमस्मरणमुपासनीयम् । एतादृशेषु जन्मान्तरानुभूतस्मरणं गतिरिति व्युत्पादयितुमेव पञ्चपादिकायां शिशोः स्तन्ये तिक्तताध्यासो जन्मान्तरानुभूततिक्तरसस्मरणकृत इत्युक्तम् । इत्थं पीतशङ्खविभ्रमो नानुभूयमानारोप इति मतानुसारेण व्याख्याम् ।

ये तु नयनरश्मिगतपित्तपीतिम्नो ऽनुभवमङ्गीकृत्यानुभूयमानारोपः स इति मन्यन्ते तन्मते तु पित्तपीतिम्नो ऽनुभवोपन्यास आरोपार्थः । तपनीयपिण्डादिगतपीतिमप्राचीनानुभवोपन्यासस्तु पूर्वदृष्टपदयथाश्रुतार्थस्वारस्यलाभार्थ इति योज्यम् । टीकायां सामानाधिकरण्यं पीतिमतादात्म्यमेव न तु पीतिमसामानाधिकरण्यम् । तदेतत् टीकायां नयनरश्मिगतपित्तपीतिममात्रानुभवस्य शङ्खे पीतिमाऽसंसर्गाग्रहस्य पीतः शङ्ख इति विभ्रमाकारस्य चोपन्यासेन स्पष्टमित्यभिप्रेत्य तथा न व्याख्यातम् । एवं च सति टीकायां पूर्वदृष्टं सामानाधिकरण्यं पीतत्वशङ्खयोरारोप्याहेति युक्ततरः पाठः । न तु पीतत्वशङ्खत्वयोरारोप्याहेति पाठः । यद्वा पीतिमशङ्खत्वयोस्तादात्म्यसंबन्धेन शङ्खवर्त्तित्वे शङ्खगतैकत्वे च भासमाने तयोः सामानाधिकरण्यमपि संसर्गमर्यादया भासतइत्यभिप्रायः स पाठः । अत एव पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरनुमानफलमिति तार्क्किका अपि वदन्ति ।

पीतत्वशङ्खयोरिति । अत्र साद्रूप्यमित्यनेन पीतिमतादा- ,, । २५
त्म्यप्रतीतावन्यत्र संप्रतिपन्नकारणसाम्यमुक्तं न तु तच्चाकचक्यादिवद् भ्रमहेतुदोषरूपं सादृश्यम् । अयं चासंसर्गाग्रहरूपकारणसद्भावः प्रायिकतयोक्तः ।

---

* विषयतयेति ३–५ पु॰ पा॰ । उपरितन एव मूलपाठः ।

† प्रसिद्धविभ्रमेष्विति १ पु॰ पा॰ ।

‡ पूर्वपूर्वानुभवजन्येति २ पु॰ पा॰ ।

अयं शङ्खः पीतो न भवति शङ्खत्वादितरशङ्खवदित्यानुमानिकपीतिमासंसर्गग्रहे सत्यपि पित्तोपहतिदोषप्राबल्यात् पीतशङ्खविभ्रमोऽवश्यं भवत्येव । **अव्याप्तिमाशङ्क्य** **हेति**। अव्याप्तिरित्याशङ्क्याहेत्यर्थः । आदर्शादिकमधिष्ठानमिति हि पूर्वपक्षिशङ्कामात्रं सिद्धान्ते तु मुखमेवाधिष्ठानमिति वक्ष्यते । अत इत्थं व्याख्या । पूर्वदृष्टाभिमुखादर्शोदकदेशतामिति टीकायां पूर्वदृष्टत्वमादर्शोदकदेशताया न विशेषणम् । आदर्शे मुखमिति प्रतीतौ संसर्गविधया प्रतीयमानायास्तस्याः शुक्तिरजततादात्म्यस्येव पूर्वदृष्ट्यनपेक्षणात् । पीतं बिल्वफलमित्यादौ पूर्वदृष्टं सामानाधिकरण्यम् । पीतत्वशङ्खयोरारोप्याहेति टीकायां पीतिमतादात्म्यस्यापि पूर्वदर्शनं सम्भवमात्रेणोपन्यस्तम् । अत एव पित्तपीतिमानुभवरूपपूर्वदर्शनसमर्थने तन्नोक्तम् । तस्मादधिकरणत्वेन मुखविशेषणतया ऽऽरोप्ययोरादर्शोदकयोरेव तद्विशेषण-
१२ । २६ मित्यभिप्रेत्य विगृह्णाति **पूर्वदृष्टयोरिति**।

ननु यत्र पूर्वमदृष्टयोरादर्शोदकयोः प्रतिबिम्बविभ्रमः तत्र कथं पूर्वदृष्टविशेषणं तत्रापि प्रथमसंनिकृष्टादर्शोदकदर्शने जाते पश्चात् परावर्तितेन चाक्षुषेण तेजसा मुखसंनिकृष्टेन मुखग्रहणे सति तस्मिन् प्रतिबिम्बविभ्रमो जायतइति तदुपपत्तिः । ननु यदीन्द्रियसंनिकृष्टम् अनुभूयमानादर्शोदकमधिकरणत्वेन मुखे समारोप्यतइतीष्यते तदा ऽन्यथाख्यात्यापत्तिः । रजतवदनिर्वचनीयस्यादर्शान्तरस्य मुखान्तरस्य वोत्पत्त्यनङ्गीकारादिति चेद् न । तत्रादर्शमुखयोराधाराधेयभावस्यानिर्वचनीयस्योत्पत्त्या ऽन्यथाख्यातिवैषम्यात् । अन्यथा अन्येष्वनुभूयमानारोपेषु का गतिः । यद्यपि रक्तः पट इत्याद्यनुभवो महारजनादिसंबन्धात् पटे वर्णान्तरोत्पत्त्यापि समर्थयितुं शक्यः । दृष्टा हि हरिद्रासंबन्धात् चूर्णे रक्तिम्नः सलिलसंबन्धाद् भूतले नीलिम्नश्चोत्पत्तिः । तत्र हरिद्रासलिलवर्णवैलक्षण्याद् वर्णान्तरोत्पत्तिरिष्यते चेदिहापि तुल्यो न्यायः । रञ्जकद्रव्यसंबन्धे सति तद्गुणविलक्षणस्यैव रञ्जकद्रव्यबहुल्पभावेनोत्कर्षापकर्षापन्नस्य* वर्णस्य पटे दर्शनात् । तथापि चूर्णलिप्तशुक्लघटादिषु वर्णान्तरोत्पत्त्यभावात् तेषु शुक्लो घट इत्यादिरनुभूयमानचूर्णशुक्लिमाद्यारोपरूप एव वाच्यः । टीकायां देहगततामनभिमुखतां च

---

* उत्कर्षफलस्येति १-३ पु॰ पा॰ ।

मुखस्याग्राह्यदिति क्व चित्सम्भवमात्रेणोक्तम् । वस्तुतः प्रतिबिम्बविभ्रमे विरोध्यग्रहणं नापेक्षितम् । तटस्थत्वोर्ध्वाग्रत्वादिना दृश्यमानेऽपि तरौ तटाकजलस्थत्वाधोग्रत्वाद्यारोपदर्शनात् । वंशेषु वंशवर्णेषु चेति पाठः । वमावर्णेष्विति पाठस्तु चक्षुस्तेजसा सह पित्तद्रव्यवद्रसावयवस्य निर्गमेन कथं चिदुपपादनीयः । पूर्वदृष्टोरगतद्वर्णारोप इति पाठः । तद्वर्णसामानाधिकरण्यारोप इति पाठे तु सामानाधिकरण्यं तादात्म्यम् ।

नासत्ख्यातिरिति शङ्कते इति । ननु न प्रकाशमानता सत्ता १३ । ७
मरीचिषु तोयात्मत्वस्यासतः प्रकाशादित्युक्ते कथं तेषु तोयानात्मत्वस्य
सद्रूपत्वप्रतिपादनेनासत्ख्यात्यभावशङ्का । सत्यम् । इदमेव दूषणमत्र ब्रूम
इत्यादिटीकया प्रतिपादयिष्यते । ननु स्फुटे वैयधिकरण्यदूषणे कथमना-
लम्बना शङ्का । व्यधिकरणोत्तरेणैव सत्ख्यातिवादनिर्वाह इत्युपहासार्थं
तदीयशङ्कोद्भाविता । **पूर्वज्ञानाधीनत्वं सत्त्वमिति** । शून्यवादिमते
ज्ञानस्याप्यसत्त्वात् तस्य पूर्वज्ञानाधीनत्वं यदस्ति तत् परं सत्त्वमिति
व्यपदिश्यते । अतोऽग्रिमटीकाग्रन्थे तन्मते ज्ञानविषययोः सदसत्त्वव्यवहारो
न विरुद्ध इति भावः । **सति हि कस्मिंश्चिदिति** । तेनेति शेषः ।
असत्यप्यायतते । असदधीनमपि भवति । असतीति विषयसप्तमी । ,, । १७
क्व चिदायततइत्येतदनन्तरमायातीति पदान्तरं दृष्टं तत्प्रामादिकम् ।
आयततइत्यस्य आगमनार्थत्वाभावात् । असतः सकाशादायातीत्येतदर्थकं फलितार्थकथनपरं वा तद् द्रष्टव्यम् । **न च प्रत्यय** इति वाक्यस्यार्थमाह **न च स्वोपकारिणीति** । **अतोऽतिसुखीति** । स्वयं कस्य चिदनुपकुर्वन्नेव तेनोपक्रियतइत्ययत्नलभ्योपकारोऽयमित्यतिसुखीत्युपहासः । तदात्मना न सतत्त्वा इति साध्ये हेतोः साध्याविशेषमाशङ्क्य हेतुं विशिनष्टि **तदात्मनाऽसत्त्वस्येति** । ममापीष्टत्वादिति सर्वसंप्रतिपत्त्यर्हः शुद्धः पाठः । **किं तुच्छमसत् सदन्तरं वेति** । असच्छब्दस्यालीकमर्थमभिप्रेत्याद्यो विकल्पः । अभावमर्थमभिप्रेत्य द्वितीयो विकल्पः । एवं हि
टीकायां द्वितीयविकल्पविवरणे भावान्तरमभाव इति तन्मतप्रदर्शनं*
सङ्गच्छते । **असत्ख्यातिनिरासमिति** । ननु सत्ख्यातिवाद्युपन्यस्ता- १४ । १८

* तन्मतप्रदर्शनमिति नास्ति ४ पु॰ ।

ऽसत्ख्यातिवादनिरासो न सिद्धान्त्यनुमोदनार्हः । अत्यन्ताऽसत्यपि ज्ञानमर्थे शब्दः करोति हीति सिद्धान्ते शाब्दासत्प्रतीत्यङ्गीकारात् । अनिर्वाच्यत्वनिर्वचनप्रविष्टासद्वैलक्षण्यइव अर्थज्ञाने ऽप्यसन्निरूपितत्वोपपत्तेश्चेति चेत् । सत्यम् । शब्दस्यासत्प्रतिपादनक्षमत्वे ऽपीन्द्रियस्यासंनिकृष्टग्राहकत्वाभावादसंनिहितस्येव असतोपि नापरोक्षत्वमुपपद्यतइति तात्पर्यम् ।

१४ । १३ मुधा ऽमुष्येति* । ननु देशान्तरस्थरजतस्य भ्रमविषयत्वोपपत्तौ मुधा ऽभिनवरजतकल्पनमिति विपरीतमेव वक्तुं युक्तम् । न चासंनिहितापरोक्ष्ये संनिकर्षकारणाभावो दोषः । ज्ञानस्य संनिकर्षत्वे वह्न्यनुमितिस्थले प्रत्यक्षोदयप्रसङ्गात् । समाने विषये प्रत्यक्षसामग्र्या बलवत्वात् । अलौकिकप्रत्यक्षसामग्र्यपेक्षया ऽनुमितिसामग्र्या बलवत्त्वे संशयोत्तरभ्रमरूपपुरुषप्रत्यक्षस्थले अनुमितिप्रसङ्गात् । तस्य संनिकर्षत्वाभ्युपगमे ऽपि यत्र यत्पूर्वमवगतं तस्मिन्नेव पुनर्दृश्यमाने तज्ज्ञानस्य यदवच्छेदेन यत्पूर्वमवगतं तद्वत्त्वेन दृश्यमाने तज्ज्ञानस्य वा तदुपनायकत्वेन पूर्वरजतत्ववत्त्वेन रजतत्वावच्छेदकवत्त्वेन वा अनवगते शुक्तिशकले रजतज्ञानस्य संनिकर्षत्वाऽयोगा†च्चेति वाच्यम् । रजतान्तरोत्पत्तावपि संप्रतिपन्नरजतकारणाभावस्य तुल्यत्वात् । तदभावे ऽपि दोषवशात् प्रसिद्धव्यावहारिकरजतविलक्षणं प्रातिभासिकं रजतमुत्पद्यतइति कल्प्यते चेत् संनिकर्षाभावे ऽपि दोषवशादसंनिहितरजतविषयं प्रसिद्धप्रमारूपज्ञानविलक्षणं भ्रमरूपज्ञान‡मुत्पद्यतइत्येव कल्प्यतां लाघवादिति चेत् । उच्यते । अस्ति तावत्प्रतारकवाक्यात् शशस्य शृङ्गमस्ति तदेवंलक्षणमरण्ये पतितमन्विष्य लब्धुं शक्यं तेन चेदं प्रयोजनं भवतीत्येवंरूपादवाप्तमोहस्य तथैवारण्यं गत्वा तदन्वेषमाणस्योक्तलक्षणकाष्ठशृङ्गान्तरादिदर्शने शशशृङ्गमिदमित्यनुभवः । अस्ति च स्वप्ने मनुष्यपशुपक्षिवृक्षाद्यनेकरूपस्यैकस्यावयविनो ऽनुभवः । न च तत्रासंनिहितविषयत्वं कल्पयितुं शक्यमित्यगत्या दोषवशात् प्रातिभासिकस्यैव तस्योत्पत्तिरङ्गीकरणीया । एवमन्यत्र भ्रमस्थले दोषस्य विषयोत्पत्तिकारणत्वक्लृप्तौ तथैव रजतभ्रमे ऽपि सम्भवति ज्ञानप्रत्यासत्त्याद्यजन्यरजतचाक्षुषप्रत्यक्षमात्रे क्लृप्तस्य रजतचक्षुःसंयो-

---

* मुधाऽस्येति मूलानारूढः ३–५ पु· पा· ।

† संनिकर्षायोगादिति ४ पु· पा· । ‡ विलक्षणं प्रातिभासिकं रजतमिति १–३–पु· पा· ।

गस्य रजतालोकसंयोगस्य च कारणत्वं परित्यज्य तस्यासंनिहितरजतविषयत्वं न कल्पनीयम् । ननु चैत्रादिव्यक्तिविशेषभ्रमस्य असंनिहितप्रसिद्धचैत्रादिविषयत्वम् अवश्यं कल्पनीयं रजतसामान्यार्थिप्रवृत्तेः प्रातिभासिकरजतज्ञानादिव प्रसिद्धचैत्रोद्देश्यकप्रवृत्तेः प्रातिभासिकचैत्रज्ञानादुत्पत्त्यसम्भवादिति चेद् न । प्रातिभासिकरजतज्ञाने रजतत्वप्रकारत्वस्येव प्रातिभासिकचैत्रज्ञाने चैत्रत्वप्रकारकत्वस्य सत्त्वेनेष्टतावच्छेदकप्रकारकात्तत्तदुद्देश्यकप्रवृत्त्युपपत्तेः। ननु तदेवेदं रजतमिति व्यक्तिविशेषविषयप्रत्यभिज्ञारूपभ्रमस्य व्यवहितपूर्वदृष्टरजतविषयत्वम् अवश्यं कल्पनीयं तद्रजतमिह केनानीतमित्यपि व्यवहारदर्शनादितिचेद् न । तस्य व्यावहारिकरजतान्तरइव प्रातिभासिकरजते ऽपि दुष्टकरणसहकारिसंस्कारोपनीततत्ताविषयत्वोपपत्तेः । न चाभिनवरजतोत्पत्त्यङ्गीकारे जलबुद्बुदादेरिव तस्योत्पत्तिनाशानुभवप्रसङ्गः । भ्रमकाले तस्य प्राक्सिद्धपुरोवर्तितादात्म्येनानुभूयमानतयोत्पत्त्यप्रतीत्युपपत्तेः । बाधावतारे* त्रैकालिकनिषेधस्यानुभूयमानतया नाशाप्रतीत्युपपत्तेश्च । न च क्वचिदुत्पद्य कंचित्कालं स्थितस्य तत्र त्रैकालिकनिषेधानुपपत्तिः। फलबलात् समानसत्ताकयोरेव प्रतियोगितदत्यन्ताभावयोर्विरोधः न तु प्रातिभासिकव्यावहारिकयोरिति कल्पनोपपत्तेः । एतेन यस्य प्रथमं शुक्तिशकले रजतभ्रमानन्तरं बाधो नोत्पन्नः तत्र शुक्तिसाधारणचाकचक्याद्यवच्छेदेन रजतत्वानुभवस्यानपोदितत्वात् पुनः शुक्तिशकलान्तरे रजतभ्रमोदये ऽन्यथाख्यातिः सम्भवति तत्र यदवच्छेदेनेत्याद्युक्तरूपोपनयमानसामग्रीसत्त्वात्। पाकरक्ते घटे श्यामो ऽयमिति भ्रमोदये चान्यथाख्यातिः सम्भवति यत्र यदनुभूतमित्याद्युक्तरूपोपनयसामग्रीसत्त्वादित्यपि शङ्का निरस्ता । क्वचिद्भ्रमे देशघटितसामग्रीबलादाविद्यकविषयोत्पत्तिप्रावन्यत्रापि तदुत्पत्तेरनिवारणात् । पाकरक्ते स्मृत्युपनीतश्यामवर्णप्रत्यक्षस्य पूर्वानुभूतसौरभे पश्चाद् निखननादिना गतसौरभे चन्दनखण्डे सुरभीदं† चन्दनखण्डमिति स्मृत्युपनीतसौरभविषयचाक्षुषप्रत्यक्षस्येव प्रमात्वाद् इदानीं श्याम इति प्रत्यक्षभ्रमस्य विरोधिनि रक्तरूपे स्फुरत्यसम्भवात् श्याममृल्लिप्ते रक्तघटे

---

* बाधादुत्तरे इति ४ पु॰ पा॰ । † इदमिति नास्ति २-४ पु॰ पा॰ ।

इदानीं श्याम इति प्रत्यक्षभ्रमस्यानुभूयमानमृद्वर्णारोपत्वसम्भवेन स्मृत्युपनीतविषयत्वस्याकल्पनीयत्वात् ।

„ । १९ **देहादिः सन्निति*** । टीकायां शङ्काग्रन्थलिखिते ऽनुमाने नासन्त इति साध्यं निर्दिष्टम् । तत्रासत्त्वमलीकत्वं चेत् तद्व्यतिरेकसाधनमनिर्वचनीयत्ववादिनः सिद्धसाधनम् । असतः प्रतीत्यविषयत्वस्य सत्ख्यातिवाद्यभिमतत्वात् साध्याप्रसिद्धिश्च । अनिर्वचनीयत्वं चेदत्रा† पि साध्याऽप्रसिद्धिः । तस्य तन्मते शशशृङ्गायमानत्वादित्यभिप्रेत्य सदिति साध्यं निर्दिष्टम् । ननु किमिह सत्त्वं साध्यं प्राक् सद्वाद्युक्तं प्रकाशमानत्वं चेत् हेतोः साध्याविशेषः स्वरूपसत्त्वं सत्ता जातिः अर्थक्रियाकारित्वम् इत्येतानि सिद्धसाधनग्रस्तानि । अबाध्यत्वं त्वात्मनि सत्त्वे प्रयोजकमित्युपाधित्वेन वक्ष्यते । प्रकाशमानत्वं च भासमानत्वं चेदसति प्रतिवादिगते न व्यभिचारः । अपरोक्षतया भासमानत्वं चेद्वादिशब्दग्राह्येष्विन्द्रियेषु भागासिद्धिरिति चेत् । उच्यते । प्रमाविषयत्वं ज्ञानानिवर्त्यत्वं वा सत्त्वमिह साध्यं भासमानत्वसामान्यं हेतुः सद्वादिना तस्यासति प्रत्याख्यातत्वात् प्रसाध्याङ्को हेतुरिति नात्र व्यभिचारशङ्का । यद्यपि सिद्धान्तिना कृतं मरीचिकोदकस्यानिर्वचनीयत्वोपपादनं प्रकाशमानतैव न सत्ता मरीचिकोदकस्य प्रकाशमानत्वे ऽपि सत्त्वाभावादिति तयोर्व्यतिरेकप्रदर्शनेनाभेदनिरासार्थं देहेन्द्रियादिबाध्यत्ववर्णनम् । प्रकाशमानत्वं सत्त्वं न भवति चेत् किं तर्हि सत्त्वमित्याकाङ्क्षायामबाध्यत्वं सत्त्वमित्यभिप्रेत्य देहेन्द्रियादिषु तद्व्यतिरेकप्रदर्शनार्थं देहेन्द्रियाद्यध्यासेष्वध्यासविस्तृतलक्षणानुगतिप्रदर्शनानन्तरं तत्सङ्क्षिप्तलक्षणानुगतिप्रदर्शनार्थं चेति व्याख्यातुं शक्यं तथापि तद्व्याख्यानं स्पष्टमिति मत्वा पूर्वपक्ष्याशयस्थमनुमानमुद्घाट्य तत्र व्यभिचारोपाधिप्रदर्शनार्थत्वेन सैद्धान्तिकमिदं ग्रन्थद्वयं व्याख्यातम् ।

१४ । २८ **स्वयंप्रकाशत्वादिति** । स्वयम्प्रकाशमात्मनः स्वरूपं केनापि बाधितुं न शक्यम् । अन्ततो बाधसाक्षिण एव स्वयंप्रकाशमानस्यात्मत्वपर्यवसानादिति भावः । **दृग्दृश्येति** । दृश्यध्यस्तत्वं विना दृशा दृश्यस्य

---

* देहादि सदिति प्रायः सर्वेषु पुस्तकेषु पाठः परमुपरितन एव मूलानुसारी ।

† अत्रेति नास्ति २ पु॰ ।

संबन्धा*न्तराऽनिरूपणादित्यर्थः । **सत्यस्यात्मवदिति**† । **विषादेरि-**
ति । ननु सर्वः प्रपञ्चो मिथ्येति त्वन्मते विषस्य सत्यत्वाऽसिद्धिरस्तु नाम तथा-
पि विषस्य मिथ्यात्वं न तार्क्ष्यध्याननिवर्त्यत्वप्रयुक्तं त्वयेष्यते किं तु प्रपञ्चमि-
थ्यात्वसाधकप्रमाणान्तरप्रयुक्तमिष्यते। तथा च तार्क्ष्यध्याननिवर्त्यत्वं विषस्येव
ब्रह्मज्ञाननिवर्त्यत्वं संसारस्य मिथ्यात्वे प्रयोजकं न स्यादित्याशङ्क्याह **ध्यान-**
स्य चेति । ब्रह्म ज्ञानं हि परीक्षितप्रमाणमूलकं प्रमारूपमेव संसारनिवर्तकम् ।
वेदान्तविज्ञानसुनिश्चितार्था इत्यादिश्रुतेः । ब्रह्मविद्योपक्रमाम्नातगुरुशिष्यनि-
बन्धवदुपाख्यानगतयावत्संशयनिवृत्तिप्रश्नोपदेशतत्तदुपपत्त्युपन्यासलिङ्गाच्च ।
तत्प्रमात्वस्थिरीकरणापेक्षिताऽसंभावनादिनिवृत्त्यर्थप्राप्तश्रवणमननध्यानानुवा-
दलिङ्गाच्च । तार्क्ष्यध्यानस्य तु कल्पिताऽकल्पितसाधारणयथोपदिष्टार्थविष-
यस्य विषनिवर्तकत्वे प्रमात्वं नापेक्षितमित्यर्थः ।

ननु सेतुदर्शनं प्रमारूपमेवाऽघनिवर्तकम् अन्यच्च सेतुभ्रमेण तदनिवृत्तेः ।
अतः प्रमात्वापेक्षमपि निवर्त्यत्वं न मिथ्यात्वप्रयोजकमित्याशङ्क्याह
सेतुदर्शनं चेति । यद्विषयप्रमात्वमात्रं यन्निवर्तकताप्रयोजकं तत् तत्राध्य- १५ । १३
स्तमिति नियमस्य न व्यभिचार इत्यर्थः । यद्यपि शुक्तौ रजताध्यासस्य रङ्गा-
ध्यासेनापि निवृत्तिरस्ति तथापि समूलसकलाध्यासनिवृत्तिरधिष्ठानप्रमापेक्षा
तदन्यानपेक्षा च दृष्टा तन्न्याय इहापि ग्राह्य इति भावः । ननु सेतुदर्शनवद्
विध्यायत्तं ब्रह्मज्ञानस्य निवर्तकत्वं न शुक्तिज्ञानवदधिष्ठानप्रमात्वायत्तम् इत्या-
शङ्क्याह **आत्मप्रमा त्विति** । विरोधिविषयतया दृष्टद्वारेणाज्ञाननिवृत्ति-
र्ज्ञानोदयानन्तरमेव भवन्ती निवर्तकज्ञानसमानकाला भवतीति शुक्तिज्ञानज-
न्यरजतनिवृत्तौ दृष्टं तद्वदिहापि ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतिषु ब्रह्म-
वेदननिवृत्तसंसारब्रह्मभावापत्त्योर्लडाख्याताभ्यां समानकालता प्रतिपाद्यते ।
न च प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्तीत्यत्र सत्रानुष्ठानप्रतिष्ठाफलयौ-
गपद्यप्रत्यायकलडाख्यातयोरिवान्यथानयने कारणं किं चिद् बाधकमस्ति ।
तस्माद् ब्रह्मज्ञानं दृष्टद्वारेणैव संसारं निवर्तयति शुक्तिज्ञानमिव रजताध्या-
समित्यवसीयत इति भावः । **मतभेदेनेति** । बाह्यास्तित्ववादिनोर्वैभाषिक- ,, । २३

---

* दृश्यसंबन्धेति १–३ पु॰ पा॰ ।

† सत्यत्वेतीति १ पु॰ । एतदग्रे विषादेरिति नास्ति १–३ पु॰ । ५ पु॰ एतद्बहिर्लिखि-
तम् । उत्तरग्रन्थसंदर्भप्रदर्शनाय युक्तमुभयोः प्रतीकयोर्ग्रहणम् ।

सौत्रान्तिकयोः सत् शुक्तिशकलादिकमधिष्ठानम् । तन्नास्तित्ववादिनो योगा-
चारस्य त्वविद्याकल्पितं तदधिष्ठानमित्येवं मतभेदेनाधिष्ठानभेदमाहेत्यर्थः ।
ननु प्रातिभासिकाध्यासेष्वधिष्ठानग्रहणं नियतं तद् बाह्यप्रत्यक्षत्ववादिनो*
वैभाषिकस्य सुघटं न तु तदतीन्द्रियत्ववादिनः सौत्रान्तिकस्येत्या-
शङ्क्य तस्यानुमानिकं तदस्तीत्याह **वैभाषिकवदिति । अस्त्यधिष्ठा-
नमिति ।** स्फुरदधिष्ठानमस्तीत्यर्थः । **भ्रान्तिज्ञानाकारसदृशस्येति ।**
भ्रान्तिज्ञाने सविकल्पके य आकारो रजतादिः तस्य वस्तुतो बाह्यस्य
१६ । १ शुक्तिगतस्याभावादित्यर्थः । **समानाधिकरणे† पञ्चम्याविति ।** षष्ठी-
पञ्चम्यन्तत्वेन व्यधिकरणे चेद्रजतस्य विज्ञानाकारत्वे अहं रजतमिति स्यादि-
त्यापादनस्यायुक्तत्वशङ्का विज्ञानाहमर्थभेदप्रयुक्तैव वारिता स्यात् तथापि वि-
ज्ञानाकारतया रजतस्य विज्ञानधर्मत्वादहं रजतवानित्यनुभवः स्यादित्यापा-
दनीयमित्येतत्प्रयुक्ता तत उपरि सम्भवन्ती‡ न वारिता स्यात् समानाधिकरणे
चेत् शङ्काद्वयमपि वारितं भवतीत्यभिप्रेत्यैवं व्याख्यातम् । **भ्रान्तिरूपवि-
कल्पस्य हीति ।** विकल्पः सविकल्पकं तस्य द्वौ विषयौ ग्राह्याध्यवसेय-
भेदात् । तस्याकारेभ्यो निकृष्टं यदविकल्पं स्वरूपमस्ति तद् ग्राह्यं स्वविषय-
त्वलक्षणस्वप्रकाशत्वाङ्गीकारात् । तस्य रजताकारस्योपर्यवसेयो बाह्यत्वश-
ब्दोक्त इदन्त्वाकारो विकल्परूपो ऽध्यवसेय इति साकारवादिनां प्रक्रिया ।
तथा च पुरोवर्तिन्यधिष्ठाने ज्ञानाकाररूपं रजतमिदन्त्वेनारोप्यतइति नाह-
न्त्वोल्लेखप्रसक्तिरिति भावः । ननु रजतज्ञाने शुक्तेः कारणत्वेन विषयत्वं
नाख्यातिमते शङ्कार्हम् । अन्यथाख्यातिमतएव तस्य विशेष्यत्वेन कारण-
त्वादित्याशङ्क्याऽख्यातिमते ऽपि रजतज्ञाने शुक्तेः कारणत्वमुपपादयन्नवता-
,, । १८ रयति **अथ रजतसदृशेति । मिथ्याज्ञानमपीति ।** ननु मिथ्याज्ञान-
निह्नवो न च रजतमेव शुक्तिकायां प्रसञ्जितमित्यादिपूर्वग्रन्थेनापि कृतः स
ग्रन्थस्तथैवावतारितश्च । सत्यम् । स ग्रन्थो ऽर्थाध्यासनिह्नवस्यापि साधारणः
यतः शुक्तेर्देशान्तरस्थरजतात्मनेव तद्देशोत्पन्नरजतात्मना भानाङ्गीकारे ऽप्य-

* प्रत्यक्षवादिन इति ४ पु० पा० ।

† कल्पतरुपुस्तके सामानाधिकरण्ये इति परिगृहीतसर्वपुस्तकानुसारात् पाठः स्थापितः परमेतदनुरोधाद्युक्तत्वाच्चायमेव पाठस्तत्रापि बोध्यः ।

‡ भवन्तीति २-५ पु० पा० ।

न्यात्मना भानमन्यालम्बनमित्येतदनुभवविरुद्धमित्यर्थाध्यासनिह्नवो ऽपि तेन लभ्यते। इन्द्रियसामर्थ्यरूपकारणाभावोपपादनं तु मिथ्याज्ञाननिह्नवएवा-साधारणयुक्तिरिति तात्पर्येणैवमवतारितम्। **गृहीतमिदमिति।** पूर्वानुभ-वविषयत्वं तत्तेति भावः। **नाश्रयासिद्धिरिति।** एतदुपलक्षणम्। साध्य-मपि सर्वविषयावच्छिन्नयाथार्थ्यं वा विसंवादीच्छाप्रवृत्तिरूपव्यवहारप्रसिद्धाया-थार्थ्यराहित्यं वेति धर्म्यंशयाथार्थ्यमादाय न सिद्धसाधनमित्यपि द्रष्टव्यम्*।

पुरोवर्तिनि साधने इति। ननु फलज्ञानवदुपायज्ञानमपि न नि- १७। ११
यमेन प्रवर्तकं फलस्य नानोपायसाध्यत्वादेवेति हेतोरसिद्धिः। व्यक्तिनियमेन हेतुसमर्थने व्यभिचारनादवस्थ्यम्। यत्पक्षीकृतं रजतज्ञानं पुरोवर्तिनि नियमेन प्रवर्तकमिष्यते तत्तत्यफलज्ञानस्यापि तस्मिन्नियमेन प्रवर्तकत्वात्। एवं च तत्रेति विशेषणेन न स्मृतेरपि व्यावृत्तिः। आरोपप्राचीनस्यारोप्यस्मरणस्यापि फलसाधनताज्ञानप्राचीनफलज्ञानतुल्यन्यायतया नियमेन पुरोवर्तिनि प्रवर्त-कत्वात्। एवं तावन्नियमेनेति तत्रेति च विशेषणमयुक्तम्। बाधादिव्यावृत्त्यर्थं रजतार्थिन इति विशेषणमित्यप्ययुक्तम्। तृणपर्णजलादिकमिव स्ववेगबलात् पुरुषं नयता वाय्वादिना पुरुषे फलाख्यप्रवृत्तेरजननात्। प्रवृत्तिपदस्य शरीरक्रि-यासाधारणव्यापारमात्रपरत्वे ऽपि शरीरात्मकालाऽदृष्टादिव्यभिचारवारणाय प्रवर्तकज्ञानत्वादिति हेतोर्विवक्षणीयत्वेन टीकायामुदाहरणवाक्ये ज्ञानपद-निवेशनया तद्विवक्षायाः सूचितत्वेन च तत एव तन्निरासलाभाच्च। नियमवि-शेषणेनैव कालादृष्टादिव्यावृत्तौ तत एव वायोरपि व्यावृत्तिसिद्धेश्चेति चेत्। उच्यते। टीकायां फलसाधनतानुमितिहेतुपरामर्शरूपं यद्रजतत्वहेतुविषयं ज्ञानमावश्यकमिति प्रतिपादितं तदत्र पक्षः। तस्य पुरोवर्तिविषयत्वं साध्यम्। स च परामर्शः पुरोवर्तिविषयामेव फलसाधनतानुमितिं तद्द्वारा प्रवृत्तिं च जनयति फलस्य वस्तुतो नानोपायसाध्यत्वे ऽपि तदन्यत्र तदुपायत्वानुस-न्धानाभावात्। फलज्ञानं तु तटस्थं न नियमेन पुरोवर्तिनि प्रवर्तकं तस्यो-पायान्तरगतफलसाधनताऽनुमितिद्वारा ऽन्यत्रापि प्रवर्तकत्वसम्भवात्। तथैवा-रोपप्राचीनरजतस्मरणमपि। सत्यपि तस्मिन्नन्यत्र फलसाधनतानुमित्या प्रवृत्ति-सम्भवात्। तत्रेति विशेषणं तु स्वयं गेहादिनिहितरजतार्थिप्रवृत्तिनियतत-

---

* इति द्रष्टव्यमिति १-२ पु॰ पा॰।

द्रजतगतफलसाधनतादिस्मृतौ व्यभिचारनिरासार्थम् । प्रवर्तकत्वं शरीरव्यापारप्रयोजकत्वमेव विवक्षितमिति रजतार्थिन इति विशेषणं सफलम् । हेतौ ज्ञानत्वं न निवेश्यं नियमविशेषणेन तत्प्रयोजनलाभात् । उदाहरणे ज्ञानमिति नियमविशेषणलब्धार्थानुवादः । साध्ये पुरोवर्तिपदं विसंवादिप्रवृत्तिविषयशुक्त्यादिव्यक्तिविशेषपरम् । अत एव रजतज्ञाने दृष्टान्ते साध्यवैकल्यं मा भूदिति यत्तद्भ्यां * सामान्यव्याप्तिरुपन्यस्ता । यदि अर्थिन इत्येतावतैव बाध्यादिव्यावर्तनाद्रजतविशेषणं न निवेश्यते तदा रजतभ्रमजन्यप्रवृत्तिविषये पुरोवर्तिनि शुक्त्यर्थिप्रवर्तकशुक्तित्वप्रकारकज्ञानं दृष्टान्तीकृत्य विशेषव्याप्तिरप्युपपादयितुं शक्या न तु प्रयत्नप्रयोजकत्वम् । अख्यातिवादिना तच्चेच्छाप्रयत्नावपि न पुरोवर्तिविषयौ किं तु तन्मूलरजतज्ञानवद् देशान्तरस्थविषयावित्यपलपितुं शक्यत्वेन हेत्वसिद्धिप्रसङ्गात् । अन्यथा तत्र नियमेन रजतेच्छाकारणत्वस्यैव हेतुत्वसम्भवेन रजतार्थिप्रवर्तकत्वपर्यन्तहेत्वनपेक्षणात् । तदपेक्षणे ऽपि तत्रत्यरजतेच्छायां विशेषव्याप्त्युदाहरणसम्भवेन समीचीनरजतज्ञाने सामान्यव्याप्त्यु†दाहरणाऽयोगाच्च । एवं च वाय्वाकालादृष्टप्रागभावादिव्यावर्तनाय रजतार्थीति विशेषणम् । यद्यपि वाय्वादीनां पुरोवर्तिविषयप्रवृत्तिं प्रत्यसाधारणकारणत्वाभावाद् नियमविशेषणेनापि भवति व्यावृत्तिः तथापि प्रागभावस्य न भवति । तस्य प्रतियोगिनि तत्तत्प्रागभावत्वेन कारणत्वाङ्गीकारात् । तद्व्यावृत्तिस्तु पुरोवर्तिविषयरजतार्थिप्रवृत्तित्वावच्छिन्नकार्यप्रयोजकत्वस्य हेतुत्वविवक्षयेति न किं चिदवद्यम् । टीकायामुदाहरणवाक्ये ज्ञानपदं रजतप्रमैव सामान्यव्याप्तौ दृष्टान्तः न तु विसंवादिप्रवृत्तिस्थलेच्छा शङ्कितान्यविषयभावा विशेषव्याप्तौ दृष्टान्त इति सूचनाय । यत्र यद्यदर्थिनमित्यत्र यद्रजतार्थिनमित्यर्थो ग्राह्यः । इत्थमिष्टसाधनतानुमितिहेतुपरामर्शरूपस्य रजतत्वप्रकारकज्ञानस्य पक्षत्वम् इष्टसाधनत्वानुमितिहेतोरपक्षधर्मत्वप्रसङ्गमत्र विपक्षबाधकमुपन्यस्यता टीकाग्रन्थेन सूचितम् ।

नन्वत्र हेतोरपक्षधर्मत्वं न दोषः न ह्यख्यातिवादिभिर्भ्रमस्थले प्रवृत्तिविषयविषयकेष्टसाधनतानुमितिरभ्युपगम्यते ऽन्यथाख्यात्यापत्तेः । किं त्विष्टसाधनत्वव्याप्तरजतत्वाश्रयभेदाग्रहादुपस्थितेष्टसाधनभेदाऽग्रहमात्रम् । रज-

---

* यत्तत्पदाभ्यामिति ४ पु० पा० । † समानव्याप्तीति २-५ पु० पा० ।

तभेदाग्रहवदावश्यकात्* तत एव प्रवृत्तिरिति कल्पने† लाघवादिति चेत्। यद्येवमनुमितावपि पक्षे लिङ्गवद्भेदाग्रह एव कारणं स्याद् न्यायतौल्याद् न तु लिङ्गविशिष्टपक्षज्ञानम्। तथा च विसंवादिप्रवृत्तिस्थले पक्षे इष्टसाधनत्वव्याप्यरजतत्वाश्रयभेदाग्रहादिष्टसाधनत्वानुमितिर्भवन्ती केन वार्यते। तस्माद् भक्षिते ऽपि लशुने न व्याधिशान्तिरिति न्यायेनाऽन्यथाख्यातिपरिजिहीर्षया भ्रमस्थले विशिष्टज्ञानमपलप्य प्रवृत्तौ भेदाग्रहं कारणमाश्रयतो ऽनुमितावपि स एव कारणं स्यादित्यन्यथाख्यातिरूपानुमितेरशक्यप्रतिक्षेपत्वादभावरूपं भेदाग्रहं परित्यज्य भावतया लघु लिङ्गविशिष्टपक्षज्ञानमेवानुमितौ कारणमभ्युपेयमिति युक्तो ऽत्र हेतोरपक्षधर्मत्वप्रसङ्गो विपक्षबाधकस्तर्कः। एवमिष्टसाधनत्वानुमितिहेतुपरामर्शरूपरजतज्ञानपक्षकवत् केवलरजतज्ञानपक्षकमपि निरुक्तहेतुसाध्यकमनुमानं युक्तमेव। तत्रापि विशिष्टज्ञानस्य प्रवृत्तिकारणत्वे सम्भवत्यभावरूपभेदाग्रहस्य तत्कारणत्वकल्पने गौरवमिति विपक्षबाधकसद्भावात्। नन्वत्र विपरीतं गौरवम्। इष्टपुरोवर्तिज्ञानमात्रस्यावश्यकभेदाग्रहविशिष्टस्य प्रवर्त्तकत्वोपपत्तौ मिथ्याज्ञानतद्विषयकल्पनायोगात्। ततश्च प्रतिकूलतर्कपराहतमनुमानम्। न च मिथ्याज्ञानापलापे भ्रमस्थले भेदाग्रहसाहित्येन प्रवृत्तिवदभेदाग्रहसाहित्येन निवृत्तेरपि प्रसङ्गः। रजतस्मरणस्य रजताऽभेदविषयत्वेनाऽभेदाग्रहाऽसिद्धेरिति चेद् मैवम्। मिथ्याज्ञानापलापे सत्यस्थले इष्टपुरोवर्तिभेदग्रहाऽप्रसिद्धित‡स्तदभावाऽप्रसिद्ध्या सत्यरजतज्ञानादप्रवृत्तिप्रसङ्गात्। भेदाऽग्रहशब्देन पुरोवर्तिनीष्टभिन्नत्वप्रकारकज्ञानविषयत्वाभावो विवक्षित इति चेत् तर्हि तव भ्रमस्थले पुरोवर्तिनीष्टाभिन्नत्वप्रकारकज्ञानविषयत्वस्याप्यभावो ऽस्तीति ततो निवृत्तिरपि स्यात्। टीकायामिदमेव दूषणम् अथ तथात्वेनाग्रहणात् कस्मान्नोपेक्षेतेति ग्रन्थेन दर्शितम्। किं चैवं सति रजते नेदं रजतमिति भ्राम्यतो ऽपि रजतार्थिनस्तत्र प्रवृत्तिप्रसङ्गः। रजते रजतभेदग्रहे मिथ्याज्ञानप्रसङ्गेन तत्रापीदमिति न रजतमिति च ज्ञानद्वयस्य कल्पनीयत्वात्। स्वातन्त्र्यमिष्टे विशेषणं तच्च भेदप्रतियोगितोपस्थित्यविषयत्वमिति चेत् तथा विशे-

---

* आवश्यकमिति २ पु॰ पा॰। † कल्प्यते इति २ पु पा॰।

‡ भेदग्रहाप्रसिद्धेरिति २ पु॰ पा॰।

षयो कृते स दोषो नितरां दृढीकृतः स्यात् । नेदं रजतमिति भ्रमस्थले पुरोवर्तिगतस्य विशिष्टाभावस्येष्टभिन्नत्वप्रकारकज्ञानविषयत्वरूपविशेष्याभावमात्रादपि सिध्यतः स्वातन्त्र्यरूपविशेषणस्याप्यभावे सुतरां सिद्धेः । नेदं रजतमिति प्रमास्थले ऽपि रजतार्थिप्रवृत्तिः स्यादिति दोषश्चाधिकः । तत्र विशेषणाभावाद् विशिष्टाभावसिद्धेः ।

वस्तुतस्तु स्वातन्त्र्यम् उक्तविशिष्टाऽभावप्रतियोगिकोटाविष्टविशेषणं न युक्तम् । इष्टभिन्नत्वज्ञानदशायामिष्टस्य भेदप्रतियोगितोपस्थितिविषयत्वनियमेन तदभावविशिष्टेष्टविशेषितस्य प्रतियोगिनो ऽप्रसिद्ध्या तदभावाऽप्रसिद्ध्यापत्तेः । ननु तर्हि स्वातन्त्र्यमपि प्रवृत्तौ पृथक्कारणान्तरमस्तु अतस्तदभावाद् नेदं रजतमिति प्रमाभ्रमस्थलयो*र्न प्रवृत्तिप्रसङ्गः । प्रतियोगिविशेषणत्वेनानिवेशनाच्च न विशिष्टाऽप्रसिद्ध्या तदभावाऽप्रसिद्ध्यापत्तिरिति चेद् न । तथा सतीदं रजतं घटनिष्ठभेदप्रतियोगीति ज्ञानादप्रवृत्त्यापत्तेः । यद्येतद्दोषपरिहाराय पुरोवर्तिनिष्ठभेदप्रतियोगित्वेनानुपस्थितत्वं स्वातन्त्र्यम् इति निरुच्येत तदा नेदं रजतमिति भ्रमस्थले रजतार्थिप्रवृत्तिः स्यादिति दोषः पुनरुन्मज्जेत् । ननु पुरोवर्त्यगृहीताऽसंसर्गभेदप्रतियोगित्वेनाऽनुपस्थितत्वं स्वातन्त्र्यम् अतस्तदभावान्नेदं रजतमिति भ्रमेण न प्रवृत्तिप्रसङ्गः । तत्र पुरोवर्तिनि रजतभेदासंसर्गाग्रहसत्त्वेन तद्विशेषितभेदप्रतियोगितोपस्थितेर्विद्यमानतया तदभावाभावात् । नापीदं रजतं घटनिष्ठभेदप्रतियोगीति ज्ञानेनाप्रवृत्तिप्रसङ्गः । तत्र पुरोवर्तिनि रजतभेदासंसर्गरूपरजताभेदग्रहसत्त्वेन तदभावविशेषितभेदप्रतियोगितोपस्थित्यभावसत्त्वादिति चेद् न । एवमपि यत्रेदं नेति भेदविशिष्टपुरोवर्तिज्ञानं रजतस्मरणं चेति ज्ञानद्वयरूपो नेदं रजतमिति भ्रमः तत्र रजतार्थिप्रवृत्तिप्रसङ्गाद् न रजतमित्यधिकरणविशेषाऽनुल्लेखिन इव इदं नेति प्रतियोगिविशेषानुल्लेखिनो ऽपि भेदज्ञानस्य सम्भवात् ।

स्यादेतत् । पुरोवर्त्यगृहीताऽसंसर्गभेदप्रतियोगित्वाऽसंसर्गाऽग्रहाऽभाववत्त्वं स्वातन्त्र्यम् । एवं च न को ऽपि दोषः । तथा हि । इदमिति न रजतमिति च ज्ञानद्वयात्मकस्य नेदं रजतमिति भ्रमस्योदये पुरोवर्तिनि रजतभेदस्यासंसर्गाग्रहो ऽस्ति इदं रजतमिति भ्रमोदये रजतस्येव । तथा च

* भ्रमस्थयोरिति ३-४ पु॰ पा॰ ।

तत्र पुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वेन रजतस्य ग्रहणात्तत्प्रतियोगित्वासंसर्गाग्रहो ऽस्तीति तदभावाभावाद् न तत्र रजतार्थिप्रवृत्तिप्रसङ्गः । नापीदं नेति रजतमिति च ज्ञानद्वयात्मकस्य नेदं रजतमिति भ्रमस्योदये तत्प्रसङ्गः । तत्र पुरोवर्तिनि गृहीतसंसर्गत्वेनागृहीतासंसर्गो यो भेदस्तत्प्रतियोगित्वस्यासंसर्ग इष्टे यद्यपि विद्यते तथापि तस्य नेदं रजतमिति भ्रमदशायामग्रहस्य सत्त्वेन तदभावाभावात् । इदं रजतं घटनिष्ठभेदप्रतियोगीति ज्ञानोदये च नाप्रवृत्तिप्रसङ्गः । तत्र रजते भेदप्रतियोगित्वसंसर्गाग्रहणेन तदसंसर्गाग्रहरूपविशेष्यसद्भावे ऽपि पुरोवर्तिनि भेदासंसर्गरूपाभेदग्रहणेन विशेषणा*भावात्तद्विशिष्टस्य भेदप्रतियोगित्वासंसर्गाग्रहस्याभावसद्भावादिति चेद् मैवम् । एवमपि यत्रेदं रजतमिति भ्रमकाले रजतं घटनिष्ठभेदप्रतियोगीत्यपि स्मरणं तत्राप्रवृत्तिप्रसङ्गः । तत्र पुरोवर्तिनि रजतभेदाऽसंसर्गग्रहे मिथ्याज्ञानप्रसङ्गेन तदसंसर्गाऽग्रहो ऽस्तीति पुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वसंसर्गग्रहसत्त्वेन तदसंसर्गाग्रहस्य प्रतियोगिनो विद्यमानतया तदभावाभावात् । अरजतरजतयोरिमे रजताऽरजते इति भ्रमादरजते रजतार्थिप्रवृत्त्यभावप्रसङ्गश्च । तत्र पुरोवर्तिन्यरजते रजतभेदासंसर्गग्रहे मिथ्याज्ञानप्रसङ्गेन अरजतरूपपुरोवर्त्यगृहीतासंसर्गभेदप्रतियोगित्वेन रजतस्य गृह्यमाणतया तदसंसर्गाग्रहस्य प्रतियोगिनः सत्त्वेन तदभावाभावात् । किं बहुना इदं रजतमित्येतावन्मात्ररूपात् प्रसिद्धरजतभ्रमादपि प्रवृत्त्यभावप्रसङ्गः । तत्र हि रजतभेदः पुरोवर्त्यगृहीताऽसंसर्गो भवति । तत्र तदसंसर्गग्रहे मिथ्याज्ञानापत्तेः । रजते तथाभूतभेदप्रतियोगित्वासंसर्गाग्रहो ऽप्यस्ति । तत्र रजते भेदप्रतियोगित्वं नास्तीति भेदप्रतियोगित्वासंसर्गग्रहोदयाभावात् । अतो विशिष्टस्य प्रतियोगिनः सत्त्वेन तदभावरूपस्वातन्त्र्याभावाद् न प्रवृत्तिर्घटते । तस्माद् मिथ्याज्ञानापलापेन भेदाग्रहात् प्रवृत्त्युपपादनमयुक्तमेव ।

नन्वनाश्वासदोषे परेणोद्भाविते निराकर्तव्ये सत्यव्यभिचारस्य प्रामाण्यरूपत्वादिविकल्पः क्वोपयुज्यतइत्याशङ्क्याह **येन केचिदिति** । अयमाशयः । प्रामाण्यनिश्चयादेव प्रवृत्त्यादिकार्योपपत्तेरव्यभिचारनिश्चयस्य नास्त्युपयोग इति परोद्भाविताऽनाश्वासदोषनिराकरणे कृते परेणैवं वाच्यम् । १७ ।

* यद्वेणोक्तविशेषणेति २ पु॰ पा॰ ।

अव्यभिचाराऽनिश्चयः प्रामाण्यानिश्चयपर्यवसायी । तत्पर्यवसानं च त्रेधा सम्भवति प्रामाण्यस्याव्यभिचारितारूपत्वेन तद्धेतुकत्वेन तद्व्याप्यत्वेन वा । तद्व्याप्यत्वेऽपि हि व्यापकनिवृत्तौ व्याप्यं निवर्तेत । एवं प्रकृतोपयोगित्वमन्वीक्ष्य
१७ । २० त्रेधा विकल्पः कृत इति । **अव्यभिचारिणामपीति** । इदं व्यतिरेकव्यभिचारदूषणमिव न विकल्पत्रयसाधारणं सहकारिविरहेण प्रतिबन्धेन वा हेतोरपि कार्याऽजनिसम्भवेन द्वितीयविकल्पे अन्वयव्यभिचारस्य तृतीयविकल्पे व्यापकव्यभिचारस्य चादोषत्वात् । अतः प्रथमविकल्पमात्रे द्वितीयदूषणमिदमिति द्रष्टव्यम् । ननु

अहो बत महानेष प्रमादो धीमतामपि ।
ज्ञानस्य व्यभिचारित्वे विश्वासः किंनिबन्धनः ॥

इति परेण ज्ञानस्यैव व्यभिचारो दोषत्वेनोक्तः स च करणव्यभिचारस्यादोषत्वोपपादनेन परिहृतो न भवतीत्याशङ्कते **भवत्विति** । **अव्यभिचारोऽपेक्ष्य*** **इति** । अव्यभिचारश्च ज्ञानानां प्रामाण्यमेवेति भावः । यदि प्रामाण्यस्य परतस्त्वमिष्यते तत्राह **अव्यभिचारग्राहिण इति** । **अर्थक्रियासंवादादिज्ञानस्येति** । अर्थक्रियासंवादो दूरे वह्निज्ञाने जाते समीपोपसर्पणानन्तरं दाहसामर्थ्यानुभवः । आदिशब्देन तद्वह्निज्ञानं प्रमा दाहसमर्थे तद्वह्नित्वप्रकारकत्वादित्यनुमाने यत् प्रवृत्तिसंवादरूपज्ञानघटनीयं लिङ्गज्ञानं यच्च तज्जन्यानुमितिरूपं प्रामाण्यज्ञानं तदुभयमपि गृह्यते । नन्वनवधृतप्रामाण्यमेव संवादिज्ञानं स्वविषयनिश्च-
,, । २५ यात्मकं भवत्वित्यत्राह **अनिश्चये वेति** । **प्रामाण्याऽसिद्धेरिति** । अनवधृतप्रामाण्यादपि ज्ञानाद्विषयसिद्धौ दूरत्वादिदोषेण शङ्किताऽप्रामाण्यात् चन्द्रप्रादेशिकत्वादिज्ञानादपि तत्सिद्धिः स्यात् । यदि प्रामाण्याग्रहणेऽपि अप्रामाण्यशङ्काविरहमात्रेण संवादादिज्ञानं स्वविषयनिश्चयात्मकं भवेत् तदा तथैव प्रथमज्ञानमपि स्वविषयनिश्चयात्मकं सत् प्रवृत्त्यादिकार्योपयोगि भवेदिति भावः ।

नन्वप्रामाण्यशङ्काविरहापेक्षया प्रामाण्यनिश्चयो लघीयान् अतो निश्चितप्रामाण्यमेव संवादादिज्ञानं स्वविषयनिश्चयरूपमिति संवादादिज्ञानस्य

* अपेक्ष्यतइति १-५ पु. पाठः ।

तथात्वसिद्ध्यर्थं स्वतः प्रामाण्यमिष्यतइति चेत् तत्राह **स्वतः प्रामाण्ये** १७ । २६
चेति । संवादादिज्ञाने स्वविषये स्फुरति तद्विषयविशेष्यप्रकारकतदुभय-वैशिष्ट्यघटितं योग्यधर्मरूपं तत्प्रामाण्यं ज्ञानत्ववदुत्सर्गतः स्फुरति । यत्र तु क्व चिदनभ्यासदशादिदोषाद् विशेष्यप्रकारवैशिष्ट्यांशे ज्ञानस्य न सत्ता-निश्चयरूपत्वं तत्र तद्घटितस्य प्रामाण्यस्य स्थाणुत्वादेरिव स्फुरणं नास्ति तत्र परं प्रामाण्यसन्देह इति खलु संवादादिज्ञाने प्रामाण्यस्य स्वतस्त्वं समर्थनीयं तन्न्यायः प्रथमज्ञाने ऽपि तुल्य इति भावः ।

नन्वयं प्रामाण्यस्य स्वतस्त्वाभ्युपगमो न युक्तः । तथा हि । सि-द्धान्ते ज्ञानं स्वप्रकाशम् । अत इदं जलमिति इदं जलत्वेन जाना-मीति च व्यवहारहेतौ प्रथमज्ञाने एव तत्प्रामाण्यस्य स्फुरणं वाच्यम् । तत्र प्रामाण्यघटकसर्वोपाधिस्फुरणाभ्युपगमात् । ततश्च तत्र प्रामाण्यवद्वि-शेष्यकप्रामाण्यप्रकारकत्वरूपं प्रामाण्यान्तरमपि सम्पद्यतइति तदपि तत्र स्फुरेद् न्यायतौल्यात् । न चेष्टापत्तिः । तथा सति द्वितीयप्रामाण्यघटि-तप्रामाण्यान्तरस्य तत्तत्प्रामाण्यघटितप्रामाण्यान्तराणां च स्वप्रकाशज्ञाने स्फुरणापत्त्या तस्यानुभवविरुद्धाऽपर्यवसिता*ऽनन्तविषयाभ्युपगमापत्तेरिति चेत् । उच्यते । स्वप्रकाशज्ञाने प्रामाण्यस्फुरणे सति प्रामाण्यवद्विशेष्यक-प्रामाण्यप्रकारकत्वरूपप्रामाण्यान्तरं सम्पद्यते चेत् सम्पद्यतां नाम न तस्यापि तत्र स्फुरणमिष्यते प्रामाण्यतदाश्रययोः तदुभयवैशिष्ट्यस्य च तत्र स्फुरणे ऽपि तत्प्रकारकत्वतद्विशेष्यकत्वयोस्तत्राऽस्फुरणात् । न हि जल-ज्ञानानन्तरम् इदं जलमिति इदं जलत्वेन जानामीति च व्यवहारवदिदं ज्ञानं प्रमाणत्वेन जानामीत्यपि व्यवहारो दृश्यते येन तयोरपि तत्र स्फुर-णमिष्येत । न च स्वप्रकाशज्ञानगतत्वेन तत्स्फुरणावश्यम्भावः । तद्गतगुण-त्वद्रव्यत्वादिवदस्फुरणसम्भवात् । तथापि प्रामाण्यस्य स्वाश्रयसहभाननियम-रूपस्वतस्त्वाभ्युपगमात् स्फुरणावश्यम्भाव इति चेद् न । यत्र प्रामाण्यघ-टकसर्वोपाधिस्फुरणमस्ति तत्र प्रामाण्यस्य स्फुरणमित्युत्सर्गरूपस्य नियमस्य यत्र तद्घटकस्य कस्य चिदस्फुरणं तत्रापवादाभ्युपगमात् । तस्मात् स्वप्र-काशज्ञाने प्रामाण्यस्फुरणौत्सर्गिकत्वाभ्युपगतौ न का चिदनुपपत्तिः ।

---

* अपर्यवस्थितेति २ पु॰ पा॰ ।

१७ । २० प्रसङ्गादुत्पत्तावपि स्वतस्त्वं निरूपयितुं पृच्छति **ननु किमिति** । यद्वा ज्ञानमुत्पद्यमानमुत्सर्गतः प्रमारूपमेवोत्पद्यते चेदेवं प्रमाप्रायिकत्वा*धीनसमुत्कटतद्वासनावशादप्रामाण्यशङ्कानुदयः प्रामाण्यस्फुरणं चेत्युभयमौत्सर्गिकं भवति । अतः **स्वतःप्रामाण्ये चेति** पूर्ववाक्येनोपज्ञप्तिप्रमौत्सर्गिकत्वरूपं ज्ञप्तिस्वतस्त्वमुपपादयितुमुत्पत्तावपि स्वतस्त्वं निरूपयितुं पृच्छति **ननु किमिति** ।

इयं रूपप्रमेति । ननु स्वतस्त्वनिर्वचनप्रश्ने तदप्रदर्श्य किमिति प्रमाणमुपन्यस्यते । अथ ज्ञानसामग्रीमात्रजन्यत्वमेव स्वतस्त्वं तत्तु प्रामाण्यस्य† नेष्यते किं तु तदधिकरणज्ञानव्यक्तेः । अतो नोक्तदोष इति प्रमापक्षीकरणेन सूचितमिति चेद् न । उपन्यस्तनिर्वचनस्य परतस्त्व‡साधारण्यात् । न हि परतस्त्वपक्षे प्रमा न ज्ञानं येन सा ज्ञानसामग्रीमात्रजन्या न स्यात् । अथ ज्ञानसामान्यसामग्रीमात्रजन्यत्वं विवक्षितमिति चेद् न । ज्ञानसामान्यसामग्र्यनुप्रविष्टात्ममनःसंयोगाद्यतिरिक्तेन्द्रियलिङ्गपरामर्शादिजन्यासु प्रत्यक्षानुमित्यादिप्रमास्वसम्भवापत्तेरिति चेद् मैवम् । ज्ञानसामग्रीशब्देन प्रमाभ्रमसाधारणज्ञानकारणकलापस्य विवक्षितत्वात् । इन्द्रियादीनां च प्रमावद् भ्रमेष्वपि कारणत्वात् । चक्षुषा रजतं पश्यामीति प्रातिभासिकस्यापि चाक्षुषत्वानुभवात् ।

प्रमायाः प्रमाभ्रमसाधारणकारणातिरिक्तकारणजन्यत्वाभावरूपं स्वत-
१८ । ३ स्त्वं यथा सिध्यति तथा साध्यं दर्शयति **अर्थेति** । अत्र साध्ये संयुक्तसम-
वायान्तर्गतसंयोगरूपचक्षुर्गुणजन्यत्वेन विषयभूतरूपगुणजन्यत्वेन च बाध-
वारणायाऽसम्प्रयोगानधिकरणेति चक्षुर्गतेति च गुणविशेषणम् । सामान्याभा-
वविवक्षया चक्षुरन्तरगतगुणजन्यत्वाभावेनार्थान्तरवारणायैतदिति चक्षुर्विशे-
षणं तद्विवक्षायां तु नोपादेयम् । न चैवमपि व्यञ्जकतेजोरूपत्वादालोकरू-
पवच्चक्षूरूपमपि रूपप्रमाहेतुरिति बाधः । तेजोगतमुद्भूतरूपमेव रूपादिज्ञान-
हेतुः न तु ऊष्मरूपवदनुद्भूतं चक्षूरूपमिति मतानुसरणात् । मतान्तरे तु
रूपभिन्नेत्यपि विशेषणं देयम् । ननूक्तरूपं स्वतस्त्वं कथमनेन साध्य-
निर्देशेन सिध्यति । न हि प्रमाभ्रमसाधारणज्ञानसामान्यकारणकलापानु-

---

* प्रामाण्यप्रायिकत्वेति २ पु. पा. । † प्रामाण्यमिति ४ पु. पा । ‡ परत्वेति २ पु. ।

प्रविष्टप्रमायां विशेषकारणं सम्प्रयोगातिरिक्तचक्षुर्गुणरूपं परतस्त्ववादिभिरिष्यते येन तज्जन्यत्वाभावसाधनं स्वतस्त्वसाधनं भवेत् । परतस्त्ववादिभिर्हि स्थूलावयविप्रत्यक्षप्रमायां भूयोवयवेन्द्रियसंनिकर्षो जन्यप्रत्यक्षप्रमाण्यं यावद्विषयसंनिकर्षो जन्यप्रमामात्रे ग्राह्ययथार्थज्ञानं च विशेषकारणमिष्यते न च तद्व्यावर्तनमुदाहृतसाध्यनिर्देशेन लभ्यते । तत्रादिमस्य विशेषकारणद्वयस्य व्यावर्तनं चक्षुर्गतविशेषणलभ्यं सम्प्रयोगातिरिक्तविशेषणेन निरुद्धुम् । सम्प्रयोगातिरिक्तविशेषणलभ्यं तृतीयस्य व्यावर्तनं चक्षुर्गतविशेषणेन निरुद्धुम् । तस्माद् नानेनानुमानेन स्वतस्त्वसिद्धिरिति चेत् । उच्यते । चक्षुर्गतपित्तदोषाभावे शङ्खे श्वैत्यप्रमा तदभावे न चक्षुर्गतमण्डूकवसाञ्जनाभावे वंशवर्णप्रमा तदभावे नेत्यन्वयव्यतिरेकाभ्यां रूपचाक्षुषप्रमायां विशेषकारणत्वेन शङ्कार्हस्तथैव परतस्त्ववादिभिरिष्यमाणश्चक्षुर्दोषाभावरूपो यस्तद्धर्मस्तज्जन्यत्वाभाव इह साध्यः । अन्यत्तु प्रमायां विशेषकारणत्वेन शङ्कार्हमेव न भवति । न हि भूयोवयवेन्द्रियसंनिकर्षं विना स्थूलावयविप्रत्यक्षप्रमा नोत्पद्यते तदभावे ऽपि संनिकृष्टकिंचित्प्रदेशावच्छेदेन तदुत्पत्तिदर्शनात् । अतस्तत्तत्प्रदेशप्रत्यक्षमात्रार्थं तत्तत्प्रदेशसंनिकर्षापेक्षेति न भूयोवयवेन्द्रियसंनिकर्षस्य स्थूलावयविप्रत्यक्षप्रमायां विशेषकारणत्वे मानमस्ति ।

एतेन स्थूलावयवावच्छेदेन संनिकर्षस्तस्यां विशेषकारणमित्यपि निरस्तम् । स्थूलावयविनि परमाणुद्व्यणुकरूपं सूक्ष्मावयवावच्छेदेन संनिकर्षे भ्रमस्याप्यनुदयाद् यावद्विषयसंनिकर्षो ऽपि न प्रमायां विशेषकारणम् । असंनिकृष्टभाने अतिप्रसङ्गेन शुक्तिरजतादिष्वपि संस्कारस्य स्मृतेर्वा संनिकर्षत्वस्याभ्युपेयत्वात् । असंनिकृष्टमपि रजतादिकं दोषाद्भासतइति समर्थने तथैवासंनिकृष्टमपि निध्यादिकमञ्जनादिगुणाद् भासतइति समर्थयितुं शक्यत्वेन प्रमायामपि तस्यानुगतविशेषकारणत्वाभावप्रसङ्गात् । विशेष्यवृत्तिविशेषणसंनिकर्षोपि न जन्यप्रत्यक्षप्रमानुगतो गुणः । परंपरासंबन्धेन स्फटिकवृत्तेर्लौहित्यस्य तत्र साक्षात्संबन्धावगाहिनि भ्रमे तस्य साधारण्यात् तत्तत्संबन्धविशेषेण वृत्तिविवक्षायामननुगमात् ।

एतेन विशेषणवद्विशेष्यसंनिकर्षस्तस्यां गुण इत्यपि निरस्तम् । ग्राह्ययथार्थज्ञानस्य तु जन्यप्रमामात्रे नान्वयव्यतिरेकाभ्यां विशेषकारणत्वं

व्यभिचारेण तदसिद्धेः । लोके शाब्दप्रमायां वक्तृवाक्यार्थयथार्थज्ञानस्य कारणत्वदर्शनात् । यद्विशेषयोः कार्यकारणभावः बाधकं विना तत्सामान्ययोरपीति व्याप्त्या तत्र तस्य कारणत्वसिद्धिः । न च व्यभिचारः । यत्रास्मदादिगतग्राह्ययथार्थज्ञानं नास्ति तत्र सर्वत्रोक्तव्याप्तिबलेन परमेश्वरज्ञानस्य तथात्वेनापि कारणत्वकल्पनोपपत्तेरिति चेद् न । अप्रयोजकत्वात् । न च जन्यप्रमात्वावच्छिन्नकार्यस्याकस्मिकत्वप्रसङ्गो विपक्षबाधकस्तर्कः । जन्यज्ञानत्वावच्छिन्नज्ञानसामान्यकारणकलापस्य सत्त्वात् । तत्र तद्वद्विशेष्यकतत्प्रकारकत्वस्याव्यवस्थितघटत्वपटत्वादिप्रवेशेनाऽननुगतस्यावच्छेदककोटिप्रवेशाऽयोगात् । अन्यथा वक्तृवाक्यार्थायथार्थज्ञानस्य शाब्दभ्रमे कारणत्वाद् यद्विशेषयोरित्युक्तव्याप्त्यैव भ्रममात्रे ग्राह्यभ्रमो हेतुः कल्पनीय इति परमेश्वरे नित्यप्रमावद् नित्यभ्रान्तिरप्यङ्गीकरणीया स्यात् । यत्तु तदभाववति तत्प्रकारकज्ञानमपेक्ष्य लघु तदभाववज्ज्ञानमेव भ्रमेषु दोषोऽस्तु तत्तु भ्रमे धर्मिज्ञानरूपं सर्वत्र सुलभमिति नेश्वरे भ्रान्तिकल्पना प्रसज्यते । न चैवं प्रमायामपि लघु तद्वज्ज्ञानमेव गुणः स्यादिति वाच्यम् । इष्टापत्तेः । तावतापि परतस्त्वसिद्धेस्तत्फलेश्वरसिद्धेश्चाप्रत्यूहत्वादिति । तन्न । तदभाववत्त्वेन ज्ञानस्य भ्रमविरोधिनस्तत्र कारणत्वाऽयोगात् । वस्तुतो यत् तदभाववत् तज्ज्ञानस्य विशेषणज्ञानादिरूपस्य प्रमासाधारण्येन भ्रमासाधारणकारणत्वरूपदोषत्वायोगात् । तदभाववद्विशेष्यकं ज्ञानं दोष इति चेद् न । तदभाववद्विशेष्य*कानामपि ज्ञानानां प्रमाकारणानां बहुलमुपलम्भात् । तदभाववद्भ्रमविशेष्यविशेष्यकं ज्ञानं दोष इति चेद् न । तदभाववत्त्वविशेषणवैयर्थ्यात् । भ्रमविशेष्यस्यारोप्याभाववत्त्वनियमात् । अस्तु तर्हि भ्रमविशेष्यविशेष्यकमेव ज्ञानं दोष इति चेद् न । एतदपेक्षया भ्रम एव भ्रमे दोष† इति कल्पनाया लघीयस्त्वात् । तस्माद् भूयोवयवेन्द्रियसंनिकर्षादीनां शङ्काऽनर्हत्वात् प्रमान्वयव्यतिरेकशालितया तदर्हस्येन्द्रियदोषाभावस्यैवाधिककारणत्वनिराकरणमनेनानुमानेन कृतम् ।

चक्षुर्दोषाभावस्य तन्निराकरणमिदम् इन्द्रियान्तरदोषाभावानामधि-

---

* तदभाववद्विशेषणविशेष्यकानामिति २ पु० पा० ।

† भ्रम एव दोष इति ४ पु० पा० ।

ककारणत्वनिराकरणार्थानामप्येतच्छायापन्नानामनुमानान्तराणामुपलक्षणम् । का तर्हि दोषाभावान्वयव्यतिरेकयोर्गतिः । दोषस्य प्रमाप्रतिबन्धकत्वमेव । सत्यां सामग्र्यां कार्यविरोधि हि प्रतिबन्धकं लोके प्रसिद्धं न तु नैयायिककल्पितं कारणीभूताभावप्रतियोगि । तैरपि साक्षादविरोधिनो ज्ञानस्य जनकज्ञानविघटकस्यैव प्रतिबन्धकत्वम् *इत्यादि वदद्भिः कारणीभूताभावप्रतियोगित्वेनानभ्युपगतमपि कार्यानुत्पत्तिव्याप्यमात्रं प्रतिबन्धकमिष्यत एवेत्यलं विस्तरेण ।

ज्ञप्तिस्वतस्त्वमपि अनुमानारूढं करोति **तथेति । उक्तविधेति** । १८ । ४
चक्षुर्गतगुणज्ञानाधीनप्रथमप्रामाण्य†ज्ञानं न भवतीत्यर्थः । स्वतस्त्ववादे प्रथमं प्रामाण्यस्य करणगुणज्ञानानपेक्षज्ञानत्वेऽपि पश्चात् करणगुणेनापि तदनुमानं सम्भवतीति बाधवारणाय प्रथमविशेषणम् । परतस्त्ववादे प्रथममपि प्रमारूपधर्मिज्ञानं करणगुणज्ञानानधीनं सम्भवतीति सिद्धसाधनवारणाय प्रामाण्यपदम् । गुणपदं पूर्ववद् निर्दोषत्वधर्मपरम् । ननु परतस्त्ववादिभिः करणदोषाभावलिङ्गादिव समर्थप्रवृत्तिलिङ्गसंवादाभ्यामपि प्रथमं प्रामाण्यस्य ज्ञेयत्वमिष्यते तदुभयज्ञेयत्वनिरासोऽनेनानुमानेन न सिध्यतीति चेत् । सत्यम् । समर्थप्रवृत्तिसंवादौ तदयोग्यवैदिकार्थादिज्ञानप्रामाण्यावधारणे न सम्भवतः । करणदोषाभावज्ञानं तु सर्वत्र सम्भवतीति तदधीनप्रथमज्ञानत्वमनेनानुमानेन निरस्तम् । तथा च यस्यां प्रमायां करणदोषाभावलिङ्गकमेव परतस्त्ववाद्यभिमतं प्रामाण्यग्राहकं प्रवर्तते सैवात्र पक्षो न तु समर्थप्रवृत्तिसंवादावसित‡प्रामाण्येति न सिद्धसाधनम् । तदवसितप्रामाण्यायां तु प्रमायां स्वतस्त्वे एतद्घटप्रमा एतद्घटविषयसमर्थप्रवृत्तिसंवादाधीनप्रथमप्रामाण्यनिश्चया न भवति प्रमात्वात् पटप्रमावदित्यनयैव रीत्या तत्राप्यनुमानमुन्नेतुं शक्यमिति न प्रदर्शितम् । एवं च परतस्त्वनिषेधे प्रामाण्यस्य स्वाश्रयसहभाननियमरूपस्वतस्त्वसिद्धिः । न चैवं सति यस्यां रूपप्रमायां करणदोषशङ्कया प्रामाण्यसंशये सति तन्निर्दोषत्वनिश्चयेन प्रामाण्यनिश्चयः तत्र साध्यस्य बाधः स्यादिति चेद् न । अतथाभूताया इह पक्षीकरणात् तत्प्रतिपत्त्यर्थत्वाद्देषेति पक्षविशेषणस्य ।

---

* प्रतिबन्धवत्त्वमिति १–४ पु· पा· † गुणज्ञानाधीनप्राथमप्रामाण्येति ४ पु· पा· ।
‡ संवादान्वितेति ४ पु· पा· ।

१८ । ५ **तथाविधेति ।** नन्विह साक्षात्प्रवृत्तेः करणगुणज्ञानाधीनत्वं न निषेध्यम् । परतस्त्ववादिभिरपि तस्याः साक्षात्समानविषयरजतादिज्ञानजन्यत्वस्यैवाभ्युपगतत्वात् । नापि प्रामाण्यनिश्चयद्वारा प्रामाण्यनिश्चयो न प्रवृत्त्यर्थमपेक्षितः । अनवस्थाप्रसङ्गात् । किं त्वप्रामाण्यशङ्काशून्यं समानविषयज्ञानमेवेति तैरभ्युपगतत्वात् । न च वाच्यं करणदोषसंशयेन प्रवर्तकज्ञानस्याप्रामाण्यशङ्कया प्रवृत्तिप्रतिबन्धे प्रसक्ते निर्दोषत्वरूपकरणगुणज्ञानजन्येन प्रामाण्यनिश्चयेन तच्छङ्कानिरासपूर्विका यत्र प्रवृत्तिः तत्र तस्याः करणगुणज्ञानाधीनत्वं परतस्त्ववाद्यभिमतं निषेध्यमिति स्वतस्त्ववादिभिरपि तस्याङ्गीकर्तव्यत्वेन तन्निषेधे बाधापत्तेरिति चेत् । सत्यम् । प्रामाण्यनिश्चयवत् प्रवृत्तिरपि करणगुणज्ञाना*धीनेति परतस्त्ववादिषु केषांचिन्मतमालक्ष्य तन्निषेधार्थमिदमनुमानम् ।

सर्वतन्त्रसिद्धार्था† इति । यद्यप्यख्यातिमते अन्यस्यान्यात्मतया भानमेव न सिद्धम् । अन्यथाख्यातिमते तत्सिद्धावप्यन्यात्मता ऽनिर्वचनीयेत्येतदसिद्धम् । तथापि प्रगुक्तयुक्त्या तथाऽवश्याभ्युपगन्तव्यतामापाद्य सर्वतन्त्रसिद्धान्तत्वोक्तिः ।

,, । १० **रजतवदिति न सादृश्यविवक्षेति ।** ननु तेन तुल्यं क्रिया चेद्वतिरिति सूत्रेण क्रियया सदृशे वतिरनुशिष्टः न तु मिथ्याभूते । अथ सदृशवाचिनो मिथ्याभूते लक्षणेत्युच्येत । नैतद्युक्तम् । यथा रजतं रजतात्मना भासते तथा शुक्तिका ऽपि रजतात्मना भासतइति वतिना‡ रजततादात्म्यभानविषयत्वरूपे रजतसादृश्ये शुक्तिकायाः प्रतिपादिते सति असंनिहितस्य रजतस्य तत्तादात्म्यस्य चाक्ष§ प्रत्यक्षायोगेनार्थान्मिथ्याभूतरजततत्तादात्म्यसिद्धिसम्भवादिति चेत् । सत्यम् । अर्थतः सिध्यति । रजततत्तादात्म्यमिथ्यात्वे रजतवदवभासतइति व्यवहर्तुर्लोकस्य तात्पर्यं न तु द्वारभूते शुक्तिकागतरजतसादृश्ये इत्याशयेन सादृश्ये न विवक्षा किं तु मिथ्यात्वे इत्युक्तम् । यद्वा यथा सादृश्यवाचिन इवशब्दस्य वतेश्च दूरादागच्छन् देवदत्तवद्भातीत्यादिप्रयोगादुत्कटकोटिकसंशयरूपा तादात्म्यसम्भावना ऽप्यर्थः

* करणज्ञानेति १-४ पु॰ पा॰ ।
† सिद्धो ऽर्थ इति २-५ पु॰ पा॰ । मूले ऽप्येवं पाठद्वैविध्यम् ।
‡ वतिनेति नास्ति २ पु॰ ।
§ तत्तादात्म्यमात्रेति ४ पु॰ पा॰ ।

एवं शुक्तिका मिथ्यारजतात्मना ऽवभासतइत्यर्थविवक्षावतां रजतवदवभासतइत्यादिव्यवहारदर्शनान्मिथ्यात्वमपि तदर्थं इत्याशयेन तथोक्तमिति सर्वमनवद्यम् ।

स्वप्रकाशफलस्येति । ननु तथा हीत्यादिग्रन्थेन प्रथमं संविदः स्वप्रकाशत्वमेवोपपाद्यते । तत्कथं प्रतिपाद्यत्वेन नावतार्यते कथं च स्वप्रकाशत्वप्रतिपादनानन्तरं प्रतिपाद्यमानः परपक्षे संविदो ऽर्थप्रकाशत्वासम्भवः स्वपक्षे एवार्थजातस्य संविद्विवर्त्ततया संविदभेदेन संविदः स्वाभिन्नार्थप्रकाशत्वसम्भवश्च प्रतिपाद्यत्वेन नावतार्यते तदनन्तरं संविदो जन्मादिनिषेधेन प्रतिपाद्यमानम् आत्मत्वमेव केवलं प्रतिपाद्यत्वेनावतार्यते । उच्यते । संविदाश्रयत्वेनात्मसिद्धिं वदतां संविदः स्वप्रकाशत्वमभिमतमेवेति तदुपपादनमनुवादमात्रमित्याशयेन तत् स्वप्रकाशफलस्येत्यनुवाद्यकोटौ निवेशितं संविदः परपक्षे अर्थप्रकाशत्वासम्भवप्रदर्शनपूर्वकम् अर्थजातस्यानिर्वचनीयत्वपक्षएव तत्सम्भवोपपादनम् अर्थजातस्यानिर्वचनीयत्वव्यवस्थापनपर्यवसन्नं सत्स्वरूपतो ऽननुभूयमानभेदायाः संविदो * नार्थोपाधिको भेदस्तस्य मिथ्यात्वादिति संविदो नित्यात्मस्वरूपत्वोपपादकतयैव प्रकृतोपयोगिता । अन्यथा कथं सत्यं ज्ञानमिति श्रुतेर्ज्ञानात्माभेदे तात्पर्यं द्रागेव निश्चेतुं शक्यम् । इह हि ज्ञानपदमन्तोदात्तमधीयते । अन्तोदात्तस्वरश्च केवलं ल्युडन्ततायां नोपपद्यते । तथा हि । ल्युडादेशस्य अन इत्यस्य आद्युदात्तश्चेति प्रत्ययस्वरेण प्रथमाकारे उदात्ते लितीति लित्स्वरेण प्रकृत्याकारे चोदात्ते ऽनुदात्तं पदमेकवर्जमिति शेषनिघातस्वरेण प्रत्ययस्थयोरकारयोरनुदात्तयोरेकादेश उदात्तेनोदात्त इत्येकादेशस्वरेण प्रकृत्याकारप्रत्ययाद्याकारयोरेकादेशे चोदात्ते सति प्रत्ययान्त्याकारस्याऽनुदात्तस्य विभक्त्यकारस्य च अनुदात्तौ सुप्पिताविति सुप्स्वरेणानुदात्तस्य अमि पूर्व इत्येकादेशो भवन् स्थाने ऽन्तरतम इति परिभाषया ऽनुदात्तः स्यात् । तस्य चानुदात्तस्य उदात्तादनुदात्तस्य स्वरित इति स्वरितादेशो भवेत् । अत एतद् ज्ञानमिति पदं केवलल्युडन्तत्वे स्वरितान्तं स्यात् । यथा काठके सञ्ज्ञानं विज्ञानं प्रज्ञानमिति । तस्मादन्तोदात्तनिर्वाहार्थमिदं ज्ञान- १८ । १

* संविदो ऽपीति २ पु० पा० ।

पदं ल्युडनन्तरं मत्वर्थीयाच्प्रत्ययान्तं वाच्यम् । अर्शआदेराकृतिगणत्वात् । तथा सत्यन्तोदात्तस्वर उपपद्यते । अर्शआद्यच्प्रत्यये यस्येति चेति प्रकृतावन्त्यस्याकारस्य लोपे चित इति चित्स्वरेण मत्वर्थीयप्रत्ययस्योदात्तत्वे च सति तस्य विभक्त्यकारस्य चैकादेशस्यापि एकादेश उदात्तेनोदात्त इत्युदात्तस्यैव भावात् । एवमिह ज्ञानपदप्रक्रियाश्रयणे ज्ञानवत्त्वमेवात्मनः सिध्येद् न ज्ञानरूपत्वं किं त्वौणादिकनप्रत्ययान्तत्वेन तत् सिध्येत् । ज्ञाधातोराहृत्य नप्रत्ययविधानाभावे ऽप्युणादयो बहुलमिति बहुलग्रहणेन यतो विहितास्ततो ऽन्यत्रापि ते भवन्तीति सिद्धेः । औणादिकप्रत्ययान्तत्वे भावार्थत्वमप्युपपद्यते । अर्त्यादिसूत्रविहितमन्प्रत्ययान्तस्य होमशब्दस्येव अन्तोदात्तस्वरश्च युज्यते । नप्रत्ययाकारस्य प्रत्ययस्वरेणोदात्तत्वे सति तस्य तद्विभक्त्यकारेण भवत एकादेशस्याप्युदात्तस्यैव भावात् । एवमुभयथेह ज्ञानपदप्रक्रियाश्रयणसम्भवे कथमस्याः श्रुतेः संविदात्माभेदे तात्पर्यं निर्णीयत इत्याकाङ्क्षायां तत्र तत्तात्पर्यनिर्णयार्थामुपपत्तिमुपपद्यते चेति प्रतिज्ञाय तामेवोपपत्तिं प्रदर्शयितुं टीकायां तथा हीत्यादिग्रन्थः प्रवर्तितः । अतो ऽत्र स्वप्रकाशत्वादिव्यवस्थापनस्य न साक्षादन्वयसंघटनेतीत्थमवतारिका ।

१८ । १७ **नन्वभ्युपेयत इति** । ननु चाभ्युपगमे को हेतुः स्वयमभासमानमपि ज्ञानमर्थप्रकाशरूपमस्तु । न च तथात्वे तस्य चक्षुरादिवदर्थप्रकाशकत्वमेव स्याद् न तु तत्प्रकाशरूपत्वमित्यनवस्थेति वाच्यम् । अप्रयोजकत्वेनोक्तनियमाऽसिद्धेरिति चेद् न । तथा सति घटज्ञानादिषु सत्सु कदा चित्संदेहविपर्यासापत्तेः प्रकाशाऽव्यभिचारिण्येव सुखादौ संशयविपर्यासाऽनुदयदर्शनात् । एतावन्तं कालं मनसा रुद्रानुवाकानावर्तयन्नासमिति परामर्शानुपपत्तेश्च । न हि तत्तद्वर्णस्मृतीनां स्वस्वकाले भानाभावे तासामग्रिमपरामर्शो भवितुमर्हति । न चेच्छाघटितसामग्रीजन्यनिरन्तरक्रमिकवर्णविषयस्मरणसन्तानोदयकाले मध्ये मध्ये प्रतिस्मरणमनुव्यवसायोत्पत्तिः सम्भवति ।

,, १८ **आत्मस्वप्रकाशत्ववाद्याहेति** । अभ्युपेतव्या* इत्येतदन्तमुक्तवानात्मस्वप्रकाशवाद्येव । आत्मनः प्रकाशमानत्वं स्वप्रकाशफलाभेदेनैव उपपादनीयं नान्यथा । तस्य प्रकाशमानत्वं भवतीत्येवमुपपादयितुमाहेत्यर्थः ।

* भामतीप्रतीकग्रहणम् । भा० पृ० २० प० ५ ।

अनुपयोग उक्त इति । सहभावस्य प्रकाशमानतायामनुपयोग उक्तः । उपयोगमङ्गीकृत्य तस्याव्यापकत्वमाहेत्यर्थः । **विशेषणस्याऽसिद्धिमाहेति ।** बाधदोषः स्फुट इति मत्वा दोषान्तरमाहेत्यर्थः । **तां परिहरतीति ।** असिद्धिं परिहरन् पूर्ववादी शङ्कत इत्यर्थः **जडत्वान्नार्थप्रकाशश्चेदिति* ।** अर्थविषयज्ञानादिजनकत्वमात्रं न ज्ञानस्यार्थविषयतानियामकं किं तु तज्जनकप्रकाशत्वम् । तथा च जडे देहात्मसंयोगे न प्रसङ्ग इति शङ्कार्थः ।

स्वप्रकाशत्वात् स्वमात्रे साक्षी†ति । संविद्भिन्नताभ्युपगमे १९ । १५
संविदः स्वात्मानं प्रति प्रकाशत्वं ह्यभेदसंबन्धेनैव क्लृप्तमिति दृश्यवर्गस्य तं प्रति सा जडरूपा देहात्मसंयोगतुल्या न प्रकाशरूपेति नोक्तनियामकेन तस्या दृश्यवर्गविषयत्वसिद्धिरित्यर्थः । ननु यद्विषयत्वनियामकमन्विष्यते तं प्रति प्रकाशत्वं प्रकाशशब्देन न विवक्षितम् । तथा सति ह्यात्माश्रयः स्यात् । किं तु ज्ञानत्वसामान्यं विवक्षितम् । अतो नोक्तदोष इति चेद् न । एवमपि गगनादीनामतीतानागतयोश्च ज्ञानाद्यविषयत्वेन तद्विषयज्ञानाव्यापनात् । ताम्रादिज्ञाने तदुपष्टम्भककालिकादेरप्युपादानजनके कालिकादिविषयत्वस्याप्यापत्तेश्च । एतेन परोक्षाऽपरोक्षवृत्तीना‡मिच्छाद्वेषवृत्तीनां ज्ञानादिव्यापाराणां च तत्तद्भिन्ने ऽपि तद्विषये विषयत्वनियमार्थं कस्य चिन्नियामकस्यावश्यान्वेष्यत्वेन तथाभूतं नियामकं संविद्भिन्ने ऽपि संविदस्तत्तद्विषयत्वनियामकं भविष्यतीत्यपि शङ्का निरस्ता । संविदः स्वप्रकाशतायामभेदस्य नियामकस्य क्लृप्तत्वेन दृश्यवर्गप्रकाशतायां नियामकान्तरस्याऽननुगमावहस्य कल्पयितुमयुक्तत्वात् ।

ननु संविदः स्वभिन्ने नास्ति प्रकाशरूपतेति ब्रूषे संवित्प्रपञ्चयोरभेदं च तात्त्विकमपाकुरुषे अध्यासप्रतिक्षेपार्थं प्रवृत्तश्च नाध्यासिकं तमङ्गीकुरुषे किं तु
जगदान्ध्यमेव वक्तुमध्यवसितोसीत्याशङ्क्याह **सिद्धान्त्यभिमतमिति ।** ,, । १९
सर्वो ऽयं सिद्धान्त्यभिमत एवार्थ आत्मनो ऽधिष्ठानत्वासम्भवोपपादनार्थमनूद्यते । सिद्धान्ती खलु संवित् स्वप्रकाशेति तस्याः स्वाभिन्नएव प्रकाशरूपत्वस्य क्लृप्तत्वात् स्वभिन्ने दृश्यवर्गे तस्याः प्रकाशरूपता न सम्भवति तात्त्वि-

* जडत्वाचार्थविषयप्रकाशश्चेदितीति मूलानुसारी पाठः । क॰ पृ॰ १९ प॰ २४ ।
† स्वमात्रसाक्षीति १ पु॰ पा॰ । ‡ परोक्षवृत्तीनामिति पु॰ पा॰ ।

कस्य दृग्दृश्ययोरभेदो न युज्यते । अतो दृश्यवर्गस्य संविद्विवर्त्ततया ऽनि-
र्वचनीयेन तदभेदेन प्रकाशमानता । एवं चानुभवामीत्येकरूपप्रत्ययदर्शनेन
संविदां स्वतो भेदाप्रतीतेरर्थानामनिर्वाच्यतया तद्भेदेन रङ्गरजतादिभ्रमवि-
षयभेदेन भ्रमाधिष्ठानशुक्तिशकलस्येव भास्करमतरीत्यौपाधिकवस्तुकृतभेदा-
ऽसम्भवाच्च नित्या संविदिति नित्यसंविदतिरेकेणात्मकल्पनायां प्रमाणाभावात्
संवित्प्रकाश एव स्वयंप्रकाश एकः कूटस्थो निरंशः प्रत्यगात्मेति मन्यते । तस्य
मते प्रत्यगात्मरूपस्य प्रकाशस्य करणदोषाऽजन्यतया निरंशतया च सामा-
न्यग्रहणविशेषाऽग्रहणासम्भवात् कथमध्यासाधिष्ठानतेत्येवं सिद्धान्तिमतानु-
सारेणैवायम् अध्यासाक्षेपः क्रियतइत्याशयः ।

१९ । २२ **आजानतः स्वभावत इति ।** तथा च स्वाभाविकभेदो नानु-
भूयते किं त्वनुभवामीत्येकरूपप्रत्ययेनाऽभेद एवावसीयते । न चानुगतप्रत्ययो
जात्यैक्यविषयः व्यक्तिभेदाप्रतीतौ लाघवेन तस्य व्यक्त्यैक्यविषयत्वकल्पनौ*-
चित्यात् । न चेच्छाया अपीच्छामीत्यनुगतप्रत्ययात् स्वतो भेदाऽप्रतीतेश्च
नित्यत्वप्रसङ्गः । ममैतदिच्छा नष्टा एतदिच्छा उत्पन्नेति नाशोत्पत्त्यनुभववि-
रोधेनाऽनुगतप्रत्ययस्य जातिविषयत्वकल्पनात् । न च ज्ञानइवेच्छायामपि
नाशोत्पत्त्यनुभवस्यावच्छेदकवृत्तिविषयत्वं कल्पयितुं शक्यम् । इच्छायामवच्छे-
दकवृत्तिकल्पने प्रमाणाभावात् । ज्ञाने तत्कल्पने त्वस्ति प्रमाणम् । सर्वस्य हि
प्रपञ्चस्य नित्यैकदृगध्यस्तत्वेन प्रकाशमानतोपयोग्यभेद उपपादनीयः न तु
तत्तद्विषयस्य तत्तद्दृगध्यस्तत्वेन । लब्धात्मन्यधिष्ठाने भासमाने पश्चादध्या-
सस्य वक्तव्यत्वेन विषयाध्यासात् पूर्वं चाक्षुषादिज्ञानानां विषयं विनापि भान-
प्रसङ्गात् । न च सर्वस्य प्रपञ्चस्यैकदृगध्यस्तत्वे तत्तज्ज्ञानानां विषयनियमा-
ऽसम्भवः अवच्छेदकवृत्तिकृतविषयनियमोपपत्तेरिति भावः ।

नन्वहंवृत्तिरूपसाक्षात्कारेणार्थान्तरदुष्टमनुमानं सुखमहमस्वाप्समिति
परामर्शाऽनुपपत्त्या सुषुप्तावहंवृत्तेरवश्याभ्युपगन्तव्यत्वात् तथाभूतपरामर्शद-
,, । २४ र्शनस्यैवानुमानग्राहक†तर्कतया तवाप्युपजीव्यत्वादित्याशङ्क्याह **न च सुप्ता-
विति‡ ।** सुषुप्तावन्तःकरणलयस्य श्रुतिसिद्धत्वेन तदानीमहंवृत्त्यसम्भवात्

---

* व्यक्त्यैक्यकल्पनेति ५ पु० पा० । † अनुग्राहकेति ५ पु० पा० ।

‡ सुषुप्ताविवीति पाठोऽत्र प्रचुरः । एवं कल्पतरुपुस्तकेऽपि क० पृ० १६ प० २३ ।

स्वरूपतः सुषुप्तौ साक्षात्कृते प्रत्यगात्मनि सुप्तोत्थितपरामर्शस्तात्कालिकोऽह-
मर्थानुरागविषयो वक्तव्य इत्याशयः । **यथा खल्वभिज्ञायामिति** । ननु
देवदत्तो ऽयमित्यभिज्ञायामिदमर्थे यद् देवदत्तैक्यं भासते तद्विविक्तमुल्लिख्यत-
एव । यत्तु तत्र तत्ताविशिष्टैक्यं विविक्तं नोल्लिख्यते तन्न भासतएव । अतो
भासमानस्य विविक्तोल्लेखाभावे नेदमुदाहरणमिति चेद् न । एकस्मिन्निदमर्थे
ऐक्यद्वयाभावेन भासमानएव देवदत्तैक्ये तत्तोपाधिपरामर्शाभावेन तत्तेदन्ता-
विशिष्टाभेदरूपतयोल्लेखाभावरूपस्य विविक्तानुल्लेखस्य विवक्षितस्य सत्त्वात् ।

दुःखप्रत्यनीकत्वादिरूपेणेति । ननु दुःखप्रत्यनीकत्वं दुःख- २० । १५
विरोधित्वं दुःखव्यावर्तकसुखत्वं वा । नाद्यः । स्रक्चन्दनादिविषयभोग-
दशायां दुःखस्मरणरहितानां तज्जन्यानन्दे दुःखविरोधित्वपरामर्शोऽसम्भ-
वात् तदनुभवस्यासत्कल्पत्वेनापुरुषार्थत्वप्रसङ्गात् । मुक्तौ कथमपि दुःख-
स्मरणप्रसक्त्यभावेन मुक्त्यानन्दानुभवस्याऽपुरुषार्थत्वप्रसङ्गाच्च । अत एव न
द्वितीयो ऽपि । मुक्तौ सुखत्वादिप्रकारकानुभवाऽभावादिति चेत् । उच्यते ।
निरतिशये स्वरूपानन्दे संसारदशायामविद्यान्तःकरणोपधानदोषादसत्यध्य-
स्तो ऽपकर्षस्तं विना ऽनुभवाभावादिति विवक्षितम् । तथा चाध्यस्तापकर्ष-
युक्ततया गृहीतो ऽप्यानन्दो मेघावरणकृतापकर्षसौराऽऽलोकवदगृहीत इव
भातीति तात्पर्यम् । यद्वा सकलसांसारिकदुःखविरोधि यत् स्वरूपानन्दे
निरतिशयानन्दत्वं तदनुभवाभावादिति विवक्षितम् । तच्च स्वरूपाभिन्न-
मेव मुक्त्यानन्दानुभवे प्रकारो महावाक्यजन्यब्रह्माभिन्नस्वस्वरूपसाक्षा-
त्कार इवाभेदप्रतियोगिब्रह्मस्वरूपमिति न कश्चिद् दोषः ।

आनन्दादय इत्यादिशब्देन नित्यत्वादयो गृह्यन्ते । **आनन्दा-** ,, । १९
दीनामिति । नन्वानन्दादीनामिव बुद्ध्यादिभेदस्यापि वास्तवत्वेनाऽद्वि-
तीयचैतन्यैकरसता ऽवश्याभ्युपगन्तव्या । आत्मनि बुद्ध्याद्यभेदाध्यासवादि-
नस्तत्र तद्भेदो ऽप्यध्यस्त इत्युक्त्ययोगात् । अभेदाभावे तदात्मकभेदप्रति-
क्षेपासम्भवात् । न च बुद्ध्यादेः स्वरूपतो ऽध्यस्तत्वादात्मनि वस्तुतो न
तद्भेदो नापि तदभेद इति वाच्यम् । अध्यस्तादपि रजतात् शुक्तौ तज्ज्ञाना-
बाध्यबाधगोचरभेददर्शनादिति चेद् न । शुक्त्यादिगतरजतादिभेदस्यापि सर्व-

प्रपञ्च*निवर्तकब्रह्मज्ञानबाध्यत्वाभ्युपगमेन तद्वत् संसारदशायामबाध्यस्यापि बुद्ध्यादिभेदस्य तद्बाध्यत्वोपपत्तेः। यदि च स वास्तव एवाद्वितीयचैतन्यैकरसस्य इष्यते तथापि न दोषः। बुद्ध्यादिप्रतियोगिकत्वाऽपरामर्शात् सो ऽप्यगृहीत इव भातीति वक्तुं शक्यत्वात्। अयमपि टीकाकाराणामाचार्याणां च संमतः पक्षः। अत एव सोऽथशब्दविचारप्रस्तावे ऽन्तःकरणाद्यभावस्य ब्रह्मस्वरूपानतिरिक्ततया वास्तवत्वेनैव शुद्धत्वाद्यवगाहिब्रह्मसाक्षात्कारविषयत्वं समर्थयिष्यते।

२० । २५ **अस्मत्प्रत्ययविषयत्वमपीति**। ननु चैतन्यस्याखण्डानन्दात्मकशुद्धस्वरूपेणाहंवृत्तिविषयत्वे ऽप्यौपाधिकरूपेण तद्विषयत्वं प्रागनुपदमेवोक्तं वक्ष्यते च शब्दापरोक्षनिराकरणे औपाधिकरूपापन्नश्च जीवः तस्य कथमिह तद्विषयत्वम् औपचारिकमित्युच्यते तस्य तद्विषयत्वाभावे च तस्यास्मदुल्लेखो न स्यादन्तःकरणमात्रविषयत्वादिदमुल्लेख एव स्यात्। सत्यम्। अहमर्थानुप्रविष्टाऽनिदमंशरूपस्य सुखादिसाक्षिणः स्वप्रकाशस्याज्ञानोपाधिकस्य जीवस्याहंवृत्तिविषयत्वं प्रागुक्तं वक्ष्यते च। इह तु तस्येदमंशस्येव अहंवृत्त्यवच्छिन्नचैतन्यविषयत्वं मुख्यं नास्तीति तदौपचारिकमित्युच्यते। एवं च न **कर्मकर्तृत्वविरोध** इति चैतन्यकर्मत्वप्रयुक्तस्य विरोधस्य परिहारः। वृत्तिकर्मत्वप्रयुक्तस्य† तु पञ्चाग्निविद्यायामुपासनाकर्मत्वप्रयुक्तस्येव कथं चिद्रूपभेदेन परिहार आस्थेयः। अहं सुखीत्याद्यनुभवात् सुखादिविशिष्टरूपेण कर्मत्वम् अन्तःकरणविशिष्टरूपेण कर्तृत्वमिति।

अप्रकाशसमर्थनेनेति। निरतिशयानन्दात्मकस्य शुद्धस्वरूपस्येति‡ शेषः। **अभिव्यक्तं स्वरूपज्ञानमिति**। चरमसाक्षात्काररूपायां वृत्तावभिव्यक्तं स्वरूपज्ञानमेवाऽविद्यानिवर्तकम्। यथा सूर्यकान्तारूढं सौरं तेज एव तृणदाहकं तद्वत्। न तु वृत्तिरविद्यानिवर्तिका जडत्वादित्याशयेन
२२ । १३ कर्मधारयोक्तिः। **स्वयमेवेति स्वभाववादिन इति**। वत्सविवृद्ध्यर्थं क्षीरमिव पुरुषभोगापवर्गार्थं प्रधानं स्वयमेव प्रवर्तते इति वदतः साङ्ख्यस्य

* पूर्वप्रपञ्चेति ४ पु० पा०।
† वृत्तिकर्मप्रयुक्तस्येति २ पु० पा०।
‡ शुद्धरूपस्येति ४ पु० पा०।

शङ्कायाः विवरणार्थत्वेन योजयितुं शक्यत्वे ऽपि साङ्ख्यमते पुरुषसन्निधानमात्रस्यापेक्षितत्वात्तस्यापेक्षामवदतः स्वभाववादिनो मते स्वयमेवेत्येवकारस्य स्वारस्यमस्तीति स्वभाववादिमतपरतया योजितम् । **प्रमाश्रयत्वेनापि समर्थ्यते इति** । न च प्रमातृत्वमन्तरेणेति भाष्यं पूर्वभाष्यशेषत्वेन प्रतीयमानमपि प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरिति पूर्वभाष्यगतवाक्येन पौनरुक्त्यपरिहाराय युक्त्यन्तरपरत्वेन व्याख्यायतइति भावः ।

प्रमाश्रयत्वं हीति । न हीन्द्रियाण्यनुपादायेत्यादिभाष्ये प्रमातृत्वं २२ । २१
प्रमाकरणादिप्रयोक्तृत्वरूपं प्रमाकर्तृत्वमिति प्रमाणप्रेरकत्वेनाध्याससमर्थनार्थमुक्तम् । इह तु चिद्रूपतया ऽपरिणामत्वेनाचिद्रूपतया च चिदचित्संवलनरूपा या प्रमा तदाश्रयत्वं केवलचितः केवलाऽचितश्च न सम्भवतीति प्रमाश्रयत्वेनाध्याससमर्थनार्थं प्रमातृत्वं प्रमाश्रयत्वमिति व्याख्यायते । यद्यप्युभयथा ऽप्यध्याससमर्थनं प्रत्यगात्मनः कौटस्थ्यं सिद्धं कृत्वा प्रवृत्तं तत्कौटस्थ्ये विप्रतिपद्यमानं प्रति नोपन्यासार्हं तथापि श्रुतिसिद्धं तत्कौटस्थ्यं प्रामाणिकानां न विप्रतिपत्त्यर्हमिति तात्पर्यम् । **अनेनेति** । नाविद्यावन्तमिति शङ्काग्रन्थो हि विरोधाभिप्रायः । स तु विद्याया एवाचित्संवलितरूपत्वेनाविद्यागर्भत्वान्नास्ति विरोध इति परिहृत इत्यर्थः । अनुपयोगपरिहारार्थस्तामेवेति ग्रन्थः । अध्यासमपेक्ष्य प्रमाणप्रवृत्तेस्तेन प्रमोपयोगकथनादित्यवतारयति **तत्त्वेति** । इह यदि प्रमातृत्वं प्रमाकरणादिप्रेरकत्वरूपं प्रमायां स्वातन्त्र्यं तदा प्रमाणप्रेरकत्वेनाध्याससमर्थनमेवास्यापि भाष्यस्यार्थः स्यादिति पूर्वभाष्येण पौनरुक्त्यं भवेद् यदि तु तत्प्रेरणानुकूला शक्तिरिह प्रमातृत्वं तत्राह **प्रमातृत्वशक्तिरिति** । न च प्रेरणव्यापारेण कल्पितया शक्त्या ऽध्यास उपपाद्यतामिति वाच्यम् । प्रथमोपस्थितेन तस्य* कल्पकेनैव तदुपपादनसम्भवात् तस्य च कृतत्वादिति भावः । **प्रमा त्विति** । तुशब्दः प्रमाणप्रेरणव्यापारोपस्थित्यनपेक्षोपस्थितिकत्वविशेषद्योतनार्थः । **उद्देशत्यागा- २३ । ३**
त्मकेति । यजमानद्रव्यस्वत्वत्यागो ऽन्येन कर्तुमशक्य इति तस्मिन्प्रधाने यजमानस्यैव कर्तृत्वं तथैव ऋत्विगानमनार्थं दक्षिणादाने ऽप्युपलक्षणमेतत् फलप्रतिग्रहयोग्यतापादकतपःप्रभृतेश्च । एवकारस्त्वदितराङ्क-

---

* तस्या इति २ पु· पा· ।

लापव्यवच्छेदार्थः । **भावनाक्षिप्तेति** । ननु पचन्ति पाचका इत्यत्र भावनाक्षिप्तपाचकरूपकर्तृगामित्वं पाकफलस्य नास्तीति दृष्टमिति चेद् न । तत्राकर्तृगामिक्रियाफलार्थकपरस्मैपदबलात् पाकफलस्यान्यगामित्वे ऽप्यत्र बाधकाभावेनौत्सर्गिककर्तृगामित्वत्यागायोगादिति भावः । न केवलं कर्तृगामित्वे बाधकाभावमात्रं तत्र साधकान्तरमप्यस्तीत्याह **आत्मनेपदेन चेति** । **अनर्थकं स्यादिति** । भूतिदानं हि स्वफलार्थं कर्म परैः कारयितुमित्येवं लोके दृष्टार्थमवगतम् । अतो दृष्टार्थपरिक्रयविधिबलात् परिक्रीतैः* कर्म कारणी-
२३ । १२ यमिति नियमो ऽवसीयतइति भावः । **आध्वर्यवादिकमिति** । आध्वर्यवादिसमाख्यायुक्तकाण्डाम्नातमङ्गजातं समाख्यावशादध्वर्य्वादिभिः कर्तव्यमित्यधिकरणान्तरव्युत्पादनीयार्थस्य बुद्धिसौकर्यार्थमिहोपन्यासः । **प्रयोजककर्तृत्वादिति** । स्वतन्त्रप्रयोजकसाधारणकर्तृसामान्यपरं साङ्गप्रधानानुष्ठापकप्रयोगविधिगतमाख्यातमिति भावः । अप्रयोक्तेत्यनेन पौनरुक्त्यपरिहारायाह **अकर्त्ता कर्तृत्वशक्तिरहित इति** । **पातकं ब्रह्मवधादीति** । अत्र पातकशब्देन महापातकमतिपातकं समपातकं† चेति त्रिविधं पातकं‡ गृह्यते । **जातिभ्रंशकरादि** इत्यादिशब्देन प्रकीर्णकं गृह्यते । अनुक्रान्ताष्टविधपापाऽनन्तर्भूतं पापं प्रकीर्णकम् । एवमेकैकसङ्ख्यया केषां चित्केषां चित् पापानां क्रोडीकारस्तेषु तेष्वेकरूपनरकादिफलप्रायश्चित्तोपदेशार्थः । **देहगतस्वामित्वस्येति** । ननु पुत्रभार्यादिस्वामित्वं देहगतं न भवति तस्य पुत्रभार्याद्युपचाराधीनभोगाभावात् । तदधीनभोगभाक्त्वव्यतिरेकेण तद्वैकल्यसाकल्यप्रयुक्तवैकल्यसाकल्याहस्य स्वामित्वस्य§भावादिति चेद् न । तदुपचाराधीनयोषादिभाक्त्वरूपस्य तथाभूतस्य स्वामित्वस्य देहेपि सम्भवात् । **प्रमेयस्वरूपालोचनया ऽपि तमाहेति** । न चाहंप्रत्ययसिद्धेन कर्तृत्वभोक्तृत्वादिना निश्चितस्यापि भोक्तृरूपस्य‖ नित्यत्वविभुत्वादिना सन्दिग्धतया विषयत्वं स्यादिति वाच्यम् । सिद्धान्ते तन्निर्णयस्य मोक्षफलत्वाऽनङ्गीकारादिति भावः ॥

---

* परिक्रीय तैरिति ५ पु. पा. ।

† उपपातकमिति पाठः साधुः । समपातकस्य शास्त्रेष्वप्रसिद्धत्वात् । सर्वेषु पुस्तकेषूपरितन एव पाठो दृश्यते ।

‡ पातकमिति नास्ति २ पु. ।

§ स्वामित्वस्येति नास्ति २ पु ।

‖ भोक्तृरूपस्येति नास्ति १–४ पु. ।

अथातो ब्रह्मजिज्ञासा ॥ १ ॥ २५ । ८

ननु सूत्रे जिज्ञासापदप्रकृतिप्रतिपाद्यं किम् । अखण्डानन्दरूपब्रह्मस्वरूपज्ञानं किं वा विचारसाध्यं ब्रह्मनिर्णयरूपं वृत्तिज्ञानम् । नाद्यः । संशयानाक्षेपेण* विषयसूचनालाभप्रसङ्गात् । न हि बहुशो दृष्टे ऽपि पुनः पुनरुदित्वरी† विषयसौन्दर्यप्रयुक्ता जिज्ञासा संशयमूला । न द्वितीयः । प्रयोजनसूचनालाभप्रसङ्गादित्याशङ्क्योभयमपि विवक्षितं सौत्रपदानाम् अनेकार्थत्वस्यालङ्कारत्वादित्याह **वृत्तिव्यक्तेति** । वृत्तिश्च व्यक्तस्वरूपज्ञानं चेति द्वन्द्वैकवद्भावः । स्वरूपज्ञानविवक्षायां ब्रह्मणो यद् ज्ञानं तदिच्छेत्यर्थकथने राहोः शिर इतिवदुपचारो द्रष्टव्यः । **ब्रह्मतज्ज्ञानप्रारम्भार्थ इति** । ब्रह्म तावत् स्वरूपतो जन्मादिसूत्रेण‡ प्रयोजनरूपतया फलाध्यायेन§ च प्रतिपाद्यते । तद्विषये प्रमाणयुक्तो ब्रह्मतज्ज्ञानेत्यत्र करणव्युत्पत्तिमता ज्ञानपदेन संगृहीते समन्वयाविरोधलक्षणाभ्यां प्रतिपाद्येते मुक्तिसाधनब्रह्मज्ञानं भावव्युत्पत्तिमता तेनैव ज्ञानपदेन संगृहीतं सपरिकरं साधनाध्यायेन‖ प्रतिपाद्यते । तस्मादिहाथशब्दस्य ब्रह्मतज्ज्ञानप्रतिपादनप्रारम्भार्थत्वं वक्तुं शक्यमिति शङ्कार्थः ।

दण्डी प्रैषानिति । इष्टिषु प्रैषस्याध्वर्युः कर्त्ता अनुवचनस्य ,, । १९
होता तद्विकृतौ पशावुभयोरपि मैत्रावरुणः कर्त्ता विधीयते । मैत्रावरुणः प्रेष्यति चान्वाह चेति । तेन प्राप्तत्वाद् दण्डवाक्ये मैत्रावरुणकर्तृके प्रैषानुवचने विध्यन्वयित्वेन न विवक्षा किं तु प्रैषानुवचनाङ्गे दण्डग्रहण इत्यर्थः । यद्यपि क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति विहितस्य दण्डदानस्य मैत्रावरुणकार्यार्थत्वावगमात् तेन स्थित्वोच्चैः कर्त्तव्ये प्रैषानुवचने बलार्थमवष्टम्भनया दण्डग्रहणस्य सामर्थ्यादपि प्राप्तिर्भवेत् तथापि सामर्थ्याद् भवन्ती प्राप्तिस्तेन कर्त्तव्ये रात्रिसञ्चारादावपि भवेत् सा मा भूदिति कार्यान्तरपरिसङ्ख्याफलकः प्रैषानुवचनरूपे कार्ये तस्य दण्डविधिरिति दण्ड एव विध्यन्वयित्वेन विवक्षित इति भावः ।

प्रत्युत तदविवक्षायामिति । ननु विध्यन्वयित्वेनाविवक्षितमपि ,, । २०
प्रैषानुवचनमनुवाद्यतया यथा विधेयदण्डान्वयि एवमिच्छा ऽपि प्रारभ्यमाण-

* संशयानाक्षेपेणेति ४ पु० । † उदित्वर्येति सर्वेषु पुस्तकेषु पाठः । औचित्यादुपरितनः स्थापितः ।
‡ व्याससू० अ० १ पा० १ सू० २ । § चतुर्थाध्यायेन । ‖ तृतीयाध्यायेन ।

ब्रह्मज्ञानान्वयिनी सती ब्रह्मज्ञानस्य प्रयोजनत्वं ब्रह्मणः सन्दिग्धत्वं च गमयेत् इच्छेष्यमाणसमभिव्याहारे चेष्यमाणप्राधान्यं यजेत स्वर्गकाम इत्यादौ क्लृप्तम् । अत इहापीच्छाप्राधान्यं विहायेष्यमाणप्राधान्यमभ्युपगन्तुं युक्तम् । तस्मात्प्रारम्भार्थतायां न कश्चिद्दोष इति चेत् । उच्यते । एवं सति वृत्त्यभिव्यक्तनिरतिशयानन्दरूपस्वरूपज्ञानस्येच्छाविषयत्वेनाग्रहणात्परमपुरुषार्थः सूत्रेण साक्षाद् दर्शितो न स्याद् विविदिषन्तीत्यत्रैव मुक्तिसाधनज्ञानस्य गौणपुरुषार्थताज्ञापनार्थेनेच्छासमभिव्याहारेण निर्णिनीषोत्क्यैव सन्देहानाक्षेपाद्* विषयसूचनं च न सिध्येत् । अतः स्वरूपज्ञानप्रेप्साप्रतिपादनेन तस्य परमपुरुषार्थत्वब्रह्मविषयनिर्णयेच्छाप्रतिपादनेन ब्रह्मणः प्रागविज्ञाततया सन्दिग्धत्वेन† विषयत्वं च सूचयितुं पूर्वोक्तरीत्या जिज्ञासापदस्य स्वरूपज्ञाननिर्णयज्ञानेच्छाद्वयप्राधान्यमेवाभ्युपेयमिति भावः ।

२६ । १ **स्वतो नान्तस्य त्विति** । यद्यपि तस्य पूजितविचारवचनत्वं न व्याकरणस्मृतिसिद्धं मान पूजायामिति धातोः पूजामात्रवाचित्वात् । मान विचारे इति चुरादिपठितस्य धातोर्विचारमात्रवाचित्वात् । तथापि तयोरन्यतरस्य ग्रहणे धात्वर्थतया विशेषणविशेष्यान्यतरलाभो ऽस्तीत्यभिप्रायेणैवमुक्तम् । **प्रवर्त्स्यति** प्रवर्तिष्यते । वृद्भ्यः स्यसनोरिति वैकल्पिकं परस्मैपदम् । परस्मैपदे न वृद्भ्यश्चतुर्भ्य इति प्रतिषेधादिडागमाभावः । **किं पूर्वप्रकृतादिति** । किमयमथशब्द आनन्तर्यार्थ इति प्रथमविकल्पोपन्यासपरे पूर्ववाक्ये विकल्पधर्मित्वेन प्रकृतादित्यर्थः (**द्वितीये इति** । अथशब्दविशिष्टात्पूर्वोक्तकल्पादानन्तर्यं शुद्धकल्पाद्वेत्यर्थः । पूर्वप्रकृतस्याथशब्दस्यावश्यमपेक्षणे तमेवापेक्ष्याथशब्दस्य तादर्थ्ये कल्पान्तरोपन्यासार्थकत्वे सम्भवत्यर्थान्तरस्य विशिष्टापेक्षया ऽऽनन्तर्यस्य कल्पना ऽनवकाशात् । यद्वा पूर्वप्रकृतस्य प्रथमकल्पस्यापेक्षया आवश्यकत्वे द्वितीयाथशब्दस्य तादर्थ्यै तन्मात्रापेक्षया आनन्तर्यार्थकत्वे सम्भवति अर्थान्तरस्य विशिष्टानन्तर्यस्य कल्पना ऽनवकाशादित्यर्थः‡) ।

---

* सन्देहाक्षेपादिति ४ पु॰ । † सन्दिग्धेनेति ४ पु॰ पा॰ ।

‡ ( ) एतन्मध्यगो ग्रन्थः ४ पु॰ त्रुटितः ।

आनन्तर्यरूपत्वपक्षे विकल्पाऽप्रतिभानादिति । अत्र वि- २६ । १३
कल्पप्रतिभानं तत्रैव पूर्वं विकल्पप्रकृततद्धर्म्यपेक्षार्थको विकल्पान्तरमुखे ऽथशब्दः प्रसिद्धो नान्यत्रेत्याशयः । ननु अथैष ज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यत्र प्रकृतज्योतिष्टोमानुवादेन सहस्रदक्षिणालक्षणगुणविधानं न तु तद्विशिष्टकर्मान्तरविधानमिति पूर्वपक्षोपपादकत्वेन पूर्वप्रकृतापेक्षार्थत्वमथशब्दस्य वार्तिककृतोक्तम्* । अतो विकल्पाभावे ऽपि तादर्थ्यप्रसिद्धिरस्तीति चेद् न । तत्रानन्तर्यार्थत्वमेव पूर्वपक्षे ऽभिमतम् । आनन्तर्यमपि हि पूर्वप्रकृतमपेक्ष्य वर्ण्यते । अत एव तृतीयाध्यायटीकायां सञ्ज्ञाधिकरणा†नुक्रमणे ऽथशब्दस्यानन्तर्यार्थस्यासम्बन्धे ऽनुपपत्तेरित्यानन्तर्यार्थमादायैव पूर्वपक्षसमर्थनं कृतम् । आचार्यैश्च तद्व्याख्यानसमये वार्तिककारीयपूर्वप्रकृतापेक्षोक्तेरानन्तर्य्यएव पर्यवसानमुक्तभङ्ग्या दर्शितम् । आनन्तर्यं हि पूर्वप्रकृतापेक्षं गुणविधिपरत्वे चाश्रयदानार्थमस्ति ज्योतिष्टोमापेक्षा न कर्मान्तरत्वे न हि क्रतुः क्रत्वन्तरमपेक्षत इत्यर्थ इति ।

यस्मिन् सति भवन्ती भवत्येवेति ग्रन्थमध्याहार‡व्यवहितयोजनाभ्यां व्याचष्टे **अन्यदपीति** । ब्रह्मजिज्ञासाया अपि योग्यत्वादिति ग्रन्थमपेक्षिताध्याहारेण व्याचष्टे **स्वाध्यायाध्ययनानन्तरमिति** । इत्थं प्रतीकमनुपादाय व्याख्यातं व्याख्यानेनैव व्याख्येयमूलांशो ज्ञातुं शक्य इति ग्रन्थलाघवार्थम् । एवमुत्तरत्रापि तत्र तत्र दृश्यते ।

नन्विति । धर्मजिज्ञासासूत्रे ब्रह्म विचार्यत्वेन नोपात्तं किं तु धर्म- ,, । २१
मात्रम् । अतस्तत्रत्याथशब्दस्य धर्मपरवेदाध्ययनानन्तर्यमर्थः । इह तु ब्रह्मविचारे वेदान्ताध्ययनमपेक्षितमिति तत्साधारणाध्ययनानन्तर्य्यं ब्रह्मविचारस्य प्रतिपादयितुमिदं सूत्रमारब्धव्यमिति शङ्कार्थः ।

ननु धर्मशब्दस्य वेदार्थमात्रोपलक्षणत्वमङ्गीकृत्य तेन तत्रत्याथशब्दस्य सकलवेदाध्ययनानन्तर्यमर्थमुपपाद्यास्याथशब्दस्य तेन गतार्थत्वपरिहारार्थमर्थान्तरं वर्णनीयमित्युपपादनमयुक्तम् । तथा सति हि सकलवेदार्थविचारप्रतिज्ञानं तत्रैव कृतमिति स्यात् । एवं च कृत्स्नमेवेदं शास्त्रं गतार्थत्वेना-

---

* तन्त्रवार्तिके । जै॰ सू॰ अ॰ २ पा॰ २ सू॰ २२ । † व्याससू॰ अ॰ ३ पा॰ ३ सू॰ ६-८ ।
‡ ग्रन्थमपेक्षिताध्याहारेति २ पु॰ पा॰ ।

नारभ्यं भवेदिति कुतो ऽस्याथशब्दस्यार्थान्तरवर्णनप्रत्याशा। न हि कृत्स्नवेदार्थविचारं प्रतिज्ञाय तदेकदेशविचारस्त्यक्तो बुद्धिपूर्वमिति वक्तुं शक्यम्। न वा धर्मविचारार्थं द्वादशलक्षणीं कृत्वा तत्रासूचितान् काँश्चिन्न्यायानालक्ष्य तत्संग्रहार्थं द्वादशलक्षणीं शेषं संकर्षकाण्डमपि कृतवतो महर्षिवरस्य भगवतो जैमिनेर्ब्रह्मपरवेदभागविचारे विस्मरणं विघ्नजातं वोत्प्रेक्षितुं शक्यमिति चेत्। उच्यते। धर्मजिज्ञासासूत्रस्य* सकलवेदार्थविचारप्रतिज्ञापरत्वमात्रेणास्य शास्त्रस्य गतार्थत्वं नापद्यते। इह व्युत्पादयिष्यमाणानां सिद्धब्रह्मपरवाक्यार्थन्यायानां पूर्वतन्त्रव्युत्पादितेभ्यः कर्मपरवाक्यार्थनिर्णायकन्यायेभ्यो विलक्षणत्वात्। किं तु शास्त्रारम्भप्रतिज्ञैक्येन वक्तृभेदे ऽप्येकप्रबन्धतामात्रं तदानीमापद्यते समयबन्धपूर्वकानेककविकर्तृकैककाव्यवत् तदपि सिद्धान्ते प्रौढ्याभ्युपगम्य मतान्तरमिष्यत एव तदाश्रित्य हि भाष्यटीकयोरेक आत्मनः शरीरे भावा†दित्यधिकरणं देहातिरिक्तात्मास्तित्वस्य शास्त्रप्रथमपादे व्यवस्थापनाद्च तद्व्यवस्थापनं पुनरुक्तमिति शङ्कोद्घाटनं भाष्यकृता शबरस्वामिना तत्र तत्कृतं न तत्सूत्रारूढमिति समाधानं च करिष्यते।

ननु प्रौढ्यापि कथमेकशास्त्र्यमभ्युपगतं विरुद्धयोरेकप्रबन्धत्वायोगात्। अस्ति हि जैमिनिबादरायणमतयोर्विरोधः। बादरायणेन हि शेषत्वात् पुरुषार्थवादो यथा ऽन्येष्विति जैमिनिः‡ परामर्शं जैमिनिः§रिति च सूत्रे ब्रह्मसंन्यासापलपनं जैमिन्यभिमतमनूद्य दूषितं न च जैमिनेरन्वारुह्यवादमात्रमनूद्य दूषितं न तु तन्मतम्। परं जैमिनिर्मुख्यत्वात्‖ तद्भूतस्य तु नातद्भावो जैमिनेरपी¶त्यादिसूत्रैः जैमिनेर्ब्रह्मसंन्यासाभ्युपगमस्य बादरायणेनैव प्रतिपादितत्वादिति वाच्यम्। तस्य विप्रतिषेधाच्चासमञ्जस**मिति साङ्ख्याधिकरणोक्तन्यायेन जैमिनिमतस्य परस्परविरुद्धतया ऽनुपादेयत्वसूचनार्थत्वोपपत्तेः। किं च देवताधिकरणे†† जैमिन्यभिमतं बहुशो देवताप्रत्याख्यानमनूद्य दूषितम्। आम्नायस्य क्रियार्थत्वा‡‡दित्यादिसूत्रेण वेदस्य क्रियार्थत्वेनैव प्रामाण्यं वक्तव्यमित्य-

* जै· सू· अ· १ पा· १ सू· १।
† व्याससू· अ· ३ पा· २ सू· ५३।
‡ व्या· सू· अ· ३ पा· ४ सू· २।
§ व्या· सू· अ· ३ पा· ४ सू· १८।
‖ व्या· सू· अ· ४ पा· ३ सू· १२।
¶ व्या· सू· अ· ३ पा· ४ सू· ४०।
** व्या· सू· अ· २ पा· २ सू· १०।
†† व्या· सू· अ· १ पा· ३ सू· २६-३३।
‡‡ जै· सू· अ· १ पा· २ सू· १।

विशेषेणाक्रियार्थानामप्रामाण्यमाशङ्क्य विधिना त्वेकवाक्यत्वा*दिति सूत्रेण केवलसिद्धार्थविषयत्वेन भासमानानां वाक्यानां विध्येकवाक्यतया क्रियार्थतामुपपाद्य जैमिनिना यत्प्रामाण्यसमर्थनं कृतं तदपि बादरायणेन समन्वयसूत्रे† ब्रह्मविषयाणां वाक्यानामनपेक्ष्य विधिशेषतामक्रियार्थानामेव सतां प्रामाण्यसमर्थनेन प्रत्याख्यातम् । एवं विरुद्धयोरेकप्रबन्धत्वं प्रौढ्यापि कथमभ्युपगतमिति चेत् ।

उच्यते । ब्रह्मसंन्यासदेवतापलापविषये विरोधस्तावद् नैकप्रबन्धत्वापवादकः । तस्य द्वादशलक्षण्यामसूचितत्वेन परस्परविरुद्धमताभिमान्यनेककविकृतरामायणादिवदेकप्रबन्धतोपपत्तेः । किं च जैमिनिना तिर्यगधिकरणे न देवता देवतान्तराभावादिति सूत्रेण देवताः कर्मसु नाधिक्रियन्ते इन्द्रादीनां हविस्त्यागोद्देश्यस्येन्द्रान्तरादेरभावात् । स्वात्मने सङ्कल्प्यमानस्य द्रव्यस्य स्वत्वत्यागासम्भवेन यागाद्यनिर्वृत्तेः इत्येवमुपपादयता देवताभ्युपगम एव स्पष्टीकृतः । देवतानां युगपदनेकयागदेशसंनिधानमप्याधानपवमानेष्टिजन्यसंस्कारनिचयम् आहवनीयादिशब्दार्थमभ्युपगच्छता तस्य संप्रतिपन्नमेव । आहवनीयाद्यभिमानिदेवतां विना निरुक्तसंस्काराधारस्य वक्तुमशक्यत्वात् । न हि प्रत्यक्षाग्निस्तदाधारः । आधानकाले निहितस्याहवनीयादेः पावमानेष्ट्यनन्तरं त्यागेन तद्गतस्य संस्कारस्य तन्नाशतो नाशादाहवनीयाद्यननुवृत्तिप्रसङ्गात् । अजस्रपक्षे ऽप्यनुगतस्य‡ मथनादिना पुनरुत्पादने तदनुवृत्त्यभावप्रसङ्गात् । न च प्रणयनमथनादिजन्यसंस्कारो ऽप्याहवनीयादिशब्दस्यार्थः । अनेकार्थत्वप्रसङ्गात् । पशावौत्तरवेदिकप्रणयनानन्तरमाहवनीयगार्हपत्यताप्राप्त्या प्रणयनस्याहवनीयशब्दप्रवृत्तिनिमित्तत्वाऽयोगाच्च । तस्मादाहवनीयाद्यभिमानिदेवता एव तत्तदायतनविशेषनिहितेषु सम्भारेषु मथिताग्निनिधानरूपेणाधानेन संस्क्रियन्ते ताश्च संस्कृता देवता अजस्रपक्षे यजमानशरीरे अग्निदानपर्यन्तं मध्ये ऽग्निसंस्कारविच्छेदनिमित्तोपजने तत्पर्यन्तं च तेष्वग्निषु संनिदधते । अग्नीनामजस्रधारणाभावे तत्तत्कर्मावसानेष्वाहवनीयादिदेवता गार्हपत्यमनुप्रविशन्ति पशावौत्तरवेदिक-

---

* जै॰ सू॰ अ॰ १ पा॰ २ सू॰ ७ । † व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ ४ ।
‡ अनुगतस्य तस्येति २ पु॰ पा॰ ।

प्रणयने क्रियमाणे तम् आहवनीयो ऽनुप्रविशति तेन प्रागधिष्ठितमग्निं गार्हपत्य इत्येवमादिकमभ्युपगन्तुं युक्तम् । एवं सत्येव नान्तरा ऽग्निं संचरति यदि पूर्वो ऽनुगतः सञ्चुय्यै पश्चाद्धि स तर्हि गत इति गार्हपत्याज् ज्वलन्तमाहवनीयमुद्धरतीति च कल्पसूत्रकारवचनं सामञ्जस्यमश्नुते । न हि संस्कारमात्रस्य पश्चाद्गमनं सम्भवति । नाप्याहवनीयस्य गार्हपत्यानुप्रवेशाभावे गार्हपत्यात् तत्र सत आहवनीयस्योद्धरणं सम्भवति । न च तथा सत्यग्निद्वयसंसर्गनिमित्तकप्रायश्चित्तप्रसङ्गः । तस्य प्रत्यक्षाग्निसंसर्गनिमित्तकत्वात् । न च देवतानामाहवनीयादिशब्दार्थतायामाहवनीये जुहोति गार्हपत्ये हवींषि श्रपयतीत्यादिवाक्यश्रुतं हविःप्रक्षेपश्रपणाद्याधारत्वमपि तासां भवेदित्ययं दोषः । इष्टापत्तेः । अभून्नो दूतो हविषो जातवेदा अवाड्ढव्यानि सुरभीणि कृत्वेति मन्त्रवर्णतः पाकेन हविषां सुरभीकरणस्योद्देश्यदेवतार्थं नयनस्य चैककर्तृकत्वावगतेश्च । तत्राभिमान्यभिमानविषययोरभेदाध्यवसायेन समानकर्तृकत्वव्यपदेश इति चेद् इहापि तर्ह्यभेदाध्यास एव गतिरस्तु । एवमग्निसंस्काराधारदेवतानामिव हविरुद्देश्यदेवतानामपि बहुषु यागदेशेषु संनिधानम् आवाहनादिमन्त्रार्थवादावगतं जैमिनिनाप्युक्तप्रायमेव । मानान्तरप्राप्तिबाधाभावे मन्त्रार्थवादादिप्रतिपन्नस्य देवतादेस्तेनाप्यभ्युपगतत्वात् । न च तथापि देवतानां कर्मसु गुणत्वप्राधान्याभ्यां विरोधः । बादरायणमते ऽपि फलकरणत्वेन प्रधानतया शब्दबोधितं यागादिकं प्रत्युद्देश्यतया तच्छरीरनिर्वर्तकत्वेन देवतानां संनिपात्यङ्गत्वरूपतद्गुणत्वसत्त्वात्* सिद्धार्थविषयवाक्यानां विधिशेषत्वं तु जैमिनिनोक्तं विधिसमभिव्याहृतवायुक्षेपिष्ठादिवाक्यमात्रविषयम् । तथा हि । धर्मजिज्ञासासूत्रे† ब्रह्ममीमांसासाधारणी वेदार्थविचारप्रतिज्ञा धर्ममीमांसामात्रसाधारणी धर्मविचारप्रतिज्ञा चेति द्विविधा प्रतिज्ञा विवक्षिता । सूत्राणामावृत्त्या ऽनेकार्थप्रतिपादकत्वस्यालङ्कारत्वात् । अत एव अथातः शेषलक्षणम्‡मिति तृतीयाध्यायाद्यसूत्रं वार्तिककृता

द्विलक्षण्याः परं शिष्टं यावत् किं चन लक्षणम् ।
तत् सर्वं वक्तुमारब्धमथातः शेषलक्षणम् ॥

---

* रूपतद्गुणत्वादिति २ पु॰ पा॰ ।

† जै॰ सू॰ अ॰ १ पा॰ १ सू॰ १ । ‡ जै॰ सू॰ अ॰ ३ पा॰ १ सू॰ १ ।

इत्यवशिष्टदशाध्यायार्थविचारप्रतिज्ञापरं व्याख्यायानन्तरं तृतीयाध्यायार्थशेषशेषिभावविचारप्रतिज्ञापरत्वेनापि व्याख्यातम् । एवं च यथा शेषः परार्थत्वादितिद्वितीयसूत्रमारभ्य तृतीयाध्यायसूत्राणि शेषशेषिभावमात्रविषयाणि एवं चोदनासूत्र*मारभ्य द्वादशलक्षणीसूत्राणि धर्ममात्रविषयाणि । अत एव चोदनासूत्रे धर्मस्यैव विधिगम्यत्वं लक्षणमुक्तं न हि ब्रह्मणो विधिगम्यत्वमस्ति । अतस्तस्य निमित्तपरीष्टि†रिति सूत्रे धर्मप्रमाणमेव परीक्ष्यत्वेन प्रतिज्ञातमिति तदनुसारेणाम्नायस्य क्रियार्थत्वा‡दिति सूत्रं धर्मप्रमाणत्वेनाभिमतस्य क्रियार्थत्वेनैव§ तत्र प्रामाण्यं वक्तव्यमित्येतत्परम् । विधिना त्वेकवाक्यत्वा||दिति सूत्रमपि धर्मप्रमाणत्वाभिमतक्रियाविधिसमभिव्याहृतवायुर्वेपिष्ठादिवाक्यमात्रविषयमिति न कश्चिद्विरोधः । न चैवं कर्मब्रह्मविचारशास्त्रयोरैकशास्त्याभ्युपगमे ब्रह्मजिज्ञासूत्रगताथशब्दस्य कर्मविचारानन्तर्यमर्थः स्यादिति वाच्यम् । भाष्योक्तरीत्या ब्रह्मविचारे कर्मानुष्ठानस्यापेक्षानियमाभावेन तदप्रसक्तेः । न हि ज्वरादिवाजीकरणान्तचिकित्साप्रतिपादकानां वैद्यकसंहिताग्रन्थानामेकग्रन्थत्वमात्रेण वा तच्चिकित्साप्रकरणं विचारयिष्यता ज्वरचिकित्सामारभ्य विचारणीयं तत्तद्विचाराधिकारिवैलक्षण्यमिहापि तुल्यम् । तस्मादनपेक्षितं हि वेदार्थविचारत्वोपाधिकल्प्यमैकशास्त्र्यं नातिविरुद्धमिति प्रौढ्या तदभ्युपगमे न कश्चिद्दोषः । यद्वा धर्मशब्दस्येत्यादिटीकाग्रन्थेन जिज्ञास्यसमर्पणार्थस्य धर्मशब्दस्य वेदार्थमात्रोपलक्षणत्वं नोक्तं किं त्वतःशब्दोक्ते वेदस्य विवक्षितार्थत्वरूपे धर्मविचारप्रतिज्ञाहेतौ धर्मरूपस्यैवार्थस्य विवक्षितत्वं न विशेषणं किं तर्हि कृत्स्नस्य वेदार्थस्य । अतो धर्मविचारप्रतिज्ञायां यागादिकार्यसमर्पकोऽपि धर्मशब्दो हेतुशरीरगतमथशब्दं समभिव्याहारवशात्तावन्मात्रपरं न कुर्याद् अपि तु वेदार्थसामान्यपरमेव कुर्यादित्येतावदुक्तम् । तदेतत्प्रथमसूत्रार्थव्याख्यानावसाने टीकावाक्यैराचार्यवाक्यैस्तद्व्याख्यानेन च स्पष्टीभविष्यति । ननु च विवक्षितार्थत्वे हेतौ वेदार्थसामान्यस्य प्रवेशोपदर्शनेन कृत्स्नवेदाध्ययनानन्तर्यमथशब्दार्थ इति प्रकृते सिषाधयिषितोऽर्थः कथं सिध्येदिति

* जै॰ सू॰ अ॰ १ पा॰ १ सू॰ २ । † जै॰ सू॰ अ॰ १ पा॰ १ सू॰ ३ ।
‡ जै॰ सू॰ अ॰ १ पा॰ २ सू॰ १ । § धर्मप्रमाणत्वेनाभिमतस्याम्नायस्य क्रियार्थत्वेनेति २ पु॰ ।
|| जै॰ सू॰ अ॰ १ पा॰ २ सू॰ ७ ।

चेत् । इत्थम् । धर्मशब्दसमभिव्याहारे विद्यमाने ऽपि यथा हेतावर्थशब्दो वेदार्थमात्रपरो ऽङ्गीकृतः विशिष्य धर्मपरवेदभागस्यार्थविवक्षोपन्यासे वेदान्तभागस्यार्थविवक्षा नाङ्गीकृतेति तद्वद्धर्मपरभागो ऽप्यविवक्षितार्थो ऽस्त्विति शङ्कानिरासोपयोगात् । एवमध्ययनानन्तर्यमपि कृत्स्नवेदस्याध्ययनानन्तर्यरूपमङ्गीकर्तव्यम् । अध्ययनविधेरेकदेशाध्ययनानुष्ठापनेन पर्यवसानाभावादिति दृष्टान्तमुखेन सिध्येदित्यलं विस्तरेण ।

२६ । २३ **अर्थतः प्राधान्यादिति ।** प्रत्ययार्थः प्रधानमिति सामान्यन्यायादिच्छेष्यमाणसमभिव्याहृताविष्यमाणं प्रधानमिति स्वर्गकामपदादिषु क्लृप्तो विशेषन्यायो बलवानिति भावः । **साक्षात्कारोपयोगमिति ।** ब्रह्मोपासनाकाले ऽपि तदङ्गतया कर्माण्यनुष्ठेयानीति समुच्चयवादी तदनुष्ठानापेक्षितकर्मावबोधानन्तर्यमथशब्दार्थमिच्छति । अतस्तस्य तादर्थ्यसिद्ध्यर्थं कर्मणामुपासनाङ्गत्वमुपपादयितुं तेषामुपासनाजन्यसाक्षात्कारोपयोगमाहेत्यर्थः । **असिद्ध इत्याहेति ।** शङ्कावादीति शेषः । **प्रमाणत्वप्रसिद्ध्यभावादिति ।** यद्यपि प्रमाणत्वाभावे ऽप्यसम्भवादिमूलकल्मषनिर्हरणद्वारा योग्यतावधारणे तज्जन्यमहावाक्यार्थज्ञाने वा प्रमाणसहकारित्वेन कारणत्वमुपपद्यते अन्यथा वक्ष्यमाणस्य कर्मणां साक्षात्कारोपयोगस्यापि निर्वोढुमशक्यत्वात् तथापि विविदिषन्तीत्यत्र फलरूपवेदनमानन्दसाक्षात्कारतया मुख्यपुरुषार्थरूपमेव ग्राह्यं मुख्यसम्भवे गौणग्रहणस्यान्याय्यत्वादिति तात्पर्यम् । **संस्कारद्वारेति ।** यद्यपि कल्मषनिबर्हणमृणत्रयापाकरणमिति संस्कारपक्षाद्भिन्नमपि पक्षद्वयमुक्तं तथापि तदपि पक्षद्वयं सामान्यतः संस्कारपक्ष एवानुप्रविशति प्रयमाधानवत्कल्मषनिबर्हणादेरपि संस्कारत्वाऽविशेषादिति तात्पर्यम् ।

२७ । ८ **किं काम्यैव खादिरता नित्ये ऽपि स्यादिति** सिद्धान्तकोटिः पूर्वपक्षाद्विशेषसिद्धये । काम्यैवेत्यवधारणम् । अन्यथा यदा क्व चित्प्रयोगे वीर्यकामनया काम्या खादिरतोपादीयते तदा तया पशुनियोजनरूपस्य नित्योपकारस्यापि प्रसङ्गात्* सिद्धेः काम्यं† क्व चिन्नित्ये ऽपि भवतीत्यस्मिन्नर्थे पूर्वपक्षिणो ऽपि सम्प्रतिपत्त्या ततः सिद्धान्तकोटेर्विशेषो

* प्रसङ्गादिति १–३ पुस्तकयोर्नास्ति । † काम्या इति २ पु॰ ।

न सिध्येत् । किं केवलकाम्यैव खादिरतेत्यङ्गीकृत्य सा सर्वत्र नित्ये ऽपि स्यादित्युच्यते अथ वा यथा खादिरता वीर्यकामवाक्येन फलार्थतया काम्या एवं खादिरे पशुमिति वाक्येन क्रत्वर्थतया नित्या ऽपीत्यभ्युपेत्येति विकल्प्याद्यं* नित्यानित्यसंयोगविरोधेन निराकृत्य द्वितीयमाशङ्कते **यत्त्विति** । सिद्धरूपः खदिरतरुरननुष्ठीयमानो वीर्यफलाय न प्रभवेदिति तस्य पशुबन्धनयुक्तयूपरूपाश्रयानुरागेण साध्यतोपपादनीया । यद्यपि यूपप्रातिपदिकार्थो ऽपि सिद्धरूपः तथापि पशुबन्धनक्रियायुक्तत्वाकारेण भवति खदिरतरोरपि तदनुरागे सति साध्यता । एवं च खदिरस्य फलसंबन्धं बोधयद् वीर्यकामवाक्यं तस्याश्रयसंबन्धमपि बोधयितुं न शक्नोति वाक्यभेदप्रसङ्गादित्याश्रयसंबन्धस्यान्यतः प्राप्त्यपेक्षायामपेक्षितसमर्पणेन फलवाक्यान्वयि खादिरे पशुमिति वाक्यं न खदिरस्य क्रत्वर्थतामपि बोधयितुं शक्नोतीति न ततः क्रत्वर्थत्वसिद्धिरित्यर्थः । न च यथा ऽपः प्रणयन्तीत्यस्य संनिधाने गोदोहनेन पशुकामस्येति फलार्थं विधीयमानस्य सिद्धरूपस्य गोदोहनस्यापां प्रणयनं संनिधानादाश्रयो भवति एवमिहापि संनिधानादेव यूप आश्रयो लभ्यतइति वाच्यम् । अपां हि गार्हपत्यदेशे ग्राह्याणामाहवनीयदेशं प्रति नयनरूपं यत् प्रकृष्टनयनं प्रणयनशब्दवाच्यं तस्य गोदोहपात्रस्य चाधाराधेयभावो लोकसिद्ध इति युक्तस्तत्र योग्यतया संनिहितस्याश्रयत्वलाभः । इह त्वतीन्द्रियातिशयविशेषविशिष्टस्य यूपस्याहवनीयवदलौकिकत्वात् तं प्रति न लोकसिद्धः खदिरस्य प्रकृतिभाव इति खादिरे पशुमिति वाक्येनैव तस्याश्रयसंबन्धो बोधनीय इति भावः । अत्र खादिरे पशुमित्यस्य नित्यवाक्यत्वं सिद्धान्त्यभिमतमनूदितम् । पूर्वपक्षे फलवाक्यैकवाक्यतापन्नस्य तस्य नित्यवाक्यत्वाभावात् ।

एकस्य खादिरत्वस्येत्यादिना एकस्योभयात्मकत्वे नित्यानित्यसंयोगविरोधो नास्ति विनियोजकप्रमाणभेदादिति सिद्धान्तयुक्तिरेकस्य तूभयत्वा† इति सूत्रारूढा दर्शिता । **संनिधानादेवेति** । यूपशब्दार्थस्यालौकिकत्वे ऽपि यस्मिन्नष्टाश्रित्वाद्याकृतिविशिष्टे काष्ठविशेषे यूपशब्दो वर्त्तते तस्य खदिरतरोश्च प्रकृतिविकृतिभावो लोकसिद्ध इति तावतैव संनिधानात् पशुबन्धनार्थो २१ । १२

* विकल्पाद्यमिति १-२-३ पुस्तकेषु ।

† जै॰ सू॰ अ॰ ४ पा॰ ३ सू॰ ५ ।

२७ । २४ यूप आश्रयत्वेनान्वेतुं योग्य इति भावः । **शेषलक्षणादिति** । शेषलक्षणं तृतीयाध्यायः । तत आरभ्य चतुर्भिरध्यायैः शेषत्वप्रयुक्तिकर्माधिकारनिरूपणार्थैरुपदेशविचारः । सप्तमाद्यैश्चतुर्भिः सामान्यातिदेशविशेषातिदेशोहबाधनिरूपणार्थैरतिदेशविचारः । एकादशद्वादशाभ्यामुपदेशातिदेशसाधारणतन्त्रप्रसङ्गविचारः । **चातुर्थिकेति** । यद् येन प्रयुज्यते अनुष्ठाप्यते तत्तेन सहितमुपकार्योपकारकभावरूपसंबन्धवद्भवति । अनुपकार्येणानुपकारकस्याननुष्ठापनादिति साहित्योक्त्या चातुर्थिकप्रयुक्तिसंग्रहः । **संस्कारकर्मत्वेति** । संस्कारकर्मणस्तानि द्रैधाधिकरण*निरूपितगुणकर्मविशेषत्वे ऽपि दृष्टप्रयोजनाभावेन त्रिविधगुणकर्मवैषम्यात् । धर्ममात्रे तु कर्म स्या†दित्यधिकरणान्तरविषयत्वाच्च पृथग् ग्रहणम् ।

,, । ३ **द्विरवत्तेति** । इदं भाष्यकारमतम् । यत्साक्षाद् द्व्यवदानसाधनको यागः पुरोडाशस्तत्प्रकृतितया यागसाधनमिति । आचार्यमते तु कृत्स्नः पुरोडाशो यागसाधनं द्विरवत्तस्याग्नौ प्रक्षेपरूपो होमस्तु हविष एकदेशद्वारा संस्कारकर्म । तथा च होमकाले कृत्स्नः पुरोडाशो देवतोद्देशेन मनसा त्यक्तव्यः । वचनबलादन्योद्देशेन त्यक्तैकदेशस्य स्विष्टकृति पुनर्देवतान्तरोद्देशेन त्याग इत्येवं विशेषः । **जडं स्यादिति** । दृग्भिन्नस्य प्रकाशमानत्वं दृगध्यस्ततया‡ तदभेदेनोपपादनीयमिति प्राक् प्रसाधितत्वादध्यस्तस्य च जडत्वनियमादिति भावः । ननु टीकोक्तप्रामाण्याऽयोगयुक्तिरयुक्ता । इन्द्रियशब्दादिप्रमाकरणजन्यत्वेन§ प्रामाण्योपपत्तेरित्याशङ्क्य तामुपपादयति **तच्चेन्द्रियाद्यगोचर इति** । न चक्षुषा गृह्यते यन्मनसा न मनुत इत्यादिश्रुतेरिति भावः । **तथाविधमिति** । दिङ्मोहे ऽपि पुरुषविशेषस्यापरिशीलितप्रदेशविशेषप्राप्तिरुपाधिः । शाब्दापरोक्षशङ्कामुपस्कुर्वन्नवतारयति

२८ । २० **अपरोक्षे ब्रह्मणीति** । अयमर्थः । अभिव्यक्तचैतन्याभिन्नत्वमर्थस्यापरोक्ष्यं तत्तु नित्याभिव्यक्तजीवचैतन्याभिन्ने ब्रह्मणि स्वाभाविकम् । अत एव यत्साक्षादपरोक्षाद् ब्रह्मेति श्रुतिः । घटादीनामपरोक्षचैतन्याभेदाध्यासोपाधिकं तदेव प्रत्यक्षोऽयं घटः प्रत्यक्षं घटं पश्यामीत्यादिव्याहारालम्बनं चा-

---

* जै॰ सू॰ अ॰ २ पा॰ १ सू॰ ६–८ ।
† जै॰ सू॰ अ॰ २ पा॰ १ सू॰ ९ ।
‡ दृगध्यस्ततयेति २ पु॰ पा॰ ।
§ कारणजन्यत्वेनेति २ पु॰ ।

नस्यापरोक्ष्यमपरोक्षार्थव्यवहारानुकूलज्ञानत्वं तत्त्वस्य सुखादेश्च प्रकाशरूपे नित्याभिव्यक्तसाक्षिचैतन्ये (चाक्षुषादिवृत्त्यभिव्यक्तचैतन्ये)* वा ऽनुगतं स्वाभाविकं चाक्षुषादिवृत्तिषु तत्तदभिव्यक्तचैतन्याऽभेदाध्यासोपाधिकं न तु जातिरूपम् इन्द्रियजन्यत्वाद्युपाधिरूपं वा ज्ञानानामापरोक्ष्यम् । अपरोक्षज्ञानविषयत्वमर्थापरोक्ष्यमिति युक्तम् । तत्तांशविषयप्रत्यभिज्ञायां तत्तांशे चातिप्रसक्तेः साक्ष्यव्यापनाच्च । एवं च तत्त्वमस्यादिशब्दजन्यम् अपरोक्षजीवाभिन्नब्रह्मज्ञानमपरोक्षमेव भवति । न चैवं सत्यनुमितेरप्यपरोक्षपर्वतादावापरोक्ष्यं स्यादिति वाच्यम् । इष्टापत्तेरिति ।

शब्द एव इत्येवकारेण प्रथमं श्रवणजन्ये ब्रह्मज्ञाने क्लृप्तकरणभावस्य २८ । २०
शब्दस्यैवाविद्यानिवर्तके चरमसाक्षात्कारे ऽपि करणत्वोपपत्तेर्न तत्र करणान्तरं कल्पनीयमिति सूचितम् । नन्वपरोक्षजीवाभेदतः श्रुतेश्चापरोक्षे ऽपि ब्रह्मणि परोक्षत्वावगाहि ज्ञानं लोकसिद्धमनुभूयते । अत एव निरतिशयानन्दरूपं ब्रह्म ममापरोक्षं न प्रकाशतइति व्यवहारः । एवं श्रुतितो ऽपि ब्रह्मणि परोक्षत्वावगाहि परोक्षमेव ज्ञानं भवेदित्याशङ्क्याह **अन्यथेति** । लोकत इव श्रुतितो नापरोक्षे ब्रह्मणि परोक्षत्वावगाहि भ्रमरूपं ज्ञानं युक्तमिति भावः । **स्वतो ऽपरोक्षस्यापीति** । यदि ब्रह्म स्वतो ऽपरोक्षमिति तद्विषयशब्दजन्यमपि ज्ञानमपरोक्षं भवेत् तदा श्रवणजन्यज्ञानमप्यपरोक्षमिति श्रुतवेदान्तस्य पुंसः तस्मिन् पारोक्ष्यभ्रमानुवृत्तिर्न स्यात् । अनुवर्तते च तदनन्तरमपि भ्रमगृहीतं ब्रह्मणि पारोक्ष्यमिति न शब्दादपरोक्षज्ञानम् । तस्मादपरोक्षज्ञानजननसमर्थादन्यत एव तदेष्टव्यम् । क्लृप्तं चान्तःकरणस्य तत्सामर्थ्यं ब्राह्मलौकिकभोगानुभवे मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके मनो ऽस्य दैवं चक्षुरिति श्रुतेः । विशिष्य चाहंवृत्तिरूपे स्वात्मज्ञाने ऽपि तस्य करणत्वं क्लृप्तम् । चरमसाक्षात्कारस्य शब्दजन्यत्वाभ्युपगमे ऽपि तस्य व्यापारो ऽवश्यमपेक्षणीयः । तस्मादावश्यकेनान्तःकरणेनैव तदुत्पत्त्युपपत्तौ तदर्थे तत्त्वमस्यादिवाक्यस्य तत्काले ऽपि पुनरनुसन्धानकल्पनएव गौरवमिति भावः । ननु तर्हि तत्त्वमस्यादिवाक्यश्रवणनिरपेक्ष-
मेवान्तःकरणं ब्रह्मात्मैक्यमपरोक्षयेद् इत्यत्राह **तत्तु शब्दजनितेति** । ,, । २४

* ( ) एतदन्तर्गतो ग्रन्थः २ पु॰ नास्ति ।

उक्तं च गीताविवरणे भाष्यकारैः । शास्त्राचार्य्योपदेशशमदमादिसंस्कृतं
मन आत्मदर्शने करणमिति ।

नन्वपरोक्षब्रह्मविषयस्य शब्दस्यापरोक्षप्रमाहेतुत्वं न शक्यं प्रत्या-
ख्यातुम् । श्रवणजन्यापरोक्षज्ञाने सत्यपि पारोक्ष्यभ्रमानुवृत्तिस्त्वसम्भावना-
२९ । १ दिदोषप्रतिबद्धस्य* भ्रमनिवर्तनकार्याक्षमतया भवेदित्याशङ्क्याह शब्द-
स्त्विति । अभिव्यक्तचैतन्याऽभिन्नत्वमर्थापरोक्ष्यमिति तावन्न युक्तम् ।
स्वरूपसदभेदमात्रविवक्षायां चाक्षुषवृत्त्यभिव्यक्तपर्वतावच्छिन्नचैतन्येन व्यव-
हितवह्न्यवच्छिन्नचैतन्यस्य तेन व्यवहितवह्नेश्च स्वाभाविकाध्यासिकाभे-
दसत्त्वेन व्यवहितवह्नेरप्यपरोक्षत्वापत्तेः । निरस्तभेदोपाधिकाभेदविवक्षायां
चरमसाक्षात्कारनिवर्त्याविद्योपाधेः चरमसाक्षात्कारोत्पत्तिदशायामपि सत्त्वेन
ब्रह्मणस्तदानीमापरोक्ष्याभावापत्तेः । स्फुरदभेदविवक्षायां तादात्म्याध्यास-
विषये दुःखशोकादौ तदानीं सद्रूपब्रह्माभेदास्फुरणादापरोक्ष्याभावापत्तेः ।
स्वव्यवहारानुकूलं यदभिव्यक्तचैतन्यं तदभेदविवक्षायामनुमेयवह्न्यादिव्य-
वहारानुकूलेन जीवचैतन्येन प्रागुक्तरीत्यैवाऽभिन्नस्य वह्न्यादेरापरोक्ष्यापा-
तात् । स्वव्यवहारानुकूलो यो ऽभिव्यक्तचैतन्याभेदस्तद्वत्त्वविवक्षायां तत्त-
दाकारधीवृत्तिसमुल्लासमात्रादपि भवति व्यवहारे चैतन्याभेदस्यानपे-
क्षितत्वेनासम्भवापत्तेः । स्वावरणनिवृत्त्यनुकूले चैतन्याभेदवत्त्वविवक्षायामा-
वरणनिवर्तकत्वग्रहणाधीनमापरोक्ष्यग्रहणम् आपरोक्ष्यग्रहणाधीनमावरणनि-
वर्तकत्वग्रहणमिति परस्पराश्रयापत्तेः । एवमुक्तरूपार्थापरोक्ष्यनिर्वचना-
ऽयोगात् तदपेक्षमपरोक्षार्थव्यवहारानुकूलज्ञानत्वं ज्ञानापरोक्ष्यमिति निर्व-
चनमप्ययुक्तम् । तस्मात् स्वाविषयविषयकज्ञानाऽजन्यज्ञानत्वं ज्ञानापरो-
क्ष्यमिति निर्वक्तव्यम् । तच्चाक्षुषादिवृत्त्यभिव्यक्तचैतन्येषु नित्याभिव्यक्त-
साक्षिचैतन्येषु चानुगतम् अनुमितिशाब्दज्ञानादिभ्यश्च तत्तदविषयलिङ्ग-
शब्दादिज्ञानजन्येभ्यो व्यावृत्तम् । न च विशिष्टज्ञानं विशेषणज्ञानज-
न्यमित्यभ्युपगमे दण्डकुण्डलोभयस्मृतिजन्यदण्डिप्रत्यक्षाव्याप्तिः । वस्तु-
गत्या यः स्वाविषयः तद्विषयत्वं यस्य ज्ञानस्य जनकतायामवच्छेदक-
कोटिप्रविष्टं तदजन्यत्वस्य विवक्षितत्वात् । उक्तस्मृतेर्दण्डिप्रत्यक्षे तदवि-

* प्रतिबद्धस्य ब्रह्मेति २ पु. पा. ।

षयकुण्डलविषयत्वेनाजनकतया तत्रापि लक्षणसत्त्वात् । यदीश्वरज्ञानमुपादानगोचरज्ञानतया बहु स्यां प्रजायेयेतिवदिदं ज्ञानमस्य स्यादिति संकल्परूपतया वा कारणमिष्यते तदा तज्जन्येषूक्तज्ञानेष्वव्याप्तिवारणाय समानाधिकरणत्वं ज्ञाने विशेषणं देयम् । न च कोलाहले बुभुत्सितशब्दग्रहो बुभुत्साजन्यस्तन्मूलबोधेष्टसाधनताज्ञानेनापि जन्य इति तत्राव्याप्तिः । बुभुत्सया ऽन्यथासिद्धस्य तस्य शब्दग्रहे कारणत्वा*भावाद् बुभुत्सयेतरशब्द†ग्रहप्रतिबन्धे सति क्लृप्तकारणादेव बुभुत्सितशब्दग्रह इति तत्र बुभुत्साया अप्यकारणत्वाच्च । न च व्याप्तिज्ञानत्वावच्छिन्नं सर्वमनुमितिजनकं व्याप्तिज्ञानत्वादित्यनुमितावतिव्याप्तिः । तत्रानुमितेः सामान्यतः सर्वव्याप्तिविषयायाः स्वकारणज्ञानविषयव्याप्तिविषयत्वसत्त्वे ऽपि स्वकारणव्याप्तिज्ञानवत् प्रकृतहेतुसाध्यविशेषोपरक्ततया तद्विषयत्वाभावेन तस्याः स्वाविषयविषयकज्ञानजन्यत्वात् । न चैवमपि हेतुतावच्छेदकसाध्यतावच्छेदकविशेषावच्छिन्नहेतुसाध्योपरक्तव्याप्तिज्ञानत्वावच्छिन्नसर्वपक्षीकरणे सत्युक्तानुमितावतिव्याप्तिः । सामान्यधर्ममात्राऽनवच्छिन्नतया यः स्वविषयो न भवति तद्विषयत्वस्य विवक्षितत्वात् । तस्यामनुमितौ हेतुतावच्छेदकसाध्यतावच्छेदकयोः सामान्यधर्ममात्रावच्छिन्नत्वेन विषयतया सामान्यधर्ममात्रानवच्छिन्नतया तदविषयत्वस्य सत्त्वात् । न चानुपलब्धिप्रमाणजन्याभावज्ञाने ऽतिव्याप्तिः । योग्यानुपलब्धेः प्रमाणत्वात् । योग्यतायाश्च यद्यत्राधिकरणे प्रतियोग्यभविष्यत् तदा भूतलमिवाद्रक्ष्यतेति तर्करूपत्वेनानुपलब्धिज्ञानस्य स्वाविषयविषयकतर्करूपज्ञानजन्यत्वात् स्मृतौ स्वसमानविषयपूर्वानुभवसंस्कारजन्यायामतिव्याप्तिवारणार्थमयिमज्ञानपदमनुभवपरं बोध्यम् । एवं च प्रत्यभिज्ञायास्तत्तांशे ऽपि नातिव्याप्तिः । तस्यास्तदंशे स्मृतित्वाङ्गीकारात् । एवमपरोक्षज्ञानलक्षणव्यवस्थितौ तज्जन्यव्यवहारयोग्यत्वमर्थापरोक्ष्यमिति तन्निर्वचनं द्रष्टव्यम् । एवं च शब्दप्रमा‡ स्वाविषयविषयकज्ञानजन्या परोक्षप्रमामेव जनयतीति परोक्ष§प्रमाहेतुरिति भावः ।

ननु दशमस्त्वमसीत्यादौ शब्दस्याप्यपरोक्षज्ञानजनकत्वं सिद्धमस्ती-

---

* शब्दग्रहकारणत्वेति ५ पु· पा· । † बुभुत्सया तारशब्देति १–३ पु· ।
‡ प्रमाणमिति ५ पु· पा· । § नापरोक्षेति २ पु· ।

। २ त्याशङ्क्याह **दशम इति** । एवमनुमितेरपि पर्वताद्यंशे नापरोक्ष्यं तथा-
परोक्षभ्रमस्तु तदानीन्तनाऽपरोक्षज्ञानभेदाग्रहादिति द्रष्टव्यम् । **अन्धादे-
स्त्विति** । अभ्युपेत्यायं परिहारः । दशमो ऽहमस्मीत्यपरोक्षज्ञानम् अन्तः
करणे न सम्भवति शरीरविषयं चेत् स्पर्शनेन्द्रियेण वा ज्ञानान्तरोपनयसहि-
तान्तःकरणेन वा संभवति । ननु भावनाजन्यसाक्षात्कारः कामिनीसाक्षा-
त्कारवद् भ्रमः स्याद् न चान्तःकरणसाहित्येन विशेषः तथापि तत्सत्त्वा-
दित्यत आह **अपि चेति** । ननु ब्रह्मसाक्षात्कारस्य मनःकरणकत्वाभ्यु-
पगमो यन्मनसा न मनुतइति श्रुतिविरुद्ध इत्यत आह **दृश्यतइति** । प्रागु-
पन्यस्तन्यायोपबृंहितायां दृश्यतइति श्रुतावग्र्यया सूक्ष्मयेति विशेषणाद्यन्म-
नसेति श्रुतिरनवहितमनोविषया यथा तं त्वौपनिषदमिति श्रुतावौपनिषद-
मिति विशेषणाद्यद्वाचा ऽनभ्युदितमिति श्रुतिर्विशिष्टशक्तिकशब्दविषयेति
भावः । **साक्षादपरोक्षादिति** । यथा प्रत्यक्षस्पर्शाश्रयत्वादिलिङ्गजन्या
वायोः प्रत्यक्षत्वानुमितिः स्वयं प्रत्यक्षत्वरहितेत्येतावदेव न तु वायोः
प्रत्यक्षत्वाभावमवगाहतइति न भ्रमत्वं प्रतिपद्यते एवमिहापि योजनीयम् ।
। ११ **स्वरूपप्रकाशस्येति** । आविर्भावयतीत्यन्तेन ग्रन्थेन जीवस्व-
रूपप्रकाशस्य ब्रह्माभेदसाक्षात्कारेण तदभेदतिरोधायकाविद्यानिवृत्तिरूपा-
भिव्यक्तिसंस्कारमुपपाद्याभिव्यञ्जकस्य तस्य साक्षात्कारस्य न चासावनु-
त्पादितब्रह्मानुभवेति टीकया* प्रागुपक्षिप्तामुत्पाद्यतामन्तःकरणवृत्तिरूप-
त्वप्रदर्शनेनोपपादयतीत्यर्थः । असमुच्चयमते कर्मोपासनयोः कालैक्येन समु-
च्चयो नास्तीति । **सिद्धान्ते परिहारसाम्यमाहेति** । वृत्तिविषयत्वं
स्वप्रकाशत्वं च विरुद्धमित्याशङ्कायामुपहितानुपहितरूपभेदेन समाधानं मत-
द्वये ऽपि समानं दर्शयतीत्यर्थः । नन्वेवं सत्यविद्योपहितो जीवः कथं
स्वप्रकाशः स्यादिति चेत् । उच्यते । उपहितमुपधानकाले स्वरूपेणापि
न स्वप्रकाशमिति नार्थः किं तूपहितरूपेण न स्वप्रकाशमिति अतो न
दोषः । ननु निरुपाधि ब्रह्मेति उपहितं वृत्तिविषय इति न युक्तं ब्रह्म शुद्धं
निरुपाधिकमिति हि वृत्तिरूपसाक्षात्कारस्याकार इष्यते । न चोपाधौ विद्य-
माने तदाकारः सम्भवितुमर्हतीति† शङ्कार्थः ।

---

* टीकायामिति २ पु. । † संभवतीति २ पु. पा.

मिथ्याभूतेषूपाधिषु विद्यमानेष्वपि न वास्तवनिरुपाधिकत्वाकारसा-
क्षात्कारोदयो निरुध्यतइति समाधानाभिप्रायमाह **निरुपाधीति** । ननु २९ ।
मिथ्याभूतानां तेषामुपाधीनां केन निवृत्ति: साक्षात्कारेणेति चेत् तस्य केन
निवृत्तिरित्याकाङ्क्षायामाह **स्वस्वेतरेति** । अनेन चरमवृत्त्युदयकाले उपा-
ध्यन्तराण्यपि सन्त्येव । टीकायां वृत्तेरेवोपाधित्ववर्णनम् अन्ततो वृत्तिमा-
त्रमस्तीत्यभ्युपेत्यवाद इति सूचितम् । ननूपाधीनां निवृत्तावनुपहितमेव
साक्षात्कारविषय इति स्यादित्याशङ्क्य साक्षात्कारदशायां विनश्यदव-
स्थतामात्रं न तु विनाशोदय इत्याह **ततः स्वसत्तायामिति** । वृत्त्यु-
पहितं वृत्त्या विशिष्टं तदुपलक्षितं वा । आद्यं दूषयित्वा द्वितीयं दूष-
यति **उपलक्षितस्य त्विति** । अविद्यमानेना*प्युपलक्षितत्वं भवति यथो-
ड्डीय गतेनापि काकेन गृहस्य वृत्त्या तु विद्यमानयैवोपहितता विषय-
ताघटनार्थमिष्यते अत: प्रसिद्धोपलक्षणवैलक्षण्याद् न वृत्तरुपलक्षणमिति
विद्यमानव्यावर्तकत्वनियमाद् विशेषणमेव वाच्या अत: पूर्वोक्तदोष-
द्वयं प्रादु:ष्यादिति भाव: । **वृत्त्युपरागोत्रेति** । नन्वत्र विशेषणोप- ,, । ३०
लक्षणपक्षयो: कं पक्षं परिगृह्य परिहारो वर्ण्यते । उच्यते । सत्तयोप-
युज्यते इत्यविद्यमानव्यावर्तकत्वनिषेधान्नोपलक्षणं न प्रतिभास्यतयेति का-
र्यान्वयनिषेधान्न विशेषणं किं तु कार्यानन्वयो ऽसत्त्वनियत† उपाधि-
र्विशेषणोपलक्षणाभ्याम् अन्यस्तृतीय: प्रकार इति वाक्यान्वयाधिकरणे‡
वक्ष्यमाणं तृतीयं प्रकारं परिगृह्य परिहार: । **विषयविषयित्वलक्षण:**
विषयविषयित्वोपाधिकस्तत्प्रयोज्य इति यावत् । एवं हि इतरेतराश्रय इति
घटते । लक्षणशब्दस्य स्वरूपवाचित्वे तु विषयविषयिभाव एव तत्प्रयोजक
उक्त इत्यात्माश्रय एव भवेत् । **चैतन्यप्रतिबिम्बितत्वमिति** । प्रति-
बिम्बितचैतन्यकत्वमित्यर्थ: । आहिताग्न्यादेराकृतिगणत्वान्निष्ठान्तस्य पूर्व-
निपाताऽनियम: । सञ्जातचैतन्यप्रतिबिम्बत्वमिति वा ऽर्थ: । तारकादेराकृति-
गणत्वात् तारकितं नभ इतिवदितच्प्रत्यय: । तया च चैतन्यवृत्त्यो:
प्रतिबिम्बतदुपाधित्वलक्षणसंबन्धो न विषयविषयिभावप्रयोज्य: स्वयमेव तु

* अविद्यमाने इति २ पु· पा· । † संबन्धनियत इति २ पु· पा· ।
‡ व्या· सू· अ· १ पा· ४ सू· १९ ।

३० । २ तत्प्रयोजक इति नान्योन्याश्रय इत्यर्थः । **भ्रमत्वमिति ।** संसारदशायामप्रकाशमानं ब्रह्म परोक्षमिति तचापरोक्ष्यावगाहितया भ्रमत्वमभिप्रेतम् । **वेदान्तजज्ञानेन** वेदान्तजन्यज्ञानमूलभावनापरिपाकसहितान्तःकरणजन्यज्ञानेनेत्यर्थः । **तत्तद्रूपेण** षड्जत्वादिरूपेण । यद्यपि गान्धर्वशास्त्राभ्यासरहितैरपि सूक्ष्ममतिभिः श्रूयमाणाः स्वराः किं चित् परस्परवैलक्षण्येनानुभूयन्ते तदेव षड्जत्वादिकमिति तैस्तदवगम्यत एव । षड्जादिशब्दविशेषवाच्यत्वं परं न ज्ञायते तथापि ये स्थूलमतयः स्वरानाकर्णयन्तोऽपि समवर्णपरिमाणान् केशादीनिव परस्परविविक्ततयाऽवगन्तुं न प्रभवन्ति तेषामपि गान्धर्वशास्त्रपरिचये सति क्रमेण विविक्तोल्लेखो दृश्यते स इहोदाहरणम् ।

,, । १५ **निषादेति ।** वीणादिषु प्रथमश्रूयमाणश्रुत्याख्यशब्दावयवाऽनुरणनात्मका घण्टानादानुरणनसदृशाः स्वराः सप्त । तेषां स्वराणां समुदायाः षड्जमध्यमगान्धारस्वरप्रभवा नन्द्यावर्तजीमूतसुभद्राख्यास्त्रिविधा ग्रामास्तेषु ग्रामेषु क्रमेण स्वराणामारोहाऽवरोहाभ्यां निवेशाः प्रतिग्रामं सप्तधा भिन्ना एकविंशतिमूर्च्छनाः । तदुक्तम्* ।

प्रथमश्रवणात् शब्दः श्रूयते ह्रस्वमात्रकः ।
सा श्रुतिः सम्परिज्ञेया स्वरावयवलक्षणा ॥
श्रुत्यनन्तरभावी यः शब्दो ऽनुरणनात्मकः ।
स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते ॥
श्रुतिभ्यः स्युः स्वराः षड्जर्षभा गान्धारमध्यमाः ।
पञ्चमो धैवतश्चापि† निषाद इति सप्तमः ॥
यथा कुटुम्बिनः सर्वे ऽप्येकीभूता भवन्ति हि ।
तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते ॥
षड्जग्रामो भवेदादौ मध्यमग्राम एव च ।
गान्धारग्राम इत्येतद्ग्रामत्रयमुदाहृतम् ॥

---

* एते श्लोकाः तदुक्तं रत्नाकरे इत्युक्त्वा रणद्भिराघट्टनयेति माघ १ सर्गदशमश्लोकव्याख्यावसरे मल्लिनाथेन प्रदर्शिता इति रत्नाकरनामकग्रन्थादुद्धृता इति स्फुटम् ।

† धैवतश्चाथेति ५ पु० पा० ।

नन्द्यावर्तो ऽथ जीमूतः सुभद्रो ग्रामकास्त्रयः ।
षड्जमध्यमगान्धारास्त्रयाणां जन्महेतवः ॥
क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् ।
मूर्च्छनेत्युच्यते ग्रामस्था एताः सप्तसप्त च ॥ इति ।

क्यषन्तस्य रूपमिति । लोहितादेराकृतिगणत्वादिति भावः । ३० । २ः

ननु क्यषन्तत्वे विद्वदाभास इत्यर्थो न लभ्यते यथा पूर्वमलोहितः पश्चाल्लोहितो भवन् लोहितायमानः एवं पूर्वमविद्वान् पश्चाद्विद्वान् भवन् विद्वस्यमान इत्येतदर्थो लभ्यते । अभूततद्भावे क्यषो विधानात् । विद्वदाभास इत्यर्थस्तु क्यङन्तत्वे लभ्यते कर्तुः क्यङ् सलोपश्चेति सूत्रेण हि उपमानात् कर्तुस्तद्वदाचरतीत्यर्थे क्यङ्प्रत्ययो विहितः श्येनायते काक इत्यादि च तदुदाहरणं लिखितं तथेह क्यङन्तत्वे विद्वानिवाचरन्नविद्वान् विद्वस्यमान इत्यस्य सो ऽर्थो लभ्यते । न चौजसो ऽप्सरसो नित्यं पयसस्तु विभाषयेति वृत्तावुक्तत्वाद् ओजोप्सरःपयोव्यतिरिक्तेभ्यः सकारान्तेभ्यः क्यङ् न भवतीति शङ्कनीयम् । तेभ्यः सलोपो न भवतीत्येव ततः सिद्धा क्यङभावाप्रसक्तेर्वार्तिककृता सलोपो वेति सामान्यतः सलोपस्य विकल्पितत्वमुक्त्वा ओजसो ऽप्सरसो नित्यमिति सकारान्तविशेषयोस्तन्नित्यत्वस्योक्ततया तदनुसारेण तत्र पयोग्रहणस्य ओजोप्सरोव्यतिरिक्तसकलसकारान्तोपलक्षणतया वक्तव्यत्वाच्चेति चेदुच्यते । क्रियाकर्त्रादिस्वरूपविभागं च विद्वस्यमानः इह विद्वानभिमत इति टीकावाक्ये ऽस्मिन् विद्वस्यमान इत्यस्य क्यङ्प्रत्ययान्तता न सम्भवति विद्वानिवाचरन्नित्युपमेयगतसादृश्योपसर्जनस्य प्रकृत्यर्थस्य विदुषः क्रियाकर्त्रादिस्वरूपविभागमिति निर्दिष्टकर्मसापेक्षत्वेनासामर्थ्यात् सविशेषणानां वृत्तिर्नेति महाभाष्यवचनात् । अत एव महान्तं पुत्रमिच्छतीति वाक्यस्यार्थे महान्तं पुत्रीयतीति न वृत्तिः । ननु क्यषन्तत्वे ऽपि विद्वदाभास इत्यर्थालाभ उक्तः । नैष दोषः । शास्त्रसिद्धेन मिथ्यात्वेन क्रियाकर्त्रादिविभागमविद्वानेव सन् यः कर्मानुष्ठानोपयोगिनं तं सत्यत्वेन वेत्ति स विद्वस्यमान इत्युक्त्या विद्वदाभास इत्यर्थलाभात् । एवमेव ह्युक्तमाचार्य्यैरविद्वानेव विद्वान् भवन्नित्यनेन । न ह्येकेनैव रूपेण क्वचिदर्थे कस्य चित्समानकाले विद्याऽविद्ये सम्भवतः । अतो ऽस्य वाक्यस्य

रूपभेदाभिप्रायत्वसिद्धौ सत्यत्वमिथ्यात्वे एव विद्याविद्याऽविषयरूपे पर्य्यवस्यतः । विद्वदाभास इत्यर्थ इति वाक्यशेषात् क्रियाकर्त्रादिविभागे सत्यत्वबुद्धेरेव कर्मानुष्ठानोपयोगित्वाच्च तस्याश्चाभूततद्भावः कादाचित्कत्वेन प्रागभूततयोपपादनीयः । न चालोहितो लोहितो भवतीत्यत्रैव अभूततद्भावे सर्वत्र उपात्तपूर्वावस्थोपमर्दनियमः मृदं घटीकरोति तपनो लोहितायतीत्याद्युदाहरणे घटाद्यवस्थासु मृत्त्वाद्युपमर्दाभावात् । तस्मादविद्वानेव विद्वान् भवन्निति क्यषन्तस्य रूपमिति च युक्तमेव* । यदि तु लोहितादिसूत्रे भाष्यकारैर्नायं हलन्ताद्विधीयतइति हलन्तात् क्यषो ऽनङ्गीकृतत्वाद् इह न भवति क्यषित्यपरितोषः तदा विदेः कर्मणि नित्यापेक्षत्वाद् नित्यसापेक्षेषु चासामर्थ्ये ऽपि तत्र तत्र भूयसा समासादिवृत्तिदर्शनात् सुडनपुंसकस्येति सौत्राऽसमर्थसमासरूपज्ञापकाच्च विद्वस्यमानशब्द आचारक्यङन्त इत्येव समर्थनीयम् ।

३१ । १३ **नकारो ऽयं प्रतिषेधवाचीति ।** पर्युदासवाचित्वे समासनियमस्य वार्त्तिककारेणोक्तत्वादिह च नञः समासाभावात् प्रतिषेधवाच्येवायम् । ततश्च प्रतिषेध्यक्रियाया यत्तदोश्चाध्याहारेण यः श्रद्दधानो न भवति स नाधिक्रियतइति वाक्यं पूरणीयमित्याशयः । पर्युदासवाचित्वमपि शक्यमुपपादयितुम् । सूत्रकारपक्षे महाविभाषाधिकारेण तद्वाचित्वे ऽपि नञः समासनियमाभावात् । मीमांसकैर्यजतिषु येयजामहं करोति नानूयाजेष्वित्यस्यानूयाजव्यतिरिक्तेषु यज्ञेषु येयजामहं करोतीत्यर्थनिर्णयेन दीक्षितो न जुहोतीत्यस्याऽदीक्षितो जुहोतीत्यर्थनिर्णयेन च नञः समासाभावे ऽपि पर्युदासवृत्तित्वस्याङ्गीकृतत्वात् । वृत्तानुपूर्वं च न चातिदीर्घं इत्यादिमहाकविप्रयोगदर्शनाच्च । समासनियमे ऽपि गमिकर्मीकृतनैकनीवृतेतिवद् न समास इति कल्पनोपपत्तेश्च ।

३१ । १४ **अत एव ज्ञानानन्तरमिति ।** ननु सगुणज्ञानानन्तरं तदुपासनानिष्ठस्य कर्मानुष्ठानं सम्भवति फलभूयस्त्वार्थं सहकारित्वेन तदपेक्षितं च भवति । तथैव चाचार्यैरग्निहोत्रादि तु तत्कार्य्यायैव

---

* सूक्तमेवेति २ पु॰ ।

तद्दर्शनादित्यधिकरणे * वक्ष्यते सगुणतदुपासनात्फलविचारश्चात्रैव शास्त्रे महता प्रबन्धेन करिष्यते । तद्विचारसाध्यं च तदनुष्ठानमतः सगुणोपासना-सहकारिकर्मानुष्ठानापेक्षितः कर्मावबोध इति तदानन्तर्य्यमथशब्दार्थः कुतो न भवेत् । सगुणविचारस्यानुषङ्गिकत्वात् प्रधाननिर्गुणविचारापेक्षितानन्तर्य्यमेव वक्तव्यमिति चेत् तर्हि सगुणविद्याऽनुष्ठानं कस्यापि न सिद्ध्येत् । एतच्छास्त्रविचारमन्तरेण हि तदनुष्ठानं न सम्भवति । एतच्छास्त्रविचारे च ब्रह्मलोकप्राप्त्यन्तसकलफलविरक्तस्य त्यक्तसमस्तकर्मणो निर्विशेषप्रेप्सया तज्जिज्ञासोरेवाधिकार इष्यते । तस्माद्विरुद्धमिदमापतितमिति चेत् । उच्यते । सगुणविद्यापेक्षिणाम् अङ्गावबद्धोपासनापेक्षिणां केवलकर्म्मठानां च तदनुष्ठानप्रकाराद्यवगतिर्विचारितैतच्छास्त्रेभ्यो गुरुभ्यो † ऽन्वेषणीया गत्यन्तराभावात् । अभ्युपगम्यते हि कर्मविचारप्राचीनसन्ध्यावन्दनाध्ययननियमाद्यनुष्ठानार्थं निषादरथकारकर्तृकस्थपतीष्ट्याधानानुष्ठानार्थं च तत्तदवगतिः स्वयमविचारिततत्तद्वाक्यानामेव हितैषिवचनमात्रादिति ।

ननु श्रुतौ धनशब्दस्य देवलोकावाप्तिहेत्वपरविद्या वाच्येति कुतोऽवगत-
मित्याकाङ्क्षायामाह **तथा हि श्रुत्यन्तरमिति । प्रधानेन प्रत्ययार्थे-** ३१ । १७
नेति । विविदिषन्तीत्यत्र पञ्चमलकारकल्पनया विध्यवरुद्धायां यज्ञदानादिकरणान्वितायां भावनायां धात्वर्थस्य भाव्याकाङ्क्षापूरकत्वेनान्वये वक्तव्ये प्राधान्यादिच्छाया एव तथान्वयो न वेदनस्येति भावः । ननु यजेत दद्यात् जुहुयादित्यादौ सर्वत्र धात्वर्थस्य भावनायां करणत्वेनान्वयस्य दृष्टत्वादिहापि वेदनेच्छायास्तथैवान्वयो युक्तः । यज्ञादिषु तृतीयाश्रवणं तु सोमेन यजेतेत्यादिष्विव धात्वर्थविशेषणतया भविष्यति । न च सोमपयोदध्यादीनां यागहोमनिर्वर्तकतया क्रियाकारकभावो लोकसिद्ध इति युक्तस्तत्र विशेष्यविशेषणभावः । इह वेदनेच्छाया यज्ञादीनां च स न लोकसिद्ध इति न युक्तो विशेषणविशेष्यभाव इति वाच्यम् । देवताधिकरणे ‡ वक्ष्यमाणेन न्यायेनैतस्यैव रेवतीषु वारवन्तीयमिति वाक्ये रेवतीनां वारवन्तीयस्य चाधाराधेयभावस्येव यज्ञादीनां विविदिषायाश्च क्रियाकारक-

---

* व्या॰ सू॰ अ॰ ४ पा॰ १ सू॰ १६ ।   † गुरुभ्य इति नास्ति ४ पु॰ ।
‡ व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ २६–३२ ।

भावस्यापि समभिव्याहारादेव सिद्ध्युपपत्तेः । एवं च भाव्याकाङ्क्षायामिच्छाविषयभूतं वेदनमेव भाव्यत्वेनान्वेति । न च वेदनतदिच्छयोः कार्यकारणभावस्य लोके सिद्धत्वाद् विधिवैयर्थ्यं शङ्कनीयम् । प्रतिबन्धकपापापनोदनद्वारा यज्ञादिभिः सम्पन्नया स्थिरविविदिषया वेदनं भावयेदित्येतदर्थकतया विधिसार्थक्यादिति चेत् । उच्यते । भावनायाः प्रथमं भाव्याकाङ्क्षायां समानपदोपात्ता प्रधानभूता वेदनसाधनत्वेन निर्ज्ञातगौण*पुरुषार्थभावा विविदिषा भाव्यत्वेनान्वेतीति युक्तं यागादिस्तु समानपदोपात्तत्वे ऽपि स्वयं क्लेशात्मकत्वात् फलसाधनत्वेनान्यतो ऽनवगतत्वाच्च भाव्यत्वेनान्वेतुमयोग्य इति तमतिक्रम्य स्वर्गादेर्भाव्यत्वेन ग्रहणे सति तं केन भावयेदित्याकाङ्क्षायां फलशिरस्कभावनाकरणत्वेनान्वितो भवति । इह यदि भावनायां करणान्तरं श्रुतं न लभ्येत तदा विविदिषामेव करणं गृहीत्वा तत्साध्यं वेदनं फलं कल्पयेद् न त्वेतदस्ति । यज्ञादीनां तृतीयया करणत्वेन समर्पणात् । तेषां भावनाकरणत्वेनान्वये मत्वर्थलक्षणा च परिहृता भवति । अन्यथा तेषां करणविशेषणत्वे सोमवता यागेनेतिवद् यज्ञवत्या विविदिषयेत्यादिरूपेण यज्ञेनेत्यादिसर्वेषु तृतीयान्तेषु मत्वर्थलक्षणा प्रसज्येत । एवं क्लिष्टयोजनायामपि विविदिषा भाव्येति पक्षात् फलतो न विशेषः । दध्ना जुहोतीति दधिविशिष्टहोमविधेः प्राप्ताऽप्राप्तविवेकेन † होमसाधनतया दधिविधानइव स्थिरविविदिषासाधनतया यज्ञादिविधानएवास्य पर्य्यवसानात् । तस्माद्यज्ञादिभिर्विविदिषां भावयेदिति वेदनेच्छायाः फलत्वेनान्वय इत्येव युक्तम् ।

नन्विच्छायाः प्रधानत्वे ऽपि फलत्वेन नान्वयः किं त्विष्यमाणस्यैवेति स्वर्गकामादिवाक्येषु संप्रतिपन्नं तत्कस्य हेतोः लिङादिभिर्विधिशब्दैः कर्मणामिष्टसाधनत्वे प्रतीते किं तत्कर्मसाध्यमिष्टमितीष्टविशेषाकाङ्क्षायां यदिच्छाविषयत्वेन निबद्धं विशिष्योपात्तं च तदेव फलत्वेनान्वेतुं योग्यमिति योग्यतावधारणाद् योग्यतानुसारेणेच्छामुल्लङ्घ्य तद्विषये करणान्वयस्य अश्वेन जिगमिषतीत्यादौ क्लृप्तत्वाच्चायं हेतुरिहापि तुल्य इति

---

* ज्ञातगौणेति ५ पु. पा. । † विवेचनेनेति २-४ पु. पा. ।

चेत् । उच्यते । यज्ञादीनां ज्ञाने विनियोगेऽपि जिज्ञासा यज्ञादिद्वारवर्गमध्ये अवश्यं निवेशनीया निवेशिता च टीकायाम् । तथा च जिज्ञासाया यज्ञादिफलत्वेनावश्याभ्युपगन्तव्यत्वात् कामोपबन्धेषु यागादिवाक्येषु स्वर्गादेर्भाव्यत्वेनानन्वयेऽन्यतः स्वर्गादिसाधनानवगत्या कामनाया निर्ज्ञातस्वविषयसाधनप्रवर्तकत्वेन गौणपुरुषार्थत्वाप्रतीत्या तस्या भाव्यत्वेनान्वयाऽयोग्यत्वात् । नामोपात्तस्वर्गकामनावैलक्षण्येनेहाख्यातोपात्ताया इच्छायाः फलत्वान्वययोग्यता । हेतुसाध्यत्वप्रतीतिसद्भावाच्च प्रधानभूतां तामुल्लङ्घ्य ज्ञानस्य फलत्वाभ्युपगमो न युक्तः । तदभ्युपगमे शास्त्रान्तरसिद्धपापक्षयरूपद्वारातिरिक्तस्यापूर्वरूपस्य कर्मणां द्वारान्तरस्यापि कल्पनापत्तेर्वक्ष्यमाणत्वात्* ।

ननु जिज्ञासायाः फलत्वान्वययोग्यत्वमसिद्धम् । स्वतः फलत्वरहितायास्तस्याः फलत्वं हि ज्ञानरूपफलजनकत्वोपाधिकं वाच्यम् । तथा च जिज्ञासाफले ज्ञाने प्रागेवेच्छासत्त्वे सैव जिज्ञासेति तस्याः सिद्धत्वात् प्राक् तदसत्त्वे तस्याः फलजनकत्वोपाधिकपुरुषार्थत्वाऽप्रतीतेश्चेति न तस्याः फलत्वान्वययोग्यतेति चेत् । उच्यते । द्विविधा ब्रह्मज्ञानेच्छारूपा जिज्ञासा एका साङ्गाध्ययनादिप्रयुक्तब्रह्मज्ञानपुरुषार्थत्वावगतिमात्रमूला साऽनित्य†दुःखमये संसारे नित्यसुखमयत्वभ्रममुत्पाद्य चित्तसत्त्वं मलिनयता पाप्मना प्रतिबद्धा सती ज्ञानोद्देशेन तदुपायेषु प्रवृत्तिं जनयितुं न प्रभवति । यदा प्रवृत्तिपर्य्यन्तजिज्ञासादिप्रतिबन्धकपाप्मसद्भावं शास्त्रतः पुरुषोऽवगच्छति तदा तथाभूतजिज्ञासोपायमन्विच्छन्विविदिषावाक्येन तदुपायं यज्ञादिकमुपलभ्य तथाभूतजिज्ञासोद्देशेन यज्ञादीननुष्ठाय ततः संसारसुखमयत्वप्रदर्शकपाप्मनिवृत्त्या तस्य वस्तुसद्दुःखैकरूपत्वं निश्चित्य तदसहमानस्तज्जिहासामूलामपि ब्रह्मजिज्ञासां लभते सा द्वितीया । तया ब्रह्मज्ञानोपायेषु प्रवृत्तिः । यथा भोजने सत्येव देहस्थितिबलपुष्ट्यादिकं भवेदिति तादर्थ्यावगतिमात्रमूला धातुवैषम्यकृतरोगविशेषप्रतिबद्धा भोजनेच्छा भोजनार्थप्रवृत्तिं जनयितुं न प्रभवति तत्प्रवृत्तिपर्य्यन्तबुभुक्षाप्रतिबन्धकरोगसद्भावं यदा वैद्यकादवगच्छति पुरुषः तदा रोगनिवृत्तिपूर्वकबुभुक्षोत्पत्त्युपायमन्विच्छन् वैद्यकशास्त्रेणैव तथाभूतमौषधमुपलभ्य तत्सेवनेन रोगनिवृत्त्या क्षुधामुपलभ्य

---

* वक्ष्यमाणत्वाच्चेति ५ पु॰ पा॰ । † अनित्येति नास्ति ५ पु॰ ।

तामसहमानः तन्निवृत्त्यर्थमपि बुभुक्षां लभते तया* च भोजने प्रवर्तते । अतो नात्र काचिदनुपपत्तिः ।

३२ । २ **पापक्षयं ज्ञानमाकाङ्क्षतइति**† । विविदिषाद्वारेति शेषः । **ज्ञाने विनियुक्तेति** । ज्ञानार्थविविदिषाविनियुक्तेत्यर्थः । ननु क्रतुपापक्षयातिरेकेणोपकारान्तरस्याऽकल्प्यत्वे ऽपि यानि पवित्रेष्ट्यग्निष्टुदश्वमेधादीनि कृष्णाजिनदानादीनि कृच्छ्रचान्द्रायणादीनि च सामान्यतः पापक्षयार्थत्वेन चोदितानि काम्यकर्माणि तत्साधारण्यमिह यज्ञादिशब्दानामवर्जनीयमित्याशङ्क्य नित्यफलपापक्षयातिरेकेणेति पापक्षयो नित्यफलत्वेन विशेषितः । अवश्यकर्तव्यनित्यानुष्ठानजो हि पापक्षयः स्वतः प्राप्तः । अतः प्रयुक्तिलाघवात् तमेव विविदिषार्थयज्ञादिविधिर्द्वारं गृहीत्वा निर्वृणोति न त्ववश्याननुष्ठेयपवित्रेष्ट्यादिफलभूतमपि पापक्षयं द्वारं गृहीत्वा तत्सम्पादनं प्रयोजयति । अतो नित्यफलस्यैव पापक्षयस्येह द्वारता । यथा ऋत्विगपेक्षः क्रतुविधिर्धनार्जने याजनं स्वकीयोपाय इति तादर्थ्येन स्वतः प्राप्तान् ब्राह्मणानेव गृहीत्वा निर्वृणोति न तु क्षत्रियवैश्यानपि ऋत्विजो गृहीत्वा तानार्त्विज्ये प्रयोजयतीति ब्राह्मणानामेव क्रतावार्त्विज्यं तद्वत् । एवं च यस्य यदा यन्नित्यमनुष्ठेयं प्राप्तं तेन तदा तदेव विविदिषितार्थतया ऽनुष्ठितं फलार्थं भवति काम्यानुष्ठानतः प्रसङ्गान्नित्यसिद्धेर्नित्यप्रयुक्तं पापक्षयद्वारमपि लभतइति प्रयुक्तिलाघवाद् नित्यानामेव विनियोग इति भावः ।

ननु प्राकृतोपकारदृष्टान्तेन पापक्षयस्येह द्वारत्वकल्पनं न युज्यते‡ । वैषम्यात् । प्राकृतपदार्थानाम् उपकारमुखेनैव विकृतिष्वतिदेशः न तु पदार्थानामतिदेशानन्तरमुपकारकल्पनेति न तत्र प्राकृतोपकारातिरिक्तोपकारकल्पनाप्रसक्तिः । इह तु प्रत्यक्षश्रुत्या प्रथममेव विनियुक्तानां यज्ञादीनामुपदिष्टाङ्गानामिव पश्चात्कल्पनीय उपकारः प्रथमाऽवगतविनियोगनिर्वाहायाऽक्लृप्तो ऽपि सामान्यशब्दोपात्तसकलनित्यकाम्यसाधारणः कथं न
,, । ५ कल्प्येतेत्याशङ्क्याह **पापक्षयस्य चेति** । स्यादेतदेवं यद्यत्र पदार्थशक्तिमालोच्योपकारः कल्प्यः स्याद् न त्वेवम् । इह पापक्षय एवोपकार

---

* तया च इति–२ पु· पा· ।

† ज्ञानमपेक्षते इति २ पु· वर्जं सर्वेषु पाठः मूलानुसारी तूपरितन एव ।

‡ न युक्तमिति २-४-५ पु· पा· ।

इत्यपि प्रत्यक्षशास्त्रेणैव सिद्धत्वादित्यर्थः । ननु ततस्तु तमिति शास्त्रेण पापक्षयस्य ज्ञानोत्पत्तौ द्वारत्वं सिद्धं न तु विविदिषोत्पत्तौ । उच्यते । विविदिषावाक्यानुरोधेन विशुद्धसत्त्वस्ततो विविदिषाद्वारेण पश्यतीति तस्य शास्त्रस्यार्थ इति तात्पर्य्यम् । एवं ततस्तु तमित्यादिश्रुतौ विविदिषान्तर्भावस्तदवतारणार्थे टीकाग्रन्थे विशुद्धसत्त्वस्येत्येतदनन्तरमुत्पन्नविविदिषस्येति विशेषणेन स्फुट इत्याचार्य्यैरिह न विशेषितम्* ।

अत्र केचित् संस्कारपक्षमेव सिद्धान्तमभिमन्यमाना विदिषन्तिवाक्ये विधिर्न कल्प्यो नित्यकर्मभिः पापक्षयस्य तद्विधिभिः पापक्षयाज् ज्ञानोत्पत्तेस्ततस्तु तं ज्ञानमुत्पद्यतइति श्रुतिस्मृतिभ्यां च सिद्धेः । अतो विविदिषन्तिवाक्यं तत्सिद्धानुवादकमित्याहुः । तन्मतमनूद्य निराकरोति **न च वाच्यमित्यादिना** ।

विशेषतः शास्त्रान्तरादसिद्धेरिति । पापान्तरनिवर्तनेनापि ३२ । ८
चरितार्थाद् नित्यानुष्ठानाद् न ज्ञानोत्पत्तिप्रतिबन्धकपापव्यक्तिविशेषनिबर्हणनियमः सिध्यति । अतस्तत्सिद्धये विनियोगान्तरमित्यर्थः । अत्र संस्कारपक्षावलम्बनैर्विविदिषावाक्यस्य विद्यार्थविनियोगानुपपत्त्याऽनुवादकत्वं शङ्कितमिति तद्दृष्ट्वा ज्ञानोत्पत्तिप्रतिबन्धकेत्युक्तं शङ्कासमाधानयोर्विविदिषार्थपक्षेऽपि तुल्यत्वात् स्वमते ज्ञानग्रहणं विविदिषोपलक्षणम् । तस्यामेव यज्ञादिविनियोगस्य प्राग्व्यवस्थापितत्वात् सर्वापेक्षाधिकरणे† चोपपादयिष्यमाणत्वात् । भाष्यकृद्भिरपि विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि विविदिषासंयोगात्तु बाह्यान्तराणि यज्ञादीनि इति यज्ञादीनां विविदिषार्थत्वस्य वक्ष्यमाणत्वाच्च । तेषां ज्ञाने विनियोगे ज्ञानोत्पत्त्यपेक्षितसद्गुरुलाभश्रवणादिप्रवृत्तिग्रहणधारणपाटवादीनामपि ज्ञानार्थं यज्ञादिसम्पाद्यत्वापत्त्या तदर्थमपूर्वस्यापि द्वारान्तरस्य कल्प्यतापत्तेश्च । ज्ञानमुत्पद्यतइतिस्मृतेर्विविदिषन्तिवाक्यमूलकत्वोक्तिस्तु पापक्षयाद् विविदिषोदये सति क्रमाज् ज्ञानमप्युत्पद्यते इत्येवंपरा स्मृतिरित्याशयेन ।

श्रुतिस्त्वेतादृशीति । एषैव दृश्यतइत्येतादृशी । आपाततो ” । ११
विविदिषावाक्यवत् ततस्तु तमिति श्रुतिर्दृश्यते । वस्तुतस्तूभयोरप्यान्तरा-

---

* विशेषित इति २ पु॰ पा॰ ।   † व्या॰ सू॰ अ॰ ३ पा॰ ४ सू॰ २६ ।

लिकफलभेदो ऽस्ति पापक्षयरूपद्वारावगमस्ततस्तु तमिति श्रुत्यपेक्षः पापक्षयाज् ज्ञानोत्पत्तौ विविदिषान्तर्भावो विविदिषन्तिवाक्यापेक्ष इति । अतः कथमपि नानुवादत्वशङ्केति भावः । अथ वा एतादृशी एतत्समाना कल्प्यविधिकत्वाविशेषात्* तत्र यदि विधिः श्रूयेत तदा विधिश्रवणरहितं विविदिषावाक्यं तदनुवादकं कल्प्येतापि न त्वेतदस्तीति भावः । सर्वापेक्षाधिकरणे इत्युपलक्षणम् । सर्वथापि तएवोभयलिङ्गादित्यधिकरणे† चेति द्रष्टव्यम् ।

३२ । १९ **हेतुहेतुमद्भावाभावे ऽपीति ।** नन्वनुष्ठानद्वारा हेतुहेतुमद्भावाभावे ऽपि प्रामाण्यप्रतिपादनादिद्वारा सो ऽस्ति पूर्वतन्त्रे प्रथमाध्यायप्रतिपादितं वेदप्रामाण्यमिहाप्यपेक्षितं द्वितीयाध्यायनिरूपितं शब्दान्तरादिषट्कं विद्याभेदाभेद‡चिन्तायां तृतीयाध्यायनिरूपितं श्रुतिलिङ्गादिकं सर्वत्रापि तत्तदधिकरणविषयवाक्यार्थनिर्णये§ पञ्चमाध्यायनिरूपितं श्रुत्यर्थादिकं‖ वियदादिसृष्ट्यर्चिरादिपर्वक्रमचिन्तायां सप्तमाष्टमनिरूपितमतिदेशप्रमाणं तस्यैतस्य तदेव रूपं यदमुष्य रूपमित्याद्यर्थनिर्णये चापेक्षितम् । कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तं¶ प्रदानवदेव तदुक्त**मित्यादिषु च पूर्वतन्त्रसंमतिप्रदर्शने तत्तदधिकरणार्थज्ञानमपेक्षितम् । आचार्य्यैः प्रथमसूत्रव्याख्यानावसाने वेदान्तमीमांसा तदविरोधितर्कोपकरणेति भाष्यव्याख्यानावसरे तस्या अविरोधिनः श्रुतिलिङ्गादयस्तार्तीयाः पाञ्चमिकाः श्रुत्यादयो वेदप्रामाण्यपरिशोधकाः कर्ममीमांसायां विचारिता इति पूर्वतन्त्रापेक्षा स्फुटीकृता । अतो हेतुहेतुमद्भावाभावोक्तिरयुक्तेति चेत् । उच्यते । पूर्वतन्त्रइवात्रापि शास्त्रे वेदप्रामाण्यादीनि सूचितान्येव । अत एव च नित्यत्व††मिति हि वेदप्रामाण्यं सूचितं नानाशब्दादिभेदादिति‡‡ शब्दान्तरादिकं शब्दादेव प्रमितः§§ आकाशस्तल्लिङ्गात्‖‖ तथा चैकवाक्यतोपबन्धात्¶¶ प्रकारणा***दित्यादिभिः श्रुतिलिङ्गादिकं

* कल्प्यविविदिषात्रिशेषादिति ४ पु· ।

† व्या· सू· अ· ३ पा· ४ सू· ३४ ।

‡ विध्यभेदाभेदेति ४ पु· पा· ।

§ बाध्यार्थनिर्णये इति ४ पु· पा· ।

‖ श्रुत्यादिकमिति ४ पु· पा· ।

¶ व्या· सू· अ· ३ पा· ३ सू· २६ ।

** व्या· सू· अ· ३ पा· ३ सू· ४३ ।

†† व्या· सू· अ· १ पा· ३ सू· २९ ।

‡‡ व्या· सू· अ· ३ पा· ३ सू· ५८ ।

§§ व्या· सू· अ· १ पा· ३ सू· २४ ।

‖‖ व्या· सू· अ· १ पा· १ सू· २२ ।

¶¶ व्या· सू· अ· ३ पा· ४ सू· २४ ।

*** व्या· सू· अ· १ पा· ३ सू· ६ ।

श्रुत्यादिबलीयस्त्वाच्च न बाध* इत्यादौ श्रुतिलिङ्गादिबलाबलं विपर्य्ययेण तु क्रम† इत्यादिभिरपेक्षितं क्रमप्रमाणजातम् अतिदेशाच्चे‡त्यतिदेशप्रमाणमित्येतत्सर्वं सूचितमेव । भाष्यकारादिभिः स्फुटीकर्तव्यता तु पूर्वतन्त्रसूत्रेष्वपि समाना । तदुक्तमित्येतदत्रैव व्याख्यानेनावगन्तुं शक्यं न कर्मविचारमपेक्षते अन्यथा तद्धैके आहुरसदेवेदमग्रआसीदिति वाक्यार्थावगत्यर्थमसद्वादिशास्त्रविचारानन्तर्य्यमप्यथशब्दार्थः स्यात् । आचार्यैस्तु श्रुतिलिङ्गादयः पूर्वतन्त्रे निरूपिता इत्येतावदुक्तं न त्विह तदपेक्षा ऽस्तीति तत्र हि तदनन्तरं न्यायशास्त्रस्यापेक्षा कण्ठत उक्ता इति न्यायशास्त्रस्योपयोग इति । अथापि तदानन्तर्य्यमथशब्दार्थो नेष्यते तथाऽपेक्षोक्तिरहितकर्मविचारानन्तर्य्यस्य क्वाथशब्दार्थत्वप्रसक्तिः ।

आरादुपकारकत्वादिति । तथात्वसम्भवादित्यर्थः । **अनुष्ठा-** ३३ । ५
नापेक्षितेति । नन्वनुष्ठानापेक्षस्मृत्युपयोगिनो मन्त्रा एव न विधिवाक्यानीति न तत्पाठक्रमेणानुष्ठानकाले क्रमिकपदार्थस्मृतयो भवन्तीति चेत् सत्यम् । मन्त्रपाठक्रमाभावे विधिपाठक्रमो ऽप्यनुष्ठानकालपदार्थस्मृतिक्रमनियामकत्वेनाश्रीयते§ तस्य दृष्टार्थत्वायेत्याह **एवं क्रमपाठो ऽपीति** । **लद्यथेति** । लोके स्नायादनुलिम्पेदित्यादौ पाठक्रमो ऽनुष्ठानक्रमार्थ एव । अत एवानुलिम्पेत् स्नायादितिवदन्नभिज्ञेन मैवं वादीः स्नायादनुलिम्पेदिति वद तथैवानुष्ठानक्रमादिति व्युत्पाद्यते । तस्य तादर्थ्याभावे तथा व्युत्पादनं न क्रियेतेति भावः । **तद्विधानाच्चेति** । सहत्वविधानादौपवसथ्ये ऽहन्यग्नीषोमीयस्ततः सौत्ये ऽहनि सवनत्रयव्यापिसवनीयपश्वनुष्ठाने सत्यवभृथान-
न्तरमनुबन्ध्य इत्येवंरूपः प्राकृतक्रमो निवर्ततइत्यर्थः । **अधिकव्यव-** ३४ । १०
धिमिति । साङ्गप्रयोगविधिबलादङ्गानां प्रधानसाहित्यमवगतं तच्चैकक्षणानुष्ठेयत्वरूपं न सम्भवतीति संनिकर्षरूपं पर्यवस्यति । स च संनिकर्षः प्रधाना||व्यवहितपूर्वापराङ्गवद्व्यवहिताङ्गानामात्यन्तिको न सम्भवतीति यस्याङ्गस्य यावद्भिः स्वप्रधानाङ्गैः प्रधानान्तराङ्गैर्वा व्यवधानमवर्जनीयं तत्ताव-

* व्या· सू· अ· ३ पा· ३ सू· ४९ ।

† व्या· सू· अ· २ पा· ३ सू· १४ । ‡ व्या· सू· अ· ३ पा· ३ सू· ४६ ।

§ आद्रियते इति ४ पु· पा· । || संनिकृष्टप्रधानेति ४–५ पु· पा· ।

द्विर्व्यवधानं सहते नान्यैः । ततश्च पश्चादनुष्ठेयस्य प्रधानस्याङ्गं निर्वापादि
प्रथमानुष्ठेयप्रधानाङ्गान्निर्वापादितः पूर्वं यद्यनुष्ठीयेत तदा तदङ्गमनुज्ञाता-
धिकेनापि पश्चादनुष्ठीयमानप्रथमप्रधानाङ्गेन स्वप्रधानाद् व्यवहितं स्यात्
तन्न सहते अङ्गप्रधानसाहित्यबोधकः प्रयोगविधिरित्यर्थः । मुख्यक्रमाऽनादरे
पाश्चात्यप्रधानाङ्गस्य पूर्वप्रधानाङ्गेन प्रयोगविध्यननुज्ञातं व्यवधानं भवेदि-
३४ । ११ त्यमुमेवार्थं विवृण्वन्नाह **यदि त्विति** । अस्मिन्नर्थे ऽस्य वाक्यस्येत्थं
योजना । यदि प्रधानान्तरस्य प्रथमप्रधानस्य संनिधौ तत्संनिकृष्टतया तद-
ङ्गानुष्ठानं द्वितीयप्रधानाङ्गानुष्ठानानन्तरं प्रथमप्रधानाङ्गानुष्ठानमिति यावत् ।
तथा ऽनुष्ठाने हि प्रथमप्रधानाङ्गानि द्वितीयप्रधानाङ्गव्यवधानाभावात् स्वप्र-
धानसंनिकृष्टानि भवन्ति तदा तथामुख्यक्रमानादरेणानुष्ठाने अङ्गानि प्रथ-
मानुष्ठीयमानद्वितीयप्रधानाङ्गनिर्वापादीनि तेनैव पश्चादनुष्ठीयमानप्रथमप्रधा-
नाङ्गनिर्वापादिना स्वप्रधानाद्विप्रकृष्येरन्निति । यदि तु प्रधानान्तरसंनिधा-
वन्यप्रधानाङ्गानुष्ठानं तदा तेनैव प्रधानान्तरेणान्यप्रधानाङ्गानि स्वप्रधाना-
द्विप्रकृष्येरन्नित्यापाततः प्रतीयमानो ऽर्थस्तु न ग्राह्यः । मुख्यक्रमानादरे
पाश्चात्यस्य पुंदैवतयागस्य किमङ्गं पूर्वेण स्त्रीदैवतयागेन व्यवहितं स्यादि-
त्यापाद्यते अवदानात्प्राचीनानां हि तदङ्गानां पूर्वप्रधानेन व्यवधानमाति-
देशिकपाठक्रमादिप्राप्तं सह्यमेव अवदानादिमध्ये तु न कस्यापि तेन व्यव-
धानप्रसक्तिरस्ति । अवदानादिप्रदानान्तस्य पूर्वप्रधानानन्तरमेवानुष्ठानात् ।
अतः प्रधानान्तरव्यवधानापादनायोगात् पूर्वोक्त एवार्थो ग्राह्यः ।

११ । १२ **अतो मुख्यक्रमादिति** । यद्यपि वक्ष्यमाणप्रवृत्तिक्रमो ऽप्यत्र
सम्भवति याज्यानुवाक्याप्रवृत्तिक्रमेण निर्वापादयः कार्याः अन्यथा पुंदैवत्य-
यागाङ्गयोर्निर्वापानुवचनयोरननुज्ञातव्यवधानप्रसङ्गादिति । तथापि प्रवृत्तिक्रम-
वद् मुख्यक्रमस्यापि पदार्थक्रमनियमनसामर्थ्यमस्ति अङ्गानामिव अङ्गप्रधान-
योरपि परस्परं वर्ज्जनीयव्यवधानस्य परिहरणीयत्वात् । अतस्तदपि प्रमाणमिह
सम्भवतीत्युदाहृतम् । मन्त्रक्रमं विधाय सारस्वतौ भवतः एतद्वै दैव्यं मिथुनं
यत् सरस्वती च सरस्वांश्चेति विधिवाक्यशेषगतपाठक्रममात्रेण मुख्यक्रमं
निश्चित्य चेत्यमुदाहृतम् । मुख्यक्रमस्यासङ्कीर्णोदाहरणं त्विदं द्रष्टव्यम् ।
दर्शपूर्णमासयोर्दधिधर्माः पूर्वं पठिताः । तत आग्नेयस्य निर्वापादयः याज्या-

नुवाक्ययोस्तु विपरीतः पाठः । तत्र प्रवृत्तिद्वयं परस्परविरुद्धं प्रयाजशेषेण हवींष्यभिघारयतीति विहितप्रयाजशेषाभिघारणक्रमे न नियामकं किं तु मुख्यक्रमादाग्नेयस्य प्रथममभिघारणमिति । **प्रधानस्याङ्गैर्विप्रकर्षः** ३४ । १८
स्यादिति । यत्र पशौ सर्वाण्यङ्गानि प्रथममनुष्ठितानि तत्पशुयागात् प्रकृतौ तत्संनिहितान्यप्यङ्गान्यत्यन्तं विप्रकृष्येरन् अतः पदार्थानुसमय एव कार्यो न काण्डानुसमय इत्यर्थः । संनिपाते प्रधानानामेकैकस्य गुणानां सर्वधर्मः स्या*दित्यधिकरणार्थो ऽयं प्रकृताधिकरणापेक्षितो वर्णितः । प्रकृताधिकरणार्थमाह **द्वितीयादिपदार्थप्रयोग†इति ।** प्रवृत्तिक्रमानादरे तत्तत्पशुगतानामुपाकरणप्रोक्षणादिपदार्थानां परस्परप्रत्यासत्तिरेकरूपा न स्याद् अतस्तद्वैषम्यपरिहाराय पङ्क्तिपरिवेषणन्यायेन प्रवृत्तिक्रम एष्टव्य इत्यर्थः ।

त्रयः पूर्णमास्येति‡ । यदाग्नेयवाक्यस्यार्थभेदेन द्वेधा विभागे सति यदाग्नेयो ऽष्टाकपालो ऽमावास्यायां चाच्युतो भवतीति वाक्येन§ अमावास्यायामेक आग्नेयो विधीयते यदाग्नेयो ऽष्टाकपालः पौर्णमास्यां चाच्युतो भवतीति वाक्येन पौर्णमास्यामपरः ततश्च पौर्णमास्यामाग्नेयाग्नीषोमीयोपांशुयाजास्त्रयः अमावास्यायामाग्नेयशृतदधियागास्त्रय इत्यर्थः ।

एकश्चासाविति । सर्वैरङ्गैः समुच्चितैः स्वस्वाऽसाधारणदृष्टाऽदृष्टोपकारद्वारकैरेकः प्रधानगतफलजननसामर्थ्याद्बोधनरूपाखण्डोपकारो जायत इत्येकादशे स्थिता मीमांसकमर्य्यादा । ३५ । १४

नन्वध्ययनवदर्थावबोधार्थो विचारो ऽपि वेदपाठक्रमेण स्यादिति कर्मब्रह्मकाण्डयोर्विचारे पाठक्रमो नियामकः स्याद् मुख्यक्रमो वा नियामकः स्यात् स्वाध्यायाध्ययनेनार्थज्ञानं भावयेदित्यध्ययनविधिवाक्यविपरिणामे मुख्ययोः कर्मब्रह्मकाण्डाध्ययनयोः पौर्वापर्यस्य क्लृप्तत्वात् प्रवृत्तिक्रमो वा स्याद् अध्ययनगृहीतेन स्वाध्यायेनार्थज्ञानं भावयेदिति तद्विधिविपरिणामपक्षे अध्ययनमीमांसारूपयोरङ्गयोर्मध्ये अध्ययने क्रमस्याऽप्रवृत्तत्वादित्याशङ्क्य एकप्रयोगावच्छिन्नतया एकपुरुषानुष्ठेयत्वेन क्रमा-

* जै॰ सू॰ अ॰ ५ पा॰ २ सू॰ १ सर्वकर्म स्यादिति सौत्रः पाठः आ॰ मु॰ जै॰ न्या॰ मा॰ वि॰ पु॰ दृश्यते परं सर्वेषु परिमलपुस्तकेषूपरिधृत एव । † द्वितीयादिप्रयोगे इति १–४ पु॰ पा॰ ।
‡ पौर्णमास्यामिति १–२ पु॰ पा॰ । पौर्णमास्येति ३–५ पु॰ । मूले तु उपरितन एव पाठो दृश्यते । § वाक्ये चेति ४ पु॰ पा॰ ।

काङ्क्षायां पाठक्रमादिर्नियामको भवति न चात्र तदस्ति । कर्मब्रह्मविचार-
योर्विलक्षणाधिकारिकत्वात् । एकाधिकारिकत्वेन क्रमाकाङ्क्षाकल्पने च वेदभा-
ष्यवद्विचारस्याप्यादित आरभ्य प्रवृत्तिप्रसङ्गाच्चेति दर्शयितुं यत्र क्रमाकाङ्क्षा नास्ति
१ । १७ तत्र पाठक्रमस्याऽनियामकतायामधिकरणमुदाहरति **एकादशे स्थित-
मिति** । एकादशइति प्रामादिकः पाठः । अङ्गवत् क्रतूना*मित्यधिकरणं
हि पाञ्चमिकम् । अथ वा पञ्चमतृतीयपादगतमेकादशमिदमधिकरणमित्य-
भिप्रायमेकादशइत्येतद्योज्यम् । अन्ते तूत्तरयोर्दध्या†दिति सूत्रं तत्पूर्वाधि-
करणप्रत्युदाहरणतया तच्छेषभूतं तस्याधिकरणान्तरत्वे त्वेकादशइत्यस्या-
तीते इति शेषो ऽध्याहार्य्यः ।

किं तु पुरुषस्येति । वस्तुतः पुरुषस्यापि नास्ति काम्यनैमित्तिकेषु
क्रतुषु क्रमाकाङ्क्षा कामनानां निमित्तानां च क्रमनियमाभावात् तदधीनत्वाच्च
काम्यनैमित्तिकानुष्ठानस्य । **क्रत्वर्थत्वेति** । केवलं पुरुषशेषत्वम् उत क्रतु-
शेषत्वमपीति सन्देहे इत्यर्थः । **पशुकामस्येति** ।

१ । ६ **समभिव्याहाराद्‡ वाक्येनेति** । ननु गोदोहनेनेति तृतीया
पशुकामस्येति षष्ठी च शेषशेषिभावे श्रुतिरेवास्ति कथमिह पुरुषशेषत्वे
वाक्यं प्रमाणमुपन्यस्तम् । उच्यते । गोदोहनेनेति तृतीयया फलभावना-
करणत्वं नोच्यते किं तु संनिधिप्राप्तप्रणयनक्रियाकरणत्वं सिद्धरूपस्य दध्नो
यागादिवत् स्वरूपेण फलभावनाकरणत्वाऽसम्भवेन यत्किञ्चिद्धात्वर्थकार-
कतारूपक्रियानुरागेण§ साध्यत्वं सम्पाद्य तस्य फलभावनाकरणत्वस्यो-
पपादनीयत्वात् । अतस्तृतीयार्थकारकविशिष्टं दधि दधिविशिष्टं वा कारकं
फलाय विधेयमिति । तृतीयया तावद् गोदोहनस्य न फलभावनाशेष-
त्वप्रतीतिः नापि षष्ठीश्रुत्या पशुफलस्य शेषित्वप्रतीतिः । तस्याः संबन्ध-
सामान्यवाचित्वेन शेषित्वविशेषपर्य्यवसानार्थं समभिव्याहृतपदार्थान्तरशे-
षित्वान्वययोग्यतावधारणसापेक्षत्वात् । अतः प्रथमोपस्थितं गोदोहन-
पशुफलसमभिव्याहारात्मकं वाक्यमेव स्वर्गकामो यजेतेति वाक्यमिव फल-
शेषत्वे प्रमाणमिति । क्व चित् कोशे पशुकामस्येत्येतदनन्तरं श्रुत्येत्यपि

---

* जै॰ सू॰ अ॰ ५ पा॰ ३ सू॰ ३२ । † जै॰ सू॰ अ॰ ५ पा॰ ३ सू॰ १३।
‡ समभिव्याहारात्मनेति ३-५ पु॰ । § क्रियानुसारेणेति ४ पु॰ पा॰ ।

पदान्तरं दृष्टं तत्प्र.चिप्र.मिव भाति । वाक्यात् पुरुषार्थमेवेत्युपसंहारे तद्द-र्शनात् । समभिव्याहारापेक्षपर्यवसानलभ्यश्रुतित्वाभिप्रायं वा तद्योज्यम् ।

नोपकारकत्वमिति । तथात्वे प्रधानस्याप्यङ्गानुष्ठापनेन तदुप- ३६ ।
कारकस्य तच्छेषत्वप्रसङ्गादिति भावः । तादर्थ्यं तदुद्देश्यककृतिसाध्यत्वम् । ननु गोदोहनस्य चमसस्थानापन्नस्य क्रत्वनङ्गत्वे तत्प्रयोगे चमसनिवृत्त्याऽङ्गविकलः क्रतुर्न फलदः स्यादित्याशङ्क्याह **अङ्गापेक्षेति** । अङ्गं ह्युपकारायापेक्ष्यते अङ्गसाध्योपकारस्यानङ्गेनापि सिद्धौ किमङ्गवैकल्येन हीयतइत्यर्थः । फलार्थस्य कथं क्रतावुपकारकत्वमित्याशङ्क्य प्रासादप्रकाशार्थस्य दीपस्य रथ्यासंचार इवेत्याह **अन्यार्थस्यापीति** । **यथा वा दर्शपूर्णमासाभ्यामिति** । प्राचीनोऽप्ययं प्रतीको गोदोहनविषयाधिकरणानुबन्धिटीकाग्रन्थव्याख्यानानन्तरमेव तदनुबन्ध्यधिकरणानुक्रमणार्थमिह गृहीतः ।

ननु द्रव्यद्वारेणेति । दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यत्र ,, । ८
सोमपदमुत्पत्तिवाक्ये इव द्रव्यपरं तदुत्पत्तिवाक्ये विहितस्य सोमयागस्य प्रत्यभिज्ञानार्थमिति तस्येह न पुनर्विधिः । विहितस्य विधानायोगात् । अतः कालविधिर्युक्त इत्यर्थः । यथा वाजपेयेनेष्ट्वेति वाक्ये प्रसिद्धबृहस्पतिसवनामग्रहणे सत्यपि तत्कार्य्यब्रह्मवर्चसप्रत्यभिज्ञानाभावान्न तस्य कालविधिः किं तु बृहस्पतिसवनामककर्मान्तरविधिरेवमिहापि सोमद्रव्यग्रहणे सत्यपि प्रसिद्धसोमयागफलस्वर्गप्रत्यभिज्ञानाभावान्न तस्य कालविधिः किं तु
सोमद्रव्यककर्मान्तरविधिरित्याह **उच्यते तत्कार्यस्येत्यादिना** । **दर्श-** ,, । २६
पूर्णमासं* प्रति इत्यत्र दर्शपूर्णमाससोमयोरिति टीकायामिव द्वन्द्वैकवद्भावः । कर्मान्तरविधिश्चेत् तस्य देवतया भाव्यं न चेह देवता निर्दिष्टा । यदि यागं प्रति संबन्धितया देवतोपादानराहित्यरूपम् अव्यक्तदेवताकत्वं प्रसिद्धसोमयागसादृश्यमिह वर्ततइति तेनोद्भिदादियागेष्विवेहापि प्रसिद्धसोमयागादतिदेशतो देवताप्राप्तिरिष्यते तदा तत एव सोमद्रव्यप्राप्तिरपि स्यात् । दर्शपूर्णमासाभ्यामिष्ट्वा यजेतेत्येतावतैव दर्शपूर्णमासाङ्गप्रसिद्धसोमयागप्रकृतिककर्मान्तरविधिः सिद्ध्येद् इत्यतिरिच्यमानं सोमद्रव्यग्रहणं प्रसिद्धसोमयागप्रत्यभिज्ञापनेनैव सफलं वाच्यमिति तस्यात्र कालविधिरित्येव युक्तम् ।

---

* पूर्णमासेष्टिमिति ४ पु· पा· । मूलेऽप्येवमेव पाठो बहुलमुपलभ्यते ।

विहितस्य पुनः स्वरूपतो विधानाऽयोगादिति सिद्धान्तयति **उच्यतइति**।
बृहस्पतिसवनामग्रहणं तु नातिरिच्यते येन तदपि प्रसिद्धबृहस्पतिसवप्रत्य-
भिज्ञापनार्थं कथं चित्कल्प्येत तत्तु कर्मान्तरे तद्धर्मातिदेशार्थत्वेन सफ-
लम्। अतस्तस्य प्रकरणान्तरन्यायप्राप्तकर्मान्तरविधिस्वारस्यवद्याजि*पारतन्त्र्यं
३७ । १२ न हातव्यमिति तद्वैषम्यमाह **बृहस्पतिसवस्त्विति। उत भेदेनेति।**
अस्मिन् पक्षे षडपि यागाः पृथक् पृथक् पूर्वोत्तराङ्गसहिताः प्रयोगभेदेन
कर्तव्याः। फलं तन्त्रमिति सिद्धान्ते त्वामावास्याः पौर्णमास्याश्च त्रयस्त्र-
यो यागाः स्वस्वकालयोरेकप्रयोगाः कर्तव्या इति फलभेदः। **भेदेनैभिः संब-
ध्यतइति।** एकशब्दोपात्तानामप्याग्नेयादीनां साहित्यमिह न विवक्षितम्
उत्पत्तिवाक्यविहितानां तेषामिह फलसंबन्धविधानार्थमुद्दिश्यत्वाद् उद्दिश्येषु
च साहित्यरूपस्य विशेषणस्य विवक्षणाऽयोगादिति भावः। आग्नेयादीनां
पृथक्कर्मैककर्म्यं च सूत्रोक्तं परस्परविरुद्धमित्याशङ्क्य तदर्थं कथयन्नेव सिद्धा-
न्तमाह **यद्यप्येषामिति। फले विधीयन्तइति।** फलस्य प्राधान्यात्तु
फलकाममुद्दिश्याग्नेयादय एव विधेयाः स्वरूपेण विहितानामपि फलसंब-
न्धित्वेन पुनर्विधानसंभवात्। अतस्तेषां साहित्यविशेषणाऽविवक्षाकारणं ना-
स्तीति भावः। **उपादीयमानानां** कामिनमुद्दिश्यानुष्ठेयत्वेन बोध्यमाना-
नाम्। टीकायामात्यन्तिकविशेषणेन विवक्षितं फलभेदाज्जिज्ञास्यभेदस्य स्फु-
३८ । ४ टत्वमुपपादयितुं फलभेदस्याऽस्फुटत्वमाह **क चिद् ब्रह्मविदिति।** कृत-
कत्वे मोक्षफलस्यानित्यत्वप्रसङ्गो न्यायः† । ब्रह्मैव सन् ब्रह्माप्येतीत्यादि-
वचनान्तरम्। **ननु भवतेरिति।** अनपुंसकलिङ्गोऽयम् अकर्मकधातुनिष्प-
न्नकृत्यप्रत्ययान्तो भव्यशब्दो न भावकर्मार्थो नापि तस्यार्थान्तरमस्तीति
निरर्थकः। निरर्थकशब्देन कथं जिज्ञास्यविशेषलाभ इत्यर्थः। **अस्य च
भवतेरिति।** सुखमनुभवतीत्यादौ सोपसर्गत्वेन भवतिः सकर्मकः प्रमा-
णभूत आचार्य्य इत्यादौ प्रामाण्यं प्राप्त इति प्राप्त्यर्थत्वेन तदुभयमिह
नास्तीत्यर्थः। **उत्पाद्यधर्मापेक्षणादिति।** उत्पत्तिमद्धर्मसामानाधिक-
रण्यादित्यर्थः। भावपरत्वे हि भव्यमनेनेति वैयधिकरण्यं भवेत्। ननु
भावार्थभव्यशब्दार्थस्य भवनस्योत्पत्तिरूपत्वाद् धर्मशब्दसामानाधिकरण्यं

---

* स्वारस्याव्यजीति २ पु० पा० । † न्याय्यमिति २-३ पु० पा० ।

घटतइत्याशङ्क्योत्पाद्येति विशेषितम् । उत्पत्तिमान् हि यागादिधर्म इह
निर्दिष्टः न धर्ममात्रम् । अतस्तस्य नोत्पत्तिवाचिशब्दसामानाधिकरण्यं
घटतइति भावः । यद्वा नेह स इत्यस्य नेह भावार्थ इत्यर्थमाश्रित्य तत्र
पुँल्लिङ्गनिर्देशादिति हेतुयोजनानन्तरं तस्यावृत्त्या नेह प्राप्यर्थ* इत्यर्था-
न्तरमाश्रित्य तत्र हेतुत्वेनोत्पाद्यधर्मसापेक्षत्वादित्येतद्योजनीयम् । वेदा-
र्थविचारानन्तरमनुष्ठानेनोत्पादनीयं धर्ममपेक्ष्य हि तद्विशेषणतया भव्य इति
निर्दिष्टं न तु ग्रामपश्वादिवत्† तटस्थतया प्रागेव सिद्धं किं चित्प्राप्यम-
पेक्ष्य अतोऽत्र न प्राप्यर्थो घटतइति भावः । **भावकव्यापारो** भावयितृव्या-
पारः । तत्र वाक्यपदीय‡संमतिमाह **करोत्यर्थस्येति** । घटं करोतीत्य- ३८ । २
स्यायमर्थः । घटं भवन्तं भावयतीति स भावयिता भवितुर्घटस्य प्रयोजकः ।
भविता घटस्तमपेक्ष्य प्रयोज्य इत्यर्थः । (स्वस्या इति प्रामादिकः पाठः । स्वश-
ब्दस्यात्मवाचित्वे नपुंसकलिङ्गत्वादिति)§ । **धर्मस्येत्युक्त्येति** । धर्मस्य
चोदनेति भाष्ये चोदनोपसर्जनमपि भावना तत्प्रतिपाद्यत्वेनार्थतः प्राधा-
न्यात् सापि स्वविषय इति भाष्ये स्वशब्देन गृह्यतइत्यर्थः । **स एव
त्विति** । ब्रह्मबोध एव विधितः प्रवृत्तिविषयः किं न स्यादित्यर्थः ।
यथा विशिष्टविधाविति । यथा खल्वेतस्यैव रेवतीषु वारवन्तीयम-
ग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेतेति रेवत्याधारवारवन्तीयसाम-
साध्याग्निष्टोमस्तोत्रविशिष्टक्रतुविधौ रेवत्याधारवारवन्तीयसामरूपविशेषणस्य
दधिसोमादिविशेषणवदन्यतः प्रसिद्धिरहितस्य तत एव सिद्धिरेवमिहा-
पीत्यर्थः । (श्लोके ऽपेक्षितपूरणार्थम् एवमित्यादि । स्नानेत्यादिव्यतिरेके
दृष्टान्तः॥) **यद्यपि घटादेरिति** । वल्मीकादिषु भ्रमविषयस्य घटादेरि- ४० । १
त्यर्थः । अतो नित्यत्वं सत्यत्वमनित्यत्वमसत्यत्वमिति व्याख्यानेन न
विरोधः । **सुखत्वान्नित्यमिति** । सत्यं हि यो वै भूमा तत् सुखमिति
सुखरूपमुक्तम् । अथ यदल्पं तन्मर्त्यं नाल्पं सुखमस्तीति सत्यरूपस्य
भूम्नः प्रतिद्वन्द्यल्पम्¶ असत्यं दुःखरूपमुक्तम् अतः साङ्गाध्ययनवतः शुद्धा-

---

* शब्दार्थ इति ४ पु॰ पा॰ । † सामपश्वादिवदिति ४ पु॰ पा॰

‡ वाक्यपदीयेति नास्ति २-४ पुस्तकयोः ।

§ ( ) एतन्मध्यस्थो ग्रन्थः २-४ पु॰ नास्ति । प्रक्षिप्तष्टिप्पणीरूप इति भाति । ५ पु॰ बहिर्लिखितः । ‖ ( ) एतन्मध्यगो ग्रन्थः २-४ पु॰ नास्ति । ५ पु॰ बहिर्लिखितः ।

¶ प्रसिद्धं स्वल्पमिति ४ पु॰ पा॰ ।

न्तःकरणस्य सत्याऽसत्ययोः सुखदुःखत्वनिश्चयो भवतीत्यर्थः । स्वप्नप्रपञ्चवत्सर्वमसत्यं चेत् सत्यत्वाऽसत्यत्वयोर्द्धर्मिभ्यां भाव्यमित्युक्तरूपो नित्याऽनित्यविवेको न सिद्ध्येदित्याशङ्क्य सत्यसिद्ध्यर्थमनुभवोपपत्ती टीकायामुप-
४० । १५ न्यस्ते ते विभजते दृष्टे इति । शुक्तिरजतादौ सदधिष्ठानत्वानुभवः तथात्वेनास्फुटे स्वप्नादावुपपत्तिः । तामेवोपपत्तिमाह विगीतमिति । गन्धर्वपुरमिवेति* । तत्र सौरालोकादिकं सदधिष्ठानमिति भावः । व्याप्त्यसिद्धिशङ्का शून्यवादे वस्तुतः शून्यतैवेति मते ऽपि सैव सत्या ऽस्तीति परिहारार्थः । इयतो विवेकस्येति । स्वप्नवत् सर्वस्य प्रपञ्चस्याऽसत्यत्वं यदि स्यात् तदानीमप्यधिष्ठानपरिशेषो ऽवश्यंभावी तच्च सत्यं सुखरूपं† मित्येतावतो निर्द्धारणस्येत्यर्थः ।

,, । ,, सगुणनिर्गुणेति । परिशिष्यमाणं सत् सगुणं भवेन्निर्गुणं वा निर्गुणत्वे कथमखण्डे तत्र समन्वय इत्यादिविचारार्थत्वेन शास्त्रारम्भः सफल इत्यर्थः । न चैवं सति नित्याऽनित्यविवेकः प्रसिद्धनित्याऽनित्यविषय एवास्तु किमर्थं सत्याऽनृतविषयत्वेन क्लिष्टव्याख्यानं शास्त्राऽनारम्भशङ्कापरिहारस्योक्तस्य तत्रापि तुल्यत्वात् । न च ब्रह्मानन्द एक एव नित्यः कर्मफलादिकमन्यत्सर्वम् अनित्यमिति शास्त्रारम्भात्प्रागेव निश्चये सति असम्भवस्तु सतो ऽनुपपत्तेः‡रिति ब्रह्मनित्यत्वव्यवस्थापनस्य वैराग्यपादादि§ कर्मफलाद्यनित्यत्वव्यवस्थापनस्य च वैफल्यप्रसङ्गः । प्रागेव संसारबन्धानृतत्वनिश्चये सति तत्समर्थनार्थस्य तद्गुणसारत्वात्तु तद्व्यपदेशः‖ यथा च तक्षोभयथे¶त्यादिसूत्रजातस्य वैफल्यप्रसङ्ग इति दूषणस्य तत्रापि तुल्यत्वात् । प्राङ् निश्चिते एव बन्धमिथ्यात्वे श्रुतिविरोधादिशङ्कान्तरनिरासाय तद्गुणसारत्वादिसूत्रजातमिति परिहाररीतिस्तु पक्षान्तरे ऽपि तुल्या । किं च नित्याऽनित्यवस्तुविवेकस्वरूपासिद्धिशङ्कापरिहारार्थोऽतःशब्दव्याख्यानावसरे कर्मफलनित्यत्वप्रतिपादकवाक्येभ्यः तदनित्यत्वप्रतिपादकवाक्यानां प्राबल्यमेवोपपत्तितया दर्शितं न तु बन्धसत्यत्वप्रतिपादकवाक्येभ्यस्तन्मिथ्यात्वप्रति-

* गन्धर्वपुरवदिति ४ पु॰ एवमेव तत्र मूले ऽपि पा॰ । † सत्यस्वरूपमिति ३ पु॰ पा॰ ।
‡ व्या॰ सू॰ अ॰ २ पा॰ ३ सू॰ ९ । § व्या॰ सू॰ अ॰ ३ पा॰ १ ।
‖ व्याससू॰ अ॰ २ पा॰ ३ सू॰ २९ । ¶ व्यास सू॰ अ॰ २ पा॰ २ सू॰ ४० ।

पादकवाक्यानाम् । अतो ऽपि हेतोः प्रसिद्धनित्यानित्यविवेक एवात्र विवक्षित इति ज्ञायते । तस्मात्सामान्यतः सत्याऽनृतसद्भावनिर्द्धारणं प्रसंख्यानलभ्यबन्धमिथ्यात्वनिर्द्धारणपर्यन्तं नित्यानित्यवस्तुविवेक इत्युक्तमयुक्तमिति चेत्। उच्यते । भाष्ये नित्यानित्यवस्तुविवेकानन्तरं नित्यफलप्रेप्सामनपेक्ष्य तद्विवेकमात्रेण सकलकर्मफलविराग उक्तः । नित्यवस्तुप्रेप्सया तत्प्राप्त्युपायान्वेषणं पश्चादुक्तम् । अयं क्रमो ऽनित्यत्वमसत्यत्वमिति व्याख्याने युज्यते न त्वस्थायित्वमिति व्याख्याने । अस्थायिनं भोगं भुञ्जानस्तत्परित्यागे स्थायिभोगलाभमालक्ष्य हि ततो विरज्यते नान्यथा । अनृतासक्तस्तु* तदनृतत्वनिश्चये सति तत्परित्यागे तथाभूतसत्यवस्तुलाभप्रतिसंधानाभावे ऽपि ततो विरज्यते । न हि रजतार्थी क्व चन रजतभ्रमेण प्रवृत्तस्तन्मिथ्यात्वनिश्चये सति तत्परित्यागेन सत्यरजतस्य स्वलभ्यत्वप्रतिसंधानाभावे ततो न निवर्त्तते किं तु ततो निवृत्तः सत्यरजतप्राप्त्युपायं किं चित् पश्यति चेत् तत्र प्रवर्तते। तस्मान्नित्यानित्यवस्तुविवेकादिक्रमेण साधनचतुष्टयं ब्रह्मजिज्ञासाहेतुं वर्णयतो भगवतो भाष्यकारस्य सत्यमिदं सुखरूपमिति विशेषनिर्द्धारणमनपेक्ष्य कर्मफलानृतत्वनिर्द्धारणमेव वैराग्यादिक्रमेण साधनान्तराणां प्रवर्त्तकमित्याशयमालोच्य टीकाकारैराचार्य्यैश्च सामान्यतः सत्यमस्तीति विशिष्य बन्धमात्रमनृतमिति च विवेकः प्रथमसाधनत्वेन परिगृहीतः । तदनन्तरमक्षय्यादिवाक्यात् कर्मफलनित्यत्वसिद्धेस्तदनृतत्वमसिद्धम् अनृतस्य तत्त्वज्ञाननिवर्त्यत्वनियमादिति शङ्कायां तदनृतत्वसिद्ध्यर्थमेव† न्यायतस्तदनित्यत्वमतःशब्देन सूचितमिति न किं चिदवद्यम् ।

तदभ्यास इति । जननमरणपरिवृत्त्यादिरूपसंसारबन्धासत्यत्वदृढनिश्चयपर्य्यन्त इति शेषः ।

क्रियासमभिहारे इति । क्रियासमभिहारे लोट् लोटो हिस्वा· ४० । २२
विति पाणिनिसूत्रेण क्रियापौनःपुन्यविवक्षायां सर्वलकारापवादेन लोड् विहितः । तस्य परस्मैपदात्मनेपदयोर्यथाक्रमं हिस्वावादेशौ च विहितौ । ननु क्रियासमभिहारे लुनीहि लुनीहीत्येवायं लुनातीत्याद्युदाहरणेष्विव‡ जायस्व

---

* अनृताशङ्कस्त्विति २ पु· पा· ।   † तदनृतत्वं तत्सिद्ध्यर्थमेवेति २ पु· पा· ।

‡ उदाहरणान्तरेष्विवेति २ पु· पा· ।

जायस्वेत्येवमादीनि जायन्ते म्रियस्व म्रियस्वेत्येवं म्रियन्तइति द्विर्भावस्तस्य तस्य धातोरनुप्रयोगश्च प्राप्नोति तत्सूत्रवार्त्तिके द्विर्भावानुशासनाद् यथाविध्यनुप्रयोगः पूर्वस्मिन्निति सूत्रेण क्रियासमभिहारे तस्यैव धातोरनुप्रयोगनियमनाच्च* । नैष दोषः । क्रियासमभिहारवज् जननमरणरूपक्रियाद्वयसमुच्चयस्याप्यत्र विवक्षितत्वात् । समुच्चये ऽन्यतरस्यामिति सूत्रेण समुच्चये ऽपि लोण्मध्यमपुरुषैकवचनविधानात् । तत्र हि न द्विर्भाववार्त्तिकमस्ति नापि यथाविध्यनुप्रयोगविधानमस्ति किं तु समुच्चये सामान्यवचनस्येति सूत्रेण तावत् क्रियाविशेषानुगतसामान्यवचनस्यानुप्रयोगो विहितः । ओदनं भुङ्क्ष्व क्षीरं पिब धानाः खादेत्येवायमभ्यवहरतीत्यादि तदुदाहरणम् । इहापि जननमरणानुगतसामान्यरूपविपरिवृत्तिवाचिनो ऽनुप्रयोगो ऽस्ति । असकृदावर्त्तीनि भूतानि भवन्तीति क्रियासमभिहारसमुच्चयोभयविवक्षायां च समुच्चयविवक्षाप्रयुक्तमेव कार्यं भवति । विप्रतिषेधे परं कार्य्यमिति स्मरणात् ।

४२ । २ **कात्यायनेन त्विति ।** चतुर्थी तदर्थमात्रेणेति चेत् सर्वप्रसङ्गो ऽविशेषादिति यथाश्रुतसूत्रार्थे अनुपपत्तिप्रदर्शकमेकं वार्त्तिकं सर्वप्रसङ्गः सर्वस्य चतुर्थ्यन्तस्य तदर्थमात्रेण समासप्रसङ्गः रन्धनाय स्थाली अवहननायोलूखलमित्यादावपि समासः प्रसज्येतेत्यर्थः । विकृतिः प्रकृत्येति चेदश्वघासादीनामुपसंख्यानमिति वार्त्तिकान्तरं यदि विकृतिवाची चतुर्थ्यन्तशब्दः प्रकृतिवाचिना समस्यतइति विशेष्यते तदा सर्वप्रसङ्गः परिहृतो भवति । किं तु अश्वाय घासो ऽश्वघास इति समासो न प्राप्नोति प्रकृतिविकारभावाभावात् । अतस्तत्संग्रहार्थमुपसंख्यानं यत्नान्तरं कर्त्तव्यमित्यर्थः । एवमश्वघासादिषु चतुर्थीसमास इति वार्त्तिककारमतम् । एतदवलम्बनेनैव धर्माय जिज्ञासा धर्मजिज्ञासेति शबरस्वामिभिश्चतुर्थीसमासः समाश्रितः ।

। ७ **कात्यायनेनैवेति ।** कात्यायनग्रहणमनादरेण शब्दाभियुक्तमात्रोपलक्षणं भाष्यकाराभिप्रायम् । भाष्यकारैः खलु तत्र वार्त्तिकमुल्लङ्घ्य यथाश्रुतसूत्रं समर्थयमानैः षष्ठीसमासः समाश्रितः । अत्रेदं भाष्यकारीयं वार्त्तिकप्रत्याख्यानम् । प्रकृतिविकृतिग्रहणाय यत्नस्तावन्न कर्त्तव्यः । सूत्रे बलिरक्षित-

* नियमाच्चेति ४ पु॰ पा॰ ।

ग्रहणेन ज्ञापकेन तदर्थसिद्धेः । यदि हि तदर्थसमासस्तदर्थमात्रविषयः स्यात् तदा कुबेराय बलिः कुबेरार्थो भवति अश्वाय रचितम् अश्वार्थं भवतीति कुबेरबलिः अश्वरचितमिति समासयोस्तदर्थसमासविधिनैव सिद्धेः पृथग्बलिरचितग्रहणं न कर्त्तव्यं स्यात् तत्कृतं ज्ञापयति तदर्थसमासः प्रकृतिविकृतिमात्रविषय इति । तथा ऽश्वघासाद्युपसंख्यानयत्नोपि न कर्त्तव्यः । तेषु षष्ठीचतुर्थीसमासयोः स्वरवैषम्याभावेन षष्ठीसमासोपपत्तेरिति । एवं सूत्रानुसारिभाष्यकारमतप्राबल्याद् वार्त्तिककारमतमनादृत्य चतुर्थीसमासासम्भव उक्तः । इदमेव भाष्यकारमतमनुसृत्य भट्टपादैर्धर्म्माय जिज्ञासेति शबरस्वामिवचनं षष्ठीसमासलब्धार्थिकार्थप्रदर्शनपरं न तु विग्रहप्रदर्शनपरम् तस्य ज्ञातुमिच्छेति निगमनवाक्येन षष्ठीसमासविभावनादिति व्याख्यातम् । आत्मनेपदपरस्मैपदशब्दयोः प्रकृतिविकारभावाभावे ऽपि तादर्थ्यसमासस्तु वैयाकरणाख्यायां चतुर्थ्या इत्यलुग्विधानसामर्थ्यात् । न च तस्मादेव ज्ञापकात् सर्वत्रापि तादर्थ्यसमासः शङ्कनीयः । तथा सति बलिरचितग्रहणवैयर्थ्यापत्तेरुक्तत्वात् ।

समासान्तरमुपसंख्यातमिति । षष्ठीसूत्रविहितं समासान्तरं भाष्यकारैरङ्गीकृतमित्यर्थः । न च ज्ञातं ब्रह्म विषयो ज्ञातं ब्रह्म प्रयोजनमिति ब्रह्म विषयप्रयोजनोभयरूपमिष्यते तत्र प्रयोजनत्वप्रतिपत्त्युपयोगी चतुर्थीसमास इहाऽसाधुरिति त्यक्तः । एवमेवात्र विषयत्वप्रतिपत्त्युपयोगी षष्ठीसमासो ऽप्यसाधुरेव । तथा हि । केन सूत्रेणेह षष्ठी । षष्ठी शेषे इति सूत्रेण वा कर्तृकर्मणोः कृतीति सूत्रेण वा । नाद्यः । कर्मत्वं वाच्यं परिग्राह्यमिति शेषषष्ठ्यास्त्वया त्यक्तत्वात् । न द्वितीयः । प्रतिपदविधाना च षष्ठी न समस्यतइति वार्त्तिकेन वैशेषिकसूत्रविहितषष्ठ्याः समासप्रतिषेधात् । अत एव सर्पिषो ज्ञानमित्यत्र सर्पिषा करणेन प्रवृत्तिरित्यर्थके ज्ञो ऽविदर्थस्य करणे इति सूत्रेण वित्तिव्यतिरिक्तप्रवृत्तिरूपार्थान्तरमुक्तम् । ज्ञानातिकरणत्वनिमित्ता प्रतिपदविहिता षष्ठीति न समास इत्याशङ्क्याह **कर्त्तृकर्मणोः कृतीति** । कर्मत्वस्य वाच्यत्वसिद्ध्यर्थं द्वितीयपक्ष एवात्र परिगृह्यते । अस्ति ह्यत्र कृद्योगः जिज्ञासापदस्य अ प्रत्ययादिति प्रत्ययान्तधातोरुपरिविहिताकारप्रत्ययान्तत्वाद् अकारप्रत्ययस्य च कृदतिङिति

सूत्रेण कृत्सञ्ज्ञकत्वात् । न च समासाऽसम्भवः । कृद्योगलक्षणा च षष्ठी समस्यतइति प्रतिपदविधानत्वे ऽपि कृद्योगनिमित्तषष्ठ्याः समासाभ्यनुज्ञानादिति भावः । ननु कृद्योगलक्षणषष्ठीष्वपि कर्मणि या षष्ठी तस्याः समासः कर्मणि चेति सूत्रेण प्रतिषिद्ध इत्याशङ्क्याह **यस्तु कर्मणीति** । कर्मणि चेति सूत्रेण कर्मषष्ठीमात्रस्य समासप्रतिषेधो न भवति । तथा सति कर्तरि चेति सूत्रवैयर्थ्यप्रसङ्गात् । तेन हि सूत्रेण कर्तरि यौ तृजकौ ताभ्यां सह कर्मणि षष्ठ्याः समासो निषिध्यते अपां स्रष्टा ओदनस्य भोजक इत्यादौ । न च कर्मषष्ठीमात्रस्यात्र समासनिषेधे तत्सफलं भवेद् अतः कर्मणि चेति सूत्रे चकार इतिकारार्थः । कर्म्मणीति शब्दमुच्चार्य या षष्ठी नियमिता सा न समस्यतइति तदर्थः । ततश्चोभयप्राप्तौ कर्मणीति सूत्रेण कर्मणीति शब्दमुच्चार्य्य नियमिता षष्ठी तस्य समासप्रतिषेधस्य विषयो न तु कर्तृकर्मणोः कृतीति सूत्रविहिता कर्मणि षष्ठीत्यर्थः ।

नन्विहाप्युभयप्राप्तिसूत्रनियमितैव कर्मणि षष्ठी । तस्य हि सूत्रस्यैषमर्थः । कर्तृकर्मणोरुभयोः षष्ठीप्राप्तिर्यत्रैकस्मिन् कृति भवति तस्मिन् कृति सति कर्मण्येव षष्ठी न कर्तरीति । तथा चात्र साधनचतुष्टयसम्पन्नः कर्ता यदि श्रूयेत* तदा तस्मिन्नपि कर्मणीव कर्तृकर्मणोः कृतीति सूत्रेण षष्ठ्याः प्राप्तौ निमित्तं भवति जिज्ञासेति कृत्प्रत्ययः । अतो ऽत्र कर्मणि चेति समासप्रतिषेधः स्यादेवेत्याशङ्क्याह **सामर्थ्यादुपादानप्राप्ताविति** । कृत्वोर्थ-
४३ । ५ प्रयोगे काले ऽधिकरणे इति व्यवहितपूर्वसूत्रात् प्रयोग इत्यनुवर्तते । तच्च कर्तृगतकिञ्चिदतिशयविवक्षासामर्थ्यात् कर्तृकर्मोभयप्रयोगावश्यम्भावपरम् । एवं चाश्चर्य्यो गवां दोह इत्यादिरेवोभयप्राप्तिसूत्रविषयः । तत्र ह्याश्चर्य्यशब्दसूचितकर्तृगतातिशयोपपादनोपयोगितया दुर्दोहत्वरूपाऽजादिवैलक्षण्यसूचनाय गोत्वेन दोहकर्म्मणः तद्दोहाऽसामर्थ्यसम्भावनासूचनायाऽशिक्षितत्वादिना दोहकर्तुश्चोपादानमपेक्षितं कृतं नेह तथा किं चिदतिशयविवक्षया कर्तुरुपादानं कृतमस्तीति नात्रोभयप्राप्तिसूत्रेण कर्मणि षष्ठीनियमनमित्यर्थः । ननु यत्र कर्तृकर्मोभयप्रयोगो नास्ति तत्र गम्यमाने ऽपि कर्मण्युभयप्राप्तिसूत्रेण कर्तरि षष्ठ्याः प्रतिषेधमभिप्रेत्य तृतीयाप्रयोगः सूत्रकारेणैव कृतो

* श्रूयते इति २ पु· पा· ।

दृश्यते । अन्तर्द्धौ येनादर्शनमिच्छतीति अन्तर्द्धिनिमित्तं यत्कर्तृकदर्शनाभावं
स्वात्मनः कर्मणो ऽन्तरङ्गप्रत्यासत्त्या गम्यमानस्येच्छति तस्यापादानसञ्ज्ञा
अनेन सूत्रेण विधीयते तथा चोपाध्यायादन्तर्द्धत्तइत्यत्र पञ्चमी भवति । न च
कर्मणि गम्यमाने एवोभयप्राप्तिसूत्रप्रवृत्तिवत् कर्त्तरि गम्यमानइति विशेषः शङ्क-
नीयः । कर्तृकर्मोभयोपादाननियमभङ्गे सत्यस्य विशेषस्याप्रयोजकत्वादितीहा-
ऽपरितोषश्चेद् एवं परिहारो द्रष्टव्यः । अकाकारयोः प्रतिषेधो नेति वक्तव्यं शेषे
विभाषेति भाष्यकारैरुभयप्राप्तौ कर्मणीति कर्त्तरि षष्ठीप्रतिषेधस्य अके अकारे
च कृति नित्यमप्रवृत्तिः स्त्रीप्रत्ययरूपे कृति तद्व्यतिरिक्तमात्रे वा विक-
ल्पेनाप्रवृत्तिश्चोक्ता उदाहृतं च भेदिका देवदत्तस्य काष्ठानां चिकीर्षा विष्णु-
मित्रस्य कटस्येति शोभना खलु पाणिनेः सूत्रस्य कृतिः शोभना खलु
पाणिनिना सूत्रस्य कृतिरिति च । तस्मादिह जिज्ञासेत्यकारप्रत्यययोगाद्
नोभयप्राप्तिसूत्रविषयत्वशङ्कावकाश इति । अयमपि परिहारो जिज्ञासापद-
स्याकारप्रत्ययान्तत्वं दर्शयद्भिराचार्य्यैः सूचितः ।

व्याख्यातमिति । चरमत्वात्स्फुटत्वपरतयेति शेषः । परमा ४३ । ११
प्तस्य सूत्रकारस्योपदेशमात्रेणापि विश्वासः स्यादित्याशङ्क्य न्यायसूत्रइति
विशेषितम् । **फलेच्छाया एवेति** । फलेच्छैव हि स्वसाधनत्वोपाधिना
उपायेच्छामादधाति । अत उपायेच्छा फलविषयापि भवतीत्येतद् युज्यत-
इति भावः । **आर्थिके चास्मिन्निति** । टीकायामेषितव्यमित्युक्त्या सूत्रे
जिज्ञासा कर्त्तव्येति कर्त्तव्यपदाध्याहारः सूचितः । स तु जिज्ञासापदस्य कृति-
योग्यविचारार्थकत्वाभिप्रायो न भवति ब्रह्मजिज्ञासाया अनधिकार्यत्वा-
दिति भाष्ये जिज्ञासाशब्दस्यानधिकार्य्यज्ञानेच्छापरत्वस्याङ्गीकृतत्वात् किं
त्वार्थिकविचारकर्त्तव्यत्वाभिप्राय इत्यर्थः ।

अर्थविवक्षाप्रतिज्ञावदिति । नन्वर्थविवक्षाप्रतिज्ञा विचारप्रतिज्ञेति ४४ । ८
नास्ति प्रतिज्ञाद्वयं धर्मजिज्ञासासूत्रे* येनाद्यप्रतिज्ञायां धर्मग्रहणं वेदार्थमात्रोप-
लक्षणं न द्वितीयप्रतिज्ञायामिति विभज्येत किं त्वेकैव तत्र विचारप्रतिज्ञा वेदस्य ।
विवक्षितार्थत्वं त्वतःशब्देन तत्र हेतुतयोच्यते तद्धेतूकरणसामर्थ्याच्च वेदस्या-
ध्ययनविनियोगशेषत्वेन विषनिर्हरणादिमन्त्रवदविवक्षितार्थत्वशङ्का निरस्य-

* जै॰ सू॰ अ॰ १ पा॰ १ सू॰ १ ।

तद्गति चेत् । सत्यम् । धर्ममात्रस्य तत्र विचार्य्यत्वप्रतिज्ञायामपि विशिष्य धर्मपरवेदभागमात्रस्य विवक्षितार्थत्वं न हेतुः । तथा सति वेदान्तभागस्य अविवक्षितार्थत्वशङ्कायां न्यायतौल्येन पूर्वभागस्यापि तद्वदविवक्षितार्थत्वमस्त्विति शङ्कायाः स्थिरीकरणापत्तेः । किं तु कृत्स्नवेदाध्ययनानन्तर्य्यस्याथशब्दार्थत्वाद् अधीतस्य कृत्स्नस्य वेदस्य विवक्षितार्थत्वं हेतुतयोच्यते इत्यत्र तात्पर्यम् । एवं च धर्मग्रहणस्य वेदार्थमात्रोपलक्षणत्वादिति टीकायां धर्मस्य यद्ग्रहणम् अतः शब्दोक्तविवक्षितार्थत्वे हेतावर्थशब्देनोपादानं तस्य वेदार्थमात्रोपलक्षणत्वादित्यर्थो दर्शितो भवति । टीकायामपि स एवार्थः प्रकृतोपयोगी । तत्र हि ब्रह्मजिज्ञासासूत्रं ब्रह्मज्ञानेच्छोपदर्शनमुखेन तदर्थायां ब्रह्ममीमांसायां प्रवर्त्तनार्थं न तु वेदान्ताध्ययने प्रवर्त्तनार्थं वेदान्तानां विवक्षितार्थत्वोपपादनार्थं वेत्युक्त्वा वेदान्ताध्ययने प्रवृत्तेरध्ययनविधिना सिद्धत्वादिति हेतुं स्पष्टत्वादप्रदर्श्य वेदान्तानां विवक्षितार्थत्वस्य फलवदर्थावबोधपरतामध्ययनविधेः सूचयता धर्मजिज्ञासासूत्रेणैव* सिद्धत्वादिति हेतुः प्रागुक्तः । तदुपादानार्थं विवक्षितार्थत्वादिति हेतावर्थग्रहणस्य वेदान्तार्थसाधारण्यमेव वक्तव्यं न तु धर्मजिज्ञासेत्यत्र धर्मग्रहणस्य । अत इह टीकाकारैर्धर्मशब्दस्य वेदार्थमात्रोपलक्षणत्वं वदद्भिः धर्मजिज्ञासासूत्रं वेदार्थविचारप्रतिज्ञापरं विंशतिलक्षणीसाधारणमङ्गीकृतमिति न मन्तव्यम् ।

४४ । २० **सामान्यतोदृष्टानिबन्धनवचनव्यक्त्याभासप्रतिबद्धः संदिग्धार्थः स्यादिति ।** यद्यपि तत्त्वमसीत्यादिर्वेदान्तस्वारस्येन ब्रह्मात्मैक्यं बोधयति तथाप्यन्यत्र क्व चिद् दृष्टमित्येतावन्मात्रमवलम्ब्य प्रकृतान् वचनव्यक्त्याभासान् वाक्ययोजनाभासान् वादिभिरुत्प्रेक्षितान् पश्यतस्तैः प्रतिबद्धः सन् वेदान्तः संदिग्धार्थः स्यात् । तथा हि । अनृक्षरा ऋजवः सन्तु पन्था इत्यत्र पन्थान इति बहुवचनस्य सुपां सुलुगित्यादिसूत्रेण स्वादेशो दृष्टः उत यत्सुन्वन्ति सामिधेनीस्तदन्वाहेत्यत्र यत्तद्भ्यां सप्तम्यास्तेनैव सूत्रेणालुग् दृष्टः गायत्री छन्दसां मातेत्यत्र द्वितीया प्रथमार्थे इति विभक्तिव्यत्ययो दृष्टः । एवं तत्त्वमसीत्यत्र तदित्यस्मात् चतुर्थ्याः स्वादेशो लुग् विभक्तिव्यत्ययो वेति तस्मै जगत्कारणाय ब्रह्मणे त्वं

* जै. सू. अ. १ पा. १ सू. १ ।

त्वदात्मा समर्पणीय इत्यर्थः । ब्रह्मणे त्वा महस ॐ इत्यात्मानं युञ्जीतेति श्रुत्यन्तरात् । अथ वा पञ्चम्याः स्वादेशादिभिस्त्तमात्त्वं तस्माज्जातस्त्वमित्यर्थः । यतो वा इमानि भूतानि जायन्तइति श्रुत्यन्तरात् । अथ वा षष्ठ्याः स्वादेशादिभिस्तस्य त्वं तत्स्वामिकस्त्वमित्यर्थः । सकारणं करणाधिप इति श्रुत्यन्तरात् । अथ वा सप्तम्याः स्वादेशादिभिस्तस्मिँस्त्वं तदाश्रितस्त्वमित्यर्थः । प्राणबन्धनं हि सोम्य मन इति तत्रैव श्रवणात् । अथ वा ब्राह्मणस्त्वं मनुष्यस्त्वमित्यादिवत् शरीरशरीरिभावनिबन्धनं तत्त्वमिति सामानाधिकरण्यं यस्यात्मा शरीरमिति श्रुत्यन्तरात् । अथ वा अघोरा पापकाशिनीत्यत्रेवाऽकारप्रश्लेषादतत्त्वमसीति च्छेदः द्वा सुपर्णेत्यादिभेदश्रुत्यनुरोधादिति । एवं

मीमांसका हि वाक्यार्थविचारे प्रस्तुते सति ।
लोकदृष्टैः प्रतिघ्नन्ति वचनव्यक्तिपांसुभिः ॥

इति ग्रहाधिकरण*वार्तिकोक्तरीत्या तत्तदुत्प्रेक्षितवचनव्यक्त्याभासापादितसन्देहाक्रान्ता तत्त्वमस्यादिवाक्यजन्या ब्रह्मात्मैक्यधीरापाततः प्रसिद्धिरित्यर्थः । वचनयुक्त्याभासेति पाठे द्वा सुपर्णेत्यादयो भेदप्रतिपादनच्छायापत्त्या वचनाभासाः तदुपोद्बलकयुक्तयो युक्त्याभासाः । सामान्यतोदृष्टवचनव्यक्त्या ऽऽपाततः प्रसिद्धेः सन्दिग्धार्थः स्यादिति पाठः प्रागुक्त एवार्थे योजनीयः । सामान्यतोदृष्टेन या वचनव्यक्तिस्तया ऽर्थान्तराणामप्यापाततः प्रतीतेः सन्दिग्धार्थः स्यादिति ब्रह्मात्मस्वरूपनिर्णायकवाक्येष्वर्थसंदेहे ऽपि† नित्यानित्यवस्तुविवेकान्तर्गतबन्धमिथ्यात्वसद्रूपतदधिष्ठानावश्यम्भावनिश्चयो मोक्षार्थप्रवृत्त्युपयोग्यन्तःकरणशुद्ध्यापादककर्मानुष्ठानमहिम्नेति प्रागेवोक्तम् ।

ततस्तु प्राग् देहाद्यभेदेनेति टीकाग्रन्थो न चार्वाकमताभिप्रायः । तन्मते मुक्तौ देहात्मनोर्भेद इत्यस्याभावात् । नापि भ्रान्तिकृताऽभेदाभिप्रायः । तस्य सिद्धान्त्यभिमतत्वेनानिराकार्य्यत्वादित्याशङ्क्य तत्तात्पर्य्यमाह भेदा- ४४ । २५
भेदमतेन शङ्केति । षष्ठ्योः सामानाधिकरण्ये हेतुमाह जीवस्य हीति । तत्पदार्थस्य धर्म्मिणो जीवात् पदार्थान्तरत्वे हि धर्म्यपि तत्पदेनापूर्वतया बोधनीयः । न तु स जीवात् पदार्थान्तरमिति तद्गतं शुद्धत्वाद्येव संसार-

---

* जै॰ सू॰ अ॰ ३ पा॰ ३ सू॰ १४ । † वाक्ये स्वार्थसंदेहेति २ पु॰ पा॰ ।

दशायामविद्यातिरोहितत्वेनाप्रसिद्धं तेन ज्ञापनीयमतस्तत्पदार्थस्य शुद्धत्वादेश्चेति न वैयधिकरण्यमित्यर्थः । यद्यपि तत्पदार्थस्य यत् शुद्धत्वादीत्येव वैयधिकरण्यं वक्तुं शक्यं तथापि त्वम्पदार्थ एव तत्पदार्थ इत्यभेददृढीकरणाय तदपि परित्यक्तमित्यर्थः । सर्वस्य ब्रह्मास्तित्वप्रसिद्धिरिति साध्यं
४६ । ११ सर्वो हि तत्प्रत्येतीति हेतुरिति तयोरविशेषशङ्का । **तत्पदार्थमात्रस्य प्रसिद्धिरिति** । तत्पदबोध्यस्य धर्मिण इत्यर्थः । न तु प्राचीनटीकाग्रन्थइव तद्बोध्यस्य शुद्धत्वादेरित्यर्थः तस्य प्रसिद्ध्यभावेनानुवादायोगात् । **वस्त्वभावसाधिकेति** । रजताभावप्रतिपत्तिर्हि रजतबाधिका दृष्टा तथेहापि स्यादित्यर्थः । **साधारणाकारदृष्टाविति** । साधारणधर्मिदृष्टावित्यर्थः । विप्रतिपत्तिजन्यसंशये समानधर्मदर्शनस्यानपेक्षितत्वाद् अग्रे विरुद्धप्रतिपत्त्योः साधारणालम्बनस्य धर्मिण एवात्र सद्भावोपपादनदर्शनाच्च । एवं च न त्विहेत्याद्यग्रिमवाक्ये ऽपि साधारणो धर्मीत्येव पाठो युक्तः । अत एव साधारणधर्मिस्फुरणे ऽपीत्यग्रिमग्रन्थे सकलकोशेषु धर्मिशब्दस्यैव पाठः । **न हि साधारणः शास्त्रार्थ इति** । सन्देहविषयकोटिद्वयसाधारणो धर्मी न शास्त्रप्रतिपाद्यः संप्रतिपन्नत्वादित्यर्थः । **तत्पदार्थप्रतीतेरिति** । आस्तिकभेदवादिषु निरीश्वरवादिनां तत्पदार्थप्रतीतिर्गौणतायां सेश्वरवादिनां तत्त्वमर्थैकत्वप्रतीतेः (गौणतायामिति विगानमित्यग्रेतनेनान्वितम् । सांख्या निरीश्वरा अपि चेतनाः प्रतिदेहं भिन्ना इति मेनिरे इति सम्बन्धः । तत्र हेतुमाह जननेति) * । **स्मृत्यादिभिश्चेति** । स्मरन्ति च† अपि च सप्त‡ बहिस्तूभयथापि स्मृतेराचाराच्च§ आचारदर्शना‖दित्यादिसूत्रैर्नरकयातनासद्भावारूढपतितबहिष्करणादौ प्रमाणत्वेनोपनिबद्धानां स्मृत्याचाराणां प्रामाण्यं वेदमूलत्वेनेति तैर्वेदानुमानेश¶ अनुमानस्वरूपनिर्णयस्योपयोग इत्यर्थः ।
४८ । ७ **तेन विहितेति**** । यस्मान्न्यायशास्त्रे लक्षणमुखेन प्रमाणप्रमेयादिविवेचनं कृतं तेन हेतुना समाननामरूपत्वादित्यादिसूत्र††निबद्धे वैदिकानां यागदेवतासमर्पकेन्द्रादिशब्दानां जातिरर्थ इति विवेके जानश्रुतौ शूद्रशब्दस्य न

---

* ( ) एतदन्तरालगतो ग्रन्थो नास्ति ३-४ पु॰ नास्ति ।

† व्या सू॰ अ॰ २ पा॰ ३ सू॰ ७४ ।

‡ व्या॰ सू॰ अ॰ ३ पा॰ १ सू॰ १५ ।

§ व्या॰ सू॰ अ॰ ३ पा॰ ४ सू॰ ४३ ।

‖ व्याससू॰ अ॰ ३ पा॰ ४ सू॰ ३ ।

¶ अनुमानैश्चेति ४ पु॰ पा॰ ।

** वेदविहितेतीति १-४ पु॰ पा॰ ।

†† व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ३० ।

शूद्रत्वजातिरर्थः किं तु यौगिकत्वेन व्यक्तिरिति विवेके च जातिव्यक्तिपदार्थविवेचनद्वारा आनुमानिकवेदस्वरूपग्रहणे ऽनुमाननिर्णयद्वारा च न्यायशास्त्रस्योपयोग इत्यर्थः । इति प्रथमसूत्रम्* ॥

जन्माद्यस्य यतः ॥ २ ॥ ४८ । १०

यतो वेति । ननु यतो वेत्यादिवाक्यस्य ब्रह्मलक्षकत्वालक्षकत्वसंशयो न तदुक्तलक्षणस्य जगज्जन्मादेः प्रसिद्ध्यप्रसिद्धिभ्यां किं तु विरोधाविरोधाभ्याम् आनन्दाद्ध्येवेति वाक्यस्यैव संशयस्तदुक्तस्वरूपलक्षणस्य प्रसिद्ध्यप्रसिद्धिभ्याम् अतः कथमेवमुक्तमिति चेत् । उच्यते । स्वरूपलक्षणमपि यतो वेत्यादिवाक्यमूलम् । तदुक्तं जगत्कारणमनूद्य हि तस्यानन्दत्वविधायकमानन्दवाक्यम्† । अत इत्थमुक्तौ नानुपपत्तिः । ननु जन्माद्यस्य यत इति सूत्रोपात्तस्य पूर्वपक्षसिद्धान्ताभ्यां प्रथमं समर्थ्यमानस्य तटस्थलक्षणस्य विरोधाऽविरोधाभ्यां यतो वेत्यादिवाक्यस्य ब्रह्मलक्षकत्वालक्षकत्वसंशय एवाधिकरणाङ्गत्वेन दर्शयितुं युक्तः न त्वतथाभूतस्य स्वरूपलक्षणस्य प्रसिद्ध्यप्रसिद्धिभ्याम् यतो वेत्यादिवाक्यस्यानन्दवाक्यद्वारा ब्रह्मलक्षकत्वालक्षकत्वसंशय इति चेत् । उच्यते । सकलेतरव्यावृत्तलक्ष्यबोधनसमर्थमिह लक्षणं निर्द्धारणीयं जगज्जन्मादिकं तु न तथा किं तु शाखाग्रे चन्द्र इतिवत्तटस्थलक्षणम् । यद्वा दिगन्तरस्थिततारकादिभ्य एव व्यावर्त्तकं न तु शाखोर्ध्वदेशगत‡चन्द्रसमीपवर्त्तितारकादिभ्यः । एवं जगज्जन्मादिकमसम्भावितकारणभावेभ्य एव व्यावर्त्तकं न तु सम्भावितकारणभावेभ्यः प्रधानपुरुषादिभ्यः । अतः प्रकृष्टप्रकाशवत् सकलेतरव्यावृत्तलक्ष्यबोधनसमर्थं स्वरूपलक्षणमेवेह तटस्थलक्षणद्वारा सूत्रकृता निर्दिधारयिषितं न तु तटस्थलक्षणमेव । अत एवाचार्य्यैस्तस्य च निर्णयवाक्यमित्यादिभाष्यस्य तात्पर्य्यं वक्ष्यते स्वरूपलक्षणपरत्वं सूत्रस्य दर्शयितुं तस्य चेति भाष्यमिति । तस्मात्प्रसिद्ध्यप्रसिद्धिमूलकसंशयस्याधिकरणाङ्गत्वेन प्रदर्शनं युक्तमेव ।

---

* अत्र १ जिज्ञासाधिकरणे—अथातो ब्रह्मजिज्ञासा इति १ सूत्रम् ।

† अनूद्य हि तस्यानन्दवाक्यमिति ४ पु० पा० । ‡ शाखोर्ध्वगतेति १-३ पु० पा० ।

४८ । २२ **आक्षेपे इति ।** आक्षेपाधिकरणमाक्षेप्याधिकरणसिद्धान्तफलेनैव फलवद् यथा औत्पत्तिकस्तु शब्दस्यार्थेन संबन्ध* इत्यधिकरणे शब्दार्थसंबन्धस्य नित्यत्वेन वेदस्य निरपेक्षबोधकत्वरूपप्रामाण्ये समर्थिते शब्दार्थसंबन्धस्य नित्यत्वमयुक्तं शब्दानामेवानित्यत्वादिति तदाक्षेपसमाधानार्थं प्रवृत्तं शब्दाधिकरणम्† । अपवादाधिकरणमपवादाधिकरणपूर्वपक्षफलेन फलवत् । यथा स्मृत्यधिकरणे‡ स्मृतीनां वेदमूलत्वेन प्रामाण्ये समर्थिते प्रत्यक्षश्रुतिविरुद्धस्मृतिषु वेदमूलत्वापवदनार्थं प्रवृत्तं विरोधाधिकरणम्§ । तदर्था चिन्ता यदर्था सा तत्फलेन फलवती । यथा दर्शपूर्णमासादिप्रकरणाम्नातान्यङ्गानि प्राकरणिकेष्वेव व्यवतिष्ठन्ते न तु सौर्य्यादिष्वप्युपदेशविधया पारिप्लवानि भवन्तीति । सप्रमाद्यचिन्ता सौर्य्यादिषु प्रयाजादीनामतिदेशेन प्राप्तिरित्यग्रिमचिन्ताफलेन फलवती । लक्षणनिरूपणं लक्ष्यपरिच्छेदेन फलवत् । इत्येतेषु नियतैकरूपफलविशेषावगतेः फलं न वक्तव्यं कृत्वा चिन्तायामन्यत्रैव फलमिति तत्र फलव्यतिरेकनिश्चयात् फलं न वक्तव्यमित्यर्थः ।

कारणत्वं त्विति । यद्यपि जन्यजनकभावसंबन्धेन जगद् ब्रह्म लक्षयतीति जगत एव ब्रह्मलक्षणत्वमनुपदमुक्तं तथापि व्यावृत्तिव्यवहारानुमानयोर्हेतूभवतो लक्षणस्य पक्षनिष्ठत्वेन भाव्यमिति ये मन्यन्तेताननुरुध्यैवमुक्तम् ।

४९ । ९ **जन्म आदिर्ययोरिति ।** ननु भाष्यानभिमतमतद्गुणसंविज्ञानमाश्रित्य विशेषविवक्षायां तस्मिन्नेव पक्षे यत्सूत्रगौरवमुच्यते तदनुपपन्नम् । तथा ह्यत्र विवक्षाविषयो न भवतीति प्रत्याख्येयो विशेषः किं वा तद्विषयो भवतीत्युपादेयं सामान्यम् । जन्मादित्रयमध्ये ऽतद्गुणसंविज्ञानबहुव्रीहिलभ्यं स्थितिभङ्गद्वयं विशेषः तद्गुणसंविज्ञानबहुव्रीहिलभ्यं जन्मादित्रयं सामान्यमिति चेत् कथमाद्यपक्षे गौरवं द्वितीयपक्षे तत्परिहारश्च । जन्मादिपदविग्रहवाक्यगतयत्पदविवरणार्थं जन्मस्थितिभङ्गानामितीतरेतरयोगद्वन्द्वाश्रयणे हि जन्म आदिर्येषामिति विग्रहलाभाज् जन्मादयो ऽस्य यत इति सूत्ररचनापत्त्या जन्मस्थितिभङ्गरूपसामान्यविवक्षायामेवातिगौरवं स्यात् । समाहारद्वन्द्वाश्रयणे तु स्थितिभङ्गद्वयरूपविशेषविवक्षायामपि न गौरवम् ।

---

* जै० सू० अ० १ पा० १ सू० ५ । † व्या० सू० अ० १ पा० ३ सू० २८ ।
‡ जै० सू० अ० १ पा० ३ सू० १-२ । § जै० सू० अ० १ पा० ३ सू० ३ ।

जन्म आदिर्यस्य स्थितभिङ्गस्येति विग्रहाश्रयणेन जन्माद्यस्य यत इत्येव सूत्र-रचनोपपत्तेः । न हि चयविवक्षायामेव समाहारद्वन्द्वाश्रयणं न द्वयविवक्षायामित्यस्ति नियमः । एतेन स्त्रीलिङ्गपुंल्लिङ्गे लिङ्गविशेषौ नपुंसकलिङ्गं तदुभयानुगतं सामान्यं न तु तृतीयं लिङ्गान्तरमिति शाब्दिकमर्यादाश्रयणेन विशेषसामान्यशब्दार्थग्रहणशङ्कापि निरस्ता । स्थितिभङ्गद्वयग्रहणे ऽपि लिङ्गसामान्यविवक्षायां जन्मादिषु त्रिष्वपि लिङ्गविशेषविवक्षायाश्च कर्तुं शक्यत्वेन गौरवलाघवस्थित्यभावात् । न हि लिङ्गविशेषलिङ्गसामान्यविषये द्विविग्रहणयोर्नियते । उच्यते । लिङ्गविशेषविवक्षायां गौरवं लिङ्गसामान्यविवक्षायां लाघवमित्येवात्र विवक्षितं मूलश्रुत्यनुसारेण जन्मादित्रयकारणत्वं लक्षणमिति तल्लाभार्थं तद्गुणसंविज्ञानबहुव्रीहिरेवात्राभिमतः । तदाश्रयणे च लिङ्गविशेषविवक्षायां जन्मादयो ऽस्य यत इति सूत्ररचनापत्त्या गौरवं स्पष्टमेव । तत्र यद्याशङ्केत तर्हि अतद्गुणसंविज्ञानबहुव्रीह्याश्रयणेन लिङ्गविशेषविवक्षा ऽस्त्विति तथापि जन्मादी अस्य यत इति सूत्ररचनापत्त्या गौरवमस्तीति विभावयितुं जन्म आदिर्ययोरित्यादिग्रन्थप्रवृत्तिरिति न कश्चिद्दोषः । ननु लिङ्गसामान्यविवक्षायामपि जन्मादीन्यस्य यत इति सूत्ररचनापत्त्या गौरवं स्यादित्याशङ्कानिराकरणार्थमुत्तरटीकाग्रन्थमवतारयति **तत्र नपुंसकैकवचनेति ।** इतरेतरयोगद्वन्द्वसमाश्रयणे लिङ्ग- ४९ । ११
सामान्यविवक्षाभ्यनुज्ञानाभावाज् जन्मादीनि इति सूत्ररचनापत्त्या गौरवं स्यात् । इह तु सर्वो द्वन्द्वो विभाषैकवद्भवतीति परिभाषासिद्धः समाहारद्वन्द्वः समाश्रीयते तत्र स नपुंसकमिति सूत्रेण लिङ्गसामान्यविवक्षा ऽभ्यनुज्ञातेति नपुंसकैकवचनेन सूत्रलाघवं लभ्यतइत्यर्थः ।

स्वभाव एव नियन्तेति । कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यमिति श्वेताश्वतरोपनिषन्मन्त्रेण कालकारणत्वादिवादाः प्रत्याख्याताः । कथमसतः सज्जायेतेति श्रुत्या त्वसत्कारणत्ववादः तैरिह पूर्वपक्षः कृतः । मन्त्रे पुरुषशब्दस्य विवरणं टीकायां ग्रहलोकपालशब्देन कृतम् । इदं हिरण्यगर्भादीनामप्युपलक्षणम् । क्रियाशब्देन नियतिशब्दस्य प्रधानशब्देन योनिशब्दस्येति विवेकः । अतिव्याप्तिशब्देन कालादीनामेव कारणत्वोपपत्तौ ब्रह्म कारणं नाभ्युपगन्तव्यमित्यसम्भवो

विवक्षितः । तत्र पुरुषपूर्वपक्षः श्रुत्यन्तरावलम्बनः । प्रश्नोपनिषदि हि षोडशकलं पुरुषं प्रस्तुत्य तं त्वा पृच्छामि क्वासौ पुरुष इति भारद्वाजप्रश्ने तस्मै स होवाच इहैवान्तः शरीरे सोम्य स पुरुषो यस्मिन्नेताः षोडश कलाः प्रभवन्ति स ईक्षाञ्चक्रे कस्मिन्न्वहमुत्क्रान्तउत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत् प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीमिन्द्रियं मनोन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोकाः लोकेषु नाम चेति जीवस्यैव प्राणादिनामान्तषोडशकलास्रष्टृत्वं श्रूयते । अयं च जीवपूर्वपक्ष इहैवाधिकरणे निराकार्य्यो न प्रधानादिपूर्वपक्षवदधिकरणान्तरे निराकृतः । कस्मिन्न्वहमुत्क्रान्तइत्यादिप्रश्नोपनिषद्वाक्यमपि परब्रह्मविषयमेव तान् होवाचैतावदेवाहमेतत् परं ब्रह्म वेद नातः परमस्तीति तदुपसंहारे पिप्पलादवचनात् सकलोपनिषत्प्रसिद्धस्य जीवाधिकस्य परब्रह्मणश्चापलपितुमशक्यत्वात् प्राणोत्क्रान्तिप्रतिष्ठाभ्यां परब्रह्मणः स्वोत्क्रान्तिप्रतिष्ठावत्त्वमीक्षणं तु स्वस्य तथाभूतजीवाभेदाभिप्रायेणेति तन्निराकरणं द्रष्टव्यम् ।

५० । ४ **यदसादिति प्रसिद्धमिति ।** यद्यपि स्रष्टव्यसजातीयगतानुभूताकारानुसन्धानेनापि सृष्टिः सम्भवति तथापि यत्रानुभूतादप्यतिशयितेन वैलक्षण्येन स्रष्टव्यमिति स्रष्टव्याकारानुसन्धानं तत्र तस्याकारस्य तदानीमसत्त्वप्रसिद्धिरस्तीति तात्पर्य्यम् । **इतरथा प्रेरणानुपपत्तेरिति ।** तथा च प्रबलन्यायविरुद्धतया यथाश्रुतार्थप्रतिपादनाक्षमेण यस्मिन् जातइत्याद्यर्थवादेन कथं चिल्लक्षणोन्नीतेन पितृगाम्येव फलं प्रतिपाद्यतइति कल्पनीयमिति भावः । **पितुः प्रीत्युत्पत्तेरिति ।** पुत्रगतमपि पूतत्वादिकं पशुहिरण्याद्यभिवृद्धिवत् पितुः प्रीत्युत्पादनद्वारा गौणपुरुषार्थो भवतीत्यर्थः । कारणत्वमेवेति पाठे ब्रह्म व्यवच्छिनत्तीत्यनुषङ्गः । कारणत्वादेवेति पाठे ब्रह्म व्यवच्छिन्नमित्यध्याहारः ।

५१ । १ **सांख्यप्रक्रियेति ।** धर्मलक्षणावस्थापरिणामभेदान् पातञ्जला व्यवहरन्ति । पातञ्जले हि योगशास्त्रे परिणामत्रयसंयमादतीतानागतज्ञान*मिति परिणामत्रयविषयं धारणाध्यानसमाधिरूपं संयमं फलाय विधातुं

* योगसूत्र॰ पा॰ ३ सू॰ १६ ।

चित्तस्य परिणामत्रयलक्षणानन्तरं सूचितम् । एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याता* इति तदिह सेश्वरसाङ्ख्याऽनतिभिन्नत्वात् साङ्ख्यशब्देनोक्ताः । **सोप्युत्पत्तिरिति** । वर्तमानत्वादिरपि तत्तत्कालोपाधिविशेषोत्पत्तिरित्यर्थः । **पुरुषाणामिति** । पुरुषवाक्यं हि मूलप्रमाणसापेक्षम् । तदिह न तावच्छ्रुतिः श्रुतेर्जन्मादिचित्तयविषयत्वात् । नापि तदीयं प्रत्यक्षं मूलकारणाधीनमहाभूतजन्मादिषु प्रत्यक्षाप्रवृत्तेरित्यर्थः । अतीन्द्रियार्थद्रष्टृत्वमपि पुरुषगौरवादनुमेयमित्याशङ्क्याह **न चेति** । **अन्यथाप्युपपत्तेरिति** । यास्कादयः स्वकाले हेमादीनां विकारषट्कं दृष्ट्वा पठितवन्त इत्यप्युपपत्तेर्नातीन्द्रियार्थे प्रत्यक्षं कल्पनीयमित्यर्थः । एतेन यास्कवचनस्य स्मृतित्वान्मूलश्रुत्यनुमानमपि निरस्तम् । दृष्टमूलाभावे एव तदनुमानादिति भावः ।

वेदान्तेति । वेदान्तविचारः कर्तव्य इत्यार्थिकप्रतिज्ञायामित्यर्थः । ५१ । २३
ननु चोदनासूत्रवज् जन्मादिसूत्रं लक्षणप्रमाणोभयपरमस्तु जन्यजनकभावेन लक्षणीभवतो जगतः सकर्तृकत्वानुमाने हेतुभावस्याप्युपपत्तेः । अत उत्तराधिकरणवैयर्थ्यमेवेत्याशङ्क्य कार्येण कारणमनुमीयतां नाम तदेकत्वादिसिद्धौ तु श्रुतिरेव शरणीकरणीयेत्युत्तराधिकरणं सार्थकमित्याह **कार्येण चेति** । ननु कार्यत्वलिङ्गेन जगतः कारणानुमानानन्तरं प्रवृत्तेस्तदेकत्वानेकत्वसंशये लाघवतर्कवशादुत्कटकोटिकसंशयरूपा सम्भावना संपद्यत इत्येतदयुक्तम् । न हि तर्कः किंचित्कोटिसहचरितानेकधर्मोपलम्भवत्किंचित्कोटिभूयोदृष्टसहचारैकधर्मोपलम्भवच्च कोट्युत्कटत्वनियामकत्वेन क्लृप्तः किं तु प्रमाणानुग्राहकत्वेन । तथा च कार्यत्वलिङ्गकानुमानाद् भवन्ती सकर्तृकत्वानुमितिरेव लाघवतर्कोपनीतकर्त्रैकत्वमपि विषयीकुर्वाणा सत्येककर्तृकत्वानुमितिः संपद्यत इत्येव युक्तम् । गोपुरप्राकारादिषु बहुकर्तृकत्वेन निश्चितेषु लाघवावतारासंभवेऽपि तथात्वेनानिश्चितेषु वियदादिषु तदवतारे बाधकाभावादिति चेत् । मैवम् । लाघवतर्केणानुमितेर्विषयगौरवापादनस्य विरुद्धत्वात् । एककर्तृकत्वं हि अनेककर्तृकत्वाभावविशिष्टसकर्तृकत्वं न त्वेकत्वसंख्याविशिष्टकर्तृकत्वमात्रमपि । बहुष्वपि प्रत्येकमेकत्ववै-

* योगसूत्र· पा· २ सू· १३ ।

शिष्टसत्त्वेन तद्विषयत्वस्य बहुकर्तृकत्वाविरोधित्वात् । एवमतिगुरुविषयापादकः कथं लाघवतर्कव्यपदेशं लभेत । न ह्येवंभूतं लाघवं प्रमाणानुग्राहकं सम्प्रतिपन्नमस्ति यदग्रे वस्तुलाघवसिद्ध्यर्थं स्वानुग्राह्यप्रमाणस्य विषयगौरवमापादयेत् तथा सति हीष्टपुरोवर्तिज्ञानं प्रवृत्तिकारणं गृह्णतः प्रमाणस्यानुग्राहको लाघवतर्को विसंवादिप्रवृत्तिस्थले व्यधिकरणप्रकारकज्ञानाऽकल्पनया वस्तुलाघवसिद्ध्यर्थं भेदाग्रहं कारणतावच्छेदकत्वेनोपनयेद् न तु ज्ञानवित्तिवेद्यतयोपस्थितमिष्टं पुरोवर्तिवैशिष्ट्यम् । तस्मात्सकर्तृकत्वानुमानानुग्राहकभावात् प्रच्युतो ऽयं लाघवतर्कः स्वयमप्रमाणत्वात् स्वातन्त्र्येण कर्त्रैकत्वनिश्चयमुत्पादयितुमक्षमः कर्त्रैकत्वानेकत्वसंशयस्यैकत्वकोटावुत्कटत्वमात्रं संपादयन्नुपकरोतीति कल्पनं युक्तम् । न तु प्राकारगोपुरादिषु दृष्टिमवलम्ब्य प्रवृत्तां तदनेकत्वकोटिं सर्वथा निवर्तयतीति एककोटिनिर्द्धारणाक्षमस्य सर्वथा कोट्यन्तरनिवर्तकत्वायोगात् । तस्य सम्भावनाजननमात्रेणाप्यनुपकारकत्वे लाघवात् कर्त्रैकत्वसर्वज्ञत्वादिसिद्धिमभिमन्यमानानां भ्रान्तेर्निरालम्बनत्वापत्तेश्च । वस्तुतस्तु लाघवतर्को ऽपि स्वतो दुर्बलः । अतिविचित्ररचनस्यापि प्रपञ्चस्य बहुविधापरिमितगोपुरप्रासादमण्डपमहातडागादियुक्तस्य महतो नगरस्येव क्रमसंभूताऽसर्वज्ञाऽसर्वशक्तिकसंप्रतिपन्नाऽनेकसंसारिकर्तृकत्वेनापि सिद्ध्युपपत्तौ सर्वज्ञसर्वशक्तिकै*ककर्त्रन्तरकल्पनएव गौरवात् । किं तु तथाभूतैककर्तृप्रतिपादकवेदान्तवाक्यनिकुरुम्बसमाश्रयणेनैव लब्धबलस्तस्याप्यनुग्राहको भवति । सोयं वनसिंहहृदनक्रादिन्यायः । किरातैर्हन्तुं शक्योऽपि सिंहो महद्वनं शरणं प्रविश्य दुराधर्षस्तेभ्यो न बिभेति वनं च तत् सिंहाधिष्ठानानुगृहीतं तैर्दुष्प्रवेशं भवति । तदिदं सर्वं तदुपजीवि चेत्यपि द्रष्टव्यमिति टीकाग्रन्थेनैव विभावयिष्यते ।

५२ । १२ **उपासनासहित इति ।** उपासनाशब्दो मननस्यापि संग्राहकः । **परस्तादवगतिरेवेति** वृत्ति†रूपावगत्यभिप्रायेण शङ्का । **समाप्तिवचन इति ।** अवसानशब्दः समाप्तिवाचीत्यध्युपसृष्टो ऽपि समाप्तिरूपनिवृत्तिपर इति भावः । एवं चाविद्यानिवृत्तिनिर्वर्त्यत्वोक्तेरवगतिशब्दः स्वरूपावगतिपर इत्यर्थादुक्तं भवति । **व्यवधानादिति ।** अव्यवहितकारणएव

* सर्वज्ञसर्वकर्तृकेति ४ पु· पा· । † वृत्तिशब्दो नास्ति २ पु· ।

निर्वर्तकत्वप्रसिद्धेः व्यवहिता वृत्तिस्तथात्वेन न ग्राह्येति भावः । न चैवं विचारणाशब्दोक्तश्रवणमननोपासनानां साक्षात्कारैकसाध्यायामविद्यानिवृत्तौ करणत्वाभावात् कथं विचारणा*ध्यवसानेति शब्दसङ्गतिरिति शङ्कनीयम् । न हि तत्र विचारणया ऽध्यवसान†मिति कर्तृकरणे कृता बहुलमिति सूत्रेण तृतीयासमासः समाश्रीयते येन करणत्वप्रतीतिः स्यात् । टीकायां हि षष्ठीसमासो दर्शितः स तु साक्षात्कारद्वारकपरम्परासंबन्धे ऽप्युपपद्यते ।

अन्यथा कर्तुमित्यत्रेति । अकरणप्रतिकोटिनिर्देशकतयोपात्तस्या- ५३ । १९
न्यथा‡करणप्रतिकोटिनिर्देशार्थमप्यपेक्षितत्वादनुषङ्गः कर्तव्य इत्यर्थः । ननु भाष्ये प्रतिज्ञैवाभाति न हेतुरिति न युक्तं टीकायां विधिप्रतिषेधाश्चार्थवन्त इति प्रतिज्ञायां विकल्पोत्सर्गापवादाश्चेत्युत्तरभाष्यस्य हेतुपरत्वेन योजितत्वादिति चेत् । उच्यते । पुरुषस्य स्वातन्त्र्येण स्वत एव प्रवृत्त्युपपत्तेर्विधिप्रतिषेधानर्थक्यमित्याशङ्कापरिहारार्थत्वेन खल्विदं प्रतिज्ञाभाष्यमवतारितम् । तच्चैतदुक्तं भवतीत्यादिटीकाग्रन्थेन वर्ण्यमानम् इष्टोपायतादिप्रतिपादनमेव विधिप्रतिषेधार्थवत्त्वे हेतुर्न तु विकल्पादिकमित्यभिप्रायेण हेत्वाकाङ्क्षायामेतदुक्तमित्यादिकमित्यवतारितम् । विकल्पादिप्रतिपादनं तु विरुद्धयोर्विधिप्रतिषेधयोर्विध्योर्वा कथमिष्टोपायताप्रतिपादकत्वमित्याशङ्कायां विकल्पेनोत्सर्गापवादरूपेण वेति हेतूपपादनार्थमित्यभिप्रेत्य टीकायां तदपि हेतुपरत्वेन योजितम् । **प्रत्यगात्मनस्त्वविषयत्वमिति ।** ननु पराञ्चि खानीति मन्त्रमुदाहृत्य प्रत्यगात्मन इन्द्रियाऽविषयत्वोक्तिरयुक्ता । कश्चिद्धीरः प्रत्यगात्मानमैक्षत् आवृत्तचक्षुरमृतत्वमिच्छन्निति तन्मन्त्रोत्तरार्द्धएव तस्य विद्वदिन्द्रियग्राह्यताया उक्तत्वादिति चेत् । सत्यम् । तत्र श्रवणादिवासितेन्द्रियग्राह्यत्वोक्तावपि शब्दमनपेक्ष्य स्वातन्त्र्येणेन्द्रियग्राह्यत्वस्य प्रत्याख्याने विरोधाभावात् । **अपरोक्षत्वादिति ।** प्रदेशोपलक्षणमेतत् । अस्मत्प्रत्ययविषय- ५४ । ५
त्वादिति भाष्यव्याख्यानावसरे जीवभावोपाध्युपहितरूपेण विषयत्वोक्त्या स्वरूपेणाविषयत्वमुपपादितमित्यर्थः । **जीवजत्वेन सिद्धसाधनत्वादिति**§ । अतिविचित्ररचनस्यापि प्रपञ्चस्य बहुविधाऽपरिमितगोपुरप्रासादम-

---

* साध्यविचारणेति ४ पु॰ पा॰ । † विचारणाध्यवसानमिति ४ पु॰ पा॰ ।
‡ उपात्तस्य कर्तुमित्यस्यान्यथेति २ पु॰ पा॰ । § जीवकर्तृत्वेन सिद्धसाधनादिति १-५ पु॰ पा॰

खण्डपमहातटाकादियुक्तस्य महतो नगरस्येव क्रमेण* युगपद्वा सम्भूतेरसर्वज्ञासर्वशक्तिकैरपि विश्वामित्रादिवदुपचितपुण्यवशलब्धतत्तदेकदेशसृष्टिसामर्थ्यशालिभिर्बहुभिर्जीवैर्निर्मितत्वमुपपद्यते । धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायात् । अतो ऽनुमानस्य तद्विषयत्वोपपत्तेर्न क्लृप्तजीवातिरिक्तसर्वज्ञसर्वशक्तिकैककर्त्रन्तरसिद्धिरित्यर्थः । ननूपकरणाद्यभिज्ञकर्तृकत्वं साध्यतइति नार्थान्तरमित्याशङ्क्य यत्किंचिद्व्याबद्धिकल्पेन प्रागुक्तमर्थान्तरं दृष्टान्तस्य साध्यवैकल्यं वा स्याद् यावदिति यत्किं चिदिति वा विशेषाविवक्षायामप्यर्थान्तरं स्यादित्याह **उपकरणेत्यादिना ।**

अनुमानस्यातिरिक्तेश्वराऽसाधकत्वमुक्त्वा तत्साधकत्वे बाधकम-
५४ । ११ प्याह **मनःसंयोगेति ।** धीमत्कर्तृकत्वसाध्यसिद्धया सिद्ध्यन्ती धीर्नित्याऽभ्युपगम्यते अनित्या वा । नाद्यः । त्वन्मते कार्य्यत्वे धीमत्कर्तृकत्वव्याप्तिवज् ज्ञानत्वे जन्यत्वव्याप्तेरप्यप्रतिक्षेप्यतया तद्विरोधेन ज्ञाननित्यत्वासिद्धेः । न द्वितीयः । क्लृप्तकारणं मनःसंयोगादिकं विना ज्ञानोत्पत्त्यसम्भवात् । तद्विनाप्यैश्वर्यवशाज् ज्ञानोत्पत्त्यभ्युपगमे तत एव ज्ञानं विनापि स्रष्टृत्वसम्भवेन त्वदभिमतसाध्यासिद्धिप्रसङ्गादित्यर्थः । ननु कार्य्येण कारणं किं चिदस्तीत्यनुमितमिति पूर्वग्रन्थे युक्त्या कर्तृमात्रनिश्चयः तदेकत्वसार्वज्ञ्यादिषु सम्भावनेत्युक्तं तदनन्तरं कारणस्य सर्वज्ञत्वादिसिद्धौ युक्तिः शब्दमुपजीवति न स्वतन्त्रा कारणमात्रं तु सम्भावयन्तीतिकर्तव्यतेति ग्रन्थेनानुमानं कर्तृसम्भावनामेव जनयति न निश्चयं तदेकत्वसार्वज्ञ्यादौ सम्भावनामपि न जनयति किं तु तदंशे शब्दोपजीवनमेवेत्युक्तम् । इदानीमीश्वरानुमानस्यार्थान्तरबाधकयोरुद्भावनेन सम्भावनामपि यथा नोत्पादयेत् तथोपपादितम् । सर्वमिदं पूर्वापरविरुद्धमिति चेत् । उच्यते । विमतं धीमत्कर्तृपूर्वकमित्याद्यनुमानं सर्वथा कर्तृसाधकं न भवतीति नेह प्रतिक्षिप्तं किं तु संप्रतिपन्नजीवातिरिक्तकर्तृसाधकं न भवतीति । एवमिह सर्वथैव प्रतिक्षिप्तमनुमानं न कर्तृनिश्चायकं किं तु तत्सम्भावनामात्रजनकमिति कारणमात्रं तु सम्भावयन्तीति ग्रन्थेनोक्तम् ।

तस्यायमाशयः । कार्यत्वलिङ्गका†नुमानं कर्तृसामान्यमपि निर्द्धारयितुमीष्टे । यथा दानपतनयोः संप्रदानापादानकारकापेक्षत्वे ऽपि न

* क्रमेणेति ४ पु. त्रुटितम् । † कार्यलिङ्गकेति २ पु. पा. ।

कार्य्यान्तराणां तदपेक्षा । एवं च घटादीनां कर्त्रपेक्षत्वे ऽपि अङ्कुरादीनां मा भूत्तदपेक्षेत्यप्रयोजकत्वशङ्कया घटतृणादिषु कृताकृतव्यवहारोपोद्बलिततया* व्याप्तिशैथिल्यात् । किं तु तन्मात्रं संभावयति संप्रदानापादानयोरिव च कर्तुः कार्य्यान्तरेषु दृष्टव्यभिचाराभावाद् घटपटादिषु† भूयः सकर्तृकत्वदर्शनाच्च । कर्त्रैकत्वादौ तु युक्तिः संभावनामात्रमपि न जनयति क्लृप्तानेकजीवकर्तृकत्वोपपत्तेरिति । अतो नानयोर्ग्रन्थयोः परस्परविरोधः । कार्य्येण च कारणं किं चिदस्त्यनुमितमित्यादिग्रन्थस्तु प्रौढिवादेन प्रवृत्त इति न किं चिदवद्यम् ।

ननु प्रधानादिसंशये निर्णयवाक्यमिति टीकाग्रन्थो न युक्तः ।
भाष्ये अस्य जगतो नामरूपाभ्यां व्याकृतस्येत्यादिना जगतः कानि चिद्
विशेषणान्युक्त्वा न च यथोक्तविशेषणस्य जगत इत्याद्युत्तरग्रन्थेन जगत्का-
रणस्य प्रधानादिविलक्षणेश्वररूपत्वसमर्थनेन संशयाभावादित्याशङ्क्याह
जगद्विशेषणैरिति‡ । निर्णये ऽपीत्यपिशब्देन ब्रह्मनिर्णये श्रुत्येकशरणा- ५४ । १७
नामस्माकं युक्त्या वस्तुतो निर्णयो न भवति अतः प्रधानादिसंशय
इति । ननु प्रसिद्धस्यैवानुवाद्यतया लोकप्रसिद्धं लौकिकानन्दमनूद्य तस्य
जगज्जन्मादिकारणत्वविधायकम् आनन्दाद्ध्येवेति वाक्यमिति प्रतिभाति ।
तथा सति लौकिकानन्दस्यैव जगज्जन्मादिष्वदृष्टादिवत् कारणान्तरत्वमुक्तं
स्याद् न तेनानन्दरूपता ब्रह्मणः स्वरूपलक्षणं सिद्ध्येदित्याशङ्क्याह **कारणं
ब्रह्मेति** । कल्पनीयोपस्थितिकलौकिकानन्द§प्रसिद्ध्यपेक्षया क्लृप्तोपस्थितिकपूर्व-
प्रस्तुतजन्मादिकारणप्रसिद्धिः शीघ्रतरेति तथा जगज्जन्मादिकारणं ब्रह्मा-
नूद्य तस्यानन्दरूपत्वविधायकमिदं वाक्यमिति भावः । **सत्यादेरपीति** ।
आनन्दादयः प्रधानस्ये||त्यधिकरणसिद्धं सत्यं ज्ञानमनन्तं ब्रह्मेति प्रदेशान्त-
राम्नातलक्षणगतसत्यज्ञानाद्युपसंहारमभिप्रेत्योपलक्षणत्वोक्तिः । **नन्विति** । ,, । १९
सत्यज्ञानादीनां ब्रह्मस्वरूपाच्च परस्परस्माच्च भेदे सच्चिदानन्दरूपत्वं ब्रह्मलक्षणं
न सिद्ध्येत् । अभेदे वाक्यार्थो न सिद्ध्येत् । तस्यानेकपदार्थवैशिष्ट्यरूपत्वनि-

---

* उपोद्बलततयेति ४ पु· पा· ।   † घटादिष्विति २ पु· पा· ।

‡ विशेषणैरितीत्येव जगच्छब्दरहितः प्रतीकाकारः ५ पु· ।

§ कल्पनीयोपस्थितिरलौकिकानन्देति ४ पु· । || व्याससू· अ· ३ पा· ३ सू· ११ ।

यमादित्यर्थः । अभेदपक्षमालम्ब्योक्तनियमासिद्ध्या परिहरति **अत्रोच्यतइति** ।

५४ । २१ **यस्त्वज्ञातइति** । तथा चाज्ञाते ब्रह्मपदार्थे एव वाक्यस्य पर्यवसानात् पुनर्न विशिष्टपरत्वमित्यर्थः । नन्वज्ञातत्वं ब्रह्मणोऽसिद्धं स्वरूपलक्षणवाक्ये ब्रह्मानूद्य तस्यानन्दत्वविधानमित्यनुपदमेवोक्तत्वात् । न ह्यज्ञातमनुवाद्यम् । अत एव न विशिष्टपरत्वमित्येतदप्यसिद्धं विधेयानुवाद्यविभागे सति तत्संसर्गविषयत्वावश्यम्भावादिति चेत् । उच्यते । अधीहि भगवो ब्रह्मेति प्रश्नसमये ब्रह्मप्रातिपदिकार्थतया यतो वेत्यादिवाक्यश्रवणानन्तरं जगज्जन्मादिकारणतया च भृगुणा ज्ञातमपि ब्रह्म प्रधानपरमाणवादिव्यावृत्तेन स्वरूपेण न निर्द्धारितमित्यज्ञातं जगत्कारणत्वेन तदनुवादेऽपि नानुवाद्यसंसर्गस्य वाक्यार्थानुप्रवेशः । किं तु वायुक्षेपिष्ठत्वादेरर्थवादानूदितस्य तत्समर्पकार्थवादिकपदसंघातलक्षणीयविधिवाक्यार्थान्वयिस्तुतिद्वारतयेव यत[*] इमानि भूतानि जायन्तइत्यादिपदसंघातलक्षणीयकारणत्वाश्रयवस्तूपस्थितिद्वारतया प्रथमावगतिमात्रम् । न चानुवाद्यस्य जगत्कारणत्वस्य वाक्यान्वयसंभवे तत्समर्पकार्थपदसंघातस्य पुरोडाशकपालेन तुषानुपवपतीत्यत्र पुरोडाशकपालशब्दस्येवाधिष्ठानलक्षणा न युक्तेति वाच्यम् । ब्रह्मप्रातिपदिकार्थमात्रस्य बुभुत्सितत्वेनाबुभुत्सितस्य कारणत्वस्यापि वाक्यार्थानुप्रवेशे कल्पकाभावात् । तदेतदनुपदमेव प्रकृष्टप्रकाशदृष्टान्तविवरणे स्फुटीकरिष्यते ।

५५ । २३ **यथा प्रकृष्टप्रकाश इति** । कश्चन्द्र इति प्रश्नोत्तरे प्रकृष्टप्रकाशश्चन्द्र इति वाक्ये प्रकृष्टप्रकाशशब्दौ प्रकर्षप्रकाशत्वरूपस्वार्थबोधनद्वारा तदाश्रयं बुभुत्सितं वस्तुतश्चन्द्ररूपं व्यक्तिविशेषं लक्षयत इति तत्र प्रकर्षप्रकाशत्ववैशिष्ट्यं न वाक्यार्थज्ञानानुप्रविष्टमित्यर्थः । ननु प्रश्नोत्तरे बुभुत्सितं वक्तव्यमित्येव नियमः न त्वबुभुत्सितं न वक्तव्यमित्यपि । अबुभुत्सितस्यापि बुभुत्सितग्रहणोपायस्य सहवचनोपपत्तेः । काञ्च्याः को मार्ग इति प्रश्ने मार्गग्रहणोपायतया तत्तत्प्रदेशस्थितगिरिनदीकाननादिसद्भावस्यापि सहवचन-

---

[*] यत इति नास्ति ५ पु॰ ।

दर्शनादित्याशङ्क्याह **मानान्तरादिति** । मानान्तरासिद्धो गिरिनद्यादिमा-
र्गग्रहणोपाये वाक्यार्थे ऽनुप्रविशतु नाम मानान्तरसिद्धस्य तु न तदनुप्रवेशः
कल्पनीय इत्यर्थः । नन्वेवं सति मानान्तरोपस्थितस्यैव प्रकर्षस्य प्रकाश-
त्वस्य च बुभुत्सितचन्द्रव्यक्तिग्रहणोपायत्वसम्भवात् तदुपादानं व्यर्थमित्या-
शङ्क्याह **उपायस्त्विति** । उपात्तमेव प्रकृष्टत्वं प्रकाशत्वं च व्यक्तिविशेषनि- ५४ । २४
र्द्धारणोपायो भवति नानुपात्तम् । न हि चन्द्र इत्येवोत्तरेण प्रकृष्टप्रकाशत्वा-
श्रयव्यक्तिविशेषश्चन्द्र इति निर्द्धारणं निष्पद्यते । नन्वेवं सति प्रकृष्टप्रकाश-
त्ववैशिष्ट्यमपि वाक्येन बोधनीयमापतति न हि तदबोधने तदाश्रयव्य-
क्तिविशेषश्चन्द्र इति निर्द्धारणा भवतीति चेत् । उच्यते । कुत्र घोष इति
प्रश्नोत्तरे घोषवासयोग्यनिबिडाधारप्रतिपादनार्थे प्रवृत्ते गङ्गायां घोष इति
वाक्ये गङ्गापदं स्वार्थोपस्थापनद्वारा वस्तुतः स्वार्थसंबन्धिबुभुत्सितनिबिडा-
धाररूपं तीरं लक्षयतीति न तीरे प्रवाहविशेषसंबन्धित्वमपि वाक्ये बोध्यम् ।
न च तदपि वाक्येन बोध्यमेव* तीरत्वमात्रेण बोधने तीरव्यक्तिविशेषनि-
र्द्धारणासिद्धेरिति वाच्यम् । गङ्गापदलक्ष्यत्वमतदर्थसंबन्धिनस्तीरान्तरस्य
न सम्भवतीति तल्लक्ष्यत्वानुपपत्त्या ऽर्थात् †तीरविशेषलाभोपपत्त्या तल्लाभार्थं
मुख्यार्थसंबन्धित्वस्य लक्षणीयकोट्यनुप्रवेशकल्पनायोगात् यश्चार्थादर्थो
न स चोदनार्थ इति न्यायात् । एवमिहापि द्रष्टव्यम् । **अनुज्ञायतइति** ।
न प्रतिक्षिप्यतइत्यर्थः न तु वाक्यार्थानुप्रवेशित्वेनानुज्ञायतइति । तदननु-
प्रवेशस्य समर्थितत्वात् ।

एवमुक्तां प्रक्रियामाश्रित्य स्वाभिमतं लौकिकवैदिकानां लक्षणवाक्या-
नामभेदपरवाक्यानां चाखण्डार्थत्वं निर्द्धारयितुमर्थगतमखण्डत्वं लक्षयति
एवं चेति । **अविशिष्टमिति** । समभिव्याहृतपदान्तरार्थासंसृष्टमित्यर्थः । ५४ । २६
अतः प्रकृष्टप्रकाशश्चन्द्र इत्यत्र बोध्यस्य चन्द्रस्य पदार्थैकदेशेन चन्द्रत्वेन
वैशिष्ट्ये ऽपि नासंभवः । न च तत्त्वमस्यादिवाक्यार्थेष्वभेदरूपः संसर्गो
ऽस्तीत्यसंभवः शङ्कनीयः । संबन्धस्य द्विष्ठत्वनियमेनाभेदस्य संसर्गत्वाभा-
वात् । कोकिलः पिक इत्यादिपर्यायानेकशब्दप्रकाशिते वाक्यार्थत्वाभावादलक्ष्ये
ऽतिव्याप्तिवारणार्थम् अपर्यायेति विशेषणम् । अविशिष्टमित्यनेनार्थलब्धस्यै-

---

* वाक्ये बोध्यमेवेति २ पु॰ पा॰ । † तल्लक्ष्यत्वादपदार्थादिति ४ पु॰ पा॰ ।

क्यस्य स्पष्टीकरणार्थम् एकमिति । पदार्थभेदे तदुभयसंसर्गस्य वाक्यार्थत्वा-
वश्यम्भावेनाविशिष्टत्वासंभवात् । एवमपर्यायानेकशब्दप्रकाशितमविशिष्टमख-
ण्डमित्यखण्डलक्षणोक्त्या* समभिव्याहृतपदान्तरार्थसंसर्गागोचरप्रमितिजनकं
वाक्यमखण्डार्थमित्यखण्डार्थलक्षणं सूचितं भवतीति द्रष्टव्यम् । दृष्टान्ता-
५५ । ३ सिद्धिमाशङ्कते **नन्विति ।** व्यावृत्तिर्व्यवहारो वा लक्षणार्थ इति नैया-
यिकाः । तथा च प्रकृष्टप्रकाश इति हेतुगर्भं विशेषणं चन्द्र इति च हेत्वा-
श्रयभूतायाश्चन्द्रव्यक्तेरितरव्यावृत्तचन्द्रशब्द†वाच्यत्वान्यतरसाध्यवैशिष्ट्यपर-
मिति नाखण्डार्थतेत्यर्थः । स्यादेतत् । मा भूत् चन्द्रव्यक्तौ तदितर-
व्यावृत्तेः साध्यता । ज्योतिर्मण्डलमध्ये प्रकृष्टप्रकाशरूपेण तां गृह्णता प्रत्य-
क्षेण तस्या नक्षत्रादिव्यावृत्तेरपि ग्रहणात् । चन्द्रशब्दवाच्यत्वस्य तु स्यात् ।
इयं व्यक्तिश्चन्द्रशब्दवाच्येति प्रागनवगतत्वादवगतौ वा लक्षणे वाक्यानपे-
क्षणादित्याशङ्क्याह **न चेति ।** चन्द्रत्वजातिरहिते तत्साध्यते तद्वति वा ।
नाद्य इत्याह **अचन्द्रे इति । व्याघातादिति ।** शब्दप्रवृत्तिनिमित्तर-
हितस्य तद्वाच्यत्वायोगादित्यर्थः । द्वितीये अयं चन्द्र इति चन्द्रत्वेन नि-
श्चितायां व्यक्तौ तत्साध्यते उतानेनैव वाक्येन चन्द्रत्वावगमनपूर्वकं तत्सा-
ध्यते । नाद्यः । चन्द्रत्वविशिष्टः चन्द्रशब्दवाच्यः अयं चन्द्रत्वविशिष्ट इत्य-
वगच्छतस्तत्र चन्द्रशब्दवाच्यत्वनिर्णयार्थमुपदेशानपेक्षणात् । न हि गोसदृशो
गवयः अयं च गोसदृश इति जानतस्तत्र गवयशब्दवाच्यत्वनिश्चयार्थमुप-
देशापेक्षा दृश्यते । न द्वितीय इत्याह **अथ चन्द्रत्वमिति । अज्ञात-**
,, । १० **चन्द्रज्ञापकमिति ।** यद्यपि प्रकृष्टप्रकाशव्यक्तिरेव चन्द्रः स च ज्ञात एव । न
च चन्द्रत्वेनाज्ञानं विवक्षितं व्यक्तिसमानवित्तिवेद्यस्य तस्यापि सप्रकारके व्यक्ति-
ज्ञाने प्रकारत्वेन विषयतावश्यंभावात् तथापि चन्द्रत्ववैशिष्ट्यांशे सत्तानि-
श्चयरूपज्ञानाभावो विवक्षितः । अनभ्यासदशापन्नजलादिज्ञानवद् यतो न
तदंशे सत्तानिश्चयरूपम् अत एवोपदेशानन्तरमेव तन्निश्चयः । अन्यथोपदे-
शवैयर्थ्यं स्याद् विषयान्तरासंभवात् । यद्वा जातेर्नास्ति व्यक्तिसमानवित्ति-
वेद्यत्वनियमः । स्वर्णकरकादिषु गृह्यमाणेष्वपि तैजसत्वजलत्वपृथिवीत्वा-
दिसंशयदर्शनात् । किं तु यद्व्यञ्जकतया यदवगतं तस्यास्तत्समानवित्ति-

* अविशिष्टमखण्डलक्षणोक्त्येति १–४ पु॰ पा॰ । † इतरव्यावृत्तिचन्द्रशब्देति २ पु॰ पा॰ ।

वेद्यत्वनियमः । न च ज्योतिर्मण्डलमध्यवर्तिप्रकर्षविशेषयुक्त*प्रकाशत्वं
चन्द्रत्वव्यञ्जकमिति प्रागुपदेशाज् ज्ञातम् अतो युज्यतएवाज्ञातचन्द्रत्वज्ञा-
पकत्वं प्रकृष्टप्रकाशवाक्यस्य ।

अर्थादिति† । अप्रकृष्टप्रकाशनक्षत्रादिव्यावृत्तेः प्रत्यक्षतः सिद्धाव- ५५ । १४
प्यचन्द्रव्यावृत्तेश्चन्द्रशब्दवाच्यत्वस्य चार्थात्सिद्धिरित्यर्थः । ननु वाच्यना-
नात्वे लक्ष्यस्यापि नानात्वं स्यादित्याशङ्क्याह **न हि चन्द्रद्वयमस्तीति** ।
प्रकृष्टप्रकाशशब्दवाच्यनानात्वे ऽपि तल्लक्ष्यचन्द्रव्यक्तिनानात्वं नास्तीत्यर्थः ।
मा भूदिति‡ । यद्यपि ध्वंसप्रागभावान्यतरप्रतियोगित्वरूपमनित्यत्वं ध्वंसेन
प्रागभावेन वा विशिष्टमेव तथाप्यस्मदादिबाह्येन्द्रियग्राह्यत्वं सामान्यवत्त्वे-
नेव समानाधिकरणविशेषणेन§ विशिष्टं न भवतीत्यत्र तात्पर्य्यम् । सुवर्णं तेजः
जलपृथिव्यन्यत्वे सति रूपवत्त्वादित्याद्युदाहरणान्तरमिह द्रष्टव्यम् । अनित्य-
त्वतज्ज्ञापकदृष्टान्तेनैव दोषान्तरमाशङ्कते **तर्हीति** । **सत्याद्यात्मकत्वं
न स्यादिति** । सता जात्यादितादात्म्यापन्नं हि घटादिकं सदाद्यात्मक-
मिष्यतइति भावः । **सत्त्वादि न जहातीति** । सदाद्यात्मकं भवती-
त्यर्थः । ननु घटादिविषयेषु सत्तादिजातीनां व्यक्तितादात्म्यदर्शनमस्तु
ततः किमायातं ब्रह्मणः सदात्मकत्वादिसिद्धावित्याशङ्क्य श्लोकं व्याचष्टे
इह कल्पितभेदेति । प्रतिज्ञातमर्थं क्व चिदुदाहरणे प्रदर्शयन्नेव तन्न्यायं
प्रकृते योजयति **तरङ्गेति** । वस्तुनश्चन्द्रस्यैकत्वेपि तरङ्गोपाधिकल्पित- ,, । २३
भेदा बहवश्चन्द्राः सन्तीति तावदनुगतं‖ चन्द्रत्वसामान्यं तद्वाचिनश्चन्द्र-
शब्दस्य यदा भेदकल्पनाधिष्ठाने बिम्बचन्द्रे प्रयोगस्तदा तद्वाच्यचन्द्रत्वसा-
मान्यलक्ष्या भवति सा चन्द्रव्यक्तिः सा चन्द्रात्मत्वं न जहातीति दृष्टं
तथेहापि मायाकल्पितभेदघटपटाद्यनुगतसत्तासामान्यवाचिनः सच्छब्दस्य
सद्भेदकल्पनाधिष्ठाने ब्रह्मणि प्रयोगे सति तद्वाच्येन सत्तासामान्येन लक्ष्यं
ब्रह्म सदात्मत्वं न जहातीत्यर्थः । ननु सच्चिदानन्दशब्दवाच्यसत्तादिसा-
मान्यलक्ष्यव्यक्तीनां भेदादपर्य्यायानेकशब्दपर्यवसानास्पदं ब्रह्म न सिद्ध्येदत

---

* विशेषप्रयुक्तेति ४ पु॰ पा॰ ।   † अर्थात्त्वितीति प्रतीकाकारः २–४ पु॰ ।
‡ अयं प्रतीकः ४ पु॰ नास्ति ।   § सामानाधिकरण्यविशेषणेनेति २ पु॰ पा॰ ।
‖ अस्ति तावदनुगतमिति ४ पु॰ पा॰ ।

५५ । २७ आह **यथा चेति** । **व्यक्त्याकारो** व्यक्तिभेदः । **विशिष्टार्थपरत्वरहितमिति** । पदान्तरार्थसंसृष्टार्थपरत्वरहितमित्यर्थः । एवं तत्पदार्थविषयावान्तरवाक्यानामखण्डार्थत्वं प्रसाध्य तत्त्वमस्यादिमहावाक्यानामपि तत्साधयति **तथेति** । तत्त्वमस्यादिवाक्यमखण्डार्थमुपाधिभेदभिन्नार्थैक्यप्रतिपादकत्वाद् महाकाशो घटाकाश इति वाक्यवदिति श्लोकसंहिते ऽनुमाने* हेत्वसिद्धिपरिहाराय जीवेश्वरयोः स्वाभाविकभेदाभावं जीवस्य विभुत्वेन साधयिष्यन् परिमाणान्तरनिरासेन तस्य विभुत्वमुपपादयति **निरंशस्येति** । आत्मा द्रव्यत्वावान्तरजातिरहितः विभुत्वादाकाशवदित्यनुमाने जातौ धर्मिसमानसत्ताकत्वं विशेषणं देयं तेन तरङ्गचन्द्रानुगतचन्द्रत्वन्यायेन जीवे ईश्वरे च† कल्पिताया आत्मत्वजातेरभ्युपगमे ऽपि न बाधः । जीवेश्वरभेदस्य स्वाभाविकत्वे तद्गतात्मत्वजातेर्धर्मिसमानसत्ताकत्वावश्यम्भावात् तदभावसाधनेन स्वाभाविकभेदनिरासंसिद्धिः । उक्तानुमानानुग्राह्यां जीवानामीश्वरात् परस्परस्माच्च भेदस्यौपाधिकत्वप्रतिपादिनीं श्रुतिमुदाहरति **यथा ह्ययमिति** । इति जन्मादिसूत्रम्‡ ॥

५६ । १५ **शास्त्रयोनित्वात् ॥ ३ ॥**

साध्याविशेषादिति । हेतुः सिद्धश्चेत् साध्यमपि सिद्धमेव अस्य महतो भूतस्येत्यादिश्रुत्या खलु हेतुसिद्धिरेष्टव्या तया यतो वेत्यादिश्रुत्यन्तरैश्च साध्यस्यापि सिद्धिरविशिष्टा । अथ श्रुतिप्रच्छादनेन साध्यासिद्धिरुच्यते तर्हि हेतोरप्यसिद्धिः स्यादित्येवं साध्याविशेष इत्यर्थः§ । **आर्थिकप्रतिज्ञयेति** । आर्थिकी सर्वज्ञत्वप्रतिज्ञा । ननु निर्विशेषब्रह्मविचारं प्रतिज्ञातवतः सूत्रकारस्य सविशेषब्रह्मगतसर्वज्ञत्वदृढीकरणं क्वोपयुज्यते पूर्वसूत्रे विवक्षितस्य जीवो जगत्कारणमिति शङ्काव्यावर्त्तनस्य स्थिरीकरणे । ननु पूर्वसूत्रे ब्रह्मणः सर्वज्ञत्ववत्सर्वशक्तिकत्वमप्यर्थलब्धं तत्किमिति केन चिद्धेतुना न दृढीकृतं तदपि ह्युक्तशङ्कानिवर्त्तनक्षमम् । सत्यं तदपि निःश्वसितश्रुत्युदाहरणेन दृढीकृतमेव । अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेद इत्युप-

---

* श्लोकसंगृहीते ऽनुमाने इति २ पु· पा· । † जीवेश्वरे चेति २ पु· पा· ।

‡ अत्रद्वितीयं जन्माद्यधिकरणं समाप्तम् तत्र-**जन्माद्यस्य यतः २** इत्येकं सूत्रम् ।

§ इत्यर्थ इति २ पु· नास्ति ।

कम्यायं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानीति नामरूपात्मकस्य सर्वस्यापि प्रपञ्चस्य निःश्वसितवदप्रयत्नसाध्यब्रह्मकार्यत्वोक्तेः ।

अथ वेति । ननु वेदानित्यत्वप्रसाधनं वियत्पादे* सङ्गतं न ५६ । १८
त्वत्रेति चेत्सत्यम् । पूर्वसूत्रार्थाविप्रसर्वज्ञत्वदृढीकरणार्थतयेह वेदकर्तृत्वं व्यवस्थापनीयमासीत् तेनार्थाद् ब्रह्मणः सर्वकारणत्वमनुपपन्नं वेदस्य नित्यत्वादिति शङ्कानिराकरणमपि लभ्यतइत्यानुषङ्गिकार्थकथनपरो ऽयं श्लोकः । आनुषङ्गिके चार्थे न पृथक् सङ्गत्यपेक्षा । अथ वेत्यस्मिन् पक्षइति च हेतोरार्थप्रतिज्ञान्वयमनपेक्ष्य श्रौतप्रतिज्ञयैव तदन्वय इत्यभिप्रायं न भवति येन स्वतन्त्रमिदं पक्षान्तरमित्यानुषङ्गिकत्वं न स्यात् किं त्वार्थप्रतिज्ञयैवान्वय इति यथाश्रुतभाष्यटीकानुसारेण प्रथमः । आनुषङ्गिकार्थविषयश्रौतप्रतिज्ञया ऽप्यन्वयो भाष्यटीकयोर्विवक्षित इति द्वितीयो ऽयं पक्षः । प्रतिज्ञयैवेत्येवकारो भिन्नक्रमः । श्रौतप्रतिज्ञया ऽप्यन्वयो ऽस्त्येवेत्यर्थः । ननु जगद्योनित्वसिद्धे सार्वज्ञ्ये शास्त्रयोनित्वम् अभ्युच्चयार्थं हेत्वन्तरं चेदधिकरणान्तरत्वं न स्यादित्यत आह **हेत्वन्तरेति ।** सिद्धहेत्वन्तराभिधाने ह्येकाधिकरण्यम् इह शास्त्रयोनित्वहेतुः प्रसाधनीय इति तदर्थमधिकरणान्तरमित्यर्थः । शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति षडङ्गानि । **जातिव्यक्तीति ।** उपलक्षणमेतदपेक्षितप्रमाणादिनिरूपणस्यापि । **उक्तमर्थं प्रमाणयतीति ।** यद्यदित्यादिभाष्यात् प्राचीनेन सन्दर्भेण हेतुनिर्देशपूर्वकं ५७ । १
प्रतिज्ञातं सार्वज्ञ्यरूपमर्थं प्रमाणवन्तं करोतीत्यर्थः । यद्यपि हेतुनिर्देशमारभ्य प्रमाणोपन्यासः प्रवृत्तः तथापि व्याप्त्यैव हेतुः प्रामाण्यमश्नुतइति यद्यदित्यादिव्याप्तिप्रदर्शकग्रन्थ एव प्रमाणोपन्यासार्थत्वेनावतारितः । अथ वा चोनुदाहरणान्तान्वा यद्वोदाहरणादिकानिति मीमांसकमर्यादया यद्यदित्यादिरुदाहरणोपनयनिगमनोपन्यास एव प्रमाणोपन्यासः । भाष्ये ततः प्रागन्वयमुखेन हेतोर्व्यतिरेकमुखेन प्रतिज्ञायाश्च निर्देशस्तस्य† स्फुटीकरणार्थः न त्वनुमानावयवरूप इत्यभिप्रायेणोदाहरणप्रभृतिरेवोक्तार्थे प्रमाणप्रदर्शनपरत्वेनावतारितः । प्रमाणवच्छब्दात् तत्करोतीत्यर्थे णिचि णावि-

*व्या॰ सू॰ अ॰ २ पा॰ ३ । † निर्देशस्येति २ पु॰ पा॰ ।

ष्ठवद्भावाद् विन्मतोर्लुगिति मतुपो लुकि च सति प्रमाणवन्तं करोतीत्यर्थे प्रमाणयतीति शब्दः । यद्वा उक्तमर्थं वेदकर्तृत्वं हेतुं *व्याप्त्याद्युपन्यासेन प्रमाणं करोतीत्यर्थः । अस्मिन् पक्षे प्रमाणशब्दादेव णिच् । विभक्तत्वं भिन्नत्वं कार्यत्वे हेतुरिति वियदधिकरणे यावद्विकारं त्विति† सूत्रेण प्रदर्शयिष्यते ।

५१ । ६ **तुल्यविषयत्वेति ।** विस्तरार्थमित्यत्र विस्तरशब्दः शब्दप्रपञ्चपरः । प्रथने वावशब्दइति शब्दातिरिक्तस्यार्थस्य प्रपञ्चे घञो विधानेन शब्दप्रपञ्चएव‡ ऋदोरबित्यपा विस्तरशब्दनिष्पत्तेः । विस्तररूपो ऽर्थो धर्मो यस्य तद्विस्तरार्थम् । वस्तुमात्रवाचिनो ऽर्थशब्दस्येह धर्मरूपे वस्तुनि पर्य्यवसानम् । एवं च ऋग्वेदादिरूपे शास्त्रे ऽर्थवादादिबहुले शब्दमात्रस्यैव प्रपञ्चो§ नार्थस्येति विस्तरार्थविशेषणेन ज्ञापनाद् वेदस्य ब्रह्मज्ञानस्य च तुल्यविषयत्वभ्रान्तिर्निवर्त्तिता भवति । अतो ऽधिकविषयज्ञानवत्त्वसाध्यस्य न बाध इति भावः ।

,, । ८ **ब्रह्मेति ।** ननु वेदविषयाधिकविषयज्ञानवत्त्वमात्रं साध्यं चेत् सर्वावभासकवेदकर्त्तृत्वेन पक्षधर्मताबलात् सर्वज्ञतासिद्धिरित्येतन्न घटते । वेदविषयतदधिकोभयविषयज्ञानवत्त्वं साध्यं चेद् वैदिकासदर्थोपाख्यानाद्यर्थविषयभ्रान्तिज्ञानवत्त्वमपि ब्रह्मणः सिद्ध्येत् । किं च हेतूकृतं वेदकर्त्तृत्वं‖ वेदवक्तृत्वमात्रं चेदर्थानभिज्ञाध्यापके व्यभिचारः पूर्वानुपूर्वीमनपेक्ष्य तद्वक्तृत्वं चेदसिद्धिः सामान्यव्याप्त्युपन्यासे च वाक्यप्रमाणस्येति प्रमाणपदं व्यर्थम् अप्रमाणवाक्यकर्त्तुरपि भ्रान्तस्य प्रतारकस्य च तदर्थतदधिकोभयविषयज्ञानसत्त्वात् । तस्मात्सर्वमिदमयुक्तमिति चेत् । उच्यते । ईश्वरस्य वैदिकासदर्थोपाख्यानाद्यर्थविषयज्ञानवत्त्वे ऽपि तस्य ज्ञानस्य प्रमित्युपयोग्याहार्य्यज्ञानत्वाद् न तेन भ्रान्तिमत्त्वप्रसक्तिः । न ह्यभावप्रमित्युपयोग्यधिकरणगोचरप्रतियोगितदवच्छेदकारोपवन्तः पुरुषाः धर्मार्थप्रमित्यु¶पयोगिकपोताख्यायिकाहंसकाकोपाख्यानादिरचनामूलारोपवन्तो वाल्मीकिकृष्णद्वैपायनादयो बालारोग्यसाधनौषधपानकर्त्तव्यताप्रमित्युपयोगिबालप्ररोचनार्थतद-

---

* वेदकर्तृत्वहेतुमिति १ पु· पा· ।

† व्यास सू· अ· २ पा· ३ सू· ७ ।

‡ शब्दप्रपञ्चस्य एवेति १ पु· पा· ।

§ प्रपञ्चा इति १ पु· पा· ।

‖ हेतूकृतवेदकर्तृत्वमिति २ पु· पा· ।

¶ धर्मार्थप्रतिमितीत्यसंगतः पाठः १ पु· ।

भिमतफलान्तरोपन्याससमूलारोपवन्तः पिशाचादयश्च भ्रान्ता इति व्यपदिश्यन्ते । किं च यत्सत्तानिश्चयरूपं न भवति न तेनान्यथान्यवैशिष्ट्यावगाहिना ऽपि भ्रान्त इति व्यपदिश्यते । न हि शुक्तौ रजतत्ववैशिष्ट्यज्ञानवानिवास्य पुरोवर्तिनि रजतत्ववैशिष्ट्यावगाहिज्ञानमप्रमाणमिति तदीयभ्रान्तिविषयतया पुरोवर्तिनि रजतत्ववैशिष्ट्यं गृह्णन् भ्रान्तिज्ञो ऽपि भ्रान्त उच्यते । वेदकर्तृत्वं च वक्त्रन्तराधीनानुपूर्वीमनपेक्ष्य वेदकर्तृत्वमिति नार्थानभिज्ञाध्यापके व्यभिचारः । न चैवमपि घुणाक्षरन्यायेन वेदसमानानुपूर्वीकस्य वाक्यस्यार्थान्तरविवक्षया प्रयोक्तरि व्यभिचारः । सकलवेदवक्तृत्वस्य विवक्षितत्वात् । तावच्च सर्गादौ सर्वान् वेदानध्यापितेष्वीश्वरवत्सार्वज्ञ्यरहितेषु मन्वादिषु व्यभिचारीति तद्वारणेन पूर्वोक्तविशेषणमप्यर्थवत् । उदाहरणवाक्ये प्रमाणपदं यो यस्य वाक्यस्यार्थविवक्षया प्रयोक्तेति विवक्षारूपविशेषणलाभार्थम् । तच्च विशेषणमर्थानभिज्ञाध्यापकेषु निरभिप्रायवाक्यप्रयोक्तृषून्मादग्रस्तादिषु च व्यभिचारवारणार्थं सर्गादौ वेदान् प्रवर्तयत ईश्वरस्यापि तत्तदर्थविवक्षा ऽस्तीति सामान्यव्याप्तावुपात्तस्य व्याप्यस्य पक्षानुगतिः । उक्तं हि ग्रहाधिकरणवार्त्तिके* ।

शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते ।
तदप्यधिष्ठितं सर्वमेकेन परमात्मना ॥
तथर्ग्वेदादयो वेदाः प्रोक्ता ये ऽपि पृथक्पृथक् ।
भोग्यत्वेनात्मनां ते ऽपि चैतन्यानुगताः सदा ॥
तेषामन्तर्गतेच्छानां वाक्यार्थप्रतिपादनी ।
विवक्षा चाविवक्षा च ज्ञायते शब्दशक्तितः ॥ इति ।

ननु सकलवेदकर्तृत्वहेतूकरणबलात्सकलवेदार्थविषयत्वमीश्वरज्ञानस्य सिद्ध्यतीति तावतैव तस्य सार्वज्ञ्यसिद्धेरधिकविषयत्वं विशेषणान्तरं† किमर्थम् । न च तावता तस्य सार्वज्ञ्यं न सिद्ध्यति । अवेदप्रतिपादितात्वतनपुरुषपाणिगतवराटकसङ्ख्यादिज्ञानवत्त्वस्य तेनासिद्धेरिति वाच्यम् । अधिकविषयत्वविशेषणेनापि तदसिद्धेः । टीकायां क्षीरक्षीरादिमाधुर्य्यविशेष-

* जै॰ सू॰ अ॰ ३ पा॰ १ सू॰ १३–१५ ।
† विषयत्वविशेषणान्तरमिति २ पु॰ पा॰ ।

वद्वेदेनापि यदाहत्य बोधयितुं न शक्यं तादृग्विशेषविषयज्ञानवत्त्वस्याप्यधिकविशेषणेन सिद्धिरिति तत्प्रयोजनमुक्तम् । युक्तं चैतत् । यथेक्ष्वादिमाधुर्यं स्वयमनुभूय शब्दं प्रयुञ्जानस्य यादृशं तद्विशेषज्ञानं तादृशं स शब्दो नान्यस्य जनयितुमीष्टे । तथा मानुषादिब्राह्मपर्यन्त आनन्द* उत्तरोत्तरमुत्कृष्यते ब्रह्मानन्दस्तु निरतिशय इति वैदिकशब्दः शतकृत्वः श्रुतोपि तमानन्दं साक्षात्कुर्वत ईश्वरस्यानुभवेन सदृशं तन्निरतिशयत्वादिरूपविशेषानुभवमन्यस्य जनयितुं न शक्नोत्येव । एवंविधश्रुत्यबोध्यविशेषविषयत्वेन वेदरचनामूलवेदार्थाधिकवर्णावल्यादिविषयत्वेन चार्थान्तरादिति चेत् । उच्यते । सकलवेदार्थाभिज्ञत्वमेवेह साध्यं पक्षधर्मताबलात्सार्वज्ञ्यसिद्ध्युक्तिरपि तन्मात्राभिप्राया । न च तन्मात्रं साध्यते चेद् व्याप्तिबलादेव तत्सिध्यतीति पक्षधर्मताबलोक्तिरधिकसार्वज्ञ्यसिद्ध्यर्था स्यादिति वाच्यम् । सामान्यव्याप्तिबलात् स्वप्रयुक्तवाक्यार्थाभिज्ञत्वमात्रस्यैव सिद्धिरिति विशिष्य सकलवेदार्थाभिज्ञत्वसिद्धेः सकलवेदकर्तृत्वहेतुपक्षधर्मतालभ्यत्वात् । वेदार्थाधिकाद्यतनवृत्तान्ताद्यभिज्ञत्वसिद्धिस्तु स्वतः सर्ववेदार्थगोचरमीश्वरज्ञानमन्यदपि सर्वं गोचरयेदिति न्यायसाम्यात् । अधिकविषयत्वस्य साध्यानुप्रवेशनं तु पाणिनीयादिदृष्टव्याप्तिबलादधिकविषयत्वमपि सेद्धुमर्हति किमुत पदार्थविषयत्वमिति कैमुतिकन्यायेन सिषाधयिषितसाध्यसिद्धिदार्ढ्यार्थमनुमानप्रवृत्त्यनन्तरभाविन्यायलभ्यार्थानुवादरूपं वा ।

एवं सूत्रभाष्यसूचितं सर्वज्ञत्वपर्यवसाय्यनुमानं प्रदर्श्य स्वयं साक्षा-
५१ । ११ त्तत्साधकमनुमानं दर्शयति **अयं घट इति** । एतत् पदद्वयं पक्षीकृतघटपरम् । एतदन्यश्चासावसर्ववित्कर्तृकश्च तस्य भावस्तत्त्वं तदनधिकरणमित्येकं सकर्तृकस्य विशेषणम् । एतदन्यश्चासाववेदश्च तस्य भावस्तत्त्वं तदनधिकरणमिति द्वितीयं तस्य विशेषणम् । एवंभूतात्सकर्तृकादन्यत्वस्य साध्यस्य दृष्टान्ते प्रसिद्धिः पक्षादन्यत्वविषया । पक्षीकृतो हि घटः सकर्तृकः एतदन्यावेदत्वानधिकरणं च तत्रावेदत्वसत्त्वे ऽप्येतदन्यत्वविशिष्टावेदत्वाभावात् । एतदन्यासर्ववित्कर्तृकत्वानधिकरणं च तत्रासर्ववित्कुला-

* मानुषादिब्रह्मपर्यन्त इति २ पु॰ पा॰ ।

त्वकर्तृकत्वसत्त्वे ऽप्येतदन्यत्वविशिष्टासर्ववित्कर्तृकत्वाभावात् । पक्षे तु वेदादन्यत्वमादाय साध्यं सिद्ध्यद्वेदस्य सर्ववित्कर्तृकत्वमन्तर्भाव्य पर्यवस्यति । पक्षस्य यस्मात्सकर्तृकादन्यत्वं साध्यं तस्यैतदन्यावेदत्वानधिकरणत्वं ह्यवेदत्वरूपविशेष्याभावेनोपपादनीयं न त्वेतदन्यत्वरूपविशेषणाभावेन पक्षगतान्योन्याभावप्रतियोगिनि पक्षान्यत्वसत्त्वेन तदभावासम्भवात् । एवमेतदन्यासर्ववित्कर्तृकत्वानधिकरणत्वमप्यसर्ववित्कर्तृकरूपस्य विशेष्यस्याभावेनोपपादनीयम् । पूर्ववत् तत्र विशेषणाभावासम्भवात् । एवं च यद्यपि द्वितीयविशेषणलभ्ये वेदपक्षनिष्ठान्योन्याभावप्रतियोगिनि प्रथमविशेषणलभ्यमसर्ववित्कर्तृकत्वानधिकरणत्वम् अकर्तृकत्वेनापि सेद्धुमर्हति तथापि सकर्तृकविशेष्यविरोधेन तथासिद्धेर्निरोधाद् वेदस्य सर्ववित्कर्तृकत्वसिद्धिः । अत्र सकर्तृकात् पटादन्यत्वेन सिद्धसाधनवारणाय द्वितीयं विशेषणम् । तेन वेदादेव सकर्तृकादन्यत्वसिद्धावपि वेदस्यासर्ववित्कर्तृकत्वेनार्थान्तरं स्यादिति तद्वारणाय प्रथमविशेषणम् । अकर्तृकत्वेनार्थान्तरवारणाय विशेष्यम्* । विशेषणद्वये ऽप्येतदन्यत्वं प्रतियोगिविशेषणं दृष्टान्ते साध्यप्रसिद्ध्यर्थम् । अन्यथा पक्षीकृतघटस्य असर्ववित्कर्तृकत्वाधिकरणत्वादवेदत्वाधिकरणत्वाच्च ततो ऽन्यत्वमादाय दृष्टान्ते साध्यप्रसिद्धिर्न स्यात् । न च वेदान्यत्वमादायैव तत्र साध्यप्रसिद्धिः शङ्कनीया । पक्षे साध्यसिद्धेः प्राग् वेदे असर्ववित्कर्तृकत्वानधिकरणसकर्तृकत्वसंप्रतिपत्त्यभावात् ।

सापेक्षत्वं वदन्निति । एवं च सापेक्षत्वेन कृत्स्नवेदाप्रामाण्याद्वरं ५१ । १४
निःश्वसितादिश्रुतिमात्रस्योपचरितार्थत्वम् । तथा सति वाचा विरूपनित्ययेत्यादिश्रुतिरप्यनुगृहीष्यतइति पूर्वपक्षपर्यवसाने सति सर्वज्ञत्वहेत्वन्तराक्षेपतत्समाधानार्थं प्रवृत्तमेवेदमधिकरणं जगत्तत्कारणत्वाक्षेपतत्समाधानपर्यन्तमपि फलतो भवतीत्यथ वा वेदनित्यत्वादित्युपन्यस्तद्वितीयपद्यपर्यन्तमेव भाष्यटीकयोरपि विवक्षितं सिद्ध्यतीति द्रष्टव्यम् । **स वाग्वज्र इति** । स स्वरवर्णहीनः प्रयुक्तो मन्त्रः वज्रवद्धिंसको यजमानं हिनस्ति तत्र पुराकल्पसिद्धमुदाहरणं **यथेन्द्रशत्रुरिति** । त्वष्टुः पुत्रो विश्वरूपः शक्रेण हतः स त्वष्टेन्द्रस्य हन्तारं पुत्रं लिप्सुः तदर्थं सोमयागमनुतिष्ठन् भागलिप्सुमपि

---

* अकर्तृकादन्यत्वसिद्धावर्थान्तरवारणाय विशेष्यमिति २ पु॰ पा॰ ।

इन्द्रं नाजुहाव । इन्द्रः स्वयमेवागत्य प्रसह्य सोमरसं पपौ । त्वष्टा सोमपात्रे अवशिष्टं सोमरसमिन्द्रस्य शातयिता पुत्रो भूयादित्याशंसमानः स्वाहेन्द्रशत्रुर्वर्द्धस्वेति मन्त्रेण जुहाव । तदेन्द्रशत्रुरिति शब्दस्तत्पुरुषस्वरं विहाय बहुव्रीहिस्वरेण प्रयुक्तः तेन स्वरापराधेन तत्रोत्पन्नस्य वृत्रासुरस्य शक्र एव शातयिता ऽभूदिति त्वष्टा हतपुत्र इत्यादितैत्तिरीयश्रुत्यर्थो ऽत्र निबद्धः । **अवगतसार्वज्ञ्ये इति** । ननु सार्वज्ञ्यसाधकवेदकर्तृत्वहेतुसिद्धिपरिपन्थिसापेक्षत्वशङ्कानिराकरणप्रस्तावे तदुपयोगितया सार्वज्ञ्यावगतिः कथं सिद्धवदुपन्यस्यते अन्योन्याश्रयो हि तदा स्यात् । नैष दोषः । सार्वज्ञ्याऽभ्युपगमहेतुमहिमविशेषावगतेर्विवक्षितत्वात् । ननु तथाभूतमहिमविशेषावगतिर्वा कुतः । न हि वयमीश्वरं पश्याम इत्याशङ्कोत्तरत्वेनोत्तरग्रन्थमवतारयति **नन्विति*** ॥

६ । २५

तत्तु समन्वयात् ॥ ४ ॥

जैमिनीति । जैमिनिना ह्याम्नायस्य क्रियार्थत्वा†दित्यादिसूत्रेण कृत्स्नस्याप्याम्नायस्य प्रयोजनपर्यवसानाय क्रियार्थत्वावश्यम्भावादक्रियार्थानामानर्थक्यं निष्प्रयोजनत्वं तस्मादक्रियार्थमर्थवादजातमनित्यमप्रमाणमुच्यत इति पूर्वपक्षं कृत्वा विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्यु‡रिति सूत्रेण विधिवाक्येनैकवाक्यत्वादर्थवादाः विधीनां स्तुतिरूपेणार्थेन सप्रयोजनाः स्युरिति अक्रियार्थानामानर्थक्यं पूर्वपक्षयुक्तमङ्गीकृत्यैवार्थवादानां विध्येकवाक्यतया प्रामाण्यमुपपादितम् । इदं तु जैमिन्यभिमतम् । अक्रियार्थानामानर्थक्यं न्यायविरुद्धमप्रामाणिकमिति सिद्धान्ते दूष्यमेव । अतो दूष्यसूत्रोपन्यासः सिद्धान्तिनस्तस्मिन्नर्थे विश्वासार्हो न भवतीत्यर्थः । ननूपायान्तरेणापि प्रयोगसमये स्मृतिर्भवतु मन्त्रेणापि कदा चित् स्मृतिरुपपद्यतइति तदर्थं मन्त्राम्नानं§ स्यादित्याशङ्क्याह **तावन्मात्रार्थत्वे इति भाव इति** । भावयतेर्घञि णेरनिटीति णिलोपे भावशब्दो भाव-
१ । ९ नावाची स्याद् भवतेर्घञि तु भावशब्दो भवनवाची स्यात् । **फलसंबन्ध-**

---

* अत्र तृतीयं शास्त्रयोनित्वाधिकरणं संपूर्णम् । तत्र सूत्रम् १—शास्त्रयोनित्वात् ३ ।

† जै॰ सू॰ अ॰ १ पा॰ २ सू॰ १ ।   ‡ जै॰ सू॰ अ॰ १ पा॰ २ सू॰ २ ।

§ तदर्थमन्त्राम्नानमिति २ पु॰ पा॰ ।

बोधनमिति । फलपुरुषसंबन्धबोधनमित्यर्थः । अन्यगामिनि फले प्रेरणाऽयोगात् प्रवर्तकस्वभावो विधिः फलस्य पुरुषसंबन्धं गमयतीत्येवमधिकारो विध्यधीनः । **विनियोगो ऽत्रेति** । क्रियायाः फलशेषत्वस्येवाङ्गानां प्रधानशेषत्वस्यापि बोधनं विनियोग एव स्थालीपुलाकन्यायेन त्वेकोपादानम् । **फलसंबन्ध इति** । फलस्य कर्तृपुरुषगामित्वं तेनानुष्ठेयायाः क्रियायाः फलकरणत्वरूपं विनियोगमन्तरेण न भवतीत्यर्थः । उत्पत्तिविधिना ऽधिकारादिप्रतीतिमुदाहरति **अग्निहोत्रमिति** । उत्पत्तिविधेः अग्निहोत्रस्वरूपज्ञापनमात्रपरत्वे किमग्निहोत्रं कर्तव्यमिति तदर्थ उताग्निहोत्रमभूदित्यादिः । नाद्यः । क्लेशात्मके कर्मणि स्वतः प्रेरणानुपपत्तेः । न द्वितीयः । विधिविरोधात् । कालत्रयाऽनवमृष्टे विधिप्रवृत्तेरित्यर्थः ।
तस्मादधिकारविधित इति । अग्निहोत्रं जुहुयात् स्वर्गकाम इत्य- ५९ । १८
धिकारविधिरग्निहोत्रनामकेन होमेन स्वर्गं भावयेत् इत्येवमर्थकः । फलस्यान्यगामित्वे तदर्थं प्रेरणानुपपत्तेस्तस्य कर्तृसंबन्धं बोधयन्नेव तेनानुष्ठातुं शक्याया होमक्रियायाः फलशेषत्वरूपं* विनियोगमपि बोधयतीत्येवमधिकारविधिसिद्धविनियोगांशे अनुवादरूपो ऽयमुत्पत्तिविधिः कर्मस्वरूपज्ञापनमात्रप्रयोजनो भवतीत्यर्थः । **अपि त्विति** । प्रत्यक्षविरुद्धार्थत्वरूपविपरीतार्थत्वदोषो ऽपि परिहृतो भवतीत्यर्थः । **न त्वन्तरावाक्यइति** । यद्यपि यागविधौ स्थिते ध्रौवाज्यं द्रव्यं लभ्यते तथापि देवताया अलाभाद् वर्तमानापदेशाच्च यागविध्यसंभवे द्रव्यलाभो दूरापास्त इति भावः ।

आलस्यमिति । दशमाध्याये अजामिकरणार्थत्वाच्चेति† सूत्रभाष्ये ६० । १९
जामितासादृश्यमिति व्याख्यातम् । तत्रैव नयविवेके जामितासादृश्यमेकरूपा हि द्विः क्रियेति‡ तेन कृताकृताननुसन्धिदोष इति सादृश्यस्य दोषपर्यवसायित्वमुपपादितम् । इह त्वेकरूपायाः क्रियायाः पुनः पुनरनुष्ठाने तन्द्रा स्यादिति भाष्योक्तस्यैव सादृश्यस्य दोषत्वपर्यवसानमात्रं प्रकारान्तरेणोक्तमिति न भाष्यविरोधः । न्यायसुधायाम्§प्येवमेवोक्तम् । सादृश्यस्य नैरन्तर्यानुष्ठाने

---

* फले शेषत्वरूपमिति २ पु॰ पा॰ । † जै॰ सू॰ अ १० पा॰ ८ सू॰ ६३ ।
‡ एकरूपा हि क्रियेति द्विरित्येतद्रहितः पाठः २ पु॰ ।
§ न्यायसुधा-तन्त्रवार्तिकटीका ।

सत्यालस्यापादकत्वेन दोषत्वादिति किं तु तत्र सौन्दर्यवाची जामिशब्दः
तस्य सादृश्ये लक्षणेत्युक्तमिति विशेषः ।

६० । २० **उपांशुयाजमाज्यद्रव्यकं विधायेति ।** अथान्तरावाक्यविष्णवा-
दिवाक्यसाधारण्येनोपांशुगुणकयागविधानमात्रं विवक्षितं न त्वन्तरावाक्येनो-
पांशुयाजविधानम् । अन्तरावाक्यमेव यागविधायकं न विष्णवादिवाक्यत्रय-
मित्यस्यार्थस्य प्रसाधयिष्यमाणैकवाक्यतासिद्ध्यधीनत्वात् ततः प्राक् अन्त-
रावाक्यं विष्णवादिवाक्यत्रयं वा यत्किञ्चिद् ध्रौवाज्यप्राप्तिमदुपांशुधर्मकयागवि-
धायकमस्तीत्येतावत्येवांशे संप्रतिपत्तेः ।

ननु जामितादोषोपक्रमतत्प्रतीकारोपसंहाराभ्यामेकवाक्यता नावसी-
यते येन तत्संरक्षणार्थमन्तरावाक्यं विधायकमिति निर्णीयेत । किं तु विष्णवा-
दिवाक्येषु प्रत्येकं जामिताप्रतीकारनिबन्धनाद् वाक्यभेद एवावसीयते तदनु-
सारेणोपक्रमे जामितादोषोक्तेरपि विष्णवादिवाक्यविधेययागत्रयस्तुत्यर्थत्वा-
वगमात् । न खल्वस्मिन् जले स्नानेन प्रतिश्यायो* भवति नयनयोरञ्जनं
कुर्यात् प्रतिश्यायपरिहाराय पिप्पलीचूर्णयुक्तं नारिकेलोदकं सेवेत प्रतिश्या-
यपरिहाराय मरीचचूर्णयुक्तं क्षीरं पिबेत् प्रतिश्यायपरिहारायेति प्रत्येकं
प्रतिश्यायप्रतीकारार्थतया ऽञ्जनादिविधाने प्रतिश्यायदोषोपक्रमतत्प्रतीकारो-
,, । २४ पसंहारमात्रेणैकवाक्यता भवतीत्याशङ्क्याह **तथा हीति ।** विष्णवादिवाक्येषु
यागविधाने कर्मप्रधानतव्यप्रत्ययबलाद् विष्णवादिदेवतासंस्कारार्थयागवि-
धानं झटिति प्रतीतं स्यात् । अतः संस्कृतदेवताविनियोगादर्शनेन ततः
परावृत्य यागानामर्थकर्मभावेन प्राधान्यं लक्षणीयमिति तेषु विलम्बिताः
प्रधानभूतयागविधयः । अन्तरावाक्ये तु यागस्य अन्योपसर्जनत्वं न श्रुत-
मिति प्रधानभूतस्य तस्य पञ्चमलकारकल्पनेन विधिः शीघ्रतरः जामिता-
दोषपरिहारोपयुक्तान्तरालकालयुक्तश्च पुरोडाशद्वयनैरन्तर्य्यात् । जामितादो-
षोपन्यासेन ह्युपक्रम एवैतदवगतमुपन्यस्तदोषसमाधानार्थमन्तराले किं चि-
द्विधित्सितमिति । तद्यद्यन्तरावाक्यं विहाय विष्णवादिवाक्येषु विधिराश्री-
येत तदोपक्रमानुगुण्यं न स्यात् । न हि नैरन्तर्य्यप्रयुक्तदोषस्यान्तराले
कर्मान्तरविधानेनेव विष्णवादियजनविधानेन समाधानं प्रतीयते । प्रतिश्या-

* प्रतिश्यायः पीनसः शैत्यमिति यावत् ।

यादिवाक्येषु तु नैवं कर्मप्राधान्यप्रतीतिः* । न चोपक्रान्तदोषसमाधानसामर्थ्यावगतिविषययुक्तविध्यन्तरश्रवणमस्तीति तत्र वाक्यभेदे ऽपि नात्र तद्भेदः समाश्रयणीयः । तस्मान्मन्त्रवर्णप्राप्तविष्णवादियागेन प्रशंसार्थे ऽर्थवादचये प्रत्येकमाम्नातमप्यजामिकरणं तदन्वयद्वारा विधायके ऽन्तरावाक्यएवान्वेति । अत एव तैत्तिरीयशाखायामुपांशुयाजमन्तरा यजतीत्यन्तरावाक्यएवाजामिकरणमाम्नातम् । इह त्वर्थवादचये अजामि†करणाभ्यासस्तद्दृढीकरणाय भविष्यतीति न तदनुरोधेन वाक्यभेदशङ्कावकाशः ।

कर्मतया च देवतात्वमिति । लक्षणीयमित्यनुषङ्गः । **तस्मा-** ६१ । २
दिति । अपूर्वत्वाद् यागे एव विध्यपेक्षा न विष्णवादिदेवतास्वपि मन्त्रवर्णतः प्राप्तिसम्भवादिति भावः । सामवेदे सार्वात्म्यविषयावुपक्रमो‡पसंहारौ दर्शितौ । ऋग्वेदादिष्वपि तौ दर्शयति **ऐतरेयके इति** । ऐतरेये इति तु न पाठः । इतराया अपत्यमैतरेयस्तेन प्रोक्तां शाखामधीयतइत्यैतरेयिणः । तेन प्रोक्तमित्यर्थे पुराणप्रोक्तेषु ब्राह्मणकल्पेष्विति सूत्रेण णिनिप्रत्यये सति तदधीतइत्यर्थे विहितस्य प्रत्ययस्य प्रोक्ताल्लुगिति सूत्रेण प्रोक्तप्रत्ययान्तस्य लुग्विधायकेन लोपे सति निष्पत्तेः । ततश्चैतरेयिणामाम्नाय इत्यर्थे गोचरणाद्वुञिति वुञ्प्रत्यये सति ह्यैतरेयके इति भाव्यम् । **स एतमेवेति** । अनेन वाक्येन प्रत्यगात्मैव ब्रह्मेत्युपक्रान्तं तदुपसंहारे च प्रज्ञानशब्दो जीवपरः । सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानीति प्राक् प्रज्ञानशब्देन जीवस्य निर्दिष्टत्वात् ।

वेदान्ता यदीति । वेदान्तानां सापेक्षत्वप्रसञ्जकस्य भूतार्थत्व- „ । १४
हेतोः पौरुषेयत्वेन सोपाधिकत्वम् । अयमभिसंधिरित्यारभ्य प्रवृत्तेन टीकाग्रन्थेनोच्यमानं परिनिष्ठितवस्तुविषयत्वे ऽपीति भाष्यगतापिशब्देन भूतार्थत्वस्य सापेक्षत्वव्यभिचारं दर्शयतोक्तसाध्य प्रयोजकान्तरसद्भावसूचनेन द्योत्यतइत्येतदभिसंधिशब्देनाहेत्यर्थः ।

नन्वयमभिसंधिरित्यादिटीकाग्रन्थस्योक्तरीत्योपाध्युद्भावनपरत्वेनावतारणमयुक्तम् । तस्य ग्रन्थस्य सापेक्षत्वापादने भूतार्थत्वप्रसङ्गहेतुः पौरुषे-

* प्राधान्यं प्रतीतमिति पा॰ २ पु॰ । † अन्तरावाक्यएवाजामीत्यादि २ पु॰ ।
‡ विषयादुपक्रमेति शोधितं १ पु॰ ।

यत्वं वेति विकल्प्य प्रथमपक्षं व्यभिचारेण निरस्याथेत्यादिग्रन्थेन द्वितीयपक्षमुद्भाव्य तं पक्षं वेदान्तानां पौरुषेयत्वं नास्तीति प्रसङ्गहेत्वसंमत्या दूषयित्वा भूतार्थत्वे मानान्तरेण शक्यग्रहत्वात् पौरुषेयत्वमपि स्यादिति प्रसङ्गहेतोरप्यापादनशङ्कां यद्युच्येतेत्यादिग्रन्थेनोद्भाव्य तर्हि कार्यार्थत्वे ऽपि तत एव हेतोस्तत् स्यादित्येतदर्थप्रतिपादकतयैव तस्य ग्रन्थस्य प्रवृत्तेः । तस्य पौरुषेयत्वोपाध्युद्भावनपरत्वे तमुपाधिमसहमानस्य पूर्वपक्षिणः सापेक्षत्वे पौरुषेयत्वं प्रयोजकमित्युक्त्यसंभवेनाथेत्यादिशङ्काग्रन्थस्यानन्वयप्रसङ्गाच्च यद्युच्येतेत्यादिशङ्काग्रन्थोपसंहारे । तस्मात् पौरुषेयत्वेन सापेक्षत्वं दुर्वारम् । ननु भूतार्थत्वेनेति भूतार्थत्वं हेतुं परित्यज्य पौरुषेयत्वस्य हेतुतयैवोपादानस्य स्पष्टीकरणाच्चेति चेत् । उच्यते । टीकायां भूतार्थतया खलु सापेक्षत्वमाशङ्क्यते इत्यनुवादानन्तरं भूतार्थतया वेदान्तानां सापेक्षत्वम् उत पौरुषेयतयेति विकल्पो न प्रसरति । भूतार्थत्वहेतौ व्यभिचारेण दूषिते तत्रैव वाक्यत्वविशेषणाशङ्कां विहाय वाक्यत्वविशेषितभूतार्थत्वहेतुना प्रसाधनीयस्य पौरुषेयत्वस्य हेत्वन्तरस्य शङ्का च न सामञ्जस्यमश्नुते । तस्मात् पौरुषेयत्वमुपाधिमुद्भावयिष्यतो गूढाभिसंधेः सिद्धान्तिनो ऽयं विकल्पः । दृष्टान्तीकृतेषु* पुंवाक्येषु सापेक्षत्वे त्वदीयसाधनं भूतार्थत्वं प्रयोजकं मदुद्भावनीयोपाधिरूपं पौरुषेयत्वं वेति । अत एव पक्षे हेतुविकल्पो ऽयं न भवति । किं तु दृष्टान्ते साध्यप्रयोजकधर्मविकल्प इति दर्शयितुमेव टीकायां पुंवाक्यनिदर्शनेन हीति पुंवाक्यानामिति च विशेषितम् । ततः प्रथमपक्षे व्यभिचारेण दूषिते तत्र वाक्यत्वविशेषणे कृते ऽपि सिद्धान्ती पौरुषेयत्वमुपाधिं ब्रूयादिति तं पक्षं परित्यज्य तदभिमतमुपाधिं साधनव्यापकत्वेनानुपाधिं व्यवस्थापयिष्याम इति मन्यमानस्य पूर्वपक्षिणः पक्षान्तरपरिग्रहाशङ्का । अथ पुरुषबुद्धिप्रभवतयेति पौरुषेयत्वस्य सापेक्षत्वप्रयोजकत्वमङ्गीकृत्य तस्य वेदान्तेष्वभावेन साधनाव्यापकतयो†पाधित्वोद्घाटनम् ।

एवं तर्हीति । वेदान्तानां भूतार्थवाक्यत्वहेतुना पौरुषेयत्वापादनेन साधनव्यापकतया ऽनुपाधित्वशङ्का यद्युच्येतेति । तस्मात् पौरुषेय-

* दृष्टान्तोक्तेषु इति २ पु· पा· । † साधनमव्यापकतयेति २ पु· ।

त्वेनेति तदुपसंहारवाक्येनाप्यनुपाधित्वशङ्काया एव तत्फलेन सहोपसंहारः । वेदान्तानां पौरुषेयत्वमापाद्योपाधेः साधनव्यापकत्वान्निरुपाधिकेन भूतार्थत्वेन सापेक्षत्वमापाद्यते न तु तदनापाद्य सोपाधिकेन भूतार्थत्वेनेति ततः प्रतिबन्दिग्रहणेन वेदान्तानां भूतार्थत्वे ऽप्यपौरुषेयत्वोपपत्त्योपाधेः साधनाव्यापकत्वव्यवस्थापनेन भूतार्थत्वहेतुकसापेक्षत्वप्रसङ्गानुमानस्य सोपाधिकत्वप्रदर्शनपरो ऽत्र **ब्रूम** इत्यादिग्रन्थः । अत एव तदुपसंहारवाक्यं तेनासिद्धे पौरुषेयत्वे भूतार्थानामपि वेदान्तानां न सापेक्षतया प्रामाण्यविघात इति । तस्मादुपाध्युद्भावनपरतया व्याख्यानं युक्तमेव । प्रमाणा*न्तरसिद्धार्थानुवादकतया स्वप्रामाण्यसिद्धौ तत्प्रामाण्यमुखनिरीक्षकत्वं सापेक्षत्वं पूर्वानुपूर्व्यनपेक्षपुंविशेषबुद्ध्यधीनानुपूर्वीमत्त्वं पौरुषेयत्वमिति साध्योपाध्योर्भेदः । **तस्यैवेति ।** यस्य हेतोरुपाधिरुद्भावनीयः तस्यैव व्यभिचारं तावदाहेत्यर्थः । यद्यपि दृष्टान्तीकृतेषु पुंवाक्येषु भूतार्थत्वं सापेक्षत्वप्रयोजकं न भवतीत्येतदुपपादकः प्रत्यक्षादिषु सत्यपि भूतार्थत्वे सापेक्षत्वाभावः उपाध्युद्भावनोपयोगिप्रयोजकान्तरशङ्कावसरदानार्थमिहोच्यते तथापि स एव हेतोः पक्षे साध्यासाधकत्वसिद्ध्युपयोगा व्यभिचारो ऽपीत्यभेददृष्ट्या ऽनैकान्तिकतामाहेत्युक्तं **कार्ये मानान्तरायोग्यत्वस्यासिद्धत्वादिति ।** ६१ । २१

ननु वेदान्तानां कार्यपरत्वे ऽपि पौरुषेयत्वानुमानं प्रसरति कार्यस्यापि मानान्तरयोग्यत्वाविशेषादिति पौरुषेयत्वानुमानमुक्त्वा तत्फलमुपाधेः साधनव्यापकत्वमप्यभिधाय ततश्चेत्यादिग्रन्थेन पुनरपि पौरुषेयत्वानुमानप्रसर एवोपसंह्रियते । उपाधिविधूनने निरुपाधिकेन वाक्यत्वेन सापेक्षत्वानुमानमेव खलूपसंहर्त्तव्यम् । सत्यम् । वाक्यत्वादिलिङ्गकं पौरुषेयत्वशब्देन पुरुषबुद्धिप्रभवत्वपरेण सापेक्षत्वमेवोक्तम् । अथ वा पौरुषेयत्वं सम्भवतीति पूर्ववाक्येन पौरुषेयत्वानुमानस्य बाधाभावमात्रमुक्तं ततश्चेत्यादिग्रन्थेन । तत्फलतया पौरुषेयत्वानुमानप्रवृत्तिरुक्ता† प्रागेव साधनव्याप्त्युक्तिस्तु वक्ष्यमाणानुमानफलत्वाभिप्रायेणेति नेतव्यम् । **अकार्य्यार्थत्वं समानमिति ।** निष्प्रत्यूहेन वाक्यत्वादिहेतुना पौरुषेयत्वे ऽनुमिते सति मानान्तरागोचरा ऽपूर्वा कार्यार्थत्वकल्पनैव न प्रवर्त्तते चैत्यवन्दनादिवाक्येषु । अतस्तत्कल्पना ।

---

* युक्तमेवं प्रमाणेति २ पु॰ पा॰ । † अनुमानस्य प्रवृत्तिरिति २ पु॰ पा॰ ।

६२ । ६ पौरुषेयत्वप्रत्याख्यानप्रत्याशा दुराशेति भावः। **स्मर्यमाणकर्तृकत्वेनेति**। चैत्यवन्दनादिवाक्येष्वपि पश्याम्यहं भिक्षवो दिव्येन चक्षुषा सुकृतं दुष्कृतं चेति तदागमकर्तृबुद्धवचसैव कर्तृप्रतीतिरस्तीति भावः। **सिद्धार्थवेदान्तेष्वपीति***। यथा वेदान्तानां कार्यार्थत्वपक्षे तेषां पौरुषेयत्वानुमानं कर्तृस्मरणोपाधिना निरस्यते तथा तेषां सिद्धार्थत्वपक्षे ऽपि तन्निरसितुं शक्यमित्यप्रयोजकं कार्यार्थत्वकल्पनमित्यर्थः। **कार्यरूपेति**। कार्यं रूपयति अनुष्ठेयं ज्ञापयति कार्यरूपो यागाद्यनुष्ठानप्रयोजकः। तद्गतस्वर्गादिश्रेयःसाधनत्वाकारस्तेन रूपेण यागादिर्धर्मः। अतो यागादेः स्वरूपतः प्रत्यक्षत्वे ऽपि धर्मत्वाकारेणातीन्द्रियता। यथाहुः।

श्रेयःसाधनता ह्येषां नित्यं वेदात्प्रमीयते।
तादूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः॥ इति।

,, । २६ **व्याप्त्यभावेनेति**। वेदान्तानां सिद्धवस्तुपरत्वमनुमातुं न शक्यम्। वेदवाक्यत्वस्य तेन व्याप्त्यभावादित्यर्थः†। **निन्दा न भातीति**। नन्वमुञ्जं हि यो बर्हिषि ददाति पुरा ऽस्य संवत्सराद्गृहे रुदन्तीति वाक्यशेषेण यागे रजतदानस्य बलवदनिष्टानुबन्धित्वरूपा निन्दा भातीति चेद् न। संवत्सरात्प्राग् रोदनस्य क्व चित्क्व चिददर्शनेन वाक्यशेषस्य पारलौकिकानिष्टानुबन्धित्वलक्षकतायाः समाश्रयणीयत्वात्। सिद्धार्थव्युत्पत्त्यनुपमर्दोपमर्दाभ्यां वर्णकयोः पूर्वपक्षभेदमुक्त्वा ब्रह्मणः शास्त्रप्रमाणकत्वप्रतिक्षेपाऽप्रतिक्षेपाभ्यां तद्भेदं यद्यपीत्यादिभाष्यसिद्धं दर्शयति अथ वेति। **लोकेन न प्रयुज्यते** इत्ययुक्तम्‡। पामरजने निरर्थकसिद्धार्थपदसंघातप्रयोगस्य

६४ । १२ संभावितत्वादित्याशङ्क्य लोकेनेति पदं व्याचष्टे **वृद्धैरिति**। **प्रेक्षावता** उत्तमवृद्ध§जनेनेत्यर्थः। **पर्यायत्वमाशङ्क्येति**। न च कार्यान्विततदर्थविशेषपरत्वेनापर्यायत्वमुपपादयितुं शक्यम्। कार्यवाचिनि लिङादिपदे कार्यान्विताार्थान्तराभावेन कार्यान्विते पदानां शक्तिरित्युक्त्यसंभवादिति शङ्काभिप्रायः। कार्ये शक्तिरिति नियमः। तस्य नियमस्य कार्यवाचिपदानां तन्मात्र-

---

* वेदान्तवाक्येष्वपीति ६–५ पु॰ पा॰।
† अभावेनेत्यर्थ इति २ पु॰ पा॰।
‡ इत्युक्तमिति २ पु॰ पा॰।
§ उत्तमवृद्धेति ५ पु॰ पा॰।

शक्त्या तदितरपदानां तदन्वितस्वस्वार्थशक्त्या च निर्वाह इति परिहाराभिप्रायः ।

नियोगाऽविनाभावादिति । मध्यमवृद्धप्रतिपत्ति*लिङ्गापेक्षप्रा- ६४ । १९
थमिककार्यव्युत्पत्तिग्रहोपजीविनां पाश्चात्त्यव्यवहाराणाम् उपजीव्यानुसारेण कार्याविनाभावादित्यर्थः । एतेन व्याकरणकोशाप्तवाक्यप्रसिद्धपदसमभिव्याहारैः सिद्धार्थे ऽपि व्युत्पत्तिग्रहः संभवतीत्यपि शङ्का निरस्ता । तेष्वपि प्राथमिकव्युत्पत्तिग्रहानुसारेण कार्यवाचिपदाध्याहारावश्यंभावात् । ननु न च रज्जुरियमित्यादिर्निवृत्तिर्भवतीत्यन्तः सिद्धान्तिशङ्कानुवादग्रन्थः । तन्मध्ये कथं तदनभिमतनियोगाविनाभावोक्तिः । नैष दोषः । पूर्वपक्षिणा ऽपि संमतो हि दृष्टान्तीकर्तव्यः । न च तत्केवलसिद्धार्थपरमर्थवदिति पूर्वपक्षिणः संमतिरस्ति । तथापि कार्यवाचिपदाद्यध्याहाराभ्युपगमादिति पूर्वपक्ष्याशयानुसारेण यथाकथं चिल्लक्षणयेति टीकातद्व्याख्यानयोरवतारणाद् रज्जुवाक्यस्य परमते कार्यपरत्वे ऽपि रज्जुरियं न भुजङ्ग इति सिद्धार्थांश एव भयादि निवृत्त्युपयोगि न तु कुलधर्मतया परकल्पितः कार्यांश इति सिद्धार्थपरतत्त्वमस्यादिवाक्यदृष्टान्तत्वसङ्गतिः ।

टीकायां स्वविषयस्य करणस्येत्यत्र स्वविषयस्येति पदं व्याचष्टे
स्वप्रतीत्युपाधित्वेन विषयस्येति । लिङा ऽपूर्वं कार्यत्वेनाभिधेयं ,, । २४
कार्यत्वं च कृतिसाध्यत्वं न चापूर्वस्य साक्षात्कृतिसाध्यत्वं संभवति । अतो† यद्द्वारा तस्य कृतिसाध्यत्वं घटनीयं स धात्वर्थो यागदानहोमादिरनुबन्धो ऽवच्छेदको विषय इति प्राभाकरैर्व्यवह्रियते । करणस्येति पदं व्याचष्टे **स्वनिर्वर्त्तकत्वेन करणस्येति** । तदाहुः ।

कृतितत्साध्यमध्यस्थो यागादिर्विषयो मतः ।
कार्ये संघटिताकारे करणत्वेन संमतः ॥ इति ।

न श्रौतत्वमात्मन इति । नन्वात्मानमुपासीतेति श्रुतकर्मका- ६५ । १
रकविशिष्टा खलूपास्तिक्रिया विधिविषयत्वेनान्वेति कथं तर्हि‡ श्रुतस्यात्मनः कर्मकारणस्याश्रौतत्वशङ्का§ कथं च तस्य विध्याक्षिप्ततया श्रौतत्वनिर्वहणेन

---

* मध्यमवृद्धप्रवृत्तीति २ पु· पा· ।
† तत इति २ पु· पा· ।
‡ तर्ह्यश्रौतत्वमिति ३-५ पु· पा ।
§ अश्रौतत्वमाशङ्क्येति २ पु· पा· ।

तत्समाधानम् । न हि गामानयेत्यत्र श्रुतस्य गोः कर्मकारकस्य पिधेहीति प्रयोगे द्वारस्येवाक्षेप्यता ऽस्ति । उच्यते । आत्ममात्रस्य विधिविषयक्रियाकर्मतया ऽन्वयः श्रौतः । न तु भाष्योदाहृतसर्ववेदान्तसमाहृतविज्ञानानन्दादिस्वभावस्यात्मनः तथाभूतात्मस्वरूपाभिप्राये शङ्कासमाधाने । अत एव टीकायां तादृशमात्मानमाक्षिपतीति तादृगात्मप्रतिपत्तिविधिपरेभ्यो वेदान्तेभ्य इति चोक्तम् । ननु तादृक्स्वभावो ऽपि विज्ञानमानन्दं ब्रह्मेत्यादिपदबोध्यः । मैवम् । कार्यान्विते पदानां व्युत्पत्तेः । कार्यान्वितार्थ एव पदसंघातो ऽर्थवान् अन्यस्त्वनर्थक एव । एवं च ग्राहकग्रहणदशायां विज्ञानानन्दादिस्वभावस्योपास्तिनियोगेन सह प्रारब्धमन्विताभिधानं निर्वहति । आत्ममात्ररूपकर्मकारकावच्छिन्नोपास्तिक्रियाविषयविधौ पर्यवसिते पश्चात् पदान्तरैस्तद्विशेषणतया श्रवणस्यानुवादमात्ररूपत्वेन केवलं तत्तत्पदार्थस्मृतिमात्रहेतुत्वप्रसक्तेः । तस्मादुपास्तिनियोग एव प्रथमारब्धग्राहकग्रहणनिर्वाहार्थं पूर्वं ज्ञानानन्दादि*स्वभावावच्छिन्नत्वमात्मकारकस्यापाद्य पश्चात् तद्विशिष्टोपास्तिक्रियाविषयो भवतीत्येवं विध्याक्षेपरूपोपादानप्रमाणप्रसादलभ्यैव ज्ञानानन्दादिरूपब्रह्मैक्यस्य प्रत्यगात्मनि तात्पर्येणानिश्चेयतारूपा विधेयता । एवमेव तथा द्रव्येषु गुणश्रुतिरुत्पत्तिसंयोगा†दिति पूर्वतन्त्राधिकरणे सोमारौद्रं चरुं निर्वपेत् शुक्लानां व्रीहीणामित्यत्र पृथक्पदाभ्यां विशेषणतया श्रुतयोर्व्रीहिद्रव्यशुक्लगुणयोरविवक्षामाशङ्क्य ग्राहकविध्याक्षेपबलात् तद्विवक्षा प्राभाकरैः समर्थिता ।

६५ । १ **श्रौतत्वे इति ।** एवं च तद्विधेयमिति गुरुग्रन्थस्य प्रथमारब्धग्राहकग्रहणनिर्वाहाय यत्किञ्चिद्द्वारेण विध्यन्वयितया शब्दबोध्यमित्यर्थ इति तात्पर्यम् । एवं हि विध्याक्षिप्तस्य श्रौतत्वे संमतिर्दर्शिता भवति । विध्याक्षेपरूपविधिव्यापारात्मकमुपादानं शब्दप्रमाणान्तर्भूतं न तु पीनो देवदत्तो दिवा न भुङ्क्त इति लौकिकवाक्यार्थज्ञानमूलश्रुतार्थापत्तिवत् शाब्दप्रमोपजीवि तदनन्तरं प्रवर्तमानं प्रमाणान्तरमिति गुरुमतमर्यादा । नन्वारोपितस्यापि विषयतया निरूपकत्वमस्त्येवेत्याशङ्क्याह **न च सत्यां**

---

* विज्ञानानन्दादीति २ पु· पा· ।

† जै· सू· अ· २ पा· २ सू· २५ ।

गताविति । गगनस्य तत्तत्कर्णपुटावच्छेदेन प्रतिपुरुषव्यवस्थितश्रोतृ-
भाववदेकस्यैव व्यापकस्य ब्रह्मचैतन्यस्य तत्तदविद्योपाध्यवच्छेदेन प्रति-
शरीरं व्यवस्थितप्रत्यगात्मभाव उपपद्यतइत्येवं गतौ सत्यां वाग्धेनुत्वादि-
वदारोपो न युक्त इत्यर्थः । **अपूर्वदेवतेति** । सौर्यादावुदीच्याङ्गजन्योपका-
रसाहित्यायाधिकारविध्याक्षेप्यमौपादानिकं यदुत्पत्त्यपूर्वं तद्विषयमिहापूर्व-
पदं न त्वधिकारापूर्वविषयम् । प्रस्तुते गुरुमते तस्यैव लिङर्थस्य विधितया
ऽन्यविधिपरेण शास्त्रेण सिद्ध्यभावात् । **एवंकाम इत्यश्रवणादिति** । ६६ । ७
वर्तमानापदेशात् सिद्धरूपैव प्रतिष्ठा प्रतीयते न साध्यरूपेति तस्या अपि
फलत्वं कल्प्यं ततो वरं विश्वजिन्न्याये*न विधिशक्त्यवगतस्वर्गफलकल्पन-
मिति भावः । **प्रतिष्ठाफलस्य निर्देशादिति** । अत्यन्ताश्रुतफलकल्पना-
द्वरं श्रुताया एव प्रतिष्ठाया विपरिणामेन फलत्वकल्पनम्† । तथा च यत्त-
दोर्व्यत्यासेन योजनया प्रतितिष्ठन्तीत्यत्र सनर्थान्तर्भावनेन च ये प्रतिति-
ष्ठासन्ति त एता रात्रीरुपेयुरिति वाक्यविपरिणामः कार्य इति भावः ।

नैमित्तिकाधिकारे इति‡ । यः सत्रायावगुरते§ स विश्वजिता
यजेतेति विहितो विश्वजिन्नैमित्तिकाधिकारः । ननु पितृयज्ञः स्वकालत्वा-
दनङ्गं स्या||दङ्गं वा समभिव्याहारादिति याज्ञिकाभिमतद्वितीयपक्षानु-
सारेण पितृयज्ञो यदि दर्शाङ्गमिष्यते तदा सो ऽपि नियोज्याकाङ्क्षाराहि-
त्यात्त स्थिरोदाहरणं न स्यादित्याशङ्कापरिहाराय तदनङ्गत्वव्यवस्थाप-
काधिकरणानुक्रमणं दर्शप्रकरणपठितत्वे प्रकरणात् तदङ्गत्वमेव स्यादित्य-
नारभ्याधीतत्वोक्तिः । ननु पूर्वेद्युरमावास्यायां वेदिं करोतीति कर्मणीव ऐन्द्रं
पयो ऽमावास्यायामिति काले ऽप्यमावास्याशब्दो दृश्यतइत्याशङ्क्याह **यद्य-**   ११ । १८
पीति । ननु यदि प्रकृतं सा वैश्वदेवीति तत्पदेन परामर्शनीयं तर्हि
दध्यपि प्रकृतमिति तत्परामर्शनीयं कुतो न स्यात् । तस्माद्विनिगमना-
विरहादुभयं विहायामिक्षां दधिपयोभ्यां निष्पन्नं द्रव्यान्तरमङ्गीकृत्य तत्परा-
मर्शित्वकल्पनं युक्तम् । सर्वनाम्नः प्रकृतपरामर्शित्वासम्भवेन प्रकरिष्यमाण-

---

* जै॰ सू॰ अ॰ ४ पा॰ ३ सू॰ १५–१६ ।   † कल्पनेति २ पु॰ पा॰ ।
‡ अयं प्रतीकः कल्प॰ पृ॰ ६६ ‡ चिन्हितपाठभेदस्यो द्रष्टव्यः ।
§ सत्रायागुरते इति १ पु॰ पा॰ ।
|| जै सू॰ अ॰ ४ पा॰ ४ सू॰ १६ ।

६१ । २३ रामर्शित्वस्यार्थेष ज्योतिरित्यादौ दृष्टत्वादित्याशङ्क्याह **तत्र नयतेरिति*** । द्विकर्मकधात्वर्थान्वयि पयो ऽपि कर्मैव तत्र कस्यानयनेन किं संस्कार्य्यमिति सन्देहे दध्यानयनेन पयः संस्कार्यमिति पयसः प्रधानकर्मत्वद्योतनाय कर्मण्यपि तस्मिन् सप्तमीप्रयोगः । यच्च प्रधानं तदेव सर्वनाम्ना परामर्शनीयम् । अतः पयःपरामर्शितच्छब्दसामानाधिकरण्यादामिक्षाशब्दो दध्यानयनेन संस्कृतस्य पयस एव वाचको न तदुत्पन्नस्य द्रव्यान्तरस्येत्यवसीयतइत्याशयः । **रूपभेदे ऽपि** द्रवत्वकठिनत्वधर्मभेदे ऽपि । **तर्हि वाजिनमपीति** । दधिसंस्कृतं पयं एवामिक्षावाजिनात्मतया रूपद्वयं प्राप्तमित्यपि कल्पनोपपत्तेरामिक्षावद् वाजिनमपि पयस्त्वाविशेषाद् दध्यानयनस्य प्रयोजकं भवेदेव । ततश्च वाजिनापचारे पयोन्तरमानीय दध्यानयनेन संस्कृत्य वाजिनं निष्पादनीयमिति शङ्कार्थः । **तस्यामस्तीति** । तादात्म्येनेति शेषः ।

„ । ५ **रूपाभेदे ऽपि** द्रवत्वधर्माभेदे ऽपि । एतदुपलक्षणम् । विनापि दध्यानयनम् अतिपाकेन पिण्डीभूतस्य पयसो रूपभेदे ऽपि भेदाभावादित्यपि द्रष्टव्यम् । एवं रसानुवृत्तेरेवाभेदप्रयोजकत्वादामिक्षायामेव पयःपरामर्शितत्पदसामानाधिकरण्यं दृश्यते न वाजिने इति भावः ।

यद्विषया जिज्ञासेत्यादिभाष्यगतविशेषणैः प्रतीयमानवेदान्तानामुपास्तिविधिपरत्वे प्राचीनतन्त्रे विचारितत्वेनात्र विचारो विफलः स्यादित्युक्तिर्वेदान्ता यद्युपासामिति श्लोकपूर्वार्द्धेन संगृहीता सा न चोदक्षमा वेधफलविषयतया स्वर्गदेवतावद् विधिशेषैः ब्रह्मस्वरूपमात्रस्य प्राचीनतन्त्रन्यायैः कथं चित्सिद्धिसम्भवे ऽपि तन्निर्गुणत्वादेर्विद्याभेदाभेदोपसंहाराभ्यामुपसंहारस्य विशेषस्य चैतत्तन्त्रव्युत्पादयिष्यमाणन्यायैकनिर्णेयस्य ततो निर्णयाऽलाभात् । अतो ऽभ्युच्चयमात्रं सा युक्तिः । मूलयुक्तिस्तु श्लोकोत्तरार्द्धसंगृहीता मोक्षस्य सातिशयत्वानित्यत्वापत्तिरित्येतत् सूचयितुं तत्रैव भाष्यस्य तात्पर्यं दर्शयति टीकाकार इत्यवतारयति **वेदान्ता यद्युपासनाविधिपरा इति** ।

„ । १८ **अधर्मफलं भोक्तव्यमिति** । तद्यइह कपूयचरणा इत्यादिश्रुत्या धर्मफलभोगानन्तरं कदा चिदधर्मफलभोगस्याप्युक्तत्वादिति भावः । इदमभ्युच्चयमात्रम् अहंग्रहोपासनाभिस्तत्फलप्राप्तेः प्रागेव सर्वपापक्षयस्याङ्गीकृत-

* तत्रानयतेरिति ३-५ पु॰ पा॰ ।

स्यात् । **देवदत्तशरीरेति** । देवदत्तशरीरासमानकालीनत्वं प्रलयकालोत्पन्ने तदीयशरीरध्वंसे ऽप्यस्तीति तद्वारणाय प्रागभावविशेषणम् । शरीरप्रागभावासमानकालीनत्वं चरममुक्तशरीरध्वंसादन्यत्र न सम्भवतीत्यव्याप्तिवारणायाद्यदेवदत्तविशेषणम् । देवदत्तमुक्तिकाले तदन्यस्यापि कस्य चित् संसारिणः सम्भवति देवदत्तशरीरप्रागभावासमानकालीनः शरीरध्वंस आत्यन्तिको मा भूदिति द्वितीयदेवदत्तविशेषणम् । एवमपि देवदत्तस्योपान्त्यशरीरध्वंसो यद्यन्त्यशरीरोत्पत्तिकाले तदुत्पत्त्यनन्तरं वा स्यात् तदा सो ऽप्यात्यन्तिको भवेदिति तद्वारणाय शरीरतत्प्रागभावाऽसमानकालीनत्वं विवक्षितम् ।

नन्वात्यन्तिकमशरीरत्वम् इत्थं ध्वंसतया* निर्वक्तुमयुक्तम् । तस्य साध्यत्वेन वैधोपासनाफलत्वप्रसङ्गात् । किं तु भाष्यटीकोक्तप्रकारेण तत्फलत्वासम्भवनिर्वाहाय शरीरावभासकाले ऽप्यनुवर्तमानस्तन्मिथ्यात्वशरीरघटको यस्तदत्यन्ताभावस्तद्रूपो वाच्यः । अन्यथा भाष्यटीकाविरोधः स्यादिति चेत् । उच्यते । यद्याऽऽत्यन्तिकाशरीरत्वस्य वैधफलत्वनिर्वाहायात्यन्ताभावत्वं परित्यज्य विद्योदयसमनन्तरभाविध्वंसरूपत्वं पूर्वपक्षी शङ्केत तदा ऽपि तस्य न वैधफलत्वप्रत्याशा† । शरीरध्वंसमात्रस्याऽपुरुषार्थत्वेन शरीरस्यान्येषां चोपाधीनां ध्वंसेनोपलक्षितस्य ब्रह्मानन्दस्यैव पुरुषार्थत्वात् तस्य च नित्यत्वादिति दर्शयितुं ध्वंसपक्षो ऽप्युपन्यस्तः । तथैव च तात्पर्यं **सर्वोपाधी**त्याद्यग्रिमवाक्येन स्फुटीकृतम् । ननु ब्रह्मानन्दस्य नित्यप्राप्तत्वे ऽपि कण्ठगतरुचकवद् भ्रान्त्या ऽनवाप्तकल्पस्यावाप्त्या ऽमुख्यफलत्वमभ्यधायि टीकायां तस्य मुख्यफलत्वमप्युपपादयितुं शक्यम् । यस्मिन्सत्यग्रिमक्षणे यस्य सत्त्वं यद्व्यतिरेके चासत्त्वं तत्तज्जन्यमिति लक्षणानुसारेण । अस्ति हि विद्योदयात् प्राङ् मम निरतिशयानन्दो नास्ति न प्रकाशतइति व्यवहारालम्बनं रजते रजतत्वाभाववद् भ्रान्तिसिद्धं विद्यानिवर्त्यनिरतिशयानन्दाभावरूपं तदसत्त्वम् । न च प्रतियोगिव्यधिकरणं प्राक् तदसत्त्वं यस्यास्ति तथाभूतमेव जन्यं वैधफलमिति नियमः । अतथाभूतस्यापि दुःखप्रागभावपरिपालनादेः प्रायश्चित्तादिफलत्वसम्प्रतिपत्तेः । तस्माद् ब्रह्मानन्दस्य नित्यत्वे ऽपि वैधोपासनाफलत्वमुपपद्यतइति तन्नित्यत्वेन तत्फल-

* ध्वंसरूपतयेति २ पु॰ पा॰ । † वैधफलं प्रत्याशेति २ पु॰ प॰ ।

त्वाभावोपपादनं नोपपद्यतइति चेत् । उच्यते । प्राक्सिद्धस्य फलत्वं द्वेधा निवृत्तिप्रसक्तौ परिपाल्यत्वेन वा न वा सत्त्वभ्रान्तौ तदपनयेन वा । तत्राद्यमेव लौकिकेन वैदिकेन वा कर्मणा भवति द्वितीयं तु विद्ययैव । सा च विद्या ऽचाविहितोपासनया षड्जादिसाक्षात्कारवत् स्वयमेव भवतीति विध्यनपेक्षा टीकायामेवोपपादिता । तस्माद्युक्तमेव भ्रान्त्या ऽनवाप्तकल्पस्य ब्रह्मानन्दस्य नोपासनाविधिफलत्वमिति ।

९६ । ३ **कारीर्यादि नियोगा इति** । यदि वर्षेत्तावत्येव होतव्यं यदि न वर्षेत् श्वोभूते हविर्निर्वपेत् इत्यादिलिङ्गात् कारीरी तात्कालिकसस्यार्थवृष्टिहेतुत्वादैहिकफला । आदिशब्देन आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुं ज्योगामयाव्यग्निं वा एतस्य शरीरं गच्छति सोमं रसो यस्य ज्योगामयत्यग्नेरेवास्य शरीरं निष्क्रीणाति सोमाद्रसमुत यदीतासुर्भवति जीवत्येवेत्यादिश्रुतिविहितानि तच्छरीरगतव्याधिनिवृत्त्याद्यर्थानि कर्माणि गृह्यन्ते । ज्योगामयावी दीर्घरोगी ।

,, । ,, **चित्रादि नियोगफलमिति** । इदं चतुर्थे योगसिद्ध्यधिकरणस्य* द्वितीयवर्णके चिन्तितम् । तदेवं चित्रया यजेत पशुकाम इत्यादिविहितानां मनुष्यशरीरोपभोगयोग्यफलकानां कर्मणां किं नियमेन देहान्तरे फलम् उत तस्मिन् देहे देहान्तरे वेत्यनियम इति संशये पूर्वपक्षः । वर्तमानदेहारम्भककर्मणां यत् फलं तद्भोगार्थत्वाद्वर्तमानदेहस्य तत्फलभोगावसाने तन्नाशावश्यम्भावात् । अन्त्येष्टौ दक्षिणे हस्ते जुहूं सादयतीत्यादिवाक्यैर्यज्ञपात्राणां प्रतिपत्तिविधानेन तदपेक्षचित्राद्यदृष्टोत्पत्तिसमनन्तरभाविफलस्य वर्तमानदेहभोग्यत्वासम्भवाच्च स्वर्गजनकादृष्टवत् चित्राद्यदृष्टस्यापि स्वफलभोगप्रदानार्थं तद्योग्यदेहारम्भकत्वनियमाच्च नियमेन देहान्तरएव चित्रादिफलमिति । सिद्धान्तस्तु ऐहिकमपि चित्रादिफलं भवत्येव चित्राद्यनुष्ठानानन्तरं पश्वादिफलदर्शने तदर्थं तदतिरिक्तादृष्टकल्पनाहेत्वभावात् अनन्तरमेव फलादर्शने देशकालादिसहकार्य्यपेक्षया विलम्बः कल्प्यस्तस्मिन् देहे फलादर्शने तत्फलभोगविरोधिप्रबलप्रारब्धकर्मणा प्रतिबन्धः कल्प्यः । प्रतिबन्धेन च तेन देहान्तरारम्भपूर्वकं तत्र फलं दातव्यमिति कल्प्यम् । वर्त-

* जै· सू· अ· ४ पा· ३ सू· २७-२८ ।

मानदेहारम्भककर्मणो देशकालाद्यपेक्षया यदा न फलप्रदत्वं तदा तस्मिन् देहे तज्जन्मकृतविधाद्यदृष्टस्यापि फलप्रदत्वमुपपद्यते । पात्रप्रतिपत्तिस्तु सकलकर्मानुष्ठानसमाप्त्यनन्तरभावित्वात् पुरुषार्था । क्रत्वर्थत्वे ऽप्यदृष्टफलक्रतुमात्रार्था । आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति श्रुतेर्दहने विनियोक्ष्यमाणानां यज्ञपात्राणां संस्कारार्था वा । अन्यथा कारीर्यादीनामैहिकफलत्वाभावप्रसङ्गात् । एतेन कर्म्मणां फलप्रदानार्थं देहारम्भकत्वनियमो ऽपि निरस्तः । तस्मादामुष्मिकत्वानियमश्चित्रादिफलस्येति ।

नेह परमाऽपूर्ववदिति । यद्यप्याचार्य्यमते अवघातादिनियमः ६६ । ८
प्रत्यासन्नाग्नेयाद्यवान्तरापूर्वप्रयुक्तः तथापि गुरुमते फलवत्परमाऽपूर्वप्रयुक्त इति तन्मतमनुसृत्य परमापूर्वेत्युक्तम् । न चावघातनियमस्य परमापूर्वप्रयुक्तत्वे तत्साधनत्वाविशेषादाज्यसान्नाय्ययोरवघातप्रसङ्गः । तुषविमोकादिदृष्टप्रयोजनव्यवस्थया व्रीह्यादिषु तद्व्यवस्थोपपत्तेः । अन्यथा ऽऽग्नेयाद्यपूर्वप्रयुक्तत्वे ऽपि तत्साधनस्रुगादिसाधारण्यप्रसङ्गानिवरणादिति भावः ।

विश्वजिन्न्यायं गुरुमतेनोपन्यस्यति विश्वजितेति । प्रवृत्तक्रियः प्रवृत्तचिकीर्षः । न कलञ्जं भक्षयेदित्यादिनिषेधवाक्यान्यपि फलतो विधिवाक्यानि तत्र भक्षयत्यादिधातुसमभिव्याहृतनञ्प्रतिपाद्यं भक्षणादिनिवृत्तिरूपमौदासीन्यं विषयः । तद् यद्यप्यभावार्थत्वात् स्वतः साध्यं न भवति तथापि निषेध्योन्मुखतया प्रचलितावस्थे ऽनुत्पन्नतदनुकूलस्पन्दव्यापारे पुरुषे निषेध्यचिकीर्षापनयद्वारा परिपाल्यत्वेन तत् साध्यं भवतीति तस्य नियोगविषयत्वोपपत्तिः । तत्र चार्थाद् निषेध्यचिकीर्षुर्नियोज्य इति गुरुमतम् ।

इह तु विषयेणेति । नियोगगतकृतिसाध्यतारूपकार्यताघटकत्वेन ,, । १३
विषय एव तत्प्रतीत्यनुबन्धो न तु नियोज्यः । तदभावे ऽप्यध्ययननियोगस्य प्रयाजादिनियोगानां च प्रतीतेरिति भावः ।

उच्यतइति । अयमाशयः । कार्यत्वेन प्रतीयमानो नियोगः स्वस्य कार्य्यताघटके विषये प्रवर्त्तकस्वभावस्तत्र प्रवर्त्तनीयं पुरुषमपेक्षते । अन्यथा प्रवर्त्तकत्वव्याघातात् । अन्यतः प्रवृत्तिसिद्धौ तु न तमपेक्षते । तथा च

आचार्य्यकनियोगेन अध्ययने माणवकस्य दर्शपूर्णमासनियोगेन तन्नियोज्यस्य तदङ्गेषु प्रयाजादिषु च प्रवृत्तिसिद्धता तन्नियोगानां कर्तृपुरुषविशेषानपेक्षायामपि विश्वजिदादावन्यतः प्रवृत्त्यलाभात् तदपेक्षास्तीति अतस्तदध्याहारो युक्त इति । स च फलकामो ऽध्याहार्य्यः पुरुषाणां कामप्रवणतया तस्य प्रयुक्तिलाघवात् । निषेधवाक्येषु तु न कामी नियोज्यो ऽध्याहार्य्यः । औदासीन्यस्य परिपाल्यत्वसिद्धये तत्प्रच्युतिप्रसक्त्यर्थं सामर्थ्याद् निषेध्योन्मुखस्य
६९ । २० नियोज्यस्यावश्यं प्राप्त्या तत एवाकाङ्क्षाशान्तेः । **किं सर्वेषामिति ।** किं सर्वफलकामानामध्याहारः उतैकफलकामस्येत्यर्थः । **अन्तर्भावादिति ।** यस्य यदा यदवच्छेदेन सुखं तस्य तदा तदवच्छेदेन न दुःखमित्यविनाभावादित्यर्थः । एतदुपलक्षणं सुखस्य भावरूपत्वेन लघूपस्थितिकत्वाच्चेत्यपि द्रष्टव्यम् । **अनवच्छिन्नस्येति ।** पुत्रपश्वाद्येकैकविषयविशेषमात्रानवच्छिन्नस्य देशविशेषदेहविशेषभोग्यस्य सङ्कल्पोपनतसर्वविषयप्रयुक्तस्य स्वर्गसुखस्य पुत्रपश्वादिसुखविशेषान् प्रति सामान्यरूपत्वादित्यर्थः । **विशेषे मानाभावादिति ।** सर्वसुखविशेषानुगतसामान्यमुल्लङ्घ्य किञ्चिद्विषयविशेषावच्छिन्नसुखग्रहणे मानाभावादित्यर्थः । इत्थं गुरुणा निबन्धने व्याख्यातम् । प्रायः सर्वपुरुषान् प्रति स्पृहणीयत्वेनाविशिष्टत्वादिति भाष्यकारादिव्याख्या । नन्वत्र विश्वजिदधिकरणे भाष्यकारैः तस्मात् पितृभ्यः पूर्वेद्युः क्रियतइति पितृयज्ञवाक्यं यः सत्रायावगुरत*इति विश्वजिद्वाक्यं च विषयवाक्यत्वेनोदाहृतम् । तत्र द्वितीयोदाहरणमयुक्तं विश्वजितो नैमित्तिकाधिकारत्वादित्याशङ्क्याह **कृत्वाचिन्तेति । अवगुरणोपरमे इति ।** उद्यमनिवृत्ताविल्यर्थः । गुरी उद्यमनइति धातोः कुटादित्वेन ङित्त्वाद् गुणाभावः ।

ननूद्यमनिवृत्तौ विश्वजिदित्ययुक्तम् । यः सत्रायेति वाक्यात् सत्रं
70 । ९ सङ्कल्प्य तत्प्रयुञ्जानस्य विश्वजिदिति प्रतीतिरित्याशङ्क्याह । **प्रायश्चित्ततयेति ।** एवं हि श्रूयते यः सर्वाभ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्यः सर्वेभ्यश्छन्दोभ्य आत्मानमागुरते यः सत्रायागुरते स विश्वजिता ऽतिरात्रेण सर्वपृष्ठेन सर्वस्तोमेन सर्ववेदसदक्षिणेन यजेत सर्वाभ्य एव देवताभ्यः

---

* सत्रायागुरते इति २ पु० ।

सर्वेभ्यः पृष्ठेभ्यः सर्वेभ्यश्छन्दोभ्य आत्मानं निष्क्रीणीतइति । एवं निष्क्रय-
द्वारेण संस्तवः सत्रप्रवृत्तौ न युज्यते अतः सत्रं सङ्कल्प्य दैवान्मानुषाद्वा
प्रतिबन्धात् ततो निवृत्तस्य प्रायश्चित्ततयेदं विश्वजिद्विधानमित्यर्थः ।

व्यभिचारयतीति । ननु ययोः कयोश्चिदाधाराधेयत्वेनैका- १० । २५
श्रितत्वेन वा सामानाधिकरण्यमिति नात्र शङ्का येन कुण्डबदरयोश्चैत्रमै-
त्रयोश्च व्यभिचार उच्यते किं त्वेकप्रवृत्तिनिमित्तस्यापरप्रवृत्तिनिमित्ताधारा-
श्रितत्वेन वा प्रवृत्तिनिमित्तद्वयस्याप्येकाश्रितत्वेन वा सामानाधिकरण्यमिति ।
तथैव ह्याचार्य्यैरवतारिकाग्रन्थे शङ्काभिप्रायो लिखितः । तथैव च तदभि-
प्रायो वर्णयितुं युक्तः । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सा-
मानाधिकरण्यमिति प्रसिद्ध्यनुरोधात् । न च हेमकुण्डलयोरवयवावयवि-
नोर्भेदपक्षे हेमत्वस्य कुण्डलाश्रितत्वं हेमत्वकुण्डलत्वयोरेकाश्रितत्वं च
नास्तीति वाच्यम् । हेमत्वस्यावयवावयविवृत्तिजातित्वेन तत्सत्त्वादिति चेत् ।
उच्यते । हेमावयवातिरिक्तं कुण्डलरूपम् अवयवि द्रव्यान्तरमभ्युपगम्यते चेत्
तत् पीतरूपगुरुत्वकठिनत्वरहितमेव वाय्वादिसदृशमभ्युपगन्तव्यम् । अवय-
वावयविगतस्य पीतरूपद्वयस्य गुरुत्वद्वैगुण्यस्य चानुपलम्भात् । घटकुड्ययो-
रिव कठिनद्रव्ययोरवयवावयविनोरेकत्र भूतलादौ* समावेशासम्भवाच्च । अव-
यवावयविभावानापन्नयोरेवासमावेश इति सविशेषणनियमकल्पनस्य गौरवप-
राहतस्याऽप्रामाणिकत्वात् । एवं च कुण्डले पीतरूपाद्यभावेन तदभिव्यङ्ग्यस्य
हेमत्वस्य तत्रासम्भवेनैकप्रवृत्तिनिमित्तस्येत्यादेः सामानाधिकरण्यप्रयोजकत्वा-
भ्युपगमे तेन सुवर्णं कुण्डलमिति सामानाधिकरण्याऽनिर्वाहात् तन्निर्वाहाय
हेमकुण्डलानामाधाराधेयभावमात्रमेकाश्रितत्वमात्रं वा तत्प्रयोजकमास्थेय-
मित्यभिप्रेत्य टीकायां कुण्डबदरयोश्चैत्रमैत्रयोश्च व्यभिचार उक्त इति ता-
त्पर्य्यम् ।

भेदो रूपादिवद् भावरूप इति पक्षे स किमभेदविरुद्धस्तदवि-
रुद्धो वा । आद्ये भावाऽभावरूपत्वपक्षे वक्ष्यमाणं दूषणं भविष्यतीत्यभिप्रेत्य
द्वितीये दूषणमाह **ऐकान्तिकेति** । तथा च भेदे सत्येवात्यन्ताभेदो ११ । २
ऽपि स्यादित्यर्थः । **द्वितीयमाशङ्क्याहेति** । परस्पराभाव इति चेदिति

* एकभूतलादाविति १–३ पु॰ पा॰ ।

पूर्वग्रन्थेनाशङ्क्येत्यर्थः । **तत्त्वेनाभेदप्रसङ्ग** इत्यस्य तात्त्विकाभेदप्रसङ्ग इत्यर्थो भाति स तु नाऽनिष्टः कारणात्मना कटकवर्द्धमानयोरभेदाङ्गी-
१७ । ३ कारात् इत्याशङ्क्य तत्त्वेनेति पदं व्याचष्टे **कटकत्वेति** ।

ननु भावाभावयोरुभयोरपि भेदाभेदयोर्हाटकत्वकटकत्वावच्छेदभेदेन वृत्तिरभ्युपगम्यते अतस्तयोर्न सहावस्थानाऽसम्भवः । न च भेदावच्छेदककटकत्वावच्छेदेन कटके वर्द्धमानभेदप्रसङ्गः । नापि कटकाभिन्नमुकुटे कटकत्वेनापि कटकाभेदप्रसङ्गः । नाप्यनुवृत्तिव्यावृत्तिव्यवस्थाभावप्रसङ्गः । नापि हाटकत्वेनावगते कटकत्वादिना जिज्ञासाद्यनुपपत्तिः । भेदाभेदमनङ्गीकुर्वद्भिरपि ह्येकस्मिन् धर्मिणि केन चित्प्रकारेण निश्चिते तदन्यप्रकारेण जिज्ञासासंशयादिकं समर्थ्यते । अभेदवद् भेदस्याप्यभ्युपगमे का जिज्ञासानुपपत्तिः । यत्तु हेमनिर्णयेन कटकादीनां निर्णये तदभेदः कारणमित्यादि । तत्र वैपरीत्यमपि वक्तुं शक्यम् । हेमनिर्णयेन कटकादीनामनिर्णये तदभेदः कारणं तदभावादभेदादनिर्णयकार्याभाव औत्सर्गिकः प्राप्तः स कारणस्य भेदस्य सद्भावादपोद्यतइति । अस्ति ह्यनिर्णयस्यापि निर्णयप्रतिबन्धकसद्भावाधीनं परिपाल्यत्वरूपं कार्यत्वम् । तस्मात्सर्वमिदं भेदाभेददूषणजातमयुक्तम् । युक्तत्वे वा स्वमतेप्येतत्प्रसज्येत* स्वमते ऽपि हि भेदाभेदाभ्यामेव सामानाधिकरण्योपपादनमभेदः सत्यो भेदस्तत्राध्यस्त† इति परं स्वमते विशेष उक्तः । तत्र भेदप्रतीतावभेदोपि सह प्रतीयतइत्युपगन्तव्यम् । भेदप्रतीतिमात्रेण सामानाधिकरण्योपपादनासंभवात् । तयोर्विरुद्धयोरेकत्र प्रतीतिः कथं कथं च मुकुटे कुण्डलाभिन्नहाटकाभिन्ने कुण्डलत्वेनापि कुण्डलाभेदो न स्यात् कथं च हाटके प्रतीते कुण्डलादिजिज्ञासा स्यात् । अपि च । अभेदः सत्यः भेदो ऽध्यस्त इत्यर्धजरतीयमप्ययुक्तम् । सह प्रतीत्यभ्युपगमे अन्यतरबाधावश्यम्भावकल्पकाभावात् । सत्यानृतयोर्ब्रह्मतदध्यस्तप्रपञ्चयोः सिद्धान्ते तात्त्विकाभेदानङ्गीकाराच्च । तथैवारम्भणाधिकरणे‡ टीकाकारैरपि वक्ष्यमाणत्वात् । इहानुपदमेव पूर्वग्रन्थे तस्मात्ते ऽपि हाटकाद् भिन्ना एवेति तस्मात् ते हेम्नो भिद्यन्तइति च हाटककटकाभेदप्रतिक्षेपाच्च§ । तस्मात् सर्वमिदमनुपपन्नमिति चेत् ।

---

* प्रसज्यते इति २ पु० पा० । † तस्याध्यस्त इति २ पु० पा० ।
‡ व्या० सू० अ० २ पा० १ सू० १४ । § हाटकाभेदप्रतिषेधाच्चेति २ पु० पा० ।

अथ ब्रूमः । हाटकत्वं कटकत्वं च किमेकस्मिन्वर्त्तेते न वा । न चेद् एकस्मिन्नवच्छेदभेदेन भेदाभेदयोर्विरुद्धयोर्वृत्तिसमर्थनं न लभ्यते । वर्त्तेते चेत् किं कटकत्वं हाटकत्वादन्यदुत तदेव । अन्यच्चेत् प्रवृत्तिनिमित्तभेदेनैव सामानाधिकरण्योपपादनलाभाद् नैकस्मिन् धर्मिणि अभेदवद् भेदो ऽप्यङ्गीकार्य्यः । अतः सामानाधिकरण्योपपादनार्थं भेदाभेदमभ्युपगच्छता प्रवृत्तिनिमित्तभेदेनान्यथोपपत्तिपरिहाराय हाटकत्वमेव कटकत्वं न ततो ऽन्यदित्येष्टव्यमित्यभिप्रेत्य सहावस्थानासम्भववादि सर्वमिदं दूषणमुक्तम् । इममेवाभिप्रायं सहावस्थानासंभवादिदूषणोक्तौ गर्भितं विस्मृत्याथ हाटकत्वेनैवाभेद इत्यादिशङ्काग्रन्थः प्रवृत्त इत्याचार्यैरवतारितम् ।

प्रस्मृतपराभिसंधिः स्वप्रक्रियया शङ्कत इति । एवं चाभे- ११ । ९
दसत्तया कुण्डलादेर्जातत्वापादने ऽपि न वैपरीत्यशङ्कावकाशः । अभेदे सत्यवच्छेदकभेदाभावेन भेद एव न सम्भवतीति तात्पर्येण प्रत्युतेत्यादिटीकातद्व्याख्यानयोः प्रवृत्तेः । स्वमतेनाभेदव्यवस्थापनं तु व्यावहारिकाभेदविषयं न तात्त्विकाभेदविषयमिति नारम्भणाधिकरण*विरोधः । नाप्यभेदप्रतिक्षेपकपूर्वग्रन्थविरोधः । अत एवाभेदप्रतिक्षेपको यस्मिन् गृह्यमाणे यन्न गृह्यतइत्यादिटीकाग्रन्थो वस्तुतः कार्यकारणयोरभेदाभावं सप्रमाणकमुपसंहरतीति भेदाभेदवाद्यभिमतवास्तवाभेदप्रतिक्षेपपरतया ऽवतारितः । भेदस्याध्यस्तत्वोक्तिस्तु प्रतिभासमात्रकल्पितत्वाभिप्राया । अत एवारम्भणाधिकरणटीकायां वाचा केवलमारभ्यते विकारजातं न तु तत्त्वतो ऽस्ति यतो नामधेयमात्रमेतद् यथा पुरुषस्य चैतन्यं राहोः शिर इति विकल्पनामात्रमित्यारम्भणश्रुतेरर्थ उक्तः । भेदबाधावश्यम्भावो ऽप्यारम्भणश्रुतिप्राप्तः । तदनुकूलन्यायमात्रमिह विरोधादन्यतरबाधादिप्रक्रियया दर्शितम् ।

ननु यद्युपादानहेमाद्यतिरिक्तकटकमुकुटादिविकारभेदः कल्पनामात्रसिद्ध इति मतं कथं तर्हि वाक्यान्वयाधिकरण†टीकायां न तु मृद्विकारः शरावादिः शतशो ऽपि मृन्मृदिति चिन्त्यमानस्तज्जन्मना मृद्भावसाक्षात्कारेण शक्यो निवर्त्तयितुं तत्कस्य हेतोः तस्यापि मृदो भिन्नस्य तात्त्विक-

* ब्रासू॰ अ॰ २ पा॰ १ सू॰ १४ ।
† व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ १९ ।

त्वाद् वस्तुनश्च ज्ञानेनोच्छेत्तुमशक्यत्वादित्युक्तम् । उच्यते । शरावादिसंस्थानविशेषस्य व्यावहारिकसत्यत्वाभिप्रायं तद्वाक्यम् । इह तूपादानएव पूर्वाऽवस्थोपमर्द्देन तदवस्थान्तरं जायते । न तूपादानभिन्नं तदारब्धं तदागन्तुकावस्थाविशेषवदवयवि द्रव्यान्तरमस्तीत्युपादानविकारयोः सत्येवाभेदकल्पनामात्रमित्यारम्भणाधिकरणे वक्ष्यमाणं स्मारितम् । तत्स्मारणेन* च भेदाभेदाभ्यां सामानाधिकरण्यमुपपादयितुं तस्य हेमत्वकुण्डलत्वयोरुपादानरूपैकद्रव्याश्रितत्वेनोपपत्तेः । तथैवात्र तदुपपादनस्य विवक्षितत्वात् । अत एवाचार्यैर्वाक्यान्वयाधिकरणे† वक्ष्यते ।

सामानाधिकरण्यं यद्धेमकुण्डलयोर्न तत् ।
भेदाभेदावगाहीति प्राग्वाचस्पतिनेरितम् ॥ इति ।

किं तु सुवर्णकुण्डलाभेदे कथं स्वर्णेन कुण्डलं कृतं सौवर्णं कुण्डलमित्यादिभेदव्यवहार इत्याकाङ्क्षायां पुरुषस्य चैतन्यमितिवत् कल्पनामात्रसिद्धभेदालम्बनः स व्यवहार इति भेदव्यवहारमात्रोपपादनार्थं कृतमिति सर्वमनवद्यम् ।

अस्मिन् संदर्भे कथं तर्हीति टीकावतारिकाग्रन्थे न ह्यत्यन्तभेदे तद्भवति कुण्डलकटकयोरदर्शनादिति कुण्डलकटकयोरत्यन्तभेदः सिद्धवत्कृत्योपन्यस्तः । तदुपन्यासो लोकदृष्ट्यनुसारेण वा भेदवादिमतानुसारेण वा कटकत्वकुण्डलत्वाद्यवच्छेदेन भेद एव नाभेदो ऽपीत्यभिप्रायेण वा नेतव्यः । भेदाभेदवादिमते हाटकात्मना तयोरभेदात् । यथा हाटकात्मना कटकमुकुटकुण्डलादयो न भिद्यन्तइति टीकायामपि तथैव तन्मतस्थितिप्रदर्शनाच्च ।

१२ । १७ सौगतमतमाशङ्क्येत्यत्र गौतममतमिति पाठश्चेत् स निर्विशङ्कः । न्यायसूत्रकृता गौतमेन प्रत्यक्षपरीक्षायां न चैकदेशोपलब्धिरवयविसद्भावा‡दिति घटाद्येकदेशसंनिकर्षे सति न तदुपलब्धिमात्रं तद्भिन्नस्यावयविनः सद्भावात् तस्याप्युपलब्धिरस्तीति प्रतिज्ञाय साध्यत्वादवयविनि संदेह§ इत्यवयवभिन्नो ऽवयवी सिद्धो नास्तीति तत्र संदेहमुप-

---

* तत्स्मरणमिति २ पु॰ पा॰ । † व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ १६ ।
‡ न्यायसूत्र॰ अ॰ २ पा आ॰ १ सू॰ ३० । § न्यायसू॰ अ॰ २ आ॰ १ सू॰ ३१ ।

न्यस्य सर्वाग्रहणमवयव्यसिद्धेः*धारणाकर्षणोपपत्तेश्चेति† सूत्राभ्याम् अवयवभिन्नावयव्यभावे परमाणूनामन्त्यावयवानाम् अतीन्द्रियत्वात् तदाश्रितस्य गुणकर्मसामान्यादेः सर्वस्याप्यग्रहणं स्यात् । अतो गुणकर्मादिग्रहणाद् अस्ति तदाश्रयः पटादिरवयवी । तथा एकदेशधारणे कृत्स्नधारणादेकदेशाकर्षणे कृत्स्नाकर्षणाच्च‡ सो ऽस्ति । अन्यथा ऽवयवानां भिन्नत्वात् कस्यचिदवयवस्य धारणाकर्षणाभ्यामन्यस्य धारणाकर्षणानुपपत्तेरित्यवयवभिन्नावयविप्रसाधनेन अवयवाभेदनिराकरणात् । सौगतमतमिति पाठस्तु सौगतैरवयविस्थाने अवयवसंघातस्याभिषिक्तत्वात् संघातस्यावयवभेदाभिप्रायो योज्यः ।

नन्वनंशेपि संस्कारः कर्मजन्या तिशयो ऽस्त्वित्याशङ्क्याह अनंशत्वमिति । आकारभेदो धर्मभेदः । तद् ब्रह्मेति वाक्ये यस्येयं जिज्ञासा प्रस्तुतेति विशेषणस्य तात्पर्यमाह **कार्यविलक्षणेति । स्वमते इति ।** पूर्वपक्षिमते तु न शास्त्रपृथक्त्वसिद्धिः । उभयोरपि तन्त्रयोः कार्यविषयत्वाऽविशेषादिति भावः । शास्त्रपृथक्त्वसिद्धिस्तद्ब्रह्मेति भाष्ये उक्तेति पाठः । अतस्तद्ब्रह्मेत्यतःशब्दः संपातायातः । टीकायां तदेवं स्वमतेन मोक्षाख्यं फलं नित्यं श्रुत्यादिभिरुपपाद्य क्रियानिष्पाद्यस्य तु मोक्षस्यानित्यत्वं प्रसञ्जयति तद्यदीति । न चागमबाधः । आगमस्योक्तेन प्रकारेणोपपत्तेः । अपि च ज्ञानजन्यापूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य सन्ति भूयस्यः श्रुतयो निवारिका इत्याहेति केषु चित्कोशेषु पाठः । कोशान्तरेषु तु तदेवं स्वमतेन मोक्षाख्यं फलं नित्यं श्रुत्यादिभिरुपपाद्य ज्ञानजन्याऽपूर्वजनितो मोक्षो नैयोगिक इत्यस्यार्थस्य सन्ति भूयस्यः श्रुतयो निवारिका इति पाठः । अस्मिन् पाठे उपपाद्येत्यस्य निवारिका इत्यव्यवहितनिवारणक्रियया ऽन्वयः प्रतिभाति तदन्वयो न युक्तः । नैयोगिकत्वनिवारणार्थाभिः श्रुतिभिः श्रुत्यन्तरोदाहरणपूर्वकं मोक्षफलनित्यत्वस्याप्रतिपादितत्वादित्याशङ्क्य उपपाद्येत्यस्याहेत्यनेन संबन्धमाह **उपपाद्येत्यस्येति । एवं फलस्वभावेनेति ।** तदेवमिति टीकावतारिकाग्रन्थे मोक्षस्य नित्यत्वेन नैयोगिकत्वासम्भवस्य प्रागुपपादितस्यानुवादपूर्वकं मोक्षसाधनज्ञानस्य तात्का-

(margin: १२ । २२ beside "नन्वनंशेपि … अनं-"; १३ । २ beside "शङ्क्य … एवं")

* न्यायसू॰ अ॰ २ आ॰ १ सू॰ ३२ । † न्यायसू॰ अ॰ २ आ॰ १ सू॰ ३३ ।
‡ कृत्स्नकर्षणाच्चेति २ पु॰ पा॰ ।

लिकब्रह्मप्राप्तिसाधनत्वाद् नैयोगिकत्वासम्भव उच्यतइति तस्य टीकाग्रन्थस्य तात्पर्यमुक्तम् इदानीं तु ब्रह्मभावप्राप्तिफलस्य प्राप्तप्राप्तिरूपस्य तात्कालिकफलत्वस्वाभाव्येन नियोगासम्भवं तदेवमित्यादिग्रन्थोक्तमनूद्य फलसाधनस्य तत्त्वज्ञानस्याविद्योच्छेदद्वारकत्वस्वाभाव्येन नियोगद्वारकत्वासम्भव उच्यतइत्येवमविद्याद्वयेत्यादिटीका ऽवतार्यते । अतो न पूर्वटीकावतारिकाग्रन्थेनार्थैक्यशङ्का । न स्वत इत्ययुक्तं स्वत एव हि विद्याया मोक्षसाधनत्वं नान्यायत्तमित्याशङ्क्य व्याचष्टे **विहितक्रियारूपेणेति** ।

१३ । ६ **आरोप्यप्रधानेति** । यद्यपि बृहदारण्यकोपनिषद्यथ संपद इति संपदुपासनानामुपक्रमे अल्पेषु कर्मसु महतां कर्मणां तत्फलाय बुद्ध्या संपादनं संपद् अश्वमेधादीनि महान्ति कर्माणि कार्त्स्न्येनानुष्ठातुमशक्तानां संभवदङ्गमात्रसाहित्येन तान्यनुतिष्ठतां तदङ्गाश्रयोपासनाविशेषैस्तत्फलसंपादनं वा संपदिति द्वेधा भाष्यकारैर्व्याख्यातम् । वार्त्तिककारैरपि ।

फलवत् कर्मणां क्वापि किं चित् सामान्यसंश्रयात् ।
संपत्तिर्महतां संपदल्पीयःकर्मसूच्यते ॥
यदि वा तत्फलस्यैव किं चित्सामान्यवर्त्मना ।
संपादनं भवेत्संपदग्निहोत्रादिकर्मणि ॥
नातिभारोस्ति नो बुद्धेः शास्त्रं चेत्तत्परं भवेत् ।
विदुषां श्रेयसे ऽतो ऽध्वा न क्व चित्प्रतिहन्यते ॥ इति ।

अनन्तं वै मन इति विहितविश्वेदेवोपासनाया इष्ट्यादिषु सर्वकर्मानुसंधातुर्ब्रह्मणः तदनुसंधानकरणं मनोधिष्ठानमिति कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायतीत्याद्युपक्रमवशादवगतम् अतस्तस्यापि कर्मसंबन्धः । तथापि तमर्थं सिद्धं कृत्वा संपदुपासनानामारोप्यप्राधान्यं प्रतीकोपासनानामधिष्ठानप्राधान्यं चानादिवृद्धव्यवहारसंप्रदायसिद्धमिह लिखितम् ।

ननु संवरणम् उद्यमनमिति व्याख्यानमयुक्तम् । तयोर्भेदादित्या-
,, । ९ शङ्क्य लक्षणाबीजं संबन्धमाह **यो हीति** । ननु टीकायां संवृङ्क्तइत्यस्य संवृज्यात्मनि* स्थापयतीत्यर्थमुक्त्वा तत्र संमतिरप्युदाहृता संवरणाद्वा स्वात्मीभावाद्वा वायुः संवर्ग इति । तत्र संवृज्य इत्यस्य† संहरणार्थत्वं तावदुपप-

* संहृत्य संवृज्यात्मनीति २ पु॰ पा॰ । † संवृङ्क्ते इत्यस्येति २ पु॰ पा॰ ।

द्यते । वृजि वर्जनइति लुग्विकरणपठितादिदितो धातोरात्मनेपदिनः सिद्धस्य संवृङ्क्तइत्यस्य वर्जयतीत्यर्थकस्य संहरणे पर्यवसानोपपत्तेः । तथैव संवरणार्थकत्वमप्युपपद्यते । वृजि वरणे इति रुधादिगणपठितात् परस्मैपदिनो धातोः छान्दसेन पदव्यत्ययेन संवृङ्क्तइति रूपसिद्धेः । अस्ति च संवरणं संहृतस्योपादानेन स्वात्मभावापादने । किमर्थं संवरणेनोद्यमनं लक्षणीयं मुख्यार्थान्वयानुपपत्त्यभावात् । सत्यम् । वायुस्वभावात् चालनमपि संभवतीति द्योतनाय तात्पर्यतस्तथा व्याख्यानम् ।

अग्न्यादेरुपलक्षणत्वादिति । ननु वायुरग्निसूर्यचन्द्रापः संहृत्य स्वात्मभावमापादयति प्राणो वाक्चक्षुःश्रोत्रमनांसीत्युक्त्वा ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्कृतमिति तेऽग्न्यादयो वागादयश्च वायुप्राणाभ्यां सह दशेति वाक्यशेषे परिगणिताः कथमग्न्यादिग्रहणं सर्वोपलक्षणं स्याद् व्यवस्थिताग्न्यादिविषयदशसंख्योक्तिविरोधादिति चेत् । उच्यते । दश सन्तस्तत्कृतमिति दशसंख्यावत्त्वं कृतायसादृश्येन तादूप्यं चोक्तमुपजीव्यदशसंख्यावत्त्वेन दशाक्षरा विराडन्नं विराडित्यर्थवादान्तरोक्तप्रक्रियया सर्वाशागतसकलान्नरूपत्वं कृतत्वेन कृतायो यथा दशसंख्यान्तर्भाववत्त्वेन तामत्तीव एवं वायुप्राणरूपैषा दशात्मिका देवता दशसख्यासंस्तुतं सर्वमन्नमत्तीवेति सर्वान्नात्तृत्वं चोक्तं वाक्यशेषे । तस्मात्सर्वासु दिक्षु अन्नमेव सैषा विराडन्नादीति । एवं चेहाग्न्यादेरुपलक्षणत्वोक्तिर्वाक्यशेषतः सर्वाशागतभोग्यभोक्तृरूपसकलजगदाश्रयत्वप्राप्तेरुपलक्षणार्था । अत एव ज्योतिरधिकरणे सकलान्नात्रादित्व*रूपमिदं सार्वात्म्यं वाक्यशेषार्थमेत्राचार्या वर्णयिष्यन्तीति पूष्णोऽहं देवयज्ययेति पूषानुमन्त्रणमन्त्रस्य पूषदेवताकेष्टिषूत्कर्षः । ७३ । १२

सर्वस्मै वेति । सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमिति वाक्याद् ध्रौवाज्यमविहितद्रव्यकसर्वयागाङ्गं सदुपांशुयाजस्याप्यङ्गं भवतीत्यर्थः ।

सत्यप्यत्राज्यभागाद्यङ्गेष्वाज्यनिवेशेन प्रधानहविष्ट्वमिति । ७४ । १२ ननूपांशुयाजाज्यस्यैव प्रधानहविष्ट्वेऽप्याज्यभागादीनामप्याज्यं हविरिति तद्द्वारेणाज्यसंस्काराणामाज्यभागाद्यर्थत्वमप्यस्त्येव । द्रव्यसंस्कारः

---

* सकलाद्यादित्वेति २ पु॰ पा॰ ।

प्रकरणाविशेषात् सर्वकर्मणा*मिति जैमिनिना तथा सूचितत्वात् । द्रव्यसंस्काराः न केवलं प्रधानार्थाः किं त्वङ्गप्रधानार्था इति निर्णयार्थं प्रवृत्तस्य प्रकरणविशेषादसंयुक्तं प्रधानस्ये†त्यधिकरणस्य लिङ्गदर्शनाच्चे‡ति गुणसूत्रेणाज्यसंस्काराणामाज्यभागप्रभृत्यङ्गार्थत्वमप्यस्तीत्यत्र ध्रुवामेवाग्रे ऽभिघारयति ततो हि प्रथममाज्यभागौ यक्ष्यन् भवतीति ध्रौवाज्याभिघारणप्राथम्ये तद्धविष्काज्यभागप्राथम्यहेतूकरणस्य लिङ्गतयोपन्यासाच्च । तस्मादवेक्षणस्याज्यसंस्कारस्य प्रधानमात्रार्थत्वोक्तिरयुक्तेति चेत् । उच्यते । नात्र तस्य प्रधानमात्रार्थत्वमुक्तं किं तु टीकायामुपांशुयाजग्रहणमन्येषामप्याज्यहविष्कयागानामुपलक्षणमभिप्रेत्योपांशुयाजः किमित्याज्यहविष्कयागसामान्योपलक्षकतया निर्दिष्टः प्राथमिकत्वादाज्यभागावेव तथा निर्देशार्हावित्याशङ्कायां प्राधान्यादुपांशुयाजस्तथा निर्दिष्ट इत्ययमर्थः सत्यप्यवेत्यादिग्रन्थेन दर्शितः । अतो न दोषः ।

१४ । २२ **फलकल्पनाभयादिति ।** उपलक्षणमेतत् । पुरुषार्थत्वे हिरण्यरूपसाधनविशिष्टस्य धारणस्य विधायकं वाच्यमिति कृत्यप्रत्ययोक्तकर्मप्राधान्यभङ्गभयादित्यपि द्रष्टव्यम् । **क्रतुनिवेश इति ।** धारणसंस्कृतस्य हिरण्यस्य विनियोगाकाङ्क्षया कल्प्य इति भावः । **सक्तवद्विपरिणाम** इति स्थाने सक्तुवद्विपरिणाम इति क्व चित्पाठः । हिरण्यसाधनकेन धारणेनेष्टं भावयेदिति सक्तुन्यायाद्विपरिणामे सत्यनारभ्याधीतस्य तस्य क्रतुनिवेशकल्पकाभावात् फलविशेषाकाङ्क्षायामार्थवादिकफलविपरिणामो ऽपि कल्प्य इति भावः । क्रत्वङ्गत्वेन गतौ सत्यां कृत्यप्रत्ययावगतकर्मप्राधान्यभङ्गः फलविपरिणामः फलाय हिरण्यविशिष्टधारणविधिरिति त्रयमपि नाश्रयणीयमिति परिहारार्थः ।

नन्वनारभ्याधीतस्य कुतः क्रतुनिवेशसिद्धिः । संस्कृतविनियोगनियमाच्चेत् कुतः क्रतुसंबन्धावगतेः प्राक् संस्कारविधित्वनिर्णयः । तन्निर्णये ऽपि लौकिककर्मसु वा निवेशः कुतो न स्यात् तत्राह **वैदिककर्मत्वसाम्यादिति ।** तप्ते पयसि दध्यानयतीत्यत्र पयसः क्रतुसंबन्धात् प्रागेव

* जै· सू· अ· ३ पा· ८ सू· ३० । † जै· सू· अ· ३ पा· ७ सू· १ ।
‡ जै· सू· अ· ३ पा· ७ सू· ४ ।

दध्यानयनसंस्कार्यत्वे ऽवगते पश्चात् सा वैश्वदेवीति वाक्येन संस्कृतविनियोगाकाङ्क्षापूरणं दृष्टम् । एवमिहापि धारणसंस्कार्यत्वेनावगते हिरण्ये तद्विनियोगाकाङ्क्षाप्रसूतार्थापत्त्या वैदिककर्मत्वसादृश्योपस्थितेष्वग्निहोत्रादिषु विनियोगकल्पनया तत्पूरणमिति भावः ।

द्रव्यदेवतेति । ननु द्रव्यदेवतासंबन्धराहित्येन धारणस्य याग- १५ । २
त्वाद्यभाव एव सिद्ध्येद् न तु धारणरूपतयैव स्वतन्त्रकर्मत्वस्याभावो ऽपि । सत्यम् । धारणस्य स्वतन्त्रकर्मत्वं लक्षितयागरूपतया मुख्यधारणरूपतया वेति विकल्पं मनसि निधायाद्यपक्षनिराकरणार्थत्वेनेदमद्रव्यसूत्रं* योजितम् । द्वितीयपक्षनिराकरणं तु द्रव्यपरत्वाच्चेति† तदनन्तरसूत्रेण धारणस्य स्वातन्त्र्ये कृत्यप्रत्ययावगतद्रव्यप्राधान्यविरोधं दर्शयता कृतमित्यभिप्रायः । नन्वद्रव्यसूत्रस्य द्रव्यदेवतासंबन्धराहित्येन यागत्वनिराकरणार्थतायामद्रव्यदेवतात्वात्तु शेषः स्यादिति शबरस्वामिलिखितसूत्रस्य पाठो लिखितुं युक्तः न त्वद्रव्यत्वादिति वार्तिककारलिखितः पाठः । तस्मिन् पाठे ह्यद्रव्यत्वाद् विधेयद्रव्याभावाद् धारणमात्रविधानसंभवेन द्रव्यस्यापि तद्विशेषणतया विधानाभावाद् न हिरण्यसाधनकधारणरूपस्वतन्त्रकर्मविधिरित्येव सूत्रार्थो वर्णयितुं युक्तः । सत्यम् । देवतापदयुक्तो भाष्यकारलिखितसूत्रपाठः सांप्रदायिको न भवतीति वार्तिककारैस्त्यक्तत्वात् । यथावार्तिकं सूत्रं पठित्वा तत्रैव भाष्यकारदर्शिते
द्रव्यशब्दः संप्रदानत्वार्हदेवतारूपद्रव्यवाचीति तदभावेन द्रव्यदेवतासंयोगराहित्यरूपहेतुसिद्धिरित्यभिप्रायः ।

सिद्धान्तस्त्विति । न चाधानसंस्कृताहवनीयवद् दध्यानयनसं- ,, । ३
स्कृतपयोवच्च साक्षाद्वाक्येन क्रतुसंबन्धानवगमे ऽपि पर्णतावदव्यभिचरितक्रतुसंबन्धाभावे ऽपि हिरण्यस्य श्रुतधारणकर्मत्वान्यथानुपपत्त्या ऽग्निहोत्रादिषु निवेशः कल्प्यः स्यादिति वाच्यम् । तेषु हिरण्यस्येदृशो विनियोग इति तद्विशेषकल्पनायां विनिगमकाभावेन विनियोगविशेषं विना तेषु निवेशस्याऽनिर्वाहात् । न च येषु क्रतुषु हिरण्यविनियोगः संप्रतिपन्नः

---

* जै॰ सू॰ अ॰ ३ पा॰ ४ सू॰ २७ ।

† जै॰ सू॰ अ॰ ३ पा॰ ४ सू॰ २८ । द्रव्यसंयोगाच्चेति सौत्रः पाठः ।

तेषु तद्द्वारा धारणस्य निवेशः कल्प्यतामिति वाच्यम् । हिरण्यं हस्ते भवति हिरण्येन षोडशिनः स्तोत्रमुपाकरोति हिरण्यस्रज ऋत्विजो भवन्तीत्यादिहिरण्यविनियोगवत्सु क्रतुषु तद्द्वारणस्यापि प्राप्तेः । दक्षिणारूपहिरण्यवत्स्वपि दीयमानस्य प्रतिगृह्यमाणस्य च तस्य धारणप्राप्तेः । हिरण्यार्थतया धारणविधाने सुवर्णश्रुतिवैफल्यापत्तेश्च । तस्मात् शोभनवर्णहिरण्यसाधनकधारणविधिः पुरुषार्थ इत्येव युक्तम् । एवं सतीयमेव श्रुतिः दाक्षायणी* ब्रह्मसूची कमण्डलुधरो द्विजः इत्यादिपुरुषार्थहिरण्यधारणस्मृतेर्मूलं भविष्यतीति तस्या मूलान्तरकल्पनागौरवमपि परिहृतं भवतीति ।

इत्युक्तमध्यासभाष्यइति । अन्तःकरणाद्यवच्छिन्नप्रत्यगात्मा इदमनिदंरूपश्चेतनः कर्ता भोक्ता कार्यकारणाऽविद्याद्वयाधार इत्यध्यासभाष्यटीकायामुक्तमित्यर्थः । ननु घर्षणस्यादर्शगतेष्टकाचूर्णसंयोगविभागप्रचयतया व्याख्यानमयुक्तं फलं हि तत्प्रचयः पुरुषव्यापाररूपाया घर्षणक्रियायाः

१६ । १२ यथा तन्दुलविक्लित्तिः पचिक्रियाया इत्याशङ्क्याह **एतच्चेति ।**

सर्वत्र फलमेव धात्वर्थः न तु तदनुकूलव्यापारः । त्यजिगमिधात्वोः पर्यायतापत्तेः । एक एव हि पूर्वदेशविभागोत्तरदेशसंयोगरूपफलद्वयस्याप्यनुकूलो व्यापारः पुरुषस्पन्दः । यद्युच्येत फलविशेषावच्छिन्नो व्यापारो धात्वर्थः । ततः पूर्वदेशं त्यजति उत्तरदेशं गच्छतीत्यर्थभेदस्तयोरिति तर्ह्यावश्यकत्वाद् लाघवाच्च तत्तत्फलमेव धात्वर्थो ऽस्तु । न चैवं सति पचेर्विक्लित्त्यर्थतायां विक्लित्त्युदयात् प्राक् पचतीति वर्तमानप्रयोगो न स्याद् न स्याच्च तन्दुलान् पचतीति तन्दुलानां कर्मतया निर्देशः । धात्वर्थरूपविक्लित्तिक्रियाजन्यस्य तन्दुलेषु फलान्तरस्याभावात् परसमवेतत्वा†भावाच्चेति वाच्यम् । धात्वर्थरूपफलानुकूलव्यापारस्याख्यातार्थत्वाङ्गीकारेण पचतीति लडर्थस्य वर्तमानत्वस्यैकप्रत्ययोपात्ते तस्मिन्नन्वयोपपत्तेः । तज्जन्यविक्लित्तिरूपफलभागित्वेन तन्दुलानां कर्मतया निर्देशोपपत्तेश्चेति मण्डनाचार्याणां मतमनुसृत्य संयोगविभागरूपस्य फलस्य घर्षतिधात्वर्थत्वमुक्तमिति भावः ।

---

* दाक्षायणी=सुवर्णधरः ।

† तस्याः परसमवेतेत्यादिः पाठः २ पु· ।

ननु फलस्य धात्वर्थत्वे विक्लित्त्युदयात् प्राक् पाको वर्त्ततइति प्रयोगो
न स्यात् तत्र पचिधातोरुपरि तदर्थविक्लित्त्यनुकूलव्यापारवाचकस्याख्यात-
स्याभावात् । तत्तत्फलानुकूलव्यापारसामान्यरूपेणाख्यातार्थत्वे च पचति य-
जतीत्यादावधःसंतापनद्रव्यत्यागादिव्यापारविशेषप्रतीतिर्न स्यात् । तत्र
तत्राधःसंतापनादिव्यापारविशेषस्यापि तदर्थतायामाख्यातस्य नानार्थत्वं
स्यात् । तस्मात् तत्तद्व्यापारविशेष एव धात्वर्थः । त्यजिगम्योरपर्यायता तु
फलस्योपलक्षणतया ऽप्युपपद्यतइति मन्यमानानामन्येषां मते कथमिहोप-
पत्तिरित्याशङ्क्याह **संयोगविभागातिरिक्तेति** । दर्पणेष्टकाचूर्णसंयोग- ७६ । १५
विभागफलकः पुरुषव्यापारो घर्षतिधात्वर्थ इति पक्षे ऽपीत्यर्थः ।

(वस्तुतो विदिक्रियाकर्मभावेत्यादिव्याख्याने बीजमाह) * **औपा-
धिकं त्विति** । वृत्त्युपरागोपाधिकं कर्मत्वमित्यर्थः । (इदं तु परान-
नुगुण्यान्नेति भावः ।)† **तच्छब्दाध्याहारेण योजयितुमिति** । यच्चे-
त्यस्य प्रतिनिर्देशार्थं तच्चेति शब्दाध्याहारेण योजयितुमित्यर्थः । एवं च
टीकायां तच्छब्दाश्रवणे ऽपि तदध्याहारो ऽभिप्रेत इति सूचितं भवति ।
यच्छब्दाध्याहारेण योजयितुमिति पाठे सेति शब्दस्य प्राङ्निर्देशार्थं येति
शब्दस्याध्याहारेण योजयितुमित्यर्थः । अनेनोभयमप्यध्याहार्यमिति सिद्ध-
म् । अत एवाचार्यैस्तच्चेति येति चोभयमप्यध्याहृत्य वाक्यं पूरितम् ।

ननु तां ध्यायेदिति विधितः प्राग् देवताध्यानमप्राप्तमित्यसिद्धं तं
विधिमनपेक्ष्यापि तत्तदर्थवादावगमितदेवतारूपाणां स्वेच्छया कदा चिदनु-
चिन्तनसंभवादित्यत आह **विध्यर्थेति** । वषट् कुर्यादिति विध्यर्थवषट्- ७७ । १७
कारानुष्ठानात् प्राक्काले नियमेन ध्यानं तद्विधिं विना न प्राप्तमित्यर्थः ।
नन्वधीतवेदस्य विचारपूर्वकार्थज्ञानमपि विधिं विना न प्राप्नोतीति चेद् न ।
तस्याध्ययनविधिना फलवदर्थावबोधपरतां नीतैर्विशेषतः संदिह्यमानार्थै-
र्वेदान्तैराक्षिप्ततया मुमुक्षूणां प्राप्तिसत्त्वादिति भावः । टीकाकारैः सर्वापेक्षा-
धिकरणे‡ चतस्रः प्रतिपत्तयो ब्रह्मणि प्रथमा तावदुपनिषद्वाक्यश्रवणमात्राद्

---

* ( ) एतन्मध्यगो ऽवतरणग्रन्थो नास्ति २-५ पु० ।

† ( ) एतन्मध्यगो ग्रन्थो न दृश्यते २-५ पु० ।

‡ व्याससू० अ० ३ पा० ४ सू० २६ ।

भवति यां किलाचक्षते श्रवणमिति द्वितीया मीमांसासहितात् तस्मादेवोपनिषद्वाक्याद् यामाचक्षते मननमिति तृतीया चिन्तासन्ततिमयी यामाचक्षते निदिध्यासनमिति चतुर्थी तु साक्षात्कारवती वृत्तिरूपेति श्रवणादिरूपतयोक्तानां चतुर्णामपि ज्ञानानां प्राप्तत्वेन विधातुमशक्यत्वमुपपादितमेव । इदानीं न्यायतस्तत्तात्पर्यावधारणं श्रवणतदनुग्राहकानुमानादिरूपयुक्त्यनुचिन्तनं मननमिति पक्षे विधान्तरेणापि तयोर्निदिध्यासनस्य च विधानासंभवमाह **श्रवणं हीति** ।

१८ । ६ **विषयविशेषावच्छिन्नस्येति** । ननु सामान्यतस्तात्पर्यावगमो विधेयोऽस्त्वित्याशङ्क्य विशेषग्रहणं कृतम् । तथा च सर्वेषां वेदानामर्थपरत्वमापादयता ऽर्थज्ञानफलकाध्ययनविधिनैव च वेदान्तानामपि कर्मकाण्डवत् सामान्यतोऽर्थतात्पर्यावगमसिद्धेर्न तदवगमार्थं श्रवणविधिरभ्युपेयः किं तु तेषामखण्डे ब्रह्मणि न्यायतस्तत्तात्पर्यमवगच्छेदिति विषयविशेषावच्छिन्नतात्पर्यावगतिविषयः सोऽभ्युपेतव्यः । तथा च प्राक् तदवगमानवगमयोरुक्तदूषणद्वयमापततीति भावः । ननु साङ्गाध्ययनवतो वेदान्तानां सगुणनिर्गुणरूपेषु नानाविधेष्वर्थेषु क्वैषां तात्पर्यमिति संदेहे च सति बुद्ध्यारूढनिर्गुणरूपविषयविशेषावच्छिन्नं तात्पर्यं न्यायतो निश्चिनुयादिति विधातुं शक्यतइति चेन्न । वेदार्थनिश्चयात् फलविशेषप्रतीतौ तदर्थतात्पर्यनिर्णयाय स्वत एव न्यायविचारे प्रवृत्त्युपपत्त्या कर्मकाण्डार्थविचारइव विध्यनपेक्षणात् । **युक्त्यालोचनस्येति** । युक्तिविशेषालोचनविधाने प्राक् तदवगमानवगमाभ्यां प्राप्तिर्विधानाशक्तिश्च । सामान्यतो युक्त्यालोचनं तु न विधेयम् । असंभावनादिनिरासरूपदृष्टार्थत्वेन स्वत एव प्राप्तेरिति भावः ।

,, । ९ **उपासनस्यापीति** । उपासनं हि प्रत्ययावृत्तिः सा श्रवणमननकालयोरेकैकप्रत्ययोत्पत्तावपि प्रत्ययद्वयरूपा सिद्धैव विधेयनिदिध्यासनावगमकाले विधेयावृत्त्यवगमस्य ब्रह्मात्मैक्यविषयत्वस्यापि सद्भावात् तमादाय प्रत्ययत्रयरूपापि सा सिद्धा । आवृत्तिमात्रं हि ध्यानशब्दार्थो न तु शतसहस्रादिसंख्याविशेषनियतावृत्तिः । तथा च द्वित्रप्रत्ययोत्पत्तावपि आवृत्तिशास्त्रार्थो लब्ध एव भवति । यथा सकृन्मुसलपातने ऽपि सर्वौषधस्य पूर-

गित्वा ऽवहन्तीत्यत्रावघातशास्त्रार्थः । यदि ध्यानस्य साक्षात्काररूपदृष्टफलकत्वमिष्यते तदा परं दार्शपूर्णमासिकावघातस्येव यावद्दृष्टफलोदयमावृत्तिर्लभ्यते तथा दृष्टफलकत्वे तु न विध्यपेक्षा । उपायान्तरप्राप्त्यभावाद् नियमस्यापि नावकाशः । न चाविच्छिन्नप्रत्ययावृत्तिर्ध्यानशब्दार्थः सा न सिद्धेति वाच्यम् । यथा श्रवणमननं प्रत्ययावृत्तिरूपं ध्यानं कर्त्तव्यमिति विध्यर्थावगमकाले श्रवणे यथाभूतः प्रत्ययः मनने च यथाभूतः तयोरपि क्रमेणानुसंधेयत्वेन नैरन्तर्यस्यापि प्राप्तेरिति भावः ।

आखण्डलादीनामित्यादि । ननु कुतूहलभयनिवृत्त्यादिप्रयो- १८ । २१
जनसत्त्वे ऽप्याद्यव्युत्पत्तिग्रहानुसारेण कार्याध्याहारः स्यादिति चेत् किमाद्यव्युत्पत्तिग्रहकाले गामानयेत्यादिवाक्यगतानां सर्वेषां पदानां कार्यवाचित्वमध्यवसितमिति तदनुसारेण द्वितीयादिप्रयोगेषु श्रुतैरपि सर्वैः पदैः कार्यसामान्ये बोधिते तद्विशेषजिज्ञासया कार्यविशेषवाचिक्रियापदाध्याहार उताद्यव्यवहारस्य क्रियापदघटितत्वं दृष्टमिति तदनुरोधेन । नाद्यः । क्रियापदसमभिव्याहारात् कार्यस्य गोपदसमभिव्याहारात् कर्मकारकस्येव प्रतीत्युपपत्त्या पदान्तराणां कर्मकारकइव कार्येपि शक्तेरकल्पनीयत्वात् । यथा प्रवृत्तिः कार्यावगतिपूर्विका तथा कार्यावगतिरपि प्रवृत्तिविषयशुद्धपदार्थगोचरज्ञानपूर्विकेति नियमस्य प्रत्यक्षाधीनस्वप्रवृत्तिस्थले दृष्टत्वेन प्रयोज्यस्य प्रवृत्त्या कार्यावगतेरिव कार्यावगत्या तदनन्वितशुद्धपदार्थज्ञानस्याप्यनुमितेरनिवार्यतया तस्मिन् उत्तमवृद्धवाक्यं विना कारणान्तराभावेनाऽऽद्यव्युत्पत्तिग्रहसमयएव शुद्धे गवादिपदार्थे शब्दसामर्थ्यग्रहणावश्यम्भावाच्च । साक्षात्प्रवृत्तिजनकज्ञानएव शब्दस्य सामर्थ्यं कल्पनीयमिति चेत् । तर्हि ममेदं कार्यमिति ज्ञानएव तस्य सामर्थ्यं कल्प्येत* तस्यैव गामानयेति वाक्यजन्यमदंशरहितज्ञानानन्तरभाविनः साक्षात्प्रवर्तकत्वात् । नापि द्वितीयः । दण्डेन गामानयेत्यत्राऽऽद्यव्युत्पत्तिग्रहे करणश्रवणे ऽप्यग्रे घटं पश्येत्यादौ करणानध्याहारवत् कार्यानध्याहारस्याप्युपपत्तेः । आद्यव्युत्पत्तिग्राहकवाक्यस्याऽऽनयनकार्यघटितत्वे द्वितीयादिप्रयोगेष्वपि तदध्याहारापत्तेः । आनयनं विना ऽग्रे कार्यान्तरघटितवाक्यश्रवणादानयननियमस्त्यज्यतइति चेत् तर्हि कार्यवाचिपदरहि-

* कल्प्येतेति १ पु· पा· ।

तानां सिद्धार्थवर्णनपराणां काव्यादीनां बहुलमुपलम्भात् कार्यनियमो ऽपि त्यक्तव्य इति तुल्यम्* । एवमाद्यव्युत्पत्तिग्रहानुरोधेनाद्ये सिद्धार्थप्रयोगेषु कार्यमध्याहर्तव्यमित्यभिमाने भग्ने हर्षलिङ्गोपजीविसिद्धार्थव्युत्पत्तिग्रहोपपादनमपि निरवद्यम् । अन्यथा ह्यविदितार्यजनभाषार्थ इत्यादिटीकाग्रन्थेन प्राक् स्वभाषायां शब्दार्थव्युत्पत्तिमतः प्रबुद्धस्य हर्षलिङ्गोपजीवि पुत्रस्ते जात इत्यत्र व्युत्पत्तिग्रहणमुपपादितमयुक्तम् । आद्यव्युत्पत्तिग्रहानुसारेण तत्र स्नानदानादिकं कुर्विति कार्यपरत्वस्फुरणादिति शङ्कावकाशः स्यात् । न च पुत्रस्ते जात इत्यत्राद्यव्युत्पत्तिग्रहो ऽप्युक्तरीत्या संभवतीति शङ्कनीयम् । स्तनन्धयस्यातिबालस्याद्यव्युत्पत्तिग्रहसमये जातः शिशुः चैत्रस्य पुत्रजन्म हर्ष†कारणमिति च बोधाभावात् । ननु तद्बोधवतः प्रबुद्धस्यापि पुत्रस्ते जात इति शब्दस्य पुत्रजननरूपार्थपरत्वग्रहणं न संभवति मुखविकासानुमितहर्षकारणं पुत्रजन्मज्ञानं पुत्रपदाङ्कितपटवासप्रदर्शनलिङ्गजन्यमनुमितिरूपम् । पुत्रस्ते जात इति वाक्यं तु स्नानदानादिकर्तव्यतार्थकमिति चैत्रस्य हर्षजन्मजातं स्नानदानादिप्रवृत्तिं च पश्यतस्तद्भाषानभिज्ञस्य विपरीतार्थप्रतीतेरेव प्राप्तेरिति चेत् । उच्यते । लाटदेशे पटवासप्रदर्शनपुरस्सरं पुत्रजननवार्तां वाचैव स्फुटं वदन्ति वार्ताहारा इति तद्देशप्रसिद्धिं जानन् वार्ताहारवाक्यस्य पुत्रजननमेवार्थ इति प्रत्येतीति न तस्यार्थान्तरप्रतीतिप्रसङ्गः । एवं च प्राग्भवीयसंस्कारोद्बोधेन पटवासप्रदर्शनकृतेन तद्देशप्रक्रियास्मरणमाश्रित्याद्यव्युत्पत्तिग्रहो ऽपि पुत्रस्ते जात इत्यत्रोपपादयितुं शक्यः । अवश्यं च मातापित्रादिभिश्चन्द्रः गौरित्यादिशब्देषु चन्द्राद्यभिमुखाङ्गुलीनिर्देशपूर्वकमुच्चार्यमाणेष्वाद्यव्युत्पत्तिग्रहे बालस्य जायमाने सर्वसिद्धे शब्दविशेषोच्चारणसहितार्थविशेषाभिमुखाङ्गुलीनिर्देशस्य तस्मिन्नर्थे तस्य शब्दस्य शक्तिग्राहार्थत्वं जन्मान्तरे प्रबुद्धेन तदा ऽवगतं बालेन स्मर्यत इत्येवोपपादनीयम् । तत्र गत्यन्तराभावात् । तथेहापि भविष्यति । एवं जन्मान्तरानुभवसंभवमभिप्रेत्य **लाटानां प्रसिद्ध** इत्युक्तम् । प्रसिद्धः प्रकर्षेण सिद्धः । अनादिकालप्रवृत्त इत्यर्थः ।

---

* तुल्य इति १ पु· पा· ।

† जातः शिशुश्चैत्रस्य पुत्र इति पुत्रजन्महर्षेति २ पु· पा· ।

न कार्यविषयाणीत्यर्थ इति । नन्वेवं सति कार्यविशेषण- ७९ । ६
तया स्वर्गदेवतादिभूतार्थप्रमितिजनके सार्थवादविधिवाक्ये व्यभिचारः
स्यात् । नैष दोषः । भूतार्थप्रमितिशब्देन स्वातन्त्र्येण भूतार्थप्रतीतेर्विवक्षित-
त्वात् । प्रतीतौ याथार्थ्यविशेषणस्यानपेक्षितत्वात् । अत एव हेत्वसिद्धिप-
रिहारार्थं सिद्धव्युत्पत्तिप्रसाधनापेक्षा पूर्ववाक्ये दर्शिता । यथाश्रुतहेतोर्हि न
तदपेक्षा ऽस्ति । वेदान्तानां ज्ञानविधिशेषतया ब्रह्मप्रमितिजनकत्वस्य परे-
णाप्यङ्गीकृतत्वात् । **प्रतीतिजनकत्वसाधनइति ।** कारणानां हि तत्त-
दर्थविषयत्वं फलद्वारकम् उपपादनीयं न साक्षात् तत्तदर्थविषयत्वमस्ति ।
एवं च फलरूपायां प्रतीतावनन्यशेषत्वरूपभूतार्थविशेषणाविवक्षायां सिद्ध-
साधनम् । सिद्धसाधनपरिहाराय तद्विवक्षायां हेतुसाध्याभेद इत्यर्थः । ननु
यदनन्यशेषभूतार्थविषयप्रतीतिजनकं तत् कार्यविषयं न भवतीति विशेष-
व्याप्तिरेव संभवति चक्षुरादीनामनन्यशेषभूतार्थविषयाणामानयनादिगतकार्य-
त्वाभावात् । किमर्थं सामान्यव्याप्तिप्रत्यायनार्थं यत्तच्छब्दावुपन्यस्तावित्या-
शङ्क्याह **यत्तच्छब्दावपीति ।** यद्विषयेत्यत्र तद्विषयेत्यत्र च समस्तौ
यत्तच्छब्दौ न समभिव्याहृतपरौ किं तु प्रकृतभूतार्थपरामर्शिनौ । तथा च
तद्विषयमित्यस्य भूतार्थविषयमित्यर्थलाभे सति तेन लक्षणया कार्यविषय-
त्वाभावरूपमभिमतसाध्यं बोधनीयमिति भावः । **उपोपसर्ग इत्यादि ।**
तथा च द्वितीयं ब्रह्माहमर्थनिष्कृष्टसाक्षिरूपत्वेनाहमर्थनिर्दिष्टं निश्चयरूप-
तया विषयीकृत्य सवासनामविद्यां शृणाति हिनस्तीत्युपनिषदिति निर्वचनं
कृतं भवति । सदेरिह विशरणार्थत्वस्य टीकायामुक्तत्वात् ।

व्यवहितमपीति । ननु क्रियातच्छेषव्यतिरिक्तकेवलसिद्धवस्तुबोधको ,, । १२
वेदभागो नास्तीति पूर्वपक्षिमतस्य निरासे तन्नेति प्रतिज्ञाते हेतुत्वेनोपन्यस्त-
मनन्यशेषत्वं संग्रहवाक्ये तदुपपादनार्थं च* यो ऽसावुपनिषत्स्वित्यादिवाक्यं तच्च
प्रयाजादिवत् प्रकरणेन जुह्वादिवद्वाक्येन वा विनियोगाभावेनोपपाद्यमानमनन्य-
शेषत्वं किमर्थं व्यवहितान्वयमाश्रित्य चतुर्विधद्रव्यविलक्षणत्वे हेतुत्वेन योजि-
तं किमर्थं च भाष्ये संग्रहवाक्यमुपन्यस्तं तच्चोपन्यस्तयोरौपनिषदत्वाऽनन्यशे-
षत्वयोरनुपपादकं चतुर्विधद्रव्यविलक्षणत्वं विवरणवाक्ये ऽस्मिन्नुपन्यस्तम् ।

---

* तदुपपादनार्थं चेति २ पु॰ पा॰ ।

उच्यते । यदि प्रकरणादिविनियोजकाभावेन क्रियाशेषतया ऽन्वयो नास्ति तर्हि कर्मकारकत्वेन तच्छेषतया ऽन्वयो ऽस्तु एवमपि क्रियान्वयनियमस्य न भङ्ग इत्याशङ्कान्तरनिराकरणार्थं चतुर्विधद्रव्यविलक्षणत्वमुपन्यस्तं तचाप्यनन्यशेषत्वं हेतु*भवनक्षममिति व्यवहितान्वयः समाश्रितः । स एष नेत्यात्मेति बृहदारण्यकपञ्चमाध्यायाम्नातवाक्ये विधेयानुवाद्यविभागमनुवाद्यस्याथात आदेशो नेति नेतीति तच्चतुर्थाध्यायाम्नातवाक्यतः प्राप्तिं च दर्शयति

८० । ३ य आत्मेति । स एष इत्यस्य कस्मिन्नु प्राणः प्रतिष्ठित इत्यपान इतीत्यादिना प्रस्तुते प्राणादिपञ्चके वृत्त्यसंभवादगृह्यो न हि गृह्यतइत्यादिना प्रस्तोष्यमाणे वृत्तिं प्रकटयितुमपेक्षितमध्याहरति **निरूप्यतइति । विनश्यत्स्विति ।** समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् । विनश्यत्स्वविनश्यन्तमिति स्मृतौ सर्वभूतस्थत्वस्य तथा विवरणादिति भावः । अवधानस्वारस्यादात्मत्वादेवेत्यग्रिमवाक्यगते†वकारस्वारस्याच्च **अथ वेति** पक्षः । नन्वनन्यशेषत्वं प्रागुपपादितमेव इहापि विधिशेषत्वं वा नेतुमिति भाष्येण किमर्थं पुनरुपपाद्यतइत्याशङ्क्य तदपौनरुक्त्याय पूर्वोक्तमनुवदति **औपनिषदस्येति ।** प्रागनन्यशेषत्वमुपनिषत्प्रतिपाद्यत्वं च संग्रहवाक्ये यदुपन्यस्तं तचानन्यशेषत्वं प्रकरणादिविनियोजकाभावेनोपपादितम् । औपनिषदत्वं कार्य एव व्युत्पत्तिग्रह इति शङ्कानिरासेनाऽविषये ब्रह्मणि व्युत्पत्तिग्रहासंभवशङ्कानिरासेन कर्तृत्वाद्यवगाह्यहंप्रत्ययविरोधशङ्कानिरासेन चोपपादितम् । इदानीं तदनन्यशेषत्वं विधिशेषत्वाभावरूपतया विवरीतुमात्मत्वरूपहेत्वन्तरेण चोपपादयितुमिदं भाष्यमित्यर्थः । **अनुषङ्गेणेति ।** न शक्य इत्यनुषङ्गेणेत्यर्थः । न त्वतःशब्दस्याप्यनुषङ्गेणेत्यर्थः । अतःशब्दोक्तहेतोः पुनर्निर्देशरूपस्यात्मत्वादेवेत्यग्रिमभाष्यगतहेतोः पूर्वत्राप्यन्वयस्य टीकायां वक्ष्यमाणत्वात् । अपि च सर्वेषामात्मत्वादेव न हेयो नाप्युपादेय इति टीकापाठो न व्याख्यानापेक्षः । अपि चात एवेति पाठे ऽप्यतःशब्दः सर्वात्मत्वा-

११ । २३ दिति भाष्योक्तहेतुपरामर्शीति व्याचष्टे **भाष्योक्तादेव हेतोरित्यर्थ इति ।** भाष्ये अत इत्युक्तादेव हेतोरित्यर्थ इति पाठे ऽप्ययमेवार्थो भाष्ये

---

* शेषत्वे हेत्विति २ पु॰ । † अग्रिमभाष्यगतेति २ पु॰ पा॰ ।

‡ अतो भाष्येत्यादिः पाठः २ पु॰ ।

उक्तादेव हेतोरित्यर्थ इति व्यवहितयोजनया ग्राह्यः । **तस्मात् पुरुषादिति**
प्रतीकग्रहणे पुरुषादित्यादि श्रुतिवाक्यं तस्मादिति भाष्यं तस्यार्थमाह
कल्पितस्येति । दृष्टो हि तस्यार्थ इति शाबरवचने तस्यशब्दार्थमाह* ८१ । ४
वेदस्येति । **प्रतिषिध्यमानेतीति** । अथातो धर्मजिज्ञासेत्यत्र अका-
रप्रश्लेषेणा†ऽधर्मविचारोऽपि प्रतिज्ञात इत्यधर्मरूपं प्रतिषिध्यमानमपि भाष्ये‡
कर्मशब्देन संगृहीतम् । तत्संग्रहार्थमेव धर्मशब्दमपहाय कर्मशब्दग्रहणमिति
भावः । आम्नायस्येति सूत्रे§ कस्य चित् परिहारस्यानुक्तत्वादपि चेत्ययुक्त-
मित्याशङ्क्य शाबरवचने कृतः परिहारस्तत्रापि साम्येन प्राक् सिद्ध इत्याह
शाबरेति । ननु विशिष्टे पदशक्तिर्नास्ति चेत् कथमन्वितपदार्थप्रतीतिः । न
हि वृत्त्यविषये शाब्दबोधो भवतीत्यत आह **अयमभिसंधिरिति** ।
अनविनाभाविभिरपीति । मञ्चाः क्रोशन्तीत्यत्र हि मञ्चशब्देन मञ्चेषु
शयानाः शिशवो लक्ष्यन्ते ।

अत्रोच्यतइति । ननु लवकशब्दवाच्यस्य वाक्यार्थेनाऽनन्वयनि- ८२ । १०
यमशङ्कायाः किमुत्तरमिहोक्तम् । न चान्वितं लक्ष्यमेव वाक्यार्थेनान्वितं
भवति न त्वविशिष्टं वाच्यस्वरूपमित्युक्तनियमाऽविरोधो विशिष्टस्वरूपयो-
स्तादात्म्यस्य कस्यापि स्वीकारादिति वाच्यलक्ष्यसंबन्धप्रतिपादनेन
द्योतित इति वाच्यम् । विशिष्टस्य विशेष्यघटितमूर्तेर्वाक्यार्थान्वये तद्घट-
कस्य विशेष्यस्यापि तदन्वयाऽनिवारणात् । न च विशिष्टस्वरूपयोः संब-
न्धोक्त्या स्वरूपभिन्नं तदघटितं विशिष्टमङ्गीकृतमिति शङ्कनीयम् । तादा-
त्म्यसम्बन्धस्य विशिष्टे विशेष्यानुप्रवेशाऽविरोधित्वेन सम्बन्धः स्वीकृत
इत्येतावता तदनुप्रवेशविरोधिभेदाप्रसक्तेः । अत एवाचार्यैरिहैव वक्ष्यते
भवतु कार्यान्विते भूते सङ्गतिग्रहः तथापि स्वरूपं तत्र प्रतीयतएव
विशिष्टे ऽपि स्वरूपसम्भवादिति । तस्माद्वाच्यार्थाऽनन्वयनियमाशङ्कायाः
परिहारो न लब्ध इति चेत् । लब्ध एव वाक्यार्थाभावानुपपत्तिरेवान्वि-
तलक्षणाया निदानमित्यन्वयानुपपत्तिमनपेक्ष्यानुपपत्त्यन्तरस्य लक्षणाबीज-
त्वप्रदर्शनेन लक्ष्यार्थग्रहणसमाधेयानुपपत्तिमात्रं लक्षणाबीजं न तु वाच्या-

---

* तस्येति शब्दस्यार्थमाहेति पाठान्तरम् १ पु० । † प्रश्लेषेणेति पाठान्तरम् २ पु० ।
‡ शाबरे इत्यर्थः । § जै० सू० अ० १ पा० २ सू० १ ।

र्थस्य वाक्यार्थे ऽन्वयाऽनुपपत्तिरेव येन वाच्यार्थानन्वयनियमः स्यात् । काकेभ्यो दधि रक्ष्यतामित्याद्यजहल्लक्षणास्थले मुख्यार्थान्वयानुपपत्त्यभावे ऽपि तात्पर्यानुपपत्तेर्लक्षणाबीजत्वाङ्गीकारादिति ।

८२ । १७ **आकाङ्क्षासत्तीति ।** नन्वेवं सत्यवश्यापेक्षिताकाङ्क्षादिवशादेव वाक्यार्थरूपान्वयप्रतीत्युपपत्तेर्न तत्र लक्षणा कल्पनीया । न च प्रमाकरणप्रत्यासत्तिमन्तरेण संसर्गरूपस्यापि प्रमेयस्य भानं न संभवति प्रत्यक्षे प्रकारविशेष्ययोरिव संसर्गांशेऽपि सन्निकर्षापेक्षादर्शनादिति वाच्यम् । तथा नियमाऽभावात् । अनुमितिकरणे धूमे वह्निव्याप्तिसत्त्वमात्रेण पर्वतसंबन्धिवह्न्यनुमितिदर्शनात् । पक्षधर्मताबलात् साध्यस्य पक्षसंबन्धभानमिति चेदिहाप्याकाङ्क्षादिबलात् प्रधानपदार्थे समभिव्याहृतगुणान्वयप्रतीतिरस्त्विति चेद् मैवम् । एवमपि शब्दबोध्यस्य वृत्तिविषयत्वनियमाऽप्रत्याख्यानात् । करणप्रत्यासत्तिमनपेक्ष्यानुमितौ भासमानस्यापि पक्षसाध्यसंबन्धस्य शब्देन बोधने कर्तव्ये पर्वतो वह्निमानिति तदभिधायकमतुप्प्रत्ययापेक्षादर्शनात् । घटः पटो नेत्यत्रान्योन्याभावे घटे पटो नेत्यत्र संसर्गाभावे च प्रतियोगिसंबन्धस्य शब्दवृत्तिविषयत्वं विनैव शाब्दबोधविषयत्वं दृष्टमिति चेद् न । तदन्यवाचिनो नञः शक्तावधिकरणसंबन्धस्येव तदन्यवाचिनस्तदभाववाचिनश्च नञः शक्तौ प्रतियोगिसंबन्धस्यापि शक्यत्वेनानुप्रवेशकल्पनात् । अन्याभावशब्दयोः शक्तौ तदननुप्रवेशात् । तदर्थवाचित्वेनाङ्गीकृतस्य नञः शक्तावपि न तदनुप्रवेश इत्यभ्युपगमे तयोः प्रयोगे इव नञः प्रयोगे ऽपि प्रतियोगिनि पञ्चमीषष्ठ्योर्नञः प्रयोगइव तयोः प्रयोगे ऽपि प्रतियोगिनि प्रथमाया वा निवारयितुमशक्यत्वात् । तस्मादन्वयांशे ऽपि वृत्तिकल्पनं युक्तमेव । न च तथापि प्राक् शक्यसंबन्धित्वेनाज्ञातस्याऽपूर्वस्य वाक्यार्थस्य लक्ष्यत्वं न युज्यतइति वाच्यम् । प्रागविज्ञातहरिद्रानामकनदीविशेषेण हरिद्रायां नद्यां घोषविशेष* इति श्रुते वाक्ये नदीपदसमभिव्याहारेण तदानीमेव हरिद्राशब्दस्य नदीविशेषशक्तिग्रहणेन नदीलिङ्गात् तत्सम्बन्धित्वेनानुमितस्य तीरस्येव आकाङ्क्षाद्युपस्थापितस्य वाक्यार्थस्यान्वयस्य वृत्त्युपस्थापितत्वसिद्ध्यर्थं लक्ष्यत्वोपपत्तेः ।

---

* विशेष इति नास्ति २ पु. ।

एकवाक्यान्तर्गतानां सर्वेषां पदानाम् इतरपदार्थान्वितस्वस्वार्थलक्ष-
कतायां वाक्यार्थान्वयभेदेन वाक्यभेदमाशङ्क्य समभिव्याहृतयावद्गुणान्वि-
तप्रधानपदार्थरूप एक एव लक्षणीयो वाक्यार्थ इति परिहरति **नान्वित्या-** ८२ । २३
दिना । इयं च वाक्यार्थलक्षणा समभिव्याहृतसकलपदवृत्तिः प्रधानपदमात्र-
वृत्तिर्वेत्यन्यदेतत् । **व्युत्पत्तिनियममिति ।** प्रथमं कार्यान्वितप्रयोगएव
शक्तिग्रह इति नियममभ्युपेत्येत्यर्थः । एतदेव विवृणोति **तथा हीति ।**
कथमपरथेति । प्राथमिकव्युत्पत्तिग्रहे कार्यान्वयनियमवत् कार्यस्य प्रमा-
णान्तरगृहीतत्वनियमो ऽप्यस्ति व्युत्पित्सोः गवानयनबन्धनाऽदर्शने* व्युत्प-
त्तिग्रहासम्भवात् तदन्वयो यथा व्युत्पत्तिग्रहोपायमात्रतया ऽन्यथासिद्धस्तत्र
न शब्दार्थकोटावनुप्रविशति एवं कार्यान्वयो ऽपीत्यर्थः । **अस्ति किलेति ।**
नासिकात्र्यम्बकस्थाने निवसद्भिराचार्यैरयं ग्रन्थः कृत इति प्रसिद्धिः । अतस्तत्र-
त्यगिरिनदीवनवर्णनं कृतम् । **जटाजूटकलनाय** जटाकलापबन्धाय । **पाण्डु-**
रा पटी उष्णीषरूपा । **रहस्तत्र** नित्यसंनिहितः त्र्यम्बकदेवः । **पचतीति ।** ८४ । १८
पाको हि पूर्वापरीभूताधःसन्तापनादितन्दुलविक्लित्तिफलपर्यन्तक्रियासन्तान-
रूपो नैकक्रियात्मकः । अतो घटादिवत्प्रतिक्षणं पर्यायप्रवृत्तिर्न भवतीत्यर्थः ।
उत्पादनायामिति । उत्पत्तावित्यर्थः । ओदनोत्पत्त्यनुकूलपुरुषव्यापारस्य
पाकस्यैवोदनोत्पादनत्वेन तस्य तदनुकूलत्वाभावात्† । यद्वा प्रज्वलनादिरूपो
ऽग्न्यादिव्यापारो ऽपि भवत्योदनोत्पादना तदनुकूलश्च पुरुषव्यापार इति
तदभिप्रायो णिचः प्रयोगः । **प्रयत्नविषय इति ।** साध्यतयेति शेषः । उद्दे-
श्यतया प्रयत्नविषयत्वस्य घटभवनादौ फले ऽपि सत्त्वेन तद्व्यावृत्तत्वाभा-
वात् । **तत्र हेतुमाहेति ।** हेतुभूतं साध्यत्वमिह चिकीर्षाविषयत्वं न तु
प्रयत्ननिर्वर्त्यत्वं साध्याविशेषात् । ननु द्रव्यगुणयोरपि घटरूपादिकयोः कृत्य-
पेक्षोत्पत्तिकत्वादस्ति साध्यतया कृतिविषयत्वमित्याशङ्क्य तत्रापि तदुत्प-
त्त्यनुकूलस्य तदुत्पादनारूपदण्डचक्रादिव्यापारानुकूलस्य च पुरुषव्यापारस्यैव
तथात्वमित्याह **तत्रापीति ।**

पदस्मारितेति । ननु गुरुमते ऽन्विताभिधानाङ्गीकारात् कथं का- ,, । २५
र्यान्विते गृहीतशक्तिकैः पदैरनन्वितार्थानां स्मारणं कथ्यते । उच्यते । शक्ति-

---

* बन्धनाद्यदर्शने इति २ पु॰ पा॰ ।   † तदनुकूलत्वादिति २ पु॰ पा॰ ।

ग्रहात् पूर्वं तदर्था या ऽनन्वितार्थोपस्थितिः सा ऽत्र निमित्तत्वेन विवक्षिता । उक्तं हि निबन्धनपञ्जिकायामृजुविमलायामनन्वितावस्था हि संबन्धग्रहणोपायतां गच्छन्ती वाक्यार्थप्रतिपत्तौ निमित्तमेवं हि संबन्धग्रहणमयमर्थो ऽनेन शब्देनाकाङ्क्षितसंनिहितयोग्यार्थान्तरान्वितः सन्नभिधीयतइतीति । अत्रायमर्थ इत्यनन्वितावस्थस्य गवादेरुपस्थितिरुक्ता । एवं च पदस्मारितेत्यनेन शक्तिग्रहणार्थं पदश्रवणसमये कारणान्तरप्रत्यायितत्वं विवक्षितमिति न विरोधः । यद्वा कार्यसामान्ये गृहीतशक्तिकैः पदैः स्मारितास्तस्यामवस्थायां समभिव्याहृतकार्यविशेषाऽनन्वितार्था विवक्षिता इति न विरोधः ।

८५ । १ **अविशेषेणेति ।** नन्वविशेषेण द्रव्यगुणभावार्थवाचकाः सर्वे ऽपि नियोगविषयसमर्पका इत्ययं प्रतिपदाधिकरण*पूर्वपक्षः तं वाक्यभेदतः प्रतीयमानक्रियाकारकभावरूपविनियोगविरोधेनानेकाऽपूर्वाभ्युपगमगौरवप्रसङ्गेन च निराकृत्य तेषु कश्चिदेव नियोगविषयसमर्पक इत्यनिर्धारणेन तस्मिन्नधिकरणे स्थिते तेषु भावार्थवाचकशब्द एव नियोगविषयसमर्पक इति निर्धारणार्थं हि भावार्थाधिकरणम्† । सत्यम् । इहाऽविशेषेणेत्यनेन द्रव्यगुणभावार्थानां त्रयाणामपि कार्यत्वमविशिष्टमित्यनध्यवसायेन पूर्वपक्षो विवक्षितः । अनध्यवसायपूर्वपक्ष एव निबन्धनटीकायां दर्शितः । भाष्यगतस्याविशेषेणेति पूर्वपक्षे हेतू‡पन्यासस्य च अनध्यवसायएव तात्पर्यं वर्णितम् । यद्वा विवरणटीकानुसारेण प्रतिपदाधिकरणशरीरमत्र लिखितम् । तन्मते हि प्रतिपदाधिकरणं कर्मैव विषयो न द्रव्यगुणाविति निर्धारणम् । भावार्थाधिकरणं तु किं कर्म नाम्ना विषयतया समर्प्यते उत आख्यातेनेति विशेषविचारार्थं प्रतिपदाधिकरणस्य भावार्थसूत्र§व्यतिरेकेण सूत्रान्तराभावात् तदेव सूत्रमिह लिखितमिति न कश्चिद्दोषः ।

,, । ८ **भावार्थशब्देभ्य एवेति ।** भावार्थशब्दा यजत्यादिधातवः तेभ्यो यद्यपि विषयमात्रस्याधिगतिः तथापि विषयाधीनप्रतिपत्तिकत्वादपूर्वस्य कार्यस्य विषयवाचकेभ्य एव तस्याप्यधिगतिरुक्ता । एवमेवोक्तमृजुविमलायां विध्यर्थो लिङादिभिः प्रत्याय्यते तस्य च तत्प्रतिपाद्यमानस्य विषयाधी-

---

* जै॰ सू॰ अ॰ २ पा॰ १ सू॰ १ ।　　† जै॰ सू॰ अ॰ २ पा॰ १ सू॰ १–४ ।

‡ पूर्वपक्षहेत्विति १ पु॰ पा॰ ।　　§ जै॰ सू॰ अ॰ २ पा॰ १ सू॰ १ ।

नप्रतिपत्तित्वाद् भावार्थानां च विषयबोधकत्वात् ततो ऽपूर्वं* प्रतीयतइत्यु-
च्यते न पुनरपूर्वस्यामी भावार्था वाचका इतीति । **भावो भावनेत्यादिभ्य** ८५ । ९
इति । भवतेर्णिजन्तादेरजिति सूत्रेण भाववाचिन्यच्प्रत्यये णेरनिटीति सूत्रेण
णिलोपे च कृते निष्पन्नो भावशब्दो भावनाशब्दपर्यायः । ननु गुरुमते भावा-
र्थशब्दस्य पूर्वापरीभाववैशिष्ट्यमर्थः । उक्तं हि निबन्धनटीकायां पूर्वापरभावे
हि भावार्थत्वं भवति भावशब्दस्य पूर्वापरीभाववाचित्वादिति । सत्यम् ।
णयन्ताद्भवतेरजन्तस्य भावशब्दस्य भावनावाचित्वमप्युपपद्यते । न च भाव-
नाया धात्वर्थत्वासंभवः । कृतिसाध्यत्वेन नियोगवाचिनां लिङादीनामिव
तत्संघटनार्थं तथात्वेन यागादिविषयसमर्पकाणां धातूनां विशेषणभूतकृ-
तिरूपभावनार्थत्वस्यापि सत्त्वात् ।

कर्मशब्दा इत्युक्तमिति । कर्मशब्दः क्रियतइत्यर्थे कृञ्धातोरौ- ,, । १०
णादिके मनिन्प्रत्यये सति निष्पन्नः कृतिविषयवाची न च कृतिः कृतिविषय
इति तद्व्यावृत्तिः । **याग इत्येवमादिभ्य इति** । यागादिशब्दा भवन्ति
वस्तुतः कृतिविषयाणां वाचका इति कर्मशब्दाः (न तु भावार्थाः)† तेभ्यो या-
गादीनां कृतिसाध्यत्वेन प्रतीत्यभावादिति तद्व्यावृत्तिः । **तेभ्यो ऽपूर्वं प्र-
तीयतइति** । अनेन सूत्रे क्रियाशब्दः क्रियते ऽनेनेति व्युत्पत्त्या फलकरण-
त्वेन रूपेणाऽपूर्वपर इति दर्शितम् । **एष हीति** । नन्वेष ह्यर्थो विधीयत-
इति सूत्रशेषस्येत्थं गुरुमते व्याख्यानं कथम् । अपूर्वस्य कृतिसाध्यतया प्राधा-
न्येन प्रतिपाद्यस्य फलकरणतया तच्छेषत्वमित्याशङ्कानिराकरणार्थमेव ही-
त्यादिसूत्रशेषः । यजेत स्वर्गकाम इत्यादिभिर्वाक्यैः यागेन स्वर्गकामः स्व-
कामनाविषयं स्वर्गं साधयेदित्येषो ऽर्थो यस्माद्विधीयते तस्मात् तेनापूर्वं
कृत्वेत्यपूर्वस्यापि फलकरणत्वेन सिद्धिर्भवति । स्वसिद्ध्यर्थं फलं साधयतश्चा-
पूर्वस्य न प्राधान्यभङ्गः ।

आत्मसिद्ध्यनुकूलस्य नियोज्यस्य प्रसिद्धये ।
कुर्वत्स्वर्गादिकमपि प्रधानं कार्यमेव नः ॥

इति न्यायादिति । सत्यम् । इहापि स एवार्थ उपन्यस्तः । **अपूर्व-** ,, । १३
लक्षणो ऽर्थो विधीयतइत्यत्र करणत्वेनेति शेषाध्याहारेण सो ऽर्थः

---

* तत्पूर्वमिति १ पु॰ । † ( ) एतदन्तर्गतो ग्रन्थो नास्ति ५ पु॰ ।

स्पष्टीभवति । पशुसोमाधिकरणसूत्रस्य द्रव्यसंयोगाच्चोदना पशुसोमयो*रित्या-
८५ । २१ देर्महत्त्वादुदाहृतसोमवाक्यमात्रविषयत्वाभावाच्च तन्न लिखितम् । **द्रव्यदेव-ताख्येति** । ऐन्द्रवायवादिवाक्येषु गृह्णातिः सोममभिषुणोति सोमं पावयतीत्यादिसंनिहितवाक्यान्तरप्रकृतसोमरसविषयत्वाद् द्रव्यप्रतीतिः । **इतरत्रेति** । सोमवाक्ये देवताख्यरूपाऽप्रतीतेरित्यर्थः । **समुदायानुवाद इति** । यजियोगसमुदायस्य सोमशब्दस्तद्द्रव्यसोमरससमुदायस्य चानुवाद इत्यर्थः । अनुवादस्य च प्रयोजनं सोमशब्दस्य तत्प्रख्यन्यायेन† कर्मनामधेयत्वप्राप्त्या स एष यज्ञः पञ्चविधो ऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोम इत्यादौ सोमशब्देनापि क्रतुव्यवहारसिद्धिरिति नानुवादवैयर्थ्यम् । **प्रत्यक्षे यागे इति** । ऐन्द्रवायवादिवाक्यैर्देवताविशिष्टेषु ग्रहणेषु चोदितेषु यागं विना ग्रहणमात्रेण द्रव्यस्य देवतासंबन्धाऽसिद्धेर्यागापेक्षायां सोमेन यजेतेत्येतत्सर्वानेतान् द्रव्यदेवतासंबन्धानुपपादयद् यागान्तरानुमानं निरुन्ध्यादित्यर्थः । एवं चोत्पत्तिवाक्यविहितस्य लताद्रव्यस्याभिषवादिवाक्यपर्यालोचनेन रसद्वारा साधनत्वमित्यवगतेस्तस्य रसस्यैन्द्रवाय्वाद्युद्देश्यकग्रहणसंस्कारविधिसामर्थ्यादुत्पत्तिवाक्यविधेये यागे देवता लभ्यते । तत्तद्देवतोद्देशेन गृहीतस्य रसस्य तत्तद्देवतायै त्यागाभावे ग्रहणे देवतोद्देशांशस्याऽदृष्टार्थत्वापत्तेः । अतो न तत्र देवताख्यरूपाऽलाभदोषः । **अरूपत्वादिति** । रूपशब्दो न द्रव्यदेवतामात्रपरः किं तु सान्तत्यादिसाधारण्यार्थं गुणसामान्यपरः ।

८६ । ९ **न ह्यत्रेति** । दध्ना जुहोति पयसा जुहोति तण्डुलैर्जुहोतीत्यादिवाक्यविहितानां होमानां सन्ततमाघारयति ऊर्ध्वमाघारयति ऋजुमाघारयतीत्यादिवाक्यविहितानामाघाराणां च यानि रूपाणि दध्यादीनि सांतत्यादीनि च तेभ्यो ऽन्यदुपदिष्टमतिदिष्टं वा रूपं नास्ति तेषां च कर्मान्तरगुणानां नान्यत्रान्वयः संभवतीत्यर्थः । ननु सान्तत्यादिवाक्यानि होमाघारविधायकानीति सिद्धान्ती न मन्यते किं त्वग्निहोत्राघारवाक्यविहितहोमाघारानुवादेन गुणविधायकानीत्येव मन्यते तं प्रति कथं तद्विहितहोमाघारेभ्य इति सिद्धवत्कृत्य कथनम् । उच्यते । अग्निहोत्राघारवाक्याभ्यां होमाघारयोर्विधानमेव न संभवति । होमत्वारणसामान्ययोर्होमान्तरत्वारणान्तरविधिसि-

* जै० सू० अ० २ पा० २ सू० १७ । † जै० सू० अ० १ पा० ४ सू० ४ ।

द्धत्वेन विशेषोपस्थितिं विना अननुष्ठेयत्वेन च विधानायोगात् । तद्विशेषयोश्च विशेषकरूपाऽश्रवणेनाऽप्रतीतेः । न च नामनी विशेषके स्यातामिति वाच्यम् । विशेषकान्तराऽनुपस्थितौ कयोर्होमघारणविशेषयोरेते नामनी इति बोद्धुमशक्यत्वात् । न चोद्भिदा यजेत पशुकाम इत्यत्र नामैव विशेषकं दृष्टमिति शङ्कनीयम् । पशुफलेन प्रकृतिवच्छब्दसन्निधापितसोमिकाङ्गजातेन च लब्धविशेषे एवोद्भिन्नामप्रवृत्तेः । न च दधिसान्तत्यादिगुणैरेव विशेषलाभः । तथा सति गुणविधिप्रवृत्त्यनन्तरं होमाघारविशेषविधौ* तयोर्विधाने सति तदनुवादेन गुणविधानमिति परस्पराश्रयापत्तेः । तस्माद् विशेषकसद्भावाद् दधिसांतत्यादिसगुणवाक्येष्वेव होमविशेषाणामाघारविशेषाणां च विधानम् । निर्गुणवाक्ये तदनुवादके ऽनुवादप्रयोजनमग्निहोत्राघारनाम्नोः संनिहितसर्वहोमाघारनामत्वसिद्ध्या ऽग्निहोत्रं जुहुयात् स्वर्गकाम इति फलवाक्येन सर्वेषां होमानां फलसंबन्धसिद्धिः । इन्द्र ऊर्ध्वो ऽध्वरइत्याघारमाघारयतीति गुणवाक्येन सर्वेषामाघाराणां मन्त्रसंबन्धसिद्धिश्चेति पूर्वपक्षाशयः ।

अनुष्ठेयार्थप्रतीतेरिति । विशेषकाऽश्रवणे ऽप्यनुष्ठापकविधिसा ८६ । १२
मर्थ्यादेवानुष्ठेयः कश्चन होमविशेष आघारणविशेषश्चात्र विवक्षित इति ज्ञायते । अतस्तयोर्विधानं नामविशेषोपबन्धश्चेत्युभयमुपपद्यते । समुदायानुवादश्च निष्फलः । राजसूयनाम्न इव फलवाक्यगतस्यैवाग्निहोत्रनाम्नो गुणवाक्यगतस्यैव चाघारनाम्नः संनिहितसर्वधात्वर्थपरत्वोपपत्तेरिति भावः । **गुणविधानार्थत्वादिति** । गुणविशिष्टकर्मविधाने च दध्यादिवाक्यविहितहोमानां न देवतालाभः । यदग्नये च प्रजापतये च सायं जुहोति यत् सूर्याय प्रजापतये च प्रातर्जुहोतीति वाक्यविहितहोमयोर्न द्रव्यलाभः । तयोरपि दध्यादिवाक्याऽविशेषेण पूर्वपक्षे होमान्तरविधायकत्वस्य वक्तव्यत्वादित्याद्यपि दूषणं द्रष्टव्यम् ।

पदान्तरे गुणवाचिनि न तु नामधेयरूपे ऽपि । अत्र ८७ । १
विधिशक्तेर्गुणासंक्रमणेन धातोरनुवादतोक्तिस्तात्पर्यपर्यवसानविषयार्थाभिप्राया न तु शब्दवृत्तिबोध्याभिप्राया । द्रव्यगुणयोः स्वतः सिद्धतया धात्व-

---

* विशेषविधिरिति ५ पु॰ पा॰ ।

र्थानुवादेन तन्मात्रविधानासंभवात् । उक्तं हि आघाराग्निहोत्राधिकरणा*वार्त्तिके सर्वत्रैव विशिष्टविधानोत्तरकालं किं प्राप्तं किमप्राप्तमित्यन्वेषणायामप्राप्तमात्रविषयोपसंहाराद्विधेर्भावनाधात्वर्थयोरनुवाद इत्यभिधीयते न त्वादित एव तावनूद्य द्रव्यं गुणो वा विधीयते तत्र पश्चात्तने व्यापारे मन्दबुद्धिप्रतिपत्त्यर्थं स्थूलेन न्यायेन कथ्यमाने शास्त्रकृता एवैता वचनव्यक्तय इति भ्रान्तिरिति । इहापि टीकायां तथैवोक्तम् । न चैवं गुणमात्रविधानफलकवाक्येष्वपि विशिष्टविध्यभ्युपगमे प्राप्ते कर्मण्यनेकगुणविधानप्रयुक्तो वाक्यभेदो न स्यात् प्रत्येकं गुणेषु† विध्यनवतारादिति वाच्यम् । शब्दबोध्यस्यार्थस्य विशिष्टरूपेणैक्ये ऽपि तत्र तात्पर्यविषयार्थभेदसद्भावेन तदभिप्रायत्वादनेकगुणविधान‡प्रयुक्तवाक्यभेद§वर्णनस्य । तदप्युक्तं वार्त्तिके ।

विधित्वे भावनास्थेऽपि तादर्थ्यं प्रविभज्यते ।
विशेषणफले चास्मिन् वाक्यभेदो भविष्यति ॥ इति ।

शब्दबोध्यार्थभेदइव तात्पर्यविषयार्थभेदेपि ह्यविशिष्टं गौरवम् । **मीमांसकैकदेशिनः** गुरुमते निबन्धनप्रस्थानानुवर्त्तिनः ।

८१ । १४ **नन्वव्यापारोपीति** । होमसाधनस्य दध्यादेर्होमद्वारा ऽपि साध्यत्वासंभवान्मा भूद्विषयत्वं द्रव्यदेवतासंबन्धस्य तु स्यात् तस्य यागद्वारा साध्यत्वात् । किंचिद्द्वारा साध्यमपि हि साध्यमेव । अत एव हस्तादिव्यापारद्वारा घटस्य कृतिसाध्यत्वाद् घटं करोतीति द्वितीयानिर्देश इति भावः । **उद्देश्यतयेति** । घटोत्पत्तिमुद्दिश्य हस्तादिव्यापारं कुर्वन् घटं करोतीत्युच्यते घटस्याप्युद्देश्यतया कृतिविषयत्वादित्यर्थः । **लक्ष्यनिर्देश इति** । आक्षेप्यस्यापि शाब्दत्वसिद्ध्यर्थं लक्ष्यतोक्तिः । **ध्रौवाज्यस्य** सर्वस्मै वा एतद्यज्ञाय गृह्यते यद् ध्रुवायामाज्यमित्युत्सर्गतः सर्वयज्ञार्थत्वेन विहितस्य । **वृत्रघ्नपदवत्याविति** । वृत्रहननप्रकाशकपदवत्यावित्यर्थः । अग्निर्वृत्राणि जङ्घनत् त्वं राजोत वृत्रहेत्यग्नेः सोमस्य च मन्त्रयोर्वृत्रघ्नपदाभावात् । **वृधन्वत्पदवत्याविति** ।

---

* जै. सू. अ. २ पा. २ सू. १३—१६ ।
† प्रत्येकगुणेष्विति २ पु. पा. ।
‡ अनेकगुणेषु विधानेति २ पु. पा. ।
§ वाक्याभेदेति १ पु. पा. ।

वृद्धिप्रकाशकपदवत्याविित्यर्थः । कविर्विप्रेण वावृधे वर्द्धयामो वचोविदः इति मन्त्रयोर्वृधन्वत्पदाभावात् । **प्राक्रियतइति** । सूत्रे प्रकरणशब्दः कर्मणि व्युत्पन्नः तत्रैकवचनमविवक्षितं पौर्णमासीशब्दे। विद्वद्वाक्यद्वयोपलक्षणम् आलम्बनशब्दस्याध्याहार इति दर्शितम् ।

अविरोधादिति । पौर्णमास्यमावास्याशब्दयोः कालवाचित्वमादाय ८८ । १३
क्रमाविरोधे शक्योपपादने न तद्विरोधिकर्मविशेषपरत्वमङ्गीकार्यम् । तदङ्गीकारेऽच* विद्वद्वाक्यविधेयत्वेनाभ्युपगतयोः पौर्णमास्यमावास्यासंज्ञकयोः कर्मणोः पृथक्पृथगग्निप्रकाशकसोमप्रकाशकमन्त्रद्वयमनूच्येतेत्यनुवाक्यत्वेन विहितं स्यादिति मन्त्रविकल्पस्तत्प्रकाश्यदेवताविकल्पश्च भवेत् । आज्यभागयोः पुरोनुवाक्यान्तरकल्पनागौरवं च भवेदिति भावः । **बलवदपी**त्यपिशब्देनाभ्युपगमवादं सूचयता क्रम एव लिङ्गसाहित्येनाच वाक्याद् बलीयान् । अग्नेः सोमस्य च प्रागेवाज्यभागयोर्देवतात्वेन क्लृप्ततया तदुभयप्रकाशिकानां वार्त्रघ्नीवृधन्वतीनां तयोर्विनियोजकस्य लिङ्गस्यापि सद्भावादित्यपि व्यञ्जितम् ।

काले हीति । विद्वद्वाक्यविधेयपौर्णमास्यमावास्यासंज्ञककर्मद्वया- „ । १५
भ्युपगमे तयोः संज्ञयोः कालयोगेन निमित्तेन लक्षणैव वाच्या न त्वपूर्वा रूढिः कल्पनीया पौर्णमास्यां पौर्णमास्या यजेताऽमावास्यायाममावास्यया यजेतेति वाक्ययोरपि तत्रैव कर्मद्वये कालविधायकत्वप्राप्तेः । एवं च वार्त्रघ्नीवृधन्वतीवाक्यद्वयश्रुतयोः पौर्णमास[illegible] लक्षणा नाश्रयणीयेति भावः । यदुच्यते
श्रवणात् प्रधानद्वारा कालयोगाश्रवणे विकृतिषु यदीष्ट्या यदि पशुना यदि सोमेन यजेतामावास्यायां पौर्णमास्यां वा यजेतेति कालविकल्पविधानात् पौर्णमासीकालोपांशुयाजाग्नीषोमीयविकारो यदा ऽमावास्यायां क्रियते अमावास्याकालसांनाय्यैन्द्राग्नविकारो† वा पौर्णमास्यां तदा पौर्णमासीकालप्रधानाङ्गयोराज्यभागयोर्वृधन्वतीप्राप्तेरमावास्याकालप्रधानाङ्गयोर्वार्त्रघ्नीप्राप्तेः प्रकृतिवद्भावबाधः स्यात् । अतस्तदबाधाय पौर्णमास्याख्यकर्माङ्गयोर्वार्त्रघ्न्यौ अमावास्याख्यकर्माङ्गयोर्वृधन्वत्याविति वार्त्रघ्न्यादिवाक्यद्वयस्य आज्य-

---

* अङ्गीकारे चेति २ पु॰ पा॰ ।

† ऐन्द्राग्नविकल्पविकार इति २ पु॰ पा॰ ।

भागविषयत्वे ऽपि कर्मलक्षणा ऽऽश्रयणीयेति तथापि क्रमाविरोधादिपूर्वोक्तन्यायैराज्यभागविषयतयैवावतिष्ठतइति द्रष्टव्यम् ।

८८ । १६ **द्वित्वोपपादनमिति ।** दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति फलवाक्यगताऽऽग्नेयादित्रिकद्वयरूपसमुदायद्वयोपपादनं विद्वद्वाक्यद्वयेन समुदायद्वयकरणस्य प्रयोजनं तदुपपादनाभावे आग्नेयादीनां षण्णामिव प्रयाजादीनामपि फलसंबन्धेनाङ्गप्रधानव्यवस्था न सिध्येत् । तथा हि । अप्रसिद्धार्थं नामाख्यातपरतन्त्रमाख्यातं स्वरसतो यावद् गृह्णाति तावति वर्त्तते । यथा बहूनामिष्टिपशुसोमयागानां सन्निधौ पठिते राजा स्वाराज्यकामो राजसूयेन यजेतेति वाक्ये श्रुतमाख्यातं विशेषकाभावात् सन्निधिपठितसर्वयागग्राहीति तत्समभिव्याहृतमप्रसिद्धार्थं राजसूयनामापि तावद्यागवृत्ति । अत एवेष्टिपशुसोमात्मकाः सर्वे यागा राजसूये समप्रधानभूताः । प्रसिद्धार्थं तु नाम नाख्यातपरतन्त्रं* किं त्वाख्यातमेव तत्परतन्त्रमित्याख्यातमपि स्वगृहीतार्थमात्रे व्यवस्थापयति । यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्ये श्रुतं नाम त्रिवृत् पञ्चदशः सप्तदश एकविंशः एतानि वाव तानि ज्योतींषि य एतस्य स्तोमा इत्यर्थवादोपदर्शितज्योतिर्नामकत्रिवृदादिस्तोमचतुष्टयसंबन्धनिमित्तकं ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्यादिति वाक्येन तत्संबन्धितया प्रसिद्धे सोमयागे वर्त्तते इत्याख्यातमपि तन्मात्रे वर्त्तयति । अत एव सोमयाग एव प्रधानभूतः तत्सन्निधिपठिता इष्टिपशवस्तदङ्गानि । एवं स्थिते यद्याग्नेयादिषु† षट्सु समुदायद्वयं प्रागेव प्रसिद्धं न स्यात् तदा फलवाक्यगतं दर्शपूर्णमासाभ्यामिति पदमप्रसिद्धार्थमाख्यातपरतन्त्रं सत् संनिहितसर्वयागानुवचन‡स्वरसप्रवृत्ताख्यातानुसारेण राजसूयनामवत् संनिहितसर्वयागनाम स्याद् द्विवचनं छान्दसेन वचनव्यत्ययेनोपपद्येत द्विवचनान्तप्रतिरूपकमव्ययमिति वा कल्प्येत । न हि कालयोगिषु प्राक्सिद्धसमुदायद्वयाभावे दर्शपूर्णमासनाम द्विवचनान्तं प्रसिद्धार्थं भवेत् । येषामाग्नेयादीनामुत्पत्तिवाक्यावगतः कालयोगो ऽस्ति तेषां द्वित्वप्रसिद्ध्यभावात् । ययोराज्यभागयोर्द्वित्वप्रसिद्धिरस्ति तयोः कालयोगावगत्य-

---

* अनाख्यातपरतन्त्रमिति २ पु॰ पा॰ । † यद्याग्नेयादिष्विति २ पु॰ पा॰ ।

‡ अनुवदनेति २ पु॰ पा ।

भावात् । तस्मादवगतकालयोगेष्वाग्नेयादिषु द्वित्वप्रसिद्ध्यर्थं समुदायद्वयकरणं सप्रयोजनम् । तथा सति ह्याग्नेयादीनामेव प्रसिद्धार्थेन नाम्नोपात्तानां फलसंबन्धेन प्राधान्यं प्रयाजादीनां तदङ्गतेति व्यवस्था सिध्यति । ननु फलवाक्यस्थस्य द्विवचनान्तनाम्नः षट्स्विव विद्वद्वाक्यस्थयोरेकवचनान्तनाम्नोः त्रिषु त्रिष्वनन्विताथेत्वेन अप्रसिद्धार्थतया यजतिपारतन्त्र्याऽविशेषादनयोरपि संनिहितसर्वयागानुवदनस्वरसयजत्यनुरोधेन तावन्नामत्वप्रसक्तिरपरिहार्या यद्युच्येत तथा सति पौर्णमासीत्यमावास्येति च विद्वद्वाक्ययोर्नामपृथक्त्वं नोपपद्यते । अतस्तदेव परस्परव्यावृत्तनामिव्यवस्थां गमयतीति तद्व्यवस्थासिद्धये तत्तत्कालयोगिष्वेव यागेषु तयोः प्रवृत्तिः कल्पनीयेति । एवं तर्ह्ययं युक्तिर्विद्वद्वाक्यद्वयेन समुदायद्वयसंपादनमनपेक्ष्य दर्शपूर्णमासाभ्यामिति शब्दएव योजयितुं शक्यते । तत्रैव चेयं युक्तिर्दर्शपूर्णमासयोरिज्याप्राधान्यमविशेषा*दिति चतुर्थोपान्त्याधिकरणे पृथक्त्वेन त्वभिधानयोर्निवेश †इति सिद्धान्तसूत्रावयवेन केषु चिदित्यध्याहारवता दर्शिता । तस्य ह्ययमर्थः । दर्शपूर्णमासाभ्यामिति द्विवचनश्रुत्या दर्शाभिधानस्य पूर्णमासशब्दवाच्यात् पूर्णमासशब्दस्य च दर्शाभिधानवाच्यात् पृथक्त्वेन निवेशः प्रतीयते ऽतः प्रकृतयागमात्रवाचित्वे पृथक्त्वायोगात् केषु चिदेव यागेषु निवेशो युक्त इति । एवं तर्हि समुदायद्वयप्रसिद्ध्यर्थं विद्वद्वाक्यानुसरणे ऽप्युक्तयुक्त्यन्वेषणे यथासूत्रं फलवाक्यएवेयमन्विष्यताम् । अथोच्येत द्विवचनश्रवणं छान्दसत्वादिना नेतुं शक्यमिति विद्वद्वाक्ययोर्नामद्वयश्रवणमपि सर्वेषां सन्निहितयागानां नामद्वयाभ्युपगमेन नेतुं शक्यमिति तुल्यमिति चेत् । उच्यते । तैत्तिरीयशाखायां य एवं विद्वान् पौर्णमासीं यजते यावदुक्थ्येनोपाप्नोति तावदुपाप्नोति य एवं विद्वानमावास्यां यजते यावदतिरात्रेणोपाप्नोति तावदुपाप्नोतीति विद्वद्वाक्याम्नातयोः पौर्णमास्यमावास्ययोर्व्यवस्थितफलार्थवादः श्रूयते स तन्नाम्नोर्नामिभेदाभावे नोपपद्यतइति स्पष्टं नामिभेदः प्रतीयते अतो विद्वद्वाक्याभ्यां समुदायद्वयसिद्धिराश्रिता । एवं च फलवाक्ये एव समुदायद्वयसंपादनं ततः समुदायान्त‡र्गतानां समुदायिनां

---

* जै॰ अ॰ ४ पा॰ ४ सू॰ २६ । दर्शपूर्णमासयोरिज्याः प्रधानान्यविशेषादिति सूत्राकारः आ॰ सु॰ जै॰ पु॰ ।

† जै॰ सू॰ अ॰ ४ पा॰ ४ सू॰ ३४ । ‡ तत्समुदायान्तरिति २ पु॰ पा॰ ।

फलसंबन्धबोधनं चेति प्रतिपत्तिगौरवमपि परिहृतं भवति । तस्मादुक्तं विद्वद्वाक्ययो: प्रयोजनकथनम् ।

८८ । १८ **अविसंवादार्थमिति** । उत्पत्तिवाक्येन यस्येष्टसामान्ये करणत्वं बोधितं तस्यैवाधिकारवाक्येनाकाङ्क्षितेष्टविशेषकरणत्वबोधनायां संवादो भवति । उत्पत्तिवाक्येन यत्र फले द्रव्यदेवतासंबन्धस्य करणत्वं बोधितं तत्रैव फले परित्यज्य तदाश्रियस्य यागस्य करणबोधने तु तयोर्विसंवाद: स्यादित्यर्थ: । **नामधात्वर्थेति** । नामयोगे पर्युदासतायां तदन्यतद्विरोध्यन्यतरत्वरूपाया-मब्राह्मणोऽधर्मादुदाहरणम् । धात्वर्थयोगे तु नेक्षेतेति प्रदर्शयिष्यमाणमुदाहरणम् । **तत्राप्रतीतो ऽपीति** । प्रधानभूताख्यातान्वयिना नञा प्रतीतो ऽप्याख्यातार्थस्य कर्तव्यत्वस्याभावो ऽननुष्ठेयत्वात् त्यज्यतइत्यर्थ: । **लक्षणीय इति** । नञीक्षतिधातुभ्यामिति शेष: । **सर्वक्रियेति** । सर्वा हि पुरुषस्य क्रिया संकल्पपूर्विकेति तस्य तत्प्रत्यासत्ति: । ननु धातुर्लक्षकश्चेद् धात्वर्थसंकल्प एव किमिति न लक्ष्यतइत्याशङ्क्य नञा योगादित्याह **ईक्षइतीति*** ।

८९ । ६ **संकोचकमिति** । हन्यादिति प्रकृतिविशिष्टप्रत्ययान्वयस्वरसस्य नञ: प्रधानं प्रत्ययं परित्यज्य प्रकृतिमात्रान्वयरूपं संकोचापादकं नास्तीत्यर्थ: । **शाखाचङ्क्रमा†निरासार्थमिति** । विधारकप्रयत्नविधिपक्षे स्थिरशङ्कायोग्ये लक्षणाप्रसङ्गेन दूषिते तदपहाय तर्हि न हन्यादित्यत्र श्रुतधातुनञर्थमध्यएव किं चिद्विधेयमस्त्वित्युत्तानधी: शङ्केत तन् मा भूदित्येतदर्थं तदपि पक्षद्वयं विकल्पमुखेनोद्भाव्य दूषितमित्यर्थ: । ननु नञर्थविधिपक्षो विधारकप्रयत्नविधिपक्षादपि स्थिरशङ्कायोग्य: । तथा हि । न हन्यादित्यत्र नञ: संनिधानाद् धात्वर्थेन हननेनान्वय इति तस्य हननाभावोर्थ: स च प्रागभावरूपो ऽनादिरपि हननचिकीर्षोद्यपनयद्वारा परिपाल्यत्वेन साध्य: अत: स एव नियोगविषयो ऽस्त्विति स्थिरैव शङ्का । न चैषा हननाभावस्य स्वत:सिद्धत्वहेतुना निराकर्तुमपि शक्या‡ । स्वत:सिद्धस्यापि तस्य परिपाल्यत्वेन साध्यताया भाष्यटीकयोरनुपदमेव वर्णयिष्यमाणत्वात् ।

---

* ईक्षतीति २ पु· पा· । † शाखासंक्रमेति २ पु· पा· । ‡ शक्तेति २ पु· पा· ।

किं च गुरुमते न हन्यादित्यादिनिषेधवाक्येषु हननाद्यभावो नियोगविषय इत्येव सिद्धान्तः । तन्मते हि प्रतिषेधेष्वकर्मत्वा*दिति षष्ठाध्यायगताधिकरणे न कलञ्जं भक्षयेदित्यादिषु चतुर्थगतप्रजापतिव्रताधिकरण†न्यायेन अभक्षणसंकल्पो विधिविषय इति पूर्वपक्षे प्राप्ते अतभक्षणाद्यभावात्मकस्यौदासीन्यस्यैव स्वतःसिद्धस्यापि प्रसक्तचिकीर्षाद्यपनय‡द्वारा साध्यत्वेन नियोगविषयत्वसंभवाद् न लक्षणया भक्षणादिसंकल्पस्य तथात्वमङ्गीकर्तुं युक्तमिति सिद्धान्तः । इत्थंभूतः पक्षः कथं शङ्कायोग्यत्वेनापि नेक्षितः । उच्यते । हन्याद्भक्षयेदित्यादिपदं परिपूर्णं हि नञा संबध्यते न पदैकदेशभूतं धातुमात्रम् । अतो धात्वर्थविशिष्टस्य प्रत्ययार्थस्याभावो लभ्यते नोपसर्जनस्य धात्वर्थस्याभावः । एवं च नञर्थस्य प्रधानसंबन्धो ऽपि भवति । गुणसंबन्धो हि गुणानां च परार्थत्वादसंबन्धः समत्वात् स्या§दिति न्यायविरुद्धः । एवं च प्रत्ययार्थस्याभावएव वाक्यार्थे स्थिते कोत्र विधिरस्तीति तं प्रत्यप्रतीतो हननाद्यभावो विषय इत्युपपाद्यते । यद्युच्येत व्युत्पत्त्या न्यायेन च प्राप्तो ऽपि नञ आख्यातान्वयो न संभवति रागप्राप्तहननादिविषयस्य नियोगस्याऽप्रसक्त्या तदभावबोधनाऽसंभवात् । अतस्तस्य विशेष्यमतिलङ्घ्य तद्विशेषणधात्वर्थान्वय इष्यतइति । एवमपि हननाद्यभावो विषयो न लभ्यते । नामार्थान्वयिन इव धात्वर्थान्वयिनो ऽपि नञः पर्युदासार्थत्वनियमेन प्रतिषेधार्थत्वासंभवात् । यथाहुः ।

नामधात्वर्थयोगे तु नैव नञ् प्रतिषेधकः ।
वदत्यब्राह्मणाऽधर्मावन्यमात्रविरोधिनौ ॥ इति ।

एवं च धात्वर्थान्वयेन नञः पर्युदासार्थकत्वे सति हननादिविरोधी विधारकप्रयत्नो विषयो भवेदिति तृतीयपक्षएवान्तर्भवेत् । यथा कथं चिद् नञो हननाद्यभावार्थत्वसमर्थने ऽपि तस्य साक्षात्कृतिसाध्यत्वाभावात् तदवस्थितिमुद्दिश्य कर्तव्यस्तदाक्षेप्यो विधारकप्रयत्न एव यदाग्नेयवाक्ये श्रुतद्रव्यदेवतासंबन्धाक्षेप्यो याग इव विधेयः स्यादिति तृतीयपक्षान्तर्भावदोषो

---

* जै॰ सू॰ अ॰ ६ पा॰ २ सू॰ १९ । प्रतिषेधे त्वकर्मेति पाठान्तरम् ।

† जै॰ सू॰ अ॰ ४ पा॰ १ सू॰ ३–६ । ‡ चिकीर्षापनयेति २ पु॰ पा॰ ।

§ जै॰ सू॰ अ॰ ३ पा॰ १ सू॰ २२ ।

नातिवर्त्तते । एवं हननाद्यभावस्य विधेयत्वाऽसंभव आचार्य्यैर्नामधात्वर्थयोगे हि नञः पर्युदासतेत्युक्त्या यदाग्नेयवाक्ये श्रुतद्रव्यदेवतासंबन्धाऽऽक्षेप्यस्य यागस्यैव विधिरिति समर्थनेन च सिद्धः । अतो नञर्थविधिविकल्पोऽच आख्यातार्थाभावविषयः पर्यवस्यतीति तस्यापुरुषतन्त्रस्य स्वतःसिद्धतया प्राप्तत्वादिति टीकायां दोष उक्तः । तच्च औदासीन्यरूपस्येत्येतदभावरूपत्वाभिप्रायम् । यद्वा यथा पुरुषस्यानीप्सितेष्वौदासीन्यं स्वतःसिद्धमेवमत्रापि नञर्थ इत्यौदासीन्य*सादृश्याभिप्रायमिति सर्वमनवद्यम् ।

८९ । २५ **ननु नञर्थश्चेदित्यादिना** अभावश्चेत्यादिटीकावतारिकाग्रन्थेन स्वमते हननाभावमर्थमङ्गीकृत्य तथात्वे न हन्यादित्यस्य हननं नास्तीत्यतो विशेषो न स्यादिति शङ्कातदवतारितव्याख्याग्रन्थेन† न हन्यादित्यत्र प्रतियोगिनो लिङा कर्त्तव्यतया प्रतीतेस्तदभावे ऽपि प्रतियोगिच्छायानुपातिनि कर्त्तव्यताभ्रमाविशेष इति परिहाराभिप्रायकथनं च न युक्तम् । न हि स्वमते न हन्यादित्यत्र हननाभावो वाक्यार्थः किं तु हननकर्त्तव्यत्वाभावः । स च हननस्य बलवदनिष्टानुबन्धित्वपर्य्यवसायी तथा ऽनुपदमेव टीकाकारैराचार्य्यैश्च वक्ष्यमाणत्वात् । किं तु‡ टीकाग्रन्थ इत्थमवतारयितुं युक्तः । ननु हननाभावो न विधेयश्चेत् कथं न हन्यादित्यत्र हननाभावः कर्त्तव्यतयोच्यतइति प्रतिभातीति । परिहाराभिप्रायश्चेत्थं वर्णनीयः । न हन्यादित्यव्यवधानाद् नञो धात्वर्थान्वयेन हननाभावो ऽर्थ इति कश्चन भ्रमः ततः प्रतियोगिच्छायानुपातिनि तस्मिन् कर्त्तव्यतयोच्यतइति कश्चन भ्रमः एवं भ्रमद्वयावलम्बन एव केषां चिद् हननाभावस्य विधेयत्वेन व्यवहार इति । सत्यम् । टीकाग्रन्थस्यैवमर्थः स्पष्ट इति प्रौढ्या ऽर्थान्तरमपि दर्शितम् ।

९० । १ **कर्त्तव्यत्वाभावबोधस्येति ।** कर्त्तव्यत्वविशिष्टेष्टसाधनत्वाभावबोधस्येत्यर्थः । इष्टसाधनत्वाभाव एव हि नञर्थ इति वक्ष्यते । **इष्टसाधनत्वप्रयुक्तकर्त्तव्यताया इति ।** इष्टसाधनत्वावगतिकार्यप्रवृत्तेरित्यर्थः । **शब्दादीनामिति ।** विधिनिषेधात्मकः शब्द एव पुरुषस्य प्रवृत्तिं निवृत्तिं

---

* नञर्थरूपौदासीन्येति २ पु॰ पा॰ । † तदनन्तरग्रन्थेनेति । ५ पु॰ पा॰ ।
‡ किं तु इति २ पु॰ नास्ति ।

च भावयन् शब्दभावनेत्युच्यतइति लिङादियुक्तेषु वाक्येषु द्वे भावने अवगम्येते शब्दात्मिका चार्थात्मिका चेति यथाश्रुतवार्त्तिकग्रन्थानुसारी कश्चित्पक्षः । स मीमांसकैरेव

तत्र शब्दः स्वरूपेण वायुवद्वेत्प्रवर्त्तकः ।
प्रमाणत्वं विहन्येत नियमाच्च प्रवर्त्तयेत्* ॥

इत्यादिन्यायैर्निराकृतः । लिङादिभिर्नञ्समभिव्याहृतलिङादिभिश्च बोधितः प्रवर्त्तनानिवर्त्तनात्मकशब्दस्य व्यापारः शब्दभावना । लोके हि प्रैषाऽध्येषणादिः प्रवर्त्तकस्य पुरुषस्य व्यापारो गामानयेत्यादिवाक्येषु प्रवृत्तिनिवृत्तिहेतुत्वेनावगतः ।

अपौरुषेये वेदे वक्तृपुरुषव्यापाराऽसंभवात् शब्दस्यैव स व्यापार इत्यन्यः पक्षः ।

वेदस्येश्वरकर्तृकत्वात् तदभिप्राय एवाऽऽज्ञारूपः प्रवर्त्तको निवर्त्तकश्च लिङादीनां नञ्युक्तलिङादीनां चार्थ इत्युदयनादितार्किकपक्षः ।

त्रैकाल्यानवच्छिन्नरूपेण लिङादिनञ्युक्तलिङाद्यसाधारणार्थभूता ऽर्थभावनैव प्रवर्त्तिका निवर्त्तिका चेति शब्दभावनामनङ्गीकुर्वतां मीमांसकैकदेशिनां पक्षः ।

विधिनिषेधलिङादिबोध्याऽपूर्वरूपो नियोगः प्रवर्त्तको निवर्त्तकश्चेति प्राभाकरपक्षः ।

प्रत्यक्षव्यवहारे इति । न च स्वेच्छाधीने प्रत्यक्षव्यवहारे प्रवर्त्तनाद्यभावे ऽपि परप्रेरितव्यवहारे प्रेरयितृपुरुषप्रेरणात्मकं प्रवर्त्तनादिकम- ९० ।
स्तीति शङ्कनीयम् । तत्रापि स्वेष्टानिष्टसाधनताज्ञानं विना चेतनस्य प्रवृत्तिनिवृत्त्यसंभवेन आवश्यकस्य तस्यैव प्रवृत्तिनिवृत्तिहेतुत्वे प्रेरयितृव्यापारस्य तेनान्यथासिद्धेः । न च यागस्य स्वर्गकारणत्वनिर्वाहार्थम् अपूर्वमिव प्रेरयितृपुरुषव्यापारस्य प्रवृत्त्यादिकारणत्वनिर्वाहार्थम् इष्टसाधनतादिज्ञानं द्वारत्वेन कल्प्यते यतस्तेनान्यथासिद्धिर्न स्यात् । क्लृप्तमेव हि तस्य स्वेच्छाधीनव्यवहारस्थले प्रवृत्त्यादिकारणत्वम् । **अन्वयव्यतिरेकेति** । टीकायां कार्यकारणभावशब्दस्तद्ग्राहकान्वयव्यतिरेकपर इति भावः ।

---

* न्यायसुधायां तन्त्रवार्त्तिकटीकायाम् । जै॰ सू॰ १ पा॰ २ सू॰ ७ ।

६०। २० **व्यापारो लोकसिद्ध इति** । साध्यत्वेष्टसाधनत्वयोर्धर्मी व्यापारो ह्यत्र यागादिकः स च यज्यादिधात्वर्थत्वेन लोकप्रसिद्ध इति यज्यादिधातुसमभिव्याहारादेव तयोर्धर्मिसंबन्धसिद्धेः न धर्म्यपि लिङादिशब्दार्थ इत्यर्थः । यद्वा कृतिसाध्यत्वेष्टसाधनत्वविशिष्टयागस्वर्गयोर्व्यापारे ऽपूर्वे शक्तिरिति शङ्का । व्यवहितयोः कार्यकारणभावद्वारापेक्षाया लोकसिद्धत्वेन आक्षेपादेव तत्सिद्धेर्नापूर्वरूपो व्यापारः शब्दार्थः । अतो न तत्र शाब्दयोः कृतिसाध्यत्वेष्टसाधनत्वयोरन्वयः किं तु यज्यादिधात्वर्थएवान्वय इति भावः । ननु यदि यागादिः समभिव्याहारलभ्यत्वाद् अपूर्वव्यापारो लौकिकन्यायलभ्यत्वाच्च न लिङाद्यर्थः तर्हि कर्तव्यत्वमपि तदर्थो न भवेत् तदपि हि कृतिसाध्यत्वरूपं लोकत एवावगन्तुं शक्यं यागादिः कृत्या साधयितुं शक्यो न तु चन्द्रमण्डलहरणादिवदशक्य इति ।

स्यादेतत् । यः स्वर्गादिफलकामादिरधिकारी तत्कृत्यैव साधनीयत्वं न लोकतः सिद्धमित्यन्यकृत्या साधितानामपि तेषामन्यफलार्थत्वं प्रसज्येत तन्मा भूदिति कर्तव्यत्वस्यापि लिङाद्यर्थानुप्रवेशः कल्प्यः । तथा सति हि समभिव्याहृतस्य स्वर्गकामादेर्यदिष्टं तत्साधनत्ववत् तत्कृतिसाध्यत्वमपि सिध्यति । न च यजेतेत्यादिकर्त्रभिप्रायार्थकात्मनेपदवत्त्वात् तत्सिद्धिः स्यादिति वाच्यम् । आत्मनेपदस्यासार्वत्रिकत्वात् । आग्नेयमष्टाकपालं निर्वपेद् रुक्काम इत्यादौ तदभावात् । न च तत्राग्नीनादधीतेत्याधानवाक्यगतात्मनेपदबलात्तत्सिद्धिः स्यात् तत्र साक्षादाधानफलस्याग्निसंस्कारस्याहवनीयादिगतत्वेनाग्निसाध्यक्रतुफलानां परम्परया ऽऽधानसाध्यानां कर्तृगामित्वमपेक्ष्यैव तत्रत्यात्मनेपदस्य निर्वाह्यत्वादिति वाच्यम् । अग्निनिरपेक्षजपादिविधिश्रुतफलानां कर्तृगामित्वस्य ततो निर्वाहाभावात् । येनाधानं कृतं तस्याग्निषु तेन स्वफलकामनया क्षेत्रजपुत्रोत्पादनप्रायादन्येन यागानुष्ठापनप्रसङ्गस्यैवमप्यपरिहाराच्च । तस्मात्फलकामकर्तव्यत्वं न लोकसिद्धमिति तल्लाभाय कर्तव्यत्वं लिङाद्यर्थ इत्यभ्युपेयमिति चेत् । न । कर्तव्यत्वस्य तदर्थत्वाभ्युपगमे ऽपि तच्छङ्कानपायात् । यः पुत्रगतपूतत्वादिवत्पित्रादिगतं स्वर्गं कामयते सो ऽपि स्वर्गकाम इति तत्कृत्या साधितस्य यागस्य पित्रादिगतस्वर्गजनकत्वशङ्का हि तथैवानुवर्तेत । यद्युच्येत प्रवर्तको विधिः कर्तृगतफलपर्यवसा-

यिन्येव पुरुषं प्रवर्त्तयतीति नियमः । पुत्रगतपूतत्वादिकमपि सत्पुत्रेण भाविफलमालोचयतः स्वगतफलपर्यवसायीति परम्परया स्वफलोपयोगि । इह स्वर्गकाम इत्यादौ पूतत्वादाविव परम्पराश्रयणे प्रमाणा*भावादौत्सर्गिकं साक्षात्त्वं न त्यक्तव्यमिति स्वकीयस्वर्गकामादिरेव तदर्थः । अतो नातिप्रसङ्गो भवतीति । एवं तर्हि कर्त्तव्यत्वस्य लिङाद्यर्थत्वाभावे ऽपि स्वर्गकामो यजेतेति सामानाधिकरण्येन स्वकीयस्वर्गकामस्यैव यागकर्तृत्वप्रतीतेस्तस्य न तदर्थत्वमभ्युपगन्तव्यम् । यजेतेत्यत्र ह्याख्यातसामान्यार्थकृत्याक्षिप्तस्तदाश्रयः कर्त्ता प्रतीयतएव यत्रैकवचनाद्यर्थसंख्यान्वयः । तस्मात्कर्त्तव्यत्वं लिङाद्यर्थ† इति नाभ्युपेयमिति चेत् । सत्यम् । यद्यपि सूक्ष्मदृष्ट्या ऽन्यलभ्यमपि कर्त्तव्यत्वं प्रवर्त्तकज्ञानविषयत्वात् प्रवृत्तिप्रयोजनस्य लिङादेरर्थो ऽभ्युपेयते‡ तथापि कर्त्तव्यत्वेष्टसाधनत्वयोर्धर्मो यागादिस्तदर्थो नाभ्युपेयः । धातुसमभिव्याहारादेव तयोस्ताद्धर्म्यसिद्धेः स्पष्टत्वादित्यत्र तात्पर्यम् ।

श्रुतेष्टोपायत्वाभावो§पपत्तये इति । नन्विष्टसाधनत्वाभावः ९० । २४
श्रुत इत्ययुक्तम् । तस्य न हन्यादित्येतदर्थत्वाभावात् सांदृष्टिकेष्टोपायत्वे विद्यमाने तदभावस्य बाधितत्वात् । हननेष्टसाधनतामनपबाध्य तद्गुरुतरादृष्टानिष्टोपायता ज्ञायतइति पूर्ववाक्ये तदबाधनस्योक्तत्वाच्च । एवं चश्रुतेष्टसाधनत्वाभावोपपत्तये गुरुतरानिष्टसाधनत्वं कल्प्यतइत्यप्ययुक्तम् । गुरुतरानिष्टसाधनत्वे कल्पिते ऽपि सांदृष्टिकेष्टोपायत्वस्य प्रत्यक्षसिद्धस्यापनेतुमशक्यत्वेन तदभावोपपादनायोगादिति चेत् । उच्यते । गुरुतरानिष्टसाधनत्वे कल्पिते तत्प्रतिसंधानेन सांदृष्टिकफलादिच्छा निवर्त्तेत तन्निवृत्तौ च तस्येष्टत्वं नास्तीति इष्टसाधनत्वाभावस्य न हन्यादित्येतदर्थतायां न काचिदनुपपत्तिः । गुरुतरानिष्टसाधनत्वकल्पनायाश्च न तदुपपादकत्वासंभवः । पूर्ववाक्ये तात्कालिकत्वद्विष्टसाधनत्वाऽनपबाधनोक्तिस्तु तात्कालिकफलत्वाभिमतसाधनत्वयोग्यतायाः स्वरूपतो बाधनाभावपरा न तु तस्य फलस्येच्छाविषयत्वबाधनाभावपरापीति न विरोधः । न चास्तिककामुकस्य रागान्धस्य सत्यपि भाविनरकदुःखावश्यंभावावगमे तात्कालिकफलेच्छा नापै-

* परंपराश्रयणप्रमाणेति २ पु· पा· । † कर्तव्यं लिङाद्यर्थ इति २ पु· पा· ।
‡ अभ्युपेयेतेति २ पु· पा । § श्रुतेष्टसाधनत्वाभावेत्यादिः पाठः २–५ पु· ।

तीति तं प्रतीष्टसाधनत्वाभावबोधकस्य निषेधवाक्यस्याप्रामाण्यं स्यात्
सर्वान् प्रति प्रमाणभूतस्य च वेदवाक्यस्य पुरुषभेदेन प्रामाण्याऽप्रामा-
ण्यवैलक्षण्यं न युक्तमिति चेत् । यद्येवमत्रापरितोषः तदेवमुपपादनी-
यम् । इष्टोपायत्वमात्रं न लिङाद्यर्थः किं तु बलवदनिष्टाननुबन्धित्व-
विशेषितम् । तथा च निषेधवाक्यैर्विशिष्टाभावबोधने नास्ति बाधः ।
विशेष्यवति विशिष्टाभावो विशेषणाभावेनोपपादनीय इति तदुपपादनार्थं विशे-
षणाभावात्मकबलवदनिष्टानुबन्धित्वकल्पनेति अतेष्टसाधनत्वाभावोपपत्तय-
इत्यादिग्रन्थस्य तात्पर्यम् । सत्यपि तात्कालिकेष्टाद् वस्तुतो भाविनरकानिष्ट-
स्याधिक्ये रागान्धस्य तात्कालिकसुखमेव ततोऽधिकमिति मोहान्निषिद्धा-
चरणं निषेधवाक्यप्रामाण्यं चोपपद्यते । ग्रन्थे गुरुतरादृष्टानिष्टसाधनत्व-
कल्पनोक्तिः निन्दार्थवादरहितेषु निषेधवाक्येषु । निन्दार्थवादसत्त्वे तु तत
एव तल्लाभः । हननादिषु निषेध्येषु तात्कालिकेष्टापेक्षया भाव्यनिष्टस्य गुरु-
तरत्ववचनं निन्दार्थवादः यागादिषु तात्कालिकक्लेशापेक्षया भाविन इष्टस्य
गुरुतरत्ववचनं स्तुत्यर्थवाद इति हि वृद्धाः । न च यागादीनां विधेयानां
लिङादिना बलवदनिष्टाननुबन्धित्वबोधने स्तुत्यर्थवादवैयर्थ्यमिति शङ्कनी-
यम् । तद्बोधनेऽपि इष्टानिष्टयोः साम्येन तुल्यायव्ययत्वशङ्कापरिहारेण
स्तुत्यर्थवादसाफल्यादित्येषा दिक् ।

ननु निवृत्तिशब्देन प्रवृत्त्यभावः केन प्रकारेण व्याख्यातो भवतीत्या-
९० । २६ काङ्क्षायां तेन लभ्यं विशेषमाह **उद्यमक्रियाया इति** । प्रवृत्त्यभाव-
मवबुध्येत्येतावता ऽनादिसिद्धप्रवृत्तिप्रागभावबोधमात्रमुक्तं स्यात् । न तद्*
बोधमात्रान्निवर्त्तते किं तु खड्गोद्यमनादिरूपा या हननोद्यमक्रिया तस्या
उपरन्तव्यमिति कर्त्तव्यत्वेनानुसन्धीयमाना या खड्गादिपरावर्त्तनक्रिया तदुप-
लक्षितत्वेन निवृत्तिरूपा यत्र प्रवृत्त्यभावमवबुध्य निवर्त्तते निवृत्तिरूपापन्न-
प्रवृत्त्यभावाद् भवतीत्यर्थः । **यद्धन्यात्तन्नेतीति** । इदं वाक्यं प्रसक्तया
निवृत्तिप्रतिपादकतया नोपात्तं खड्गादिपरावर्त्तनरूपतया वक्ष्यमाणायाः प्रस-
क्तक्रियानिवृत्तेर्न हन्यादित्येतदर्थत्वाभावात् । किं तु निवृत्तिरूपा खड्गादि-
परावर्त्यताबुद्धिः केन भवतीत्याकाङ्क्षायां न हन्यादित्येतदर्थभूतानिष्टसाध-

* तदिति नास्ति २ पु॰ ।

नत्वज्ञानेन भवतीत्येतदर्थप्रतिपादकतयोपात्तम् । **एषा चेति** । न हन्यादित्यनेन हननगतबलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वाभावावगतिः ततो बलवदनिष्टानुबन्धित्वकल्पनं तेनोद्यतं खड्गादिकं परावर्त्तनीयमिति बुद्धिः ततस्तत्परावर्त्तनवैशिष्ट्येन लब्धपरिपालनतया निवृत्तिरूपापन्नौदासीन्यप्राप्तिरिति क्रमः ।

अभावत्वात्तथेति । अभावो हि ब्रह्मस्वरूपे नान्तर्भवति । ९२ । ६
अतः प्रपञ्चान्तःपातित्वान्मिथ्येत्यर्थः । **अतथात्वात्** अशरीरत्वरूपत्वात् । **अनादित्वादिति सत्कार्यवादी शङ्कतइति** । उभयोः सादित्वे खलु (परस्परहेतुहेतुमद्भावाधीनः)* परस्पराश्रयः प्रसज्यते । उभयोरनादित्वे तदभावाद् न परस्पराश्रयप्रसक्तिरित्यर्थः । टीकायां यस्तु मन्यतइत्यग्रिमग्रन्थेनासत्कार्यवादमवलम्ब्य प्रवाहानादित्वशङ्कायाः करिष्यमाणत्वात् इयं शङ्का सत्कार्यवादावलम्बस्वरूपा ऽनादित्वविषया योजिता । **अन्धपरम्परेति** । स्वरूपनित्यत्वपक्षे ऽपि अभिव्यक्त्योरनित्ययोः† परस्परहेतुहेतुमद्भावेन तत्कृतपरस्पराश्रयानपायाद् उत्पत्तिस्थानीयां कादाचित्कीमभिव्यक्तिमङ्गीकृत्यापि स्वरूपनित्यत्वकल्पनेयमन्धपरम्पराप्राप्तपटशोक्लयोपदेशवदप्रामाणिकीत्यर्थः । **संशयनिमित्तेति** । संशयशब्देन विशेषादर्शनादिसंशयकारणकलापो विवक्षितः संशयस्य प्रत्ययशब्देन तत्कार्यतया ग्रहणात् । संशयशब्दस्य मुख्यार्थत्वे तु संशयमूलकशब्दप्रयोगजन्यप्रत्ययान्तरपरः प्रत्ययशब्दो योज्यः । **उचित‡निमित्तापेक्षणादिति** ।
करणदोषादिबहुनिमित्तापेक्षणादित्यर्थः । **साधारणधर्मणि दृष्टे इति** । ९३ । ४
धवलभास्वरवर्णरूपसादृश्यविशिष्टे धर्मिणि दृष्टे किं सादृश्यविशिष्टधर्मिज्ञानमात्रं विपर्ययकारणम् उत सादृश्येनैव अन्यैश्च दोषैर्मिलितमित्यर्थः । **द्वितीयं दूषयतीति** । सादृश्यवद्दोषस्यापि प्रवेशितत्वात् । यद्यपि शुक्तिप्रमा न भवति दोषस्य प्रमाप्रतिबन्धकत्वात् तथापि संशयः किं न स्यात् तस्यापि भ्रान्तिवद्दोषजन्यत्वादिति दूषयतीत्यर्थः । समानधर्मधर्मिण इति विशेषणं व्याचष्टे **समानो धर्मो यस्येति** । **न च रागादिति** ।

* ( ) एतदन्तर्गतो ग्रन्थो नोपलभ्यते २ पु॰ ।
† अभिव्यक्त्यानित्ययोरिति २ पु॰ पा॰ । ‡ उपचितेति २-५ पु॰ पा॰ ।

रागः संशयव्यावृत्तो भ्रान्त्येकपक्षपाती दोष इति भावः । **समानानेकधर्मेति ।** अत्राऽव्यवस्थात इत्येतदन्तेन सूत्रांशेन त्रिविधा संशयसामग्री वर्णिता । विशेषापेक्ष इत्यनेनान्यतरविशेषावधारणात्मकत्वमुक्तम् । तेन विशेषापेक्षो विमर्श* इति सूत्रांशेनानवधारणज्ञानं संशय इति तल्लक्षणं दर्शितम् । **अनेकस्माद् व्यावृत्त† इति ।** अनेकशब्दस्य धर्मपदेन समासे शाकपार्थिवादिवन्मध्यमपदलोपेनानेकस्मात् सजातीयविजातीयाद् व्यावृत्तोऽसाधारणो धर्म इत्यर्थेनैकधर्मलाभ इति भावः । **कार्यनियमं प्रतिजानानेनेति** पाठः साधुः । संप्रतिभ्यामनाध्यानइत्युत्कण्ठापूर्वकस्मरणरूपाध्यानव्यतिरिक्तार्थे संप्रतिपूर्वाद् जानातेरात्मनेपदविधानात् । **प्रतिजानतेति** पाठस्तु कथं चिदाध्यानार्थविवक्षया समर्थनीयः ।

९४ । ५ **तत्रेति‡ ।** नन्वनुष्ठितस्य फलादर्शनं जन्मान्तरकृतकर्मणः फलजनकत्वं च तद्विधिव्याप्तमिति शङ्कितुर्नाभिप्रायः येन तद्व्याप्तिभञ्जनतः परिह्रियेत किं त्वन्वयव्यतिरेकव्यभिचाराद् लोकतः कारणत्वं ग्रहीतुं न शक्यम् । अतो विधिबोध्यकारणत्वमङ्गीकृत्य तन्निर्वाहार्थं फलप्रतिबन्धकदुरितनिवृत्त्यादिवैकल्यकल्पनया ऽन्वयव्यभिचारो जन्मान्तरकृतश्रवणादिकल्पनया व्यतिरेकव्यभिचारश्च परिहरणीय इत्यभिप्रायः । न च विध्यभावे केवलमुदाहृतदृष्टान्तद्वयेनायं व्यभिचारः परिहृतो भवति श्रुतवैशेषिकादिशास्त्राणां केषां चिदवबोधानुत्पत्तौ हिं मतिमान्द्यालस्यानभ्यासादिरूपकारणवैकल्यं स्पष्टं दृष्ट§मस्ति शब्दमात्रस्य शाब्दप्रमाजनकत्वं चान्यत्र सामान्यतः सिद्धमस्ति अतस्तत्रान्वयव्यभिचारस्य प्राक्सिद्धकारणत्वाविरोधित्वे ऽप्यत्र बहुशः कृतश्रवणमननानां सम्यक्सकलवेदान्तार्थनिर्णयवतां साक्षात्कारानुदयः किं चिद्दृष्टकारणवैकल्यप्रयुक्तत्वेनादृश्यमानः कथं प्रागसिद्धस्य साक्षात्कारे शब्दप्रमाणकारणत्वस्य ग्रहणे विरोधी न स्यात् । जन्मान्तरोपार्जितनिधिखननेनोपभोगे च पूर्वानुभूतस्मरणं दृष्टं कारणं सिद्धमस्ति अतस्तत्र व्यतिरेकव्यभिचारसमाधानसंभवे ऽप्यत्र जन्मान्तरकृतश्रवणादेरन्यतः सिद्ध्यभावेन तत्कल्पकस्य विधेरप्यभावे जाग्रद्व्यतिरेकव्यभिचारश्च कथं

* गौतमसू॰ अ॰ १ आ॰ १ सू॰ २३ ।
† अनेकव्यावृत्त इति २ पु॰ पा॰ ।
‡ तन्मेति पाठः २ पु॰ ।
§ स्पष्टदृष्टमिति १ पु॰ पा॰ ।

कारणत्वग्रहविरोधी न स्यात् । तस्माद्विधिव्यभिचारोद्भावनं कृतशङ्कापरिहारानुपयुक्तमयुक्तम्* ।

तथा **प्राधान्यं श्रवणादेर्न भवतामपि संमत**मित्येतदप्ययुक्तम् । ९४ । १३
अर्थज्ञानफलकाध्ययनविधेरिव साक्षात्कारफलश्रवणविधेरपि प्रधानकर्मत्वस्यैव प्राप्तेरिति चेद् उभयतो व्यभिचारेण श्रवणस्य साक्षात्कारकारणत्वं लोकत इव बाधेन विधितोऽपि ग्रहीतुं न शक्यमिति प्रागेव शब्दापरोक्षनिराकरणेनोक्तप्रायम् । अतो विधिना कारणत्वं निश्चित्य व्यभिचारः परिहरणीय इति शङ्कितुरभिप्रायो न संभवतीत्यभिप्रेत्य यद्यनयोक्तिभङ्ग्या विधिव्याप्तिराशङ्किता तदेदमपि दूषणान्तरमिति विधिव्याप्तौ व्यभिचार उपन्यस्तः । अथ यदि श्रवणस्य प्रधानकर्मत्वेऽर्थबाधात् तत्परित्यज्य श्रवणादिनिर्णीतमात्मतत्त्वमैन्द्रियकस्वसाक्षात्कारोत्पादनसमर्थं भवति

लवणक्षारक्षोदिनि पात्रे गोमूत्रपूरिते क्षिप्तम् ।
मर्दितमपि शालितुषैर्यदविकृतं तत्तु मौक्तिकं जात्यम् ॥
घृष्टं सदात्मनः स्वच्छां छायां यन्निकषोपले† ।
स्फुटं प्रदर्शयेदेतद्वैडूर्यं जात्यमुच्यते ॥

इत्यादिशास्त्रोक्तपरीक्षाप्रकारनिर्णीतमिव रत्नतत्त्वम् इत्युपयोक्ष्यमाणसंस्कारतया गुणकर्मत्वमिष्यते तदा न चेत्यादिना दूषणमुक्तमिति न किंचिदनुपपन्नम् ।

ननु प्रयाजशेषवाक्यस्य प्रयाजशेषं हविष्षु क्षारयेदित्यर्थकल्पनं न युक्तम् । क्षारणेन प्रतिपाद्यतया प्रयाजशेषस्य शेषितायाः क्षारणदेशतया हविषां शेषतायाश्च प्रसङ्गात् । नैतद्युक्तम् । तथा सति हि चात्वाले कृष्णविषाणां प्रास्यतीतिवद् हविष्षु प्रयाजशेषे च सप्तमीद्वितीये स्याताम् इह तु द्वितीयया हविषां संस्कार्यत्वेन प्राधान्यं तृतीयया प्रयाजशेषस्य तत्संस्कारार्थद्रव्यत्वेन शेषत्वं च प्रतीयतइत्याशङ्क्य विशेषयति **कृतप्रयोजनेति** । निर्वृत्तप्रयोजनस्य हि शेषः प्रतिपत्तिमपेक्षते करिष्यमाणाज्यभागार्थग्राह्यमाज्यं प्रयाजशेषाज्येनासंसर्गसिद्ध्यै तस्य क्व चित् क्षारणमपेक्षते तस्मादपेक्षितप्रति-

---

* अनुपयुक्तमुक्तमिति २ पु॰ पा॰ ।
† यदात्मनः स्वच्छे स्वच्छायां निकषोपले इति २–५ पु॰ पा॰ ।

पत्यर्थत्वमेव युक्तं न त्वनपेक्षितहविःसंस्कारार्थत्वम् । एवं च क्षारणस्य दृष्टार्थत्वमपहायाऽदृष्टार्थत्वस्वीकारश्च परिहृतो भवति । प्रयाजेषु विनियुक्तस्य पुनः क्षारणे विनियोग इति विनियुक्तविनियोगविरोधोपि परिहृतो भवति । तस्माद् द्वितीयातृतीययोः सप्तमीद्वितीयार्थतैव युक्तेति भावः ।

९४ । २१ **अपूर्वेति** । अदृष्टपर्यवसायिन एव गुणकर्मणो विध्यपेक्षणात् श्रवणादेस्तु दृष्टद्वारेणैव साक्षात्कारोपयोगित्वाद् नादृष्टानुप्रवेशो ऽस्तीति न तत्राप्राप्तार्थविषयविध्यपेक्षेत्यर्थः । **त्र्यंशा भावना हि धर्म इति*** । कौमारिलमतानुसारेण साध्यसाधनेतिकर्तव्यताभेदो मतान्तरेष्वप्यविशिष्टः । **स्वप्नोपलब्धेति** । स्वप्नेषु पर्यापतन्तो दृष्टा व्याघ्रादय आकुलतामुत्पाद्य स्वप्नदृशमुत्थापयन्तो भवन्ति स्वोपादानाविद्यानिवर्तकाः । इह श्रुतिव्याख्यानेष्वस्नाविरं सिरारहितमिति व्याख्यातं तत् स्नावाः सिरा अस्य सन्तीति स्नाविरं न स्नाविरम् अस्नाविरम् इतीशावास्योपनिषद्विवरणानुसारेण प्राक्तु स्नाविरमविगलितमिति टीकानुसारेणान्यथा व्याख्यातम् । एवमन्यत्रापि मतभेदेनाविरोधो द्रष्टव्यः ।

टीकायां विद्याऽविद्ययोः कार्यकारणभावं निवर्त्यनिवर्तकभावं चोपपाद्य तदर्थविषयत्वेन विद्यां चाविद्यां चेति मन्त्रस्योदाहृतत्वात् तदनुसा-
९६ । ७ रेण मन्त्रं योजयति **अविद्यामिति** । अत्रेदं सकलमूलपूर्वापरग्रन्थगतजीवविषयप्रतिबिम्बावच्छेदव्यवहारद्वयतात्पर्यावधारणाय चिन्तनीयम् अनयोः पक्षयोराचार्याणां कतरः पक्षः सिद्धान्त इति । द्वितीय एव आद्यस्याचार्यैर्दूषितत्वादिति चेत् । न । अध्यासपूर्वपक्षे हि तद्दूषणं कृतम् । सिद्धान्ते तस्यासमाहितत्वात् सिद्धान्ताभिमतमेव तद् दूषणमिति चेद् न । असारं तद्दूषणमित्यनादरेणापि तदनुद्धारोपपत्तेः । तथा हि ।

रूपवत एव प्रतिबिम्ब इति नास्ति नियमः । रूपसंख्यापरिमाणसंयोगविभागपरत्वापरत्वचलनसुखत्वादिजातीनां प्रतिबिम्बदर्शनात् । द्रव्यस्य सत इति विशेष्यतइति चेद् न । पृथिव्यादिनवकानुगतस्य द्रव्यत्वासिद्धेः । द्रव्यं द्रव्यमिति तत्र तत्र† लौकिकानामनुगतप्रत्ययाभावात्

* इदं नास्ति २ पु· ।

† तत्रेत्येकवारमेव २ पु· ।

तार्किकपरिभाषाया निष्प्रमाणकत्वात् । गुणाश्रयस्य सत इति विशेष्य-मिति चेद् न । संख्याया एव संख्यारूपगुणाश्रयभूताया नीरूपायाः प्रति-बिम्बदर्शनात् । अस्ति हि संख्यायामपि संख्या एकत्वं प्रथमसंख्या द्वित्वं द्वितीयसंख्या बहुत्वेषु त्रित्वं प्रथमसंख्या चतुष्ट्वं* द्वितीयसंख्येत्यादिव्यवहा-रात् । अत एव वसन्ताय कपिञ्जलानालभेतेत्यत्र त्रित्वमेव बहुवचनार्थो न तु चतुष्ट्वादिकं प्रथमातिक्रमे कारणाभावादिति न्यायविदः । अत एव च द्वावेकत्वसंख्यारूपाववयवावस्या द्वित्वसंख्याया इत्याद्यर्थे ब्राह्मणद्वितयं ब्राह्मणद्वयमित्यादिशब्दनिष्पत्त्यर्थं† संख्याया अवयवे तयबित्यादिसूत्रैस्त-यप्प्रत्ययादयो विहिताः । अत एव च रक्षसां निहतान्यासन् सहस्राणि चतु-र्दशेत्याद्यभियुक्त‡व्यवहाराः । ननु संख्यासु वस्तुतो नास्ति संख्यान्तरं किं तु द्वित्वसंख्या द्वितीयेत्यादिसजातीयसंख्याव्यवहाराः सत्ता सतीति व्यवहारवदभेदे ऽपि धर्मधर्मिभावकल्पनया सहस्राणि चतुर्दशेत्यादिवि-जातीयसंख्याव्यवहाराः सहस्रादिसंख्याश्रयगतचतुर्दशसंख्यादिसामानाधिकर-ण्येन तत्कल्पनया । अतो न संख्याया मुख्यं गुणाश्रयत्वमिति चेत् । उच्यते§ । तुल्यमेतदात्मनोपि । आनन्दादिधर्मास्तदभिन्ना इति तस्यापि हि न मुख्यं गुणाश्रयत्वं तस्माद्रूपवत एव प्रतिबिम्ब इति नियममवलम्ब्यात्मप्रति-बिम्बनिराकरणं तावदयुक्तम् ।

तथा रूपवत्येव प्रतिबिम्ब इति नियममवलम्ब्यापि निराकरणमयुक्तम् । किं प्रतिबिम्बोपाधेर्वस्तुतो रूपवत्त्वं प्रतिबिम्बने प्रयोजकमिष्यते उत रूपव-त्त्वेन ग्रहणम् । आद्ये ऽनात्मनो ऽन्तःकरणे प्रतिबिम्बनानुपपत्तिः । अन्तः-करणस्य त्रिवृत्करणेन पञ्चीकरणेन वा रूपवत्त्वात् । न द्वितीयः । निज-रूपवत्त्वेनागृह्यमाणे ऽपि स्फटिके सन्निहितजपाकुसुमप्रतिबिम्बनेन अरुणः स्फटिक इति व्यवहारदर्शनात् । तस्माद् निरवद्यः प्रतिबिम्बपक्षः । प्रतिबि-म्बपक्षे एव च जीवतदन्तर्यामिभावेनान्तःकरणे द्विगुणीकृत्य वृत्तिरुपपद्यते ।

ननु प्रतिबिम्बपक्षे केन दृष्टान्तेन द्विगुणीकृत्य वृत्त्युपपत्तिः । अभ्र-स्याकाशस्य प्रतिबिम्बो नाभ्युपगतः । आलोकस्य तु प्रतिबिम्ब एव नाव-

---

* चतुष्ट्वादिकमिति २ पु॰ पा॰ ।

† निष्पत्त्यर्थं इति १ पु॰ पा ।

‡ वाल्मीकिरामायणे १ सर्गे बालकाण्डे ।

§ उच्यते इति नास्ति १ पु॰ ।

च्छेदो ऽपि। न च जलान्तर्गतसिकतादिग्रहणार्थं तदन्तरालोकप्रवेशस्य अवश्यम्भावात् तेन तस्या अवच्छेदो ऽप्यङ्गीकरणीय इति वाच्यम्। आलोकप्रतिबिम्बेनैव सिकतादिप्रकाशोपपत्तेः। न च समारोपितस्य प्रतिबिम्बालोकस्य सिकतादिभिः संयोगो नास्तीति वाच्यम्। सद्यो ऽपवरकप्रविष्टस्य समारोपितेन तमसा तत्रत्यघटादिप्रकाशप्रतिबन्धवत् समारोपितेनालोकेन सिकतादिप्रकाशजननोपपत्तेरिति चेत्। मैवम्। जलेनाकाशस्यावच्छेद एव तत्रालोकस्य प्रतिबिम्ब एवेति कल्पने दृष्टान्तसंप्रतिपत्त्यभावेपि प्रतिबिम्बाश्रयान्तःकरणेन सर्वगतस्यात्मनो ऽवच्छेदस्याप्यवश्यम्भावेन स्वत एव द्विगुणीकृत्य वृत्तिसिद्धेः।

प्रतिबिम्बपक्ष एव च सूत्रकारादिसंमतः। अंशो नानाव्यपदेशादित्यधिकरणे* ह्यैकात्म्यवादे कर्मतत्फलव्यतिकरशङ्कापरिहारार्थं प्रवृत्तेनाभास एव चे†ति सूत्रेण जीवस्य ब्रह्मप्रतिबिम्बत्वमुक्तं तथैव च भाष्यकारैर्व्याख्यातम्। आभास एवैष जीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यः न स एव साक्षाद् नापि वस्त्वन्तरम्। अतश्च नैकस्मिन् जलसूर्यके कम्पमाने जलसूर्यकान्तरं कम्पते। एवं नैकस्मिन् जीवे कर्मफलसंबन्धिनि जीवान्तरस्य तत्संबन्धः। एवमव्यतिकर एव कर्मफलयोरिति। टीकाकारैरपि तस्मिन्नधिकरणे जीवब्रह्माभेदे सकलजीवगतदुःखभाक्त्वं ब्रह्मणः स्यादिति शङ्कापरिहार एतत्सूत्रसिद्धं प्रतिबिम्बत्वमाश्रित्यैव समर्थितः। न च मोक्षस्यानर्थबहुलता यतः प्रतिबिम्बानामेव श्यामतावदातते न बिम्बस्य एवं जीवानामेव नानावेदनाभिः संबन्धः ब्रह्मणस्तु बिम्बस्येव न तदभिसंबन्ध इति। आचार्यैरप्येतदभिप्रायः स्पष्टीकृतः बिम्बप्रतिबिम्बयोरवदातत्वश्यामत्वादिव्यवस्थानान्न धर्मसाङ्कर्यमित्यर्थं इति। तस्मात्प्रतिबिम्बपक्ष एवाचार्य्याणामभिमतः। अत एवानिर्वाच्याविद्याद्वितयसचिवस्येति प्रथमश्लोकगतचराचरपदव्याख्यानसमये एव जीवस्य प्रतिबिम्बत्वमुक्तं जीवानामपि चराचरोपाधिकानां तत्प्रतिबिम्बत्वेन तद्विवर्त्ततेत्याहेति। अवच्छेदपक्षस्तु भाष्यटीकागतघटाकाशादिदृष्टान्तस्वरसप्राप्तो न दूषितः परं न तु स्वतन्त्रेषु स्ववाक्येषु जीवो ऽवच्छेद इति क्व चिदप्यु-

---

* व्या॰ सू॰ अ॰ २ पा॰ ३ सू॰ ४२। † व्या॰ सू॰ अ॰ २ पा॰ ३ सू॰ ५०।

क्तम् । तस्मात् प्रतिबिम्बपक्ष एवाचार्याणां सिद्धान्त इति । एवं प्रतिबिम्बपक्षः श्रेयानिति मन्यमानानां मतानुसारेणाचार्य्याणां तात्पर्य्यं योजितम् ।

अथाऽवच्छेदपक्षमभ्युपगच्छतां मतमनुसृत्योच्यते । प्रतिबिम्बपक्षो भाष्यकारैरेव न स्थानतोपी*त्यधिकरणे निराकृतः । तत्र ह्यत एव चोपमा सूर्यकादिवदिति सूत्रेण† सूर्यादिप्रतिबिम्बदृष्टान्ते श्रुत्युदाहृते दर्शिते सूर्यादिवदात्मनः प्रतिबिम्बो न युज्यतइति तदाक्षेपकत्वेनाम्बुदवदग्रहणात्तु न तथात्व‡मिति सूत्रं व्याख्यातम् । यथा ऽम्बु सूर्यादिभ्यो मूर्त्तेभ्यो विप्रकृष्टदेशं गृह्यते न तथा ऽऽत्मनो विप्रकृष्टदेशं प्रतिबिम्बनयोग्यं वस्तु गृह्यते । अतो न क्वाप्यात्मनः सर्वगतस्य प्रतिबिम्बो युक्त इति । ततो वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं§मिति सूत्रमुक्तानुपपत्त्या सूर्यादिवदात्मनः प्रतिबिम्बनमनुपपन्नमित्यङ्गीकृत्यैव श्रुतिषु सूर्यादिप्रतिबिम्बोपादानस्य तात्पर्यान्तरवर्णनपरतया व्याख्यातम् । यथा सूर्यादिप्रतिबिम्बस्य जलाद्युपाधिगतवृद्धिह्रासाद्यधीनवृद्धिह्रासादिभाक्त्वमेवमात्मनो ऽप्यन्तःकरणादिगतवृद्धिह्रासाद्यधीनवृद्धिह्रासादिभाक्त्वमित्येतावता जलसूर्यादिदृष्टान्तीकरणं न तु प्रतिबिम्बनेन दृष्टान्तदार्ष्टान्तिकयोः सर्वथा साम्यस्यानपेक्षितत्वादिति । बृहदारण्यकभाष्ये ऽपि स एष इह प्रविष्ट आ नखाग्रेभ्य इति वाक्यव्याख्यानावसरे सर्वगतस्यात्मनः कः प्रवेशो नामेति विमृश्य प्रतिबिम्बप्रवेश इति पक्षमम्बुवदग्रहणात्त्विति सूत्रोक्तेन विप्रकृष्टदेशोपाध्यभावेनैव दूषयित्वा देहादावात्मन उपलभ्यमानत्वं प्रवेशः । न हि पाषाणादाविव देहादावात्मनो ऽनुपलब्धिरस्तीति प्रवेशपदार्थस्यान्यथोपपादनेन प्रतिबिम्बपक्षदूषणं स्थिरीकृतम् । न हि लोके ऽपि जलाद्विप्रकृष्टदेशस्यैव चैत्रादेस्तदन्तर्निमग्नत्वेन विप्रकृष्टदेशस्यापि जले प्रतिबिम्बो दृश्यते न च सावयवस्य चैत्रस्य जलान्तर्निमग्नाधरकायस्य ऊर्ध्वकायप्रतिबिम्बवदन्तःकरणादिगतस्यात्मनस्तदभिमुखप्रदेशान्तरप्रतिबिम्ब उपपादयितुं शक्यः । निरवयवत्वशब्दकोपापत्तेः । तस्माद् बहुषु जलपात्रेषु चन्द्रस्य यावत एकत्र प्रतिबिम्बस्तावतो ऽप्यन्येष्विव कृत्स्नस्यैवात्मन एकत्रान्तःकरणे प्रतिबि-

---

* व्याससू॰ अ॰ ३ पा॰ २ सू॰ ११ ।　† व्या॰ सू॰ अ॰ ३ पा॰ २ सू॰ १८ ।
‡ व्या॰ सू॰ अ॰ ३ पा॰ २ सू॰ १९ ।　§ व्या॰ सू॰ अ॰ ३ पा॰ २ सू॰ २० ।

म्बितस्यान्येष्वपि प्रतिबिम्बो वक्तव्यः। ननु बहूनां दर्पणानां पुरतस्तिर्यक् प्रसारितस्य वंशदण्डस्य दर्पणेषु भिन्नभिन्नप्रदेशानामिवान्तःकरणेष्वात्मनस्तत्तदन्तःकरणाभिमुखभिन्नभिन्नप्रदेशानां प्रतिबिम्बो वाच्यः। सावयवत्वे हि तथा वक्तुं शक्यम्। न च निदाघार्तस्य जाह्नवीजलनिमग्नसर्वकायस्य सर्वाङ्गीणसुखोत्पत्त्यर्थमा केशादा नखाग्रादन्तःकरणव्याप्तौ सत्यां व्यवधानरहितस्तदभिमुखात्मप्रदेशो लभ्यते यस्य तत्र प्रतिबिम्बो वर्ण्येत। एवमविप्रकृष्टदेशरूपं दूषणं भाष्ये व्यक्तमिति दूषणान्तरमाचार्यैः पूर्वपक्षिमुखेनोद्घाटितम्। रूपवत एव रूपवत्येव प्रतिबिम्ब इत्यस्य चाक्षुषस्यैव चाक्षुषएव प्रतिबिम्ब इत्यर्थः। न ह्यस्य नियमस्य क्व चिद्भङ्गो ऽस्ति मुखादिप्रतिबिम्बे तदीयचाक्षुषसर्वगुणानुभवात् कस्तूरिकादिप्रतिबिम्बे तदाघ्राणे ऽपि सौरभाननुभवाच्च।

गुहादिषु प्रतिध्वनिर्ध्वनेः प्रतिबिम्ब इति के चित्। तन्न। स एव हि गगनगुणः शब्दः दुन्दुभिसमुद्रदावानलझञ्झामारुतादिध्वनीनां पृथिव्यादिशब्दत्वात्। एवं च यद्यप्याभास* इति सूत्रेण प्रतिबिम्बपक्ष उक्त इति प्रतिभाति तथापि एकत्र जीवस्य प्रतिबिम्बत्वाभ्युपगमो ऽन्यत्र तद्दूषणं च परमाप्तस्य सूत्रकारस्य न संभवतीति किंचिदनुसारेण कस्मिंश्चिन्नेतव्ये प्रतिबिम्बदूषणस्याविप्रकृष्टदेशत्वादियुक्तिपूर्वकं कृतत्वाद् आभास एव चेति सूत्रे भाष्यकारैरपि श्रुत्योपपत्त्या वा प्रतिबिम्बत्वस्य समर्थितत्वात्तदेव सूत्रं वृद्धिह्रासभाक्त्व†मिति सूत्रोक्तन्यायात् प्रतिबिम्बसादृश्यप्रतिपादनपरं योज्यं तावताप्यव्यतिकरसिद्धेः। तदधिकरणटीकायां बिम्बप्रतिबिम्बयोर्ब्रह्मजीवदृष्टान्तत्वेनोपादानाच्च। वस्तुतस्त्वाभास एव चेति सूत्रं प्रतिबिम्बत्वरूपस्य प्रतिबिम्बसादृश्यरूपस्य वा ऽऽभासत्वस्य प्रतिपादनपरमेव न भवति षड्विंशतिरित्येव ब्रूयादितिवदेवकारोपहतविधिशक्तिकत्वेन यथाप्राप्तानुवादत्वात्।

तथा हि। प्रकृतावग्नीषोमीयपशावध्रिगुप्रैषे षड्विंशतिरस्य वङ्क्रय इति श्रुतम् अस्य च्छागस्य पशोरेकैकस्मिन् पार्श्वे त्रयोदश त्रयोदशास्थी-

---

* व्याससू॰ अ॰ २ पा॰ ३ सू॰ ५०। † व्या॰ सू॰ अ॰ ३ पा॰ २ सू॰ २०।

नीति षड्विंशतिर्वङ्क्रिशब्दोक्तानि पार्श्वास्थीनीत्यर्थः । अश्वमेधे त्वश्वस्य पशोरेकैकस्मिन् पार्श्वे सप्तदश सप्तदशास्थीनीति चतुस्त्रिंशद्वङ्क्रयः । तत्प्रकाशको वैशेषिको मन्त्रः पठ्यते चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेतीति । तेनोपदिष्टेन षड्विंशतिमन्त्रस्य सर्वथा निवृत्तौ प्रसक्तायां पुनरपि तत्र पठ्यते षड्विंशतिरित्येव ब्रूयात् न चतुस्त्रिंशदिति* । तेन प्राकृतमन्त्रः प्राप्यमाणः किं षड्विंशतिपदयुक्त एव प्राप्नोति उताश्ववङ्क्रिसंख्यानुसारेण षड्विंशतिरिति पदस्थाने चतुस्त्रिंशत्पदोहयुक्त इति संशये षड्विंशतिरित्येव ब्रूयादिति वचनान्नास्ति वचनस्यातिभार इति न्यायात्† षड्विंशतिपदयुक्त एवेति प्रापय्य राद्धान्तितं नवमे‡ । षड्विंशतिरित्येव ब्रूयादिति वाक्यं§ न षड्विंशतिपदयोगेन प्राकृतमन्त्रविधायकम् एवकारोपहतविधिशक्तिकत्वेन तस्य चतुस्त्रिंशन्मन्त्रनिषेधएव तात्पर्यात् । ततश्च निषेधेन वैशेषिकमन्त्रनिवृत्तौ प्राकृतमन्त्रो ऽतिदेशेनैव प्राप्नोतीति षड्विंशतिरितीत्येतत्प्राप्तानुवादकम् । यथाप्राप्ति चानुवादो भवति प्राप्तिश्च चतुस्त्रिंशत्पदोहेनैव यथा द्विपशुके पशुबन्धे द्विपञ्चाशत्पदोहेनैव‖ । तस्मादश्वमेधे चतुस्त्रिंशत्पदोहयुक्त एव षड्विंशतिमन्त्रः प्रयोक्तव्य इति । एवमाभास एवेति सूत्रस्याप्येवकारोपहतविधिशक्तित्वेन जीवः साक्षाद् ब्रह्मैव न भवतीति भाष्यदर्शिते निषेधएव तात्पर्यम् । आभास इति तु यथाप्राप्तानुवादकम् । प्राप्तिश्च वृद्धिह्रासभाक्त्वमिति सूत्रोक्तन्यायात् प्रतिबिम्बसादृश्यस्येति तस्यैवानुवादकं न तु कस्य चिदर्थस्य विधायकम् । तस्मादवच्छेदपक्षे न सूत्रादिविरोधशङ्का ।

तत्र तत्र¶ प्रतिबिम्बत्वव्यवहारस्तु वृद्धिह्रासभाक्त्वसूचकप्रसादृश्यमूलो गौणः । न हि ज्वलनादिभिन्नत्वेनावगते माणवके ऽग्निरधीते ऽग्निरागच्छतीत्यादिप्रयोगसहस्रसत्त्वे ऽप्यग्निशब्दो माणवके मुख्यत्वमश्नुवीत अन्तःकरणाकृतस्यैवात्मनो जीवान्तर्यामिभावेन भेदस्त्वविद्याश्रयत्वतद्विषयत्वान्तःकरणसंवलितत्वतदसंवलितत्वाद्युपाधिभेदादुपपद्यते । अन्यथा षडस्मा-

---

* चतुस्त्रिंशदिति ब्रूयादिति २ पु॰ । † न्यायाच्चेति २ पु॰ पा॰ ।
‡ जै॰ सू॰ अ॰ ६ पा॰ ४ सू॰ १-२१ ।
§ ब्रूयादिति वचनाठिति वाक्यमिति २ पु॰ पा ।
‖ पदोहत्वेनेति २ पु॰ पा॰ । ¶ तत्रेत्येकमेव १ पु॰ ।

कमनादय इति सिद्धान्ते जीवेश्वरभिन्नत्वेनाभ्युपगतस्य जीवेश्वरतद्भेदादिसकलप्रपञ्चविवर्ताधिष्ठानत्वेन सर्वगतस्य शुद्धचैतन्यस्याप्यन्तःकरणे सत्त्वमवर्जनीयं तत्तु प्रतिबिम्बपक्षमाश्रित्य द्विगुणीकृत्य वृत्त्युपपादनेनापि न निर्वहतीति त्रिगुणीकृत्य वृत्तिरुपपादनीया भवेत् । प्रतिब्रह्मोपासनमुपास्यधर्मिभेदस्याचार्य्यैरानन्दमयाधिकरणारम्भे* वक्ष्यमाणत्वात् । दहरशाण्डिल्यविद्याद्युपास्यभिन्नभिन्नसगुणब्रह्मसत्त्वमपि तस्मिन्नभ्युपगन्तव्यमिति तदर्थं चतुःपञ्चगुणादिवृत्तिरप्युपपादनीया भवेत् । न च तदुपपादनं शक्यम् । दृष्टान्ताभावात् । तस्माद् जीवेश्वरोपाधिभ्यां वास्तवतदुभयाभावेन तत्तद्गुणोपाधिभेदेन चावच्छेदकभेदेन जीवेश्वरशुद्धचैतन्यादीनां भेद आस्थेयः । एवं जीवेश्वरयोरप्यवच्छेदकभेदेन भेदो भविष्यतीति नानुपपन्नमत्र किं चिदिति ॥

इत्थं सत्संप्रदायाध्व†प्राप्तयोः पक्षयोर्द्वयोः ।
समर्थनं यथाबुद्धि कृतं प्रीत्यै विपश्चिताम्‡ ॥

इति चतुस्सूची समाप्ता ॥

---

* व्याससू॰ अ॰ १ पा॰ १ सू॰ १२ । † सत्संप्रदायाच्चेति २ पा॰ ।
‡ अत्र चतुर्थं समन्वयाधिकरणं संपूर्णम् । तत्र सूत्रम् १-तत्तु समन्वयात् ४ इति ।

परमेति । परं सर्वपूर्वभाविजगत्कारणं वस्तु तद्विषया या मा प्रमा सदेव सोम्येदमित्यादिकारणवाक्यजन्या सा निरतिशयानन्दादिस्वरूपलक्षणा- ङ्कितं सर्वज्ञं यं विषयीकरोति न त्वतथाभूतं प्रधानादिकं प्रस्तोष्यमाणाधि- करणन्यायात् तं पुरुषोत्तमं वन्दइत्यर्थः । परा उत्कृष्टा मा श्रीर्महालक्ष्मी- र्यमालिङ्गतीत्यर्थान्तरमप्यनेन क्रोडीकृतम् । यद्यपि तदन्या का चिदपरा लक्ष्मीर्नास्ति तथापि तस्या एव सन्ति रूपभेदा देवमनुष्याद्यनुग्रहार्थं तत्र तत्र तारतम्येनाविर्भूतास्तदंशकलाविशेषरूपाः सौम्यासौम्यैर्जगद्रूपैस्त्वयैतद्वि पूरितमित्यादिपुराणवचनप्रसिद्धाः । तदपेक्षया परत्वमिह भगवद्दिव्यमहि- षीरूपे विवक्षितमिति परशब्दस्य व्यावर्त्तकत्वाद्विशेषणसमासोपपत्तिः । १०१ । १

ईक्षतेर्नाशब्दम् ॥ ५ ॥

यदि सर्वज्ञे इति । सर्वज्ञत्वं चेतनस्य ब्रह्मण एव संभवति नाचे- ११ । ५
तनस्य प्रधानादेरिति कारणवाक्यानां ब्रह्मपरत्वं तत एव सिध्यतीति भावः । **सर्वज्ञे जगत्कारणइति ।** ननु सर्वज्ञे समन्वयप्रदर्शनेन चेतनत्वं नोप- क्षिप्तं किं तु प्रथमसूत्रमारभ्यैव प्राप्तम् । प्रथमसूत्रे विचार्यत्वेन प्रतिज्ञातस्य नित्यशुद्धबुद्धमुक्तत्वरूपप्रवृत्तिनिमित्तानुसारेण चेतनत्वेनाभिमतस्य ब्रह्मण एव लक्षणप्रमाणाकाङ्क्षाक्रमेण जन्मादिसूत्रत्रयप्रवृत्तेः । अतः सर्वज्ञत्वोपक्षिप्तं चेतनत्वमाक्षिप्य समर्थ्यतइत्ययुक्तम् । एवं च तच्च ब्रह्मणीत्यादिव्याख्येय- टीकाग्रन्थो ऽप्ययुक्त इति चेत् । उच्यते । नित्यशुद्धबुद्ध*मुक्तस्वभावे जन्मादि- सूत्रोदाहृतनिर्णयवाक्यानुसारेण समन्वयसूत्रव्यवस्थापितपरमपुरुषार्थतानुसा- रेण च निरतिशयानन्दरूपे ब्रह्मण्येव समन्वय इहाक्षिप्यते । अत एवाव्य- वहितेन समन्वयाधिकरणेनाक्षेप्याक्षेपिकी† संगतिः सा च तदधिकरणार्थानु- वादकेन टीकाश्लोकेनैव व्यञ्जितेत्याचार्यैर्नोद्घाटिता । टीकायां सर्वज्ञं सर्व- शक्ति यद् जगत्कारणं तद् ब्रह्मेति नाद्यापि सिद्धमित्युक्तिः सर्वज्ञत्वस- र्वशक्तिकत्वयोः प्रधाने पूर्वपक्षिणा ऽङ्गीकृतत्वाद् जगत्कारणं ब्रह्मेत्यत्रैव विवाद इति प्रागुक्तमपि तदेतदधिकरणपूर्वपक्षनिराकरणपर्यन्तमनुक्तप्रायमि- त्येतदभिप्राया न तु ब्रह्मेति प्राङ्नोक्तमित्यभिप्राया प्रथमसूत्रमारभ्य

* बुद्धेति २ पु॰ नास्ति ।   † करणेनाप्याक्षेपिकीति १ पु॰ पा॰ ।

सूत्रभाष्ययोस्तदुक्तेः स्पष्टत्वात् । सर्वज्ञत्वेन चेतनत्वाक्षेपोक्तिस्तु तद्दृढीकरणाभिप्राया योज्या । जीवाणुव्यतिरिक्तेत्यादिटीकायां यथा जगदुपादानकारणाधिष्ठातुर्जीवव्यतिरिक्तत्वविशेषणमपेक्षितं जीवा एव कर्मद्वारा तदधिष्ठातार इति मताद् भेदप्रदर्शनार्थं न तथा ऽणुव्यतिरिक्तत्वविशेषणं प्रधानव्यावर्त्तनार्थं चेतनत्वविशेषणं च तस्यापेक्षितम् । अणवो जगदुपादानभूतान् परमाणूनधितिष्ठन्तीति वा प्रधानं तानधितिष्ठतीति वा मतस्य कस्य चिद् निरसनीयाभावात् । तथाप्यर्थगत्या तद्विशेषणद्वयं कणादमतस्याणुसङ्घातवादात् प्रधानवादाच्च भेदप्रदर्शनार्थत्वेन योजनीयमित्यभिप्रेत्य व्याचष्टे **अणुव्यतिरेकेणेति** ।

१०६ । ११ **परमाणव इति सिद्धान्ताद् भेद इति** । सिद्धान्ते ऽपि जीवव्यतिरिक्तेश्वरनिमित्ताधिष्ठिताः सन्ति परिणाम्युपादानभूता जीवानामविद्या इति ततो भेदप्रदर्शनार्थं परमाणव इति विशेष्यभाग इत्यर्थः । ज्ञानक्रियाशक्तौ खल्वित्यादिश्लोकव्याख्यानटीकाग्रन्थेन स्पष्टीकृतमपि ज्ञानक्रियाशक्त्यभावादित्यत्राभिमतं समासं तत्र टीकाग्रन्थे ज्ञानाभावसाधितेन ज्ञानशक्त्यभावेन ज्ञानाभावसाधने अन्योन्याश्रयः शक्त्यभावेन शक्त्यभावसाधने आत्माश्रय इति शङ्कावकाशदानाय स्मारयति **ज्ञानक्रिययोः शक्ती इति** । दत्तावकाशशङ्कासमाधानार्थमाह **यस्य हीति** । सामान्याभावसिद्ध्यपेक्षं विशेषाभावसाधनमिति न दोष इति समाधानाभिप्रायः । **नन्वपरिणामिन्यपीति** । सर्वज्ञ इत्यादिषु कर्त्रर्थप्रत्ययः सर्वविषयज्ञानाश्रयत्वमात्रेणोपपद्यते । सविता प्रकाशते चैत्रः पश्यतीक्षते करोति स्वपितीत्यादिप्रयोगेषु धात्वर्थाश्रयत्वस्यापि तदभिधेयत्वदर्शनादिति भावः ।

नन्वेकमपि ज्ञानक्रिययोराश्रयत्वमर्हति तयोर्व्यासज्यवृत्तित्वाभावादि-
,, । २० त्याशङ्क्य व्याचष्टे **एकरूपत्वादिति** । अनेन प्रथमव्याख्याने गुणापेक्षानेकरूपत्वनिषेधो द्वितीयव्याख्याने अवयवापेक्षस्तन्निषेधश्च कृतो भवति । प्रथमव्याख्याने निर्गुणत्वहेतोः श्लोकव्याख्याने संगृहीतस्य श्लोकेनासंग्रहो वैकल्यमापादयेद् द्वितीयव्याख्याने तु निरवयवत्वहेतुरपि चेत्यादिपूर्वपक्षान्तभाष्येण दर्शितो*ऽत्राकृष्ट इति श्लोके तदसंग्रहो न वैकल्यापादक इति विशेषः । निरवयवत्वहेतुः कृत्स्नप्रसक्त्यधिकरण†पूर्वपक्षन्यायेनापरिणामित्वसा-

---

* पूर्वपक्षान्ते भाष्ये दर्शित इति २ पु॰ पा॰ । † व्याससू॰ अ॰ १ पा॰ १ सू॰ २६ ।

धकः । ननु निरवयवत्वं श्रुतिसिद्धत्वेन सिद्धान्त्यभिमतमपरिणामित्वे हेतूकर्तव्यम् । हेतुवत्साध्यमपि तथात्वेन सिद्धान्त्यभिमतमेव किमर्थं तच्च हेतुगवेषणं किमर्थं चापरिणामित्वक्रियाज्ञानाभावतदुभयशक्त्यभावप्रणाडिकया सर्वज्ञानसर्वशक्त्यभावप्रसाधनम् । अपरिणामित्वमेव ब्रह्मणि जगदुपादानप्रतिपादकवाक्यसमन्वयप्रत्याशां त्याजयति ज्ञानक्रियाभावो जगत्कर्तृप्रतिपादकत्वाभिमतवाक्यसमन्वयप्रत्याशामपि जगत्कारणत्वाक्षिप्तं सर्वज्ञत्वं सर्वशक्तिकत्वं च ब्रह्मणो न सम्भवतीति प्राक्सिद्धार्थाक्षेपार्थं तस्य सर्वविज्ञानसर्वशक्त्यसम्भवप्रसाधनमिति चेन्न । तथापि प्रधाने त्वस्ति सम्भव इत्यस्य वैयर्थ्यापत्तेः । प्रधानस्योपादानत्वसिद्ध्यर्थं सर्वशक्तिकत्वोपपादनापेक्षायामपि कर्तृत्वोपयोगिसर्वज्ञत्वोपपादनवैयर्थ्यानिवारणात् । प्रधानस्य कर्तृत्वमपीष्यतइति चेन्न । कर्तृत्वस्याभिव्यक्तसार्वज्ञ्यापेक्षत्वेन शक्तिरूपसार्वज्ञ्योपपादनस्यानुपयोगित्वापत्तेः । उच्यते । यः सर्वज्ञः सर्ववित् परास्य शक्तिर्विविधैव श्रूयतइत्यादिश्रुतीनां प्रधाने समन्वयार्थं तत्र तदुभयोपपादनं भाष्यानुसाराद् ब्रह्मणि तत्समन्वयनिरासार्थं च तत्र तदुभयानुपपत्तिप्रदर्शनं ब्रह्मणो जगत्कारणत्वाङ्गीकारे तदुपपादनार्थमनेकत्वाद्यभ्युपगमावश्यम्भावात्तदेकत्वापरिणामित्वनिर्गुणत्वनिष्क्रियत्वनिर्द्धर्मकत्वश्रुतिसमन्वयो ऽपि* ब्रह्मणि त्वदभिमतो न सिद्ध्येदिति दर्शयितुमित्थं प्रणाडिकाश्रयणम् ।

प्रयुक्त आक्षिप्त इति । अत्राक्षिप्तत्वं तादर्थ्येन ।

> पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
> पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः† ॥

इति सांख्यवचनात् । पुरुषस्य विकारावस्थापन्नप्रधान‡प्रदर्शनरूपभोगार्थं तस्य कैवल्यार्थं च प्रधानपुरुषयोर्जडचेतनयोः क्रियाज्ञानशक्तियुक्तयोरुभयोरप्येकफलसंपादनार्थं प्रवृत्तयोः पङ्ग्वन्धयोरिव संयोगस्तत्कृतश्च महदादिसर्ग इत्येतदर्थपरत्वेनास्य वचनस्य तत्त्वकौमुद्यां व्याख्यातत्वाच्च । प्रायपाठस्येक्षतिश्रुतिस्वारस्यभञ्जकत्वं विधिश्रुतिस्वारस्यभञ्जकत्ववद्युक्तमिति विभावयितुमप्यप्रायन्यायोत्पत्तिस्थलमुदाहरति **यज्ञेति ।**

---

* समवायो ऽपीति १ पु॰ पा॰ । † सांख्यकारिका २१ । ‡ प्रधानेति नास्ति ३ पु॰ ।

१०२ । ३ **प्रधानाग्नेयप्रायवचनादिति** । शिरो ह वा एतद्यज्ञस्य यदाग्नेयो हृदयमुपांशुयाजः पादावग्नीषोमीय इति प्रधानाग्नेयाग्नीषोमीयप्रायपाठादिति यावत् । नन्वाग्नेयाग्नीषोमीययोर्येन दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति फलवचनेन प्राधान्यमवगम्यते तेनैवोपांशुयाजस्यापि तदवगम्यतएव पूर्णमासपदप्रवृत्तिनिमित्तस्य पौर्णमासीकालसंबन्धस्य त्रिष्वप्यविशेषादतस्तदुभयप्रायपाठेनोपांशुयाजस्य प्राधान्यसिद्ध्युक्तिरयुक्तेति चेत् । उच्यते । उपांशुयाजाधिकरणसिद्धान्ते प्रायवचनाच्चेति* गुणसूत्रस्येदं व्याख्यानम् । यदाग्नेयादिप्रायपाठादुपांशुयाजस्य प्राधान्यमभ्युपगन्तव्यमिति । तच्चाधिकरणं जामि वा एतद्यज्ञस्य क्रियतइत्यादिसंदर्भे विष्णुरुपांशु यष्टव्य इत्यादिवाक्यत्रयं विध्यर्थोचिततव्यप्रत्यययोगाद् यागत्रयविधायकमदेवतमन्तरावाक्यं यागत्रयसमुदायानुवादकमिति पूर्वपक्षप्राप्तौ जामितादोषोपक्रमतन्निर्हरणोपसंहारैकरूप्यावगतैकवाक्यत्वनिर्वाहार्थं पुरोडाशद्वयनैरन्तर्यप्रयुक्तजामितादोषनिर्हरणोपयुक्तपुरोडाशद्वयान्तरालकालविशिष्टयागविधिनिर्वाहार्थं चान्तरावाक्ये एकस्यैव यागस्य विधिः । तत्र त्रिविधयाज्यानुवाक्यायुगलरूपमन्त्रवर्णप्राप्तविकल्पितदेवतात्रयान्वयानुवादेन† स्तुत्यर्थं विष्ण्वादिवाक्यत्रयमिति सिद्धान्तव्युत्पादनाय । तत्र सिद्धान्ते प्रायवचनाच्चेति सूत्रेण युक्त्यन्तरमुच्यते । तदित्थम् । न केवलमन्तरालविधिसामर्थ्यलब्धेन पौर्णमासीकालसंबन्धेन उपांशुयाजस्य फलवचनगतपौर्णमासपदग्राह्यतया फलान्वयः सिध्यति । उत्पत्तिवाक्याश्रुतपौर्णमासीकालसंबन्धयोराग्नेयाग्नीषोमीययोर्झटिति प्रवृत्तिनिमित्तावगत्या पूर्णमासपदगृहीतयोः फलान्वयबोधने फलवचनस्य चरितार्थतया ऽन्तरालविधिसामर्थ्याच्चेप्यपौर्णमासीकालसंबन्धित्वेन विलम्बितप्रवृत्तिनिमित्तावगमस्योपांशुयाजस्य पश्चात् पौर्णमासपद‡ग्राह्यतया फलवचनस्यार्थान्तरबोधकत्वासम्भवात् । शब्दानां विरम्य व्यापारासम्भवात् । किं तु तावब्रूतामग्नीषोमीयाज्यस्यैव§ तावुपांशु पौर्णमास्यां यजन्निति प्रक्रम्याम्नातेनान्तरावाक्येन बोध्यमानान्तरालकालः प्रक्रान्तः पौर्णमासीरूपः पर्यवस्यतीत्येवमुत्पत्तिवाक्यबोध्यपौर्णमासीकालत्वाविशेषेणाग्ने-

---

* जै० सू० अ० २ पा० २ सू० १२ । प्राये वचनाच्चेत्यपि क्व चित्पुस्तके सौत्रः पाठो दृश्यते ।

† त्रयानुवादेनेति २ पु० पा० ।

‡ पौर्णमासीपदेति २ पु० पा० ।

§ अग्नीषोमाज्यस्येति १ पु० पा० ।

यादितौल्यादुपांशुयाजस्य फलवचनगतपौर्णमासपदग्राह्यतया स सिध्यति। एवं च यदि विष्ण्वादिदेवत्यास्त्रय उपांशुयाजाः स्युः तदा प्रक्रान्ताग्नीषोमवत्तृकवाक्यानुसारेण तद्देवत्यस्यैवोपांशुयाजस्य स्फुटपौर्णमासीकालसंबन्धतया फलवचनगतपौर्णमासीपदगृहीतस्य फलान्वयेन प्राधान्यं सिध्येद् न तु विष्णुप्रजापतिदेवत्ययोरुपांशुयाजयोः । न चेष्टापत्तिः । प्रायपाठेनोपांशुयाजमात्रस्य प्राधान्यावगमात्। अतस्तन्निर्वाहार्थमन्तरावाक्यविधेयो विकल्पितविष्ण्वादिदेवतात्रययुक्त एक एवोपांशुयाजः स्वीकर्तव्यः । न च तथाप्यग्नीषोमवत्तृकवाक्यानुसारेणाग्नीषोमदेवत्यप्रयोगएवोपांशुयाजस्य प्राधान्यं सिद्ध्येद् न तु विष्णुप्रजापतिदेवत्ययोः प्रयोगयोरिति दोषतौल्यं शङ्कनीयम् । यागैक्ये विष्णुप्रजापतिदेवत्यप्रयोगयोरप्युपलक्षणतया तद्देवताभूताग्नीषोमान्वयावैकल्यात् । अत एव सोमयाजिनामग्नीषोमीयपुरोडाशाभावादेकपुरोडाशे पूर्णमासयागे* अन्तरालकालाभावेनोपांशुयाजाऽप्राप्तिमाशङ्क्य अनपायो हि कालस्य लक्षणं हि पुरोडाशा†विति दशमाध्यायसूत्रेणाग्नीषोमीयपुरोडाशाभावे ऽपि तदुपलक्षितकालावैकल्यात् तत्प्राप्तिः समर्थितेति । एवं सत्यपि फलवचने उपांशुयाजमात्रस्य प्राधान्यं मा भूदिति शङ्कायामविशेषेण तन्मात्रप्राधान्यसमर्पकप्रायपाठप्रदर्शनं युक्तमेव । एवं च तत्र यथा प्रधानाग्नेयादिप्रायपाठस्य सैद्धान्तिकमूलयुक्तिसहकृतस्य तव्यप्रत्ययत्रय‡गतविधिस्वारस्यभञ्जकत्वमेवमिह गौणेक्षणप्रायपाठस्य सर्वज्ञत्वाद्यनुपपत्तिसहकृतस्येक्षतिश्रुतिस्वारस्यभञ्जकत्वमुपपद्यतइति भावः ।

चकारो विशेषवाची तुशब्दसमानार्थ इति । यस्य प्रपञ्च १०२ । २: नार्थो ऽयमपि च प्रागुत्पत्तेरित्यादिग्रन्थः तस्मिन्न केवलस्याकार्यकारणस्येत्यादिपूर्वग्रन्थे पुरुषस्य सार्वज्ञ्यानुपपत्तिप्रदर्शनपूर्वकं त्रिगुणत्वात्तु प्रधानस्येत्यादिना प्रधानस्य सर्वज्ञत्वाद्युपपादनमेकग्रन्थतया तुशब्दयोगेन दृष्टमितीहापि चकारस्त्वर्थो ग्राह्यो न तु स्वतन्त्रयुक्त्यन्तरप्रदर्शनार्थतया योजनीय इति भावः । **तदनभ्युपगच्छतस्तव गौणं स्यादिति§ ।** ज्ञानोत्पत्ति-

---

* पूर्णमासयोगे इति ३ पु. पूर्णमासप्रयोगे इति १ पु. पा. ।

† जै. सू. अ. १० पा. ८ सू. ६६ । अनपायश्च कालस्येति सौत्रः पाठः ।

‡ त्रयेति नास्ति ३ पु. ।

§ तदनभ्युपगच्छतस्तव न गौणं स्यादिति ३ पु. पा. तदभ्युपगच्छतस्तव न गौणं स्यादिति २ पु. पा. ।

प्रक्रियायां भाट्टमतमनभ्युपगच्छतस्ते ज्ञानकर्तृत्वं गौणं स्यादित्यर्थः । तद-
भ्युपगच्छतस्तव न गौणं स्यादिति क्व चित्पाठः । तस्मिन् पाठे तद्
भाट्टमतमभ्युपगम्यते चेद् ज्ञानकर्तृत्वमगौणमुपपादयितुं शक्यमित्यर्थः ।
१०३ । १२ **ज्ञानं साधनेनोपलक्षितमिति*** । तपःशब्दार्थेन ज्ञानसाधनेन कर्मणा
तत्साध्यं ज्ञानं लक्षितम् । ईक्षणवृत्तिरूपस्येश्वरज्ञानस्यास्मदाद्यदृष्टजन्यत्वा-
दित्यर्थः । ज्ञानेन साधनेनोपलक्षितमिति पाठे तपसा ज्ञानेन कारणेन
चीयते व्याचिकीर्षारूपोपचयवद्भवतीति श्रुत्यर्थ उक्तो भवति । उपलक्षित-
मिति त्वीक्षणव्याचिकीर्षारूपधर्मद्वययोगस्पष्टीकरणार्थम् । ज्ञानेनोपलक्षित-
मिति पाठे तु तपसेत्युपलक्षणतृतीया । व्याचिकीर्षयेत्यध्याहार्यम् । तथा च
तपसा केन चिद् धर्मेण युक्तं सद् व्याचिकीर्षाद्वयधर्मान्तरजननेनोपचीयत-
इति श्रुत्यर्थ उक्तो भवति । ननु तपसेत्युपलक्षणतृतीया चीयतइत्येतदध्या-
हृतव्याचिकीर्षयेोपचयपरम् । ततो ऽन्नमिति वाक्यं नामरूपप्रपञ्चगतव्याचि-
कीर्षाविषयीभवनार्थकम् । अन्नादित्येतद्व्याचिकीर्षितान्नानन्तरमित्येतदर्थकं
सदन्न†व्याचिकीर्षानन्तरमित्यर्थपर्यवसितम् । प्राणादिसृष्टेः प्राग् भूतसूक्ष्मसृ-
ष्ट्यध्याहार इति क्लिष्टयोजनाश्रयणं किमर्थं तपसा ब्रह्मोपचीयते तदुपचिताद्
ब्रह्मणो ऽन्नं भूतसूक्ष्मपञ्चकं जायते तस्मादन्नात्प्राणादि जायतइति योजना
किमिति नाश्रितेत्याशङ्कापरिहारार्थत्वेन साधारणमिति विशेषणमवतारयति
,, । १६ **तत्र निमित्तमिति** । भोग्यत्वेन सर्वप्राणिसाधारण्यरूपप्रसिद्धान्नगुणयोगो
नामरूपे व्याकरवाणीति व्याचिकीर्षाविषयत्वेनाम्नाते स्थूलप्रपञ्चइव भूतसूक्ष्मेषु
नास्तीत्यतस्तत्स्वारस्यानुसारेणैवं योजना ऽऽश्रितेति भावः । **सप्तमी
निमित्तार्थेति** । तेषु कर्मसु निमित्तेषु सत्स्वित्यर्थे यस्य च भावेन भावल-
क्षणमिति सूत्रेण सप्तमीत्यर्थः । **ज्ञानमयमित्यौपाधिकमीक्षणमुक्तमिति** ।
ज्ञानं तप इत्येतावति वक्तव्ये मयटो ऽधिकस्य वचनाद्व्याख्येयस्य तपःशब्द-
निर्दिष्टेक्षणस्य ज्ञानविकारत्वमवगम्यते‡ न वृत्तिज्ञानं कस्य चिद्वृत्तिज्ञानस्य
विकार इति ज्ञानशब्दस्य स्वरूपज्ञानार्थत्वस्थितौ निर्विकारस्यात्मनः स्वरू-
पज्ञानस्यौपाधिक एव विकार उक्तो भवतीति भावः ।

---

* जातज्ञानेनोपलक्षितमिति मूले पृ॰ १०३ प॰ १२ परिगृहीतपुस्तकानुरोधान्मुद्रितं तत्रोपरितनः पाठो बोध्योऽनुपदं वक्ष्यमाणो वा ।

† एतदर्थकं तदन्नेति २ पु॰ पा॰ । ‡ अवगम्येतेति २ पु॰ पा॰ ।

नियतपूर्वकालवर्त्तित्वरूपं कारणत्वमिति । ननु कारणत्वं पञ्चम्यर्थः कार्यत्वं जनिधात्वर्थः कथमनयोस्तदेतच्छब्दार्थत्वं वर्ण्यते । उच्यते । तत्पदनिर्दिष्टब्रह्मकार्यत्वं जायतइत्यनेनोक्तं ब्रह्मादिपदनिर्दिष्ट-कार्यप्रकृतित्वं तस्मादिति पञ्चम्योक्तं तदुभयं तदेतत्पदाभ्यां न स्पृश्यते किं त्वेतत्पदेन संनिहितवाचिना कालतः संनिधानरूपं कारणब्रह्मव्यावर्त्तकत्वेन कार्यं बादरि*रित्यादिषु प्रसिद्धं कार्यत्वसामान्यमुच्यते तत्पदेन कार्यब्रह्मव्या-वर्त्तकं कारणत्वसामान्यमुच्यते । कारणं ब्रह्म कार्य्यं ब्रह्म परं ब्रह्मापरं ब्रह्मे-त्यादिव्यवहारेषु परस्परव्यावर्त्तक†कारणकार्य्यपरापरविशेषणदर्शनेनाचापि हिरण्यगर्भे कार्यत्वनिर्देशदर्शनेन च परब्रह्मणि कारणत्वनिर्देशापेक्षणात् । यद्यपि तत्पदस्य तत्पदघटितपूर्व्ववाक्याकाङ्क्षानुसारेण पूर्ववाक्यप्रकृतसर्वज्ञ-त्वादिवैशिष्ट्यपरत्वमावश्यकं तथापि तद्वदेव वक्ष्यमाणकार्यब्रह्मव्यावर्त्तकका-रणपरत्व‡मप्यावश्यकमित्युभयपरत्वे न कश्चिद्दोषः । १०३ । २०

प्रायपाठो न स्वयं श्रुत्यादिप्रमाणविरोधेन कस्य चिदर्थस्य प्रापणे प्रभवति किं तु संशयनिवर्त्तनमात्रइत्यत्र साक्षित्वेनाधिकरणमुदाहरति **द्वितीये स्थितमिति । वत्सनिकान्ताः** वत्सप्रियाः । दार्शपूर्णमासिके ईषामालभेतेत्यालभतिश्रवणे ऽपि व्यभिचारवारणार्थं प्राणिद्रव्यसंयुक्तइति विशेषणम् । एवं चात्र यजेस्तदनुमापकद्रव्यदेवतासंबन्धस्य चाश्रवणे ऽपि प्राणिद्रव्यसंयुक्तालभतिलिङ्गेनानुमिते यागे सोमयागविकृतिष्विव मासाग्नि-होत्रादिविकृतिष्विव च प्रकृतितो देवताप्राप्तिर्भविष्यति । प्राणिद्रव्यसंयु-क्तालभतिसादृश्येन दैक्षपशोः प्रकृतित्वप्राप्तेः । न च संस्कारप्रायपाठात् संस्कारविधिरत्र शङ्क्यः । अन्यार्थदर्शनरूपस्य प्रायपाठलिङ्गस्य स्वातन्त्र्येण किञ्चिदर्थप्रापकत्वाभावादिति भावः । **संज्ञपनाऽभिधायीति ।** यद्यपि १०४ । १०
वायव्यादिवाक्येष्वपि चोदकादर्थाद्वा प्राप्तस्य स्पर्शस्याभिधानं संभवति दृष्टं च पशुयागविधिवाक्येष्वपि त्वाष्ट्रं पात्नीवतमालभेत ईशानाय परस्वत आलभेत इत्यादिष्वालभतेः स्पर्शमात्राभिधायकत्वं पर्यग्निकृतं पात्नीवतमु-त्सृजति तान् पर्य्यग्निकृतानुत्सृजतीति तत्र पर्यग्निकरणान्तोत्सर्गविधानेन

---

* व्या· सू· अ· ४ पा· ३ सू· ७ ।
† परव्यावर्तकेति ३ पु· पा· ।
‡ कारणत्वपरत्वमिति ३ पु· पा· ।
§ संज्ञापनेति १ पु· पा· ।

१ संज्ञपनाभावात् तथापि वाजपेये प्राजापत्यपशूनां प्रातःसवने पर्यग्निकरणान्ताङ्गकलापं कृत्वा विरम्य माध्यन्दिनसवने ब्रह्मसामस्तोत्रकाले तेषां संज्ञपनं कार्यमिति संज्ञपनोत्कर्षविधानार्थं तान्पर्य्यग्निकृता*नुत्सृजति ब्रह्मसाम्न्यालभतइति वाक्ये संज्ञपने ऽप्यालभतेर्दृष्टत्वाद्वायव्यादिवाक्येष्वभयथाप्युपपत्तेः संज्ञपनाभिधायित्वमुक्तम् । **द्रव्यदेवतासंबन्धाभावादिति ।** द्रव्यदेवतासंबन्धो ह्यनन्यथासिद्धं यागानुमाने लिङ्गं कार्यकारणभावमूलकानुकूलतर्कसद्भावाद् न तथेदमालभतिलिङ्गम् । तदिहैतल्लिङ्गानुमेययागविधिर्भवतु उत गुणकर्मप्रायपाठलभ्यगुणकर्मविधिरिति संशये अन्यार्थदर्शनरूपमपि वैदिकं लिङ्गं सहचारदर्शनमात्रकल्प्यव्याप्तिमूलकाल्लौकिकानुमानाद् बलवदतः प्रायपाठेन गुणकर्मत्वसिद्धिरित्याशयः । किं चैवं सति विधेर्दृष्टार्थत्वं लभ्यते वत्सस्य स्पर्शेन लालनं हि वत्सलां गां प्रस्नावयद्दोहनोपयोगीति सार्थवादविषयवाक्यलेखनेनाविष्कृतम् ।

१०४ । १५ **तन्मते कार्य्याणामिति ।** कार्य्याणां महदहंकारादीनामधिष्ठातुरीश्वरादधिष्ठातुरीश्वरस्योपादाना†त्प्रधानाच्च भेदादित्यर्थः । न तु कार्य्याणामीश्वरादुपादानाच्च भेदादित्यर्थः । सांख्यमतइव पातञ्जलमते ऽपि सत्कार्यवादेन कार्योपादानाभेदाभ्युपगमात् । एवं चाधिष्ठातुरिति पञ्चम्यन्तषष्ठ्यन्तयोस्तन्त्रेणोच्चारणमिति द्रष्टव्यम् । एतदनुरोधेन टीकायां तेषां भेदेन कार्यत्वादित्यस्याधिष्ठातुरीश्वराद् भेदेन कार्यत्वादित्यर्थः । कार्य्याणां कारणेनाभेदादित्यत्र कारणेनेत्यस्याधिष्ठात्रेत्यर्थश्चेति द्रष्टव्यम् । यद्यपीत्यादिटीकाग्रन्थेन छान्दोग्ये वियत्सृष्टिस्त्यक्तेति सिद्धवत्कृत्य वक्ष्यमाणत्रिवृत्करणानुपयोगात्तत्त्याग इत्युपपाद्यते । इदमयुक्तम् । वियदधिकरणे‡ श्रुत्यन्तरश्रुतवियत्सृष्ट्युपसंहारस्य व्युत्पादितत्वेन तत्र तत्त्यागाभावादित्याशङ्क्य तदुपसंहारव्युत्पादकं वियदधिकरणं यदि न स्यात् तदा छान्दोग्ये तत्त्यागः सन्नपि न दोषः वक्ष्यमाणत्रिवृत्करणानुपयोगेन तत्त्यागस्यान्यथासिद्धेः । तावता वियत्सृष्ट्यनभिमतत्वप्रसङ्गादित्येवं न्यायान्तरव्युत्पादनार्थो यद्यपीत्या-

* विधानात् पर्यग्निकृतानिति २-३ पु० पा० ।

† अहंकारादीनामधिष्ठातुरीश्वरस्योपादानाच्चेति २ पु० पा० ।

‡ व्या० सू० अ० २ पा० ३ सू० १ ।

दिग्रन्थ इत्यवतारयति **आकाशोपक्रमेति । प्रयोगानुगम इति ।** भाष्यकारीयं प्रयोगोदाहरणमित्यर्थः । **न वाचकत्वायेति ।** अनेकार्थत्वस्यान्याय्यत्वादिति भावः ।

ननु यजतेरिति कुत्रत्यः प्रयोगः तत्र वा धातुपरत्वं किं न स्यादिति शङ्काद्वयं परिहर्तुं यजतेरिति प्रयोगयुक्तं जैमिनिसूत्रं लिखित्वा ऽधिकरणमुपन्यस्यति **सप्तमे स्थितमिति । शाकादिषु सिद्धेष्विति ।** शाकादि- १०६ । २३
पाकेषु सिद्धवत्कृतेष्वित्यर्थः । यद्वा यथा शाकादिषु प्राक्सिद्धेषु विद्यमानेषु तेषां प्राप्तिं सिद्धवत्कृत्यौदनपाकमात्रं विधीयते तथेत्यर्थः । यद्यपि शाकानामोदनपाकस्वरूपे तत्फलओदने चानितिकर्तव्यतारूपेणाकाङ्क्षा तथाप्योदनस्य फलं भोजनमिति तत्राकाङ्क्षासत्त्वादाकाङ्क्षामात्रे दृष्टान्तोऽयम् । ननु तत्र शाकादिषु यथा कथं चिदाकाङ्क्षामात्रं वा ऽस्ति इह त्वितिकर्तव्यताकाङ्क्षैव नास्ति यथाश्रुति सौर्य्यचरुयागमात्रेण ब्रह्मवर्च्चसाऽपूर्वोत्पत्त्युपपत्तेरिति चेत् । उच्यते । सौर्य्ययागेन ब्रह्मवर्च्चसं कुर्यादिति विधौ न ज्ञायते केन प्रकारेण तेन ब्रह्मवर्च्चसाऽपूर्वं कर्त्तव्यमिति । अतस्तेन कथं कर्तव्यमिति भवत्याकाङ्क्षा । न हि पाकेनौदनं कुर्वित्यत्र निर्ज्ञातप्रकारे ओदनपाकवत् पाकेन धात्वन्तरं कुर्वित्यत्रानिर्ज्ञातप्रकारे ऽप्याकाङ्क्षा न भवति । तदिहाकाङ्क्षापूरणार्थमित्थं कर्तव्यमितीतिकर्तव्यताविधानमपेक्ष्यते । तच्च दर्शपूर्णमासादिष्वग्न्यन्वाधानबर्हिराहरणादिवत् प्रकरणाम्नातं नास्ति । अथाऽपि करणविधानं दृश्यते तेन ज्ञायते नूनमन्यतः संभवत्प्राप्तिकेतिकर्तव्यता ऽत्र विवक्षिता ऽस्तीति । अतो यजतेः सौर्यादियागस्याकाङ्क्षानुसारेण सेतिकर्तव्यताकत्वं युक्तमेव । एवं च यद्यपि सौर्य्यादीनामनितिकर्तव्यताकत्वपूर्वपक्षनिराकरणार्थेन सिद्धान्तेन तेषां सेतिकर्तव्यताकत्वमात्रं सिद्धं तथाप्याष्टमिकेरिष्टिषु दर्शपूर्णमासयोः प्रवृत्ति*रित्याद्यधिकरणैः सेत्स्यद्दर्शपूर्णमासादिप्रकृतिकत्वं सिद्धवत्कृत्य दर्शादिप्रकृतिविहितेत्युक्तम् । नन्वत्र यजतिपदस्य सौर्यादियागपरत्वं वक्तव्यमिति लक्षणा ऽस्तु ईक्षतिपदस्य तु धातुपरत्वमपि युज्यते । यत्रेक्षणं मुख्यं नास्ति ततो मुख्यार्थस्येक्षतिधातोरपि व्यावृत्तेरर्थवद्धातोरपि लिङ्गत्वसंभवादिति चेन्न । अर्थस्याचेतनाद्व्यावृत्त्यवगमं

---

* जै॰ सू॰ अ॰ ८ पा॰ १ सू॰ ११ ।

विना तद्वाचकस्य ततो व्यावृत्तेरवगन्तुमशक्यतया प्रथमोपस्थितस्यार्थस्यै-वाच लिङ्गतौचित्यात् । तदेतन्न चाविवक्षितार्थधातुस्वरूपस्य चेतनोपादानसाधनत्वसंभव इति टीकाग्रन्थेन स्पष्टत्वान्नोक्तम् ।

१०७ । ३ **अस्पृष्टस्य पुरुषस्यैवेति ।** क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर* इति पातञ्जलसूत्रलक्षितस्येश्वरस्येत्यर्थः । **ईक्षणं करोतीत्येवंपरं न त्वालोचयतीत्येवमर्थमिति ।** ईक्षणं ब्रह्मप्रकाशमात्रं सवितृप्रकाशवदकर्मकत्वेनाप्युपपद्यते आलोचयतिस्तु कर्मापेक्ष एवेति तात्पर्यम् । **गौणश्चेदित्यादिभाष्यमिति ।** भाष्यग्रहणेन सूत्रे किं चिद्व्याख्यातव्यमस्तीति सूचितम् । तत्प्रदर्श्यते । पूर्वसूत्रेण ब्रह्मणि ईक्षतिलिङ्गसमन्वये सिद्धे सार्वज्ञ्याद्यनुपपत्तिसहकृतत्वाभावाद् गौणप्रायपाठमात्रं यद्यपि श्रुतेर्बाधकं न भवति तथापीक्षणं प्रधाने गौणं कर्तृत्वं ब्रह्मणि वेति विशये प्रायपाठमात्रमपि नियामकं भवितुमर्हतीति शङ्कितुस्तात्पर्यं प्रथमश्रुतनिरपेक्षप्रकृत्यर्थगौणत्वायोगादिति परिहारान्तरं नेत्यनेन सूच्यते ।

प्रकाशकत्वाद् ज्योतिष्ट्वेन रूपितेति† । ज्योतिष्टोमनामधेयस्य ज्योतींषि स्तोमा अस्येति निर्वचनार्थं त्रिवृत्पञ्चदशसप्तदश एकविंशः एतानि वाव तानि ज्योतींषि य एतस्य स्तोमा इत्यर्थवादे स्तोत्रीयानवकादिरूपेषु त्रिवृदादिस्तोमेषु ज्योतिःशब्दः प्रयुक्तः । ज्वलने रूढस्य तस्य तेषु प्रयोगे प्रकाशकत्वसादृश्यं निमित्तमिति । यो हि त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति यः पञ्चदशः स तं यः सप्तदशः स तं य एकविंशः स तमिति वाक्यशेषेण दर्शितम् । प्रथमयज्ञे ज्योतिष्टोमे ऽनुष्ठितास्त्रिवृदादिस्तोमाः पश्चादनुष्ठेयानन्यान् क्रतून् प्राप्तास्तान् दीपयन्ति प्रकाशयन्ति पूर्वमनुष्ठिताः पुनःप्रयोगे अभ्यासपाटवात्सम्यगनुष्ठीयमानाः स्वाश्रयान्

१०८ । १२ क्रतून् उज्ज्वलान् कुर्वन्तीति तस्यार्थः । **स्तुतिसमुदायवत्त्वादिति ।** स्तुतिशब्देन स्तोत्रीयकृक्साध्यगुणिनिष्ठगुणाभिधानवाचिना स्तोत्रीयकृक्तंव्यारूपाः स्तोमा लक्षणीयाः त्रिवृदादिशब्दानां स्तोमविशेषवाचित्वात् । **एकवचनं छान्दसमिति ।** इदमुपलक्षणम् । गोनायादिशब्दसाम्येन श्रुतावशनायाशब्दस्य व्युत्पादितत्वात् कर्मण्यणन्तत्वेन प्राप्तस्य ङीपो ऽभावो

* योगसू. पा. १ सू. २४ । † निरूपितेति ५ पु. पा. ।

ऽपि छान्दस इति द्रष्टव्यम् । एकवचनाकारयोः छान्दसत्वोक्तिश्च अशना-
योदन्याशब्दयोरप्सु तेजसि च सञ्ज्ञारूपेण वृत्तिमनाश्रित्य । **आदित्याद्य-
नुग्राहका* देवा इति ।** आदित्यादयश्चक्षुरादीनामनुग्राहका इत्यर्थः† ॥

आनन्दमयो ऽभ्यासात् ॥ १२ ॥ ११० । ४

वृत्तानुवादटीकायां तत्त्व शास्त्रैकसमधिगम्यमिति ब्रह्मणः शास्त्रयो-
नित्वसूत्रसिद्धमानान्तरागम्यत्वानुवादः करिष्यमाणाक्षेपानुपयोगान्न कार्य
इत्याशङ्क्य तद्व्यावर्त्यां शङ्कां दर्शयति **वेदान्तानामिति ।** विचार्य्यत्वेन
प्रतिज्ञातं ब्रह्म प्रमाणमुखेन विचारणीयं ब्रह्मणि यदि वेदान्तवन्मानान्तरमपि
प्रमाणं भवेत्तदा वेदान्तानां ब्रह्मणि प्रामाण्यस्य प्रतिष्ठापितत्वे ऽपि मानान्तर-
विचारार्थमुत्तरसंदर्भारम्भः स्यादिति शङ्कार्थः । मानान्तरैरविधेयार्थमिति
पाठश्चेदयं परिहाराभिप्रायः । यत्प्रमाणं यत्साधनक्षमं तदेव तदभावबोधने
ऽपि प्रभवति । न खलु रूपबोधनाक्षमं श्रोत्रं रूपाभावं बोधयितुं शक्नोति ।
अतः परब्रह्मणि प्रवर्त्तितुमक्षमं मानान्तरं वेदान्तबोध्यतत्स्वरूपापहारे ऽपि न
प्रभवतीति । तमिममर्थं श्रुतेस्तु शब्दमूलत्वा‡दिति द्वितीयाध्याये सूत्रकृदेव
वक्ष्यति ।

न विशेषणमात्रमुपाधय इति । यद्यपि विशेषणमात्रत्वे ऽपि १०६ । १
विषयभेदादुपासनाभेदस्तद्भेदात्फलभेदश्च सिध्यति तथापि सम्भवाद्धर्मि-
भेदपर्य्यन्तः परिहार आश्रितः । ननु भाष्यटीकयोर्वेदान्तेषूपाधिविवक्षा-
ऽविवक्षास्थलविभजनार्थमुत्तरसूत्रारम्भ इत्युक्तमयुक्तम् । न हि वेदान्तत्वोपा-
धिना अत्र ते विचारणीयाः येनात्र विवक्षितोपाधयो ऽपि विचारणीयाः स्युः
किं तु जिज्ञास्यनिर्विशेषब्रह्मप्रमाणत्वोपाधिना । तत्र चेदविवक्षितोपाधय एव
प्रमाणं तर्हि ते जगत्कारणत्वाद्युपलक्षणमुखेन यथा निर्विशेषपर्यन्तास्तत्रैव
प्रमाणं भवन्ति नान्यत्र तथा प्रतिष्ठापितमेव । अत उत्तरसूत्रप्रपञ्चानारम्भश-
ङ्का तदवस्थेत्याशङ्क्यापवादसङ्गत्या सविशेषवाक्यानां तदपवादसङ्गत्या निर्वि-
शेषवाक्यानां च केषां चिद्विचारार्थं तदारम्भ इत्यत्र तयोस्तात्पर्यमाह
अविशेषेणेति । यद्यपि हिरण्मयादिवाक्यानामपि महातात्पर्य्येण निर्विशेषे ११० । १

---

* आदित्याद्या अनुग्राहका इति २ पु॰ पा॰ ।

† अत्र पञ्चमम् ईक्षत्यधिकरणं संपूर्णम् । ‡ व्याससू॰ अ॰ २ पा॰ १ सू॰ २७ ।

पर्यवसानमस्ति तथाप्युपाधिविवक्षा नास्तीत्यस्मिन्नंशे अपवाद इति भावः ।
प्राणाद्युपाध्यवच्छिन्नो ह्यात्मेत्यादिटीकानुसारेण व्याख्यायाऽन्नमयं शरीरम-
नात्मानमत्यन्तमूढानामात्मत्वेन प्रसिद्धमनूद्येत्यादिभाष्यानुसारेण व्याचष्टे
११० । १६ **अथ वा भृगुवल्ल्युक्तेति** । आत्मन आकाश इत्यादिभ्यः प्रकृतिविकारो-
पदेशकेभ्यः पूर्ववाक्येभ्यो विकारार्थस्य बुद्धिसंनिहितत्वाद् भृगुवल्ल्युक्ताधि-
दैविकान्नादियथासंख्याम्नातेनाध्यात्मिकेषु देवतादिषु तद्विकारत्वोक्तिः प्रती-
यतइति भावः । **विकारसन्निधेरिति** । मीमांसाभाष्यकारैरनुष्ठेयानामङ्गा-
ङ्गिभावे प्रमाणानि श्रुत्यादीनि निरूपितवद्भिर्विशये प्रायदर्शना*दिति सूत्रे
गोदोहनादिसंस्काराणां वत्सालम्भस्य चाङ्गाङ्गिभावाभावात् तत्रत्यप्रायप्राठः
सान्निध्याम्नानरूपं स्थानप्रमाणं न भवतीत्यभिप्रेत्यान्यार्थदर्शनरूपलिङ्गत्वेन
व्यवहृतः । इह शास्त्रे सिद्धार्थबोधनोपयुक्तान्यपि श्रुत्यादीनि गृह्यन्तइति
विकारप्रायपाठः संनिधिलक्षणस्थानप्रमाणत्वेन व्यवह्रियतइति न विरोधः ।
ब्रह्म तु ततो ऽप्यान्तरमिति । यथा देवदत्तात्सिंहादीनां बलवत्तरत्वं
प्रमाणान्तरसिद्धमित्यनुक्तमिति गम्यते तथा ब्रह्मण आनन्दमयप्रतिष्ठात्वोक्त्या
ततो ऽप्यान्तरत्वमनुक्तमपि गम्यतइति भावः । **श्रुतिमपीति** । जीवत्व-
इत्यनुषङ्गः । अनुपपत्तेस्तु न शारीर† इत्यादिप्रयोगात् शारीरशब्दो जीव-
स्याभिधानश्रुतिरिति भावः । न च सशरीरस्य सत इत्यादिभाष्यं शारीरश्रुतो
शरीरे भव इति यौगिकार्थस्यापि सत्त्वात् शरीरवतो दुःखमनिवार्य्यमित्या-
नन्दमयशरीरसंबन्धानुमितदुःखभागित्वादपि न ब्रह्मेत्येवमर्थं प्रतीयते
तदयुक्तम् । उत्तराधिकरणे‡ परमेश्वरस्य शरीरवत्त्वेनाऽथापि सर्वपापोदित-
त्वेन च व्यवस्थापयिष्यमाणस्य दुःखाप्रसक्तेरित्याशङ्क्य टीकाकृता मयटः
प्राचुर्य्यार्थत्वे ऽपि ब्रह्मपरत्वमनुपपन्नमित्येतदर्थतात्पर्य्यकतया भाष्यमवता-
,, । २६ र्योऽशरीरस्येत्यादिना तदर्थो वर्णितः । तत्तात्पर्यं विवृणोति **एवमुक्ते हीति** ।
सशरीरत्वे ऽप्यैच्छिकशरीरस्य सविशेषस्य दुःखास्पर्शे सर्वथैवाऽशरीरस्य नि-
र्विशेषस्य तदस्पर्शो ऽनुक्तसिद्ध इति भावः । **सो ऽप्युपाधिवशादिति** ।
प्रियादियोगवद् दुःखलवयोगो ऽप्यतीतानन्तरविज्ञानमयकोशो§पाधिक उप-

* जै॰ सू॰ अ॰ २ पा॰ ३ सू॰ १६ ।
† व्या॰ सू॰ अ॰ १ पा॰ २ सू॰ ३ ।
‡ व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ १६ ।
§ विज्ञानकोशेति ३ पु॰ पा॰ ।

पद्यतइति नासौ मुख्यात्मत्वबाधक इत्यर्थः । तत्प्रकृतवचने मयडिति प्रचुरतायामपि मयटः स्मरणात् । यथा अन्नमयो यज्ञ इत्यन्नप्रचुर उच्यतइति । भाष्योपात्तं व्याकरणसूत्रमुपादाय व्याचष्टे **तत्प्रकृतेति ।** १११ । ९

इदं सूत्रं वैयाकरणैरित्थं व्याख्यातम् । तदिति प्रथमासमर्थात् प्राचुर्य्येण प्रस्तुतमिदमित्यर्थे वर्त्तमानात्स्वार्थे मयट्प्रत्ययो भवतीत्येको ऽर्थः । अस्यान्नमयं यवागूमयीत्याद्युदाहरणम् । प्राचुर्येण प्रस्तुता यवागूरित्यादिस्तदर्थः । यद्यपि प्रकृतशब्दः प्रस्तुतमात्रवाची न क्लृप्तप्राचुर्य्यविशिष्टप्रस्तुतवाची तथापि प्रकृतइत्येतावति वक्तव्ये वचनग्रहणादयं विशेषो लभ्यते । वचनग्रहणं हि लोके यादृशस्य प्रकृतस्य मयटा वचनं प्रत्यायनं प्रसिद्धं तत्र यथा स्यादित्येवमर्थम् । लोके च मयडन्तैरन्नमयादिशब्दैः प्राचुर्य्येण प्रकृतस्य प्रत्यायनं प्रसिद्धमिति । अपरस्त्वर्थः । प्रकृतं प्रस्तुतमुच्यते ऽस्मिन्निति प्रकृतवचनम् । तदिति प्रथमासमर्थात्प्रकृतवचने ऽर्थे मयट्प्रत्ययो भवतीति । अस्यान्नमयो यज्ञ इत्याद्युदाहरणम् । प्रकृतमन्नमस्मिन् यज्ञइत्यादिस्तदर्थः । अस्मिन्नर्थे प्रकृत्यर्थो*दर्थान्तरे प्रत्ययः प्रकृतशब्देन च प्रस्तुतमात्रमुच्यते न तु प्राचुर्य्यविशिष्टमिति पूर्वस्मादर्थाद्विशेष इति ।

वृत्तिकारमते व्याख्यानद्वयमपि नोपयोगि । प्रथमव्याख्यानस्य प्राचुर्य्यविशिष्टप्रकृत्यर्थमात्रपर्यवसितमयड्विधिरूपत्वेन ततो ऽन्नमयो यज्ञ इत्यन्नप्रचुरो यज्ञ उच्यतइति तदीयोदाहरणानुसारेण विवक्षितया ऽवगतस्यानन्दप्रचुरधर्मिपर्यन्तत्वस्यालाभात् । द्वितीयव्याख्याने प्राचुर्यप्रतीत्युपायाभावात् । शब्दार्थनिर्णयाभियुक्तवैयाकरणव्यवहारविरोधिनो ऽनादित्वनिर्णायकप्रमाणरहितस्यान्नप्रचुर इत्यर्थे ऽन्नमय इति व्यवहारस्य लोके क्व चित् क्व चि†त्सतो ऽप्युपादेयत्वाभावात् । अतो वृत्तिकारमतं द्विविधेनापि वैयाकरणकृततत्सूत्रव्याख्यानेन निर्वोढुं न शक्यमिति तन्निर्वाहमुपेत्य धर्म्मिपर्य्यन्तलम्भकत्वाभावे ऽपि विकारशब्दादिति सूत्रोपात्तप्राचुर्य्यप्रतीत्युपयोगिप्रथमव्याख्यानं दर्शयति **तदिति प्रथमासमर्थादिति ।**

अविशदत्वादिति । व्याख्यानव्याख्येयभावः स्पष्टो न भवति किं ,, । १६
तु सूक्ष्मेक्षिकया ऽवसेय इत्यर्थः । तथा हि ब्रह्मविदाप्नोति परमित्यानन्द-

* प्रकृतार्थादिति २ पु॰ पा॰ । † एकवारमेव क्वचिदिति २-३ पु॰ ।

वल्ल्यां प्रतिपाद्यस्य कृत्स्नस्याप्यर्थस्य संग्राहकं सूत्रं तत्र किं तद् ब्रह्म कथं च तद्वेदनं किं च तद्वेदनप्राप्यं परमुत्कृष्टं फलमित्याकाङ्क्षायां तत्त्रितयं स्पष्टीकर्तुं तदेषाभ्युक्तेति ब्राह्मणोक्तार्थप्रतिपादकत्वेनावतारणपुरस्सरं तदनुव्याख्यानरूपः सत्यं ज्ञानमित्यादिमन्त्र आम्नातः । तत्राप्येवमाकाङ्क्षोदेति कथं ब्रह्मणस्त्रिविधपरिच्छेदराहित्यरूपमानन्त्यमपरिच्छिन्नं ब्रह्म च कस्यां गुहायां निहितं वेद्यं कथं तद्वेदनेन ब्रह्मादिस्तम्बपर्य्यन्तप्राणिनिकायव्यवस्थितसकलकामरूपोत्कृष्टफलावाप्तिरिति । अतस्तदानन्त्याद्युपपादनार्थमन्त्रव्याख्यानरूपोऽनुवाकशेषः । तत्रानन्त्यनिरूपणार्थं तस्माद्वा एतस्मादित्यादिकारणवाक्यम् । अत्र तदेतच्छब्दौ व्यवहिताऽव्यवहितब्राह्मणतद्व्याख्यानमन्त्रप्रकृतब्रह्मपरामर्शिनौ । तस्य गुहानिहितत्वविवरणार्थं चतुष्कोशान्तरत्वनिरूपणम् । एवं च यद् ब्राह्मणोपक्षिप्तं मन्त्रवाक्येन विवृतं कारणवाक्यगतेन तदेतत्पदसमानाधिकरणेनात्मपदेन परामृष्टं ब्रह्म तदेव गुहानिहितत्वविवरणार्थानन्दमयवाक्यगतेनान्तरत्वेनात्मशब्देन च प्रत्यभिज्ञायत इति सूक्ष्मदृष्ट्या तत्प्रत्यभिज्ञानमात्रेणावगन्तव्यो मन्त्रब्राह्मणयोर्व्याख्यानव्याख्येयभावः स्पष्टो न भवति कोशवाक्यानामानन्दमयवाक्यस्य च व्याख्यानव्याख्येयभावः स्पष्टः । अन्यो ऽन्तर आत्मेत्येतावत्प्रत्यभिज्ञानसत्त्वादित्यभिप्रेत्य मान्त्रवर्णिकसूत्रं* कोशवाक्यविषयत्वेन नीतमिति तात्पर्यम् ।

ननूदाहृतप्रत्यभिज्ञानेनानन्दमयस्य विज्ञानमयाद्यैक्यसिद्धावपि न तस्य ब्रह्मत्वं सिध्यति तेषामपि ब्रह्मत्वासंप्रतिपत्तेः । तत्संप्रतिपत्तावपि न सिध्यति विज्ञानमयादन्य इति तत्र विज्ञानमयप्रतियोगिकभेदनिर्देशादित्याशङ्कानिराकरणार्थस्य मन्त्रे हीत्यादिटीकावाक्यस्य तात्पर्य्यमाह

१११ । २० **विज्ञानमयादिशब्दैरपीति** । विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते विज्ञानं ब्रह्म चेद्वेद आनन्दं ब्रह्मणो विद्वान् ये प्राणं ब्रह्मोपासते ये ऽन्नं ब्रह्मोपासते इति विज्ञानमयादिपर्य्यायावगताभि†र्ब्रह्मश्रुतिभिर्ब्रह्मैव स्थूलारुन्धतीन्यायेनान्नमयादिकोशरूपतया प्रथममुपदिश्योत्तरोत्तरपर्यायगतैरन्यशब्दैस्तत्तदुपाधिभ्यः प्रविविच्य निर्दिष्टमित्यर्थः । विज्ञानमयादिशब्दैरित्यस्यापि विज्ञानमयादिपर्य्यायगतैरन्यशब्दैरित्यर्थो ग्राह्यः । एवं च कश्चित्तु

* व्या० सू० अ० १ पा० १ सू० १६ । † पर्यायगताभिरिति २ पु० पा० ।

प्रतिबिम्बितघटाकाशादिरित्यादिना प्राणमयादीनां प्राणाद्युपाध्यवच्छिन्नजीवरूपत्वं यदुक्तं तत्पूर्वपक्षिदृष्ट्येति न विरोधः ।

ननु यद्यन्नमयादिपर्याया अपि ब्रह्मश्रुत्या ब्रह्मविषयास्तर्हि विज्ञानमये एव ब्रह्मोपदेशपर्य्यवसानं स्याद् विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते विज्ञानं ब्रह्म चेद्वेदेति मन्त्राम्नाताभ्यां विज्ञानं ब्रह्म चेदिति मन्त्रे सर्वकामावाप्तिफलकीर्तनेन तत्प्रत्यभिज्ञोपबृंहिताभ्यां ब्रह्मश्रुतिभ्यां विज्ञानमयस्य ब्रह्मत्वप्रतिपादने तात्पर्यातिशयप्रतीतेरित्याशङ्क्याह **न चैवमिति** । ननु टीकाभिमते सूत्रार्थे मन्त्रग्रहणमविवक्षितस्वार्थं स्यादित्याशङ्क्य भाष्याभिमतेऽपि सूत्रार्थे सा शङ्का भवतीत्याह **भाष्येऽपीति** । भाष्ये सौत्रमन्त्रपदार्थतया सत्यं ज्ञानमिति मन्त्रमात्रं नोपन्यस्तं किं तु ब्रह्मविदाप्नोति परमित्युपक्रम्येत्यादिसन्दर्भेण महाप्रकरणं तदर्थतयोपन्यस्तम् । अतः प्रकरणानुरोधेनानन्दमयस्य ब्रह्मत्वनिर्द्धारणं सूत्रार्थतया भाष्याभिमतमित्यवसीयते । अत एव भाष्ये प्रकृतहानं विपक्षबाधकत्वेनोक्तमतो मन्त्रपदस्य स्वार्थप्रच्यावनं भाष्यपक्षेऽपि तुल्यमित्यर्थः ।

ननु भाष्यकारपक्षे प्रकरणे मन्त्रगर्भत्वमप्युपचारबीजं न तु टीकाकारपक्षे कोशवाक्येषु तदस्ति । अतस्तत्पक्षे मान्त्रवर्णिकपदमविवक्षितार्थं स्यादित्याशङ्क्य उपायोपेययोरिति टीकोक्तं तत्स्मारयति **विवक्षितं** १११ ।
कृतमिति । अविवक्षितार्थे कृतमिति पाठे मुख्यार्थविवक्षारहितं कृतमित्यर्थः । तद्राहित्यं तु भाष्यकाराभिमते प्रकरणे लक्षणापक्षेऽपि समानमिति भावः । वस्तुतस्तु भाष्यकारपक्षे मन्त्रपदं न प्रकरणपरम् । यतो भाष्ये ब्रह्मविदाप्नोतीति परमोपक्रमोपन्यासस्तस्यान्यपरत्वे प्रकरणान्य एवानन्दमयः स्यादिति शङ्कावारणार्थः कारणवाक्याद्यर्थोपन्यासो मन्त्रस्यासंबन्धिपदनिचयव्यवधानशङ्कावारणार्थः ।

यदानन्त्यं प्रतिज्ञाय श्रुतिस्तत्सिद्धये जगौ ।
तत्कार्यत्वं प्रपञ्चस्य तद् ब्रह्मेत्यवधारय ॥

इति तैत्तिरीयवार्तिकोक्तरीत्या मान्त्रवर्णिकब्रह्मानुवृत्तिसूचनार्थश्च । अन्यथा हि प्रकृतहानेत्यादिग्रन्थः प्रतिपिपादयिषितमान्त्रवर्णिकब्रह्मविषयत्वाभावे बाधकोद्घाटनार्थः । एवं कृत्स्नस्यास्य भाष्यवाक्यस्य सौत्रमन्त्रपद-

मुख्यार्थानुरोध्यर्थपरत्वं मान्त्रवर्णिकमिति सूत्रं भाष्यकृद्भिरित्यादिना विवृतमित्यन्तेन ग्रन्थेनाचार्य्यैर्दर्शितमेव । टीकाग्रन्थश्च सोऽत्र मन्त्रपदं मुख्यार्थे भाष्योक्ततदर्थे वा केन चिदस्वारस्येन न प्रवृत्तः किं तु मन्त्रवर्णस्येव कोशवाक्यजातस्य पर्यालोचनायामप्यानन्दमयस्य ब्रह्मत्वं निश्चेतुं शक्यमतः साऽपि युक्तिरनेन सूत्रेण मन्त्रशब्दस्य गौणीं वृत्तिमाश्रित्य विवक्षितेति सूचयितुमर्थान्तरमाश्रितम् । अत एव सूत्राणामनेकार्थत्वमलङ्कार इत्यर्थद्वयपरत्वमित्येतदुपपादयितुमित्याह सूत्रकार इत्यवतारयामास । अनुपदमेवोत्तरसूत्रावतारिकागतं सूत्रपदमेवमाशयं व्याचक्षाणानामाचार्य्याणामेतत्सूत्रावतारिकागतस्यापि सूत्रपदस्यायमेवाशय इत्यभिप्रायो ऽस्त्येव किं तु भाष्यानुक्तत्वात् टीकोक्तार्थो न श्रद्धेय इति मन्दशङ्कानिराकरणार्थं टीकोक्त एवार्थ उपपन्नतर इति तत्प्रौढिः प्रदर्शिता । केषु चिट्टीकाकोशेषु मन्त्रे हि पुनः पुनरन्योन्तर आत्मेति परब्रह्मण्यान्तरत्वश्रवणादिति पाठं दृष्ट्वा तत्परिष्करणमित्थमाचार्यैः कृतम् । कोशान्तरेषु तु मन्त्रे हि यो वेद निहितं गुहायामिति परब्रह्मण्यान्तरत्वश्रवणादिति पाठो दृश्यते तस्मिन्पाठे मन्त्रोक्तं ब्रह्मणो गुहासंनिहितत्वमन्तरशब्देन प्रत्यभिज्ञायतइत्येतत् स्पष्टमेवेत्यभिप्रेत्य पाठान्तरमेव व्याख्यातम् ।

११२ । २१ यत्र पुनः प्राचुर्यमेवेति । प्राचुर्यस्य धर्मिविशेषणत्वेन निर्देश एव व्यधिकरणसजातीयाल्पत्वस्य निरूपकत्वं दृष्टम् । यथा प्रचुरब्राह्मणो ग्राम इत्यत्र प्राचुर्य्यस्य ग्रामान्तरगतब्राह्मणाल्पत्वं निरूपकं दृष्टमिति । तस्य स्वधर्मिविशेष्यत्वे तु समानाधिकरणविजातीयाल्पत्वमेव निरूपकमत एव ब्राह्मणप्रचुरो ग्राम इति प्रयोगे तद्ग्रामगतशूद्राल्पत्वापेक्षं प्राचुर्य्यं प्रतीयते । न च प्रचुरप्रकाशः सवितेतिवत्प्रकाशप्रचुरः सवितेति प्रयोगे ऽपि नक्षत्रादिगतप्रकाशाल्पत्वापेक्षमेव प्राचुर्य्यं प्रतीयते न तु सवितृगततमोल्पत्वापेक्षं तत्र तमसो बाधितत्वात्तथेहापि स्यादिति शङ्कनीयम् । तत्रापि घनतुहिनसैंहिकेयाच्छादनारोपिततमोऽल्पत्वमपेक्ष्य घनाद्यपसरणसमये तथा प्रयोगात् । तदभावे व्युत्पन्नानां तथा प्रयोगाभावात् । ननु बलवत्तरश्चैत्र इत्यादौ तरबाद्यर्थस्य प्राचुर्यस्य विशेषत्वे ऽपि मैत्रादिगतबलाद्यल्पत्वापेक्षत्वं दृष्टमिति चेद् न । तत्र द्विवचनविभज्योपपदे तरबीयसुनाविति द्विवचनवि-

भज्योपपदविशेषणवशादातिशायनिकप्रत्ययेषु व्युत्पत्त्यन्तरकल्पने ऽपि मयटि तत्कल्पकाभावेनौत्सर्गिकव्युत्पत्तिलङ्घनायोगादिति भावः ।

प्रधानं प्रत्ययार्थं प्राचुर्यं* प्रतीति । यद्यपि मयड्विधायकसूत्रस्य प्रथमव्याख्याने प्राचुर्यं प्रकृत्यर्थस्य विशेषणं मयट् च स्वार्थिकः द्वितीयव्याख्याने मयट् प्रस्तुतान्नादिविशिष्टयज्ञाद्यर्थः प्राचुर्यस्य प्रत्यायनमेव नास्तीति शाब्दिकानां मर्यादा तथाप्यन्नमयो यज्ञ इत्यन्नप्रचुर उच्यतइति वृत्तिकारदर्शितोदाहरणार्थानुसारेण द्वितीयव्याख्याने प्रकृत्यर्थप्राचुर्यविशिष्ट एवान्यपदार्थो मयडर्थ इति वृत्तिकारमतमालोच्यैवमुक्तम् ।

मयड् विकारे मुख्य इत्यादि । नन्वानन्दशब्दाद्विकारार्थो ११३ । २
मयडेव न प्राप्नोति मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोर्नित्यं वृद्धशरादिभ्य इति विकारावयवार्थमयड्विधायकसूत्रयोर्भाषाविषयत्वात्तयोरर्थयोश्छन्दस्यप्राप्तस्य मयटो विधायकस्य द्व्यचश्छन्दसीति सूत्रस्य द्व्यज्भ्य एव शरपर्णादिप्रातिपदिकेभ्यः तद्विधायकत्वादतो मयड् विकारे मुख्य इत्युक्तमयुक्तम् । एवं च विकारप्रायपाठपरित्यागोक्तिरप्ययुक्ता । अन्नरसमयविज्ञानमयशब्दयोरपि मयटो विकारार्थत्वायोगादिति चेन्न । वृद्धशरादिसूत्रगतेन नित्यग्रहणेन तत्प्राप्तिसम्भवात् । न च वृद्धशरादिभ्यो मयटो नित्यत्वसिद्ध्यर्थं तत् पूर्वसूत्रेण सर्वप्रातिपदिकेभ्यो विकल्पेन मयड्विधानानन्तरं वृद्धशरादिसूत्रारम्भसामर्थ्यादेव तेभ्यस्तस्य नित्यत्वसिद्धेः । न च वाङ्मयस्रङ्मयादिरूप†सिद्ध्यर्थं प्रवृत्तस्य नित्यमेकाच इति व्याकरणान्तरसूत्रस्यैकदेशभूतनित्यग्रहणमेकदेशद्वारा तत्सूत्रस्मारणायेति योगविभागार्थं तदिति शङ्क्यम् । शरादिगणे मृद्ग्रहणवैयर्थ्यापत्तेः । अतस्तदेव मृद्ग्रहणमेकाजुदाहरणैकदेशत्वात्सर्वेषामेकाचां स्मारकमाश्रयितुं शक्यमिति नित्यग्रहणमतिरिच्यमानं भाषायामेव वृद्धशरादिभ्यो नित्यमित्येतदर्थकं सच्छन्दसि वृद्धशरादिभ्यो ऽन्येभ्यश्च प्रातिपदिकेभ्यो यथादर्शनं व्यवस्थितविकल्पार्थमित्यङ्गीकर्तुं युक्तमिति ।

ननु तथापि प्राचुर्यार्थमयड्विधायकसूत्रप्रथमव्याख्यानुसारेणात्रत्यानन्दमयपदस्य प्रचुरानन्दार्थत्वपरिग्रहे माण्डूक्यश्रुतिगतानन्दमयशब्दस्य सुषु-

---

* प्रधानप्रत्ययार्थं प्राचुर्यमिति सर्वपुस्तकानुरोधान्मूले मुद्रितम् ।

† वाङ्मयादिरूपेति २ पु० पा० ।

प्रजीवे इव ब्रह्मणि मुख्यत्वमुपपद्यते । ब्रह्मणो मनआदिरूपतयेवान्यावयवत्वेनोपास्यतया निर्देशेपि ब्रह्मश्रुतेर्मुख्यता नापैति । प्रचुर आनन्दो ऽप्यानन्द एवेत्यभ्यस्यमानानन्दपदानामानन्दमयविषयत्वे ऽपि लक्षणा न प्रसज्यते । अतः पूर्वपक्षे मुख्योचितयलङ्घनोक्तिरयुक्ता । एव*मुत्तरपक्षे प्रायपाठमात्रबाधनोक्तिरप्ययुक्ता । पुच्छश्रुतिबाधस्यापि सत्त्वात् । न च पक्ष्यवयवपरत्वे ऽपि तद्बाधस्तुल्यः तस्या वालधावेव मुख्यत्वादिति वाच्यम् । तस्याः पशुपश्चाद्भागावयवइव पक्षिपश्चाद्भागावयवे ऽपि मुख्यत्वात् । बृहद्रथन्तरे पक्षौ यज्ञायज्ञियं पुच्छं तस्मात् सर्वाणि वयांसि पुच्छेन प्रतितिष्ठन्ति पुच्छेनैव प्रतिष्ठायोत्पतन्ति प्रतिष्ठा हि पुच्छमित्यादिश्रुतिषु तत्रापि तस्याः प्रयोगसत्त्वेन विनिगमनाविरहादिति चेत् । अत्रेदं समाधानं विवक्षितम् । आनन्दमय इत्यस्यानन्दप्रचुर इत्यर्थपरिग्रहइव प्रचुर आनन्द इत्यर्थपरिग्रहे ऽपि मुख्यार्थबाधः स्यादेव ब्रह्मस्वरूपानन्दे संख्याधिक्यरूपस्य मुख्यस्य प्राचुर्यस्याभावात् । न हि संख्याधिक्यवत् परिमाणाधिक्यमुत्कर्षो वा प्रचुरशब्दस्य मुख्यो ऽर्थः । अयं पटो ऽस्मात् पटात्† प्रचुर इति वा ऽयं गकारो ऽस्माद् गकारात् प्रचुर इति वा प्रयोगाभावात् । सुषुप्तजीवे दृष्टो ऽप्यानन्दमयशब्दो देहद्वयोपाधिविगमप्रयुक्ताभिव्यक्तिविशेषरूपोत्कर्षलक्षको न मुख्यः । न चेह तथा लक्षणाबीजमस्ति । प्रायपाठानुरोधिविकारार्थपरिग्रहोपपत्तेः । ब्रह्मशब्दोपि ज्ञेये परब्रह्मणीवोपास्ये केन चिद्रूपेण परिच्छिन्ने सविशेषब्रह्मण्यवयवार्थपौष्कल्याभावाद् नात्यन्तं मुख्यभावमश्नुते । यद्यपि प्रचुरानन्दे ऽप्यानन्दशब्दो मुख्यः तथा ऽप्यानन्दमयस्य ब्रह्मत्वे जीवसाधारणानन्दाभ्यासमात्रं न लिङ्गं किं तु प्रचुरानन्दाभ्यास इति तल्लाभार्थमभ्यस्यमानानन्दमयशब्दोक्ते प्रचुरानन्दे लक्षणा वाच्या । पुच्छशब्दस्य पक्ष्यवयवपरत्वे ऽपि मुख्यार्थत्यागस्तुल्यः । पुच्छो ऽस्त्री लूम लाङ्गूलमित्यभिधानकोशप्रयोगबाहुल्यनिश्चितलाङ्गूलशक्तिकस्य तस्य पक्ष्यवयवे पश्चाद् लम्बमानत्वसादृश्येनाऽकच्छः पुच्छकच्छश्चेति पश्चाद् लम्बमानवस्त्रावयवइव प्रयोगोपपत्तावनेकशक्तिकल्पनायोगात् । तस्मादिह न कश्चन शङ्कावकाश इति ।

* एवमिति नास्ति २ पु० ।

† पटादिति नास्ति २ पु० ।

ततो ऽभ्यन्तरं* ब्रह्म किमिति नोक्तमिति । ब्रह्मणः सर्वा- ११३ । ११
न्तरत्वप्रदर्शनार्थं खल्वन्नमयाद्युत्तरोत्तरान्तरनिरूपणं प्रवृत्तं तच्चेदानन्दमये पर्यवसितं स एव ब्रह्मेति युक्तं ततो ऽप्यान्तरं ब्रह्म विवक्षितं चेत् तथा किमिति नोच्येत । न हि ब्रह्मणः सर्वान्तरत्वप्रदर्शनार्थं प्रक्रान्तं तद् ब्रह्मणि परिसमापितमिति युज्यतइति भावः । **प्रतिष्ठात्वसामर्थ्यादिति ।** ब्रह्म पुच्छं प्रतिष्ठेत्यानन्दमयप्रतिष्ठितिहेतुत्वतदाधारत्वसामर्थ्यादित्यर्थः । अतः कस्मिन्न्वहमुत्क्रान्तइत्यादिश्रुत्यन्तरे प्राणस्य जीवप्रतिष्ठाहेतुत्वश्रवणे ऽपि न तत्र व्यभिचारः । यथा भूमविद्यायामस्ति भगवो नाम्नो भूय इत्यादिप्रश्नप्रतिवचनपरम्परायाः प्राणे समापने ऽप्येष तु वा ऽतिवदतीत्यादेस्तुशब्दश्रुत्या ऽऽत्मनः प्राण इति ततः प्राणोत्पत्तिलिङ्गेन च प्राणादर्थान्तरोपदेशपरत्वमिति । तत्रैव श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति शिष्यजिज्ञासितात्मोपदेशपर्यवसानमभ्युपगम्यते न तु प्राचीने प्राणे एवमिहापि योजनीयमिति भावः । अन्नमयाद्युत्तरोत्तरान्तरनिरूपणं ब्रह्मणि कारणवाक्यश्रुतस्यात्मत्वस्य ब्रह्मण्येव श्रुतस्य गुहासन्निहितत्वस्य विवरणार्थमतस्तदवश्यं ब्रह्मणि पर्यवसितं वक्तव्यमित्यभिप्रेत्यैवं परिहार आश्रितः । यदि तु सत्यं ज्ञानमिति मन्त्रे सत्यादिलक्षणं ब्रह्म गुहायां निहितं जीवरूपेण गुहायामीश्वरेण निवेशितं जीवाभिन्नं वेदेति जीवस्य गुहानिहितत्वमुक्तमिति (तद्विवरणार्थं तत्प्रवृत्तं भवेत् तदा तत्पर्यवसानमानन्दमयएव युक्तमिति)† न काचिदनुपपत्तिः ।

विशेष्यप्रधानभूतेति । मयडर्थं प्रति प्रातिपदिकार्थस्य विशेष- ,, । १७
णत्वेनाप्राधान्ये ऽपि विभक्त्यर्थसंख्यां प्रति विशेष्यत्वेन तस्य प्राधान्यमिति सूचयितुं विशेष्यग्रहणम् । संख्या समानप्रत्ययोपात्तकारकान्वयिनी तद्गुणभूता प्रातिपदिकार्थोऽपि तद्गुणभूतः । अतो गुणानां च परार्थत्वादसंबन्धः समत्वात् स्या‡दिति न्यायात् संख्याप्रातिपदिकार्थयोर्न परस्परं गुणप्रधानभाव इति कौमारिलमतानुसरणे तु पार्ष्णिकान्वयवेलायां प्रातिपदिकार्थस्य संख्यां प्रति विशेष्यत्वमस्तीति तदभिप्रायं विशेष्यपदम् । एवं च शाब्दबोधवेलायां तस्य संख्यां प्रति प्राधान्यास्फुरणे ऽपि प्रथमश्रुतस्य तस्य

---

* ततो ऽन्तरमिति ३ पु· पा· ।
† ( ) एतदन्तर्गतो ग्रन्थो नास्ति ५ पु· ।
‡ जै· सू· अ· २ पा· १ सू· २२ ।

संख्याविशेष्यस्य विभक्त्यर्थस्य च प्रकृतौ समवेतत्वादनुत्कर्ष इति सिद्धान्तन्यायो द्रष्टव्यः । अत एव

प्रकृत्यर्थस्य पाशस्य विभक्त्यर्थस्य कर्मणः ।
उभयोः प्रकृतौ भावान्नोत्कर्षो ऽस्यावकल्पते ॥

इति शास्त्रदीपिकायां तदुभयमनुत्कर्षहेतुत्वेन दर्शितम् ।

नन्वाम्नायस्यार्थं वक्तुं प्रभवामो नाम्नायं पर्यनुयोक्तुमिति न्यायादपर्यनुयोज्ये वेदे पाशैक्ये ऽपि बहुवचनं कथं चिदवयवबहुत्वाभिप्रायं योज्यते पौरुषेयेषु सूत्रेषु स्वायत्ते शब्दप्रयोगे सर्वज्ञेन सूत्रकृता किमर्थं श्रुतिविरोधभ्रान्तिकरसूत्रप्रणयनं कृतमित्याशङ्क्याऽध्याहाराद्यपेक्षानेकार्थप्रत्यायनार्थमि-
११३ । २५ त्याह **अध्याहारादिभिर्नेयानीति ।** आदिशब्देन लक्षणानुषङ्गौ योगवृत्तिश्च गृह्यते । तत्र सौत्रानन्दमयशब्दस्यानन्दमयपर्यायाम्नाते पुच्छब्रह्मणि लक्षणा । स्वप्राधान्येन प्रतिपाद्यमित्यध्याहारः । असन्नेव स भवतीति निगमनश्लोकस्थब्रह्मशब्दाभ्यासविषयत्वादिति हेतुः । यत्र ब्रह्मत्वं साध्यं तत्र तद्विषयश्रुत्यादिमात्रं हेतूकर्तव्यम् । इह तु ब्रह्मणः पुच्छवाक्यविषयत्वे स्थिते तात्पर्येण प्रधानतया तत्प्रतिपाद्यत्वं साध्यमिति तात्पर्यसिद्धये तल्लिङ्गतया ऽभ्यासपर्यन्तहेतूक्तिः । नन्वसिद्धो ऽयं हेतुः । यत आनन्दमयो निगमनश्लोकविषयः न पुच्छं ब्रह्म पूर्वपर्यायेषु निगमनश्लोकानां पुच्छविषयत्वादृष्टेरिति शङ्कायामपि सूत्रमेवोत्तरम् । तत्रानन्दमय एव पक्षः न निगमनश्लोकप्रतिपाद्य इति साध्यम् । ईक्षतिसूत्रात्तत्रानुवर्तमानेन निषेध्याध्याहारेण च साध्यपूरणम् । ब्रह्मशब्दाभ्यासादित्येव हेतुः । अभ्यस्यमानं ब्रह्मशब्दं प्रति जीवस्यानन्दमयस्य मुख्यार्थत्वाभावादेकं पुच्छपदमनुरुध्यानेकस्य ब्रह्मशब्दस्यानन्दमये जघन्यवृत्तिकल्पनायोगादित्यभिप्रायेणाभ्यासपर्यन्तोक्तिः । किं च न निगमनश्लोकप्रतिपाद्य इत्यस्मिन् साध्ये निगमनश्लोकप्रतिपाद्यब्रह्मसत्त्वासत्त्ववेदितृत्वेन प्रकृतपरामर्शिभ्यां स एनमिति सर्वनामभ्यामभ्यस्यमानत्वादिति हेत्वन्तरमप्यनेन विवक्षितम् । अत्रापि पुच्छपदाद् बलवत्त्वसिद्ध्यर्थमभ्यासपर्य्यन्तहेतूक्तिः । द्वितीयसूत्रे विकारपदेनावयवो लक्ष्यते । तद्वाचिशब्दः पुच्छशब्दः स एव शब्दो विकारो विगत-

कार्यो ऽनर्थकः शब्दः । कारशब्दः कर्मणि घञन्तः कार्यवाची । तथा चावयववाचिशब्दात्तस्य स्वार्थत्यागे लक्षणीयाभावेनानर्थक्यप्रसङ्गाच्च ब्रह्म न स्वप्राधान्येन प्रतिपाद्यमिति शङ्कार्थः । न च पुच्छपदेनाधारत्वं लक्षणीयं प्रतिष्ठापदेन पौनरुक्त्यप्रसङ्गादिति शङ्कितुर्हृदयम् ।

नैवं शङ्कितव्यम् । ब्रह्मश्रुत्यभ्यासानुरोधात् । ब्रह्म स्वप्राधान्येन प्रतिपाद्यमेव पुच्छपदं तु तत्राधारत्वलक्षकम् । न च प्रतिष्ठापदेन पौनरुक्त्यम् । पुच्छपदसमभिव्याहृतेन तेन पुच्छवत्प्रतिष्ठितिक्रियासाधनत्वमुच्यते । पक्षिणो हि पुच्छेन प्रतितिष्ठन्तीति लोकतः श्रुतितश्चावगतम् । यथा पुच्छेन प्रतिष्ठितो तदुपरितनावयवावच्छिन्नं पक्षिणं प्रति पुच्छमाधारस्तथा ब्रह्मणा प्रतिष्ठितो प्रियादिमध्यभागरूपात्मतावयवयुक्तमानन्दमयं प्रति ब्रह्माधार इति तदाधारत्वं पुच्छपदेन लक्ष्यतइत्येवं वैवक्षिककरणत्वाधिकरणत्वरूपार्थभेदसत्त्वात् । तथापि मुख्यमाधारवाचकं हित्वा प्रहीणावयववाचिना पुच्छपदेन* तल्लक्षणा केन हेतुनेति चेत् पूर्वपर्यायेषु पुच्छशब्दानां प्राचुर्यादिहापि पर्याये तत्साम्यार्थं पुच्छशब्दे प्रयोक्तव्ये तेनैवाधारत्वप्रतीतिर्लभ्यतइति तात्पर्येण । ननु पूर्वपर्यायसाम्यार्थे पुच्छपदप्रयोगमात्रं नापेक्षितं किं त्ववयविगतपुच्छावयवान्वयबोधनोपयोगितया तेन पुच्छावयवप्रतिपादनम् । न चाधारलक्षकेण तत्प्रतिपादनं सम्भवति । अतो ऽनाधारलक्षणा युक्तेत्यस्यामपि शङ्कायां प्राचुर्यादित्येवोत्तरम् ।

इत्थमपि शङ्का नावतरति । अर्थान्तरलक्षकतया स्वार्थमनभिदधानस्यापि शब्दस्य स्वार्थाभिधानफलार्थतादृष्टेः । तद्यथा । उत्तरं बर्हिषः प्रस्तरं सादयति प्रजा वै बर्हिर्यजमानः प्रस्तरो यजमानमेवाऽयजमानादुत्तरं करोति तस्माद्यजमानो ऽयजमानादुत्तर इति श्रुतौ प्रस्तरसमानाधिकरणस्य यजमानशब्दस्य प्रस्तरे यज्ञनिर्वर्तकत्वादियजमानगुणमुखेन वृत्तिस्तत्सिद्धये टीकायाम् उपपादिता । अथापि प्रस्तरे मुख्ययजमानत्वबोधनस्य यत्फलं यजमानमेवाऽयजमानादित्यादिवाक्यशेषार्थोपपादनं तादर्थ्यमपि दृश्यते । यथा वा ऽग्निर्वै ब्राह्मण इति श्रुतावग्निशब्दस्य मुखप्रभवत्वरूपाग्निगुणमुखेन ब्राह्मणे वृत्तिस्तत्र समर्थिता तत्तुल्यन्यायतया ऽग्निर्वै दीक्षित इत्य-

---

* पुच्छशब्देनेति २-३ पु· पा· ।

वाग्निशब्दस्य दीक्षिते वृत्तिरपि किंचिदग्निगुणमुखेनेति सिध्यति । अथापि दीक्षिते ऽग्नितादात्म्यबोधनस्य यत्फलं मदन्तीभिर्मार्जयतइति विधिशेषस्य निर्ह्यग्निश्शीतेन बाधनीत्यर्थवादस्यार्थोपपादनं तादर्थ्यमपि दृश्यते । एवं यजमानो वा आहवनीयो यजमानं वा एतद्विकर्षते यदाहवनीयात्पशुश्रपणं हरतीत्यादीनि प्रचुराण्यत्रोदाहरणानि ।

नन्वानन्दमयसकलविकारजातकारणत्वमानन्दमये नान्वेति चेतत्पुच्छत्वेन निर्दिष्टे ब्रह्मण्येव तस्यैष एव शारीर आत्मेति पुँल्लिङ्गेन प्रकृते सो ऽकामयतेत्यादेरन्वयो ऽस्तु । पुच्छमहिमवर्णनेन पुच्छवत: प्रधानस्याधिकस्तुतिलाभात् । न च किंचिद्विकारैकदेशस्य परिच्छिन्नस्य सकलविकारकारणत्वमनुपपन्नमिति शङ्क्यम् । न हि मुख्यवृत्त्या ऽयमवयव उपदिश्यते किं त्वनवयवे ऽवयवत्वदृष्टि*मात्रमुपदिश्यते । प्राणमयमनोमयपर्याययोराकाशपृथिवीयजुरादीनां वस्तुतस्तत्तदनवयवानामेवा ऽवयवत्वकल्पनादर्शनात् । न च विकारं प्रत्यवयवत्वदृष्टिविधानमात्रेण कारणत्वान्वयानुपपत्तिरायाति तथा सत्याकाशदृष्टिविशिष्टोद्गीथोपासनायामाकाशे सर्वभूतकारणत्वाद्यन्वयायोगेनाकाशस्य कारणत्वादिब्रह्मलिङ्गेन ब्रह्मत्वनिर्णयविरोधापत्तेः । न च मुख्यावयवत्वमेवात्र विवक्षितमिति वाच्यम् । प्राणमयमनोमयपर्याययोराकाशपृथिवीयजुरादीनां मुख्यावयवत्वासम्भवेन तद्वदिहापि दृष्टिमात्रविधानोचित्यादित्याशङ्क्याह **तदवयवो ब्रह्मापि विकारः स्यादिति** । पूर्वपर्यायेष्विदमेव शिर इत्यादिनोक्तानां शिर:प्रभृतीनां तत्तन्मुख्यैकदेशत्वान्मुख्यैकदेशेष्वेव च शिरस्त्वादिकल्पनस्योचितत्वादाकाशपृथिवीशब्दाभ्यामाकाशपृथिवीसंबन्धवतो: समानोदानयोर्यजुरादिशब्दैस्तत्तद्विषयमनोवृत्तीनां च ग्रहणम् । तेषां शिरस्त्वादिकल्पनाङ्गीकारात् । ब्रह्मणि पुच्छत्वकल्पनायां तस्यानन्दमयमुख्यावयवत्वमेवाङ्गीकर्तव्यं स्यादिति विकारावयवस्य तस्य मुख्यविकारत्वापत्त्या कारणत्वश्रवणमुपरुध्येतेति भाव:† ॥

११४ । १० **अन्तस्तद्धर्मोपदेशात् ॥ २० ॥**

अपवादचिन्ताया: शास्त्रसङ्गत्यर्थं प्रस्तुतशास्त्रोपयोगि फलमाह **निर्विशेषमिति । न तूपक्षिप्यतइति** । श्रुत्येति शेष: । तासामप्यधिकार-

---

* दृष्टीति नास्ति ३ पु. ।

† अत्र षष्ठम् आनन्दमयाधिकरणं पूर्णम् ।

प्रसङ्गादिति पाठः साधुः । श्रुतौ गाव इत्यस्यां शृङ्गाः सन्तीत्यादिवाक्यशेषतः स्त्रीलिङ्गत्वात् । यद्वा तेषामपि पाठ इत्थं योज्यः । श्रुतौ गाव इत्यनेन स्त्रीगव्य इव पुङ्गवा अपि संगृहीताः । ग्राम्यपशुसङ्घेष्वतरुणेषु स्त्रीत्यनुशासनात् तत्र स्त्रीलिङ्गशेषता इह तु ग्रन्थे तेषामित्यनेन निष्कृष्य पुङ्गवानामेव परामर्शः । मनुष्येषु जायापत्योर्दिवि ज्योतिरजरमारभेतामित्यादिलिङ्गात्कर्मसु सहाधिकारे ऽपि युक्ता मे यज्ञमन्वासातामित्यादिलिङ्गात् पत्युर्मुख्याधिकारो दृष्ट इति तदनुरोधेन पुङ्गवानां तत्र मुख्याधिकारापादनार्थं इति । ननु न ह वै देवानित्यादिश्रुतेरागामिपापाप्राप्तिर्नार्थः किं तु विद्यमानपापफलाप्राप्तिः । इत्थं पापशब्दस्य फललक्षणा त्वया ऽप्येष्टव्या ऽन्यथा पुण्यमेवामुं गच्छतीति तदनन्तरवाक्यस्य विध्यधिकारपरत्वं स्यात्तच्च तव नेष्टमित्याशङ्क्य तथा तदर्थाभ्युपगमे सर्वपाप्मोदयवाक्यस्यापि स एवार्थो भविष्यतीत्याह **अथेत्यादिना** । पूर्वस्मिन्नप्यर्थे नास्माकमनुपपत्तिः । पुण्य- ११५ । ६
मेवामुमिति वाक्यस्य देवतान्तरोद्देश्यकत्वपरहितपरमेश्वरपूजातदुद्देश्यकतपश्चर्यादिविषयत्वोपपत्तेः । प्रत्युत भारतीविलासस्यैवास्मिन्नप्यर्थे ऽनुपपत्तिस्तुल्या । पुण्यः पुण्येन कर्मणा भवति पापः पापेनेति श्रुतेर्ब्रह्महत्याया एव पापफलत्वात् । तस्याञ्जलिना ब्रह्महत्यामुपागृह्णादित्यर्थवादश्रद्धावतस्तस्य तं भूतान्यभ्यक्रोशन् ब्रह्महन्निति तदनन्तरवाक्यश्रुतस्य लोकगर्हणस्य तस्मादिन्द्रो ऽबिभेदिति तत्पूर्वसंदर्भे श्रुतस्य भयस्य चाङ्गीकृतत्वेन तयोरपि पापफलत्वात् । **तत्प्रदर्शनार्थत्वादिति** । सर्वपाप्मोदयवाक्यस्य या या गतिर्वक्तुं शक्यते तस्याः सर्वस्या अप्युपलक्षणत्वेन कर्मानधिकारत्वोक्तेरित्यर्थः । तत्र रविरिति विशेष्यपदेन गत्यन्तरमपि सूचितम् । रविः खलूत्पन्नसाक्षात्कारो जीवन्मुक्तः स्वाधिकारावसाने मुक्तो भविष्यतीति यावदधिकारमित्यधिकरणे* भाष्यकृद्भिर्वक्ष्यते ततश्चोत्पन्नब्रह्मसाक्षात्कारस्य तस्य तदधिगम उत्तरपूर्वाघयोरित्यधिकरणे† वक्ष्यमाणेन न्यायेन सर्वस्य पूर्वाघस्य नाश उत्तराघस्या ऽश्लेषश्चास्तीति तदन्यतरविषयं सर्वपाप्मोदयवाक्यमिति तस्य यथेदं प्रदर्शनार्थं तथा पूर्वपापानां देवतासु फलानारम्भकत्व‡रूपस्याप्यर्थस्य प्रदर्शनार्थमिदं भविष्यतीति भावः ।

---

* व्या॰ सू॰ अ॰ ३ पा॰ ३ सू॰ ३२ । † व्या॰ सू॰ अ॰ ४ पा॰ १ सू॰ १३ ।
‡ देवतार्हसुफलानारम्भकत्वेति ३ पु॰ पा॰ ।

ननु न ह्यनाधारस्य स्वमहिमप्रतिष्ठस्य सर्वव्यापिनः परमेश्वरस्याधार उपदिश्येतेति भाष्ययोजनार्था अनाधारत्वे च नित्यत्वं सर्वगतत्वं च हेतुरिति टीका न युक्ता। भाष्ये नित्यत्वाऽविशेषणादित्याशङ्क्याह
११५ । ९ **नित्यत्वमिति स्वमहिमप्रतिष्ठत्वस्य व्याख्येति ।** अनित्यस्य स्वकारणप्रतिष्ठत्वावश्यंभावेन स्वमहिमप्रतिष्ठत्वायोगात् तेन नित्यत्वमाक्षिप्यत इत्याक्षेप्यन्नित्यत्वतात्पर्यकं तन्न त्वनाधारत्वतात्पर्यकम् । अनाधारपदेन पौनरुक्त्यापत्तेरिति भावः ।

नित्यमपीति । नित्यमसर्वगतं वस्तुतः सिद्धान्ते नास्तीति तार्किकमभिप्रेत्य चेच्छब्दः । सर्वगतत्वं सकलवस्त्वन्वयित्वं तन्मायायामप्यस्ति साधारणमतो नित्यत्वविशेषणमिति स्पष्टत्वान्नोक्तम् । यदि सर्वगतत्वं ब्रह्माऽसाधारणं परिपूर्णत्वं तदा तावदेव हेतूभवनक्षममिति न नित्यत्वविशेषणमपेक्षितम् । स्वमहिमप्रतिष्ठस्येत्येतच्च न नित्यपरतया व्याख्येयं किं त्वनाधारस्येत्येतद्व्याख्येयपरतया योजनीयम् । तेन भाष्ये स्वे महिम्नीत्युदाहरिष्यमाणा श्रुतिरनाधारत्वपरतया भाष्ये एव विवृता भवति । अन्यथा तया स्वकीये महिमशब्दोक्ते क्व चिद्वस्तुनि प्रतिष्ठितत्वमुच्यत इति प्रकृतविरोधः शङ्क्येत । एवं च स्वमहिमप्रतिष्ठपदप्रतिपादितेनानाधारत्वेनाक्षिप्तं नित्यत्वं कथमनाधारत्वे हेतुरित्यपि शङ्का निरवकाशा भवति । सर्वगतत्वं सकलवस्त्वन्वयित्वमित्येव निरुच्य नित्यत्वविशेषणापेक्षणे तु तत्स्वमहिमप्रतिष्ठपदेन कथं चिल्लभ्यं न प्रागुक्तक्रमेणाक्षेप्यमित्यन्योन्याश्रयपरिहारो द्रष्टव्यः । टीकायां नित्यत्वस्याकाशवदिति भाष्योदाहृतश्रुत्युक्तस्य हेतुना विवक्षितेति व्याख्याने तु तस्य नाक्षेपो न लक्षणेति न कथं चिदप्यन्योन्याश्रयशङ्का ।

„ । १० **ब्रह्मणि सर्वात्मत्वसंभवमाहेति ।** अनेनादित्यपुरुषे अक्षिपुरुषे च तत्संभवशङ्का निरस्ता । सा चैवमादित्यपुरुषे पृथिव्यग्न्यादिदृष्टिविशिष्टऋक्सामगेष्णत्वं मण्डलतदर्चिस्तदभिमानिपुरुषाणामादित्यो वा एष एतद् मण्डलमित्यादिश्रुतौ ऋक्सामयजुरात्मतया वर्णितत्वादुपपन्नम् । आदित्यपुरुषस्यैवाक्षण्यपि संनिहितत्वात्तत्रापि सैव ऋक्सामेत्यादिनोक्तऋक्सामाद्यात्मत्वं तत एवोपपन्नमिति । तत्रायं परिहारो विवक्षितः । ऋक्सामादिरूपत्वं मण्डलादीनां स्तुत्यर्थमुपासनार्थं वोक्तं ब्रह्मणि तु सर्वा-

पादाने सन् घट इत्यादिव्यवहारालम्बनं व्यावहारिकप्रमाणगम्यमस्ति
सर्वप्रपञ्चतादात्म्यमिति । तद्रूपेणोदय इति । आदित्यपुरुषस्य सर्वपा-
प्मापादानतयोपलक्षितः उदय उद्गमनमुच्यतइत्यर्थः । ननु पाप्मापादान-
क*मुद्गमनं प्राक्पाप्मसंबन्धिनो जीवस्यैव संभवतीति नेदं ब्रह्मलिङ्गमिति
चेन्न । जीवस्यापि नीडात् शकुन्तस्येव पापाद् मुख्यस्योद्गमनस्यासम्भवेन
नीडादुद्गतः शकुन्तो यथा सर्वात्मना नीडसंबन्धरहितः एवमयं सर्वा-
त्मना पापसंबन्धरहित इत्येतदर्थलक्षकत्वात् । ततश्चासङ्कुचितसर्वपापरा-
हित्यं क्व चिदपि जीवे न सम्भवति । न ह वै सशरीरस्य सत इति श्रुत्यु-
क्तरीत्या शरीरे सति क्रियतो ऽपि दुःखस्यावश्यम्भावेन तद्धेतुपापसद्भावनि-
यमात् । ननु तां कुर्वदित्ययुक्तं न हि शब्दः स्वयं मायां करोतीत्याशङ्क्य
तां कुर्वदित्यनेनानुवादत्वं विहाय स्वातन्त्र्येण मिथ्याबुद्ध्युत्पादकत्वं विवक्षि-
तमिति व्याचष्टे **मायां मिथ्याबुद्धिं कुर्वदिति ।**

गेष्णौ पर्वणी इति । गानक्रियासाधनपर्वणी इत्यर्थः । एतदुक्तं ११६ । १२
भवति । तस्योदिति नामेत्यादिभिर्वाक्यैरुन्नामविधानतन्निर्वचनतद्वेदनफलस-
ङ्कीर्तनानन्तरं तस्यर्क् साम च गेष्णाविति ऋक्सामयोः प्रकृतोन्नामकपुरुषगेष्णा-
त्वमभिधाय तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गातेति वाक्याभ्यां ऋक्सा-
मयोरुद्गेष्णात्वादेव साम भक्तिविशेषस्योत्कर्मकगानसाधन†वाच्युद्गीथशब्दवा-
च्यत्वं तस्मादेव च हेतोरुद्गीथभक्तिगातुरुत्कर्मकगानकर्तृवाच्युद्गातृशब्दवा-
च्यत्वं चेति श्रूयते । तच्चोन्नामकपुरुषस्य गानकर्मत्वं सामरूपगीतिक्रियाऽभि-
व्यङ्ग्यं ऋक्साध्यस्तुतिकर्मत्वं यथा तद्यइमे वीणायां गायन्त्येतत्ते‡ गायन्ती-
त्यत्र लौकिकपुरुषस्य लौकिकगानकर्मत्वं वैणिकगीयमानलौकिकशब्दसाध्य-
स्तुतिकर्मत्वम् । एवं चोन्नामकपुरुषस्य स्तुतावृक्साक्षात्साधनं सामऋगभि-
व्यक्तिद्वारा साम्ना स्तुवीतेति साम्नो ऽपि स्तुतिसाधनत्वश्रवणात् । अतः
स्तुतौ साध्यायां सामद्वयं सोपानपर्वद्वयवत् क्रमिकमास्तइति गानपर्वत्वमृ-
क्सामयोरिति । ततश्च लौकिकगानविषयराजादिरूपतयेवादित्यपुरुषस्या-
क्षिपुरुषस्य च ऋक्सामसाध्यस्तुतिविषयाग्नीन्द्रसोमादिरूपतया सार्वात्म्य-

---

* सर्वपाप्मादानकमिति २ पु॰ पा॰ । † साधनेति नास्ति २ पु॰ ।
‡ एतं ते इति १ पु॰ पा॰ ।

सिद्धिः । यद्यपि प्रस्तावादिसामभक्त्यवयवरूपे सामगानां पर्वत्येव प्रसिद्धे साम्नामवच्छेदे गेष्णाख्या तेषां प्रसिद्धा औक्थिक्याख्ये सामपर्वलक्षणग्रन्थे ऽपि तथैव व्यवहारः तथापि स्तोत्रसाधनक्रमिकपर्वद्वयत्वसादृश्याद् ऋक्सामयोर्गेष्णाद्वयत्वारोपः । गेष्णौ शरीरावयवपर्वणी इत्यप्याचक्षते* ॥

११६ । १२ आकाशस्तल्लिङ्गात् ॥ २२ ॥

तस्मादुद्गीथ इत्युद्गीथसम्पत्तेस्तुल्यत्वादिति । यद्यपि तस्मादुद्गीथ इत्येतत्पूर्वप्रकृतोन्नामकत्वेन ऋक्सामगेष्णात्वेन च हेतुना ऽऽदित्यपुरुषस्योद्गीथ इति नामान्तरविधानार्थं न तूद्गीथसम्पत्त्यर्थं तत्र तस्मादिति हेतोरनन्वयात् । उद्गेष्णा इति नाम्नि विधातव्ये उद्गीथ इति तद्विधानं देवानां परोक्षप्रियत्वात् । तथैव च छान्दोग्यविवरणे व्याख्यातम् । यन्नाम तन्नामेति नामातिदेश†कवाक्यस्योदित्युद्गीथ इति च नामद्वयातिदेशकतया व्याख्यानेन चास्य नामान्तरविधानार्थत्वं स्थिरीकृतम् । पूर्वाधिकरणप्रदर्शितया रीत्योद्गानकर्तुरुद्गातृनामवदुद्गीथभक्तेरुद्गीथनामापि ऋक्साम-योरुन्नामकदेवविषयगानपर्वत्वे प्रमाणपरतया नीयते चेदपि नेदमुद्गीथं संपत्तिपरम् । आदित्यपुरुषस्योद्गीथे सम्पत्तिस्तु प्राणोमित्येतदक्षरमुद्गीथमुपासीत तस्योपव्याख्यानमित्यादिनोद्गीथोपासनाप्रपञ्चनप्रतिज्ञानात् । उत्तरत्राकाशवाक्ये ऽपि स एष परोवरीयानुद्गीथ इत्युद्गीथसम्पत्त्यनुवृत्तेर्हिरण्मयवाक्ये ऽपि तस्मादेवंविदुद्गाता ब्रूयात् कं ते काममागायानीत्यक्षण्यादित्यपुरुषोपासनस्योद्गातृकर्तृकत्वलिङ्गदर्शनाच्च लभ्यते । तल्लभ्यैव चोद्गीथसम्पत्तिः छान्दोग्यविवरणे य एवं विद्वान् साम गायतीत्यत्र य एवं विद्वानित्यस्य एवमुक्तरूपं देवमुद्गीथं विद्वानिति व्याख्यानेन दर्शिता । इह शारीरकेऽपि सैव हि सत्यादयः‡ इत्यधिकरणे । छान्दोग्ये हि कर्मसंबन्धिन्युद्गीथव्यपाश्रया विद्या विधीयत इति वाक्ये ऽस्या अन्तरादित्यविद्यायाः स्वतन्त्रविद्यात्वशङ्कानिराकरणाय कर्माङ्गाश्रितत्वव्यवस्थापनार्थं उद्गीथव्यपाश्रयेत्यनेन सा दर्शिता । तत्र तदनन्तरम् इयमेवर्गग्निः सामेत्यन्तरादित्यविद्योपक्रमवाक्यवद् य एवं विद्वान् साम गायतीति तदुपसंहारवाक्यवच्च तस्यर्क् साम च गेष्णौ तस्मादुद्गीथ इति

* अत्र सप्तमम् अन्तरधिकरणं पूर्णम् । † नामनिर्देशकेति २ पु· पा· ।

‡ व्या· सू· अ· ३ पा· ३ सू· ३८ ।

तन्मध्यपातिवाक्यमपि ऋक्सामसंबन्धरूपकर्माङ्गाश्रितत्वचिह्नमात्रप्रदर्शकतयोपन्यस्तं न तूद्गीथसंपत्त्यर्थत्वेन । अतस्तस्मादुद्गीथ इत्यस्योद्गीथसंपत्त्यर्थत्वोक्तिरयुक्तेति प्रतिभाति । तथापि तस्मादुद्गीथ इत्युद्गीथनामविधानादुद्गीथभक्तेरादित्यपुरुषस्य चोद्गीथनामकत्वरूपसाम्यसिद्धौ पूर्वापरसंदर्भपर्यालोचनया चोद्गीथसंपत्तौ हृदि विपरिवर्त्तमानायां तस्य भूरिति शिरः एकं हि शिरः एकमेतदक्षरमित्यादिश्रुतिषु प्रायेणारोप्याधिष्ठानयोर्यत्किंचित्साम्यावलम्बनमभेददृष्टिविधानमिति श्रुतिशैलीविदामिहाप्युद्गीथनामकत्वसाम्यावलम्बनाभेददृष्टिपर्यन्तार्थिकार्थेऽस्य वाक्यस्य तात्पर्यमस्तीति प्रतीयतएवेत्यभिप्रेत्येदं वाक्यमुद्गीथसंपत्तौ प्रमाणतयोपन्यस्तम् । एवमनया प्रणालिकयोद्गीथनामविधानस्यार्थादुद्गीथसंपत्तौ पर्यवसानमभिप्रेत्यैव छान्दोग्यविवरणे तस्यर्क् साम च गेष्णौ तस्मादुद्गीथ इति वाक्यमवतारितम् । तस्योद्गीथत्वं देवस्यादित्यादीनामिव विवक्षित्वाऽऽहेति पूर्वं य एवासौ तपति तमुद्गीथमुपासीतेत्यादिष्वादित्यादीनामिवेत्यर्थः ।

आनन्त्याद्ययोगादिति । शालावत्यपक्षोद्भावितान्तवत्त्वदोषाप- ११७ ।
निनीषयोपन्यस्तमनन्तत्वं चरमश्रुतमपि सकृत् श्रुतमपि लिङ्गं सदपि प्रथमश्रुताभ्यस्ताकाशश्रुत्यपेक्षया बलवत् । तथाभूताया अप्याकाशश्रुतेर्लक्षणासहिष्णुत्वेनान्यथासिद्धत्वादनन्तत्वलिङ्गस्यान्तवति तपने प्रागुद्भावितदोषापनयनालाभादित्यनन्तत्वलिङ्गस्यानन्यथासिद्धत्वम् । सर्वकारणत्वादिलिङ्गान्तरापेक्षया प्रथमापेक्षितत्वं* च प्राबल्यातिशयमभिप्रेत्य विषयवाक्ये तेभ्यश्चरमश्रुतस्यापि तस्य प्रथम†मुपन्यासः । **मुख्यानुगुण्येनेति ।** यथा दाल्भ्यपक्षोद्भाविताऽप्रतिष्ठितत्वदोषापनिनीषया शालावत्येनोपन्यस्तं प्रतिष्ठात्वलिङ्गं स्वर्गलोकवत् प्रतिष्ठान्तरसापेक्षायां पृथिव्यां निरपेक्षमुख्यमसंभवदपि स्वर्गलोकापेक्षया पृथिव्याः कथं चित्प्रतिष्ठात्वातिशयमपेक्ष्य मुख्यपृथिवीश्रुत्यानुगुण्येन पृथिव्यां संभवत्प्रतिष्ठात्वरूपतया नीतम् एवमानन्त्यमपि मुख्याकाशश्रुत्यानुगुण्येन भूताकाशे पृथिव्यपेक्षया बहुकालवर्त्तित्वरूपतया नेतव्यमित्याशयः । **तथा हि पृथिवीमात्रकारणस्येति‡ ।** नन्वपां कारणस्य ते-

---

* प्रथमोपक्षिप्तत्वमिति १ पु॰ पा॰ । † तल्लिङ्गस्य प्रथममिति २ पु॰ पा॰ ।
‡ पृथिवीमात्रकारणत्वेनेतीति ३ पु॰ पा॰ ।

१ जस: प्रसिद्धत्वे ऽप्यपां का गतिरिति प्रश्नो दृश्यते । अस्य लोकस्य का गतिरिति दाल्भ्यकृतस्य प्रश्नस्य पृथिवीमात्रकारणविषयत्वं चाभ्युपगम्यते तद्वच्छालावत्यकृतस्यापि तस्य तन्मात्रविषयत्वं किं न स्यादित्यस्वरसादाह

११८ । ४ **अस्येति च सर्वनामश्रुतेरिति** । ननु सर्वनाम्न: प्रकृतपरामर्शित्वस्वाभाव्यादसौ लोक: अयं लोक इत्यनयो: समभिव्याहारे अदइदंशब्दयो: स्वर्गलोकपृथिवीलोकपरत्वस्यैव श्रुतिषु सर्वत्र दृष्टत्वाच्चात्रास्येति सर्वनामश्रुते: पृथिवीमात्रपरत्वेन संकोचो न दोष इत्यस्वरसादाह **किं चेति** ।

नन्वस्यशब्द: पृथिवीपर इत्येतावता तन्मात्रकारणं पृष्टं न भवति येन तन्निरूपणे अन्तवत्त्वदोषो नापनीत: स्यात् किं तु पृथिवीकारणं पृष्टं भवति तत्कारणत्वं चानन्ते सर्वकारणे ऽप्यस्तीति पृथिवीकारणप्रश्ने ऽपि तन्निरूपणेनान्तवत्त्वदोषापनय: स्यादेवेत्यनुपपत्त्यभावादस्य लोकस्येत्यस्य दाल्भ्यकृतस्येव शालावत्यकृतस्यापि प्रश्नस्य न सर्वलोकविषयत्वं कल्पनीयमिति चेन्न । यथा शालावत्यप्रश्नैकरूपस्य दाल्भ्यप्रश्नस्यानन्तवस्तुपरत्वाभावे ऽप्यन्तवत्त्वदोषमुद्भावितवान् जैवलिरनन्तं वस्तु पृथिवीकारणं विवक्षतीति निश्चयवत: शालावत्यस्य प्रश्नोयमनन्तवस्तुपर इति कल्प्यते तथा सर्वकारणत्वाभावे त्रिविधपरिच्छेदराहित्यरूपतदानन्त्यं न स्यादतो ऽनन्तं वस्तूपक्षिपता जैवलिना सर्वकारणमेव तदुपक्षिप्तं भवतीत्यपि शालावत्यस्य निश्चयसम्भवेन तदीयप्रश्नोयं तत्किं सर्वकारणमनन्तं वस्त्विति सर्वलोकगतिविषय इत्यपि कल्पयितुमुचितत्वादिति भाव: ।

११ । १३ **यथा ह्युच्चैरिति*** । उच्चैर्ऋचा क्रियते उपांशु यजुषा उच्चै: साम्नेत्यत्र विधेयमुच्चैष्ट्वादिकं किमृगादिधर्मो वेदधर्मो वेति संशय: । ऋगादिधर्मत्वे यजुर्वेदगता अपि सपादबन्धमन्त्ररूपा ऋच उच्चैष्ट्वधर्माणो भवन्ति सामवेदगतान्यप्यपादबन्धमन्त्ररूपाणि यजूंष्युपांशुत्वधर्माणि भवन्ति । वेदधर्मत्वे तु ऋग्वेदेन यत् क्रियते विधीयते कर्म तदुच्चैष्ट्वधर्मकमित्येवमादिप्रकारेणोच्चैष्ट्वादिकं तत्तद्वेदविधेयकर्मधर्मतां प्राप्य तदङ्गेषु मन्त्रेष्ववतरतीति विशेषसूत्रे प्रायपदं प्राथम्यपरम् । अपि चास्यैवोपक्रम इत्यादि: शालावत्यस्येतीत्यन्तष्टीकाग्रन्थो ऽनन्वित इव भातीत्याशङ्क्यान्तवत्त्वदोषप्रदर्शनार्थे-

* यथाह्युच्चैरिति २-५ · पु· पा· ।

श्रुतिनिवेशनपूर्वकं भाष्यप्रतीकग्रहणं तदित्याह **अपि चेति भाष्योक्तेति** । अस्यैवोपक्रम इत्येतदपि भाष्यएव विवक्षितांशनिवेशनार्थम् । यद्यप्यनन्तत्वमाम्नानतश्चरमश्रुतं तथापि शालावत्यपक्षे अन्तवत्त्वदोषोद्भावनेन जैवलिः स्वयमनन्तं किं चिद्विवक्षतीत्येवमुपक्रमएवावगतमिति तात्पर्यम्। यत्तु प्रतिष्ठात्ववदनन्तत्वमपि यथाकथं चिन्नेतव्यमिति । तन्न । प्रतिष्ठात्वस्यापि यथाकथञ्चिन्नयनाभावात् । प्रतिष्ठात्वं ह्यत्र नोपजीव्यत्वम् । इतः प्रदानं देवा उपजीवन्तीतिवदमुतः प्रदानं मनुष्या उपजीवन्तीत्यपि श्रवणेन स्वर्गपृथिव्योः परस्परमुपजीव्योपजीवकभावस्य तुल्यतया स्वर्गो न प्रतिष्ठा पृथिवी प्रतिष्ठेति व्यवस्थितोऽन्वययोगात् । किं तु निश्चलत्वमिह प्रतिष्ठाशब्दार्थः। तत्तु ज्योतिश्चक्रान्तर्गतत्वेन भ्रमति स्वर्गे नास्ति अस्ति तु पृथिव्यां पृथिवी प्रतिष्ठितेति श्रुत्यन्तरात् । आर्यभटाद्यभिमतभूभ्रमणादिवादानां श्रुतिन्यायविरोधेन हेयत्वात्। किं च आनन्त्यादिगुणकाकाशप्रतिपादनार्थे प्रवृत्तेऽस्मिन् महावाक्ये मध्यगतं पृथिवीप्रतिष्ठात्ववर्णनं यथाकथं चिन्नीयतां नाम न तावता तद्वदानन्त्यमपि नयनमर्हति न ह्यग्निहोत्रद्रव्यत्वेन पयसो विधानार्थे महावाक्ये मध्ये श्रुतं जर्तिलगवीधुकयवागूविधानं सार्थवादं विधिसरूपार्थवादत्वेन नीतमिति पयोविधानमपि तथा नीयते ।

अनन्यथासिद्धब्रह्मलिङ्गादिति अनन्तत्वस्यानन्यथासिद्धिर्दर्शिता । सर्वाणि ह वेत्यादिवाक्येनाकाशः परायणमाकाशं प्रत्यस्तं यन्तीति वाक्याभ्यां च प्रदर्शितम्। सकलकार्योत्पत्तिस्थितिलयाधारत्वं मूलकारणान्तरव्यवच्छेदकेनावधारणेन लम्भितमुपादानातिरिक्तकर्तृराहित्यं चानन्त्यान्तर्गतवस्तुपरिच्छेदराहित्योपपादकत्वेनानन्यथासिद्धम् । परोवरीयस्त्वमपि परोवरीयसो ह लोकान् जयतीत्यादिवाक्योक्तस्वानुगुणफलवत्त्वादनन्यथासिद्धम्* ॥

अत एव प्राणः ॥ २३ ॥ ११९ । २२

सर्वाणीति वाक्यमिति । ननु प्रत्यक्षानुग्रहनियमितार्थश्रुत्यन्तरसंवादेनेदं वाक्यं वायुविकारपरमित्येतदयुक्तम् । प्रत्युदाहरणसंगत्ययोगात् । वायुविकारस्य सर्वभूतसंवेशनोद्गमनहेतुत्वसम्भवे हि तद्द्वारा तत्कारणस्य भूताकाशस्यापि तत्सम्भवतीति पूर्वाधिकरणोक्तस्तत्र तदसम्भवः प्रत्युद्धृतः

* अत्र अष्टमम् आकाशाधिकरणं पूर्णम् ।

स्यात् । अवधारणोपबृंहितं तत्तच न सम्भवतीति चेद् वायुविकारे ऽपि तुल्यम् । इहापि प्राणादेवेत्यवधारणश्रवणादिति चेत् । उच्यते । इह सर्वाणि भूतानीति शब्दः प्राणिवर्गपरः । भूतशब्दस्य महाभूतेषु प्राणिषु च रूढ्यविशेषे ऽप्यत्र केषां ग्रहणं कार्यमिति विशये आदित्यान्नवाक्ययोः सर्वाणि भूतानीत्यस्य गातृत्वाभ्यवहर्तृत्वलिङ्गेन प्राणिपरतया तत्प्रायपाठस्य निर्णायकस्य सत्त्वात् । तेषां च सर्वेषामपि प्राणे स्वापप्रबोधयोरुत्पत्तिलयौ दैनंदिनौ श्रुत्यन्तरे तद्भोगसाधनेन्द्रियलयोत्पत्तिकथनद्वारोपलक्षिताविहा-प्यर्थतया स्वीकार्य्यौ । अवधारणं त्वाकाशवाक्ये मूलकारणान्तरस्येवाकाशा-न्तरकारणान्तरस्य व्यवच्छेदकं स्यात् प्राणवायुं विना ऽन्यस्य कस्य चिदि-न्द्रियसंवेशनोद्गमनाधारापादानभूतस्य ब्रह्मव्यतिरिक्तस्याभावात् । अयोग-व्यवच्छेदकं वा सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीव-न्तीत्यन्नवाक्यशेषगतायोगव्यवच्छेदकावधारणप्रायपाठात् । न ह्योदनमेवा-भ्यवहरन्तः प्राणिनो जीवन्ति व्यञ्जनादीनामप्यभ्यवहारात् । इहान्नशब्दो ह्योदनपरो न तु अदनीयमात्रवाची योगतो रूढेः प्राबल्यात् । भिस्सा स्त्री भक्तमन्धो ऽन्नमिति कोशकारवचनेनान्नेन व्यञ्जनमिति पाणिनिव्यवहारेण चान्नशब्दस्यौदने रूढ्यवगमात् । न च सर्वप्राणिनामोदनाभ्यवहारा ऽयोगव्यव-च्छेदो ऽपि नास्ति वृक्षादिष्वभावादिति वाच्यम् । अत्र सर्वाणि भूतानीत्य-स्योदनाभ्यवहारयोग्यप्राणिपरत्वेन संकोचोपपत्तेः । सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैस्सन्तं गायन्तीति पूर्ववाक्ये तस्य गातृत्वयोग्यप्राणिषु संकोचदर्शनात् । आकाशवाक्ये त्वेवंभूतप्रायपाठाभावाद् भूतशब्दः कार्यसा-मान्यपरो बालाक्यधिकरणन्यायात् । अवधारणं चान्ययोगव्यवच्छेदकम् । तस्य तत्रैव स्वारस्यादिति विशेष इति पूर्वपक्ष्याशयः ।

१२० । ११ * **अन्नमपि तदभिमानिदेवतेति ।** नन्विहान्नमोदन एव न तु तदभि-मानिदेवता प्राणिभक्ष्यत्वोक्तेः । भाष्यविरुद्धं चान्नशब्दस्य देवतापरत्वमङ्गीकृ-त्यान्नादित्यदेवताप्रायपाठात् प्राणशब्दस्य देवतापरत्वसमर्थनम् । भाष्ये हि प्रसिद्ध्यतिशयप्रत्यक्षानुग्रहाभ्यां पूर्वपक्षः कृतः । न च प्राणशब्दस्य ब्रह्मापेक्षया देवतायां प्रसिद्ध्यतिशयो ऽस्ति तस्यां रूढेरभावाद् निरूढेर्ब्रह्मण्यपि तुल्यत्वात् । न च तस्यामचेतने वायुविकारइव सर्वभूतसंवेशनोद्गमनसमर्थने प्रत्यक्षानुग्रहो

ऽस्ति तस्या एव शास्त्रैकगम्यत्वात् । तस्माद्यथाभाष्यम् अन्नादित्यद्रूपाऽब्रह्मप्रायपाठात् प्राणो ऽप्यब्रह्मेत्येव पूर्वपक्षः कर्तुं युक्तः । तथा सति निरस्तो ऽप्ययमर्थ इत्यादिटीकोक्तप्रकारेण प्रायपाठस्य मूलयुक्त्युपोद्बलनमात्रार्थत्वं न वक्तव्यम् । ईक्षत्यधिकरणे* गौणतापादकः प्रायपाठो निरस्तः । अयं तु प्राणशब्दस्य मुख्यार्थत्वोपपादकः प्रबलः । आनन्दमयमुख्यार्थत्वोपपादकान्नमयाद्यब्रह्मप्रायपाठवदित्यधिकशङ्कावकाशसत्त्वादिति चेत् । सत्यम् । टीकाकाराणामाचार्याणां च प्राणो वायुविकार इत्येव पूर्वपक्षो ऽभिमतः । अत एव तेषां सन्देहटीकादिषु वायुविकारशब्देनैव व्यवहारः । तत्र यद्याकाशवाक्यइव ब्रह्मासाधारणधर्मोपक्रमोपसंहाराभावे ऽपि प्राणवायुव्यावर्तकदेवताशब्दोक्तचेतनोपक्रमोपसंहारौ स्तः तदनुसारेणान्नशब्दो ऽपि तदभिमानिदेवतापर इति कश्चित् शङ्केत तदा ऽन्नादित्यदेवताप्रायपाठात् प्राणशब्दो ऽपि प्राणदेवतापरो ऽस्तु प्रत्यक्षानुगृहीतश्रुत्यन्तरसंवादलब्धसर्वभूतसंवेशनोद्गमनहेतुभावस्य प्राणवायुधर्मस्य तदभेदोपचारेण तदभेदाध्यासेन वा तदभिमानिदेवतायां व्यपदेश इत्युपपत्तेः अन्नधर्मस्यापि तदभिमानिदेवतायां तथैवोपपादनीयत्वादिति टीकाकारैः कल्पान्तरं दर्शितमिति तत्रत्यशङ्कापरिहारोभयोपपादनार्थमियम् अन्नशब्दस्य देवतापरत्वोक्तिः ।

इन्द्रियमात्रलयः प्रमाणान्तरदृष्टो न भूतलय इति । भूत- १२० । २०
शब्दः प्रायपाठाद्ध विशये प्रायदर्शनादिति न्यायेन† प्राणिवर्गपर इति भाष्ये यदा तु भूतश्रुतिर्महाभूतविषयेत्यतः प्राचीनग्रन्थेन दर्शितम् । यदा त्वित्यादिना तु प्राणशब्देन मुख्यार्थतया स्मारितो वायुस्तद्वर्ग्यमहाभूतरूढिमुन्मेषयति तेन महाभूतपर इति दर्शितम् । द्वितीयपक्षे स्पष्टो ऽर्थः । प्रथमपक्षे त्वयमर्थः । शरीरेन्द्रियसंपिण्डितश्चेतनो हि प्राणी तत्रेन्द्रियाणां चेतनस्य च व्यापाराभावेन स्वापकाले तल्लयसद्भावेपि शरीरलयाभावान्न सर्वात्मना भूतलय इति । एवं चात्र सर्वशब्दः सर्वः पटो रक्तः सर्वं वनं पुष्पितं सर्वा पृथिवी वित्तस्य पूर्णा स्यादित्यादाविवावयवकार्त्स्न्यपरः । **सर्वत्राप्यपूर्वत्वादिति ।** नन्वार्षेयं वृणीतइत्युत्पत्तिवाक्यावगतमेकत्वम् । तच्च चमसाध्वर्यून् वृणीतइत्युत्पत्तिवाक्यावगतं बहुत्वमिवोत्पाद्यगतत्वाद्विवक्षितमतस्तदपूर्वं न भवति ।

---

* व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ ५ ।   † जै॰ सू॰ अ॰ २ पा॰ ३ सू॰ १६ ।

द्वित्वचित्त्वे त्वपूर्वत्वे ऽपि विधातुमशक्ये उत्पत्तिशिष्टैकत्वविरोधादिति चेन्न । अपूर्वार्थविषयत्वान्न चतुरो वृणीतइत्यादिलाघवमूलस्तुतिसमभिव्याहाराच्च वाक्यवैयर्थ्यपरिहारार्थमुत्पत्तिशिष्टमपि विभक्तितः प्रतीतं संख्याविशेषाविवक्षायामेकवचनमुत्सर्ग इति शाब्दिकमर्यादयैकवचनप्रतीतत्वेनाविवक्षिततया नेतुं शक्यम् । एकत्वमुपमृद्य प्रातिपदिकार्थयोर्विधाने सति ताभ्यां बाधितस्यैक-
१२१ । ११ त्वस्याप्राप्त्या तत्प्राप्त्यर्थमेकत्वस्यापि विधानमित्युपपत्तेः । **प्रतिविध्यावृत्तिः स्यादिति** । आद्ययोर्विध्योः स्तुत्याकाङ्क्षायां या ते ऽग्ने अयाशया रजाशयेति मन्त्रयोर्विशेष्याद्याकाङ्क्षया तनूर्वर्षिष्ठेत्यादेरिव चतुरादिसंख्यानिर्वृत्तिप्रयुक्तलाघवमूलस्तुतेः अच्छिद्रेणेत्यादिवाक्यशेषस्य पवनक्रियान्वयाविशेषेणेव न्यूनसंख्याविध्यन्वयाविशेषेण चावृत्तिः स्यात् । सा चैकत्र विधिकल्पनेनावृत्तिसम्भवे न युक्तेति भावः । इदमुपलक्षणम् एकवाक्यत्वसम्भवे वाक्यभेदो न युक्त इत्यस्यापि ।

भाष्ये वाक्यशेषेणेत्यस्य ब्रह्मलिङ्गाम्नानस्थलनिर्देशमात्रार्थत्वेन प्रतीयमानस्य स्ववाक्यगतत्वेन लिङ्गप्राबल्यार्थतया किमिति टीकाकृता व्याख्यानं कृतं लिङ्गस्य सन्निधानतः स्वत एव प्राबल्यसत्त्वादित्याशङ्क्याह **अन्नादित्यसन्निधानमिति** । अन्नादित्यरूपाऽब्रह्मप्रायपाठः प्राणश्रुतिमुख्यतोपपादकतया श्रुत्यनुग्राहकत्वात् सदीक्षणगौणतापादकगौणेक्षणप्रायपाठतो मुख्यक्षितयलङ्घनापादकपुच्छशब्दोक्तावयवप्रायपाठतश्च प्रबलः । ततश्च प्रायपाठादब्रह्मरूपः प्राणो वायुविकार इति निश्चये सति तदधिकरणकसंवेशनतदपादानकोद्गमनरूपसमभिव्याहृतक्रियान्वययोग्येन्द्रियावस्थापन्नभूतपरतया सङ्कोचः स्यात् । अन्नादित्यवाक्यगतभूतशब्दयोः समभिव्याहृतगानाभ्यवहारक्रियान्वययोग्यभूतपरतया सङ्कोचदर्शनेन तत्प्रायपाठादित्यन्नादित्यवाक्यगतसन्निधानद्वयावलम्बनशङ्कानिराकरणार्थतया* स्ववाक्यगतत्वेन शीघ्रोपस्थितिकस्य सर्वभूतोत्पत्तिलयकारणत्वस्य विलम्बितोपस्थितिकवाक्यान्तरगतसन्निधानानुसारेण सङ्कोचकल्पनं न युक्तम् । अत एवाकाशवाक्ये ऽपि स्वरप्राणाद्यब्रह्मप्रायपाठेन तस्य न सङ्कोचकल्पनमिति परिहारवाचोयुक्तेर्भाष्यारूढत्वप्रदर्शनार्थमेवं व्याख्यातमिति भावः । यद्यप्यत्र भूतशब्दस्यान्नादित्यवाक्यगतभू-

* निराकरणार्थस्येति २ पु॰ पा॰ ।

तशब्दसन्निधानात् प्राणिपरत्वेऽपि वाक्यशेषार्थस्य ब्रह्मलिङ्गत्वमविरुद्धं तथापि भूतशब्दशक्तिपर्यालोचनायां रूढ्योः परस्परकलहेन योगोन्मेषात् कार्यसामान्यमेवार्थो भवतीत्याकाशवाक्यशेषवदस्यापि वाक्यशेषस्य सकलकार्यकारणत्वमेव ब्रह्मलिङ्गमर्थ इति द्रष्टव्यम् ।

ब्रह्मवाचिपदाभावेनेति । ननु ब्रह्मवाचिपदसत्त्वे श्रुतिः स्याद् न १२१ । १७
वाक्यम् । उच्यते । विषयवाक्ये विशेष्यपदं चेद् ब्रह्मवाचि तदा श्रुतिः विशेषणपदं चेत् तदा ब्रह्मपरत्वेन निर्णिनीषितस्य विशेष्यपदस्य च समभिव्याहाररूपं वाक्यं प्रमाणमिति व्यवस्था । अत एवाग्निमाधिकरणन्यायनिर्णये गायत्रीपदस्य ब्रह्मपरत्वनिर्णायकं यद्वै तद् ब्रह्मेत्येतद्वाक्यं प्रमाणत्वेन व्यवहृतम् । ननु मा भूदादित्यसन्निधानाद् अब्रह्म सन्प्राणो वायुविकारः भूतानि च तत्संवेशनोद्गमनयोग्यानीन्द्रियाणीति निर्णयः प्राणश्रुतित एव स्यात् । आकाशवाक्यगतानन्तत्ववदुपक्रमोपसंहाराभ्यां तात्पर्यविषयत्वेन निश्चितस्य प्राणश्रुतिमुख्यार्थप्रच्यावकस्य लिङ्गस्याभावादित्याशङ्क्य तथाभूतं लिङ्गमाह **कतमेति** । टीकोपन्यस्तमुक्तम् । लिङ्गोपपादकं पूर्वपक्षिणः कक्षान्तरमुद्भाव्य दूषयति **अथेति*** ॥

ज्योतिश्चरणाभिधानात् ॥ २४ ॥ १२२ । १

तन्निरासकारणाभावादित्येतदयुक्तम् । सार्वात्म्यादिवदिह ब्रह्मलिङ्गाश्रवणेऽप्युपासनावाक्यत्वेनाधारमर्यादाकल्पनोपपत्तेस्तन्निरासकहेतोस्तच्च व्युत्पादितस्याचाप्यविशिष्टत्वादित्याशङ्क्य तद्वाक्यमन्यथा व्याख्यातुं तदानुगुण्येनावतारयति **किमुपोद्बलनायेति** । **भवत्वेकदेशस्येति** । समस्तं ते जगदुपास्यं तस्य द्युमर्यादा न सिद्धेति शङ्कितुर्हृदयम् । एकैकामित्यादिप्रतीकग्रहणं तेजःप्रभृतीत्यादि तद्व्याख्यानमिति प्रतिभाति तदयुक्तम् । भाष्ये श्रुतौ वा तथाभूतप्रतीकाभावादुत्तरग्रन्थस्य तद्व्याख्यानत्वासम्भवाच्चेत्याशङ्क्य भाष्योदाहृतश्रुतिगतपदयोजनार्थत्वेनैकैकामित्यादिकं भिन्नवाक्यतया व्याचष्टे **तासामिति** । **गुणस्तु विभक्त्यर्थ इति** । प्रत्ययार्थप्राधान्यप्रसिद्धिः कृत्तद्धितार्थविषयेति भावः† ।

---

* अत्र नवमं प्राणाधिकरणं पूर्णम् ।

† एतदग्रे-शेषभक्तो विध्यभावाच्च विद्यत इत्यादिः (पृ. २०८)-अर्थवादत्वोक्तिरित्यन्तो ग्रन्थस्तदुत्तरं न स्ववाक्यगतेत्यादिग्रन्थो न च भूतपृथिवीति प्रतीकात्पूर्वं २ पु. । क्रमप्राप्तोऽयमेव पाठः साधुः परं बहुपुस्तकानुरोधादुपरितनः स्थापितः ।

१२४ । ५ न स्ववाक्यगतमपि प्रस्तोष्यमाणमिति । स्ववाक्यगतत्वरूपप्रत्यासत्त्यपेक्षयापि सर्वनाम्नामौत्सर्गिकी प्रसिद्धार्थपरत्वव्युत्पत्तिर्बलवती । अत एव तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रुतावामिक्षापदवाच्यं पयसोऽर्थान्तरं दधिपयस्संसर्गजन्यं मधुराम्लत्वेन तदुभयविलक्षणं द्रव्यमभ्युपेयं पयो दध्यामिक्षेति व्यपदेशभेदादिति तस्यैव द्रव्यान्तरस्य वैश्वदेवयागद्रव्यत्वे आमिक्षापदसमानाधिकृततत्पदस्यापि तद्द्रव्यपरत्वे च प्राप्ते सर्वनाम्नः प्रकृतपरत्वस्वाभाव्यात्तत्पदं द्विकर्मिकामानयनक्रियां प्रति प्रधानकर्मतया दध्यानयनाधिकरणत्वेन निर्दिष्टं पयः परामृशतीति पय एव यागद्रव्यम् । तत्पदे स्त्रीलिङ्गमामिक्षापदसामानाधिकरण्यकृतम् । आमिक्षापदमस्मादेव वैदिकव्यवहारादम्लद्रव्यघनीभूतपयोवाचकम् । अम्लरसो न यागद्रव्यगतः किं तु तत्संस्कारकद्रव्यगत इति पयोरूपामिक्षाप्रयुक्तमेव दध्यानयनं न वाजिनप्रयुक्तमपीति निर्णीतं चतुर्थे* । दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यमिति विधायागविधौ दध्यादिसप्तद्रव्यमेलनरूपसंसृष्टैकद्रव्यक एको यागस्तत्पदं च संसृष्टद्रव्यपरमिति प्राप्ते तत्पदं प्रकृतपरामर्शित्वस्वाभाव्यादसंसृष्टदध्यादिसप्तद्रव्यपरमिति दध्यादिद्रव्यकाः सप्त यागाः । संसृष्टपदं यागभेदेप्येकदेवत्यतया सान्नाय्यवद्दध्यादीनां सह प्रक्षेपे संसर्गसत्त्वादनुवादकम् । नपुंसकैकवचनं नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति व्याकरणानुशिष्टमुपपाद्यमिति निर्णीतं टुप्टीकायाम्† अष्टमे द्वादशे च ।

ननु यत्र सर्वनाम्नः प्रस्तुतपरत्वं न संभवति तत्र प्रस्तोष्यमाणपरत्वमपि द्वितीये संज्ञाधिकरणे‡ व्युत्पादितम् । तत्र ह्यथैष ज्योतिरेतेन सहस्रदक्षिणेन यजेतेत्यत्र सर्वनाम्नः प्रकृतज्योतिष्टोमपरत्वं न संभवति ज्योतिर्ज्योतिष्टोम इति नामभेदस्यार्थान्तरपरत्वस्वारस्यादथेत्यनेनाधिकारार्थेन प्रकरणविच्छेदावगमात् प्रकृते ज्योतिष्टोमे एवास्य वाक्यस्य सहस्रदक्षिणालक्षणगुणविधानार्थतायामेतेनेत्यादिमन्त्रस्य§ पर्याप्ततया अथैष ज्योतिरित्यनुवा-

---

* जै० सू० अ० ४ पा० १ सू० २२–२४ ।

† टुप्टीकेति वार्तिकगतचतुर्थाध्यायप्रभृतिग्रन्थस्य संक्षिप्तत्वमूलकं नाम ।

‡ जै० सू० अ० २ पा० २ सू० २२ ।

§ मात्रस्येति २ पु० पा० ।

दवैयर्थ्याच्च । तस्माद् ज्योतिर्नामके सहस्रदक्षिणे प्रस्तोष्यमाणे यागान्तर एव सर्वनाम्नो वृत्तिरभ्युपेयेति निरूपितम् ।

तदिहापि ज्योतिः पुरुषः इति संज्ञाभेदः । अथशब्देन प्रकरणविच्छेदावगमः । अस्य वाक्यस्य प्रकृतमेव त्रिपाद् ब्रह्मानूद्य तस्य कौक्षेयज्योतिष्युपासनाविधानार्थतायामिदं वाव तद्यदिदमस्मिन्नन्तःपुरुषे ज्योतिरित्येतावत एव पर्याप्ततया अथ यदतः परो दिव इत्याद्यनुवादवैयर्थ्यप्रसङ्गश्चेति समान एव संज्ञाधिकरणन्यायः । किं च अथ यदतः पर इत्यादियदुपबन्धयुक्तं वाक्यं न केवलं यत्पदनिर्दिष्टस्य द्युसंबन्धमात्रं कीर्तयति येन द्युसंबन्धिप्रकृतसद्भावमात्रोपपादनेन चारितार्थ्यं स्यात् किं तु दिवः परेषु लोकविशेषेषु दीप्यमानत्वमपि कीर्तयति । न च तदपि तावानस्येति ऋचा प्राप्तम् । अतो यदुपबन्धयुक्तवाक्यनिर्दिष्टयावद्विशेषविशिष्टप्रसिद्धेर्यत्पदेनानुवदितुमपेक्षितत्वात्तस्याश्चासंभवादत्र यत्पदस्य प्रस्तोष्यमाणपरत्वमेव युक्तमिति चेदुच्यते । दिवः पर इत्यत्र द्युशब्दः स्वर्लोकपर्यायः स्वर्लोकश्चात्र भूर्भुवः स्वरिति लोकत्रयपक्षानुसारेण भूमिसूर्यान्तरालरूपाद् भुवर्लोकादुपरितनसत्यलोकान्तो विवक्षितः तस्योपरिभागरूपः सत्यलोकान्तर्गतहिरण्यगर्भादिभोगभूमिभेदाः । तेषु ब्रह्मलोकेषु परा एव ते वसन्तीत्यादिश्रुतिप्रसिद्धाः । तेषु सर्वस्मादपि लोकादुपरि स्थितेषु सर्वोत्तमेषु लोकेषु हिरण्यगर्भादिमूर्त्यभिव्यक्तं ब्रह्म दिवः परमित्यनुत्तमेषूत्तमेषु लोकेषु स्थितमिति चानूद्यते हिरण्यगर्भादिमूर्तिप्रभावच्छेदेन दीप्यतइत्यप्यनूद्यते । एतावदद्यापि त्रिपादस्यामृतं दिवीत्यतो न प्राप्तं तथापि तस्य दिवमनूद्य तत्र स्थितिविधानाय द्युस्वरूपावगत्यर्थं वचनान्तरमुखनिरीक्षणावश्यम्भावेन ततः सूर्यादिसत्यलोकोपरि भूम्यन्तद्युस्वरूपादिप्राप्तिः । अथ वा मा भूत्पुरोवादान्तरं त्रिपादस्यामृतं दिवीत्ययमेव द्युरूपाधिकरणविशेषविशिष्टत्रिपाद्ब्रह्मप्रतिपादको यदतः पर इत्यादेः पुरोवादोऽस्तु । तत्र किं द्युशब्द आकाशपरः स्वर्लोकपरो वा द्वितीयेऽपि ध्रुवलोकान्तपरः सत्यलोकान्तपरो वा । दिवीति सप्तमी यत्किञ्चिद्भागावच्छेदेनाधिकरणत्वपरा उपरिभागावच्छेदेन वेति सम्भवदनेकतात्पर्यस्य पुरोवादस्यास्मादेवानुवादादर्थविशेषव्यवस्थितिरस्तु । अस्ति हि पुरोवादस्यानुवादवशादर्थविशेषव्यवस्थितिः । तथा हि ।

यज्ञायज्ञीयेन स्तुवीतेति प्रकृत्य न गिरा गिरेति ब्रूयाद् यद्गिरा गिरेति ब्रूयादात्मानमेव तदुद्गाता गिरेदैरं कृत्वोद्गेयमिति यज्ञायज्ञीयसाम्नः ऋचि गिरा गिरा च दक्षस्य इत्यत्र गिरापदप्रतिषेध इरापदविधिश्च श्रूयते । तत्र गिरापदप्रतिषेधो ऽनुवादः । तस्यापि विधाने वाक्यभेदापत्तेः । इरापदस्य प्रकरणेन यज्ञायज्ञीयसम्बन्धे दृष्टार्थस्य तस्य यज्ञायज्ञीयगतकिञ्चित्पदकार्यावगत्यवश्यम्भावे चावगते:* कस्य पदस्य स्थाने तदित्याकाङ्क्षायां गिरापदप्रतिषेधानुवादसामर्थ्यात् तस्य स्थाने इत्यवसीयतइति नवमे निर्णीतम्† ।

तथेहापि भविष्यति । एवमुपासनोपयुक्तार्थविशेषनिर्णयोपयोगित्वान्नानुवादवैफल्यशङ्कापि । संज्ञाभेदेनार्थभेदशङ्का तु न प्रवर्त्तते । ज्योतिःशब्दस्य प्रकाशवाचिनस्त्रिपाद्रूपेण प्रकृते ब्रह्मणि वाचकतयैव वृत्तिसम्भवात् । श्रुत्यन्तरेषु ब्रह्मणि प्राचुर्येण दृष्टप्रयोगत्वाच्च । अथशब्देन प्रकरणविच्छेदशङ्कापि नास्ति तस्य पूर्वप्रकृतापेक्षवाचित्वोपपत्तेः । तेन पूर्वोपासनान्वितब्रह्मगुणानां ज्योतिरुपासनायामप्यन्वयसिद्ध्या तद्वाचित्वस्याथ सफलत्वात्प्रकृतं ब्रह्माऽविहायैव तस्योपासनान्तरारम्भार्थत्वसम्भवेनाधिकारार्थत्वे ऽप्यविरोधाच्च ।

३ । २४ शेषभक्षो विध्यभावान्न विद्यतइति‡ । ननु सर्वतः परिहारमाश्विनमित्यादिषु सार्थवादेषु प्रत्यक्षवचनेषु जाग्रत्सु कथं विध्यभावपूर्वपक्षोत्थानम् । इत्थम् । आश्विनं गृह्णातीत्यादिविधिभिस्तत्तद्देवतोद्देशेन गृहीतः सोमरसः कृत्स्नो ऽप्युपांशुयाज्यावद्धोतव्य इति तत्र शेषाभावाद्धुतशेषस्येदं न भक्षणविधानं किं त्वाश्विनग्रहादिधर्मकसोमगुणविशिष्टार्थकर्मरूपभक्षणविधानं कथं चिच्छेषसद्भावसमर्थने ऽपि रागप्राप्तभक्षणानुवादेन गुणमात्रस्य विधानं न भक्षणस्यापि विशिष्टविधिगौरवापत्तेरिति पूर्वपक्षी मन्यते । अल्पं जुहोतीति वचनसामर्थ्यादस्ति तावच्छेषः । न चास्य विधायकत्वे सम्भवति पाचाल्पत्वप्रयुक्ताल्पत्वानुवादकतया वैयर्थ्याश्रयणं युक्तं तद्भक्षणस्याप्राप्तस्य गुणविशेषविशिष्टस्य विधानेन वचनानां चारितार्थ्ये सम्भवति

---

* कार्यावगतेरिति २ पु० पा० । † जै० सू० अ० ६ पा० १ सू० ५० ।
‡ पाठव्यत्ययः २०५ पृष्ठे टि० द्रष्टव्यः ।

नाश्वनादिधर्मकसोमगुणविशिष्टार्थकर्मस्वरूपभक्षणविधिगौरवसमाश्रयणं युक्तम् । न चात्यन्तलाघवार्थं गुणमात्रविधानमपि युक्तम् । भक्षणस्याप्राप्तत्वाद् रागतः पक्षप्राप्तस्य नित्यवदाम्नातगुणाश्रयत्वायोगादिति सिद्धान्तः ।

सर्वतःपरिहारमाश्विनं भक्षयति तस्मात् सर्वतः श्रोत्रेण शृणोतीत्यस्यायमर्थः । आश्विनं सर्वतःपरिहारं शिरः परितो भ्रमयित्वा भक्षयति तस्मात्सर्वतः सर्वासु दिक्षु स्थितं शब्दं श्रोत्रेण* शृणोतीति उपयामगृहीतो ऽसि शुतसदसि श्रोत्राभ्यां त्वेति मन्त्रे ह्यश्विनोः श्रोत्रसंरक्षकत्वमाम्नातम् । तदीयसोमशेषस्य च श्रोत्राय मे वर्चोदा वर्चसे पवस्वेति श्रोत्रवर्चःप्रदत्वमाम्नातं तदीय†सोमशेषस्य सर्वतो भ्रमणे सति सर्वदिगभियुक्तशब्दश्रवणं भवतीति तात्पर्यम् । सर्वतःपरिहारमिति णमुलन्तः शब्दः ।

अर्थवादा इति । भक्षणवचनानां तस्मात्सर्वत इत्यादिभिः स्वयमर्थवादैर्युक्ततया स्वतन्त्रत्वेन प्रतीयमानानामन्यार्थवादत्वप्रतीत्यभावे ऽपि तत्प्रतीतिमभ्युपेत्य तथाप्युपरिधारणवाक्यवदपूर्वत्वाद्विधायकत्वमङ्गीकर्त्तव्यमित्यभिप्रेत्यार्थवादत्वोक्तिः । **न च भूतपृथिवीति** । ननु भूतपृथिवीशरीरहृदयानि निर्दिश्य सैषा चतुष्पदेति स्त्र्यगनुशिष्टटाबन्तचतुष्पादशब्दप्रयोगाद् गायत्र्यामृच्येव स्तावकतया भूतादिपादत्वं तत्समभिव्याहृतं षाड्विध्यं च योजनीयमिति चेद् न । गायत्र्यनुगतब्रह्मलक्षणायां गायत्रीसदृशे ब्रह्मणि गौणवृत्तौ च प्रथमं गायत्र्युपस्थितिसत्त्वेन तद्विषयतया आबन्तत्वोपपत्तेः‡ । गायत्री वा इदं सर्वमित्यादिश्रुतिवाक्यलेखने येयं पृथिवीत्यादावनन्तरमाम्नातस्यास्यां हीदं सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयतइत्यादेरलेखनं प्रकृतानुपयोगात् । प्रसिद्धा त्रिपदा गायत्रीत्यादिपाठः साधुः न तु त्रिपाद्गायत्रीत्यादिपाठः । **षडक्षरैरिति** । पादैः§रिति शेषः । १२३ । २८

दिवीति वाक्यशेषवशादिति । दिवीति सप्तमीस्वारस्यादित्यर्थः । प्राग्विश्वतःपृष्ठेषु सर्वतःपृष्ठेष्वित्यस्य टीकाकारकृतव्याख्यानानुसारेण तत्पुरोवादस्य दिवीत्यस्य सत्यलोकान्तर्गतब्रह्मविष्णुशिवभोगभूमिपरत्वं त्रिपादित्यस्य ब्रह्मादिमूर्तित्रयाभिव्यक्तिपरत्वं चार्थ इत्यर्थात् स्थि- १२४ । २

* श्रोत्रेणेति नास्ति २ पु० ।
† अतस्तदीयेति २ पु० पा० ।
‡ टाबन्तत्वोपपत्तेरिति ३ पु० पा० ।
§ पदैरिति ३ पु० पा० ।

तमेव वैभवादिदं व्याख्यानद्वयम् । ननु व्याख्यानत्रये ऽपि सैषा चतुष्पदा षड्विधा गायत्रीत्येतदनन्तरं तदेतदृचाभ्यनुक्तमिति ऋगवतारिकायाः कथं संगतिरिति चेत् । गायत्र्याख्यस्य ब्रह्मणः सर्वभूतात्मत्वादिरूपो यो महिमा वर्णितस्स सर्वो ऽपि तावानस्य महिमेति प्रथमपादेन कीर्त्यत इति संगतिः । ननु पुरुषसूक्तपठितो ऽयं मन्त्रः तत्र प्रकृतं महिमानं कीर्तयेत् तस्यैतत्प्रकरणगतमहिमकीर्तने कः प्रसङ्गः । नैष दोषः । उभयत्रापि महिमवर्णनस्यार्थैत एकत्वात् । पुरुषसूक्ते ऽपि स भूमिं सर्वतो वृत्वा पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यमित्याम्नानात् । एवं प्रथमपादस्य प्रकृतार्थविषयत्वे स्थिते द्वितीयपादेन ततो ज्यायस्त्वं ब्रह्मणः प्रतिज्ञायोत्तरार्द्धेन यत्तदुपपादनं कृतं तस्य पादचतुष्टयवत्त्वेन सादृश्येन गायत्रीपदस्य ब्रह्मणि प्रवृत्त्युपपादकतया प्रकृतसङ्गतिः । ब्रह्मपरत्वादभिहितमित्युक्तमिति टीका न युक्ता लक्षणापक्षे ऽपि ब्रह्मपरत्वस्याविशिष्टत्वादित्याशङ्क्ते **नन्विति** ।

१२५ । १० **गौणे प्रयोगे इति** । ननु गौण्यां तात्पर्याधीनो गुणलाभः लक्षणायां संबन्धाधीनस्तात्पर्यलाभ इति नायं नियमः । मुखमिदं कमलमिति कविसमयप्रसिद्धायां कर्णो ऽयं राजेत्यादिलोकव्यवहारसिद्धायां च गौण्यां मुख्यार्थप्रसिद्धकान्तिमत्त्वदातृत्वगुणलाभस्य तात्पर्यावेक्षणानपेक्षत्वाद् यष्टीः प्रवेशयेत्यादौ तात्पर्यानुपपत्तिमूलकलक्षणायास्तात्पर्यान्वेषणापेक्षत्वाच्च तत्रापि प्रकरणाद्भवमतभोजनप्रवेशनान्वयानुपपत्तिर्लक्षणाबीजं न तात्पर्यानुपपत्तिरिति चेन्न । गङ्गायां घोष इत्यत्र सामीपिकाधिकरणविवक्षायां मुख्यार्थान्वयसंभवे ऽप्यौपश्लेषिकाधिकरणे तात्पर्यमिति तात्पर्यानुपपत्तिरेव लक्षणाबीजं नान्वयानुपपत्तिरिति वैपरीत्यस्यापि वक्तुं शक्यत्वादिति चेदुच्यते । प्रकृताभिप्रायमिदं विशेषकथनम् । प्रकृते सार्वात्म्याद्यन्वययोग्ये ब्रह्मणि गायत्रीपदस्य तात्पर्ये ऽवधृते तन्निर्वाहार्थं तत्र तस्य गौणवृत्तिमूले गुणे वाच्ये ब्रह्मगायत्र्योः सादृश्यरूपस्य गुणविशेषस्याप्रसिद्धत्वात्तदन्वेषणे ब्रह्म चतुष्पादिह निर्दिष्टम् । प्रसिद्धाया गायत्र्यास्तेषामृग्यत्रार्थवशेन पादव्यवस्थेति प्रकारेण त्रिपदत्वे ऽपि यथा षष्टिस्त्रिष्टुभो माध्यन्दिने सवने इत्यर्थवादोक्तरीत्या माध्यन्दिनसवनगताः गायत्रीबृहत्यादयो ऽक्षरसंख्यामात्रेण त्रिष्टुभः एवमिह गायत्री षड्क्तिः षड्भिरक्षरैश्चतुष्पदेति पादचतुष्टयवत्त्वरूपो गुणो लम्भनीयः ।

लक्षणायां तु प्राथमिकत्वादभ्यर्हितत्वाच्चोपादानोपादेयभावसंबन्धः शीघ्रं स्फुरतीति संबन्धनिमित्तकं तात्पर्यमिति ।

आकाशः परमेश्वर इति । तस्यान्ते सुषिरं सूक्ष्ममित्यादिश्रुता- १२५ । २४
दूर्ध्वसुषिरवर्तित्वेनाम्नातो दहराकाशरूपः परमेश्वर ऊर्ध्वद्वारपालस्याधिष्ठातृदेवतेत्यर्थः । उपास्यस्य द्वारपालाधिष्ठातुश्च परमेश्वरस्य हृदयकमलमध्यतदूर्ध्वसुषिररूपावच्छेदक*भेदेन भेदः । आकाशपदस्य तदभिमानिदेवतापरत्वे वक्तुं शक्ये ऽपि दहरकमलोर्ध्वसुषिरे तदभिव्यक्तिरप्रसिद्धा कल्पनीया परमेश्वरस्य तु प्रसिद्धा क्लृप्ता ऽस्तीत्येवं व्याख्यातम् । **यदा मुख्यमाधारत्वमित्यादि ।** इयं क्लिष्टयोजना परत इत्येतदपि पञ्चम्यन्तमित्यभ्युपेत्य । यदि तु दिवः पर इति श्रुत्यनुसारेण दिव्येव सद् ब्रह्म दिवः परमित्युपदिश्यत इति भाष्यानुसारेण च प्रथमार्थस्तसिल्प्रत्यय आश्रीयते तदा दिव उपरिभागे स्थितं ब्रह्म दिवः परमेव भवतीति न का चिदनुपपत्तिरिति विस्पष्टत्वान्नोक्तम् ।

ननु दश सन्तस्तत्कृतमिति प्रकृतेषु दशसु कथं कृतशब्द इत्याशङ्क्य
तदुपपादयितुमाह **अत्रापि चतुरयकेति ।** लोके ऽक्षनिपातनरूपं द्यूतं १२६ । २१
द्विविधम् एकाक्षनिपातनं बह्वक्षनिपातनं च । तत्र बह्वक्षनिपातनं द्विविधं नियतसंख्यबह्वक्षनिपातनं अनियतसंख्यबह्वक्षनिपातनं च । एकाक्षनिपातनरूपस्यानियतसंख्यबह्वक्षनिपातनरूपस्य च द्यूतस्यायसंज्ञकाः सन्ति प्रकारविशेषाः । ते चतुर्विधाः । कृतत्रेताद्वापरकलिभेदात् । कृतायरूपे ऽक्षनिपातने जय इति द्यूतशास्त्रमर्यादा । तत्रैकाक्षनिपातनरूपे द्यूते य एको ऽक्षश्चतुरश्रः तस्याश्रिद्वयमश्रिद्वयमन्तरा चत्वारि स्थानानि क्रमाच्चतुस्त्रिद्व्येकसंख्यबिन्दुरूपाङ्कयुक्तानि भवन्ति । तेषु यच्चतुरङ्कस्थानं तस्योपरि भवनादक्षनिपातनं कृतायः । त्रिद्व्येकाङ्कयुक्तस्थानानामुपरिभावेन पतनानि तु त्रेतादयः । अनियतसंख्यबह्वक्षनिपातनरूपे तु द्यूते न्युप्तेष्वक्षेषु चतुष्कशो विभज्यमानेष्ववसाने चत्वारो ऽवशिष्यन्ते चेत् तदक्षनिपातनं कृतायः । त्रिद्व्येकावशेषे तु त्रेतादयः । अमुमर्थं श्रुतिरप्यनुवदति । ये वै चत्वारः

* सुषिरस्यावच्छेदकेति २ पु॰ पा॰ ।

स्तोमाः कृतं तत्। अथ ये पञ्च कलिः स इति। एवं लौकिकस्य द्यूतस्य प्रकारः। वैदिकं तु नियतसंख्यबहुवचनिपातनरूपं नियमेन कृतायरूपमत एव व्यवस्थितजयफलकम्। एवं चाग्न्याधाने राजन्यस्य कर्तव्यमापस्तम्बसूत्रे शतमक्षान्यजमानाय प्रयच्छन्नाहेत्युपक्रम्य दर्शितं कृतं यजमानो विजिनातीति। न्युप्तेषु शतसंख्येष्वक्षेषु चतुष्कशो विभज्यमानेष्ववसाने यः पञ्चविंशो भागः सो ऽपि चतुरक्ष एव। अतस्तदक्षनिपातनं कृतमिति यजमानो विजिनाति जयतीत्यर्थः। अत्र चतुरयकेति विशेषणं लौकिकग्रहणाय। अयेति ह्रस्वयुक्तपाठः साधुः। न तु चतुरायकेति दीर्घयुक्तपाठः। इह जानश्रुत्युपाख्यानएव यथाकृतायविजितायाधरे ऽयाः संयन्तीति प्रयोगात्। यजुर्वेदे कृतमयानां त्रेतायानां द्वापरायानामास्कन्दीयानामित्यादिप्रयोगादयः शुभावहे दैवे गतौ द्यूताक्षपातने इत्यादिनैघण्टुकव्यवहाराच्च ह्रस्वादेरेव द्यूतप्रकारवाचित्वावसायात्। यद्यप्याधानगतवैदिकमपि द्यूतं कृतं भवतीति दर्शसन्तस्तत्कृतमित्यत्रत्यकृतशब्दव्याख्यानाय विशिष्य लौकिकद्यूतं नान्वेषणीयम्। तथापि यत्र त्रिबिन्दूपरिभावादियुक्ताः अक्षावशेषादियुक्ता वा त्रेतादयो ऽपि सन्ति तत्र चतुर्बिन्दूपरिभावयुक्ते चतुरक्षावशेषयुक्ते वा द्यूते कृतशब्दो धर्मपादचतुष्टययुक्तयुगवाची समुचितं इति ज्ञायते। यथा कृतायविजितायेत्यत्रत्यविजयवचनं च विजयनिमित्तकृतप्रतिद्वन्द्विपराजयनिमित्तत्रेतादिविमिश्रितलौकिकोदाहरणएव स्पष्टं भवतीत्याशयेन छान्दोग्यविवरणे भगवत्पादैर्लौकिकमुदाहृतम्। अतस्तदनुसारिणाचार्यैरपि लौकिकग्रहणेन वैदिकं व्यावर्तयितुं चतुरयकत्वेन द्यूतं विशेषितम्। अनेनैव यत्र लौकिके ऽपि नियतसंख्यपञ्चाक्षपातनादिरूपे सर्वेषामुत्तानतया पातने जयः अन्यथा पराजय इति व्यवस्थावति द्यूतशास्त्रप्रसिद्धे द्यूतान्तरे कृतत्रेतादिकं नास्ति तस्यापि व्यावृत्तिः। एवं चायं वाक्यार्थः। चतुरयके लौकिके द्यूते यथा चत्वारोऽङ्काः सन्ति तद्वत्प्राणादिदशके चत्वारो ऽपि पदार्थाः सन्ति तदन्तर्गता यथा अङ्करूपा अवयवाः तद्वत् त्रयो ऽपि सन्ति यथा च द्व्यङ्करूपावयवौ तद्वद् द्वावपि स्तः। यथैकाङ्करूपो ऽवयवः तद्वदेको ऽप्यस्तीति। त्र्यङ्कायवद् एकाङ्कायवदिति केषु चित्कोशेषु पाठो दृश्यते। तस्मिन्पाठे सप्तमीसमर्थात् तत्र तस्येवेति सूत्रेण वतिर्वाच्यः न तु तेन तुल्यं क्रिया

चेद्वतिरिति सूत्रेण । तथा च अङ्कस्थानोपरिभावयुक्ते त्रेताये यथा त्रयो ऽङ्काः सन्ति तद्वत् त्रयो ऽपि सन्तीत्यादिरर्थो लभ्यतइति तेन प्राणादिदशके त्रेतादिशब्दप्रवृत्तिनिमित्तं प्रस्तुतानुपयोग्येवोक्तं स्याद् न तु श्रुतिगतकृतशब्दप्रवृत्तिनिमित्तम् । तस्मादयुक्तः स पाठः । चतुरङ्कवदिति पूर्ववाक्यस्थेन यथा चत्वारो ऽङ्काः सन्तीत्येवमर्थकेनार्थसारूप्यालाभाच्च स पाठो न युक्तः । अत्र सर्वे ऽप्यङ्कशब्दाश्चिह्नवाचिनः । एकाक्षनिपातने बिन्दूनां बहुक्षनिपातने अवशिष्टानां च साधारणः । उभयेषामपि चतुस्त्रिद्व्येकसंख्यत्वेन कृतायादिचिह्नत्वाविशेषात् ।

ननु सन्तु प्राणादिदशके चतुरङ्काय इव चतुस्त्रिद्व्येकरूपाः पदार्थाः प्रकृते किमायातमित्याशङ्क्य दशस्वेतेषु कृतशब्दप्रवृत्तिं प्रकृतार्थं कृतशब्दप्रसिद्धार्थसादृश्येनोपपादयितुं तस्य प्रसिद्धमर्थमाह द्यूतइति । ननु कृतसं- १२६ । २२
ज्ञेन चतुरङ्कायेन वायुप्राणादीनां किं सादृश्यम् । प्रागुक्तं चतुस्त्रिद्व्येकसंख्यासंख्येयत्वमिति चेद् । न तत्सादृश्यं श्रुतौ विवक्षितं दश सन्तस्तत् कृतमितिश्रुतौ दशशब्दसंकीर्तनेन दशसंख्यया सादृश्यविवक्षोन्नयनादित्याशङ्क्य चतुस्संख्यायास्तदन्तर्गतत्रिद्व्येकसंख्यानां च संयोजनेन* तस्मिन् दशसंख्यां संपादयति स च दशात्मक इत्यादिना । ननु दशसंख्ययैव सादृश्यविवक्षायां द्यूते चतुरङ्कायः कृतसंज्ञ इत्यादिग्रन्थ एव पर्याप्तः किमर्थस्तत्प्राचीनः प्रकृतेषु दशसु चतुस्त्रिद्व्येकसंख्यपदार्थवत्त्वरूपचतुरङ्कायसादृश्यकथनपरग्रन्थ इति चेत् । उच्यते । चतुरङ्काये दशसंख्यावत्त्वमवयवसंख्यासंयोजनेनौपचारिकं न तु संख्येयव्यक्तितावत्त्वप्रयुक्तं मुख्यं कथममुख्यगुणवद् मुख्यगुणवत उपमानं स्यादित्याकाङ्क्षायां गुणगतमुख्याऽमुख्यविवेको ऽत्र न विवक्षितः किंतु चतुस्त्रिद्व्येकसंख्याघटनीयत्वमात्रं तत्तु मुख्याऽमुख्यसाधारणमिति दर्शयितुं प्राचीनग्रन्थः । एवं दशसंख्यावत्त्वादेव तेषु दशाक्षरच्छन्दोविशेषवाचको विराट्शब्दश्च स प्रकृते दृष्टान्तः† ॥

प्राणस्तथानुगमात् ॥ २८ ॥ १२७ । ३

उतैकमेव बलवदिति । ननु किममूनि सर्वाणि समबलानि उतैतेषु ब्रह्मलिङ्गं बलवदित्येक एव संशयः प्रदर्शयितुं युक्तः । तथैव टीकायां

* संयोजने इति ३ पु॰ पा॰ ।   † अत्र दशमं ज्योतिश्चरणाधिकरणं पूर्णम् ।

पूर्वोत्तरपक्षप्रवृत्तेः । न तु प्रथमसंशयस्यैकमेव बलवदिति कोट्यन्तरं प्रदर्श्य यद्येकमेव बलवत्तदा किं प्राणस्य जीवस्य वा लिङ्गं बलवद् उत ब्रह्मण इति संशयान्तरमपि प्रदर्शयितुं युक्तम् । टीकायामेकवाक्यत्वनिर्वाहार्थम् एकस्यैव लिङ्गं बलवदित्यनिर्द्धारणेन सिद्धान्तं प्रदर्श्य तदनन्तरं विशिष्य ब्रह्मलिङ्गबलवत्त्वनिर्द्धारणार्थं विचारान्तरप्रवर्तनस्याभावात् । तत्सत्त्वे हि संशयान्तरं प्रदर्शनीयम् । यथा पूर्वतन्त्रे भावार्थाः कर्मशब्दा* इति सूत्रार्थकथने सोमेन यजेतेत्यादिषु किं द्रव्यगुणभावशब्दाः सर्वे ऽपि भावनाकरणसमर्पकाः उतैक एवेति संशयप्रदर्शनपूर्वकमेक एवेति सिद्धान्तमुपपाद्य तदनन्तरं यद्येक एव तदा किं द्रव्यगुणशब्दः उत भावशब्द इति सन्देहान्तरप्रदर्शनपूर्वकं भावशब्द एव फलभावनाकरणसमर्पक इति निर्णीतं न तथेह विचारद्वयं कृतमथ दृश्यते । तस्मात्प्रागुक्तरीत्यैक एव संशयः प्रदर्शयितुं युक्त इति चेत् । उच्यते । इह यद्येक एव बलवल्लिङ्गः प्रतिपाद्यः तर्हि प्राणो जीवो वा बलवल्लिङ्ग इति तयोरन्यतरः प्रतिपाद्यो ऽस्तु एवमप्येकवाक्यतासंरक्षणसिद्धेरित्याशङ्कान्तरं तन्निराकरणं चेत्युभयमप्यत्र विवक्षितम् । तदित्थम् । प्राणो ऽस्मि प्रज्ञात्मेत्युपक्रमात् प्राण एव प्रज्ञात्मेत्युपसंहाराच्च वायुर्जीवो वा ऽत्रोपास्यत्वेन प्रतिपाद्यः । मामेव विजानीहीति प्रथममिन्द्रवचनसत्त्वे ऽपि नेन्द्रस्योपास्यत्वशङ्का तेन वाक्येन स्वस्यैवोपास्यत्वमुक्तमिति शङ्कावारणाय प्राणो ऽस्मि प्रज्ञात्मेति पुनस्तद्विवरणात् । तथा च शास्त्रदृष्ट्या वामदेवस्य मन्वादिभावोक्तिवदिन्द्रस्य स्वोपास्यप्राणजीवसामान्यभावोक्तिः । तत्र प्राणपूर्वपक्षे यावद्ध्यस्मिन् शरीरइत्यादिकं प्राणश्रुत्युपोद्बलकं लिङ्गम् । तस्मिन् जीवधर्मोक्तिस्तु यो वै प्राणः सा प्रज्ञेति तस्य जीवाभेदोपचरणाद् उपसंहारिका ऽजरामृतत्वोक्तिरपि तत एव जीवस्याजरत्वादमृतत्वाच्चेति । जीवपूर्वपक्षस्त्वेतद्वैपरीत्येनोपक्रमोपसंहारगतजीवपरप्रज्ञात्मशब्दादिसत्त्वात् । हिततममित्युपक्रमगतातिशायनिकप्रत्ययमात्रं तु प्राणजीवान्यतरोपासनाफलं सकलपापक्षयादिकमिति तन्मात्रविषयत्वेन योजनीयम् । एतच्छङ्कानिराकरणं त्वन्यथासिद्धानन्यथासिद्धिभ्याम् एकवाक्यतानिर्वाहार्थमेकस्मिन्नेव प्राणजीवब्रह्मलिङ्गेषु योजनीयेषु कार्ययोर्लिङ्गं कारणे ब्रह्मणि योजयितुं शक्यम् ।

---

* जै॰ सू॰ अ॰ २ पा॰ १ सू॰ १ ।

कारणस्य सर्वेषु कार्येष्वनुगमादित्यनन्यथासिद्धानि तयोर्लिङ्गानि । कार्यान्तरेष्व-
प्यनुवृत्तस्य ब्रह्मणो लिङ्गानि तु न तयोर्व्यावृत्तयोर्योजयितुं शक्यन्त इत्यन्यथा-
सिद्धानीति । एवमनन्यथासिद्धेतच्छङ्कानिराकरणम् । न च ब्रह्मलिङ्गमन्यपर-
त्वेन परिणेतुं शक्यमिति भाष्ये तस्मादनन्यथासिद्धब्रह्मलिङ्गानुसारत इति
टीकायां च सूचितम् । सूत्रे ऽप्यनुगमादित्यस्योपक्रमोपसंहारानुगमवत् कार-
णस्य कार्येष्वनुगमरूपमर्थान्तरमपि विवक्षितमिति तेनैव सूचितम् । एवं सूत्र-
भाष्यटीकापर्यालोचनया स्पष्टो ऽयमर्थ इत्याचार्यैरिह कण्ठतो न प्रदर्शितः ।
दर्पणे त्वाचार्यैरेव शङ्कामनुद्राव्य ब्रह्माऽब्रह्मलिङ्गानां तयोरनुगमव्यावृत्तिभ्यां
विशेषो वर्णितः ।

अनन्यथासिद्धेति । ननु यद्यनन्यथासिद्धब्रह्मलिङ्गानुसारेणान्य- १२१ । १०
थासिद्धनयनं गतार्थं तर्हि तस्मादनन्यथासिद्धब्रह्मलिङ्गानुसारत इत्येत-
दपि गतार्थं स्यादिति चेत् । अस्तु । अत एव चीण्युपासनानीति प्रथमवि-
चार एवागतार्थ इति टीकायां कण्ठतः कृतः । द्वितीयविचारस्तु प्राचीनन्या-
यसिद्ध इति तत्संस्कारणार्थमनन्यथासिद्धपदमात्रेण सूचितः । अथ वा अनु-
गमव्यावृत्तिरूपाऽनन्यथासिद्ध्यन्यथासिद्धिप्रकारभेदव्युत्पादनेनागतार्थता द्र-
ष्टव्या ।

वसत इति द्विवचनश्रुत्येति । ननु सहवासादिलिङ्गानुगृही-
तद्विवचनश्रुत्या प्राणप्रज्ञाशब्दोक्तयोर्भेदावगमाद् ब्रह्मवद्यथा तयोरुपास्यत्व-
मेवमिन्द्रस्यापि बहुलिङ्गग्रस्तस्योपास्यत्वमङ्गीकृत्य चत्वार्युपासनानीति पूर्व-
पक्षयितुं शक्यम् । अध्यात्मसंबन्धिलिङ्गानां यथार्हं जीवाद्यन्वयोपपत्तेः ।
मध्ये प्राणप्रज्ञाशब्दयोर्मुख्यप्राणजीवपरत्वे ऽपि प्राण एव प्रज्ञात्मेत्युपसंहारे
ब्रह्मपरत्ववत्प्राणो ऽस्मि प्रज्ञात्मेत्युपक्रमे शक्रपरत्वस्यापि संभवात् । तं
मामायुरमृतमुपास्स्वेत्युपक्रमे शक्रस्य स मआत्मेति विद्यादित्युपसंहारे
ब्रह्मणस्तस्मादेतदेवोक्थमुपासीतेति वक्तारं विद्यादिति च मध्ये प्राणस्य
जीवस्य चोपासना विधीयत इति स्पष्टमेवोपासनाचतुष्टयप्रतीतेश्चेति चेदु-
च्यते । प्राणो ऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्स्वेत्येतदनन्तरमायुः प्राणः
प्राणो वा आयुः यावद्ध्यस्मिञ्छरीरे प्राणो वसति तावदायुरित्युपास्यत्वेन
निर्दिष्टस्य प्राणस्यायुःप्रदानस्वातन्त्र्यं श्रुतम् एमनन्तरखण्डे चास्तित्वे च

प्राणानां निःश्रेयसमिति प्रस्तुतस्य प्राणस्य सत्त्वएवेन्द्रियाणां निःश्रेयसमुक्त्वा जीवति वागपेतो मूका हि पश्यामो जीवति चक्षुरपेतो अन्धा हि पश्याम इत्यादिना प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीत्यन्तेन संदर्भेण तस्यैव पूर्वोक्तमायुःप्रदानस्वातन्त्र्यमन्वयव्यतिरेकाभ्यां विवृतम् । एवं प्राणधर्मकीर्तनानन्तरमथ यथास्यै प्रज्ञायै सर्वाणि भूतान्येकं भवन्ति तद्व्याख्यास्यामो यथा प्रज्ञाया जीवस्य सर्वाणि भूतानि संबन्धीनि भूत्वा तद्दृश्यत्वेन कल्पितानि वस्तुत एकं भवन्ति तथा व्याख्यानमुपक्रम्य वक्तृत्वघ्रातृत्वादिप्रज्ञाधर्मकीर्तनं प्रस्तुतप्रज्ञात्मविषयमवतिष्ठते । एवमिहोपास्यत्वेन निर्दिष्टयोः प्राणप्रज्ञात्मनोः क्रमेण व्यवस्थितं धर्मकीर्त्तनमिव तदुपासनयोः फलकीर्तनमपि दृश्यते प्राणेन ह्येवामुष्मिन् लोके ऽमृतत्वमाप्नोतीति । प्रज्ञया सत्यसंकल्पमिति च । एवं प्राणप्रज्ञात्मसंबन्धिलिङ्गानां प्राणो ऽस्मि प्रज्ञात्मेत्यतो ऽन्यत्र नेतुमशक्यत्वादयमुपदेशो वामदेवस्य मनुसूर्यादिभाववद् ब्रह्मभूतस्येन्द्रस्य प्राणादिभावो ऽप्यस्तीति मुख्यप्राणजीवविषयः । एवमुपास्वेति च पृथक् पृथक् तदुभयोपासनाविधानम् । एतदेवोक्थमुपासीतेत्यत्र वक्तारं विद्यादित्यादिषु च प्राणोपासनां प्रज्ञोपासनां* चानूद्य शरीरोत्थापकत्ववक्तृत्वादिगुणविधानमिति न तेषामपि वैयर्थ्यमतः प्राणो ऽस्मि प्रज्ञात्मेत्यादिवाक्ये तावन्नेन्द्रोपासनाविधिः । नापि मामेव विजानीहीत्यत्र तस्य हिततमत्वसर्वपापासंस्पर्शहेतुत्वलिङ्गेन प्रकरणावसाननिरूपणीयब्रह्मोपासनाविध्यर्थत्वात् । तस्मात् त्रीण्युपस्यानीत्येव युक्तं पूर्वपक्षयितुम् ।

१२८ । ८ हेतुः पदार्थबोध इत्यादि । ननु द्विवचनश्रुतिसहवासादिलिङ्गप्राप्तस्य प्राणप्रज्ञात्मभेदस्य विधिश्रुतिप्राप्तानां तत्तदुपासनाविधीनां च वाक्यार्थविरोधेन त्यागे श्रुतिलिङ्गवाक्यादिबलाऽबलवैपरीत्यप्रसङ्गात् स्योनं ते इति मन्त्रे पूर्वोत्तरभागव्यवस्थितसदनकरणप्रतिष्ठापनप्रकाशनसामर्थ्यलक्षणवाक्यभेदावहलिङ्गविरोधेन तस्मिन् सीदेति पूर्वोक्तसापेक्षत्वेनावगम्यमानस्य वाक्यैक्यस्य बाधव्यवस्थापनं प्रत्युद्धृतं स्यात् । यदि कामयेत वर्षुकः पर्ज्जन्यः स्यादिति सामानाधिकरण्यरूपस्य वाक्यस्य यदि कामयेत यजमान इत्यध्याहारेण बाधव्यवस्थापनं च प्रत्युद्धृतं स्यात् । न च

* प्राज्ञोपासनामिति ३ पु. पा. ।

समभिव्याहारावगताद्वाक्यादुपक्रमोपसंहारावगते वाक्ये कश्चिदस्ति विशेषः । उपांशुयाजवाक्ये जामितादोषपरिहारार्थमन्तरावाक्ये विधावश्यमभ्युपगन्तव्ये तत्रैव शाखाभेदेनाग्नेयाग्नीषोमीययाज्यानुवाक्यायुगलमध्ये पठितानां वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलानां क्रमप्रमाणेनान्वये सति तत्तन्मन्त्रोदितानां विष्ण्वादीनां तत्र यागे देवतात्वस्य प्राप्तत्वाद्विष्ण्वादिवाक्येषु विधेयालाभाद्विधित्यागो न तूपक्रमोपसंहारावगतवाक्यविरोधात् । पुत्रेष्टिवाक्ये त्वष्टाकपालादिषु विध्यश्रवणाद् विधियोग्यपुरुषव्यापारमात्रस्याप्यश्रवणाद् यच्छब्दोपबन्धेनानुवादत्वप्रतीतेः । यस्मिन् जातइति वाक्ये पूतत्वादीनां समुच्चयावगमाच्चाष्टाकपालादिषु विध्यनङ्गीकारान्नोपक्रमोपसंहारगतवाक्यविरोधादिति चेत् । उच्यते । श्रुत्यादिषु परमपि तात्पर्यलिङ्गवत्प्रबलं पूर्वमपि तात्पर्यलिङ्गरहितं दुर्बलमिति हि स्थितिः । तदिहोपक्रमोपसंहारावगमिततात्पर्येण ब्रह्मवाक्येनालथाभूतद्विवचनश्रुत्यादि बाध्यते यथा ऽन्तवत्त्वादिलिङ्गेनाकाशश्रुत्यादिकमिति न किं चिदवद्यम् ।

यज्ञादिविधिरपूर्वत्वाद्विषम इति । ननु यथा सर्वात्मत्वविव- १३७ ।
क्षया प्राणजीवधर्माः स्तुत्यर्थं निर्दिष्टा इति यथा शक्यते योजयितुं यथा च सर्वात्मत्वं सृष्टिवाक्यसिद्धं शक्यमनुवदितुं तथा यज्ञादिभिरपि सिषाधयिषितत्वेन ब्रह्मवेदनस्तुत्यर्थं यज्ञादयो निर्दिष्टा इति शक्यं योजयितुं कर्मकाण्डगतवाक्यजातसिद्धं च यज्ञादिकं शक्यमनुवदितुम् । अथापि तत्र फलविशेषसाधनत्वस्यापूर्वत्वाद्विधिश्चेदिहापि स्यादविशेषात् । तस्माद्यज्ञादिविधिवदुपकोसलविद्यायां प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म एतदमृतमभयमेतद् ब्रह्मेत्युपक्रमोपसंहारावगतब्रह्मवाक्यमध्ये ऽग्निविद्याविधिवद् भूमविद्यायां तरति शोकमात्मविदात्मैवेदं सर्वमित्युपक्रमोपसंहारावगतब्रह्मवाक्यमध्ये नामाद्युपासनाविधिवच्च प्राणजीवोपासनविधिरप्यङ्गीकर्तुं युक्त एव । उच्यते । त्रिविधोपासनविधिमभ्युपगच्छता मामेव विजानीहीत्यत्र तावद् ब्रह्मोपासनविधिर्वक्तुं न शक्यते त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे एतदेव मनुष्याय हिततमं मन्ये यन्मां विजानीयादिति प्रश्नोत्तरावगततात्पर्यहिततमत्वलिङ्गविरोधात् । हिततमत्वं हि विज्ञानस्योच्यमानं निरतिशयपुरुषार्थत्वं निरतिशयपुरुषार्थसाध-

नत्वं वा स्यादुभयथा ऽपि तदखण्डानन्दविषयस्य निखिलानर्थनिवृत्तिपूर्वकब्रह्मावाप्तिसाधनस्य च विशुद्धब्रह्मसाक्षात्कारस्यैव युज्यते अतस्तल्लिङ्गं विजानीहीत्युक्तस्य विज्ञानस्याविधेयब्रह्मसाक्षात्कारतां तथाख्यातस्य गोसदृशं गवयं विद्धि आत्मानं रथिनं विद्धीत्यादिलौकिकवैदिकवाक्यरीत्या प्रतिपाद्यपुरुषाभिमुखीकरणार्थविधि*सरूपतां च व्यवस्थापयति । अतो विजानीहीत्यत्र तावन्न ब्रह्मोपासनाविधिशङ्कावकाशः । नापि प्राणो ऽस्मीत्यादौ तत्रापि मामिति प्रयोगस्य पूर्वप्रयोगसाम्येन† निर्विशेषब्रह्मपरत्वावसायात् । तत्रत्यप्राणशब्दस्य चेन्द्रविश्वामित्रसंवादगतप्राणशब्दसाम्येन तत्परत्वावसायाच्च । ऐतरेयकोपनिषदि हीन्द्रविश्वामित्रसंवादो ऽस्यामुपनिषदीन्द्रप्रतर्दनसंवादवत् प्रवृत्तः । तत्र हि विश्वामित्रं प्रकृत्येन्द्रस्य प्रियं धामोपेयाय तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागाः वरं ते ददामीत्युपक्रमः । इन्द्रगततेजोविशेषेणेन्द्रं ब्रह्मसाक्षात्कारेण ब्रह्मभूयं गतमालक्ष्य त्वामेव विजानीयामिति ऋषेः प्रश्नः । प्राणो वा अहमस्मि ऋषे इतीन्द्रस्योत्तरम् । तत्र प्राणशब्दः परब्रह्मपरः प्राणस्त्वं प्राणः सर्वाणि भूतानि प्राणो ह्येष य एष तपति स एतेन रूपेण सर्वा दिशो विष्टो ऽस्मीति वाक्यशेषप्रतिपादितसार्वात्म्यलिङ्गात् । एवं च साक्षात्काररूपे प्रकृतविज्ञाने प्रयुक्तस्योपास्वेत्यस्यापि तत्र साक्षात्कारे फलरूपतया स्वतःप्राप्तावृत्त्यनुवादकत्वमेव कल्पनीयम् । एवं च स म आत्मेति विद्यादित्युपसंहारे ऽपि प्रक्रान्तब्रह्मविज्ञानपरे विधिसारूप्यमात्रमिति तत्रापि न ब्रह्मोपासनाविधिशङ्कावकाशः । निर्विशेषप्रकरणमध्ये प्राणजीवोपासनाविधिरिति शङ्का ऽवशिष्यते सा ऽपि न प्राणो ऽस्मि प्रज्ञात्मेत्यत्र कर्तुं युक्ता तस्य वाक्यस्य निर्विशेषब्रह्मसाक्षात्कारपरतायाः प्रतिपादितत्वात् । वाक्यशेषे तद्गुणतत्फलकीर्तनानां च सार्वात्म्यादिना तत्स्तावकत्वस्यैवोचितत्वाच्च । एतदेवोक्थं वक्तारं विद्यादिति वाक्ययोश्च न तद्द्वयविधिशङ्का कर्तुं युक्ता तयोः फलाश्रवणेन नामाद्युपासनाविधिवत्फलार्थत्वायोगात् । निर्विशेषब्रह्मविद्याया मग्निविद्यावदङ्गत्वाभावाच्च । तस्मात्तयोरपि वाक्ययोर्विधिसरूपार्थवादतैव युक्ता । अथापि प्राणाद्यात्मत्वं स्वरूपतो ऽप्राप्तं चेदुपरिधारणवत्स्यात्तदा कथं

---

* करणार्थं विधीत्यादिः पाठः २ पु. । † सामान्येनेति २ पु. पा. ।

चिद्विधीयेतापि तदपि नास्ति । सार्वात्म्यवाक्यैः प्राप्तत्वादतो ऽपूर्वत्वाभावात् स्तुत्यर्थमनुवाद्यं सार्वात्म्यमित्याशयः ।

ब्रह्म प्रति विशेषणत्वमिति वैरूप्यादिति । यद्यपि वैरूप्यं १३० । ७
नासंभवित्वरूपो ऽर्थदोषः नापि तद्बोधनाशक्तिरूपः शब्ददोषः । अर्थानां किञ्चिद्विशेष्यत्वे ऽप्यन्यविशेषणतायाः शब्दानां विशिष्टोपस्थापनपूर्वकमन्यत्र तदन्वयबोधकतायाश्च विपुलांसो महाबाहुः कम्बुग्रीवो महाहनुः सत्यकामः सत्यसङ्कल्पः अग्नये दात्रे पुरोडाशमित्यादिषु लौकिकवैदिकव्यवहारेषु दृष्टत्वात् । एतस्यैव रेवतीषु वारवन्तीयमिति वाक्ये अत्यन्ताप्रसिद्धविशिष्टोपस्थापनपूर्वकं वाक्यस्य तदन्वितवाक्यार्थबोधकतायाः स्वयमेवाचार्यैः प्रदर्शयिष्यमाणत्वाच्च । तथापि तत्र तत्र विप्रकीर्णतया वर्णितानां प्राणजीवब्रह्मगुणानामेकत्र समाहृत्य विधानं न संभवतीत्यत्र वक्ष्यमाणयुक्तौ तात्पर्यम् । ननु नानास्थलविप्रकीर्णसर्वगुणविशिष्टविधानासंभवे ऽपि प्राणो ऽस्मि प्रज्ञात्मेति वाक्ये प्राणजीवस्वधर्मविशेषितब्रह्मोपासनाविधानमुपपद्यते अमृतत्वस्य ब्रह्मधर्मत्वादिति चेन्न । प्राणो वा आयुः प्राण उत वा अमृतमिति वाक्यशेषाभ्यामायुष्ट्वामृतत्वयोः प्राणधर्मत्वेन कीर्तनात् । प्राणो ऽस्मीत्यादेरुपक्रमानुसारेण निर्विशेषब्रह्मसाक्षात्कारार्थत्वाच्चेति भावः ।

नेमिवद्विषया इति । स्त्री नेमिर्नो प्रधिश्चक्रप्रान्ते तुम्बा तु नाभिका । अरास्तयोः स्थिता मध्ये इति नैघण्टुकवचनाद् नेमिश्चक्रपरितःस्थितस्तत्प्रान्तभागः । नाभिर्मध्यावयवः । अरा नाभिनेमिमध्यगतावयवाः । **श्रेष्ठंमन्यानिति ।** स्वस्वात्मानं श्रेष्ठं मन्यमानानित्यर्थः । **क्रियाविशेषणमिति ।** एतदिति पदमित्यर्थकं सदनेन परिदृश्यमानेन प्राणादिप्रकारेणात्मानं पञ्चधा विभज्येत्येवं विभागक्रियाविशेषणमित्यर्थः ।

अस्या जीवलक्षणायाः प्रज्ञाया इति । नन्वत्र प्रज्ञाशब्दो बुद्धि- ,, । २३
पर इति युक्तं यो वै प्राणः सा प्रज्ञेत्युपक्रान्तप्राणबुद्धिसहवाससहोत्क्रमणप्रतिपादकाऽव्यवहितपूर्ववाक्यसन्निधापितबुद्धिपरामर्शिसर्वनामसमभिव्याहृतत्वात् । न हि प्रज्ञापेता वाग् नाम किं चन प्रज्ञायते *ऽन्यत्र मे मनो

* किं चन ज्ञापयते इति १-३ पु० पा ।

ऽभूदित्यादिषु । अथ यथा ऽस्यै प्रज्ञायाइति प्रतिज्ञावाक्यानुबन्धिष्वग्रिमवाक्येषु प्रज्ञापेतशब्दस्य मनोव्यासङ्गार्थतया विवरणाच्च । एवमिह प्रज्ञाशब्दस्य बुद्धिपरत्वे प्रज्ञादोहवाक्यानि वागादीनां स्वस्वव्यापारोत्पादनापेक्षितबुद्ध्येकदेशपराणि सङ्गच्छन्ते । युगपज् ज्ञानकर्मेन्द्रियव्यापारेषु वागादीनां कृत्स्नान्तःकरणसंबन्धायोगात् । प्रज्ञया वाचं समारुह्येत्यादिवाक्यान्यपि जीवस्य बुद्धिद्वारकवागादिकरणसंबन्धपूर्वकवक्तृत्वादिप्रतिपादकतया सङ्गच्छन्ते । न वाचं विजिज्ञासीत वक्तारं विद्यादित्याद्यग्रिमवाक्येषु जीवस्यैव वक्तृत्वादिप्रतिपादनात् । तस्मादिह संदर्भे प्रज्ञाशब्दस्य जीवपरतया व्याख्यानं न युक्तमिति चेत् । उच्यते । वागेवास्या एकमङ्गमदूदुहदित्यादिपर्यायेषु वाक्प्राणचक्षुःश्रोत्रादिकर्तृकइव मन एवास्या एकमङ्गमदूदुहदिति पर्याये मनःकर्तृको ऽपि प्रज्ञादोह उक्तः स तु मनःप्रज्ञयोर्भेदं गमयतीति तदनुसारेणैवं व्याख्यातम् । एवं चान्यत्रमना इत्यादिवाक्येषु मनःशब्दः प्राणबन्धनं हि सोम्य मन इत्यत्रेव मनउपाधिकजीवपर इति तात्पर्य्यम् ।

१३० । २५. **रेचितवतीति** । दुह प्रपूरणे इति धात्वर्थनिर्देशकं प्रपूरणपदं रिक्तीकरणार्थकं रिक्तीकरणं चात्र फलचैतन्यरूपेण स्वल्पतया विभाजनमेव । **तस्या दुग्धाया इति** । गोस्थानीयं जीवचैतन्यं पयःस्थाने* फलचैतन्यं च । ननु तस्या वाच इति व्याख्यातुं युक्तम् । प्राण एवास्या एकमङ्गमदूदुहत् तस्य गन्धः परस्तात्प्रतिविहिता भूतमात्रा चक्षुरेवास्या एकमङ्गमदूदुहत् तस्य रूपं परस्तात्प्रतिविहिता भूतमात्रेत्यादिपर्यायेष्वस्त्रीलिङ्गतच्छब्देन घ्राणादीनां हस्तावेवास्या एकमङ्गमदूदुहतां तयोः कर्म परस्तात् प्रतिहिता† भूतमात्रा पादावेवास्या एकमङ्गमदूदुहतां तयोरित्या परस्तात्प्रतिविहिता भूतमात्रेति पर्याययोर्द्विवचनान्ततच्छब्देन हस्तपादद्वययोश्च परामर्शदर्शनेनात्र तच्छब्दानां तत्तदिन्द्रियपरत्वावसायादिति चेत्सत्यम् । वाक्पर्याये तस्या इत्यस्य प्रज्ञापरत्वमपि वक्तुं शक्यम् । लिङ्गविरोधाभावात् । वागादिषु क्रियाकरणभावेनेव प्रज्ञायामपि विषयविषयिभावसंबन्धेन वागादिप्रतिविधान‡सद्भावाच्चेति तथा व्याख्यातम् ।

---

* पयःस्थानीयमिति २ पु॰ पा॰ ।

† प्रतिविहितेति २ पु॰ पा॰ ।

‡ नामादिप्रतिविधानेति २ पु॰ पा॰ ।

नन्विह संदर्भे प्रज्ञाशब्दो जीवपरश्चेत् प्रज्ञया वाचं समारुह्येत्या-
दिवाक्येषु जीवद्वारकवागादिसंबन्धी वागादिकरणैर्नामाद्याप्तिश्च कस्योच्य-
तइत्याकाङ्क्षायामनुपहितस्य शुद्धचैतन्यस्येत्यवतारयति **उपहितचैतन्य-
द्वारेति । द्रष्टृत्वाध्यासमाहेति ।** कर्मेन्द्रियव्यापारेषु यत्कर्तृत्वं ज्ञानेन्द्रि- १३१ । २
यव्यापारेषु यद् घ्रातृत्वद्रष्टृत्वश्रोतृत्वादि तत्सर्वं छत्रिन्यायाद् द्रष्टृत्वशब्देन
संगृहीतम् । ननु फलचैतन्यरूपेण प्रज्ञादोग्धृत्वं ज्ञानेन्द्रियाणामेव न
कर्मेन्द्रियाणाम् अतो वाचि तदुक्तिर्न युक्तेत्याशङ्क्याह **कर्मेन्द्रियप्रवृत्ति-
रपीति ।** कर्मेन्द्रियाणामपि व्यापारः चैतन्यसंबन्धाधीनः । अतश्चैतन्या-
वच्छेदमात्रं प्रकृफलरूपं चैतन्यमदूदुहदित्यनेनोक्तमिति भावः । **भूतानि
शब्दादयश्चेति ।** ननु वागादिपर्यायेषु नामादयो दश भूतमात्राशब्दैर्नि-
र्दिष्टाः । तादर्थ्यमेवात्रापि भूतमात्राशब्दस्य युक्तम् । ता वा एता इति
सन्निहितपरामर्शिसर्वनामसमभिव्याहाराद् दशसंख्याश्रवणाच्चेति चेत् ।
उच्यते । अथ यथास्यै प्रज्ञायाइति प्रतिज्ञावाक्ये सर्वभूतैक्योपक्रमादित्थं
व्याख्या । दशसंख्याश्रवणं तु भूतमात्राशब्दयोरर्थभेदेन टीकायामुपपादितम् ।

ननु प्रतिज्ञातं सर्वभूतैक्यं कुत्रोक्तमित्याकाङ्क्षायामाह **भूतेष्विति ।**
दशैव भूतमात्रा अधिप्रज्ञमित्यादिना ग्राह्यग्राहकाणामन्योन्यसापेक्षसिद्धि-
त्वोक्त्यनन्तरं नो एतन्नानेति तदैक्योपसंहारादद्वैतं तत्त्वं दर्शितमिति
भावः । न चैवं सति ता वा एता इत्यादिवाक्यमेव सर्वभूतैक्योपपादने
पर्याप्तं किं प्रज्ञादोहप्रतिविधानवाक्यैरिति शङ्कनीयम् । विषयाणां सिद्धि-
रिन्द्रियाधीना तेषामपि करणतया तत्तद्विषयित्वेन सिद्धिर्विषयाधीनेत्य-
न्योन्यसापेक्षत्वप्रदर्शनस्य तथाभूतानां जीवे कल्पितत्वप्रदर्शनस्य च तद-
धीनत्वात् प्रतिविधानवाक्याद् वागादिपरतच्छब्दानां प्रज्ञादोहवाक्यलब्धजी-
वविशिष्टवागादिपरतया जीवे ऽपि प्रतिविधानसिद्धेः । ततः प्रज्ञया वाचं
समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञया प्राणं समारुह्य प्राणेन सर्वान्
गन्धानाप्नोतीत्यादयो वागादिसमारोहणनामाद्याप्तिपर्यायास्तु प्रतिज्ञातप्रज्ञादो-
हादिवाक्यसिद्धस्य ग्राह्य*ग्राहकाणां जीवे कल्पितत्वस्य प्रकरणिनि शुद्धे

* ग्राह्येति नास्ति २ पु० ।

पर्यवसानलाभार्थाः । न हि प्रज्ञायेतेत्यादिपर्यायाव्यतिरेकमुद्रया वागादीनां स्वव्यापारेषु जीवसंबन्धावश्यंभावप्रतिपादनेन जीवविशिष्टेषु वागादिषु नामादिप्रतिविधानोक्तेर्नामादीनां जीवे कल्पितत्वपर्यवसानदृढीकरणार्थाः । न वाचं विजिज्ञासीत वक्तारं विद्याद् न प्राणं विजिज्ञासीत घ्रातारं विद्याद् इत्यादयो नामादीनां विज्ञेयत्वप्रत्याख्यानपर्याया अपि तेषां कल्पितत्वदृढीकरणार्था इति ता वा एता इत्यतः प्राक् सर्वेपि पर्यायाः प्रतिज्ञातसर्वभूतैक्योपपादनार्थत्वेन सफलाः* ॥

कणभक्षपदक्षकपक्षपरिष्करणक्षणतक्षणदक्षगिरम् ।
अतिकर्कशतर्कशतक्षुभितक्षपितक्षपणक्षणभङ्गपदम् ॥ १ ॥
कपिलोक्तिनिराकरणप्रवणं कृतपन्नगसूक्तिपरिष्करणम् ।
नयमौक्तिकभूषितभट्टमतं विमलाद्वयचित्सुखमग्रधियम् ॥ २ ॥
महतामपि मान्यतमं विदुषां विनिवेश्य गुरुं हृदि वैश्वजितम् ।
नयसंहतिशालिनि कल्पतरौ विवृतश्चरणः प्रथमः प्रथितः ॥ ३ ॥
श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीरङ्गराजाख्यमखितनयनिर्मिते ।
वेदान्तकल्पद्रुवरपरिमले ऽनघे पूर्णो ऽजनिष्टाद्यचरण इह सत्प्रिये ॥ ४ ॥

इति वेदान्तकल्पतरुपरिमले प्रथमस्याध्यायस्य
प्रथमः पादः समाप्तः ॥

---

* अत्र एकादशम् इन्द्रप्राणाधिकरणं प्रातर्दनाधिकरणं वा पूर्णम् ।

वेदान्तकल्पतरुपरिमले

प्रथमाध्यायस्य द्वितीयः पादः ।

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥ १३२ । १

यत्सिद्धाविति । जगत्कर्तृत्वसिद्धौ सार्वज्ञ्यादिसिद्धिरेव तार्किकाणामप्युदाहरणम् । प्रथमे पादे इत्याद्युक्त एव भवतीत्यन्तं* वृत्तानुवादभाष्यं प्रथमपादार्थस्योपजीव्यत्वप्रदर्शनेन संगतावुपयुज्यते । अर्थान्तरप्रसिद्धानामित्यादि तु वृत्तानुवादभाष्यान्तरं न तथोपयुज्यते । प्रत्युत कैमुतिकन्यायावलम्बेनोत्तरपादारम्भाक्षेपगमकतया तदारम्भप्रतिकूलमित्याशङ्क्य तद्भाष्यमाक्षेपपरतयैव योजयित्वा तत्समाधानमस्पष्टब्रह्मलिङ्गानीति विशेषणेन भाष्यगतेन सूचितम् । पूर्वपक्षाभिप्रायं त्विति टीकायां दर्शितं तच्छङ्कान्तरस्यापि समाधानार्थमित्यवतारयति **यद्यर्थान्तरेति । कैव कथेति ।** श्रुतिबाधकस्य लिङ्गबाधनक्षमत्वं कैमुतिकन्यायसिद्धमित्यर्थः । अपि चेत्यादिना शङ्कान्तरं दर्शितम् । **तल्लयमित्यर्थ इति ।** डप्रत्ययान्तत्वेन टिलोप इति भावः । तस्मिन्ननितीति टीकोपवर्णितस्यैव विग्रहस्य प्रदर्शनं येन जातानि जीवन्तीत्यादिश्रुत्यनुसारेण तृतीयान्तं तत्पदं व्याख्येयमिति शङ्कावारणार्थं जन्मस्थितिलयान्वयिनि तत्पदे विभक्त्यैक्यायैवं व्याख्यानमिति† भावः । एवं च तस्माद् ब्रह्मणो जायतइति तज्जमिति टीकाग्रन्थे सप्तम्यर्थ एवापादानपञ्चम्युपादानस्पष्टीकरणायेति तात्पर्यम् । श्रुतावनिति क्विबन्तस्य अनमित्यर्थेतः पचाद्यजन्तेन ग्रहणम् । **क्रतुर्ध्यानमिति ।** क्रतू अध्वरसंकल्पाविति निघण्टुः । **तत्प्रधानस्तन्मय इति ।** मयड् विकारप्राचुर्यप्राधान्यादिष्विति के चन वैयाकरणाः पठन्ति ।

सापेक्षस्य गुणविध्यर्थमिति । यद्यपि अग्निहोत्रं जुहोतीति केव- ,, । १६
लकर्मविधिवत्केवलोपासनाविधिरप्युपपद्यते तस्य च दध्ना जुहोति दध्नेन्द्रि-

---

* उक्ता एव भवन्तीति २ पु· पा· । † व्याख्यातमिति १ पु· पा· ।

यत्कामस्य जुहुयात् चतस्रो गार्हपत्ये जुहोतीत्यादिगुणविधिं प्रत्यग्निहोत्रविधे-रिव शमविधिं प्रत्याश्रयदातृत्वमपि युज्यते तथापि स्ववाक्योपात्तधर्मविशिष्ट-जीवविषयएवोपासनाविधिर्लब्धात्मा शमविधेराश्रयदाता भवतीत्युत्पत्तिशिष्ट-गुणाविरोध*एव तात्पर्यम् । ननु शूर्पविधेर्हेत्वपेक्षाभावे ऽपि दर्व्यादीनामपि होमकरणत्वस्य लाभार्थो हेतुः स्याद् दृष्टो ह्यातिथ्यायां चतुर्गृहीतान्याज्यानि भवन्तीत्यौपभृताष्टगृहीतव्यवच्छेदार्थस्य विधेर्हेत्वनपेक्षत्वे ऽपि न ह्यत्रा-नूयाजा इज्यन्तइति तदनन्तराम्नातो हेतुरौपभृतमाज्यं चतुर्गृहीतं प्रयाजार्थम् उपरितनमनूयाजार्थमिति विभागज्ञापनद्वारा ऽन्यत्रापि यत्रेष्टिविकृतावनूयाजा-नामभावस्तत्र सर्वत्राप्यौपभृतोपरितनं चतुर्गृहीतं न कार्यमित्यधिकार्थस्य प्रकृतौ यदुपभृति प्रयाजानूयाजेभ्यस्तदिति वचनस्यातिहार्येडोबर्हिः प्रति समानयते जुह्वामौपभृतमिति वचनस्य च पर्यालोचनया उपरितनप्रयाजद्वया-नूयाजत्रयार्थतया ऽवगतादौपभृताष्टगृहीतात्प्रयाजद्वयार्थमर्द्धं समानेतव्यमि-त्यधिकार्थस्य च लाभार्थ इत्यभिप्रायां शङ्कामनुवदति **यत्त्विति** । अनु-याजानामभावो हेतुर्मुख्यो लभ्य इति† तत्र तथा भवतु नाम इह तु दर्व्या-दिषु मुख्यमन्नकरणत्वं न लभ्यतइति विशेषमभिप्रेत्य परिहरति **न हि साक्षादिति । हेतुवचनस्येति** । हिशब्दबोध्यहेतुत्वाधिष्ठानान्नकरणत्व-वाचिन्यास्तृतीयाविभक्तेरित्यर्थः ।

१३३ । ५ **अनुवादत्वादिति** । ननु स्तुतिपक्ष इव हेतुपक्षे ऽप्यन्नकरणत्व-स्यानुवादस्तुल्यः । तेनेत्यनेन प्रातिपदिकपरामृष्टशूर्पगतमन्नकरणत्वं यथा-सिद्धमनूद्य तस्य हिशब्दश्रुत्या हेतुत्वं प्रतिपाद्यते न त्वपूर्वमन्नकरणत्वं विधीयते तस्य हेतुत्वनिर्देशान्यथानुपपत्त्या यद्यदन्नकरणं तेन तेन होत-व्यमिति व्याप्त्याक्षेपेण दर्व्यादीनामपि शूर्पसाधारणान्नकरणत्व‡सद्भावेन होमसाधनत्वं प्राप्यते । सत्यम् । तुल्ये ऽप्यनुवादत्वे स्तुतिपक्ष एवाश्र-यणीयः । अन्यथा श्रुतस्य शूर्पस्याऽश्रुतानां दर्व्यादीनां च विकल्पापत्तेः । विषमशिष्टविकल्पस्य चात्यन्ताऽन्याय्यत्वात् । हिशब्दस्तु निपातत्वात् प्रसिद्धाद्यर्थान्तरमालम्ब्य चरितार्थः । हेत्वर्थत्वे ऽपि स्तुतावेव हेतुभावं

---

* गुणावरोधे इति १-२ पु॰ पा॰ । † लभ्यतइति १ पु॰ पा॰ ।

‡ शूर्पसाधारणयाथाकथाचान्नकरणत्वेति २ पु॰ पा॰ ।

ब्रूयात्तस्माद्यजमानो ऽयजमानादुत्तरः तस्माद् दक्षिणो ऽर्द्ध आत्मनो वीर्यव-
त्तर इत्याद्यर्थवादेषु हेतुवचनात् । **अतः स्ववाक्यस्थेनेति** । मयडर्थो
मनोवच्छिन्नतया तद्विकारो जीव इति स एव सर्वनामार्थो भवेदिति भावः ।
अस्तु तर्हीति क्व चित्पाठः सोपि कथं चिदुक्ताभिप्रायो योज्यः । **विकार-** १३३ । ११
प्राचुर्येति । प्राधान्यादेरप्युपलक्षणमेतत् । एवं च प्रकृतेन ब्रह्मणैवाकाङ्क्षा-
शान्तिः । व्युत्पत्तिसिद्धस्य सर्वनाम्नां प्रकृतपरामर्शित्वस्य प्रत्यभिज्ञापकान-
पेक्षत्वात् तदभावेपि सा वैश्वदेव्यामिक्षेत्यादिषु प्रकृतपरामर्शदर्शनादिति
भावः ।

नतु मा भूद्विकारादिरूपतया संदिग्धेन मयडर्थेनाकाङ्क्षापूरणं स
क्रतुं कुर्वीतेत्यत्र श्रुतेन तत्पदार्थेन स्यात् । न च तथा सति मनोमय-
त्वादीनां सर्वेषामुपासकविशेषणत्वापत्त्योपास्यगुणत्वालाभः । कस्य क्रतुमिति
प्रति*सम्बन्ध्याकाङ्क्षायामन्तर्द्धौ येनादर्शनमिच्छतीत्यत्रेवान्तरङ्गत्वात् स्वा-
त्मन इति लब्धे स्वात्मन इह मनोमयत्वादिगुणविशिष्टतया बुद्धिसन्निहि-
तत्वात्तावद्गुणाम्नानवैयर्थ्यानुरोधाच्च तेषामर्थादुपास्यगुणत्वलाभादेवं मनोमय-
त्वादीनां समानाधिकरणसमानलिङ्गतत्पदोपात्तविषयत्वे संभवति न विप्रकृ-
ष्टवाक्यान्तरश्रुतभिन्नलिङ्गोपात्तब्रह्मविषयत्वकल्पनं युक्तम् । तत्कल्पने स
क्रतुमिति तत्पदस्य वैयर्थ्यं च स्यात् क्रियया कर्तुराक्षेपतो लभ्यत्वात् तेषां
तत्पदोपात्तविषयत्वाङ्गीकारे वक्ष्यमाणगुणाश्रयदानार्थतया तस्यावैयर्थ्यं शक्यं
वक्तुम् । इमां स पश्यन् ऋजुनैव चक्षुषेत्यत्र चक्षुषः पश्यतिक्रियाकरणत्वे-
नाक्षेपतो लभ्यत्वे ऽपि ऋजुत्वगुणाश्रयदानार्थतयेव चक्षुषेत्यस्य । तस्मा-
दिहान्यपरवाक्यान्तरश्रुतब्रह्मोपादानकथनं न युक्तमित्याशङ्कानिराकरणार्थ-
त्वेन तथा चेत्येतदर्थमवतारयति **ब्रह्मोपादानइति** । ,, । १३

अयमाशयः । मनोमयः प्राणशरीर इत्यादीनां प्रथमान्तानां न तत्प-
दोपात्तजीवविशेषणसमर्पकतया ऽन्वयः किं तु स क्रतुं कुर्वीतेति विधीय-
मानोपासनाप्रकारसमर्पकतया । एतमितः प्रेत्याभिसंभविता ऽस्मीत्येतदन-
न्तरमितिकरणादनेन प्रकारेण क्रतुं कुर्वीतेत्यन्वयप्रतीतेः । तथा ऽन्वये

---

* प्रतीति नास्ति २ पु· ।

सत्येव एष मे आत्मान्तर्हृदयइति वाक्यसामञ्जस्याच्च । तस्योपासनाप्रकाराभिनयपरत्वं विना स्वतन्त्रश्रुतिवाक्यत्वे मे इत्यस्यान्वयसामञ्जस्याभावात् । तथा सत्येव च एष मआत्मा ऽन्तर्हृदयइति वाक्यानां त्रिः पाठस्य सर्वकर्मा सर्वकाम इत्यादिवाक्यानां द्विः पाठस्य च तत्र तत्र स्थाने हृदयान्तर्वर्तित्वाद्यनुसन्धानाभ्यासार्थत्वेन सार्थकत्वात् । दृष्टो हि प्रायणीयं प्रथममहश्चतुर्विंशं द्वितीयं चत्वारो ऽभिप्लवाः षडहाः एकः पृष्ठ्यः* षडहः समासः स द्वितीयः स तृतीयः स चतुर्थः स पञ्चमस्त्रयो ऽभिप्लवाः षडहाः एकः पृष्ठ्यः षडह इत्यादौ गवामयनिकाहःक्लृप्तिवाक्ये अभिप्लवषडहादिशब्दानामसकृत्पाठस्तत्र तत्र स्थाने षडहाद्यनुष्ठानाभ्यासार्थः । एवमितिशब्दोक्तः प्रकारश्च मनोमयत्वाद्यनुसंधेयगुणजातरूपस्तत्क्रमरूपो वा द्वितीयपक्षे मनोमयत्वादीनामुपास्यगुणानां विधानं तत्क्रमविधानादाक्षेपतो लभ्यते पृष्ठ्यगतसर्वतोविधानादिव पृष्ठानाम् । एवं च मनोमय इत्यारभ्यान्वयिनेतिकरणेन मनोमयत्वादेरेतं मनोमयत्वादिविशिष्टं प्राप्तास्मीत्येतदन्तस्य सर्वस्याप्यर्थजातस्य क्रतुं कुर्वीतेति विधीयमानायामुपासनायां प्रकारतापादनान्मनोमयत्वादिप्रकारेण मनोमयत्वादिक्रमेण वा क्रतुं कुर्वीतेत्युपासनावाक्यार्थपर्यवसाने स्थिते तेन प्रकारेण तत्क्रमेण वा कस्य क्रतुः कार्य इत्याकाङ्क्षितं विशेष्यमन्यतः प्राप्तुवदपेक्षणीयम् । तत्र शमविधिवाक्ये अन्यार्थसन्निधानाद् ब्रह्म विशेष्यतया प्राप्नोति स्ववाक्ये स इत्यन्यार्थसन्निधानाज्जीवः तत्र कतरस्य ग्रहणं न्याय्यमिति विशये वाक्यशेषगतानां प्रथमान्विताना बहूनां लिङ्गानां ब्रह्मश्रुतेश्च सामञ्जस्यानुरोधाद् ब्रह्मण एव ग्रहणं न्याय्यमिति निश्चीयते । ब्रह्मण उपास्यत्वे ऽप्येष मआत्मेति समभिव्याहृतात्मशब्दानुसारेण मनोमयादिशब्देषु पुँल्लिङ्गोपपत्तेः ।

यत्तु मनोमयत्वादीनां स क्रतुं कुर्वीतेत्यत्र तत्पदोपात्तजीवान्वयित्वाभावे तस्य वैयर्थ्यं स्यादिति । तन्न । तस्य वाक्यान्तरसन्निधापितमपि ब्रह्मैवोपास्यत्वेन ग्राह्यमित्येतज्ज्ञापनार्थत्वेनैव चारितार्थ्यात् । तथा हि । तत्र तत्पदं जीवं परामृशत् संकल्पानुसारिफलप्राप्तियोग्यत्वेन परामृशति तेन रूपेण कृतत्वात् तथा तत्परामर्शश्च मनोमयः प्राणशरीर इति जीवलिङ्गे ऐहिकामु-

* अभिप्लवाः पृष्ठानामेकः पृष्ठ्य इति २ पु. पा. ।

ष्मिकपरिश्रमणखेदसंपादकमनःप्राणसम्बन्धिरूपस्वतःसिद्धहेयगुणपरतया न व्याख्येये तत्क्रतुन्यायविरोधात् किं तूपादेयगुणपरतया व्याख्येये इति सूचनार्थः । तेन मनोमय इत्येतत्सगुणब्रह्मोपासनासिद्धस्य ब्रह्मलोके भोग्यभोगोपकरणानि यानि* प्राक्सिद्धान्यर्णवादीनि यानि च स्वसंकल्पसाध्यानि स्त्र्यन्नपानादीनि तानि† सर्वाणि स्वाप्नपदार्थवद् मानसप्रत्यय‡रूपाणीति छान्दोग्यभाष्ये दहरविद्याप्रकरणे ये वर्णिता मनोविकारा भोग्यादयः तदुपादानतया तत्तादात्म्यपरम् । प्राणशरीर इत्येतत्प्राणा इन्द्रियाणि वायवो वा शरीराणि शरीरवन्नियम्यान्यस्येति सर्वात्मना यद्वश्येन्द्रियत्वं वश्यप्राणवायुत्वं वा हिरण्यगर्भेण सह मोक्षमाणानाम् अहंग्रहोपासकानामपेक्षितपरब्रह्मसाक्षात्कारादिसंपादनार्थचित्तवशीकरणोपयोगि तत्परमिति सिध्यति तेनैवंभूतगुणानुसंधानानुसारिफलोपयोगितया वाक्यान्तरसन्निधापितमपि ब्रह्मैवोपास्यत्वेन ग्राह्यमिति च सिध्यति । न चैतद्यथाक्रतुरित्युपन्यस्तात्तत्क्रतुन्यायमात्रात्सिध्यति । यथा सत्यपि तत्क्रतुन्याये वचनबलाद् जीवविषयया ऽपि पञ्चाग्निविद्यया ब्रह्मप्राप्तिः तथा क्रतुं कुर्वीतेत्यत्र विहितया ऽन्तरङ्गत्वादाख्यातार्थान्वितत्वेन बुद्धिसन्निहितत्वाच्च जीवमुपास्य परिगृहीतवत्योपासनयापि ब्रह्मप्राप्तिरस्त्विति शङ्कावकाशसद्भावात् । तस्मात्स इत्येतदपि ब्रह्मोपादानहेतुवाक्यशेषोपष्टम्भकमिति न तद्वैयर्थ्यमिति । एवं चात्र ब्रह्मणि जीवलिङ्गयोजना कार्या जीवे वा ब्रह्मलिङ्गयोजनेत्ययमविचारस्य नास्त्यवकाशः । मनोमयत्वप्राणशरीरत्वरूपपर्यालोचनायां तयोः स्वत एव ब्रह्मपर्यवसानात् । ब्रह्मलिङ्गानां बाहुल्यात्तदनुरोधेनापि तयोर्ब्रह्मपर्यवसायित्वाच्च । बहूनि ह्यत्र ब्रह्मलिङ्गानि । सर्वकर्मत्वं बालाक्यधिकरणन्यायेन§ कर्मशब्दस्य कार्यपरतया सकलकार्यैककर्तृत्वं सर्वकामत्वं तदुपयोगिसकलस्रज्यविषयसृष्टिकामनावत्त्वं सर्वगन्धत्वं सर्वरसत्वं च सकलदेशकालवर्तिवस्तुजातगतसर्वगन्धरसाश्रयत्वम् सर्वमिदमभ्यात्तमित्यनेनोक्तं सर्वव्यापित्वमित्यादीनि । न चैतानि जीवउपपद्यन्ते । नन्वेषां जीवे ऽनुपपत्तौ पुनः स एव तत्क्रतुन्यायविरोधः । मनःप्राणोपकरणत्वयोर्हेयत्वनित्यप्राप्तत्वाभ्या-

---

* यानीति २—३ पु॰ नास्ति ।

† तानीति २ पु॰ नास्ति ।

‡ प्रत्ययेति नास्ति २ पु॰ ।

§ व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ १६ ।

मिव तेषामपि प्राप्तुमशक्यत्वेनोपासकप्रेप्सितत्वासम्भवादिति चेत्। उच्यते। तत्क्रतुन्यायो न सर्वगुणविषयः किं तूपासकप्राप्यर्हगुणविषयः। तथा चोद्गीथोपास्याकाशादिभूतसर्वभूतकारणत्वादि*वन्नोपासकेनोपासनाफलानुभवदशायां सर्वकर्मत्वादयः प्राप्तुं योग्या इति न तद्विषयः। न चैतावता मनोमयत्वादिकमपि तदप्रेप्सितगुणतया व्याख्याय तथापि तत्संकोचः कल्पनीयः। तदसंकोचव्याख्यानसंभवे ऽन्यथा व्याख्याय तत्संकोचकल्पनानौचित्यात्। अथ वा सर्वगतत्वादिकमप्यहंग्रहोपासकानां क्रममुक्तिफलकत्वादाविर्भूतस्वरूपैरुपासकैः क्रमेण प्राप्तुं योग्यमिति न तथापि तत्क्रतुन्यायसंकोचः कल्प्यः। अन्यथा हिरण्मयपुरुषोपासनाफले सर्वदुरितविरहे का गतिः। उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेति तत्र सफलवाक्ये सर्वशब्दस्य संकोचकल्पने तथैव स एष सर्वेभ्यः पाप्मभ्य इति तत्पूर्ववाक्ये ऽपि तत्संकोचः प्रसज्येतेति सर्वदुरितविरहो ब्रह्मलिङ्गं न स्यात्। एवं सत्यपि यदि मनोमयत्वं जीवस्य मनोवच्छेदकृतमनोविकारत्वं प्राणशरीरत्वं च प्राणोपकरणत्वम्। यदि च ब्रह्मजीवलिङ्गानां नाल्पत्वबहुत्वकृतं वैषम्यं तथापि जीवलिङ्गानामेव ब्रह्मणि योजनं कार्यमिति न्यायान्तरव्युत्पत्त्यर्थमुपरितनटीकाकल्पतरुग्रन्थयोः प्रवृत्तिरिति द्रष्टव्यम्।

३४। १ **प्रस्तुते इति।** ननु यदि प्रस्तुते अधिष्ठानासाधारणरूपज्ञानमस्ति कथं तर्हि समारोपितो जीवभावो न निवर्तते यदि तदानीं† सदपि समारोपितनिवर्तनाक्षमं किमिति जीवस्तेन रूपेण रूपवान्न स्याद् रज्जुसाधारणरूपज्ञाननिवर्तनीयभुजगविलक्षणत्वादिति चेत्। अत्रायमाचार्याणामाशयः। जीवधर्मयोर्ब्रह्मणि योजनायां हि तस्मिन्ननवच्छिन्नब्रह्मत्वबुद्धिर्न हातव्या तरङ्गधर्माणां समुद्रे योजनायां तस्मिन् व्यापित्वबुद्धिरिव। ब्रह्मधर्माणां जीवे योजनायां तु तस्मिन् परिच्छिन्नजीवत्वबुद्धिर्हातव्या दर्पणमुखे ऽवदातत्वयोजनायां ग्रीवास्थमुखभिन्नत्वबुद्धिरिव। न च क्व चित्स्वरूपमनुपमृद्य वाक्यशेषगतलिङ्गयोजनायां कर्तुं शक्यायामन्यत्र तदुपमृद्य

---

* करणत्वादीति २ पु॰ पा॰। † तदिदानीमिति २ पु॰ पा॰

णा कार्येति । आचार्यैर्वस्तुतो ब्रह्माभिन्नस्यापि जीवस्येत्यादिपूर्वग्रन्थेनायमाशयः स्पष्टीकृतः । अधिष्ठानासाधारणरूपज्ञाने सति समारोप्याभावोऽन्याप्येष एवार्थो विवक्षितः ।

नन्वेतदुपलक्षणायेति टीका न युक्ता । वाक्योपक्रमान्निर्णयस्यापि युक्ततया तेन वाक्यशेषानिर्णयस्यानुपलक्षणीयत्वात् । न चान्यार्थसन्निधानान्निर्णयो न दृढ इति तदुपलक्षणत्वोक्तिरिति वाच्यम् । बुद्धिस्थपरामर्शिना सर्वनाम्ना ऽन्यार्थसन्निहितस्यापि परामर्शोपपत्तेः । ज्योतिरधिकरणे* तथाभूतपरामर्शादेव निर्णयस्य कृतत्वाच्च । न च तेन गतार्थः स न्याय इति न्यायान्तरोपलक्षणत्वोक्तिरिति वाच्यम् । ब्रह्माब्रह्मलिङ्गसमवाये ब्रह्मलिङ्गादेव निर्णयो युक्त इति न्यायस्यापि प्रतर्दनाधिकरणे† प्रदर्शितत्वात् । न च जीवे ऽपि जीवबुद्ध्युपमर्देन ब्रह्मबुद्ध्या तल्लिङ्गानि योजयितुं न शक्यन्त इत्यधिकशङ्कापरिहारप्रदर्शनाय प्रतर्दनाधिकरणसिद्धन्यायस्य पुनरुद्भावनमिति वाच्यम् । ज्योतिरधिकरणन्यायपुनरुद्भावनमपि वस्तुतो ऽन्यार्थमपि न भवति ब्रह्मणः सन्निधानमित्यधिकार्थप्रदर्शनाय पुनरुद्भावनमिति‡ वक्तुं शक्यत्वात् । सर्वं खल्विति वाक्ये इदमिति न सर्वस्य विशेषणं वैयर्थ्यात् किं तु ब्रह्मणस्तस्य च फलं प्रकृतचिपाद्ब्रह्माधिकारलाभः । स च प्रकृतस्य प्रयत्नेनाधिकारः स्वानर्थक्यपरिहाराय क्रतौ वाक्यशेषगतलिङ्गं बाधित्वोपास्यत्वेन ब्रह्मसमर्पणार्थं इत्येवमनन्यार्थं ब्रह्मणः सन्निधानम् । ब्रह्मणः सर्वात्मत्वोक्त्या सर्वस्य ब्रह्मात्मता ऽप्यर्थात् सिध्यतीति तदवलम्बना प्रासङ्गिकोपकाराभिप्राया भाष्ये शमविध्यर्थवादतोक्तिः न तु शमविधिशेषत्वाभिप्राया । यद्यपि शमविधिविवक्षयेति भाष्ये यद्यपीत्यनेनाभ्युपेत्यवादत्वद्योतनाद् ज्योतिरधिकरणे न केवलं ज्योतिर्वाक्यएव ब्रह्मानुवृत्तिः परत्रापि शाण्डिल्यविद्यायाम् अनुवर्तिष्यते ब्रह्मेति ज्योतिर्वाक्ये चिपाद्ब्रह्मानुवृत्तौ विवदमानं पूर्वपक्षिणं प्रति शाण्डिल्यविद्यायां तदनुवृत्तिः कथं हेतुभावं प्रतिपद्येत । यदि तदनुकर्षणैकप्रयोजनेनेदं

---

* व्या॰ अ॰ १ पा॰ १ सू॰ सू॰ २४–२७ । † व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ २८–३१ ।

‡ पुनरुद्भावनमिति १ पु॰ नास्ति ।

विशेषणसामर्थ्ये नाश्रीयेतेत्यधिकार्थप्रदर्शनपरत्वं हि शक्यं वक्तुम् । तस्मादेतदुपलक्षणायेति ग्रन्थो न युक्त इत्याशङ्कापनयार्थमेतस्यैवोपलक्षणायेति न तदर्थः किं त्वेतस्याप्युपलक्षणायेति तदर्थ इति दर्शयितुम् ।

१३४ । २ झटिति प्रतीयमानमाद्यार्थमादाय शङ्कते ननु यद्युक्तरीत्येति । नन्वधिकशङ्कापरिहारस्यास्मिन्नेव सूत्रे विवक्षितत्वे द्वितीयतृतीयसूत्रे पुनरुक्ते स्याताम् । ताभ्यां खलु ब्रह्मजीवयोर्जीवब्रह्मधर्मोपपत्त्यनुपपत्ती वर्णयिष्येते§ इति । न च ताभ्यामनुगमादिति प्रतर्दनाधिकरणसूत्रावयवेनास्पष्टं दर्शिता युक्तिः स्पष्टमनूदिता ऽधिकशङ्कापरिहारस्त्वाद्यसूत्रएवेति वाच्यम् । उपन्यस्ताधिकशङ्कापरिहारार्थत्वेनैव तृतीयसूत्रस्य टीकायामवतारितत्वात् । यदवोचाम समारोप्यधर्मास्समारोपविषये सम्भवन्ति न तु विषयधर्माः समारोप्या इति तस्यैतदुत्थानमिति । तच्च सूत्रे टीकायामेवोक्तत्वाच्चेति चेत्सत्यम् । द्वितीयतृतीयसूत्रयोरनुवृत्तिव्यावृत्तिभ्यां ब्रह्मजीवयोर्जीवब्रह्मधर्माणामुपपत्त्यनुपपत्ती दर्शिते इह तु तयोरारोप्याधिष्ठानत्वारोपविषयत्वाभ्यामिति टीकाकारैः स्वोल्लिखितप्रकारमवलम्ब्येह सूत्रे तदुपलक्षणायेत्युक्तम् । तस्यैतदुत्थानमिति तु ब्रह्मजीवयोर्जीवब्रह्मधर्मोपपत्त्यनुपपत्तिप्रतिपादनसाम्यमात्रेणोक्तं न तु तदुपपादकप्रकारैक्येनापि । अतो न पुनरुक्त्यादिप्रसङ्गः ।

ननु भाष्ये विवक्षाभावाभिधानमनुपपन्नं पारतन्त्र्ये ऽपि विवक्षासम्भवात् ।

शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते ।
तदप्यधिष्ठितं सर्वमेकेन परमात्मना ॥

तथर्ग्वेदादयो वेदाः प्रोक्ता ये ऽपि पृथक् पृथक् ।
भोग्यत्वेनात्मनां ते ऽपि चैतन्यानुगताः सदा ॥

तेषामन्तर्गतेच्छानां वाक्यार्थप्रतिपादने ।
विवक्षा चाविवक्षा च ज्ञायते शब्दशक्तितः ॥ इति

---

§ धर्मोपपत्तिर्दर्शयिष्यत इति २ पु० पा० ।

न्यायेन संप्रदायाद्या ये मीमांसकयाज्ञिकाः ।
वेदं व्याचक्षते तेषामभिप्रायो ऽयमिष्यते ॥

इति च पूर्वमीमांसकैरपि वेदे विवक्षायाः समर्थितत्वादित्याशङ्क्य
तदपि भाष्यं स्वातन्त्र्याभावाभिप्रायमिति व्याख्यातमित्यवतारयति **विव-** १३४ । ७
क्षाभावाभिधानमपीति ।

उद्देश्याऽविवक्षायामिति । यद्यपि विवक्षितशब्देन स्वार्थं परि-
त्यज्योपादेयत्वलक्षणायां न विवक्षितत्वस्य वाक्यार्थानुप्रवेशस्तथापि लक्ष्यस्य
मुख्यार्थसम्बन्धो ऽपेक्षणीय इत्युद्देश्योपादेययोर्मध्ये विशिष्योपादेयस्य विव-
क्षासम्बन्धविवक्षायां तत्प्रतिद्वन्द्विन उद्देश्यस्य विवक्षाभावः पर्यवस्येदिति
तात्पर्य्यम् । **सोमाधारत्वाविशेषेणेति** । तथा च सोमावसेकनिर्हरणा-
दिदृष्टप्रयोजनं ग्रहेष्विव चमसेष्वप्यपेक्षितमिति ग्रहैकत्ववद् ग्रहत्वमपि न
विवक्षणीयमिति भावः । ननु यथा व्रीहीन्प्रोक्षतीत्यत्र द्वितीययोच्यमानं
प्रोक्षणसाध्यत्वं पूर्वसिद्धानां व्रीहीणां स्वरूपेण न सम्भवतीत्यपूर्वसाधनत्वा-
कारेण साध्यत्वनिर्वाहार्थम् अपूर्वसाधनत्वलक्षणायां व्रीहिपदस्य यथा यव-
साधारण्यं तथेहापि ग्रहपदस्योद्देश्यसमर्पकस्य चमससाधारण्यं स्यादित्याश-
ङ्क्याह **ग्रहयागावान्तरेति** । ननु सोमावसेकनिर्हरणादिदृष्टप्रयोजनाविशेषे
ऽपि ग्रहयागाभ्यां सावान्तरापूर्वसाधनविवक्षया ग्रहेष्विव तदेकत्वविवक्षये-
कस्मिन्नेव ग्रहे संमार्गो व्यवतिष्ठतामित्याशङ्कते **नन्विति** । **उपादेय-
विशेषणत्वादिति** । उपादानाय संख्याविशेषस्यापेक्षितत्वात्तदपेक्षितविभ-
क्त्युपनीतसंख्याविशिष्टएव प्रातिपदिकार्थे यागविशेषणं स्यादित्यर्थः । **अत्र** ” । २१
त्विति । उद्देश्ययोः परस्परसंबन्ध एकक्रियावशीकारप्रयुक्तः तयोरेवान्यो-
न्याकाङ्क्षाप्रयुक्तो वा वाच्यः । द्विविधो ऽप्यत्र न संभवति । उद्देश्ययोः क्रियां
प्रति प्रधानयोरुपादेयवत्क्रिया*वश्यत्वाभावात् । सोमावसेकनिर्हरणप्रयोज-
नस्य संमार्गस्य सर्वेषु प्राकरणिकेषु ग्रहेष्वपेक्षितत्वेन तेषु केषां चिद्व्यावर्त्त-
कस्य संख्याविशेषस्यानाकाङ्क्षितत्वाच्चेति भावः । ननु तथापि प्रत्ययानां
प्रकृत्यर्थगतस्वार्थाभिधायकत्वनियमेन शब्दस्वाभाव्यादेकत्वविशिष्टस्य ग्रह-

* उपादेयक्रियेति २ पु॰ पा॰ ।

स्योद्देश्यत्वमनिवार्यमित्याशङ्क्याह **ग्रहएवेति** । एकत्वविशेषणे ऽपि सोमाव-
सेकनिर्हरणप्रयोजनस्य सर्वैर्ग्रहैरपेक्षितत्वादुपादेयविशेषणस्येवोद्देश्यविशेषणस्य
क्रियाङ्गत्वाभावेन तद्वैकल्यप्रयुक्तक्रियावैकल्याप्रसक्तेश्च ग्रहाणां प्रत्येकमेक-
त्वमवलम्ब्य ग्रहमात्रएवोद्देश्यत्वपर्यवसानं स्यात् । अथाप्येकवचनसार्थक-
त्वाय तदुपनीतमेकत्वं प्रत्येकमुद्देश्यं कृत्वा ग्रहं संमृज्यात्तं चैकमेवेति वा-
क्यार्थः कल्प्येत तदा वाक्यभेदः स्यादित्यर्थः । इदमुपलक्षणं त्रिदोषदुष्ट-
१३५ । ४ परिसंख्यादोषापत्तेरपि । **विदिमात्रेति** । ज्ञानमात्रफलकत्वात्तत्त्वावेदकप्रमा-
णवत्प्रमितिफलकत्वाभावादित्यर्थः । विधिमात्रेति पाठे ऽपि विधिपदं
ज्ञापनमात्रपरम् । कुतः प्रमितत्वाभाव इत्याकाङ्क्षायां तद्बाधनादित्यनेनोक्तं
हेतुं व्याचष्टे **तैर्वेदान्तैरिति । जीवाभिव्यक्तीनामिति** । आध्यासि-
कजीवरूपाभिव्यक्तीनामित्यर्थः । पूर्वपूर्वभ्रमनिमित्तकत्वमित्यनेन बीजा-
ङ्कुरन्यायसाम्यार्थं टीकायामविद्यापदं भ्रमपरमिति व्याख्यातम् । तर्हि किं
प्रवाहानादिभ्रमसन्तानव्यतिरेकेण* स्वरूपानादिरविद्या नास्ति सा ऽप्यस्ति
वक्ष्यमाणेत्याह **अनादिस्त्विति** । ननु तादृशानां च जीवानामविद्या न
तु निरुपाधिनो ब्रह्मण इति टीकायां सा ऽप्यविद्या जीवाश्रिता ऽभ्युपगता
तत्प्रसङ्गाद् भ्रमरूपाऽविद्यायामन्योन्याश्रयः परिहृतः तथा चाविद्या-
धीनो जीवब्रह्मविभागस्तद्विभागे च सति जीवाश्रितत्वसिद्धिरविद्याया
इत्यन्योन्याश्रयमाशङ्क्याह **अनादिजीवाविद्ययोरिति** । अविद्यासंबन्ध-
स्तन्निरूपकाविद्याधीनः अविद्या ऽपि तत्संबन्धाधीना अविद्यासंबन्धाधी-
नत्वात्सर्वविवर्तानाम् । तच्च यथेतरेतरतन्त्रत्वमनादित्वान्न दोषावहम् एव-
मिहापीत्यर्थः । **क्वचित्** प्रमेयत्वाभिधेयत्वादौ । ननु स्वाश्रयाश्रितत्वास्या-
प्रसिद्धेः तेन विरोधप्रसञ्जनं नैवोपपादि जीवो यदाश्रितः स्यादविद्या-
श्रयो न स्यात्तदुपादानकप्रपञ्चवदिति प्रसञ्जनमुपपद्यते इत्यस्वरसादाह
,, । १६ **अपि चेति** । नन्वमूर्तत्वे ऽपि नभःशब्दवदाश्रयाश्रयिभावः संभवतीत्या-
शङ्क्याह **अवच्छेद्येति** । अन्यत्र यथा तथा वा ऽस्तु प्रकृते जीवाविद्ययो-
रवच्छेद्यावच्छेदकभावमात्रमिष्यते अविद्यावच्छेदकोपाधिकं जीवत्वमिति
जीवो विद्यया ऽवच्छिद्यते अविद्या च चैतन्याश्रिता वृक्षाश्रितः कपिसं-

---

* संतानाव्यतिरेकेणेति पु. ।

योगो मूलेनेव जीवत्वेनावच्छिद्यतइति । नन्विदमप्यन्योन्याश्रयदुष्टमि-
त्याशङ्क्याह **तत्रेति** । प्रमेयत्वाकारावगाहि प्रमाणं निरूपकप्रमेयावच्छेद्यं
प्रमेयं च स्वविशेषणीभूतप्रमाणावच्छेद्यमित्येवमादिष्ववच्छेद्यावच्छेदकत्व-
स्येतरेतरतन्त्रत्वं दृष्ट*मित्यर्थः ।

जीवाविद्ययोराश्रयाश्रयिभावाभावे कस्तयोराश्रय इत्याकाङ्क्षायां सर्व-
प्रपञ्चविवर्ताधिष्ठानं चैतन्यरूपं ब्रह्मैव केवलमित्यवच्छेदकतोक्त्या† गर्भि-
तमर्थं विवृणोति **अधिष्ठानमिति** । वैशेष्यादिति ष्यञ्प्रत्ययस्य चातु- १३५ । १९
र्वर्ण्यादिवत्स्वार्थिकत्वे वक्तुं शक्ये ऽप्यधिकार्थलाभाय भावार्थत्वमाश्रितं‡
भावो ऽप्यत्रातिशयो विवक्षितः न तु विशेषशब्दप्रवृत्तिनिमित्तरूपो धर्म
इति टीकातात्पर्यमाह **न वैशेष्यादिति सूत्रइत्यादिना** । अत्र मनो-
मयत्वप्राणशरीरत्वयोर्जीवलिङ्गयोस्तत्क्रतुन्यायेन समारोप्यस्य रूपेण वि-
षयो रूपवान् भवेदिति न्यायेन चापतद् ब्रह्मणि§ पर्यवसानमस्पष्टं ताभ्या-
मुपगताभ्यां स्पष्टमपि सत्यसंकल्पत्वादिब्रह्मलिङ्गमभिभूतम् । किं च हृद-
यायतनत्वं हृदये पर्याप्तवृत्तित्वं न तु हृदये कथनमात्रमित्यणीयस्त्वोप-
पत्त्युपन्यासेनावगम्यतइत्युपपत्तिरूपतात्पर्यलिङ्गावगतं हृदयायतनत्वं तदु-
पपत्तिरूपमणीयस्त्वं च प्रबलं जीवलिङ्गमिति ताभ्यामपि सत्यसंकल्पत्वा-
दिकमभिभूतमित्यस्पष्टब्रह्मलिङ्गतया पादसंगतिः । तर्हि दिवि दिव इति
विभक्तिभेदेन प्रत्यभिज्ञाविच्छेदसंदेहादस्पष्टगायत्रीब्रह्मानुवृत्तिकं ज्योतिर्वाक्यं
विषयीकृत्य प्रवृत्तं ज्योतिरधिकरणमप्यत्रैव पादे कर्तव्यं स्यादिति चेन्न ।
तत्र स्पष्टब्रह्मलिङ्गस्य गायत्रीवाक्यस्यापि निर्णेतव्यत्वेन तस्य प्रथमपादे ऽपि
संगतिसत्त्वात्‖ ॥

अत्ता चराऽचरग्रहणात् ॥ ९ ॥ १३६ । १

यत्र च सो ऽत्तेति । एवं क इत्था वेदेत्यस्यावृत्तिरुक्ता ।
यदि न भोक्तृत्वात्संशय इति । यद्यप्यत्तृत्वस्य भोक्तृत्वसंहर्तृत्वान्यत-
रूपाऽनिर्द्धारणाद् जीवाग्निपरमात्मसंशय इति भोक्तृत्वस्य तदर्थसंशयेक-

---

* तन्त्रदृष्टमिति १ पु॰ पा॰ ।
† अवच्छेद्यावच्छेद्यावच्छेदकतोक्त्येति १ पु॰ पा॰ ।
‡ आश्रितुमिति २ पु॰ पा ।
§ न्यायेन वा एतद्ब्रह्मणि इति २ पु॰ पा॰ ।
‖ अत्र प्रथमं सर्वत्रप्रसिद्ध्यधिकरणं संपूर्णम् ।

कोटितया फलसंशयहेतुत्वं सम्भवति तथापि कोटिद्वयसाधारणधर्मतया
१३६ । २३ संहर्तृत्ववत्संशयहेतुत्वं न सम्भवतीत्यत्र तात्पर्यम् । **मृगयाविनोदे**
युद्धमृगयाविनोदे । मृगयाविनोदिन इति पाठः साधुः । मृगयाविन इति पाठस्त्वक्षरद्वयभ्रंशेन प्रामादिकः । अथ वा युद्धरूपया मृगयया अवति परनृपतिदुष्टमृगोपद्रुतं स्वदेशमिति वा हिनस्ति तानिति वा मृगयावी । अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिष्विति धातोराभीक्ष्ण्ये ताच्छील्ये वा णिनिः ।

क्षत्रिय एवेति । वस्तुतो मृगयासु मृगहन्ता क्षत्रिय एव प्रतीयत इत्यर्थः । यद्यपि त्वत्कृपाणभुजङ्गस्य क्षीरं विद्विषतां यश इत्यत्रोपचरितक्षीरप्रतिसम्बन्धिनि कृपाणे मुख्यतत्पातृत्वादर्शनान्नायं नियमः । तथाप्युभयथा दर्शने सत्यत्र बाधकाभावेनानारोपितमेव भोक्तृत्वं ग्राह्यमिति भावः । नन्वोदनशब्देन प्रसिद्धौदनगतं भोग्यत्वं लक्ष्यते चेत्तत्प्रतिसम्बन्धिन्यत्तृत्वं भोक्तृत्वमिति प्रतीतावपि तेन विनाश्यत्वं लक्ष्यते चेदत्तृत्वं विनाशकत्वरूपं संहर्तृत्वं पर्यवस्येत् तत्परस्मिन् सम्भवतीति चेन्न । गौणवृत्तावसाधारणगुणग्रहणसम्भवे साधारणगुणग्रहणायोगात् । न ह्यग्निर्माणवक इत्यत्र पैङ्गल्यादेरिव द्रव्यत्वादेर्ग्रहणमस्ति । मृत्यूपसेचनसन्निधानादत्तृत्वं संहर्तृत्वमित्यभ्युपगमे ऽप्यग्निरेवात्तेति पूर्वपक्षान्तरं यदि त्विति टीकायां दर्शितं तदनु-
,, । २५ पपन्नं परमात्मनो ऽपि संहर्तृत्वसंभवादित्याशङ्क्याह **अविक्रियस्येति** ।
नन्वत्ता निर्विशेषः परमात्मेति नोच्यते यत्र स इति तस्य पृथग्ग्रहणात् सविशेषस्य तु स्रष्टृत्वादिविकारवत् संहर्तृत्वविकारो ऽप्युपपद्यते । नैष दोषः । अविक्रियस्येत्यनेन रागद्वेषादिप्राणिसंहारहेतुविकाराभावस्य विवक्षितत्वात् । न च प्राणिकर्मानुसारेण संहर्तृता स्यादिति वाच्यम् । समृत्युकस्य सकलस्य युगपन्नाशहेत्वदृष्टपरिपाकमेलनासंभवात् । न च क इत्था वेदेति दुर्ज्ञानत्वलिङ्गादत्ता परमात्मा स्यादिति वाच्यम् । तस्य सोत्ता यत्र प्रतिष्ठितस्तन्मात्रविषयत्वे संभवत्यावृत्त्या ऽत्तृविषयत्वस्याकल्पनीयत्वादिति भावः ।

सिद्धान्तटीकायां ब्रह्मक्षत्रशरीरयोर्भोगायतनभोगसाधनरूपयोरोदनवद्भोग्यत्वगुणस्य गौणवृत्तिनिमित्तत्वं निराकृत्य स्वाभिमतं विनाश्यत्व*गुणस्य

* स्वाभिमतविनाश्यत्वेति १ पु० पा० ।

तन्निमित्तत्वमुपपादयितुं प्रवृत्तस्य न चात्र मृत्युरिति टीकाग्रन्थस्य तात्प-
र्यमाह **अपि चेति** । ब्रह्मक्षत्रयोर्मृत्योश्च तावदोदनोपसेचनभावरूपया॰ १३७ । २
दध्नदधिरीत्या संबन्धः प्रतीयते तथा च विनाशकमृत्युसंसृष्टत्वप्रतीत्यनु-
सारादोदनशब्देन विनाश्यत्वं लक्षणीयं स्वबुद्ध्युपस्थापितवैशेषिकगुणग्रह-
णादप्येकवाक्यतापन्नपदान्तरार्थोपस्थापितगुणग्रहणस्य बुद्धिलाघवेनैकवाक्य-
तासामर्थ्येन च न्याय्यत्वात् चरमश्रुतेनाप्येकवाक्यान्तर्गतपदान्तरार्थेनानु-
पस्थितएवापेक्षिते तस्य पुरुषबुद्ध्या कल्पनीयत्वात्* । अत एव ह्यक्ताः
शर्करा इति विधेयस्याञ्जनस्य साधनापेक्षायां वाक्यशेषस्तुतं घृतमेव गृह्यते
न तु पुरुषकल्पनीयं तैलवसादिसाधारणं द्रव्यमात्रम् । एवं चोपसेच-
नत्वरूपणे ऽपि† स्वयमद्यमानत्वे सत्यन्यादनहेतुत्वरूपमुख्यगुण एवासा-
धारणतया स्वारस्यावगतो निमित्तमवतिष्ठते । अतस्तस्य निमित्तत्वमदनं
ब्रह्मकर्तृकसंहार इति पक्षएव घटते । तेन मृत्योरपि संहार्य्यत्वाद् भूत-
वर्गसंहारे मृत्योर्द्वारत्वेनान्यसंहारहेतुत्वाच्च । न त्वदनं जीवकर्तृको भोग
इति पक्षे मृत्योरभोग्यत्वादन्यभोगाऽहेतुत्वाच्च । एवं मृत्योरुपसेचनत्व-
रूपणान्मृत्युना संहार्यं यावच्चराचरात्मकं भूतजातं तत्सर्वं ब्रह्मक्षत्रशब्दा-
भ्यामुपलक्षणीयमित्यपि सिध्यति । तेन सकलचराचरसंहारकर्त्ता परमेश्वर
इहात्ता प्रतीयतइति भावः ।

ओदनपदात्प्रथममिति । ब्रह्मक्षत्रयोः स्वशरीरभृत्यशरीरादिरू-
पेण भोगायतनभोगसाधनत्वे ऽपि स्त्र्यादिरूपतया भोग्यत्वमपि संभवति ।
व्याघ्रादिजीवविशेषं प्रति तयोर्भक्ष्यतया अत्यन्तान्तरङ्गं भोज्यत्व‡मपि संभ-
वतीति भावः । **ब्रह्मक्षत्रमृत्युश्रुतीनामिति** । न तावत्सर्वं ब्रह्म क्षत्रं च „ । ७
कस्य चिज्जीवविशेषस्य भोग्यं भोज्यं§ वा संभवति नतरां ब्रह्मक्षत्रोपलक्षि-
तचराचरमतो यावद् ब्रह्म क्षत्रं च कस्य चिज्जीवविशेषस्य भोग्यं भोज्यं वा
तत्परतया ब्रह्मक्षत्रपदयोः संकोचो वर्णनीयः । मृत्युशब्दश्चाविशेषेण संहा-
रकं प्रत्याययन् किं चिद् व्याघ्रादिभक्षणीयब्रह्मक्षत्र‖संहारकपरतया संकोच-

---

* पुरुषबुद्धिकल्पितमिति २ पु॰ पा॰ ।
† रूपेणापीति २ पु॰ पा॰ ।
‡ अन्तरङ्गभोज्यत्वमिति २ पु॰ पा॰ ।
§ भोग्यमिति नास्ति १ पु॰ ।
‖ क्षत्रमिति २ पु॰ ।

नीयः । न च किंचित्पदगतस्वायत्तलक्षणीयगुणग्रहणानुसारेणेतेषां संकोचो युक्त इत्यर्थः ।

१३१ । ७ यदि मृत्युपदादिति । अत्रायमाशयः । मृत्युपदसन्निधानात्तद्विनाश्यं सर्ववस्तु ग्राह्यमित्येतदयुक्तम् । तथा सति ब्रह्मक्षत्रपदयोर्लक्षणापत्तेः । न चेष्टापत्तिः । ब्रह्मक्षत्रयोर्मृत्युमिश्रणसत्त्वेन मुख्यार्थे अन्वयानुपपत्त्यभावात् । न च तदभावे ऽपि समभिव्याहृतस्य मृत्युमिश्रणस्यान्यसाधारण्यमात्रेण लक्षणा वाच्या अन्नकरणत्वस्य दर्व्यादिसाधारण्ये ऽपि तेषु शूर्पशब्दस्य लक्षणाऽनभ्युपगमादिति । प्राणिष्विति परिहारवाक्यस्यायमाशयः । अत्तृत्वं भोक्तृत्वं संहर्तृत्वमिति पक्षद्वये ऽप्योदनपक्षवद् ब्रह्मक्षत्रपदयोरपि लक्षकत्वमवश्यंभावि न हि स्त्र्यादिरूपतया भक्ष्यतया वा ब्रह्मक्षत्रयोरेव भोक्ता कश्चिद् जीवो ऽस्ति । न वा परमेश्वरस्तदुभयमात्रसंहर्ता न चाधिकभोक्तृत्वे ऽप्यधिकसंहर्तृत्वे ऽपि तन्मात्रग्रहणे प्रयोजनमस्तीति ।

नन्विदमेव प्रयोजनं यत् पञ्चनखादिष्विवान्यनिवृत्तिरित्याशङ्कते नन्विति । पञ्चनखादिवाक्येषु मनुष्यादिनिवृत्तिः प्रत्यवायपरिहारेण फलवती । इह तु प्रयोजनं न पश्यामः । स्वरूपेणान्यनिवृत्तेर्बाधितत्वात् । उपासनाप्रकरणाभावेनाक्ष्यादित्यपुरुषयोर्व्यवस्थितलोककामविशेषेशितृत्वश्रवणवद्विशिष्य ब्रह्मक्षत्रसंहर्तृत्ववर्णनमुपासनार्थमिति कल्पयितुमशक्यत्वाच्च । तथा च यथा यस्मिन् पञ्चपञ्चजना इति मन्त्रे विशिष्य पञ्चानां मनुष्याणामाधार इति कीर्तने प्रयोजनं न किं चिदस्तीति तल्लक्षणीयाकाङ्क्षायां वाक्यशेषात् प्राणादयस्तल्लक्षणीया निश्चीयन्ते एवं विशिष्य ब्रह्मक्षत्रग्रहणं निष्प्रयोजनं सदितरेषामपि केषां चिदुपलक्षणमित्युपलक्षणीयविशेषाकाङ्क्षायां पश्चातनमृत्यूपसेचनकीर्तनात् तदुपसिच्यमानं सर्वमुपलक्षणीयं निश्चीयत-

,, । १० इति परिहाराद्यभिप्रायमाह पञ्चपञ्चनखादौ हीति । अग्नेर्व्याघ्रादिजीवस्य च यत्किञ्चित्संहर्तृत्वसम्भवे ऽपि सकलचराचरसंहर्तृत्वं परमात्मन एवेति टीकोक्तमयुक्तम् । अविकारस्य तस्य संहर्तृत्वस्यैवायोगादिति शङ्कां निराकरोति मायोपाधेरिति । मायिनं तु महेश्वरमिति मायोपाधिकपरमेश्वरप्रकरणे यस्मिन् क्षेत्रे संहरत्येष देव इति तस्य संहर्तृत्वं श्रूयते तच्च

संसारपरिभ्रमणखिन्नान्प्राणिनः कं चित्कालं महासुषुप्त्या विश्रान्तिं प्रापयितुमिति न ततस्य दोषावहम् । प्रायः प्राणिनां दैनन्दिनशर्वरीषु युगपत् सुषुप्तिप्रापकाऽदृष्टोन्मेषवन्महाशर्वरीषु सर्वप्राणिनां युगपन्महासुषुप्तिप्रापकाऽदृष्टोन्मेषोपि नाऽनुपपन्न इति भावः । अत्र प्रथमप्रतीतभोग्यत्वलक्षणापवादेन विनाश्यत्वलक्षणां व्युत्पाद्य ब्रह्मलिङ्गस्योन्मेषणीयत्वादस्पष्टब्रह्मलिङ्गता* ॥

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥ १३७ । १३

पूर्वसिद्धान्तपक्षाक्षेप इति । बुद्धिजीवाविति पूर्वपक्षस्य जीवपरमात्मानाविति सिद्धान्तपक्षस्य चाक्षेप इत्यर्थः । **प्राकृतसुपर्णेति** । द्वा सुपर्णेति मन्त्रान्तरे† द्वित्वस्य सुपर्णविषयत्वादिहापि तद्विषयत्वशङ्केत्यर्थः । **यदि स्तृष्टिमन्त्रकेष्टकानामिति** । तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक्च मतोरित्यनुशासनात्स्तृष्टिशब्दः स्तृष्टिमन्त्रोपधेयेष्टकावाची ।

नन्विष्टकानामुपधाने विधानमित्ययुक्तम् । मन्त्रविशेषोपधेयत्वेन स्तृष्टिशब्देनानूद्यमानानामिष्टकानामुपधानस्य प्रागेव प्राप्तिर्वक्तव्यत्वात् । अन्यथा स्तृष्टिशब्देनानुवादस्योपधानविधानस्य चान्योन्यापेक्षत्वेन परस्पराश्रयापत्तेः । स्तृष्टस्तृष्टिमन्त्रकत्वविशेषस्येत्याद्यप्ययुक्तम् । स्तृष्टस्तृष्टिमन्त्रोपधेयत्वविशेषावगमोपायाभावे सर्वासामिष्टकानां स्तृष्टिमन्त्रोपधेयत्वावगमे ऽपि तुल्यन्यायतयोपायाभावेनास्याप्यनवगमप्रसङ्गात् । स्तृष्टिमन्त्राम्नानचारितार्थ्याय तदुपधेयत्वावगमे तथैवास्तृष्टिमन्त्राम्नानचारितार्थ्याय स्तृष्टिमन्त्रैश्चतुर्दशभिरुपधेया‡श्चतुर्दशेष्टकास्तत्संवलितैस्त्रिभिरस्तृष्टिमन्त्रैरुपधेयास्तिस्र इष्टका इति विशेषावगमोपपत्तेः । कथं चित्स्तृष्टिमन्त्रोपधेयत्वावगम एवोपायो ऽस्ति नाऽस्तृष्टिमन्त्रोपधेयत्वावगम इति विशेषसमर्थने ऽपि सर्वा एवेष्टकाः स्तृष्टिमन्त्रकाः स्युरित्यापादनमयुक्तम् । प्राणभृत उपदधाति चित्रिणीरुपदधाति वज्रिणीरुपदधातीत्यादिविध्यन्तरबलात् प्राणभृदादिमन्त्रान्तरोपधेयेष्टकानामप्यङ्गीकार्यत्वात्सर्वेष्टकोपधानस्य स्तृष्टिमन्त्रकत्वे ऽप्यस्तृष्टिमन्त्रान-

---

* अत्र द्वितीयम् अत्त्रधिकरणम् संपूर्णम् ।

† सुपर्णा मन्त्रान्तरे इति २ पु॰ पा॰ ।

‡ उपाधेया इति २ पु॰ पा॰ ।

र्थक्योक्तिरयुक्ता । उपधानाऽविनियुक्तानामपि तेषामिष्टकाग्रहणादिषु विनियोगेनाग्निप्रकरणाम्नानचारितार्थ्योपपत्तेः । अत एव तदानर्थक्यपरिहारायाऽजहल्लक्षणोक्तिरप्ययुक्ता । तस्मात्सर्वमिदमसमञ्जसमिति चेत् ।

उच्यते । अयमिहाचार्याणामभिप्रायः । स्पृष्टिशब्दोक्तमन्त्रविशेषोपधेयत्वेनानुवादान्यथानुपपत्त्येष्टकाङ्गे उपधाने तत्र स्पृष्टिमन्त्राणां विनियोगे च विधिः कल्प्यते कल्प्यश्रुतिसिद्धमपीष्टकोपधानं प्रत्यक्षविधिस्पृष्टं भवत्विति एतदर्थं तस्य पुनर्विधानं प्रत्यक्षविधानस्य च फलं स्पृष्टिमन्त्रोदितानामिष्टकानां मध्यमचितावुपधानं न त्वप्राप्तप्राप्तिः । असति तस्मिन्विधौ मध्यमचितिप्रकरणानाम्नातानां तासां तस्यामुपधानं न लभ्यते सति तु तस्मिन् लभ्यते । मध्यमायां तु वचनाद् ब्राह्मणवत्य* इति पञ्चमाध्यायाधिकरणे यां वै कां चन ब्राह्मणवतीमिष्टकामभिजानीयात्तां मध्यमायां चितावुपदध्यादिति वचनेन प्रत्यक्षज्ञानवाच्यभिपूर्वजानातिवशाद् वचनेन प्रत्यक्षब्राह्मणोदितानामिष्टकानां मध्यमचितावुपधानं न त्वन्ते तु बादरायण† इति न्यायाच्चित्यन्तर इति निर्णीतत्वात् । एवं च स्पृष्टिशब्दस्य स्पृष्टिलिङ्गकमन्त्रवाचित्वेनैतद्विध्युपात्तास्विष्टकासु स्पृष्टस्पृष्टिमन्त्रकत्वरूपावान्तरविशेषानवगमात् सर्वा एवैतद्विध्युपात्ता इष्टकाः स्पृष्टिमन्त्रकाः स्युः । तथा चास्पृष्टिलिङ्गकमन्त्रोपधेयेष्टकानां मध्यमचित्यलाभान्मध्यमचित्युपधेयेष्टकामन्त्रसंवलिततयैकस्मिन्ननुवाके समाम्नानमनर्थकं स्यात् स्पृष्टीरुपदधातीति विधानानन्तरमेकया ऽस्तुवतेत्यादिमन्त्रोपधेयानां सप्तदशानामिष्टकानां प्रत्येकस्तुतिपूर्वकमाम्नातो यत्सप्तदशेष्टका उपदधातीति वाक्यशेषश्चानर्थकः स्यात् तन्मा भूदित्येतदर्थं स्पृष्टास्पृष्टिमन्त्राणां सप्तदशानामप्येकसमुदायवर्तित्वेनाऽजहल्लक्षणा ऽऽश्रितेति ।

यद्यप्यस्तु वेत्यादिटीकायां जीवपरमात्मपक्षे बुद्धिजीवपक्षे च प्रकृतिप्रत्ययावुभावपि मुख्यावेव हेतुकर्तृसाधारणकर्तृत्वसामान्यस्य कृदर्थत्वात् हेतुकर्तृत्वरूपकर्तृत्वविशेषविवक्षायां णिजर्थान्तर्भावे कर्तव्ये ऽपि कर्तृत्वसामान्यविवक्षायां तदन्तर्भावाऽनपेक्षणात् । करणस्यापि बुद्धेः कर्मवत्कर्मणा

---

* जै. सू. अ. ५ पा. ३ सू. १६ ।

† जै. सू. अ. ५ पा. ३ सू. १६ ।

तुल्यक्रिय इति सूत्रोक्तरीत्या कर्मण इव कर्तृत्वसंभवाच्चेति तयोर्मुख्यतैवोप-
पादितेति योजयितुं शक्यम् । शतुः स्वतन्त्रकर्तर्येव शक्तिः करणे च न मुख्यं
कर्तृत्वमित्यङ्गीकारे ऽपि बुद्धिजीवपक्षे कारकत्वसामान्यइव जीवपरमात्म-
पक्षे कर्तृत्वसामान्ये प्रत्ययस्यैव लक्षणोक्तेति योजयितुं शक्यम् । तथाप्येव-
मपि योजयितुं शक्यमिति वैभवादित्थं व्याख्यातम् ।

गुहाप्रविष्टादिपदानुसारेणेति । सर्वगतस्य ब्रह्मणो गुहावर्ति- १३८ । ६
त्वसंभवे ऽपि गुहाप्रवेशो न संभवति । अस्मिन्प्रकरणे प्रकरणान्तरेषु च
ब्रह्मणः प्रवेशश्रवणम् अनेन जीवेनात्मना ऽनुप्रविश्येति श्रुताविव जीवभा-
वाभिप्रायम् । न चेह तथा योजयितुं शक्यम् । गुहां प्रविष्टाविति जीववद्
द्वितीयस्यापि पृथक्प्रवेशश्रवणात् । न हि जीवभावेन संसारित्वमभिप्रेत्य
ब्रह्मैव संसरतीति व्यवहारवद् ब्रह्मणी संसरत इत्यपि व्यवहारः संगच्छते ।
तथा अनुत्तमेषूत्तमेषु लोकेष्वित्यादिश्रुत्यन्तरेषु ब्रह्मणो लोकवर्तित्वप्रसिद्धा-
वपि सुकृतस्येति विशेषणादिह प्रतीयमानं सुकृतफलभोगार्थलोकावस्थानं
ब्रह्मणो न संभवति । न च ब्रह्मविद्वचनविषयत्वं ब्रह्मलिङ्गमपि श्रूयतइति
शङ्कनीयम् । तस्य पञ्चाग्न्यादिवचनविषयत्ववदुपप्रबलजीवलिङ्गप्रतिहतस्य
ब्रह्मविदो ऽपि ब्रह्मैक्यबोधनाय बुद्धिविविक्त*जीवमन्विच्छन्तीत्येतत्परतया
कथं चिद्योज्यत्वात् । न हि पञ्चाग्न्यादयः कर्मठाः संसारिजीवविविक्तमसं-
सार्यात्मस्वरूपं वदन्ति तदवगमस्य कर्मानुष्ठानविरोधित्वादिति भावः ।

अस्य द्वितीयतेति श्लोकभागं व्याकुर्वन्नेव श्लोकमवतारयति **अस्ये-
ति** । द्वितीयशब्दः पूरणप्रत्ययान्तो ऽप्यत्र जीवस्य ब्रह्मणा सह द्वित्वा-
धारत्वं लक्षयतीति भावः । द्वितीयवान् द्वितीय इति मत्वर्थीयाच्प्रत्यया-
न्ततया ऽपि द्वितीयशब्दो योजयितुं शक्यते अर्शआदेराकृतिगणत्वात्
प्रथमं सद्वितीयत्ववदित्युत्तरश्लोकानुरोधाच्च ।

प्रथममितीति† । जीवस्यापि स्वतो गुहाप्रवेशो न संभवति तस्य ,, । १२
स्वोपाध्यन्तःकरणोपाधिकः संभवति चेत् परस्यापि स्वनियम्यान्तःकरणो-
पाधिकः संभवतीति तुल्यम् । प्रत्युत बुद्धिजीवपक्षएव स्वतःप्रवेशवत्या
बुद्ध्या सह तदुपाधिकप्रवेशस्य जीवस्य प्रवेशवर्णनं न संभवति न ह्युपष्टम्भ-

---

* विविक्तमिति २ पु॰ पा॰ । † एतत्प्रतीकस्थाने प्रथमनिर्णीतेति दृश्यते २ पु॰ ।

कोपाधिकगुरुत्वशालिनि सुवर्णे गुरु सुवर्णमिति व्यवहारवदुपष्टम्भकसुवर्णे गुरुणी इत्यपि व्यवहारो दृश्यते । सुकृतलोकवर्तित्वं कर्मफलभोक्तुर्जीवस्येव तदन्तर्यामिणो ऽप्यस्ति । छायातपत्वनिर्देशो ऽपि जीवपरयोरेव प्रकृतार्थोपयोगितया श्लिष्यते समाने चेतनत्वे कथमृतपाने जीवस्य पारतन्त्र्यं परस्य स्वातन्त्र्यं चेति शङ्कानिवर्तनाय तयोरज्ञानतमोऽभिभवतदभावरूपविशेषप्रदर्शनार्थत्वात् । पञ्चाग्नय इत्यादिब्रह्मविदां विशेषणं ये प्राक्पञ्चाग्निशुश्रूषया ये वा नाचिकेतादिचयनैरन्तःकरणशुद्धिं प्राप्ताः त एव तत्प्रसादाद् लब्धनिर्विचिकित्सब्रह्मविद्याः इत्थं वदन्तीति विशेषप्रतिपत्त्यर्थमिति प्रथमावगतब्रह्मद्वितीयत्वानुसारेण सर्वं सुयोजम् । न च स्वरूपद्वितीयान्वेषणे परतन्त्रत्वादिना तस्य बुद्धिरपि सरूपेति शङ्कनीयम् । स्वाभाविकधर्मस्य चेतनत्वस्यान्तरङ्गत्वात् सुखाद्यनुभवितृपरपिबच्छब्दसंस्पृष्टत्वाच्चेति भावः ।

आध्वंसते आगच्छतीति । ध्वंसु गतौ चेति धातुः । **उच्छे-**
१३९ । १ **द्यत्वाद्वृक्षमिति** । ओ व्रश्चू च्छेदन*इति धातोर्वृक्षशब्दः । ननु पिप्पल-
शब्दो ऽश्वत्थवाची फले लुगिति विकारार्थतद्धितलुकि तत्फलं ब्रूयात् फले
सस्यं च पिप्पलमित्यनुशासनाद्वृक्षवल्ल्यादिफलसामान्यं वा ब्रूयाद् न तु
कर्मफलमित्यत आह **संसारस्येति** । ऊर्ध्वमूलो ऽवाक्शाख एषो ऽश्वत्थः
सनातन इति श्रुतिः । **अस्य महिमानमिति** वीतशोक इति श्रुतिगतमिति-
शब्दं भिन्नक्रमतया योजयति **अस्यैवेति यदा पश्यतीति** । क्रियाश्रव-
णाभावाद्वीतशोक इत्यस्यापेक्षिता भवतीति क्रिया ऽध्याहृता । वीतशोकः
सन्नस्य महिमानमिति एति प्राप्नोतीत्यपि योजयितुं शक्यम् । गुणाभाव-
श्छान्दसत्वेन स्वयंभुवे इत्यादाविव संज्ञापूर्वकविधेरनित्यत्वेन वोपपाद-
यितुं शक्यः† ॥

,, । ७ ## अन्तर उपपत्तेः ॥ १३ ॥

ननु य एष इति सर्वनाम्नः प्रकृतपरामर्शित्वसंभवे तत्त्यागायोगादव्यवहितप्रकृतपरामर्शासंभवे व्यवहितप्रकृतपरामर्शस्य तस्मिन् यदन्तस्तदन्वेष्टव्यमित्यादिषु संप्रतिपन्नत्वेन अग्निविद्याव्यवधानस्याप्रतिबन्धकत्वाद्

---

* टु ओ व्रश्चू च्छेदने इति टु इत्यनुबन्धो धातुपाठे ऽदृष्टो ऽधिको दृश्यते १ पु· ।

† शक्यत्वादित्यनन्वितः पाठः १ । २ पु· । अत्र तृतीयं गुहाप्रविष्टाधिकरणं संपूर्णम् ।

वक्तृभेदे ऽप्यग्न्युपदिष्टार्थस्याचार्यबुद्धिस्थत्वाच्च कं ब्रह्मेति वाक्यप्रकृतब्रह्मप-
रामर्शित्वं तयोर्वक्तुं युक्तमिति तदनुसारेणाऽक्षिवाक्यस्य ब्रह्मपरत्वनिर्णयः
स्यादित्याशङ्क्याह इयं चेति । **प्रतिबिम्बनिश्चायकत्वादिति** । न चा-
न्तरादित्यवाक्यइव अन्तरक्षिवाक्यइव च दृश्यतइत्येतत् शास्त्रीयदर्शनपरं
किं न स्यादिति शङ्कनीयम् । यत आदित्ये प्रतिबिम्बादर्शनेन अन्तरादित्य-
वाक्यप्रतिबिम्बपूर्वपक्षो न संभवति । अन्तरक्षिवाक्ये ऽपि तत्स्वरूपे स न
संभवतीति तयोर्दैवतापूर्वपक्षः कृतः । अतस्तत्र पूर्वपक्षे ऽपि शास्त्रीयमेव
दर्शनमन्वेष्यं जातम् इह तु प्रतिबिम्बपक्षः संभवति प्रतिबिम्बे सुप्रसिद्ध-
लौकिकदर्शनसत्त्वान्न शास्त्रीयपूर्वपक्षे ऽपि शास्त्रीयमेव दर्शनमन्वेष्यमिति
वैषम्यात् ।

अनेन सङ्गतिश्चोक्तेति । नन्वेकेनोपक्रमगतेन पाश्चात्त्यानां बहूनां १३९ । ११
बाधनमयुक्तम् । भूयसां स्यात्सधर्मत्वमिति न्यायविरोधात् । भूतादि-
पादव्यपदेशाद्यैर्बहुभिरुपक्रमश्रुतस्यापि गायत्रीपदस्य ब्रह्मणि नीतत्वाच्च ।
पूर्वाधिकरणे तु गुहाप्रवेशादीनामुपक्रमानुसारेण न बाधनं कृतं किं तु
तेषामपि जीवपरमात्मपक्षे स्वारस्यमेवास्तीत्युपपादितम् । इह तु प्रतिबि-
म्बपूर्वपक्षवादिना ब्रह्मात्मश्रुत्यमृतत्वाभयत्वसंयद्वामत्ववामनीत्व*भामनी-
त्वपुष्करपलाशवाक्यावगतार्चिरादिवाक्यावगतफललिङ्गानि बहूनि बाध्या-
नीति चेन्नैष दोषः । आत्मश्रुत्यादीनामितिशब्दशिरस्कत्वेन मनो ब्रह्मेती-
त्यादिवदतस्मिंस्तद्रूपप्रत्ययपरत्वावगमाद् वचनबलाद्वैवाहिकवधूदर्शनेना-
भ्युदयवत्पुष्करपलाशवाक्यावगतफलस्य पञ्चाग्निविद्ययेवाब्रह्मविषयया† ऽपि
प्रतिबिम्बोपासनया ऽर्चिरादिवाक्यावगतफलस्य चोपपत्तेरिति भावः । **अत
आहेति** गतिवचनं‡ विद्यान्तराभिप्रायम् । गतेरवन्यर्थत्वात् । न तूक्तपरिशि-
ष्टाभिप्रायम् एषा सोम्य तइत्यादिना ऽग्निविद्यावदात्मविद्याया अपि निरव-
शेषोपदिष्टत्वेनोपसंहारात् । अन्यथा देवयानगतिवचनस्यात्मविद्यायामिवा-
ग्निविद्यायामप्यन्वयप्रसङ्गादित्याहेत्यर्थः । **सापेक्षत्वादिति** । प्रकृताभावेन ,, । १२
प्रागपर्यवसिताभिधानयोः सर्वनाम्नोः पुरुषपदादिविशेष्यान्वयापेक्षत्वादित्य-

* संयद्वामनीत्ववामनीत्वेति ५ पु॰ पा॰ । † ब्रह्मविषययेति २ पु॰ पा॰ ।
‡ गतीति नास्ति २ पु॰ ।

र्थः । **छायात्मनीति** । इतिशब्दस्तत्रार्थविवक्षां वारयति यत्र प्रत्ययो विवक्ष्यते न तु यत्रोक्तार्थावच्छेदेनाप्रवचनसंबन्धस्तत्रापि यथा इति ह स्मोपाध्यायः कथयतीति इह चोवाचेति । अस्येतिशब्दयुक्तेषूत्तरेष्वपि वाक्येष्वनुषङ्ग इति न ब्रह्मश्रुत्यादिष्वप्यविवक्षाप्रसङ्गः । अतः छायात्मनि तेषां क्लेशेन योजना

१३९ । २३ कार्येति भावः । **तद् व्याख्यातीति** । प्रसिद्धवदित्यादि विद्वद्विषयं प्ररोचनार्थमित्यन्तमुपात्तं भाष्यं विदुषो विषयः शास्त्रत उपलब्धि*रित्यादिग्रन्थेन व्याख्यातीत्यर्थः । केषु चित् टीकाग्रन्थकोशेषु विदुषः शास्त्रत उपलब्धिरित्यादिर्विषयशब्दरहितः पाठो दृश्यते स तु सुगम इति न व्याख्यातः । **वननीयानीति** । वन सम्भक्ताविति धातोरौणादिकप्रत्ययान्ततया निष्पन्नो वानशब्दः सम्भजनीयवाची शोभनेषु पुण्यफलेषु स्वर्गादिभोग्यवस्तुषु पर्यवस्यतीति भावः । निमित्तीकृत्येत्यपेक्षितो ऽध्याहारस्तदनध्याहारे परमेश्वरस्यैव फलभोक्तृत्वप्रतिपादकत्वापत्तेरिति भावः । न चैतदिष्टमिति टीकायामेतच्छब्दार्थमाह **न चैतत्प्रतीकत्वमिष्टमिति** । नन्वेष्टव्यमेव प्रतीकत्वं प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति निर्दिष्टस्य नाम ब्रह्म मनो ब्रह्मेत्यादिनिर्देशसाम्यात् प्राणं च हास्मै तदाकाशं चोचुरिति प्राणादिशब्दैर्निगमनदर्शनाच्च । ब्रह्मप्रधानत्वे हि ब्रह्मशब्देन निगमनं स्यादित्यत आह **एषा सोम्येति** । इदमुपलक्षणं प्रतीकत्वे कं च खं च न विजानामीति पृष्टवन्तं प्रति यद्वाव कमित्याद्युत्तरमप्यसमञ्जसं स्यात् । न चेदमपि वैषयिकसुखे भूताकाशदृष्टिपरं भूताकाशे वैषयिकसुखदृष्टिपरं च किं न स्यादिति शङ्क्यम् । कं ब्रह्म खं ब्रह्मेत्यस्यार्थाऽज्ञानेन पृष्टवन्तं प्रति दृष्टिविध्यन्तरकथनस्योत्तरत्वाऽयोगादतो निगमनवाक्यमुपक्रमानुरोधात् प्राणं हिरण्यगर्भाख्यं कार्यं ब्रह्म तदाकाशं परं ब्रह्मरूपं सुखविशिष्टाकाशं चोचुरित्येतदर्थकमिति न तद्विरोध इत्यपि द्रष्टव्यम् ।

१४० । १८ **पूरयित्वेति** । नन्वाचार्यस्तु ते गतिं वक्तेति वदतामग्नीनां स्थानगुणविशेषान् पूरयित्वेत्यभिप्रायः कुतो ऽवगतः । आचार्यवाक्ये स्थानगुणकीर्तनाऽदर्शनादिति चेन्न । तत्कीर्तनस्य प्रतिबिम्बोपासनाविषयत्ववादिनं पूर्वपक्षिणं प्रति सुखत्वविशिष्टब्रह्मोपासनाविधिशेषत्वासिद्धेः । य एष इति

* शास्त्रतन्त्रोपलब्धिरिति २ पु· ।

सर्वनाम्नोः प्रकृतपरामर्शित्वस्वाभाव्यात् सुखविशिष्टब्रह्मप्रकरणसद्भावे ऽक्षिपुरुषस्तदेव प्रकृतं ब्रह्म भवेदिति स्थानगुणकीर्त्तनस्य तेन तद्विषयत्वसिद्धा ततः पूरयित्वेत्यभिप्रायो ऽवगत इति चेद् न । अत्रैव य एष आदित्य इत्यादिष्वग्निविद्योपदेशवाक्येषु तयोः प्रकृतब्रह्मपरामर्शित्वाभावेन तद्वदिहाप्युपपत्तेः । यद्यग्निभिः स्वविद्यानामात्मविद्यायाश्च भेदेन कीर्तितत्वात्तत्र तयोः प्रकृतपरत्वं त्यक्तं तर्ह्यत्रापि निरवशेषोपदिष्टत्वेनात्मविद्याया उपसंहृतत्वात् तयोस्तत्त्यक्तमिति समानम् । न चाचार्येणाक्षिपुरुषोपदेशानन्तरं पराञ्चं वेदेत्यक्षिपुरुषविदमुपक्षिप्य अथ यदु चैवास्मिन्नित्यादिना तस्यार्चिरादिगतेरुपदिष्टत्वादक्षिपुरुषः प्रकृतं ब्रह्मैव भवेदन्यथा गत्युपदेशस्य तद्विषयत्वाभावेन गतिवचनविरोधप्रसङ्गादिति वाच्यम् । गतिवचनस्य विद्यान्तरोपदेशविषयत्वोपपत्तेः । तस्य प्रकृतब्रह्मविद्यान्वयिदेवयानगतिविषयत्वे ऽप्याचार्यः स्वयमपि विद्यान्तरमुपदिश्य तदन्वितदेवयानगतिमुपदेक्ष्यतीत्येतदग्नयो निश्चित्याचार्यो यां गतिमुपदेक्ष्यति सा प्रकृतब्रह्मविदो ऽपीत्यभिप्रायेणाचार्यस्तु तइत्याद्यवोचन्निति तदुपपादनोपपत्तेः । गतिमात्रवचनप्रतिज्ञानस्य स्थानगुणवचनयोः प्रकृतब्रह्मान्वयित्वकल्पनाविरुद्धत्वाच्च । तस्मात्पूरयित्वेति शेषाध्याहारो न युक्त इति चेदुच्यते । गतिवचनप्रतिज्ञानं देवयानगतिवचनप्रतिज्ञानमेव शुक्लकृष्णे गती ह्येते श्रुतोपनिषत्कगत्यभिधानाच्चे*त्यादिवेदार्थाभिज्ञव्यवहारेषु गतिशब्दस्य देवयानविषयनिरूढप्रयोगदर्शनात् । तत्र च पूरयित्वेति न शेषाध्याहारः किं त्वाचार्यस्तु ते इति श्रुततुशब्दार्थकथनं तथा चान्यैश्च कैश्चन विशेषैः सहाचार्यो गतिमुपदेक्ष्यतीति गतिवाक्यस्यार्थः । तच्च गतिवाक्यं ब्रह्मप्राप्तिलिङ्गात्प्रकृतब्रह्मविद्यामात्रविषयं नाग्निविद्याविषयमपीति ते विशेषा आचार्यवाक्ये वक्ष्यमाणस्थानगुणादिरूपाः पर्यवस्यन्तीति । न च वाच्यमथ यदु चैवास्मिन्नित्यादिना पञ्चाग्निविद्यादिप्रसिद्धायां देवयानगताविह विद्यायां दहनादिशवकर्माभावे ऽप्यर्चिरादिप्राप्तिर्भवतीति विशेषो ऽभिधीयते अतः स एव विशेषस्तुशब्दार्थः स्यादिति । सङ्कोचे कारणाभावेनाऽऽचार्य्यवाक्ये ये ये विशेषा दृष्टास्तेषां सर्वेषामपि तुशब्दार्थत्वोपपत्तेः । गतिमात्र-

---

* व्यास सू॰ अ॰ १ पा॰ २ सू॰ १५ ।

भिधानप्रतिज्ञानमिति भाष्ये गतिमात्राभिधानप्रतिज्ञानादिति टीकायां च मात्रशब्दो धर्म्यन्तरव्यवच्छेदक इति न विरोधः । अथ वा श्रुतिसूत्रयोर्गतिशब्दः कर्मव्युत्पत्त्या फलवाची देशानां प्राप्यफलोक्तावेव तत्प्रापकमार्गाकाङ्क्षोत्पादात्* । आचार्यवाक्यं च सर्वं सोपपादकविद्याफलपरमेव । पुष्करपलाशवाक्यं तावत्फलपरमिति स्पष्टम् । सर्पिरुदकवाक्यं निर्लेपस्य ब्रह्मणस्तदुचितमक्षि स्थानमिति स्थानगुणकीर्तनद्वारा तत्क्रतुन्यायलभ्यपापाश्लेषपरम् । संयद्वामादिवाक्यान्यपि तत्क्रतुन्यायाश्रयेणैवोपास्यगुणानुसारिफलप्रतिपादकानि । स एतानिति वाक्यमनावृत्तिवाक्यं च पुनरावृत्तिक्लेशरहितब्रह्मलोकप्राप्तिफलकम् । अर्चिरादिवाक्यानि तत्प्रापकमार्गोपदेशेन फलप्राप्त्युपपादकानीति सर्वमिदमाचार्यवाक्यं गतिमात्राभिधानपर्यवसायीति न भाष्यटीकाविरोधः । आत्मानं जगतः सूर्यमिति सूर्यान्तर्याम्यभिप्रायम् । सूर्य आत्मा जगतस्तस्थुषश्चेति श्रुतिः । तस्माद्युक्तं पूरयित्वेति ।

१४० । २२ **हिरण्यगर्भभूतमिति** । आदित्यस्य ब्रह्माण्डोदरजातहिरण्यगर्भरूपत्वमसदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत्तदाण्डं निरवर्त्ततेत्यादिच्छान्दोग्योपनिषद्वचनजातेन मृते द्विधाभवनादार्त्ते ब्रह्माण्डे जातो मार्त्तण्ड इत्यादितद्वाचिनो मार्त्तण्डशब्दस्य पौराणिकव्युत्पादनेन

विद्यासहायो भगवान् यस्यासौ मण्डलान्तरे ।
हिरण्यगर्भः पुत्रो ऽसावीश्वरो दृश्यते परः ॥

इत्यादिपुराणवचनेन चावगतम् ।

केचित्तु आत्मपदं केवलपरमात्मपरं परमात्मानमुपास्य सत्यलोके हिरण्यगर्भमादित्यं प्राप्नुवन्ति आत्मशब्दमात्रस्य सूर्यान्तर्यामिपरत्वकल्पकाभावादिति व्याचक्षते । **ज्योतिः सूर्य इति** । अग्निर्ज्योतिरिति स्मृतौ क्रमो न विवक्षित इति भावः† ॥

१४१ । १ **अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥**

श्लोकनिरसनीयव्यभिचारशङ्कास्पदमनुमानं दर्शयति **अशरीर इति** । इदं हेतुगर्भं विशेषणं परमेश्वरस्यापि नियम्येन पृथिव्यादिना शरीरवत्त्व-

* आकाङ्क्षोदयादिति २-५ पु· पा· ।

† अत्र चतुर्थम् अन्तराधिकरणं पूर्णम् ।

मस्ति यस्य पृथिवी शरीरमित्यादिश्रुतेः । अतो हेत्वसिद्धिपरिहारार्थं नियम्यातिरिक्तशरीरराहित्यं हेतुरिति वक्तव्यमित्यापाद्य तत्र व्यभिचारमाशङ्कते **नन्विति । पारिशेष्यादिति ।** सो ऽपि नान्तर्यामीति पूर्ववाक्यादन्तर्यामीत्यनुषङ्गः । तस्य पारिशेष्याज्जीव एवेति समनन्तरं वक्ष्यमाणेन संबन्ध इत्यर्थः न तु पारिशेष्याज्जीव एवेत्यस्य तस्माज्जीवात्मैवान्तर्यामीत्युपसंहारवाक्ये वक्ष्यमाणेनान्तर्यामिपदेन संबन्ध इत्यर्थः । तथापि जीवात्मपदश्रवणात्तेन पौनरुक्त्यापत्तेः । अमृतत्वाद्युपपादकैरन्यथेत्यादिवाक्यैर्व्यवहितस्यास्य तत्रान्वयासम्भवाच्च ।

ननु तस्माज्जीवात्मैवेत्युपसंहारो न युक्तः । पृथिव्यादिशरीरकाणां तत्तदधिदेवतात्मनां श्रोतुर्गौतमस्यात्मनश्चैकत्वाभावेन पृथिव्यादिपर्यायेष्वेष तआत्मेत्यस्यानन्वयात् । अतः पूर्वपक्षाभासो ऽयमित्याशङ्क्यावतारयति **पूर्वपक्षमिति ।** अदृष्टो द्रष्टेत्यादौ दर्शनश्रवणमननविज्ञानानि यद्यात्मनो वा ऽरे दर्शनेन श्रवणेन आत्मनि खल्वरे दृष्टे श्रुते मते इत्यादिश्रुत्यन्तरप्रत्यभिज्ञानादात्मविषयसाक्षात्कारश्रवणमनननिदिध्यासनानि यदि वा चक्षुःश्रोत्रमनोबुद्धिकरणकज्ञानानि उभयथापि तद्वत्त्वं तद्विषयत्वं च जीवे एवोपपद्यते न परमात्मन्यतद्वति तद्विषये च । अत एष तआत्मेति स तआत्मेति च सर्वनाम्नोस्तज्जातीयविषयत्वं कल्पयितुं युक्तम् । पूर्वस्मिन्वत्सरे ये भुक्तास्तएव शालयो भुज्यन्ते तदेवौषधं सेव्यतइत्यादिषु व्यवहारेषु सर्वनाम्नस्तज्जातीयविषयत्वस्यापि दर्शनादित्याशयः । १४१ । १८

नन्नु नियन्तुरपि जीवस्य नियन्त्रन्तरनियम्यत्वे तस्यापि नियन्त्रन्तरनियम्यत्वं स्याद् नियन्तृत्वाविशेषादित्यनवस्थापादने* जीवपरयोस्तात्त्विकाभेदोपन्यासमात्रेण परिहारो न लभ्यते सत्यपि तात्त्विका ऽभेदे जीवपरयोरिव पर†तन्नियन्त्रोरपि कल्पितभेदेन नियम्यनियामकतोपपत्तेरित्याशङ्क्याह **औपाधिकस्य हीति ।** जीवनियन्ता परो यद्यौपाधिकः परतन्त्रः स्यात्तर्हि भृत्यनियन्तुरमात्यस्य राजेव जीवनियन्तुः परस्याप्यन्यो नियन्ता ऽऽपाद्येत न त्वेवम् । यतः परमेश्वरो नौपाधिकः उपाध्यायत्तपारतन्त्र्यवान्न भवति तथा

* अनवस्थापादने ऽवस्थापादनेति २ पु॰ असङ्गतः पाठः ।
† परेति नास्ति २ पु॰ । १ पु॰ बहिर्लिखितम् ।

ऽश्रवणादित्याशयः । नन्वभेदे ऽपि जीवपरयोर्भेदव्यवहारो दृष्ट इत्याशङ्क्य व्याचष्टे **औपाधिकभेदाभावे ऽपीति** । जीवस्य स्वस्मादौपाधिकभेदो ऽपि नास्तीत्यर्थः । लौकिके कर्त्तरि डित्थ इति पुरुषान्तराभिप्रायम्* ॥

१४२। ८ **अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥**

तत्त्वतो ऽन्यथाभावः परिणामः अतत्त्वतो ऽन्यथाभावो विवर्त्त इति वा धर्मिसमसत्ताको ऽन्यथाभावः परिणामस्तदसमसत्ताको विवर्त्त इति वा परिणामविवर्त्तयोर्भेदे स्थिते यदि विश्वस्य भूतयोनिपरिणामत्वमभ्युपगम्यते यदि वा तद्विवर्त्तत्वमुभयथापि भूतयोनिर्जडा ऽङ्गीकार्या कनकरुचकस्रग्भुजङ्गादिलोकदृष्टोर्णनाभ्यादिश्रुत्युपात्तदृष्टान्तानुसारेण । यथा सुदीप्तादिति मन्त्रोपात्तसरूपविशेषणानुसारेण च विकारसारूप्यावश्यम्भावादित्यभिप्रेत्यानुमानमाह **भूतयोनिर्जडेति** । **द्वितीयार्द्धमिति** । योनिशब्दो निमित्तं चेदित्यर्द्धमित्यर्थः । **ब्रह्मपरत्वं दुर्निवारमिति** । ब्रह्मण एव जगत्कर्तृत्वादित्याशयः । निमित्तवाचिनो योनिशब्दस्यादृष्टद्वारा निमित्ते जीवे ऽपि वृत्तिः संभवति अतो भूतयोनिर्ब्रह्मैवेति निर्णयहेतुर्नास्तीत्यविनिगमेन पूर्वपक्षसंभव उपपादितः । अक्षरात् परतः पर इति श्रुतब्रह्मगतपरत्वावधित्वलिङ्गेन भूतयोन्यक्षरं ब्रह्म न भवति किं तु जीव एवेति निर्णयेनापि पूर्वपक्षः संभवतीति द्रष्टव्यम् । उपादानत्वप्रत्यभिज्ञालिङ्गावगमितैकवाक्यभावमन्तःप्रतिपन्नः सर्वज्ञ एव भूतयोनिरिति वाक्यार्थानुसारेणाक्षरं सर्वविदित्यर्थे सर्वविस्त्वान्वयो विधेयत्वेन विवक्षित इति दर्शयितुं भवेदित्यस्यैव भिन्नक्रमेण योजनां दर्शयति **विश्वयोनिरिति** । एवं च नाचेतनमिति शेषस्य सर्वविस्त्वलिङ्गविरोधान्नाचेतनं प्रधानं विश्वयोन्यक्षरं
१४३। १० किं तु परमात्मैवेत्यर्थ इत्याशयः । **न चाक्षरशब्देति†** । अक्षरात्परत इत्यत्र प्रत्यभिज्ञानं श्रुतिप्रत्यभिज्ञानत्वात् तथा ऽक्षरात्संभवतीह विश्वं तथा ऽक्षराद्विविधाः सोम्य भावा इत्यतः प्रत्ययकृतस्यापि विशेषस्याभावेन तदेकरूप्यप्रत्यभिज्ञानत्वाच्च सर्वोपादानत्वलिङ्गप्रत्यभिज्ञानाद् बलवदित्याशयः । **प्रथमश्रुते यः सर्वज्ञ इति वाक्ये इति** । लिङ्गप्रत्यभिज्ञानमेव प्राथमि-

---

* अत्र पञ्चमम् अन्तर्याम्यधिकरणं समाप्तम् । † अब्बेनेति २ पु॰ ।

कत्वात्पुँल्लिङ्गनिर्द्दिष्टभूतयोनिपरामर्शियच्छब्दरूपसर्वनामश्रुत्योपसंहारिकाक्षर-
श्रुतिप्रत्यभिज्ञानुगृहीतत्वात्तस्मादित्युपादानपञ्चमीश्रुतिप्रत्यभिज्ञानुगृहीतत्वाच्च
ततो बलवदित्याशयः । एतेन प्राथम्यादरणे ऊर्णनाभ्याद्यचेतनपरिणामिदृ-
ष्टान्तीकरणं प्रधानलिङ्गमुपादानत्वलिङ्गप्रत्यभिज्ञापेक्षया ऽपि बलवत्स्यात्तस्य
ततो ऽपि प्राथमिकत्वादिति शङ्का निरस्ता । **द्वितीयार्द्धमिति** । द्वितो-
यार्द्धं अनादिवासनोद्भूतइत्यंशमित्यर्थः । ननु नात्र प्रधानं नामेत्यादिभा-
ष्येण सांख्यैरनुमानकल्प्यत्वेनोक्तं स्वतन्त्रं प्रधानं नाभ्युपगम्यतइत्युक्तं तत्र को
हेतुरित्याकाङ्क्षायामाह **प्रधानस्यागमिकत्वेनेति** । कल्पनाया दृष्टानुसा-
रित्वात् प्रकृतिविकारसारूप्यकृत्स्नप्रसक्त्यादिदोषो दुष्परिहरः स्यादित्यर्थः ।

मूर्धादिबहुश्रुतीना*मिति । ननु मूर्धादिश्रुतिविरोधो हिर- १४४ । १०
ण्यगर्भपक्षे ऽपि तुल्यः । न हि तं प्रत्यपि द्युप्रभृतयः संस्थानविशेषाभि-
व्यङ्ग्यमूर्धत्वादिजातियुक्ता भवितुमर्हन्ति । सर्वात्मत्वविवक्षायां तथात्व-
कल्पनं तु परमात्मानं प्रत्यपि समानं प्रत्युत परमात्मनो मुख्यं सार्वात्म्यं
हिरण्यगर्भस्य तु सर्वप्राणाधिष्ठानत्वादधिष्ठात्रधिष्ठेययोरभेदोपचारात् प्राणा-
त्मना सर्वभूतानुगतत्वरूपं सार्वात्म्यं कथं चिदमुख्यं कल्पनीयम् । अतो
मुख्यसार्वात्म्यावलम्बनं मूर्द्धादिकल्पनं परमात्मन्येव समञ्जसं न ततो
ऽन्यत्र । अत एवाग्रिमाधिकरणे देवतापक्षनिराकरणार्थं भाष्यं देवतायाः†
सत्यप्यैश्वर्ये न द्युमूर्द्धत्वादिकल्पनं संभवति अकारणत्वादिति । न च कल्प-
नमपि श्रुताऽपाणिपादत्वादिविरुद्धस्य रूपवत्त्वस्य न युज्यतइति वाच्यम् ।
शाण्डिल्यविद्यायामुपासनार्थं श्रुतज्यायस्त्वविरुद्धाणीयस्त्वकल्पनादर्शनात् ।
न च तथा कल्पनमप्युपासनार्थं सगुणे एव युज्यते न निर्गुणे इति वाच्यम् ।
निर्गुणे ऽपि सार्वात्म्यप्रतिपत्त्यर्थं तत्कल्पनोपपत्तेः । तस्मिन्नपि प्रतिपत्त्युपा-
यतया प्रियशिरस्त्वरथरथिभावादिकल्पनादर्शनात् । सगुणे संभवतस्तस्य
निर्गुणप्रकरणे ऽपि स्तुत्यर्थं तदुपन्यासोपपत्तेश्च । निर्विशेषब्रह्मप्राप्तिफलभू-
मविद्याप्रकरणे स एकधा भवतीत्यादिना सविशेषणसगुणविद्याफलेन
स्तुतिदर्शनादिति चेत् । सत्यम् । अन्ये पुनरित्यादिभाष्येण येषां मतमु-
पन्यस्तं तेषामित्थमाशय इत्याचार्यैस्तदाशयः परं वर्णितः । स्वाभिमतं तु

---

* बहुलश्रुतीनामिति ५-३ पु· पा· ।   † देवतायामिति २ पु· पा· ।

द्युमूर्द्धत्वादिकल्पनमेव । अत एवाचार्यैर्हृदयं विश्वमित्यत्र हृदयं मन इति व्याख्याय विश्वस्य मनस्त्वकल्पनायां हेतुः संबन्धो दर्शितस्तन्मनसा स्रष्टृत्वादिति । न चाग्निर्मूर्द्धेति मन्त्रस्य परमात्मपरतायां यस्याग्निरास्यमित्यादिस्मृतीनामेतन्मूलत्वसंभवेन स्मर्यमाणमनुमानं स्या*दित्यग्निमाधिकरणसूत्रविरोधः शङ्कनीयः । अस्य हिरण्यगर्भपरतायामपि तासां पुरुषसूक्तमूलत्वशङ्कानपायेन तस्य ह वा एतस्येत्यादिवैश्वानरविद्यागतवाक्यमूलत्वाऽसिद्ध्या तद्विरोधतादवस्थ्यात् । न च पुरुषसूक्ते द्युप्रभृतीनां शीर्षादिभ्यो जननश्रवणं स्मृतिषु तत्तादात्म्यस्मरणमिति न तासां पुरुषसूक्तमूलत्वशङ्कावकाश इति वाच्यम् । अग्निर्मूर्द्धेति मन्त्रे ऽपि पद्भ्यां पृथ्वीति श्रवणात्† तत्र चेतस्माज्जायते प्राण इति पूर्वमन्त्रगतस्य जायतइत्यस्य तस्मादग्निः समिधो यस्य सूर्य इत्युत्तरमन्त्रे ऽप्यनुवर्तिष्यमाणस्यानुवृत्त्यौचित्येन पद्भ्यां पृथ्वी जायत इत्यर्थलाभात् । यद्युच्येत अग्निर्मूर्द्धेत्यादिसामानाधिकरण्यं पद्भ्यां पृथ्वीति वैयधिकरण्यं चेत्युभयमुभयत्राप्युपलक्षणम् । तथा च द्युप्रभृतिकं सर्वंमूर्द्धाद्यवयवतादात्म्येन मूर्द्धाद्यवयवजातत्वेन चोपासनीयमिति, तादात्म्योपासनांशमपेक्ष्य स्मृतिमूलत्वं प्राप्नुयादिति तथोपलक्षणत्वकल्पनं पुरुषसूक्ते ऽपि तुल्यम् । तत्रापि ब्राह्मणो ऽस्य मुखमासीदित्यादिसामानाधिकरण्यश्रवणात् । तस्मात्पुरुषसूक्तस्य स्मृतिमूलत्वसंभवे ऽपि विनिगमनाविरहाद् वैश्वानरवाक्यमपि तन्मूलं भवेदित्याशयमेव स्मर्यमाण‡सूत्रमुपपादनीयम् । तथोपपादनमग्निर्मूर्द्धेति मन्त्रस्य तन्मूलत्वेऽपि तुल्यम् । किं चास्यापि मन्त्रस्य स्मृतिमूलत्वमवश्यं वाच्यम् । चन्द्रसूर्यौ च नेत्रे इति स्मृत्यंशार्थस्य पुरुषसूक्तवैश्वानरविद्याभ्यामलाभात् ।तस्मादयं मन्त्रः परमात्मपर इत्येव भाष्यकारमतम् । स्वमतमुपन्यस्यतीति भाष्यकारमतत्वेन टीकायामवतारणं तु ज्ञेये परब्रह्मणि रूपोपन्यासाङ्गीकारे रूपवत्त्वं पारमार्थिकं स्यादिति बिभ्यतां परितुष्ट्यर्थम् । वस्तुतस्तु

सुतलं चरणद्वन्द्वं पृथ्वी जघनमण्डली ।
यत्कीर्तेर्मध्यमाकाशं सुमनोवासभूः शिरः ॥

---

* व्या० सू० अ० १ पा० २ सू० २५ ।
‡ व्या० सू० अ० १ पा० २ सू० २५ ।
† पृथ्व्यादिश्रवणादिति २ पु० पा० ।

इति श्लोके कीर्तेस्सर्वगतत्वप्रतिपत्त्यर्थं पातालचरणत्वादीनामिव ब्रह्मणः सर्वात्मत्वप्रतिपत्त्यर्थं द्युमूर्द्धत्वादीनां कल्पनेत्येवं टीकाकाराणामप्यभिमतमित्यनुसंधेयम् ।

आयादित्यत्र लङो लिङर्थत्वकल्पनायां प्रमाणमाह **गच्छेदिति** १४४ । २०
वाक्यशेषादिति । अध्याहार इति । किंशब्दाध्याहार इत्यर्थः । कृतेन कर्मणा अकृतो लोको नास्तीति योजनायां लोकत्वावच्छिन्नः सर्वो ऽपि कृतक इति परीक्षास्वरूपालाभाच्च नास्त्यकृत इति भिन्नवाक्यं कृत्वा वाक्यद्वयस्यापेक्षितलोकार्थकिंशब्दाध्याहारेण पूरणं कृतम् । **अतो ऽकृतज्ञानार्थमिति ।** अकृतं ब्रह्म । **यस्येत्यर्थे इति ।** अस्यशब्दस्य हिरण्यगर्भपक्षे प्रकृतपरामर्शित्वाभावाद् एष सर्वभूतान्तरात्मेति प्रकरिष्यमाणपरामर्शसामञ्जस्यार्थं यस्येत्यर्थे वृत्तिरुक्ता । **कस्मै ।** एकस्मादित्यर्थः । एको देवो ऽत्र ब्रह्मैवेत्यर्थेतो ब्रह्मण इति व्याख्यातम्* ।

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥ १४५ । १

जाठरो ऽन्यो वेति । अन्यशब्देन भूतदेवतापक्षौ संगृहीतौ । नन्वादित्यो वैश्वानर इत्यपि पूर्वपक्षः संभवति । प्रश्नोपनिषदि स एष वैश्वानरो विश्वरूपः प्राणो ऽग्निरुदयत इत्यादित्ये ऽप्यग्निवैश्वानरश्रुतिदर्शनात् । तदनन्तरं तदेतदृचा ऽभ्युक्तमित्युपक्रम्य सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येष सूर्य† इति सौरमन्त्रस्य वैश्वानरविषयत्वेनोदाहरणात् । तत्र स एष इति सर्वनाम्नोरादित्यो ह प्राण इति प्रकृतादित्यपरत्वाच्चेति चेद् उच्यते । यत्र परमात्मनो ऽन्यस्मिन्नग्निवैश्वानरशब्दौ पूर्वपक्षिणः सिद्धान्तिनश्च संप्रतिपन्नौ स पूर्वपक्षीकर्तव्यः । न च तत्रादित्ये सिद्धान्तिनस्तौ संप्रतिपन्नौ वैश्वानरविद्यायामिव तत्राप्यग्रिमसंदर्भानुसारेण तयोः परमात्मपरत्वात् । अथोत्तरेण तपसा श्रद्धया विद्यया ऽऽत्मानमन्विष्यादित्यमभिजायते एतद्वै प्राणानामायतनमेतदमृतमभयमेतत्परायणमेतस्मान्न पुनरावर्तन्त‡ इति अग्रे श्रवणात् । अनेन संदर्भेण सर्वप्राणसमष्टिभूतत्रैलोक्यशरीरहिरण्यगर्भरूपापन्नादित्यान्तर्यामिणं परमात्मानमुपासीनस्य त-

---

* अत्र षष्ठम् अदृश्यत्वाद्यधिकरणं संपूर्णम् । † उदयत्येव सूर्य इति २ पु॰ पा॰ ।
‡ आवर्तन्ते इति २ पु॰ पा॰ ।

त्प्राप्तिरपुनरावृत्तिफलोच्यतइत्येतदन्तर उपपत्ते*रित्यधिकरणावसानकृतेना-चार्यव्याख्यानेन स्पष्टम् । अतो यद्यपि वैश्वानरविद्यायामिव तथाप्यग्निवै-श्वानरशब्दावन्यपराविति पूर्वपक्षी मन्येत तथापि सिद्धान्तिनो न तत्संप्र-तिपत्तिरस्तीति तथा पूर्वपक्षो भाष्यटीकयोर्न कृतः । यदि तु वैश्वानरं केतुमन्हामकृण्वन् यो भानुना पृथिवीं द्यामुतेमामित्यादिमन्त्रानुसारेण अग्नि-रेवादित्य इति† अग्निवाचकावेव सन्तावग्निवैश्वानरशब्दावादित्ये ऽपि प्रवृत्ताविति पूर्वपक्षी मन्येत तदा ऽग्निपूर्वपक्षेणैवादित्यपूर्वपक्षो ऽपि लब्ध इति तस्य पृथगप्रदर्शनम् । तस्यापि पृथक्प्रदर्शनीयत्वे भाष्यटीकयोर्जाठरादि-पक्षप्रदर्शनं तस्याप्युपलक्षणार्थम् । अत एवाचार्यैरन्यो वेति सामान्येन पक्षा-न्तराणां निर्देशः कृतः ।

देहमध्यमिति । सम्यगुपचितो देह इति व्युत्पत्त्या संदेहशब्दो नाभिकण्ठमध्यवाची । **वैश्वानरोऽहमिति मन्यतइतीति ।** अहंग्रहोपास-कत्वात् को न आत्मेत्युपक्रमाच्चेति भावः । **हृदयाद्धीति ।** सुषुप्ते हृदये निलीनं मनः प्रबोधे ततो निष्क्रामत् प्रणीतमिव भवतीत्यर्थः ।

१४६ । ५ **यथा हीति ।** यद्यप्यपूपविशेषरूपव्यवस्थितैकार्थवाचिपुरोडाशशब्दो निश्चितार्थ एव न त्वनेकार्थसाधारण्येन वैश्वानरशब्दवदनिश्चितार्थः । न चैकार्थत्वे ऽप्याकाङ्क्षितविशेषाऽनिश्चयो ऽस्तीति वाच्यम् । पुरोडाशं पर्यग्नि करोतीति वचनेन पर्यग्निकरणस्येवानेन चतुर्द्धाकरणस्यापि सर्वपुरोडाश-विषयत्वोपपत्त्या स्वतो विशेषाकाङ्क्षाविरहादिति चेत्सत्यम् । एकया ऽनेकया वा शक्त्या साधारणस्य शब्दस्य व्यवस्थितैकार्थसमर्पकशाखान्तरवाक्यानु-सारेण विशेषपर्यवसानमात्रे दृष्टान्तो ऽयं निश्चितार्थेनेत्येतदप्याग्नेयरूप-व्यवस्थितैकार्थनिश्चयाभिप्रायम् । नन्वाग्नेयशब्दो यथा निश्चितविशेषार्थः एवं पुरोडाशशब्दो ऽपि निश्चितसामान्यार्थ इत्येतदनुसारेण विशेषशब्द एवैन्द्रा-ग्नाग्नीषोमीयपुरोडाशसाधारणः किं न स्यात् । अविशिष्टो हि तयोरप्यग्नि-संबन्धः । अग्नेर्ढगिति प्रतिपदविहितस्य देवतातद्धितस्य बलीयस्त्वे ऽपि पुरोडाशशब्दस्य सङ्कोचरूपैकदेशबाधन¶परिहाराय सर्वत्राग्निकलिभ्यां ढगिति स्मृतसंबन्धसामान्यतद्धिताश्रयणोपपत्तेः । यद्यपि चतुरवत्ती यजमानः पञ्चा-

* व्यास सू॰ अ॰ १ पा॰ २ सू॰ १४ । † अग्निरेवादित्य इति नास्ति २ पु॰ ।
¶ बाधकेति २ पु॰ पा॰ ।

वत्तैव वपा कार्येत्यत्र हि पाशुकहविर्विशेषवाचिनो वपाशब्दस्यैकादश पशो-रवदानानि तानि द्विरवद्यतीति पाशुकहविर्मात्रपञ्चावदानगमकप्रकृतिप्राप्त-ञ्चावदानपुनर्विध्यनुसारेण पाशुकहविःसामान्ये लक्षणा समाश्रिता इह तु पुरोडाशसामान्यचतुर्द्धाकरणप्रतिपादकप्रत्यक्षवचनानुसारेण संबन्धसामान्य-वाचित्वसमाश्रयणं कथं न स्यात् । यत्र ह्युपादानाय विशेषाकाङ्क्षा तत्रैव सामान्यशब्दस्यान्यत्र श्रुतविशेषे पर्यवसानं यथा पशुशब्दस्य च्छागे । एव-मेव मीमांसकप्रवादो ऽपि ।

सामान्यविधिरस्पष्टः संह्रियेत विशेषतः ।
स्पष्टस्य तु विधेर्नैवमुपसंहार इष्यते ॥ इति ।

अस्पष्टत्वमनुष्ठानाय विशेषाकाङ्क्षं तदनाकाङ्क्षायामपि विशेषपर्यव-साने न ब्राह्मणं हन्यादिति निषेधस्यापि नात्रेयं हन्यादिति श्रुतविशेषनिषेधे पर्यवसानं स्यादिति चेत् । उच्यते । तं बर्हिषदं कृत्वा पुरोडाशं चतुर्द्धा करोतीति शतपथवाक्यं न चतुर्द्धाकरणविधिपरं किं तु शाखान्तरश्रुता-ग्नेयवाक्यप्राप्तं तदनूद्य तं बर्हिषदं कृत्वेत्येतद्विधिपरं तदपि वा शाखा-न्तरप्राप्तमनूद्योभयोरपि क्रमविधिपरम् । अतो यथाप्राप्त्यनुवाद इति पुरोडाश-शब्द आग्नेयपर इति भवतीदं वाक्यान्तरश्रुतविशेषपर्यवसानोदाहरणम् ।

स एषो ऽग्निरिति वाक्यस्येति । प्रथमाम्नातस्य स एषोऽग्नि- १४६ । १९
रिति वाक्यार्थत्वेना*प्युद्देश्यकपुरुषत्ववेदनमनन्तराम्नाते स यो हैतमिति वाक्ये ऽनूद्यतइत्यर्थः । **विश्वेषां वा अयं नर इति ।** योगाद्रूढेः प्रा-बल्ये ऽपि विश्वस्य वसुराटोरित्यनुवृत्तौ नरे संज्ञायामिति सूत्रेण विश्व-शब्दस्य नरे उत्तरपदे संज्ञायामेव दीर्घविधाने ऽपि ब्रह्मैकस्वारस्यवन्नैरुक्त†-निर्वचनसार्थकत्वाय योगं समाश्रित्यान्येषामपीति केशाकेशीत्यादाविव दीर्घ-त्वमुपपादनीयमिति भावः । **शब्दोपास्त्येति ।** भ्रुवो घ्राणस्य च यः संधिरि-त्यत्र भ्रूघ्राणशब्दौ नामनिर्वचनमुखेन दर्शितयोर्वरणानास्योरिदंतया विव-रणार्थमिति संख्याविशेषाऽविवक्षया विवरणीयप्रातिपदिकार्थमात्रविवक्षाया-मौत्सर्गिकमेकवचनं युज्यते । संख्याविशेषाऽविवक्षायामेकवचनमुत्सर्ग इति शाब्दिकन्यायात् । अतो ऽत्र द्वयोरेकवचनमुपपद्यते स्त्रीलिङ्गेनाऽप्रकृते

* वाक्यस्यार्थत्वेनेति २ पु॰ पा॰ । † स्वारस्यान्नैरुक्तेति २ पु॰ पा॰ ।

तूपासनाविज्ञानेन स्त्रीलिङ्गमुपपादयितुं शक्यम् । न चोपासनाविज्ञानएकस्मिन्नेव वरणाया नास्याश्च मध्यइति चकारार्थः समुच्चयो मध्यशब्दार्थश्चोपपादयितुं शक्य इति भावः ।

१४८ । ३ देवाः सूर्यादय* इति । चक्षुर्विश्वरूप इत्यादिनोक्ता वैश्वानरावयवभूताः सूर्यादयो यदा प्रादेशमात्रमिव प्राप्ता भवन्त्युपासनया तथोपासिता भवन्तीति यावत्तदा सुष्ठु सम्यगुपासनीयेन प्रकारेण विदिता भवन्तीत्यर्थः । अत्र द्युमूर्द्धत्वादीनां द्युलोकादिव्यापिनि ब्रह्मणीव जाठरे कल्पनामात्रस्याप्यालम्बनाभावेन तेषां जाठरव्यावृत्तब्रह्मलिङ्गत्वे ऽपि प्रादेशमात्रत्वश्रवणेन तेषामुपासकमूर्द्धादिषु कल्पनीयत्वप्रतीतेः । तथा कल्पनायाश्च स्वोष्मणा देहव्यापिनि जाठरे ऽपि सम्भवाद् वेदिर्बर्हिर्गार्हपत्यादिकल्पनाप्रतिरुद्धत्वाच्चास्पष्टता । को न आत्मा किं ब्रह्मेति विमृशतां प्राचीनशालादीनामग्रे द्युप्रभृतिषु वैश्वानरात्मदृष्टिर्वर्ण्यतेति तदनुसारेण तदीयवचनगतयोरात्मब्रह्मश्रुत्योरात्मब्रह्मदृष्टिविषयत्वाकारेणान्यत्र गौणत्वं वाच्यमित्युक्तशङ्काभिभूतत्वात्तथाभूतशङ्कास्पदाग्निवैश्वानरश्रुतिप्रतिरुद्धत्वाच्चास्पष्टता । तस्य च छान्दोग्यगतात्मब्रह्मोपक्रमस्य वाजसनेयकगतवैश्वानरोपक्रमप्रतिरुद्धत्वादस्पष्टता । पुरुषश्रुतेर्मूर्द्धादिपादान्तावयवत्वात्मकसादृश्यरूपपुरुषविधाम्नानात्पुरुषस्य सतः पुरुषविधत्वासम्भवेन गौणत्वशङ्काभिभूतत्वादस्पष्टता । सार्वत्रिकान्नलाभफलस्याग्निरहस्योक्तपूर्णायुःप्राप्तिफलस्य चावेष्ट्यायुष्कामेष्ट्यादिफलवदन्यतो ऽपि संभवाशङ्कास्पदत्वात् सर्वपाप्मप्रदाहफलस्य प्राणाग्निहोत्रमात्रफलत्वशङ्कास्पदत्वाच्चास्पष्टतेति पादसङ्गतिः । एवमेषामस्पष्टानां ब्रह्मलिङ्गादीनामुन्मेषणमित्यर्थम् एष वा प्रतिष्ठा वैश्वानर इत्यादिवाक्येन केवलमुपासकमूर्द्धादिषु वैश्वानरमूर्द्धादिकल्पनं क्रियते नापि केवलं द्युलोकादिदृष्टिर्विधीयते किं तु ये वैश्वानरस्य मूर्द्धाद्यवयवरूपा प्रतिष्ठादिशब्दोक्तगुणविशेषविशिष्टा द्युलोकादयस्तद्दृष्टिर्विधीयते । ततश्चाध्यात्मिकस्य द्युमूर्द्धत्वादेर्जाठरे संभवे ऽप्याधिदैविकस्य तस्य न तत्र संभवोस्ति भूतदेवतयोः कथं चिद् द्युलोदिव्याप्तिसंभवे ऽपि न तन्मूर्द्धत्वादिकल्पनं समञ्जसं नियन्तारं प्रति नियम्यस्यैव मूर्द्धत्वादिकल्पनौचित्यात् । भूतस्य तन्नियन्तृ-

* सूर्यादये इति कल्पतरुपुस्तके प्रमादान्मुद्रितं तदेवं शोध्यम् ।

त्वोऽसंभवाद् देवताया अपि तन्नियन्तृत्वस्य क्लृप्तस्याभावात् सर्वनियन्तृत्वेन
क्लृप्तमीश्वरं प्रत्येव मूर्द्धत्वादिव्यपदेशसंभवे अग्निदेवतायामपूर्वस्य द्युलोका-
दिनियन्तृत्वस्य कल्पनाऽयोगात् । को न आत्मा किं ब्रह्मेति विमर्शो ऽस्मा-
भिरन्योन्यविरोधेनात्मब्रह्मबुद्ध्योपास्यमानेषु द्युप्रभृतिषु वस्तुतः किं तथाभूतं
ब्रह्म किमेतेषामन्यतममन्यद्वेति* वस्तुतत्त्वविषयो न तु तेषु किं तथा-
भूतब्रह्मदृष्टिमारोप्योपास्यमित्यारोपितरूपविशिष्टविषयः । अन्नं ब्रह्म मनो
ब्रह्मेत्यादिवदनेकत्र प्रतीके ब्रह्मदृष्ट्यारोपसंभवाद्विरोधाभावेनास्मदुपास्यानां
द्युप्रभृतीनां मध्ये किं तथाभूतब्रह्मदृष्ट्योपास्यमिति निर्द्धारणाऽनपेक्षणात् ।
अत एव दिवमेव भगवो राजन्नित्यादिवाक्यैः स्वस्वभ्रम एवोद्घाटितः ।
सम्भवति ह्यद्यापि शक्रसूर्यादिषु केषां चिद् ब्रह्मत्वभ्रमवद् द्युप्रभृतिषु तेषां
तद्भ्रमः । अतस्तत्र नात्मब्रह्मश्रुती गौण्यौ† तदुपक्रमस्य च न‡ वैश्वान-
रोपक्रमेण प्रतिरोधः । इदन्तया निर्णेतुमशक्यस्याद्यापि बहुधा संदिह्यमा-
नस्य ब्रह्मण इव जठरादिरूपस्याग्नेर्द्युसूर्यवायुगगनजलपृथिवीषु तादात्म्यभ्र-
माऽसंभवेन पृथिव्यादितादात्म्यभ्रमविषयपरस्य प्राचीनशालादिवाक्यगतवैश्वा-
नरशब्दस्यैव तद्वाक्यगतात्मब्रह्मशब्दानुवर्तिताया वाच्यत्वात् । पुरुषश-
ब्दस्य पुरुषविधशब्दोक्तशरीरवत्त्वसादृश्यपरतया गौणत्वे तेन पौनरुक्त्यापत्तेः ।
चेतनवाचित्वेन तस्यापि जाठरव्यावृत्तश्रुतित्वमुपपद्यते । सर्वलोकाद्याश्रयं
फलं केवलान्नाद्यफलविलक्षणमिति सर्वेषु लोकेषु कामचारो भवतीति निर्दि-
ष्टदहरविद्याफलवत्तदपि ब्रह्मविद्यासाध्यं ब्रह्मलिङ्गमेव । तथा सर्वपापप्रदाहो
ऽपि ब्रह्मलिङ्गप्रश्नोत्तराभ्यां प्राधान्येन प्रतिपिपादयिषिततयोपक्रान्तस्योपास-
नस्य फलाकाङ्क्षया रात्रिसत्रन्यायेना§र्थवादिकफलविपरिणामे कर्त्तव्ये प्रधानार्थ-
वादइवाङ्गार्थवादे श्रुतस्यापि फलस्य ग्रहणौचित्यात् । इहोपासनाराध्यस्य
वैश्वानरस्यैव प्राणाग्निहोत्रेण||राध्यत्वाच्च । तस्य ह वा एतस्यात्मनो वैश्वान-
रस्येति षष्ठ्या हृदयं गार्हपत्य इत्यादिवाक्येष्वप्यन्वयान्न वैश्वानरमग्निमभि-
प्रेत्य हृदयादीनां तदायतनत्वं विवक्षितं किं तु तं वक्ष्यमाणाग्निहोत्रहोमोद्दे-
श्यमभिप्रेत्य तेषां होमाधिकरणाग्नित्वकल्पनमेव विवक्षितम् । गार्हपत्यादिश-

* अन्यतमान्यद्वेति २ पु॰ । † श्रुतिर्गौणीति २ पु॰ पा॰ । ‡ नेति नास्ति २ पु॰ ।
§ जै॰ सू॰ अ॰ ४ पा॰ ३ सू॰ १७–१९ । || अग्निहोत्रेणापीति २ पु॰ पा॰ ।

ब्दानामग्निष्वेव मुख्यार्थलाभेन स्वारस्याद् हृदयाद्धि मनः प्रणीतमिवेति प्राचीनाचार्यवाक्येनाचार्याणामप्यग्न्यर्थत्वाभिप्रायोन्नयनाच्च । एवंविद् यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि ह वा ऽस्य तद्वैश्वानरे हुतं स्यादिति सप्तमी तु सममब्राह्मणे दानमितिवत् चतुर्थ्यर्था चण्डालायेति चतुर्थ्योपक्रमात् । य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवतीति सप्तमीनां स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात्प्राणाय स्वाहेति प्राणस्तृप्यति प्राणे तृप्यति चक्षुस्तृप्यतीत्यादिप्राचीनखण्डेषु प्राणाद्याहुतिभिस्तृप्तिभाक्त्वेनोक्तलोकभूतात्मविषयतया चतुर्थ्यर्थस्य क्लृप्तत्वाच्च । न च प्राणाय स्वाहेत्यादिमन्त्रवर्णविरोधाद्वैश्वानरस्य देवतात्वाऽसंभवः । प्रश्नोपनिषद्वाक्यानुसारेण सर्वप्राणसमष्ट्यात्मकहिरण्यगर्भावच्छिन्नस्य त्रैलोक्यशरीरस्य वैश्वानरस्य परमात्मनो ऽत्र होमोद्देश्यतायां मन्त्रवर्णविरोधाभावाद् नैरुक्तनिर्वचनानुसारेणोदाहृतप्रश्नोपनिषद्वाक्ये दृष्टत्वेन चाग्निवैश्वानरशब्दयोरिहापि यौगिकत्वस्यैव न्यायतः प्राप्त्या तथा दृष्ट्युपदेशादिति रूढ्यपरित्यागेन निर्वाहस्य प्रौढिवादत्वाद्वैश्वानरएव त्रेताग्नित्वकल्पनप्राणाहुत्याधारत्वकीर्तनयोस्तत्पक्षावलम्बनेनोपन्यस्ततया तद्विरोधाभावाच्चेति* ॥

कल्पतरुकठिनवाक्यप्रकरविमर्दोत्थिते परिमले ऽस्मिन् ।
पूर्णो ऽजनि सविशेषप्रायः पादो मनोहरो† विदुषाम् ॥

इति श्रीवेदान्तकल्पतरुपरिमले प्रथमाध्यायस्य द्वितीयः पादः ॥

---

* अत्र सप्तमम् वैश्वानराधिकरणं संपूर्णम् । † मनोहरे इति २ पु॰ पा॰ ।

अथ प्रथमाध्यायस्य तृतीयः पादः ॥

—०:०:० ☼ ०:०:०—

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥ १४

निर्विशेषेति । पूर्वस्मिन् पादे मनोमयो ऽत्ता पाययिता ऽक्षिपुरुषो ऽन्तर्य्यामी वैश्वानर इत्येषां सविशेषत्वे ऽपि यथा ऽक्षरं निर्विशेषम् एवमस्मिन् पादे द्युभ्वाद्यायतनभूमाक्षरेक्षतिकर्मादीनां निर्विशेषत्वे ऽपि दहरः सविशेष इति प्रायिकत्वमत्रापि विशेषणं द्रष्टव्यम् । **अमृतत्वाभावे हेतुमाहेति ।** यद्यपि पूर्वपक्षिणा साधनीये ब्रह्मत्वाभावएव द्वितीयहेतुरपि योजयितुं युक्तः तथापि संग्रहश्लोके नामृतं न ब्रह्मेति* साध्यद्वयमभिप्रेत्य तत्र यथासंख्यं हेतुद्वयं योजितम् । इयाँस्तु विशेषः । टीकायां कल्पतरौ चामृतब्रह्माभेदोक्तिर्द्वितीयहेतोरमृत्वाभावसाधकत्वे तत्साधनस्य साक्षात्साधनीयब्रह्मत्वाभावसिद्धावुपयोगप्रदर्शनार्थो तस्य ब्रह्मत्वाभावसाधकत्वे ऽमृताद्भेदस्य कथं ब्रह्मत्वाभावसाधकत्वमित्याकाङ्क्षायां तस्य तत्साधकतोपपादनार्थेति । **न त्वितीति ।** ननु तथापि जलबन्धनहेतुस्तदर्थः स्यात् । न च घटोदरनिस्सरज्जलबन्धनहेतुमधूच्छिष्टादावतिप्रसङ्गः । पारावारमध्यवर्त्तित्वेनापि विशेषणात् । तथा सति तदेवालमिति वाच्यम् । नद्यामतिप्रसङ्गात् । अतो विशिष्टवाचकस्य तदेकदेशबन्धकत्वलक्षणया ब्रह्मणि वृत्तिः संभवतीति चेन्मैवम् । सेतुशब्दस्य आजानसिद्धाऽविनाभूतपारवत्त्वेन गौणत्वे संभवति कादाचित्केन बन्धनहेतुत्वेन तदयोगादिति भावः । **अमृतान्तरसंबन्धीति ।** क्षरं त्वविद्या ह्यमृतं तु विद्या विद्याविद्ये ईशते यस्तु सो ऽन्य इति मन्त्रे जीवे ऽपि अमृतशब्दप्रयोगादिति भावः । **अतो ऽन्यदार्त्तमिति श्रुतेरिति ।** निरुपाधिकामृतत्वं न ब्रह्मणो ,, ऽन्यत्रेति भावः ।

नन्वेवं सत्यमृतस्य सेतुरित्यनन्वितं स्याद् न ह्यमृतस्य पारवानित्यन्वयः संगच्छते । नैष दोषः । अमृतस्यैष इत्यन्वयाभ्युपगमात्ताव-

---

* श्लोके नामृतं ब्रह्मेति २ पु॰ पा॰ ।

न्मात्रेण च तस्येदमिति सूत्रे इव षष्ठ्यन्तपदवाच्यसंबन्धित्वनिर्वाहात् । सेतुशब्देन त्वमृतपदानन्वितेनैव पारवत्त्वं लक्ष्यते । पुरुषं यावदगच्छदित्यस्य पुरुषपर्यन्तं व्याप्नुवदिति देशपरिच्छेदार्थकत्वं* न युक्तमवध्यर्थकयावच्छब्दयोगे द्वितीयानुशासनाभावाद् नदीप्रवाहो वृक्षवाटपर्यन्तं न व्याप्नोतीत्युक्त्या वृक्षवाटस्येव तेन पुरुषस्यापि देशपरिच्छेदप्रतीतिप्रसङ्गाच्चेत्यभिप्रेत्य
१४९ । १३ तं ग्रन्थं साध्याहारं वस्तुपरिच्छेदार्थकतया व्याचष्टे **पुरुषं प्रति यावत्तादात्म्यं तावदगच्छदिति** । यावच्छब्द इह नावध्यर्थः किं तु परिमाणार्थः । तस्य परिमेयविशेषाकाङ्क्षया तादात्म्यशब्दस्तत्प्रतिनिर्देशाकाङ्क्षया तावच्छब्दश्च द्वितीयोपपत्त्यर्थं प्रतिशब्दश्चाध्याहार्यः । प्रतियोगे च बुभुक्षितं न प्रतिभाति किं चिदित्यत्रेव पुरुषस्येति षष्ठ्यर्थो लभ्यते तेन पुरुषस्य यावत्तादात्म्यं तावदप्राप्नुवदित्यर्थलाभाद् वस्तुपरिच्छेद उक्तो भवतीत्याशयः । यद्यप्युक्तार्थविवक्षायां पुरुषतादात्म्यमगच्छदित्येतावदुक्तव्यं तथापि सर्वस्य प्रपञ्चस्याधिष्ठानसदात्मना पुरुषतादात्म्यसत्त्वादसिद्धिः स्यादिति यावत्तावच्छब्दावुक्तौ । ततश्च चिदात्मना ऽऽनन्दात्मना च पुरुषतादात्म्याभावाद्वस्तुपरिच्छेदो लभ्यतइति तात्पर्यम् । यावत्पदस्य साकल्यार्थकत्वे तु कार्त्स्न्येन पुरुषमव्याप्नुवदित्यर्थलाभाद् विनैवाध्याहारं देशपरिच्छेदार्थकत्वमपि टीकायां वक्तुं शक्यम् । अस्मिन्नर्थे स्वकार्योपहितमर्यादतयेत्यस्य स्वकार्यमात्रव्याप्तिमत्तयेत्यर्थः । पूर्वस्मिन्नर्थे अस्य स्वकार्यमात्रतादात्म्यवत्तयेत्यर्थ इति विशेषः ।

ननु साक्षात् श्रुत्युक्तत्वमव्यक्तात् पुरुषः पर इत्यव्याकृतस्याप्यस्ति आयतनत्वेन श्रुत्युक्तत्वमपि तस्याकाशएव तदोतं च प्रोतं चेत्यस्तीत्याशङ्क्य
,, । १४ व्याचष्टे **साक्षादिति** । साक्षात्त्वमन्योपाधित्वाभावरूपं प्राधान्यमिह विवक्षितमिति भावः । ननु भावप्राधान्यविवक्षणं किमर्थम् । सेतुशब्दलक्षणीयधारकत्वनिर्वाहार्थमिति चेत् । न । तद्विवक्षणेन लभ्यममृतत्वमपि हि निरतिशयानन्दरूपो मोक्ष एव स च ब्रह्मणो न भिद्यते ब्रह्म चामृतशब्देनैवोक्तम् । तथा च भावप्राधान्यविवक्षणे ऽप्यवर्जनीये ब्रह्मणि पर्यवसाने व्यर्थो ऽयं

---

* परिच्छेदार्थकत्वमितिर पु० पा० ।

बकबन्धविधिप्रयास इत्याशङ्क्य निराकरोति यद्यपीति । ब्रह्मैवामृतमित्येतदनन्तरं तदेव चामृतत्वमिति शेषो ऽध्याहर्त्तव्यः । ज्ञायमानदशामभिप्रेत्य तममृतत्वशब्दार्थं कृत्वा धारयितृत्वं निर्वाह्यमित्यध्याहारेण वाक्यं पूरणीयम् । नन्वेवमपि भावप्राधान्यविवक्षणं व्यर्थं सेतुर्यथा परपारस्य प्रापक एवमयं द्युभ्वाद्यायनमात्मा ऽमृतस्य ब्रह्मणः प्रापक इति प्रापकत्वलक्षणया निर्वाहादिति चेदुच्यते । द्युभ्वाद्यायतनममृतस्य सेतुरित्युक्त्या राजा ऽयं धर्म्मस्य सेतुरित्युक्त्या राजधर्मयोरिव द्युभ्वाद्यायतनामृतयोर्भेदप्रतीतेरमृतशब्दोक्ताद् ब्रह्मणो ऽन्यद् द्युभ्वाद्यायतनं ग्राह्यमिति शङ्का स्याद् न चैतच्छङ्कावारणार्थममृतत्वशब्दविवक्षणीयमोक्षपर एवायममृतशब्दो ऽस्तु मोक्षे ऽपि तत्प्रयोगसत्त्वादिति वक्तुं शक्यम् । इह तदेतत्सत्यममृतमानन्दरूपममृतं यद्विभातीति पूर्वापरमन्त्रगतप्रयोगाभ्याममृतशब्दस्य ब्रह्मवाचित्वावश्यम्भावात् ।

षिञ्धात्वर्थयोगादित्यर्थ इति । धारणमपि बन्धनविशेष १४९ । २१
इत्यभिप्रेत्यैवमुक्तम् । यदि तु बन्धनं प्रवहतो जलस्यागतिनिरोधनं निरुद्धगतिके जले प्रभूते साधिते तद्धारणं बन्धनस्य फलं न तु बन्धनमेव धारणमित्याश्रीयते तदा तस्य शब्दार्थैकदेशत्वाभावे ऽपि सहजत्वाभावे ऽपि तदवलम्बनैव गौणी वृत्तिर्युक्ता न पारवत्त्वावलम्बना । अत्त्राधिकरणन्यायेना*न्तरङ्गसादृश्यग्रहणादपि समभिव्याहृतपदान्तरस्वारस्यानुरोधिसादृश्यग्रहणस्य प्रबलत्वात् । इह च पारवत्त्वलक्षणायामात्मश्रुत्यादीनाममृतशब्दस्य सेतुपर्य्यन्तान्विततायाश्च स्वारस्यहानेः स्पष्टत्वादिति समाधेयम् । **योगाद् बलिनीति** । अत एव प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातॄणामिति मन्त्रे बहुवचनानुरोधाद् उद्गातृशब्दस्य बहुषु ऋत्विक्षु वृत्तौ वक्तव्यायामुच्चैर्गायन्तीति योगं परित्यज्य प्रथमप्रतीतरूढ्यपरित्यागार्थं सुब्रह्मण्ये† ससुब्रह्मण्ये वोद्गातृगणे रूढिपूर्वकलक्षणा‡ ऽभ्युपगता । ननु साधनत्वलक्षणा न युक्ता । अमृतशब्दोक्तस्य ब्रह्मणो हेत्वभावाद् भावप्राधान्यविवक्षणे ऽपि तस्य ज्ञायमानदशापर्य्यवसायित्वाद् ज्ञायमानत्वस्य च चरमवृत्तिविषयत्वरूपतायां मोक्ष-

---

* व्या॰ सू॰ अ॰ १ पा॰ २ सू॰ ६ । मन्त्राधिकरणन्यायेनेति २ पु॰ पा॰ ।

† सुब्रह्मण्ये इति कुण्डलितं १ पु॰ ।   ‡ एतदग्रे सुब्रह्मण्येति बहिर्लिखितम् १ पु॰ ।

स्याऽस्थिरपुरुषार्थत्वापत्त्या प्रकाशमानत्वरूपतया वक्तव्यत्वात्स्वतःसिद्धस्य च ब्रह्मप्रकाशस्य हेत्वनपेक्षत्वादित्याशङ्कानिवारणार्थं स्वतःसिद्धप्रकाशावरणनिवृत्तिरमृतत्वशब्दार्थ इतितात्पर्यकत्वेनामृतशब्दश्च भावप्रधान इति
। २३ टीकां व्याचष्टे अमृतस्येति । ननु सैवावरणाविद्यानिवृत्तिर्द्वारयितृत्वलक्षणायामप्यमृतत्वशब्दार्थः किं न स्यात् । न चाविद्याया जीवत्वोपहितचैतन्याश्रयत्वात्तन्निवृत्तिरपि तदाश्रयैव न तु शुद्धब्रह्माश्रितेति शङ्क्यम् । अविद्यायां निवर्तमानायां जीवत्वोपाधेरपि सह निवृत्त्या पटनाशसमकालतद्रूपनाशस्य पटावस्थापन्नतन्त्वाद्याश्रितत्ववदविद्यानिवृत्तेर्जीवत्वाऽनुपहितशुद्धचैतन्याश्रितत्वोपपत्तेरिति चेत् । सत्यम् । तथापि निवृत्तिवदविद्यापि जीवत्वानुपहिततदाश्रिता ऽस्त्विति मन्दशङ्कावारणार्थमविद्यानिवृत्तिर्द्वारणपक्षो न स्पृष्टः । गुणकर्मत्वाभावादिति । अपो ऽश्नाति त*न्नैवाशितं तन्नैवाऽनशितमित्यत्र द्वितीयासंयोगे ऽपि गुणकर्मत्वाभावादशनस्य सर्वनाम्ना परामर्शः प्राधान्याद् दृश्यतइति भावः ।

। ११ तप्तइति । यथा तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षेत्यत्र पयसः सप्तमीनिर्देशाद् बर्हिषि हवींष्यासादयतीत्यत्र बर्हिष इव क्रियोपसर्जनत्वप्रतीतावपि क्रियाया हविर्वाच्याऽऽमिक्षापदसमानाधिकरणतत्पदपरामर्शनीयत्वाऽयोगादुपसर्जनस्यापि पयसस्तत्पदेन परामर्शः । तत्र च स्त्रीलिङ्गमामिक्षापदसामानाधिकरण्यप्रयुक्तम् । आमिक्षापदं च न संस्कारकदधिसंपर्कघनीभूतस्य पयसो वाचकं न तज्जन्यस्य द्रव्यान्तरस्य न दध्नो नापि संसृष्टयोर्दधिपयसोर्वाचकम् । अतो दध्यानयनं पयोरूपामिक्षाप्रयुक्तमित्यामिक्षापचारइव वाजिनापचारे न पुनस्तादर्थ्ये पयोन्तरे दध्यानयनं कार्यं वाजिनस्यानुनिष्पादितत्वाद् आमिक्षायाः पयस्त्वात्तस्यां पयस एव धर्मो न दध्नो नापि दधिपयसोरित्यङ्गीक्रियते एवमिहापि योग्यतया स्नानस्यैष इत्यनेन परामर्शो ऽङ्गीकार्य इति भावः । ननु क्रियाया अयोग्यत्वे ऽपि दध्नो ऽस्ति योग्यत्वं तच्च क्रियां प्रति कर्मतया प्रधानमिति दध्नस्तत्पदेन परामर्शः किं न स्यात् । यद्युच्येत नयतेर्द्विकर्मकत्वेन कर्मान्तरापेक्षायां पयः कर्मा-

* तदिति नास्ति २ पु० ।

न्तरं तत्र च सप्तमीनिर्देशः प्रधानकर्मत्वज्ञापनार्थः। अन्यथा दधिपयसोरु-भयोरपि द्वितीयायां पयसि दध्यानयनं कार्य्यं दधि वा पयआनयनमिति संदेहः स्यादतः प्रधानं पयः सर्वनाम्ना परामृश्यतइति। एवं तर्ह्यप्रधा-नस्य सर्वनाम्ना परामर्शे नेदमुदाहरणं स्यादित्याशङ्क्य शब्दत इति विशे-षितम्। अर्थतः प्रधानस्यापि शब्दतोऽप्रधानस्य सर्वनाम्ना परामर्शे इदमुदाहरणं कृतम्। एवं च ज्ञानस्य* विधेयत्वेनार्थगत्या प्राधान्येऽपि शब्दगत्या† ज्ञेयोपसर्जनत्वाद्राजपुरुषादावार्थप्राधान्यतः शाब्दप्राधान्यस्यैव बलवत्त्वदर्शनात् शब्दतोऽप्रधानसर्वनामपरामर्शनीयतेति शङ्कायां गुणकर्म-त्वाभावादपोऽश्नातीतिवत्तं जानथेत्यत्राऽनीप्सितकर्मणि द्वितीयेति शब्दतोऽपि प्राधान्ये समर्थयितुं शक्येऽपि शब्दतोऽप्राधान्यमभ्युपेत्य न चेदमै-कान्तिकमित्यादिटीकाग्रन्थः प्रवृत्त इति दर्शितं भवति। एवमिह ज्ञेयस्य शाब्दप्राधान्योक्तिरभ्युपेत्यवाद इत्येतत्सत्यपि ज्ञेयप्राधान्यनिर्देशइति प्राची-नग्रन्थगतापिशब्देन ध्वनितम्। एतेन स एषोऽन्तश्चरते बहुधा जायमानः दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठित इत्याद्यनन्तरमन्त्राम्नातैतच्छ-ब्दानामात्मपरत्वदर्शनादस्यापि तत्परत्वं युक्तमिति शङ्कापि निरस्ता। तेषां ज्ञानपरत्वाऽसंभवेन तद्विषयात्मपरत्वकल्पनेऽप्यस्य तस्मिन्नेव मन्त्रे विधेयत्वेन प्रधाने समभिव्याहृतसेतुपदपर्यन्तस्वारसिकान्वययोग्ये ज्ञाने वृत्तिसंभवे तदुल्लङ्घनेन तद्विषयपरत्वकल्पनाऽयोगात्।

ननु भिद्यते हृदयग्रन्थिरिति मन्त्रस्य टीकाकृतं व्याख्यानमयुक्तम्। तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभातीति पूर्वमन्त्रे णानन्दरूपब्रह्मदर्शने वर्णिते तद्दर्शनेन हृदयग्रन्थिभेदादिरूपाऽनर्थनिवृत्तिरपि भवतीति वर्णयितुं तदनन्तरस्य मन्त्रस्य प्रवृत्तिरिति प्रतीतेस्तदनुसारेण तस्मिन् ब्रह्मणि दृष्टे सति हृदयग्रन्थिः स्वयमेव भिद्यतइत्याद्यर्थवर्णनौ-चित्यादित्याशङ्क्याह **भाष्ये सूत्रोपात्तेति।** भाष्ये सोत्रयोर्मुक्तोपसृप्य- १५०। १
पदयोर्विवरणार्थमित्युक्त्वा ब्रवीतीति क्त्वाप्रत्ययेनास्य मन्त्रस्य तथा विद्वा-निति मन्त्रेण संबन्धस्योक्ततया तं संबन्धं हृदयग्रन्थिभेदनादिरूपमहाप्रय-

* एवं ज्ञानस्येति २ पु॰ पा॰।   † शाब्दगत्येति २ पु॰ पा॰।

त्वसाध्यं तद्विज्ञानेन परिपश्यन्तीति पूर्वमन्त्रप्रस्तुतं ब्रह्मदर्शनं तत्फलमविद्यानिवृत्तिपूर्वकब्रह्मप्राप्तिरित्येवंरूपं दर्शयितुं तस्मिन् दृष्टइति व्यधिकरणसप्तम्यौ दृष्टइति निमित्तसप्तमी भिद्यन्तइत्यादयः कर्मणि लकारा इति टीकाकृतं व्याख्यानं युक्तमेवेत्याशयः । **कर्मसंयोगइति** । निमित्तात्कर्मणः संयोगे सप्तमी वक्तव्येति वार्त्तिकान्निमित्तार्था सप्तमी । **दर्शनार्थश्चेति** । एवं च हृदयग्रन्थिभेदनादिकं फलमेवात्र निमित्ततया विवक्षितम् । फलस्याप्यसंधीयमानस्य स्वोद्देश्यकपुरुषव्यापारप्रयोजकतया वैवक्षिकं निमित्तत्वम् । चर्मणि द्वीपिनमित्युदाहरणे ऽप्येवमेव । **नामरूपशब्दार्थमिति** । कारणे कार्यवाचकशब्दप्रयोगः कार्यसहितकारणमुक्तत्वप्रत्यायनार्थ इति भावः । अव्याकृतग्रहणं वाय्वादीनामप्युपलक्षणमित्याह **अव्याकृतेति** । (यावतेत्येतत्पदं यत इत्याशङ्क्येत्यनेन विवृतम्)* । ननु जीवात्मनः प्रसिद्धत्वे तदधिगमाय ब्रह्मावबोध्यतइत्ययुक्तं प्रसिद्धस्याऽनधिगमनीयत्वादित्याशङ्क्य व्याचष्टे **प्रसिद्धमिति**† ।

१५१ । ६ **कृत्वाचिन्तोद्घाटनत्वादिति** । यद्यपि लिङ्गेन प्रकरणमुपमृद्य पूर्वपक्षः कर्तुं शक्यः अन्यविषयत्वे ऽपि प्रकरणविरोधित्वमपि श्वेताश्वतरपठिताऽजामन्त्रवदत्रैव मुण्डके तयोरन्यः पिप्पलं स्वाद्वत्ति समाने वृक्षे पुरुषो निमग्न इत्यादिवच्च समर्थयितुं शक्यं तथाप्यत्राऽन्यविषयत्वोपपादकं बलवल्लिङ्गमेव नास्ति निश्चितब्रह्मतात्पर्ये ऽन्यविषयत्वपूर्वपक्षशङ्काऽनास्पदे

निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।
अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् ॥
यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥

इति श्वेताश्वतरमन्त्रे ब्रह्मण्यमृतसेतुत्वव्यपदेशदर्शनेन तस्य ब्रह्मधर्मताया एव प्रतीतेः ब्रह्मण्यमृतसेतुत्वश्रवणेनैव अमृतस्यैष सेतुरित्येतदर्थत्वेन कल्पितयोः ब्रह्मभिन्नत्वपारवत्त्वयोरलिङ्गत्वमभिप्रेत्य नानुमान‡मिति सूत्रे प्रधानजीवादिपूर्वपक्षगमकशब्दाभावोक्तेश्च तथात्वे ऽपि न्यायतः

* ( ) एतन्मध्यगो ग्रन्थो नास्ति २ पु॰ ५ पु॰ कुण्डलितः । † प्रसिद्धेतीति १-३ पु॰ पा॰ ।
‡ व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ३ ।

श्वेताश्वतरसाधारणतद्व्यपदेशगतिप्रदर्शनार्थमिह तद्व्यपदेशस्य ज्ञानान्वयेऽपि संभवतीति न्यायान्तरप्रदर्शनार्थं चाधिकरणारम्भात् । अतः प्रकरणानुसन्धानेन बलवताऽनन्यथासिद्धेन प्रकरणेन प्राकरणिकब्रह्म*परामर्शियच्छब्दरूपसर्वनामश्रुत्या च मन्त्रस्य ब्रह्मपरत्वं स्पष्टं भवेदिति कृत्वाचिन्तारूपत्वमधिकरणस्योक्तम् । नन्वस्य मन्त्रस्य प्रकरणे पाठो नास्तीति कृत्वाचिन्ता चेत् कथं ब्रह्मैवेदममृतं पुरस्तात् तथा विद्वान् नामरूपाद्विमुक्तः यः सर्वज्ञः सर्वविदिति प्राकरणिकश्रुतिलिङ्गोपन्यासः । उच्यते । पूर्वसूत्रेऽप्यात्मश्रुतिर्वाग्विमुक्तिज्ञेयत्वं प्रधानादिपरत्वगमकशब्दाभावश्चेत्येतन्मन्त्रपर्यालोचनामात्रलभ्या एवार्थाः सूचिताः । प्राकरणिकश्रुतिलिङ्गान्तरपरतया स्वशब्दादिव्याख्याना†न्तरं तु प्रकरणोद्घाटनानन्तरं प्राकरणिकान्यपि श्रुतिलिङ्गान्यत्र प्रवर्तिष्यन्तइति हृदयेन प्रागेव सूत्रार्थतयोपन्यस्तानि । स्थित्यदनसूत्रस्य‡ प्रकरणोद्घाटनानपेक्षो नास्त्यर्थ इति मत्वा तत्सूत्रमेकं प्रकरणं सूत्रानन्तरं कृतम् ।

पुरुष एवेति निर्दिष्टं पुरुषं यस्मिन् द्यौरित्यादिमन्त्रोक्तेन विशेषणेन विशिंषन्नोतशब्दस्यार्थमाह **यस्मिन्निति । किं तदिति** । किं तदिदं १५१ । विश्वमित्यनेनोक्तमित्यर्थः । ननु कर्मतपोभ्यामन्यदपि विश्वशब्दक्रोडीकार्य§मस्तीत्याशङ्क्याह **अर्थात्तत्फलं वेति** । अत्रात्मश्रुतिस्तावदस्पष्टा आत्मा जीवे धृतौ देहे स्वभावे परमात्मनीत्यभिधानकोशानुसारेण य आत्मनि तिष्ठन्नित्यादिप्रयोगानुसारेण चानेकसाधारण्यात् तस्य ब्रह्मपरतायामाप्लृ व्याप्ताविति धातोर्मनिन्प्रत्यये बाहुलके तकारे च सति तन्निष्पत्तेर्योगरूढ्युभयानुग्रहो भवतीति युक्त्या सोन्मेषणीया । द्युभ्वाद्यायतनत्वं चानेकसाधारणं सदायतनाः सत्प्रतिष्ठा इति श्रुत्यन्तरपर्यालोचनयोन्मेषणीयम् । वाग्विमुक्तज्ञेयत्वं च ब्रह्मधर्मत्वेनाप्रसिद्धं तमेव धीर इत्यादिश्रुत्यन्तरपर्यालोचनयोन्मेषणीयम्|| । कर्मकर्तृभेदव्यपदेशस्त्वभ्युच्चयमात्रं मनःप्राणाद्याश्रयमेव युष्माकं स्वभावं स्वरूपं जानीध्वं न तु मनःप्राणादिकमित्युपदेशो-

---

* प्रकरणिब्रह्मेति १ पु॰ पा॰ ।
† स्वशब्दव्याख्यानेति २ पु॰ पा॰ ।
‡ व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ७ ।
§ विश्वशब्दस्यार्थे क्रोडीकार्यमिति २ पु॰ पा॰ ।
|| अन्वेषणीयमिति २ पु॰ पा॰ ।

पपत्तेः । एवंविधोपदेशानां बहुलमुपलम्भात् । यद्यच विवक्षितं मुमुक्षुज्ञेयत्वं सांसारिके जीवस्वरूपे न संभवतीति ततो भेदव्यपदेशः समर्थ्यते तर्हि तदप्यस्पष्टमित्यस्पष्टब्रह्मलिङ्गता* ॥

१५१ । ९ **भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥**

वायुरपि ग्राह्य इति । अप्तेजोवाय्वाकाशानां क्रमेणोत्तरोत्तरकारणत्वादिति भावः । अपां तेज इति पाठः । अपां नभ इति तु प्रामादिकः पाठः । केषु चिद्ग्रन्थेष्वपामिति वाक्यमेव नास्ति । **एवमाकाशपर्यन्तमिति ।** तेजसो वायुर्वायोराकाश इति क्रमेणेति यावत् । **आकाशस्य भोग्यत्वइति ।** संमर्दावस्थानक्लिष्टस्यासंबाधावस्थानसौख्यहेत्ववकाशात्मना अन्यैरप्येतादृशैः प्रकारैराकाशस्य भोग्यता । **भावभवित्रोरितीति†** । स य एषो ऽणिमा धातुः प्रसादान्महिमानमीशमित्यादाविवेति भावः । **न प्राणादन्यस्येति ।** न प्राणान्यधर्मिक इत्यर्थः । **आर्त्तिमात्रस्येति ।** यस्योभयं हविरार्त्तिमार्च्छेत्यैन्द्रं पञ्चशरावमोदनं निर्वपेदिति वाक्यइति शेषः ।

१५२ । २० **आत्मशब्दश्चेति ।** ननु प्राक् सङ्गतिग्रन्थे प्राण एवेहात्मा विवक्षित इति भाष्यानुसारेणात्मशब्दः प्राणपरतया व्याख्यातः कथमिह स यो नाम ब्रह्मेत्युपास्तइत्यादिवाक्यप्रतिपन्ननामादिप्रतीकारोप्यब्रह्मपरतया व्याख्यायते। नैष दोषः। तत्र ब्रह्मशब्दो ऽपि सर्वात्मत्वसर्वप्रतिष्ठात्वरूपब्रह्मलिङ्गवत्तया वर्णिते प्राणएव पर्य्यवस्यतीति तात्पर्यात् । यद्यपि नामादिषु परब्रह्मदृष्टिविध्यङ्गीकारे ऽपि दृष्टिविशेषणतयोपसर्जनस्य तस्य न प्राकरणिकत्वं किं तु तद्दृष्ट्यो‡पासनीयतया प्रधानभूतानां नामादीनामेव सन्निधानमात्रं तु तस्येति सिद्ध्यति तथाप्यग्रे ब्रह्मगुणसर्वात्मत्वादिविशिष्टत्वेन प्राणसंकीर्त्तनस्यावैयर्थ्यार्थं ब्रह्मगुणविशिष्टप्राणदृष्टिविधानार्थं नामादिषु ब्रह्मसंकीर्त्तनमिति कल्प्यते । अन्यथा नामादिष्विव प्राणे उपासनातत्फलयोरनुक्त्या तद्वैयर्थ्यप्रसङ्गादित्यभिप्रायः । नन्वात्मविषयोपक्रमोपसंहारानुसारेण शोकरूपसंसारतरणोपायप्रार्थनोपक्रमतदुपायकीर्त्तनोपसंहारानुसारेण च परं ब्रह्मैव महाप्रकरणीत्यङ्गीकृत्य

---

* अत्र प्रथमं द्युभ्वाद्यधिकरणं पूर्णम् ।

† भावभवित्रोरिति इत्येव प्रतीकाकारः २ पु॰ । ‡ किं तु दृष्ट्येति २ पु॰ पा॰

दुर्बलेनापि सन्निधानेन भूयः प्रश्नप्रतिवचनाभावातिवादित्वाख्यप्राणव्रतानुकर्षणरूपलिङ्गद्वयानुगृहीतेन बाधो वक्तुं शक्यः ।

दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा ।
तदापि विपरीतत्वं शिष्टाक्षेपे यथोदितम् ॥

इति न्यायसाम्यात् । अथ वा प्राणो वा आशाया भूयानित्यारभ्य अथातो ऽहङ्कारादेश इत्येतत्पर्यन्तं प्राणस्यावान्तरप्रकरणमङ्गीकृत्य तेन महाप्रकरणस्य बाधो वक्तुं शक्यः । अत एव दार्शपौर्णमासिके महाप्रकरणे ऽनुवर्तमाने ऽपि अभिक्रामं जुहोत्यभिजित्या इति विधीयमानस्याभिक्रमणस्य प्रयाजावान्तरप्रकरणेन प्रयाजहोमाङ्गता । यदापि

येनाभिक्रमणादूर्ध्वं पुरस्ताच्च गुणो ऽपरः ।
विधीयते प्रयाजानां तस्मात् प्रकरणास्तिता ॥

इत्युक्तरीत्या अभिक्रमणविधानात् पश्चादपि प्रयाजानिष्ट्वा हवींष्यभिघारयतीति प्रयाजकीर्तनयुक्तगुणविधानेनेवाच भूमनिरूपणानन्तरं प्राणकीर्तनयुक्ततद्गुणविधानेन संदंशन्यायो नास्ति तथापि संदंशवत् प्राणव्रतानुकर्षणादिलिङ्गमपि तदवान्तरप्रकरणानुवृत्तिगमकमिति वक्तुं शक्यमिति चेत् । उच्यते । अनेन प्रकारेण पूर्वपक्षान्तरं प्रकरणान्ते परमात्मविवक्षा भविष्यति भूमा तु प्राण एवेति चेदिति भाष्यगतशङ्काग्रन्थेन दर्शयिष्यतइतीह नोद्घाटितम् ।

सन्निधिमात्रमात्मशब्दस्येति । आत्मशब्दः पूर्वपक्षे प्राणपर इत्याशयेनात्मनो ऽर्थस्य सन्निधानमनुक्त्वा शब्दमात्रस्य तदुक्तम् । **तत्त्वइति ।** नामाद्युत्तरोत्तरोत्कृष्टवस्तूपदेशः परमोत्कृष्टब्रह्मप्रतीत्यर्थ इत्यर्थः* । सत्यश्रुत्या प्राणातिवादिनो ऽन्यत्वेन प्रतीयमानः सत्यातिवादी तत उत्कृष्टः प्रतीयते तत एतस्योत्कर्षश्च तदतिवदननिमित्तात्प्राणादेतदतिवदननिमित्तस्य सत्यस्योत्कर्षमादाय पर्य्यवस्यतीति भावः । **सर्वप्रकरण समाप्ताविति ।** कृत्स्नेयं भूमविद्या प्राणस्यैव प्रकरणं नामादिष्वारोप्योपास्यस्यापि प्राणस्योद्गीथादिषु समारोप्योपास्यानां हिरण्मयपुरुषाकाशप्राणादीनामिव प्राधान्येन प्रतिपाद्यत्वोपपत्तेरिति प्राणस्य सन्निधिस्थाने महाप्रकरणं १५२ । २६

---

* इत्यर्थ इति नास्ति २ पु॰ † प्राणप्रकरणेति ३-५ पु॰ पा ।

निवेश्य पूर्वपक्षान्तर(मात्मतः प्राण इति लिङ्गविरोधेन निराकृत्यात्मन एव
महाप्रकरणे अहंकारादेशपर्यन्तं प्राणस्यावान्तरप्रकरणमिति पूर्वपक्षान्तर)*मा-
शङ्क्यतइति भावः । **आ प्रकरणसमाप्तेरिति ।** अवान्तरप्रकरणसमाप्तिपर्य-
१५३ । ११ न्तमित्यर्थः । **स एव प्राणः किं न स्यादिति ।** भूमा प्राण एवेति हि
पूर्वपक्ष इति भावः । **पुरस्तादिति ।** यः सत्येनातिवदतीति पुरस्तान्नि-
र्देशः । तत्र निर्दिष्टस्यैव हि सत्यस्य विज्ञानादिसाधनपरंपरोपदेशक्रमेण
भूमरूपतयोपदेशः कृतः स भगव इत्युपरिष्टान्निर्देशः । ननु प्राणस्यान्याय-
त्ततोक्तिः प्राणाऽवान्तरप्रकरणबलात् तन्मध्यपतितो भूमा प्राण इति शङ्का-
या न निवर्तिकेत्याशङ्क्याह **सत्यशब्दश्रुत्या चेति ।** तुशब्दश्रुतेरप्युपलक्ष-
णमेतत् । तथा च तुशब्दसत्यशब्दश्रुतिविरोधात्तत एव प्राणातिवादित्वा-
नुवृत्तिलिङ्गस्यासिद्धेः प्रश्नप्रतिवचनान्तराभाव†लिङ्गस्यान्यथासिद्धेश्च न
प्राणसन्निधेर्बलवत्त्वं नाप्यवान्तरप्रकरणलाभ इत्याशयः । सौषुप्तिकसुखभवनं
न विधेयं सुखमहमस्वाप्समित्यनुभवसिद्धत्वात् किं तु तस्य सुषुप्तशरीरा-
वच्छेदेन तदभिव्यक्तिरेव विधेया तेन प्राणाग्नय एवैतस्मिन् पुरे जाग्रतीत्य-
वधारणाद् जीवस्य मृताविव सुप्तावपि शरीरान्निष्क्रमणमस्तीति शङ्काव्या-
वृत्तिर्लभ्यतइत्यभिप्रेत्य तथा श्रुतिं योजयति **तदस्मिन् शरीरे इति ।** प्राणो
भूमेति पूर्वपक्षे शोकतरणादीनां भूमाऽनन्वयात् संप्रसादादध्युपदेशस्य सौत्र-
हेतोः प्राणतानुकर्षणप्रश्नोत्तराभावलिङ्गाभिभूतत्वादस्पष्टब्रह्मलिङ्गता‡ ॥

११ । २२ **अक्षरमम्बरान्तधृतेः ॥ १० ॥**

रूढिनिरूढिभ्यामिति । नन्वक्षरं न क्षरं विद्यादश्नोतेर्वा सरो
ऽक्षरमिति महाभाष्ये वर्णे ऽपि योगप्रदर्शनान्निरूढिरेवेति चेन्न। वर्णानां नित्य-
विभुत्वपक्ष तत्प्रदर्शनात् । तत्पक्षे ऽप्योमित्येतदक्षरमित्यादिष्वक्षरशब्दनि-
र्दिष्टे द्वित्र्यादिक्रमिकवर्णसमुदाये समारोपितक्रमविशेषविशिष्टत्वेनाऽनित्ये परि-
च्छिन्ने च तस्य रूढेराश्रयणीयत्वादिति भावः ।

ननु लिपिषु ककारो ऽयमित्यादिः शब्दात्मत्वानुभवस्तद्गम्यत्वकृतो
दृष्ट इत्याशङ्कानिवारकमपि चेति ग्रन्थमवतारयति **अर्थे शब्दात्मकत्वा-**

---

* ( ) एतन्मध्यस्थो ग्रन्थो नास्ति ५ पु॰ । † प्रतिवचनोत्तराभावेति १ पु॰ पा॰ ।
‡ अत्र द्वितीयं भूमाधिकरणं पूर्णम् ।

नुभव* इति । ननु गौरयमित्यादिशब्दानुविद्धप्रत्ययाः शब्देष्वर्थानां तादात्म्येनोतप्रोतत्वालम्बनाश्चेद् ब्रह्मविषया अपि शब्दानुविद्धप्रत्ययाः तथा स्युरिति चेत् कस्तत्र संदेहः । यदूर्ध्वं गार्गि दिव इत्यादिना सकललोकवर्त्तिवस्तुजाताश्रयत्वेन भूतभविष्यद्वर्त्तमानाकारपरिणामिमूलप्रकृत्यव्याकृताश्रयत्वेन च प्रतिपाद्यमान आकाशो ब्रह्मैव ब्रह्मातिरिक्तस्य तावदाश्रयत्वाभावात् । पूर्वं गार्गि†ब्राह्मणे पृथिव्यादिब्रह्मलोकान्तसकललोकाधारे पृष्टे प्रश्नो ऽयं ब्रह्मविषयः पर्यवसन्नः ब्रह्म च‡ गुरुशिष्यमर्यादामतिक्रम्यान्यायेन जल्पकथायां न प्रष्टुमुचितमित्याशयवता याज्ञवल्क्येन गार्गि मातिप्राक्षीर्मा ते मूर्द्धा व्यपतदनतिप्रश्न्यां वै देवतामतिपृच्छसीति सक्रोधं निवारितस्यैव प्रश्नस्य गार्ग्या सर्वथैव पराजयो मा भूदिति ब्राह्मणानामनुज्ञां लब्ध्वा पुनरवतारणे कृते याज्ञवल्क्येनाकाशएव तदोतं च प्रोतं चेत्युक्तस्य तदुत्तरस्य ब्रह्मविषयत्वावश्यंभावाच्च तदप्यक्षराश्रितत्वेन प्रतिपादितं कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति प्रश्नोत्तराभ्याम् । एवं च प्रशासितृत्वद्रष्टृत्वश्रोतृत्वादिबहुलिङ्गविरोधादक्षरश्रुतिर्दुर्बलेति शङ्कापि निरस्ता । ब्रह्माश्रयस्य ब्रह्मत्वायोगेन ब्रह्मणि जीवधर्माणामिवाक्षरे ब्रह्मधर्माणां तादात्म्याद् व्यपदेश इति कल्पनोपपत्तेः ।

धारयितुमर्हतीत्यनुषङ्ग इति । ननु परमात्मा वा कथमाकाशा- १५४ । ६
न्तानि धारयितुमर्हति परमात्मैव ह्यत्रा§काशशब्देन निर्दिष्टः न च स एव तद्धारयितुमर्हतीति चेत् । उच्यते । यदि यदूर्ध्वं गार्गि दिव इत्यादिना ऽनुक्रान्तस्य सर्वस्य प्रपञ्चस्य परमात्मनो ऽन्यदाधारीभवितुं नार्हतीत्याकाशो ऽत्र स एवेष्यते तर्हि सकलप्रपञ्चविशिष्टस्य तस्याधारभूतं किं चिदन्यद्वस्तु भवितुमर्हतीति का प्रत्याशा । न ह्येतावद्धान्यं वोढुमिह कुसूलादन्यद् भाजनं नास्तीति निश्चयवतः तेन धान्येन विशिष्टं कुसूलं वोढुमन्यद् भाजनमस्तीति संभावना ऽपि हृदयमधिरोहति । नामधेयसंभिन्नं सर्वं शब्दवाच्यमिति प्रक्रिया तु टीकायामनुपदमेव स्वरूपप्रमाणार्थक्रियाभे-

* अर्थस्य शब्दात्मत्वानुभव इति १-५ पु॰ पा॰ ।
† पूर्वगार्गीति २ पु॰ पा॰ ।
‡ ब्रह्मणि चेति २ पु॰ पा॰ ।
§ अत्रेति नास्ति २ पु॰ ।

द्वैर्निराकरिष्यते। तत्र घटमृत्पिण्डपटतन्त्वादिवत्स्वरूपार्थभेदस्यो*पपादनसंभवे ऽपि प्रमाणभेदो† न शक्योपपादनः। श्रोत्रग्राह्यस्य शब्दस्य गौरयमिति चक्षुर्ग्राह्यत्वासंभवात्। ब्राह्मणो ऽयं गौरो दण्डी कुण्डली कमण्डलुमानित्यादिषु सर्वेषां पदानां स्वस्वरूपसमर्पणमात्रार्थत्वेन जातिगुणविशेषाद्यनवगत्या तत्संदेहाऽनिवृत्ति‡प्रसङ्गात्। सर्वस्यापि शब्दवाच्यस्य स्वस्वनामधेयद्वाराकाराश्रितत्वाभ्युपगमे तस्यापि प्रणवोङ्कारादिशब्दवाच्यस्य तदाश्रितत्वस्य वक्तव्यत्वेनाक्षरशब्दस्य व्यवस्थितार्थालाभप्रसङ्गाच्च। तस्माद्यद्भूतं भवच्चेत्यादिवाक्ये यद्भूतं यद्भवद् यच्च भविष्यत्तावदाधारत्वं विवक्षितं न तु भूतभवद्भविष्यदात्मकाव्याकृताधारत्वम्। गार्गिब्राह्मणे सकललोकाधारप्रश्ननिवारणं साक्षात्तदुत्तरस्यान्यविषयत्वे ऽपि पुनस्तदाधारस्य प्रश्नः परमात्मविषयो भविष्यतीति स मा भूदिति दूरदृष्ट्या कृतमित्याशयं वर्णयित्वा अवकाशात्मना सकलप्रपञ्चाधारस्य भूताकाशस्योपादानात्मना तदाधारस्याव्याकृतस्य वा ऽवाकाशशब्देन ग्रहणमिति योजनीयम्। अतोम्बरान्तधृतेः परमात्मन्येव संभव इत्युक्तं युक्तमेव। नन्वम्बरान्तधृतिरिह न श्रुता। ओतप्रोतत्ववचनस्याधेयत्वपरत्वाभावात्। पूर्वमन्तरिक्षलोकाः कस्मिन्नोताश्च प्रोताश्च गन्धर्वलोकेषु गार्गीत्यादिप्रश्नोत्तरेष्वन्तरिक्षलोकगन्धर्वलोकादीनां§ ब्रह्मलोकान्तानां पूर्वपूर्वस्य तत्तदूर्ध्वदेशवर्तिन्युत्तरोत्तरस्मिन्नोतप्रोतत्ववचनानां यथा पटे दीर्घतिर्यक्तन्तव ओतप्रोतास्तदेकदेशा एवं गन्धर्वलोकानां विभूतौ दृश्यमानायामन्तरिक्षलोकास्तदेकदेशप्राया इत्युत्तरो ज्यायान् भवत्येवमेव हीमे लोका इति श्रुत्यन्तरसिद्धात् सादृश्याद् गौणताया वक्तव्यत्वेन तत्प्रायपाठात्तदुपरितनप्रश्नोत्तरसंदर्भरूपाक्षरब्राह्मणगतोतप्रोतत्ववचनस्यापि तथैवार्थप्रतीतेरिति चेत्। मैवम्। ओतं मनः सह प्राणैश्च सर्वैः मयि सर्वमिदं प्रोतमित्यादिश्रुतिस्मृतिष्वाधेये दृष्टप्रयोगाभ्यामोतप्रोतशब्दाभ्यामिहापि प्रकरणे धृतेरेव प्रतिपादयितुमुचितत्वाद् वचनबलादूर्ध्ववर्तिनामपि गन्धर्वलोकादीनामन्तरिक्षलोकादिधारकत्वस्य पर्वतानां क्षितिधारकत्वस्येव ध्रुवस्य ज्यो-

* स्वरूपार्थक्रियाभेदस्येति २ पु. पा.। † प्रमाणाभेद इति २ पु.।

‡ संदेहानुवृत्तीति २ पु. पा.। § अन्तरिक्षगन्धर्वलोकादीनामिति २ पु पर.।

तिश्चक्रधारकत्वस्यैव कल्पनीयत्वात् । आध्यानाधिकरणे*क्तरीत्येन्द्रियेभ्यः
परा ह्यर्था इत्यादिश्रुताविन्द्रियादिशरीरान्तानामुत्तरोत्तरपरत्ववचनजातस्य
पुरुषः सर्वतः पर इत्यत्रैवान्तरिक्षलोकाद्योतप्रोतत्ववचनजातस्याऽक्षरे सर्वं
जगदोतप्रोतमित्यत्रैव तात्पर्यस्यैकवाक्यतानुरोधात्कल्पनीयत्वेन तात्पर्याऽ-
विषयोत†प्रोतत्ववचनानां तथाभूतपरत्ववचनानामिव‡ यथाकथं चिन्नयने
ऽपि प्रतिपिपादयिषितोतप्रोतत्ववचनस्य श्रुत्यन्तरप्रसिद्धार्थताया एव युक्त-
त्वाच्च ।

अव्याकृतस्य प्रशासितृत्वायोगादिति युक्तः पाठः । शासेः सेट्त्वाद्
ग्रसितस्कभितेत्यादिसूत्रे शास्तृनिपातनस्य छन्दोविषयत्वात् । **अभग्ना- १५४ । २४**
यामपि रूढाविति । प्रधाननिराकरणार्थमम्बरान्तधृतिहेतुमुक्त्वा तस्य
पुनः प्रधानसाधारण्यनिरासार्थमाकाशशब्दस्य रूढिभङ्गेनाव्याकृतपरत्वोप-
पादकतया प्रशासितृत्वहेतुः किमर्थं वक्तव्यः । प्रथममेवाक्षरं प्रशासनादिति
हेतुना प्रधानपूर्वपक्षनिरासोपपत्त्या तदर्थं रूढिभङ्गस्याकर्त्तव्यत्वादिति भावः ।
इदं च भास्कराद्युक्तरीत्या नाकाशपदस्याऽव्याकृतपरत्वं रूढ्यभङ्गेनापि तन्नि-
र्वाहादित्येतदभिप्रायं न त्वत्रा§ऽऽकाशपदं भूताकाशपरमेवेत्येतदभिप्रायम् ।
सकलकल्पानुयायिसमस्तविकारजाताधारत्वस्य प्रतिकल्पं भिन्ने भूताकाशे
ऽनुपपन्नत्वेनाचाकाशशब्दस्याव्याकृतपरत्वावश्यंभावात् । अत एवाऽऽनुमानि-
काधिकरणे|| भाष्यकारैरस्याकाशशब्दस्याव्याकृतपरत्वं वक्ष्यते ।

प्रौढ्यैष वाद इति । हिरण्यं निधायाग्निश्चेतव्य इति विधिस्तु-
त्यर्थेन पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवीत्यर्थवाद इवेहाप्यप्राप्तनिषेधः
संभवतीत्ययमप्राप्तिमभ्युपेत्य वाद इत्यर्थः । **प्रकृतिविकाराऽनन्यत्वेनेति ।**
अभिधानाभिधेयानां प्रकृतिविकारभावः स्फोटवाद्यभिमतः । स्फोटस्तु सोप-
पादनं देवताधिकरणे¶ प्रदर्श्य निराकरिष्यते । प्रकृतिविकारानन्यत्वेनार्थधर्माः
स्थौल्यादयः शब्देष्वेष्टव्या एवेति कथं तत्प्रतिषेध इत्याशङ्क्य प्रधानइव का-
र्यावस्थानापत्तिदशायामपि तेषु तत्प्रसक्त्या प्रतिषेध इत्याह **प्रलयावस्थेति ।** १५५ । २

---

* व्या॰ सू॰ अ॰ ३ पा॰ ३ सू॰ १४ ।
† विषये श्रोतेत्यादिपाठः २ पु॰ ।
‡ तथाभूतेत्यादिर्ग्रन्थो न दृश्यते २ पु॰ ।
§ अत्रेति नास्ति २ पु॰ ।
|| व्यासमू॰ अ॰ १ पा॰ ४ सू॰ १ ।
¶ व्या॰ सू॰॰ अ॰ १ पा॰ ३ सू॰ ३३ ।

प्रपञ्चाधिष्ठानेति । कृत्स्नस्यापि कार्यस्य मिथ्यात्वेनाऽविद्यापरिणामतया तदभिन्नत्वेन प्रशासितृत्वस्यापि तथात्वात् तद्वाचस्पतिमते जीवाश्रितमेव स्याद् न ब्रह्माश्रितमविद्यायास्तन्मते जीवाश्रितत्वात् । न च तथापि तन्मते ब्रह्मणः सर्वप्रपञ्चाधिष्ठानत्वमस्तीत्येतावता तस्य ताद्धर्म्यलाभः* । जीवाश्रयदुःखद्वेषादिसाधारणेनाधिष्ठानतामात्रेण तदलाभादिति भावः । **रज्ज्वामिति** । जीवाज्ञातब्रह्मविवर्तरूपं प्रशासितृत्वं ब्रह्मधर्मतयैवारोप्यते रज्ज्वदमंशतादात्म्येनेव भुजङ्ग इति (ब्रह्मणः प्रशासितृत्वमुपपद्यत)† इति भावः । आरोपितं प्रशासितृत्वं प्रधाने ऽपि वक्तुं शक्यमिति शङ्कामनूद्य श्रुतिवशात्कल्पनीय आरोपः सदृशएव कल्पयितुमुचितः तच्च लोकदृष्टयतिक्रमे कारणाभावादिति परिहरति **हन्तेत्यादिना** । प्रधाने ऽपि तदारोपे तदपि प्रशासितृ किं न स्यादिति पाठः । तमारोप्येति पाठश्चेत् पूर्वकालत्वमेव क्त्वार्थः न समानकर्तृकत्वमपि । सेतुं दृष्ट्वा समुद्रस्य मुच्यते ब्रह्महत्ययेत्यादिदर्शनादिति पक्षमाश्रित्य निर्वाह्यः । अम्बरान्तधृतिः सेयं हेतुरम्बरं ब्रह्मेति धृतिर्न श्रुतेति च शङ्काभिभूतत्वादस्पष्ट इत्यस्पष्टब्रह्मलिङ्गता‡ ॥

१५५ । ११ **ईक्षतिकर्मव्यपदेशात्सः ॥ १३ ॥**

पर्युदासित इति। णिजर्थो न विवक्षितः पर्युदस्त इत्यर्थः । तारकादेराकृतिगणत्वेन संजातपर्युदास इति वा तदर्थो वर्णनीयः । **ततो हेतोरपरं ब्रह्म ध्येयमिति** । यद्यपि परविषयाणामहंग्रहोपासनानामप्यर्चिरादिप्राप्याऽपरलोकप्राप्तिफलकत्वमविशिष्टं तथाप्येतद्वै सत्यकामेत्याद्युपक्रमे परवेदनात् परप्राप्तिरपरवेदनादपरप्राप्तिरिति विभज्य कथनादिहापरप्राप्तिरपरं ध्यातव्यमित्यत्र लिङ्गं भवेदेव । न चैवं सत्युपक्रमप्रतिज्ञातपरवेदनफलं न प्रदर्शितं स्यादिति शङ्कनीयम् । ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्कवयो वेदयन्ते तमोङ्कारेणान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परं चेति तदनन्तरमन्त्रे स सामभिरुन्नीयते ब्रह्मलोकमित्युक्तमपरवेदनफलमुपसंहृत्य परवेदनस्य शान्तत्वादिविशिष्टपरब्रह्मप्राप्तिः फलमिति प्रदर्शयि-

---

* तद्धर्मलाभ इति २ पु· पा· । + ( ) एतन्मध्यगो ग्रन्थो नास्ति २ पु· ।

‡ अत्र तृतीयम् अक्षराधिकरणं पूर्णम् ।

ध्यमाणत्वात् । **अङ्गीकृत्येति** । ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामित्यत्र ध्यानं ब्रह्मविषयम् ईक्षणमविद्याशक्तिविषयमतस्त-त्क्षणं तत्त्वविषयमिति नियमस्य ध्यानेक्षणयोरेकविषयत्वनिमस्य च भङ्ग इति भावः । **ईक्षणध्यानयोरिति** । अदृष्टाद्वारकस्तयोः कार्य्यकारणभाव एकविषयत्वनियत इति भावः ।

तत्त्वविषयत्वमौत्सर्गिकमिति । यद्यपि प्रायिकत्वमौत्सर्गिक- १५६ । ३
त्वमिति विवक्षायामीक्षणस्यातत्त्वविषयत्वमेवौत्सर्गिकं परब्रह्मसाक्षात्कारमेकं विना प्रपञ्चान्तर्गतवस्तुजातविषयस्य सर्वस्येक्षणस्याऽतत्त्वविषयत्वात् । तथा-प्यपवादाभावे अत्यन्ताबाध्यविषयत्वं ग्राह्यं मुख्यत्वादित्येवंरूपमौत्सर्गि-कत्वमिह विवक्षितम् । किं चात्रेक्षणं परब्रह्मविषयमित्यवश्यं वाच्यम् । हिरण्यगर्भविषयत्वे वाक्यवैयर्थ्यात् । तल्लोकं प्राप्तस्तदुपासकस्तमीक्षतइत्य-स्यार्थसिद्धत्वात् । न च परब्रह्मविषयत्वे ऽपि वाक्यवैयर्थ्यं तुल्यं हिरण्य-गर्भप्राप्तेरपुनरावृत्तिश्रुत्या क्रममुक्तिफलनियतत्वेन तल्लोकप्राप्तौ परब्रह्मसाक्षा-त्कारस्यार्थतः सिद्धत्वादिति वाच्यम् । इमं मानवमावर्त्तमिति श्रुताविम-मिति विशेषणेनावर्त्तान्तरे पुनरावृत्तेरप्यभ्यनुज्ञानेन तत्प्राप्तेः क्रममुक्तिनियत-त्वाभावात् । नन्वीक्षणध्यानयोरेकविषयत्वमीक्षणस्य तत्त्वविषयत्वमित्युभयं परस्परविरुद्धं निर्विशेषस्य त्रिकालाबाध्यस्य समन्वयसूत्र*भाष्ये तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासतइति श्रुत्यनुरोधेन ध्येयत्वस्य निषिद्धतया ध्यानं सर्वत्र कल्पितगुणविशिष्टविषयमिति वक्तव्यत्वाद् विशिष्य चात्र ब्रह्माभेददृ-ष्टिविशिष्टप्रणवोपासनस्य कल्पितविषयत्वा†ऽनिवारणादिति चेत् । उच्यते । भावनाप्रचयस्य साक्षात्कारजनकत्वे तद्विषयविषयत्वं तन्त्रं न तु तदन्या-ऽविषयत्वमपि गौरवात् । अस्ति चात्र विधेयस्य ध्यानस्य प्रणवरूपकल्पित-वस्तुविषयत्वे ऽपीक्षणीयब्रह्मविषयत्वमपि । अतो न दोषः । यद्यप्येवं सति ध्यानस्य हिरण्यगर्भरूपजीवविषयत्वे ऽपि तत्त्वविषयत्वं नापैति तत्र जीवत्वोपाधेः कल्पितत्वे ऽपि स्वरूपस्याबाध्यत्वात् । तथापि ध्यानेक्षण-योरवश्यकल्पनीयं विषयैक्यं निर्दोषब्रह्मविषयत्वेनैव कल्पयितुमुचितं न तु सदोषनिर्दोष‡जीवब्रह्मविषयत्वेनेति तात्पर्यम् ।

---

* व्याससू॰ अ॰ १ पा॰ १ सू॰ ४। † कलितविषयत्वेति १ पु॰ पा॰ । ‡ निर्दोषेति त्रुटितं २ पु॰ ।

स्यादेतत् । ईक्षणध्यानयोर्नात्र कार्यकारणभावो विवक्षितः । यतः परापरवेदनयोस्तत्प्राप्तिफलकत्वेनोपक्रमप्रतिज्ञातयोरपरवेदनमोङ्कारप्रतीकविषयापरध्यानरूपं तल्लोकप्राप्तिफलं ब्रह्मलोकमित्यन्तेनोक्तं स एतस्मादित्यादिना तु परवेदनमोङ्कारसाधनं साक्षात्काररूपतत्प्राप्तिफलमुक्तमित्यवश्यं व्याख्येयम् । ऋ.ग्भिरेतमिति मन्त्रश्चोक्तार्थद्वयसम्मतित्वेनोदाहृत इति योजनीयम् । ध्यानतत्फलकथनयोरपरविषयत्वाभावे प्रतिज्ञातार्थानिर्वाहात् । एवं च स एतस्मादिति वाक्ये तत्पदं तस्माद्विद्वानिति व्यवहितप्रस्तुतपरवेदितृपरम् । तच्च वाक्यमपरध्यानविषयपूर्ववाक्यानन्वयि ततो भिन्नं सर्वनाम्नामव्यवहितपरत्वासम्भवे व्यवहितपरत्वस्यैकवाक्यत्वासम्भवे वाक्यभेदस्य च न्याय्यत्वादिति शङ्कानिराकरणार्थमपि चेति ग्रन्थमवतारयति **प्रकारान्तरेणेति ।**

१५६ । ७ **प्रमाणद्वयानुरोधेनेति ।** स एतस्मादित्यत्र तत्पदस्य पूर्वतत्पदयोरिवाव्यवहितप्रस्तुत*ध्यातृपरत्वं परपुरुषप्रत्यभिज्ञानं च ध्यानेक्षणवाक्ययोरेकवाक्यत्वापादकमिह प्रमाणद्वयं प्रतिज्ञातमपरब्रह्मवेदनतत्फलकथनं तु टीकोक्तप्रकारेणैकमात्रद्विमात्रोपासनतत्फलकथनमेवेति नेतव्यम् । यद्यप्येकमात्रप्रणवोपासनस्य तत्प्रथममात्रात्मकऋग्वेदप्रापणीयमनुष्यलोकप्राप्तिः द्विमात्रप्रणवोपासनस्य तद्द्वितीयमात्रात्मकान्तरिक्षलोकप्राप्तिश्च फलम् पृथिव्यन्तरिक्षलोक†प्राप्तिश्च न हिरण्यगर्भरूपापरब्रह्मप्राप्तिः तथापि तयोरुपासनयोर्न्यूनप्रणवविषययोर्न्यूनमपरं ब्रह्मैवौचित्यात् प्रणवारोप्यम् अपरं‡ ब्रह्म पर्य्यवस्यतीति तयोः फलमेव । तस्माद्विद्वानेकतरमन्वेतीति प्रतिज्ञातापरब्रह्मप्राप्तितया विवक्षितं भवति । न चाऽतथाभूतस्य तथात्वविवक्षया ऽत्र कश्चिद्दोषः स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति सत्यकामप्रश्नोत्तरस्य कृत्स्नस्याप्येतद्वै सत्यकामेत्यारभ्य प्रवृत्तस्य प्रकरणस्य परब्रह्माऽभेददृष्टिविशिष्टत्रिमात्रोपासनाविध्यर्थत्वेनैकार्थपरतया तदन्तर्गतयोरेकमात्रद्विमात्रोपासनातत्फलवचनयोरोङ्कारस्यायं महिमा यन्मात्रावैगुण्येनापरब्रह्मदृष्ट्योपास्यमानो ऽपि कस्मैचित्फलाय भवति तस्मादेवंभूतमहिमा ऽयमोङ्कारो हेयमल्पफलमपरं

* परेति २ पु॰ प्रा॰ † लोकेति २ पु॰ नास्ति । ‡ अपरमिति २ पु॰ नास्ति ।

ब्रह्म विहाय परब्रह्मदृष्ट्या त्रिमात्र एवोपासनीय इत्येवं त्रिमात्रोपासनास्तुत्यर्थत्वात् स्तुतेश्च यथाकथं चिदालम्बनमात्रेण चारितार्थ्यात् । सत्यकामेनोङ्कारालम्बनध्यानफलस्यैव पृष्टत्वेनेक्षणवाक्यस्य ध्यानाऽकार्योङ्कारसाधनकब्रह्मवेदनफलपरतायामपृष्टो*त्तरत्वापत्त्या परध्यानफलसमर्पकतया तद्ध्यानवाक्यैकवाक्यतायां वक्तव्यत्वेन परिशेषादेकमात्रद्विमात्रोपासनातत्फलवचनयोरेवापरोपासनातत्फलवचनतया ऽवश्यं व्याख्येयत्वाच्च । न चैवमपीक्षणवाक्यस्यापृष्टोत्तरत्वमनिवार्यं ध्यानप्राप्यस्य लोकस्यैव पृष्टत्वादिति वाच्यम् । प्राप्यलोकानुबन्धित्वेन तत्प्रशंसार्थं पाप्मनिर्मोकसूर्य्यसंपत्तिवदीक्षणस्यापि वर्णनोपपत्तेः ।

ब्रह्मोङ्काराभेदोपक्रमादिति । नन्वेवं प्रतीकोपासनेयं कथं ब्रह्मलोकप्राप्तिफला । वचनबलादिति ब्रूमः । अत एवात्र ब्रह्मलोकप्राप्तिवचनमर्थवत् । अहंग्रहोपासनत्वे तद्य इत्थं विदुरित्यादिसामान्यवचनादेव तत्प्राप्तिफलसिद्धेः । सूर्य्यान्तः†स्थमिति सूर्य्यसंपत्तिवचनानुरोधादित्यं व्याख्यातस्य वचनस्य प्रशंसार्थमर्च्चिरादिमार्गभाविसूर्यप्राप्त्यनुवादत्वे ध्येयः सूर्यान्तःस्थत्वगुणो न सिध्यति किं त्वीक्षणवाक्यश्रुतः पुरिशयत्वगुण एव तदेकवाक्यतयात्र ध्यानविध्यपेक्षितत्वेन ध्येयगुणः सिध्यति सो ऽपि वा न ध्येयगुणः । आचार्य्यैः परं निर्विशेषमिति प्राक् प्रणवे ध्येयस्य परस्य निर्विशेषतोक्तेः किं तु पुरिशयमित्येतल्लक्षणीयमहावाक्यार्थजीवाभेदसमर्पणार्थम् । प्राप्यते इति प्रापयतेः कर्मणि लकारः । णेरनिटीति णिलोपः । प्रापयत इति पाठस्तु लेखकप्रमादायातः । ईक्षतिकर्मत्वहेतोर्ब्रह्मैकान्त्यमस्पष्टब्रह्मलिङ्गता‡॥

दहर उत्तरेभ्यः ॥ १४ ॥ १५६ ।

दहरवाक्यशेषगतेति । ननूत्तमपुरुषशब्दः प्रजापतिवाक्यशेषे न तु दहरवाक्यशेषे । सत्यम् । सिद्धान्ते सगुणनिर्गुणब्रह्मविषयतया भिन्नयोरपि दहरप्रजापतिविद्ययोरपहतपाप्मत्वादिगुणकजीवैकविषयत्वं वदन् पूर्वपक्षी पौर्वापर्येणाम्नातयोस्तयोरेकविद्यात्वं मन्यत इति तदीये पूर्वाधिकरणाक्षेप-

* आप्नोति २ पु॰ पा॰ । † तरेति २ पु॰ पा॰ ।

‡ अत्र चतुर्थम् ईक्षतिकर्माधिकरणं पूर्णम् ।

वाक्ये तदभिमानानुसारेण दहरवाक्ये शेषगतेत्युक्तम् । अत एव टीकायामप्युत्तराच्चे*दिति सूत्रोपन्यस्तपूर्वपक्षविवरणारम्भे दहराकाशमेव प्रकृत्य श्रूयतइति दहरविद्यैकप्रकरणतया प्रजापतिविद्या ऽवतारयिष्यते । ननु तथाप्युक्तविधया पूर्वाधिकरणाक्षेपो न युज्यते उत्तमपुरुषशब्दवत् परपुरुषशब्दस्य जीवविषयत्वसम्भवे ऽपि ततः परपुरुषशब्दप्रत्यभिज्ञया ध्यानेक्षणवाक्ययोरेकविषयत्वसिद्धावीक्षणस्य तत्त्वविषयत्वनियमाद् ध्यानमपि तात्त्विकपरब्रह्मविषयमिति सिद्धान्तसिद्धेश्चलनाभावादिति चेत् । उच्यते । एष संप्रसाद इत्याद्युत्तमपुरुषशब्दघटितवाक्योपात्ताभिनिष्पत्तिशब्दोक्तमीक्षणं पूर्वपक्षे जीवविषयमिति तद्वत्स एतस्मादिति वाक्योक्तमपीक्षणं हिरण्यगर्भजीवविषयं भविष्यतीति प्रथममिहाक्षेपो विवक्षितः । ततश्च तदेकविषयस्य ध्यानस्यापि तद्विषयत्वसिद्धौ कथं ध्यानेक्षणवाक्ययोरपरब्रह्मणि परपुरुषशब्द इत्याकाङ्क्षायामिह जीवमात्रे ऽप्युत्तमपुरुषशब्दो दृश्यते हिरण्यगर्भे परपुरुषशब्दस्य का ऽनुपपत्तिरित्येवमाशयेयमाचार्योक्तिः । इयमाक्षेपसङ्गत्युक्तिरुपलक्षणम् । तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविदन्ति तेषामेवैष ब्रह्मलोक इति दहरोपासनस्य ब्रह्मलोकफलश्रवणं त्रिमात्रप्रणवप्रतीकालम्बनोपासनस्येव वचनबलादुपपद्यतइति दृष्टान्तसङ्गतिरपि द्रष्टव्या ।

१५६ । १९ **श्रवणमनननिदिध्यासनेभ्य† इति** । यद्यपि टीकायां श्रवणं मननं चान्वेषणमिति व्याख्यातत्वाद्विज्ञानं ध्यानं तस्य वैशिष्ट्यं श्रुत्युपात्तश्रवणमननापेक्षमिति वक्तुं शक्यम् । आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेत्यादिश्रुतिषु विज्ञानशब्दस्य ध्याने बहुशः प्रयोगदर्शनादुपासनारूपं ध्यानमेव चात्रानुष्ठानाय विधातव्यं न तु तत्फलरूपः सगुणसाक्षात्कारः । तथापि सन्प्रत्यययोगात्फलरूपतया निरुपाधीच्छाविषयः साक्षात्कार एव ग्राह्य इत्यभिप्रायेण टीकाकृता स्वयं साक्षात्कारहेतुतया ध्यानमुपन्यस्य त्रिभ्यो ऽपि वैशिष्ट्यं साक्षात्कारस्य विवक्षितमिति पूर्वेभ्य इत्यनेन दर्शितत्वात् श्रवणमननध्यानेभ्य इत्युक्तम् । एवं च फलसाक्षात्कारे विधिसरूपो ऽयमर्थवाद उपासनाविधिस्त्वथ च इहात्मानमित्यादिफलवाक्येष्वेवेति तात्पर्यम् । यद्यपि दहरविद्याफलब्रह्मलोकावाप्त्यर्थिनः

* व्या. सू. अ. १ पा. ३ सू. १९ । † श्रवणमननध्यानेभ्य इति १-५ पु. पा. ।

स्वयमेतच्छास्त्रविचाराधीने श्रवणमनने न सम्भवतः सर्वतो विरक्तस्य मुमुक्षोरेवैतच्छास्त्राधिकारात् तथापि विचारितैतच्छास्त्राचार्योपदेशाधीने दहरोपासनापेक्षितवाक्यार्थमात्रविषये ते विवक्षिते इति द्रष्टव्यम् ।

ननु पुरेणाधिकरणेन सहाधेयेन सता ब्रह्मणा सम्बद्धव्यमिति टीकोक्तमयुक्तम् । षष्ठ्या अधिकरणवाचित्वाभावात् सप्तम्या वेश्माधिकरणवाचित्वात् । न च पुरमध्यगतवेश्माधेयस्य जीवस्य पुराधेयत्वमर्थतः सिध्यति प्रासादमध्यगते पर्यङ्के शयानस्येव प्रासादे शयनं तदर्थतः सिध्यदुदाहृतटीकयोक्तमिति वाच्यम् । वेश्माधेयो जीव इतीदानीमसिद्धेः । आधेयत्वविशेषहेतुभ्यां ब्रह्मात्र जीव इति निश्चयमुपजीव्य खलु अनिर्दिष्टाधेयस्य वेश्मनः संनिहितः स एवाधेयतया ऽन्वेतीत्यग्रे टीकाकृद्वक्ष्यतीत्याशङ्क्य तत्तात्पर्यमाह **समासेति ।** समासे षष्ठ्यभिधेयं सम्बन्धसामान्यं सप्तम्यर्थतया बुद्धिसन्निहिते आधाराधेयभावे पर्य्यवस्यतीत्यर्थः । यद्यपि यथाभाष्यं स्वस्वामिभावं षष्ठ्यर्थमङ्गीकृत्याधेयत्वहेतुमनपेक्ष्य विशेषहेतुनैव लभ्यं पुरस्वामिभूतं ब्रह्म जीव इति निश्चयमुपजीव्य सन्निहितस्य तस्य वेश्माधेयत्वेनान्वय उपपादयितुं शक्यः षष्ठ्याः स्वस्वामिभावार्थकत्वं च विशेषहेतूपपादनार्थं टीकाकृता ऽप्यपेक्षणीयमेव । तथाप्याधेयत्वहेतुरपि यः* टीकायामुपन्यस्त इति तदुपपादनप्रकारो ऽयं दर्शितः । एवं च विकल्पमुखेन षष्ठ्या अर्थद्वयमवतार्य्य आधेयत्वविशेषहेत्वो†र्योजनं कार्यम् ।

आकाशस्य संदिग्धत्वादिति । ननु महदिदं साहसवचनं यत् स्वनामश्रुतिसमर्पितो भूताकाशः संदिग्धो निरूढिविषयः परमात्मा च संदिग्धः षष्ठीस्वरसोपनेयवैशेषिकसम्बन्धिलिङ्गवशाद् ब्रह्मशब्देन लक्षणीयो जीवो निश्चितः । स च भिन्नवाक्योपात्तः समानवाक्योपात्तभूताकाशं परमात्मानं च निरस्य स्वयं वेश्माधेय‡तया ऽन्वेतीति । नैष दोषः । दहरो ऽस्मिन्नन्तराकाश इत्यत्र वेश्मावच्छेदोपाधिकस्य दहरत्वस्यार्थलभ्यत्वे ऽपि साक्षाद् दहरत्ववचनमर्थवत्त्वार्थमाजान- १५१ ।

---

* य इति नास्ति । २ पु० । † हेतोरिति २ पु० पा० ।

‡ वेश्माधारेति २ पु० पा० ।

सिद्धं दहरत्वमुपस्थापयति आकाशश्रुतिर्भूताकाशं परमात्मानं वा* तयोः कतरस्य ग्रहणं कार्य्यमित्यनिर्णये सन्निधिवशाद् जीवस्य ग्रहणं नियम्यते ।

१५७ । ८ **युद्धे इति** गगनसागरयोरप्युपलक्षणं तदभिप्रायेणारोपग्रहणमप्यर्थवत् । गगनं गगनाकारमित्यचोपमालंकार इति मतमनुरुध्येत्यमुक्तम् । यदि तु गगनं गगनाकारमिति श्लोके नोपमालंकारः किं तु भेदकल्पनमनपेक्ष्य अत्यन्ताभेदे निबध्यमानमौपम्यं नान्वेतीत्यन्वर्थनामा ऽनन्वयालङ्कारः । अनन्वयिनो ऽप्यौपम्यस्य निबन्धनमनुपमत्वद्योतनाय यथा स्वमहिमप्रतिष्ठितत्ववचनमनाधारत्वद्योतनाय यथा वा स्वयंदासत्ववचनं दासरहितत्वद्योतनायेति मतमनुरुध्यते† तदापि नाचानन्वयेन निर्वाहप्रत्याशा‡ । अयमित्येषो ऽन्तर्हृदयइति चोपमानोपमेयरूपयोः परस्परव्यावर्तकविशेषणनिवेशनेन

उपाददे तस्य सहस्ररश्मिस्त्वष्ट्रा नवं निर्मितमातपत्रम् ।
स तद्दुकूला§दविदूरमौलिर्बभौ पतद्गङ्ग इवोत्तमाङ्गे|| ॥

इत्यचेव कल्पितभेदोपाधिकोपमाप्रभेदस्यैव वक्तव्यत्वात् । न च सो ऽपि प्रकारो ऽत्र वक्तुं शक्य इत्याह **अस्तु वेति** ।

११ । १५ **मुख्याधेयत्यागइति** । ननु ब्रह्मशब्दमुख्यार्थलाभो न मुख्याधेयत्वत्यागहेतुः । वक्ष्यमाणवत्सराजपुरदृष्टान्तेन ब्रह्मपुरे जीवस्य वेश्मसम्भवात् । वेश्मस्थस्य च मुख्यपुराधेयत्वोपपत्तेः । न च ब्रह्मपुरइत्यत्र जीवसन्निध्यभावे जीवो वेश्माधेयो न सिध्येदिति वाच्यम् । अनन्यथासिद्धस्वाभाविकदहरत्वलिङ्गेन ब्रह्मपरत्वपक्षे ऽप्यवश्यकल्पनीयवृत्त्यन्तरतया ऽन्यथासिद्धाया आकाशश्रुतेः प्रबलेन तस्य वेश्माधेयत्वसिद्धेरिति चेत् । मैवम् । जीवस्वामिकत्वेन प्रसिद्धजीवसंबन्धस्य अप्रसिद्धपरब्रह्मपुरत्वोक्तेः तदुपासनाविधित्साभावे वैयर्थ्यप्रसङ्गात् । न हि मैत्रः क्व देशे वर्ततइति मैत्रान्वेषिणं प्रति वत्सराजपुरे वसतीति वाक्ये वत्सराजपुरत्वोक्तिः पुरान्तरव्यावर्तनेनेवात्र ब्रह्मपुरत्वोक्तिः प्रकारान्तरेण साफल्यमश्नुवीत दहरत्ववचनं तु जीवगतस्वाभाविकदहरत्वविषयत्वाभावे ऽपि दहरपुण्डरीकावच्छेदेन ब्रह्मणो यावद्दहरत्वं भवति तावदपेक्षया ऽधिकं तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितमिति श्रुत्यन्त-

* चेति २ पु॰ पा॰ । † अनुरुध्येतेति २ पु॰ पा॰ । ‡ निर्वाहं प्रत्याशेति २ पु॰ ।
§ सयद्दुकूलैरिति । २ पु॰ पा॰ । || वहन् गाङ्गमिव प्रवाहमिति २ पु॰ पा॰ ।

राम्नातहृदयपुण्डरीकाग्रसुषिरावच्छेदोपाधिकमत्यन्तसौक्ष्म्यं लम्भयितुमिति साफल्यं नेतुं शक्यम् । तस्माद्युक्तमुक्तं ब्रह्मशब्दमुख्यार्थानुसरणं मुख्याधेयत्वत्यागहेतुरिति ।

नैकवचनपरामृश्यतेति । ननु मा भूद् द्यावापृथिवीशब्दो ब्रह्म- १५८ । १३
लक्षकः । उभे अस्मिन् द्यावापृथिवी इत्यादिके यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमित्यन्ते द्यावापृथिव्यादिसमाधानवाक्ये उक्तानुक्तसकलवस्तुसंग्रहार्थो यः सर्वशब्दः स सर्वात्मकब्रह्मप्रतिपादको ऽस्तु । तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितमिति तैत्तिरीयके सर्वशब्देनैव दहरपुण्डरीकोर्ध्वसुषिरवर्त्युपास्यप्रतिपादनदर्शनात् । ततश्चैकवचनान्तेन सर्वशब्देन प्रकृतं दहराकाशान्तर्वर्त्युपास्यमिहैकवचनान्तेन परामृष्टुं योग्यमिति चेत्तथा सति तदनन्तरं तं चेद् ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे चैव*कामा यदैतदेवाप्नोति प्रध्वंसते वा किं ततो ऽतिशिष्यतइति वर्णिते शिष्याणामाक्षेपे स ब्रूयात् तस्य जरयैतद् जीर्य्यति न वधेनास्य हन्यते एतत्सत्यं ब्रह्मपुरमस्मिन्कामास्समाहिता इत्याचार्य्यकर्त्तव्यपरिहारोक्तौ कामादिसर्वसमाधानाधारस्य सत्यब्रह्माख्यपुरतया देहरूपवितथब्रह्मपुरजराप्रध्वंसानुविधायिनो जराप्रध्वंसौ न स्त इत्युक्तिर्न सङ्गच्छते । समाधानाधारस्य त्वया भूताकाशताया एव वक्तव्यत्वात् तस्य च सत्यत्वब्रह्मत्वाधारान्तरनिरपेक्षधारकत्वोक्त्ययोगादिति भावः ।

यदि दहराकाशस्य विज्ञेयत्वमिति । ननु तस्मिन्यदन्तरित्यादौ १५८ । १४
नास्त्युपास्यत्वरूपविज्ञेयत्वोपदेशो येन दहरस्य विज्ञेयत्वोपदेशालाभदोषः शङ्क्येत किं त्वविधेयश्रवणमननसाक्षात्कारेच्छाविषयत्वानुवादमात्रं तथैव टीकायां व्याख्यातत्वात् । तदनुवादश्च फलवाक्यविधित्सितगुणगुणिविषयोपासनास्तुत्यर्थः पर्य्यवस्यति स्तुतिवाक्यस्य नास्ति यावदुपास्यविषयत्वनियमः । दहरगुणजातमपि श्रवणमननाभ्यामन्वेष्टव्यं साक्षात्कर्तुमेष्टव्यं† चेति उपास्यैकदेशप्रशंसया गुणगुण्युभयविषयोपासनास्तुतिलाभात् । द्रव्यदेवताविशिष्टयागविधीनां यदष्टाकपालो भवतीत्यादिषु द्रव्यमात्रविषयया वायुर्वै क्षेपिष्ठा देवतेत्यादिषु देवतामात्रविषयया च प्रशंसया

* चैवेति २ पु॰ नास्ति ।

† इष्टं चेति २ पु॰ पा॰ ।

स्तुतिदर्शनात्। अतो दहराधेयविषयान्वेष्टव्यत्वादिकथनस्य न का चि*दनुपपत्तिः। छान्दोग्यविवरणे च भाष्यकारैरिदं वाक्यं दहराधेयविषयतयैव व्याख्यातम्। तस्मिन्नाकाशाख्ये ब्रह्मणि यदन्तर्मध्ये तद्वाव तदेव विशेषेण जिज्ञासितव्यं ज्ञातुमेष्टव्यं† गुर्वाश्रयश्रवणाद्युपायैरन्विष्य साक्षात्करणीयमित्यर्थ इति। तस्मादस्थानद्वयमाशङ्का। परिहारो ऽप्ययुक्तः। तस्मिन्नित्यस्याव्यवहिते दहराकाशे स्थिते व्यवहितपुण्डरीकपरामर्शित्वकल्पनाऽयोगात्। तस्मिन्यदित्यादिनपुंसकलिङ्गानां प्राक् पुंल्लिङ्गनिर्दिष्टदहराकाशेनन्वयाच्च। दहराकाशस्य हृत्पुण्डरीकस्थतायाः दहरो ऽस्मिन्नन्तराकाश इत्युक्ततया पुनस्तत्कीर्तनवैयर्थ्याच्च। तं चेद् ब्रूयुरित्यादिशिष्यप्रश्नवाक्ये दहरो ऽस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यमित्याद्युक्त्या पूर्वमाचार्य्येण दहराकाशान्तर्वर्तिन एवान्वेष्टव्यत्वादिकमुक्तमिति स्पष्टप्रतीयमानतया तद्विरोधाच्चेति चेत्। उच्यते। विजिज्ञासितव्यमित्यत्रैवोपासनाविधिरित्यपि टीकायां व्याख्यानान्तरं दर्शितम्। वाक्यशेषो हि दहराकाशात्मवेदनस्य फलवत्त्वं ब्रूते। यच्च फलवत्तत्कर्तव्यतया चोद्यते यत्कर्तव्यं तदिच्छतीति तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति दहराकाशविषयमेवावतिष्ठतइति। एवं चात्र विधेयस्योपासनस्य साधनत्वप्राप्तेच्छानुवाद इत्युक्तं भवति। अयमेव पक्षो भाष्याभिमत इत्यनुपदमेव दर्शयिष्यते तदवलम्बनेनात्र शङ्केयम्। परिहारो ऽपि नायुक्तः। यतस्तस्मिन् यदन्तरित्यत्र यत्पदं वक्ष्यमाणद्यावापृथिव्यादिसकलविशेषणविशिष्टदहराकाशपरम्। अन्यथा फलवाक्ये एतांश्च सत्यान्कामानिति केषां चिद्गुणानां विशिष्य ग्रहणस्येतरपरिसंख्यार्थत्वादितराणि द्यावापृथिव्यादीन्यपहतपाप्मत्वादीनि च केवलं स्तुत्यर्थं वर्णितानि न तूपास्यकोटिप्रविष्टानीति शङ्कया तेषामुपासना न सिध्येत्। न च वाच्यम् एतांश्च सत्यान् कामानिति संकल्पजाः पित्रादयो गृहीताः संकल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादि प्रकृत्य तइमे सत्याः कामा इति निर्दिष्टत्वात् तेषां च फलरूपाणामुपास्यगुणत्वाभावादुपासनस्याप्राप्तौ तत्प्राप्त्यर्थं तत्तत्कीर्तनं स्यादिति अस्मिन्कामाः समाहिता इत्यादिवाक्ये फलानामप्युपास्यगुणत्वस्य प्रतिपादितत्वेन तत एव तेषामप्युपास्यत्वप्राप्तेः। अतः सकलविशेषणविशिष्टस्य दहराकाशस्यो-

* कदा चिदिति २ पु० पा०।

† ज्ञातुमेष्टव्यमिति २ पु० नास्ति०।

पासनानुप्रवेशसिद्धये तस्मिन्यदन्तरिति पुनः कीर्त्तनमिति न तद्वैयर्थ्यम् । अत एव किं तदत्र विद्यतइत्येतदप्युपपद्यते । तस्य दहराकाशे किं विशेषणजातं वर्त्ततइत्येतत्परत्वात् । अव्यवहितपरामर्शासंभवे तस्य द्वादशशतं दक्षिणेत्यादाविव व्यवहितपरामर्शः शक्यमञ्जलिभिः पातुं वाताः केतकगन्धय इत्यत्रेव लिङ्गसामान्यविवक्षया नपुंसकलिङ्गं चोपपद्यते । एवं तस्मिन् यदन्तरित्यस्य सकलविशेषणविशिष्टोपासनासिद्धये तावद्विशिष्टपरामर्शित्वं भाष्यकारैः स्पष्टं प्रतिपादितम् । तस्माद्वाक्योपक्रमे ऽपि दहर एवाकाशो हृदयपुण्डरीकाधिष्ठानः सहान्तः समाहितैः पृथिव्यादिभिः सत्यैश्च कामैर्विशेय इति गम्यतइति । तस्मादाशङ्का परिहारश्चेत्युभयमप्युपपद्यतएव । एवमुत्पत्तिवाक्यत एव सर्वेषां दहरगुणानामुपास्यत्व सिद्धे फलवाक्ये सत्यकामशब्देन केषां चिद् गुणानां प्रशंसार्थो ऽवयुत्याऽनुवादः । तद्यएवैतावरं चण्यं चार्णवौ ब्रह्मलोके ब्रह्मचर्य्येणानुविन्दन्ति* तेषामेवैष ब्रह्मलोकस्तेषां सर्वेषु लोकेषु कामचारो भवतीति वाक्ये ब्रह्मलोकगतार्णवयोरिवेति तात्पर्यम् । छान्दोग्यविवरणे तस्मिन् तदन्तरित्यादेर्व्याख्यानं त्वेवमपि व्याख्यातुं शक्यमिति वैभवाभिप्रायम् । तदनुसृत्य च टीकायां साक्षात्कारेच्छाविषयतया व्याख्यानान्तरमिति न विरोधः ।

अभ्युच्चयार्थत्वेनेति । नरपतिराजकुमारादिशब्दइव ब्रह्मलोकशब्दे १५८ । १७
लोकवेदयोः सत्यलोकपरतया षष्ठीसमासः प्रसिद्धतरः । शीघ्रोपस्थितिकप्रसिद्धतरसमासग्रहणे च न निषादस्थपतिन्याया†वतार इति अधिकशङ्कानिराकरणार्थमभ्युच्चयापेक्षेति भावः । अग्निविद्यावत्त्वेन समर्थत्वादिति । नन्वनयोक्तिभङ्ग्या निषादस्याग्निविद्याराहित्येनासामर्थ्यमुक्तं भवति । नैतदुपपद्यते । ब्राह्मण‡कर्तृकाऽऽधाननिष्पाद्यस्याहवनीयादेर्निषादेन संपादयितुमशक्यतया पावमानेष्ट्याद्यग्निहोत्रहवणीवन्निषादकर्तृकायामिष्टावतिदेशाभावेन तदुपसंहारसामर्थ्याऽनपेक्षणात् । विद्यावत्त्वेन सामर्थ्यं तु विद्याप्रयुक्तिकल्पनयोपपद्यते । त्रैवर्णिकानामपि स्वस्वशाखाध्ययनस्यैव विहितत्वेन शाखान्तरवेदान्तराम्नाताङ्गमन्त्रोपसंहारार्थं विद्याप्रयुक्तिकल्पनावश्यंभावेन तत्कल्पनागौरवाऽविशेषादिति चेत् । उच्यते । षष्ठीसमासाश्रयणेनाग्न्यतिदेशबा-

* विन्दतीति पु॰ पा॰ । † जै॰ सू॰ अ॰ ६ पा॰ १ सू॰ ५१ । ‡ ब्राह्मणादीति ३ पु॰ ।

धसंभवे तद्बाधकः कर्मधारयो नाश्रयणीयः । त्रैवर्णिकानां तु शाखान्तराद्याम्नात*विद्याप्रयुक्तिर्नानयेष्ट्या ऽपेक्षणीया† किं त्वावश्यकनित्यनैमित्तिककर्मानुष्ठानतदुपयोगिकृत्स्नन्यायविचारार्थत्वेनाधिप्रैवास्तीति तात्पर्यम् ।

१५८ । २४ **निषाद एव स्थपतिः स्यादिति** । नन्वत्र कर्मधारयबलीयस्त्वे का युक्तिः यतः षष्ठीसमासे लक्षणा न प्रसज्यते । एकस्य कर्मधारयस्थ सम्बन्धस्य षष्ठीसमासे संसर्गमर्यादया प्रतीतिसंभवात् । न च विग्रहवाक्ये विभक्त्यर्थस्य सम्बन्धस्य समासे ऽपि प्रकारत्वनियमात्तन्निर्वाहार्थं तत्र लक्षणापेक्षा ऽस्तीति शङ्कनीयम् । पर्वतो वह्निमानित्यत्र मतुबर्थस्य पक्षसाध्यसम्बन्धस्यैव विभक्त्यर्थसम्बन्धस्यापि संसर्गमर्यादया प्रतीत्युपपत्तेः । तस्माल्लक्षणादोषोक्तिरयुक्ता । द्वितीयायाः प्रत्येकसम्बन्धोक्तिरप्ययुक्ता । समासान्तर्वर्तिन्या विभक्तेः सुपो धातुप्रातिपदिकयोरिति लोपानुशासनेन समासोत्तरविभक्तेरुपसर्जनान्वयानङ्गीकारात् । न च षष्ठ्या द्वितीयाया वा लोपो ऽङ्गीकार्य इति विषये बुद्धिसन्निहिताया द्वितीयाया एवाङ्गीकार्य्य इत्यत्र तात्पर्य्यं वर्णनीयं तथापि निषादस्थपतेरित्यादिषष्ठीप्रयोगे बुद्धिसन्निहितषष्ठीलोपाङ्गीकारे ऽपि नियमतः सामानाधिकरण्याऽलाभेन सर्वत्र षष्ठीसमासतः कर्मधारयबलीयस्त्वस्य ततः सिद्ध्यभावादिति चेत् । उच्यते । ऐक्ये लाघवं संबन्धे भेदकल्पनागौरवमिति सार्वत्रिकः कर्मधारयबलीयस्त्वे हेतुर्विवक्षितः । राज्ञः पुरुष इत्यादौ भेदनियतसम्बन्धाद्यर्थकविभक्तिविरोधादैक्यत्यागः । घटो न पट इत्यादौ विरुद्धविभक्त्यभावे ऽपि घटपटतद्भेदानामैक्यासम्भवात्तत्त्यागः । यत्र तु शब्दतो ऽर्थतो वा नास्ति विरोधस्तत्र लाघवादैक्यं ग्राह्यमित्ययमौत्सर्गिको न्यायः । लक्षणादोषस्तु षष्ठ्यर्थो लक्षणीय इति मतानुसारेणोद्घाटितः । सन्निहिता द्वितीयैव लुप्ता ऽङ्गीकार्य्येति युक्तिस्तु प्रकृताभिप्रायेणोक्तेति न कश्चिद्दोषः । सोऽयं शब्दसामर्थ्यादिति पदमौत्सर्गिकन्यायपरतायां निषादस्थपतिशब्दयोरेकार्थपर्यवसानसामर्थ्यादिति व्याख्येयम् । तदप्युक्तं सूत्रकारेणेति वाक्यस्य अपिशब्दात्कर्मधारयबलीयस्त्वमुक्तमेव । लिङ्गमप्युक्तमित्यर्थः प्रतिभासमानो न युक्तः । कर्मधारयबलीयस्त्वस्य सूत्रानुक्तत्वादित्याशङ्क्य सोत्रण चकारेण लिङ्गस्य हृदयस्थ-

* शाखान्तराम्नातेति २ पु. पा. । † आक्षेपणीयेति २ पु. पा. ।

तात्कर्मधारयबलीयस्त्वादाधिक्यमतिरक्तत्वं द्योतितमित्येतत्परतया तद्वाक्यं
व्याचष्टे **तदप्याधिक्यमिति** । १५९ । ४

विपन्नादसम्भवादिति पञ्चम्योः सामानाधिकरण्यभ्रान्तिं वारयति **विपन्नादिति** । असम्भवादितीति मूलप्रतीकग्रहणानन्तरं केषु चित्कोशेषु षष्ठीसमासो विपन्नेति वाक्यं दृश्यते । तदनन्वितं प्रक्षिप्तमिव भाति टीकायां विपन्नादित्यस्य कमलासनलोकप्राप्तिविशेषणत्वेन षष्ठीसमासविषयत्वाभावात् । यदि तत्प्रक्षिप्तं न भवति तदानीमेवं तस्यार्थो वाच्यः । अहरहर्ब्रह्मलोकप्राप्त्यभिधानं विपन्नात्कमलासनलोकप्राप्तेर्व्यावर्त्ततां दहराकाशे च व्यवतिष्ठतां तथापि षष्ठीसमासस्तेन न व्यावर्तनीयः । यतो लोक्यतइति लोको विद्वदनुभवविषयो ब्रह्मानन्दः तस्यानन्दं ब्रह्मणो विद्वानिति श्रुताविव भेदव्यपदेश औपचारिक इति कल्पयितुं शक्यमित्याशङ्क्य षष्ठीसमासपरिग्रहे तन्मुख्यत्वानुरोधेन षष्ठीसमासवतः सत्यलोके प्रसिद्ध्यतिशयानुसारेण च ब्रह्मलोकप्रत्यायकतया तस्य निर्दिष्टलिङ्गविरुद्धत्वमनेन वाक्येनोच्यतइति योगाद्रूढिपूर्वकलक्षणायाः प्रथमप्रतीतमुख्यार्थात्यागेन बलीयस्त्वमाह **तस्येति** । **वृत्तो भविष्यतीति** । वर्ततइत्यात्मनेपदिधातोर्वृद्भ्यः स्यसनोरिति सूत्रेण स्ये परतः परस्मैपदे सति वर्त्स्यतीति रूपम् । **स्यान्तेन** सम्बन्धस्येत्यन्तेन ।

न तु गङ्गाया इति लक्ष्यसंबन्धं पृथगुक्त्वेति । अनेन न हि १६० । २
भवति गङ्गायाः कूलमिति विवक्षिते गङ्गाया गङ्गेति प्रयोग इति टीकापाठः साधुः न तु गङ्गाकूलयोः गङ्गेति टीकापाठ इति दर्शितं भवति । एवमाकाशशब्दस्य गौणतायामाकाशवत्सर्वगत इति श्रुत्यन्तरप्रसिद्धं व्यापकत्वरूपं भूताकाशसादृश्यं निमित्ततयाऽवतिष्ठते । तथा चोपमेयनिर्देशकेनाकाशशब्देनैव भूताकाशसादृश्ये प्रतिपादिते वाक्येन प्रतिपाद्यमानं तत्सादृश्यं नान्वेति यद्भूताकाशवद्व्यापकं ब्रह्म तद्भूताकाशवद्व्यापकमिति वाक्यस्य गङ्गायां गङ्गायाः कूले घोष* इति वाक्यस्येवाऽसामञ्जस्यादिति शङ्किते यद्यपि व्यापकत्वमपहाय नित्यनिर्लेपत्वादिना भूताकाशसादृश्येनाच गौणता

---

* गङ्गायां घोष इति २ पु॰ पा॰ ।

कुतः छान्दोग्ये षष्ठाध्याये नवस्वपि तत्त्वमसिखण्डेषु स एषो *ऽणिमेत्यणु-
त्वेन सप्तमाध्याये स एवाधस्तादित्यादिना व्यापकत्वेन च वर्णिते ब्रह्मणि
कथमणुत्वव्यापकत्वयोरविरोधनमित्याकाङ्क्षायां दहरपुण्डरीकाग्रसुषिरावच्छे-
दोपाधिकमणुत्वं स्वाभाविकव्यापकत्वमित्यविरोधं तत्प्रसङ्गादौपाधिकब्रह्मो-
पासनं च विधातुमष्टमो ऽध्याय आरब्धः । तत्र प्रथमं ब्रह्मणो दहरशब्दे-
नाणुत्वमुक्त्वा तस्यौपाधिकमणुत्वं स्वाभाविकं तु व्यापकत्वमिति निरूपणाय
तत्र शिष्याणामाकाङ्क्षामुद्भावयितुं वक्ष्यमाणद्यावापृथिव्यादिसकलवस्तुविशि-
ष्टस्य तस्यैवाकाशस्य दहरपुण्डरीकान्तर्वर्त्तित्वं† पुनः प्रतिपाद्य तत्प्रसङ्गात्
तदुपासनां विधाय तदन्तर्वर्त्तिवस्त्वसम्भवे शिष्यैः शङ्किते सूक्ष्मोपाध्यव-
च्छेदकृताणुभावस्य स्वाभाविकं व्यापकत्वं नानुपपन्नं सूचिपाशाद्यवच्छेदकृता-
णुभावस्य भूताकाशस्येवेत्येवमपि प्रायेण यावान्वा इत्यादिवाक्यं प्रवृत्तम् ।
तत्र ब्रह्मणः स्वाभाविकं व्यापकत्वमिति निर्द्धारणमिहेत्येतद्वाक्यार्थज्ञानका-
रणीभूतपदार्थज्ञानकाले ऽनिर्द्धारितस्य व्यापकत्वस्य गौणवृत्तिनिमित्तत्वा-
योगादिति परिहर्त्तुं शक्यं तथापि व्यापकत्वमेव तन्निमित्तमभ्युपेत्य दृष्टा-
० । ३ न्तमुखेन समाधत्तइत्याह **परिहरतीति** ।

दृष्टान्ते तावदित्थमनन्वयः समाधेयः । आग्नेयादीनां षण्णां यागानां
स्वरूपेण पौर्णमास्यमावास्याकालत्व तत्तदुत्पत्तिवाक्यविहिते तेषु गौणाभ्यां
पौर्णमास्यमावास्यापदाभ्यां बोध्यमाने ऽपि तेषां त्रिशस्त्रिशः प्राच्योदीच्यस-
कलाङ्गसाहित्येन तत्तत्कालकर्त्तव्यत्वं प्रतिपादयितुं तद्वाक्यम्‡ । तद्वाक्यद्व-
याभावे दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येकफलसाधनत्वेन बोधितानां
षण्णां यागानां प्रयोगैक्यस्यौत्सर्गिकत्वात् । पौर्णमास्यां प्राच्याङ्गानुष्ठानपूर्वकं
पौर्णमासत्रिकमनुष्ठायाऽमावास्यायां प्राप्तायाममावास्यात्रिकमनुष्ठायोदीच्याङ्गस-
मापनं§ कर्त्तव्यमिति वा यागषट्कमपि स्वस्वकाले क्रमेण पृथक् प्राच्योदीच्याङ्ग-
सहितं कर्त्तव्यमिति वा प्रसज्येतेति । दार्ष्टान्तिके तु कथमनन्वयः समाधेय इति
चेद् उच्यते । उपमेयपरेणाकाशशब्देन गौणेन स्वरूपेण व्यापकत्वे लब्धे ऽपि
हृदयपुण्डरीकावच्छेदेन स्थितस्य तस्य तेनापि स्वरूपेण भूताकाशवद्व्यापकत्वं

---

* स वा एष इति १ पु॰ पा॰ ।
† अन्तर्वर्तित्वमिति १ पु॰ ।
‡ तद्वाक्यद्वयमिति २ पु॰ पा॰ ।
§ उदीच्याङ्गे समापनमिति १ पु॰ पु॰ ।

प्रतिपादयितुमिदं वाक्यं हृदयपुण्डरीकावच्छिन्नएव दहराकाशे वक्ष्यमाणद्यावापृथिव्यादिसकलसमाधानसिद्धये । अत एवोभे अस्मिन्निति वाक्ये दहरपुण्डरीकस्यान्तरेवेत्येतदभिप्रायमन्तरेवेति वचनं दृश्यते अत एव च यच्चास्येहास्ति यच्च नास्ति सर्वं तस्मिन् समाहितमित्युक्त्यनन्तरं प्राग् ब्रह्मपुरशब्दोक्ते देहएव सर्वस्य समाधानमुक्तं सिद्धं कृत्वा देहे जीर्णे नष्टे वा कुसूलादौ जीर्णे धारणाक्षमे तदन्तर्निहितं व्रीह्यादिकमिव नष्टे घटे तदन्तर्निहितं दध्यादिकमिव च तत्किमपि नावतिष्ठतेत्यन्तेवासिनामाक्षेपवचनं निबद्धं दृश्यते तं चेद् ब्रूयुरस्मिँश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामा यदैतज्जरा चाप्नोति प्रध्वंसते वा किं ततो ऽतिशिष्यतइति । ननु श्रूयमाणमपि दहराकाशस्य दहरपुण्डरीकवेष्टितस्य तेन रूपेण व्यापकत्वं तत्र सर्वसमाधानं चासम्भावितं कथं श्रद्धेयमिति चेत् । उच्यते । दहरोपासकस्य ब्रह्मलोकप्राप्त्यनन्तरमुपयोगिभोगस्थान*भोगोपकरणभोग्यजातमुभे अस्मिन्नित्यादिनोच्यते । तच्च ब्राह्मलौकिकं द्विविधम् । उपासकस्य ब्रह्मलोकं प्राप्तस्य शरीरविरहावस्थायां स्वप्नपदार्थजाततुल्यमेकं तस्य शरीरवत्त्वावस्थायां जाग्रत्पदार्थतुल्यमपरम् । तदुभयं सूत्रकार एव विवेचयिष्यति तन्वभावे सन्ध्यवदुपपत्तेः† भावे जाग्रद्वत्‡दिति । तत्राद्यं स्वाप्नपदार्थजातवदेव मानसं सूक्ष्मे ऽपि मातुमर्हति । स्वाप्ने§ ह्यपवरके ऽनुभूयमाने तदन्तर्गिरिनदीसमुद्रादिकमप्यनुभूयते । भाष्यकारैस्तु छान्दोग्यविवरणे मनोमयानि ब्रह्मलोके शरीरादीनीति पुराणवचनं मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोकइति मनोमात्रभोग्यत्वश्रुतिं चावलम्ब्य ब्राह्मलौकिकं विदेहसदेहावस्थोपयोगि सकलं सङ्कल्पजपित्रादिभोग्यजातं स्वप्नदृष्टस्त्रीपुरुषादिवन्मनोविकारात्मकमेव न तु स्थूलपार्थिवाप्यादिरूपमिति विमर्शपूर्वं व्यवस्थापितम् । एवं च यद्यपि स्वाप्नवन्मानसं द्यावापृथिव्यादिकं सूक्ष्मे ऽपि वर्तितुमर्हतीति दहराकाशस्य व्यापकत्वं न वक्तव्यम् । अत एव तस्यान्ते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितमिति सूक्ष्मएव दहराकाशे सर्वसमाधानमुक्तं तथाप्यत्राल्पीयसो दहराकाशस्यान्तः सूक्ष्ममपि

---

* भोगभोगस्थानेति २ पु॰ पा॰ । † व्या॰ सू॰ अ॰ ४ पा॰ ४ सू॰ १३ ।
‡ व्या॰ सू॰ अ॰ ४ पा॰ ४ सू॰ १४ । § स्वप्ने इति १ पु॰ पा॰ ।

वस्तूपास्यं न सम्भवतीत्याचिप्रवतां शिष्याणां हृद्यातिविपुलं द्यावापृथिव्यादिकं तदन्तः समाहितमित्युत्तरं न प्रविशेदिति मत्वा यथानुरूपबलिन्यायेन मनोविकाररूपद्यावापृथिव्यादिसमाधानोचितं मनोविकाररूपमेव स्वापवरका*न्तः स्वप्नदृष्टगिरिनदीसमुद्रादिसमाधानोचितस्वप्नापवरकवैपुल्यसमानं दर्शितमित्युपपद्यते । ननु ब्रह्मलोकप्राप्त्यनन्तरभाविभोगोपयोगिसङ्कल्पजपित्रादिकमुपासनाकाले ऽपि दहराकाशवर्ति किमर्थं कल्पनीयमिति चेदुपास्यदहराकाशान्तर्वर्त्तित्वेन तदनुचिन्तनस्यालम्बनसिद्ध्यर्थं तत्सर्वमुपासनाकाले ऽपि दहराकाशवर्त्यभ्युपगन्तव्यमिति श्रुतेरभिप्रायः । अत एव सङ्कल्पजपित्रादीन् प्रकृत्य तइमे सत्याः कामा अनृतापिधानास्तेषां सत्यानामनृतमभिधानं यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते अथ ये वा ऽस्य जीवा ये च प्रेताः यच्चान्यदिच्छन्न लभते† सर्वं तदत्र गत्वा विन्दतइति प्राचीनानन्तजन्मसंबन्धिदिदृक्षितपितृमातृभ्रातृपुत्रकलत्रादिकमन्यच्च दुर्लभं भोग्यजातं दहराकाशएवोपास्यमाने क्रमेण पश्यतीत्युक्त्वा कथं तावद्विशिष्टो दहराकाशः तथा सर्वैर्नोपलभ्यतइत्याकाङ्क्षायां यद्यथापि हिरण्यनिधिं निहितमित्यादिदृष्टान्त उक्तः । यद्युपमेयपराकाशशब्दो निर्लेपत्वादिना लक्षकः स्वरूपेण व्यापकत्वं दृष्टान्तमुखेन प्रतिपाद्यमिति जीवे व्यापकत्वासम्भवप्रतिपादकभाष्यानुसारेणोच्यते तदा द्यावापृथिव्यादीनां मानसत्वेन संकोचो न कल्प्यः बाह्यानामपि तेषामनवच्छिन्ने ब्रह्मणि वृत्तेः । अन्तरेवेत्यन्तःशब्दो यस्यान्तःस्थानि भूतानीतिवदवधारणमाधारान्तरव्यवच्छेदार्थं शिष्याणामाक्षेपस्त्वन्तराकाशएव समाधानमुक्तमिति भ्रान्त्येत्युपपादनीयमित्यलं प्रपञ्चेन ।

१६० । ८ अधिकरणबाध इति । न चाग्नेयादिषु मुख्यार्थत्वे ऽप्यपराह्णशब्दसमभिव्याहारात् पितृयज्ञवाक्ये कालपरत्वं स्यादिति वाच्यम् । आग्नेयादिषु मुख्यत्वे हि काले तत्सम्बन्धाल्लक्षणा ऽङ्गीकार्या तथापि शक्तिकल्पने गौरवात् । ततश्च कालवाच्यपराह्णशब्दसन्निधाने सत्यपि नाऽमावास्याश्रुतेः कर्मवाचिन्याः सन्निधिवशाद्भङ्गो युक्तः । कर्माङ्गत्वेनापराह्णकाले पितृयज्ञविधिर्भविष्यति समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोतीत्यादिवाक्येषु कर्माङ्गत्वेन कालविशेषे स्तोत्रविशेषोपाकरणादिविधानदर्शनादिति भावः ।

* स्वाप्नापवरकेति ब पु० पा० । † इच्छन्नलभते इति ब पु० पा० ।

अपरं रूढिकारणमिति । अप्रयोजकमेव वैषम्यं प्रयोजकत्वेन तदुक्तमनैकान्त्येन दूषयितुमाशङ्कतइत्यर्थः । अप्रयोजकत्वं च तस्माद्यत् किंचिदेतदिति टीकायन्थेन विभावितम् । ननु न चात्र कस्य चिल्लाक्षणिकत्वमिति टीकायन्थो न युक्तः । सोमद्रव्यविशिष्टयागविधिसिद्ध्यर्थं सोमवता यागेनेष्टं भावयेदिति सोमपदे मत्वर्थलक्षणाङ्गीकारादित्याशङ्क्य तस्य द्रव्यविषये लक्षणा नास्तीत्येतदर्थत्वेन व्याचष्टे **सोमशब्दो हीति ।** यद्यपि १६० । १५
सोमलतायाः शुक्लप्रतिपदमारभ्यैकैकं पत्त्रं वर्द्धते कृष्णप्रतिपदमारभ्यैकैकं पत्त्रं क्षीयतइति प्रसिद्धेः पक्षद्वयनियतवृद्धिक्षयसादृश्यात् चन्द्रवाचिन एव सोमशब्दस्य लतायां लक्षणा वक्तुं शक्या । एवं च पवमानायेन्दवइत्यादौ चन्द्रवाचित्वइन्दुशब्दस्य ताः सोमाय राज्ञे ददातीति राजानं यक्ष्म आरदिति च सोमोपपदत्वेन स्वतन्त्रत्वेन च चन्द्रप्रयुक्तस्य राजशब्दस्य तथैव लतायामपि यत्ने लक्षणा चिच्छिदुः सोम राजन् अरिष्ट राजन्नगदः परे हीति प्रयोगदर्शनं चोपपद्यते । अन्यथा बहूनां चन्द्रवाचिशब्दानां लतायां शक्तिकल्पनागौरवप्रसङ्गात् तथापि प्रसिद्ध्यतिशयाद् लतायामसाधारणवाचकान्तराप्रसिद्धेश्च तस्यामपि मुख्यत्वमुक्तम् ।

यागषट्कइति । यागानां षडवान्तरसङ्ख्यायुक्तसमुदायइत्यर्थः । तदस्य परिमाणमित्यस्मिन्नर्थे कन्प्रत्ययः । **देहाद्यागमापायसाक्षीत्यर्थइति** आचार्याभिप्रायतो ऽर्थ उक्तः न तु शिष्याद्यवगतस्तयोस्ततः परमपि भ्रमानुवृत्तेः । **अक्ष्युपलक्षितइति ।** नेत्रस्थं जाग्रतं विद्यादिति श्रुत्यन्तरात् । **जाग्रति** जागरे । **अभिप्रतीतवानिति ।** गत्यर्थाकर्मकेत्यादिसूत्रेण कर्तरि क्त इति भावः ।

चतुर्थपर्य्यायं प्रतीकत आदत्तइति । शङ्काविशेषनिवारणार्थमिति १६१ । २
भावः । शङ्का चेवं यदुक्तमक्षिस्थानादिकं परस्य न संभवतीति तदयुक्तम् । उपकोसलविद्योपास्यवत्सगुणोपास्यस्याक्षिस्थानसंभवात् । स्वप्नेन शारीरमभिप्रहत्य असुप्तः सुप्तानभिचाकशीतीति ब्राह्मणः स्वप्नसंबन्धश्रवणात् सुप्ति*वाक्यस्य यत्र यस्मिन्नाधारे समस्तो ऽपि जन्तुः सुषुप्तो भवतीति सुषुप्ताधारब्रह्मपरत्वोपपत्तेश्च । न चैवं सति स्वप्नावस्थस्य भयशोकादिदर्शनं सुषुप्ताव-

* सुषुप्तीति ३ पु· पा· १

स्थस्य विनष्टप्रायत्वदर्शनं चेदमनुपपन्नं स्यादिति वाच्यम्। यथा ऽक्षिपर्याये छायापुरुष उपदिष्ट इति इन्द्रविरोचनयोर्भ्रान्तिः यथा च प्रतिबिम्बावेक्षणे विरोचनस्य देह उपदिष्ट इति भ्रान्तिः तथा स्वप्नसुषुप्तिपर्याययोर्जीव उपदिष्ट इतीन्द्रस्य भ्रान्त्युपपत्तेरिति। एतच्छङ्कावारणं च समुत्थानवाक्योपन्यासेनेत्थं कृतम्। यदि स्वप्नसुषुप्तिपर्याययोर्ब्रह्मैवोपदिष्टं जीव उपदिष्ट इतीन्द्रस्य भ्रान्तिमात्रमिति कल्प्येत तदा पर्यायद्वये भयशोकविनष्टप्रायत्वदोषयुक्तो जीव उपदिष्ट इतीन्द्रस्य भ्रान्तिरेव वारणीया स्याद् न तु जीवस्यैव भयशोकादीनां शरीरसम्बन्धोपाधिकाध्यासिकत्ववर्णनपूर्वकं शरीरात्समुत्थितस्य* निर्दोषस्वरूपावस्थानवर्णनम्। अतः सर्वमिदं प्रकरणं जीवविषयमेव न तु ब्रह्मविषयमिति।

१६१। ४ **पाप्मादेरपूर्वस्येति।** अपूर्वे पूर्वशब्दोदितकारणप्रतिद्वन्द्वि कार्यं तेनादिशब्दगृहीतस्य जरादेरप्यपूर्वत्वम्। यद्वा पाप्मादिशब्दः समानाधिकरणबहुव्रीहिसमासरूपो द्विविधस्तन्त्रेणोच्चारितः। तत्राद्येनापूर्वस्येत्यस्यान्वयः। टीकायां निष्प्रपञ्चस्य ब्रह्मणः सकलोपनिषत्तात्पर्यविषयत्ववर्णनं प्रकृतानुपयुक्तमस्थानविजृम्भितमित्याशङ्क्य विकल्पोत्तरत्वेना†वतारयति **जीववादी प्रष्टव्य इति। श्रुत्या प्रजापतिवाक्यउक्तमिति।** ननु श्रुत्यापि निरुपाधौ कथं कामसंकल्पावुक्तौ। उच्यते। मुक्तो यावत्सर्वमुक्ति बिम्बभूतेश्वरभावमापद्यते बहुषु दर्पणेषु मुखप्रतिबिम्बे सत्येकदर्पणापाये तत्प्रतिबिम्बइव यावत्सकलदर्पणापायं बिम्बमुखभावं तावत्पर्य्यन्तं दर्पणान्तरगतप्रतिबिम्बप्रतियोगित्वरूपबिम्बभावाऽनिवृत्तेः ततश्च मुक्तस्य परमेश्वरभावापत्त्या तद्रूपेण कामसंकल्पौ स्वतो निरुपाधिकस्यापि बद्धपुरुषदृष्ट्या संभवत एव। तदभिप्रायेणोक्तं भाष्ये ऽपहतपाप्मत्वादिगुणकं पारमेश्वरं रूपं विद्यया प्रतिपद्यतइति। सूत्रकारो ऽपि ब्राह्मेण जैमिनि‡रिति चतुर्थाध्यायाधिकरणे मुक्तस्य परमेश्वरभावापत्त्याशयेनैव वर्णितगुणाष्टकमुपपादयिष्यति। तस्मादुपपन्नौ कामसंकल्पौ परमेश्वराभेदेन मुक्तस्य प्रत्युत तद्भेद एव जीवस्य शरीरावस्थायामपि तौ न सम्भवतः। न हि तदानीममनस्कस्य तावुपपद्येते।

---

* समुत्थानस्येति २ पु॰ पा॰। † विकल्पान्तरत्वेनेति। ‡ व्या॰ सू॰ अ॰ ४ पा॰ ४ सू॰ ५।

कथं व्युत्क्रमेणेति । ननूपसम्पत्तिः साक्षात्कारः अभिनिष्पत्तिः प्राप्ति- १६१ । १६
रित्यर्थः क्रमाविरोधाय किमिति नादृतः । यथैतान्यमुष्मादाकाशात्समु-
त्थाय परं ज्योतिरुपसंपद्य स्वेन स्वेन रूपेणाभिनिष्पद्यन्तइति दृष्टान्तसङ्गत्य-
नुरोधात् । दृष्टान्तवाक्यस्य ह्ययमर्थः । यथा पूर्वप्रकृतानि वायुरभ्रं विद्युत्
स्तनयित्नुरित्येतानि प्रावृषि वर्षणादिप्रयोजनानन्तरं स्थूलरूपं विहाय सूक्ष्म-
रूपेणाकाशे तदविविक्ततया स्थितानि पुनः प्रावृडारम्भे किं चिदुच्छ्वसितानि
भूत्वा ततो विविक्तानि सन्ति परं ग्रीष्मप्रवृत्तं सौरं ज्योतिः सहकारि प्राप्य
स्वेन स्वेन पुरोवातादिरूपेणाभिव्यज्यन्तइति । एवं च दार्ष्टान्तिकेऽप्युपस-
म्पत्तिः प्राप्तिरेव वाच्येति । **तत्फलं साक्षात्कार इति ।** अस्मिन्पक्षे उप-
सम्पत्तिरेवाभिनिष्पत्तिर्वाच्या । तथैवाचार्यैः सम्पद्याविर्भाव* इत्यधिकरणे
परं ज्योतिरुपसम्पत्तिविवरणरूपतया स्वरूपाभिनिष्पत्तिवाक्यं व्याख्यास्यते ।
अहंशब्द†गोचरमित्यहंकारास्पदमित्यस्य व्याख्या । ननु प्राजापत्यवाक्या-
लोचनया जीवपराभेदसिद्धेः समनन्तरपूर्वग्रन्थप्रतिपादितायाः प्रतिद्वन्द्वितया
जीवब्रह्मभेदाविरोध्यर्थान्तरप्रदर्शकमाचार्यदेशीयमतमुपन्यस्यतइति भाष्या-
र्जवेन प्रतिभाति तत्तात्पर्यप्रदर्शके यदि ह्येतमित्यादिटीकाग्रन्थे अक्षिस्था-
नस्य छायापुरुषत्वासम्भवनिरासोऽनुपयोगीत्याशङ्क्य तदुपयोगसिद्धये दहरो
जीव इति पूर्वपक्षिण एवाचार्यदेशीयकञ्चुकमवलम्ब्य विधान्तरेण प्रत्यवस्था-
नपरमिदं भाष्यमिति योजनार्थतया यदीत्यादिग्रन्थमवतारयति **एकदे-
शीति ।** यदि के चिदित्यादिभाष्यं पूर्वभाष्यप्रतिपादितप्राजापत्यवाक्यार्थ- १६२ । ५
प्रतिद्वन्द्विजीवब्रह्मभेदाविरोधितदर्थान्तरप्रदर्शकमतान्तरोपन्यासमात्रपरं भ-
वेत् तदा तदाशयवर्णनार्थं यदि ह्येतमित्यादिटीकाग्रन्थे ततो न भवेत्
छायापुरुष इति स्थाने ततो न भवेज्जीवब्रह्मभेद इति वक्तव्यं स्याद्
न तथोक्तम् । तस्मादक्षिस्थानस्य छायात्मत्वमङ्गीकृत्य पूर्वपक्षान्तरप्रवर्तने
टीकायास्तात्पर्य्यं गम्यतइति भावः । प्राचीनपूर्वपक्षादस्य पूर्वपक्षस्य विशेषं
वक्तुं साधारणांशं दर्शयति **उक्तं हीति ।** तस्यैवापहतपाप्मत्वादि दर्शयत्ये-
तदमृतमभयमेतद् ब्रह्मेति पूर्वपक्षभाष्ये वाग्बुद्धिशरीरारम्भसम्भवोऽस्य

---

* व्या॰ सू॰ अ ४ पा॰ ४ सू॰ १ । अभिसम्पद्येत्यसूत्रानुमतः पाठः २ पु॰ ।
† अहमिति शब्देति २ पु॰ ।

पाप्मादिः शरीराभावे न भवतीति तट्टीकायां चेति शेषः । यद्यपि छायावदारोपेणेति पक्षो नोक्तः प्रथमपूर्वपक्षे चाक्षिस्थानो न छायापुरुष उक्तः । तथा तदभिप्रायकल्पने त्वेतमित्यक्षिस्थपुरुषानुकर्षणाङ्गीकारोक्तिविरोधः । तथापि स छायापुरुषश्चेदमृतत्वाद्यारोपो वाच्यः । तदारोपो जीवत्वपक्षेऽपि वक्तुं शक्य इत्युपकोसलविद्यागताक्षिवाक्यविषयपूर्वपक्षच्छाययोक्तप्रायमिति भावः ।

नन्वेतमिति* । ननु तत्प्रथमपूर्वपक्षवचनमेतं त्वेवेत्यक्षिस्थानपुरुषानुकर्षणमङ्गीकृत्येति इदानीं द्वितीयपूर्वपक्षे एतमिति† परामर्शस्यान्यविषयत्वमङ्गीकृत्येति च विशेषोऽस्तु नाम तेन प्रथमपूर्वपक्षनिराकरणयुक्तिमनादृत्य द्वितीयपूर्वपक्षोत्थानहेतुः को विशेषो दर्शितः स्यादिति चेदुच्यते । अक्षिस्थानपुरुषाननुकर्षविशेष एव प्रदर्शयिष्यमाणविनिगमनपूर्वपक्षोत्थानहेतुः । एतमित्यनेनाक्षिस्थानाननुकर्षे ह्यक्षिस्थानश्छायापुरुषो भवेदिति तद्वचनं स्वातन्त्र्येणोपास्यत्वपरमतोऽनन्तरपर्य्यायद्वये जीववचनमपि तद्वदेव स्वातन्त्र्येणोपास्यत्वपरं न तु चतुर्थपर्य्यायवक्ष्यमाणब्रह्माऽभेदबोधनार्थमित्यन्यार्थश्च परामर्शः‡ इति प्रदर्शयिष्यमाणन्यायविषयत्वाभावादुत्तरत्र प्रजापतिविद्यायामपहतपाप्मत्वादियुक्तत्वेनोपास्यत्वेन च स्वतन्त्रतया निर्दिष्टयोर्ब्रह्मजीवयोर्मध्ये दहरो ब्रह्मैवेति नियन्तुं न शक्यते । अपहतपाप्मत्वादिगुणवचनेन ब्रह्मपक्षस्येव सुषुप्त्यवस्थापन्नस्वतन्त्रजीवोपन्यासेन जीवपक्षस्याप्युत्थानात् । प्रजापतिविद्यायां सुषुप्तजीवोपन्यासस्य स्वातन्त्र्ये दहरविद्यायामथ एष संप्रसाद इति तदुपन्यासस्यापि तद्वदेव स्वातन्त्र्यापत्त्या तत्रान्यार्थश्च परामर्श इति वक्ष्यमाणन्यायाऽप्रसरात् ।

१६२ । ११ **तदिहापि सूत्रेऽनुसन्धेयमिति** । इतरपरामर्शात्स इति चे§दिति शङ्काभागरूपपूर्वसूत्रोपक्रमे जीवलिङ्गमात्रोपन्यासात् तत्पूर्वसूत्रप्रदर्शितब्रह्मलिङ्गानाम् अन्यथासिद्धवचनादविनिगमेन पूर्वपक्ष इति भाष्यटीकयोर्वर्णितं तदुत्तराच्चे‖दिति सूत्रेऽप्याचार्यदेशीयमतोपन्यासव्याजेन प्रवर्त्तमानेऽस्मिन् पूर्वपक्षे समानमित्यर्थः ।

---

* एतं त्वेव तइति २ पु० पा० ।

† एतदितीति २ पु० पा० ।

‡ व्या० सू० अ० १ पा० ३ सू० २० ।

§ व्या० सू० अ० १ पा० ३ सू० १८ ।

‖ व्या० सू० अ० १ पा० ३ सू० १९ ।

प्रथमपूर्वपक्षस्तु नाविनिगमेन प्रवृत्तः । प्रजापतिविद्यायामपहतपाप्-
मत्वादिर्जीवस्यैव धर्म इति निश्चयेन तत एव लिङ्गाद्दहरो जीव इति
निश्चित्य तत्प्रवृत्तेः । यद्वा प्रथमपूर्वपक्षोऽप्यविनिगमेन प्रवृत्त इति तात्पर्यम् ।
अत्रापि बाह्याकाशोपमानगतिशब्दधृतीनामन्यथासिद्ध्यनुक्तेः । ननु वाक्यो-
पक्रमगतस्य परमात्मनः परामर्शादित्येतदनन्तरवाक्योपक्रमगतस्य परामर्शः
किं न स्यादिति शङ्कानिराकरणार्थत्वेन न खलु जीवात्मन* इत्यादिटीकाग्रन्थः
प्रवृत्त इति प्रतिभाति तस्य च तादर्थ्यं न सम्भवति अक्षिस्थानो जीव
इति पक्षं विहाय छायापुरुष इत्यङ्गीकृत्य पूर्वपक्षान्तरप्रवर्तनार्थत्वेन यदी-
त्यादिटीकाग्रन्थस्यावतारणादित्याशङ्क्य परमात्मनः परामर्शादिति वाक्योप-
क्रमे जीवपरामर्शप्रत्याख्यानमयुक्तं तयोरभेदादिति शङ्कानिराकरणार्थत्वेन
न खल्विति ग्रन्थमवतारयति **नन्विति । दृष्टे सम्भवतीति** । ननु पर- १६२ । १७
मात्मनि धीनिवेशायोपास्त्यर्थत्वे ऽपि दृष्टार्थत्वं न हीयतइति चेन्न ।
उपास्तिविध्यङ्गीकारे परमात्मनि चित्तैकाग्र्यमनयैवोपासनया सम्पादनीयमिति
नियमविधित्वस्याङ्गीकर्तव्यत्वेन नियमादृष्टकल्पनागौरवसत्त्वादिति भावः ।
ननु मतान्तरमाहेत्ययुक्तं मतद्वये ऽपि जीवब्रह्मभेदाविशेषाद् विशेषकान्त-
राऽनुक्तेश्चेत्याशङ्क्याह **अस्य चेति । औपाधिक**स्तात्त्विकोपाध्यवच्छिन्नः ।
एतदिति क्रियाविशेषणमित्यस्य विवरणम् **एतत्स्वप्नमिति** । स्वप्नं यथा
भवति तथा स्वपितीत्यभेदे ऽपि क्रियाविशेषणतया कर्मता पाकं पचती-
तिवत् । अत्र ब्रह्मलिङ्गानां प्रजापतिविद्यानुसारेण जीवलिङ्गत्वशङ्काकलुषित-
त्वाद् ब्रह्मलिङ्गत्वमस्पष्टं तस्य स्पष्टत्वे ऽपि अन्तर्वर्त्यन्वयावभासाद्दहरा-
काशान्वयित्वं न स्पष्टमित्यस्पष्टब्रह्मलिङ्गता† ॥

अनुकृतेस्तस्य च ॥ २२ ॥ १६३ । १०

सति विषये च साधारण्यादिति । ननु साधारण्यमसिद्धं वैष-
यिकाधिकरणकारकविभक्तेर्यस्य च भावेन भावलक्षणमित्युपपदविभक्तितो
बलीयस्त्वादिति चेन्मैवम् । णिजर्थाध्याहारसापेक्षकारकविभक्तेरुपपदविभ-
क्तेश्च बलाऽबलनिर्द्धारणाशयेन साधारण्योक्तेः पूर्वपक्षावतारिकया तथा
तदाशयविवरणात् ।

---

* जीवात्मक इति २ पु॰ पा॰ । † अत्र पञ्चमं **दहराधिकरणम्** उत्तराधिकरणं वा पूर्णम् ।

१६३ । १० **पूर्वमिति ।** ननु प्रथमपूर्वपक्षे तावदेतमित्यस्य प्रकृतार्थत्वं दहरो जीव इति शङ्कानिरासे न हेतुः तत्र तस्य प्रकृतार्थत्वहेतुनैव तथा शङ्कोत्थानात् । न च तस्याप्रकृतार्थत्वसम्भवस्तथाशङ्कानिरासासम्भवे हेतुः । ततो जीवे ऽपहतपाप्मत्वादिसद्भावमूलशङ्कानिरासस्यैव सिद्धेः । द्वितीयपूर्वपक्षे ऽपि तदुक्तशङ्कानिरासे न हेतुः । तत्राप्येतमित्यस्य वाक्योपक्रमप्रकृतापहतपाप्मत्वादिगुणकात्मार्थत्वावलम्बनेनैव तथा शङ्कोत्थानात् । तत्रापि तस्याप्रकृतार्थत्वसम्भवस्तथाशङ्कानिरसनासम्भवे न हेतुः । स्वप्नादिपर्य्यायेष्वेतमित्यस्य प्रकृतमसंस्पृश्य स्वस्ववक्ष्यमाणार्थमात्रपरामर्शित्वे ऽक्षिस्थच्छायात्मा स्वप्नसुषुप्तिपर्याययोरुक्तो जीवश्च तथा तयोपास्यश्चतुर्थपर्यायोक्तं ब्रह्म ज्ञेयमिति कल्पने प्रकृतस्याऽपहतपाप्मत्वादिगुणकस्येन्द्रविरोचनाभ्यां पृष्टस्यात्मनः क्व चिदप्युक्तिर्न लभ्येतेति दोषापत्त्या तत्परिहारार्थमक्षिपर्यायस्तद्विषय इति तत्रापहतपाप्मत्वाद्यसम्भवेनापरितोषात् पुनः पुनरागतमिन्द्रं प्रति स एवोपदिष्ट इति च वक्तव्यत्वेन स्वतन्त्रजीवोपास्तिविधानरूपदृष्टान्ताऽसम्प्रतिपत्त्या तन्मूलाया जीवो दहर इति शङ्कायाः सर्वनाम्नः प्रकृतार्थत्वनियमाभावेन हेतुना प्रतिष्ठापनालाभात् । अक्षिपर्यायस्य छायात्मोपास्तिपरत्व हि तत्रापरितोषादागतमिन्द्रं प्रति ततो ऽन्यस्य जीवस्योपास्त्युपदेश इति वक्तुं शक्यम् । तस्य प्रकृतात्मोपदेशपरत्वे तु छायापुरुषस्यापहतपाप्मत्वादिकं न सम्भवतीत्यपरितोषादागतं प्रति तदीयभ्रान्त्यपनयनेन प्रकृत एवात्मा प्रकारान्तरेणोपदेष्टव्यः । अतः प्रकृतार्थत्वादिति शङ्कानिरासे प्रकृतार्थत्वनियमाभावादिति शङ्कानिरासासम्भवे च हेतुत्वेनोक्तिर्न युक्तेति चेत् । उच्यते । प्रथमपूर्वपक्षे तावद् एतमित्यस्य प्रकृतार्थत्वहेतुनोत्थितो जीवो दहर इति शङ्का तस्य पूर्वपक्ष्यभिमतं प्रकृतार्थत्वमेव जीवब्रह्माभेदसिद्धिप्रत्याशया समाश्रित्य जीवस्यावस्थात्रयोत्तीर्णस्य तुर्य्यपर्य्याये ब्रह्मभावोक्तेरपेतजीवभावं ब्रह्मैवापहतपाप्मत्वादिगुणकं न जीव इत्युपपादनेन निरासि । तदसाधु । तस्याप्रकृतार्थत्वसम्भवे ततो जीवब्रह्माऽभेदाऽसिद्धेरित्याक्षेपः । तत्र प्रकृतार्थत्वादिति शङ्कान्वये हेतुपञ्चमी शङ्कानिरासान्वये ल्यब्लोपे कर्मण्युपसंख्यानमिति पञ्चमीति भेदः । तथा द्वितीयपूर्वपक्षे

द्वितीयादिपर्यायगतस्य एतमित्यस्य* वाक्योपक्रमप्रकृतापहतपाप्मत्वादिगुणकात्मार्थत्वाद्दहरो जीव इति शङ्का तस्य प्रकृतार्थत्वात्सन्निहिताक्षिस्थार्थत्वाद् निरासि । तदसाधु । द्वितीयादिपर्यायगतस्यैतमित्यस्याप्रकृतार्थत्वसम्भवेनाक्षिस्थपरामर्शित्वासिद्ध्या तन्मूलकजीवब्रह्माऽभेदासिद्धेरित्याक्षेपः । अस्यां योजनायां प्रकृतार्थत्वादिति शङ्कान्वये तन्निरासान्वये च हेतुपञ्चम्येव शङ्कानिरासान्वये सन्निहितार्थत्वादिति तदर्थ इति विशेषः । यद्यपि सन्निधिः प्रकरणाद्दुर्बलः तथापि वाक्योपक्रमप्रकृत एवात्मा ऽक्षण्युपदेश्य इति प्रकरणानुगुणसन्निधिर्न तेन बाध्यः । ननु सर्वनाम्नः प्रकृतार्थत्वनियमाभावे ऽपि भूय इति नो एवान्यच्चेत्येताभ्याम् एतमित्यस्य प्रकृतार्थत्वं भवेदिति नाक्षेपसिद्धिरिति चेत् । मैवम् । तथा नियमाभावे भूय इत्यस्य पुनरपि किं चिदन्यद्वक्ष्यामीत्याशयेोपपत्तेः । नो एवान्यदित्यस्य इतो ऽन्यत्किं चित्पञ्चमपर्यायमुपक्रम्य न वक्ष्यामि अस्मिन् चतुर्थपर्य्याये वक्ष्यमाणेनैव समापयिष्यामीत्यर्थोपपत्तेः ।

भासकत्वे सतीति । तेजोभासकत्वे सतीत्यर्थः । तथैवोत्तरत्र १६३ । १९
शङ्कापरिहाराभ्यां तदर्थं स्पष्टीकरिष्यति । इदं च तेजोविशेषणं घनकुड्यादौ विषयतया स्वभानहेतौ व्यभिचारतादवस्थ्यमिति शङ्कापरिहारार्थम् । यद्यपि घनकुड्यादेः सूर्यदीपाद्यभिभावकत्वं नास्ति घनकुड्याद्यावरणे सति चक्षुःसन्निकर्षाभावात् सूर्यदीपाद्यग्रहणोपपत्तेः । तथापि सुवर्णतेजः तदुपष्टम्भकपार्थिवभागाभिभूतं सह स्वकीयेन शुक्लभास्वररूपेण न स्पष्टमुपलभ्यतइति मतानुसारेण तत्र व्यभिचारवारणार्थं तद्विशेषणम् । सूर्यादिकं न भातीत्यस्यापि बलवता तेजसा ऽभिभूतं न स्पष्टं भातीत्येवार्थो न तु सर्वथैव न भातीति प्रत्यक्षविरोधात्पूर्वापरविरोधाच्च । न हि यस्मिन्सति यत्सर्वथैव न भाति तत्तमनुभातीति युक्तम् । न खलु यस्मिन् गच्छति यो न गच्छति स तमनुगच्छति । अतो हेतौ विशेष्यभागस्य† स्पष्टतेजोभानविरोधित्वमेवार्थ इति युक्तमुपष्टम्भकपार्थिवभागे व्यभिचारवारणार्थं विशेषणमिति ।

यदि तेजोन्तराऽदृष्टमपि सूर्यादिप्रकाशकत्वं क्व चित्तेजसि कल्प्यते तर्ह्येतेजसैव ब्रह्मणा सूर्यादीनामभिभवस्तदनुकरणं च कल्प्यतां मन्त्रस्य

---

* एतमित्यस्येति नास्ति २ पु॰ ।   † विशेषभागस्येति २ पु॰ पा॰ ।

प्रकरणाद् ब्रह्मपरत्वावश्यंभावेन श्रुतिवशात्किंचिदसिद्धार्थाश्रयणे प्रकरणानु-
१६३ । २१ रोध्यर्थाश्रयणस्यैवोचितत्वादित्याशङ्क्याह **अभिभवानुकारयोरिति** । ननु
ब्रह्मपक्षे द्वयमप्रसिद्धं कल्पनीयं तेजःपक्षे त्वेकमेवेति नायं विशेषः ।
तेजःपक्षे तथाभूतस्य धर्मिणः तेजसोऽप्यप्रसिद्धस्य कल्पनीयत्वादित्याश-
ङ्क्याह **इति पूर्ववाद्याशय इति** । अयमिह तस्याशयो विवक्षितः । तेज-
सस्तेजःप्रकाशकत्वं नादृष्टचरं लाघवेन तेजोविरोधिभिन्नचाक्षुषत्वावच्छिन्ने
तेजोपेक्षाङ्गीकारात् । दीपे तत्संयुक्तस्यालोकस्यालोके परस्परसंयुक्तानेककिर-
णात्मके तत्तत्संयुक्तकिरणस्य च तेजसः सत्त्वाद् अन्ततः सर्वच तत्तदवय-
वावयवसत्त्वाच्च तद्रहितस्य त्रसरेणोर्जालान्तरागतालोकएव भानात् । एवं
चाभिभवानुकारलिङ्गद्वयबलात् तेजसस्तेजःप्रकाशकत्वाविरोधाच्च तेज एव
किञ्चिन्मन्त्रप्रतिपाद्यमिति निश्चये सति भूतयोनिब्रह्मप्रकरणं नादरणीयं
लिङ्गाभ्यां तस्य बाधादिति । **तस्य सर्वज्ञत्वइति** । ननु सर्वज्ञत्वं तस्य
भासेत्यस्यार्थो मा भूत्कल्पनीयस्य तेजसः सर्वप्रकाशकत्वं तदर्थोऽस्तु
श्रुतिवशात्तस्य तथात्वाङ्गीकारोपपत्तेरिति चेन्न । तथा सति तेजोन्तरस्य चाक्षु-
षाऽचाक्षुषसाधारण्येन तस्य सर्वप्रकाशकतया च* कल्पनीयत्वेन सिद्धान्ते
समारोपितस्य गौरवस्य पूर्वपक्षे प्रसरापत्तेरिति भावः । प्रस्तुतसूर्यादिपरा-
मर्शीदंशब्दसमभिव्याहारात् सर्वशब्दः सङ्कुचितवृत्तिरिति परिहाराभिप्रायः ।
उपरिष्टादिति । अग्रे स्वेन स्वेन बोधयिष्यमाणएवार्थे वर्तिष्यन्तइत्यर्थे
न त्वग्रिमवाक्यान्तरेण तत्तद्वाक्यगतपदान्तरेण वा बोधयिष्यमाणे एवार्थे
वर्तिष्यन्तइति । तच तं तस्येति तत्पदघटितवाक्यत्रयव्यतिरेकेण तत्परा-
मर्शनीयालौकिकतेजोविषयस्य वाक्यान्तरस्य पदान्तरस्य चादर्शनात् प्रदर्श-
नीयमेवेति टीकाया अपि स्वस्वप्रदर्शनीयएव स्वारस्याच्च । ननु तच्छब्दस्य
प्रकृते प्रकरिष्यमाणे प्रत्यक्षादिसन्निधापिते प्रसिद्धे चार्थे वृत्तिर्व्युत्पत्तिसिद्धा
न क्व चिदपि स्वपरामर्शनीयएवार्थे पर्यवसानं दृष्टमित्याशङ्क्य तदपि दृष्ट-
१६४ । ४ मिति दर्शयितुमुदाहृतं पाणिनिसूत्रद्वयं व्याचष्टे **रागवाचिन इति** । न
प्रकृतार्थावित्युपलक्षणं नापि प्रकरिष्यमाणार्थौ न मानान्तरसन्निधापितार्थौ
न च प्रसिद्धार्थावित्यपि द्रष्टव्यम् । नन्वनुमानं ब्रह्मण्येव लिङ्गम् । ब्रह्मणि

---

* प्रकाशकतया चेति २ पु. पा. ।

भासमाने तदध्यस्तसूर्यादेस्तदनुभानसम्भवादित्येतदयुक्तम् । सूर्यादिषु ब्रह्म-
भानान्यभानाभावात् । गच्छन्तमनुगच्छतीत्यत्र गमनभेदे सत्येव ह्यनुशब्दो
दृष्टः । उच्यते । गच्छन्तमनुगच्छतीत्यत्र तद्गमनानुकारिगमनान्तरमिवात्र
तद्भानानुकारि भानान्तरं नोक्तं* तमेव भान्तमिति तस्यैव भानवत्त्वोक्तेः । न हि
यत्र क्रियाभेदो ऽस्ति तत्रैवमवधारणं युज्यते । युज्यते तु क्रियाभेदाभावस्थले
वह्निमेव दहन्तं तप्तायःपिण्डो ऽनुदहतीति । तथा च भारूपे† ब्रह्मणि
अध्यस्तानां सूर्यादीनां तत्सत्तयैव सत्त्ववत्तद्भानेनैव भानवत्त्वे ऽप्याश्रयभेदेन
क्रियाभेदं कल्पयित्वा अनुभातीति व्यपदेशः । **अपि च तेजःपक्ष इति** । १६४ । ९
तस्मिन् पक्षे प्रसिद्धविलक्षणं किं चित्तेजस्तावत्कल्पनीयम् । तत्प्रतिपादनवै-
यर्थ्याय तदुपासनविधिस्तत्फलं च कल्पनीयमित्यतिगौरवं ब्रह्मप्रकर-
णबाधश्चेत्येते दोषाः स्युरित्यर्थः । **भासमानतेजसेति** । प्रभान्तर्गतकि-
रणानां तत्संवलितकिरणान्तरसंयोगेन भानं चेत्तत्र संयोगस्तत्रैव भानं
स्याद् घटादिष्वालोकसंयुक्तप्रदेशएव भानदर्शनात् । न चैतदस्ति ।
आलोकावयवान्तरासंयुक्तस्य तमःसंनिकृष्टस्य दीपालोकावध्यवयवभागस्यापि
भानात् । तस्माद् भासमानतेजसा न सूर्यादितेजो भाति किं तु स्वत
एवेति भावः । **क्रियासाम्याभावो ऽसिद्ध इति** । वराहं गावो ऽनुधा-
वन्तीत्यत्र त्वनुधावन्तीत्यनेन बाधितस्वार्थेन मुखं चन्द्रमनुकरोतीत्यत्रा-
नुकरोतीत्यनेनेव स्वरूपसाम्यमुक्तमिति सूत्रकारार्थग्रहणम् । इहानुभातीति
क्रियासाम्योक्तौ तन्निर्वाहायानपेक्षितं स्वरूपसाम्यं नादरणीयमिति भावः ।
रूपैकार्थसमवायिनः चक्षुर्योग्याः संख्यादयः । **संकुचेदिति** । सिद्धान्ते
तु न सङ्कोचः । इदंशब्दस्याप्यसङ्कोचेन प्रत्यक्षादिसन्निधापितसकलवस्तु-
परत्वोपपत्तेरिति भावः । **रूपादिष्विति** । पञ्चस्विति शेषः ।

प्रकृतेः पर इति । ननु सूत्रव्याख्यानस्य पाश्चात्यत्वेन ततः १६५ । ३
प्रकृत्यर्थविशेषलाभस्य नास्ति पूर्वप्रवृत्तत्वं तथात्वे वा ऽभिभवादिलिङ्गमालोच्य
सूर्याद्यभिभावकमलौकिकं तेजोन्तरमस्य मन्त्रस्य प्रतिपाद्यमिति व्याख्याने
तेजसः प्रकृतत्वमस्तीति स्यात् । मैवम् । तेन रक्तं रागादित्यादिसूत्रैः सिद्ध-

* भानानुकारि भानोक्तमिति १ पु॰ पा॰ । † भानरूपे इति २ पु॰ पा॰ ।

शब्दान्वाख्यानं कुर्वतः पाणिनेः कौसुम्भमौपमन्यव इत्यादिसिद्धशब्दरूपाण्युदाहरणानि तद्व्याख्यानरूपाणि विग्रहवाक्यानि च मनसि विपरिवर्तन्त इति विग्रहवाक्यस्थैः कुसुम्भादिशब्दैस्तत्तदर्थस्य प्रस्तुतत्वमस्तीति तात्पर्यात् । यद्वा तेन रक्तमिति सूत्रे रञ्जकद्रव्यवाचिना प्रकृतिसमर्पकेण रागशब्देन रञ्जकद्रव्यविशेषवाचकाः कुसुम्भहरिद्रादिशब्दा लक्षणीया इति तैः प्रकृत्यर्थविशेषलाभः तस्यापत्यमिति सूत्रे ङ्याप्प्रातिपदिकादिति सूत्रानुवृत्तस्य प्रकृतिसमर्पकस्य प्रातिपदिकशब्दस्याऽपत्यार्थप्रत्ययप्रकृतित्वयोग्योपमन्य्वादिप्रातिपदिकविशेषपर्य्यवसानात् तैः प्रकृत्यर्थलाभः । रागप्रातिपदिकशब्दयोः समानवाक्योपात्तत्वे ऽप्यर्थगत्या पूर्ववृत्तत्वं विवक्षितम् । वस्तुतस्तु द्विविधाः सर्वनामशब्दाः समभिव्याहृतपराः व्यवस्थितैकार्थपराश्च ।

यस्य यस्य हि यो भावस्तेन तेन हि तं नरम् ।
अनुप्रविश्य मेधावी क्षिप्रमेव वशं नयेत् ॥

तद्वति तत्प्रकारकज्ञानं प्रमेत्यादिषु ये व्यवस्थितैकार्थशून्यास्ते तत्तदभिमतार्थपरव्याख्यानशब्दसमर्पितानर्थविशेषानासाद्य निर्वृणवन्ति । तेन रक्तमित्यादिशब्दा अपि तथाभूता इति न तेषां पूर्वप्रकृताद्यपेक्षा । इह तु मन्त्रे तच्छब्दाः स तेषां प्रतिशुश्रावेत्यादिश्लोकगता इव व्यवस्थितैकार्थपरा इति तेषां प्रकृताद्यपेक्षा ऽवश्यंभाविनीति तात्पर्यम् । ननु दहरविद्यायां तं चेद्ब्रूयुर्यदिदमस्मिन् ब्रह्मपुर इत्यादिवाक्ये तमित्यस्याचार्यरूपव्यवस्थितैकार्थपरस्यापि प्रकृताद्यपेक्षा न दृष्टा । नैष दोषः । तत्राप य एष संप्रसाद इत्यादिवाक्ये एष आत्मेति होवाचेत्यत्रोवाचेत्यस्य कर्तृविशेषाकाङ्क्षायामौचित्यादाचार्य्य इत्यध्याहरणीयम् । तस्य चोवाचेत्यस्य ब्रूयादित्यर्थो वाच्यः । यथा तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदित्याद्याथर्वणमन्त्रसंदर्भे

तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ इत्यत्र ।

ततश्च तं चेद्ब्रूयुरित्याक्षेपवाक्योपक्रमे स ब्रूयादिति समाधानवाक्योपक्रमे च स एवाचार्यः परामर्शनीयो भविष्यति ।

णिजध्याहारं परिजिहीर्षता कथं प्रकाशकत्वेनेत्यध्याहृतमिति शङ्कां वारयति **विषये इति**। विषयनिर्देशसामर्थ्याद्विषयित्वेन न भातीति लभ्य- १६५ । तइत्यर्थः । ननु विषयित्वेन न भातीति विशिष्टनिषेधस्य शाब्दत्वसिद्ध्यर्थं विषयित्वेनेति शब्दो ऽध्याहर्तव्यः । सत्यम् । विशेष्यमात्रनिषेधे प्रत्यक्षविरोधः स्यादिति किं चिद्विशेषणाध्याहारावश्यम्भावे कारकसप्तम्यर्थविषयत्वाक्षिप्ततया विषयित्वस्य बुद्धिस्थत्वात् तद्वाचक एवाध्याहर्तुमुचितो न स्पष्टत्वादिवाचकः । न चाप्रसक्तप्रतिषेधदोषः । रूपादिमत्त्वभ्रान्त्या प्रसक्तस्य सूर्यादिप्रकाश्यत्वस्य न चक्षुषा पश्यति कश्चिदेनमिति चाक्षुषत्वस्येव निषेधोपपत्तेः । ननु कुतो ऽयमग्निरिति कैमुतिकन्यायानन्वयः* । यदतिसूक्ष्मं वस्तु सूर्यादयो ऽपि प्रकाशयितुं नेशते तद्दीपः प्रकाशयिष्यतीति का प्रत्याशेत्येवं सौक्ष्म्यातिशयस्तुत्यर्थतया ऽन्वयोपपत्तेः । प्रत्युताभिभावकत्वपक्षएव तस्य भासेत्यादेरनन्वयः स्यादभिभावकस्य प्रकाशकत्वायोगात् । तद्लौकिकं सर्वप्रकाशनसमर्थं तेजोन्तरं सर्वदा सर्वत्र स्थितं चेत् चन्द्रसूर्यदीपादीनामभावे ऽपि घटादिस्फुरणं स्यात् । तस्य चन्द्रादिप्रभानुविधायित्वाङ्गीकारे चन्द्रसूर्यदीपादिप्रभासु घटादीनां तुल्यरूपः स्पष्टः प्रकाशः स्यात् । तस्य चन्द्रप्रभाद्यनुविधायिप्रकाशतारतम्यस्याप्यङ्गीकारे चन्द्रप्रभाद्यतिरेकेणानुपलभ्यमानस्य तस्य पर्यायान्तरेणाभाव एवोक्तः स्यादिति दोषाः स्युरिति द्रष्टव्यम् । अत्रानुमानस्य तेजोलिङ्गत्वं निरस्य ब्रह्मलिङ्गत्वं समर्थनीयमासीदित्यस्पष्टता† ॥

शब्दादेव प्रमितः ॥ २४ ॥

परिमाणविशेषवन्मात्रवाचीति। परिमाणविशेषवानङ्गुष्ठपरि- ,, । १४ माणवान् । अङ्गुष्ठमात्र इत्यत्र मात्रशब्दः प्रमाणवाची । प्रत्ययः प्रमाणे द्वयसज्दघ्नञ्मात्रच इति सूत्रेणानुशिष्टः । तन्मात्रवाची तत्सामान्यवाची । **तद्विशेषे श्रुतिरेवेति**। ननु दहरशब्दवदङ्गुष्ठमात्रशब्दो ऽल्पपरिमाणरूपे जीवलिङ्गएव श्रुतो न तु तद्वति जीवरूपे धर्मिविशेषे । यद्येवं भूतभव्यशब्दसमभिव्याहृत ईशानशब्दो ऽपि भूतभव्येशितृत्वरूपब्रह्मलिङ्गएव श्रुतिर्न

---

* न्यायोपन्यासानन्वय इति २ पु॰ पा॰ ।

† अत्र षष्ठं (सप्तमं वा) अनुकृत्यधिकरणं पूर्णम् ।

ब्रह्मणीति तुल्यं योगरूढिमत: शब्दस्य यौगिकार्थसम्बन्धिनिर्देशे रूढ्यनुन्मेषस्य पद्मानि यस्यामसरोरुहाणीत्यादिषु दर्शनादिति भाव: । यदि त्वीशानशब्द: श्रुतिरेवाङ्गुष्ठमात्र इति लिङ्गं तदा प्राथमिकलिङ्गस्य पाश्चात्त्यश्रुतेश्च बलाऽबलानवधारणात्संशय इत्याशयेनाह **यद्यत्रेति । शङ्कानिरास इति ।** अङ्गुष्ठमात्रश्रुत्या सह जीवग्रहणे युक्त्यन्तरमपि चेत्यनेन समुच्चेयं न भवति तत्र युक्त्यन्तराऽकथनात् किं त्वङ्गुष्ठमात्रश्रुतेरेव ब्रह्मणि संभवशङ्कानिरास: समुच्चेय इत्यर्थ: । परमात्मनो हृत्पुण्डरीकस्थानत्वस्य युक्तत्वोपन्यास: प्रकृतानुपयोगीत्याशङ्क्य तत्परमात्मनोऽल्पत्वे कारणमित्येतदुक्तमित्यध्याहृत्य व्याचष्टे **परमात्मन इति ।**

हृत्पुण्डरीकोपाध्यवच्छेदकारणकमल्पत्वं ब्रह्मणो युक्तं चेत्तदेवेहाऽय-
।६५ । २५ ङ्गुष्ठमात्रशब्देनोच्यतामित्याशङ्क्याह **उपाधिं संकीर्त्येति ।** उपाधिसंकीर्तनपूर्वकमुच्यमानमल्पत्वं स्वाभाविकाऽनन्तत्वाऽपारत्वाऽविरोधि भवति इह तु तत्कीर्तनं विनैवाल्पत्वमुच्यतइत्यस्य ब्रह्मविषयतायामिदं स्वाभाविकानन्तत्वादिना विरुध्येतेति भाव: । नन्वप्रयोजकमिदं यदुपाधिसंकीर्तनएवौपाधिकं सिध्यतीति तदभावे ऽप्यन्तत्वादिश्रुत्यनुसारेणौपाधिकत्वसिद्ध्युपपत्ते: । अन्यथा अणोरणीयान्महतो महीयानित्यादिश्रुतिषु का गति: । किं चैवं सत्यनियतपरिमाणान्त:करणोपाधिकजीवविषयत्वमप्यस्याङ्गुष्ठमात्रत्वश्रवणस्य न सिद्ध्येद् हृदयोपाधिसंकीर्तनाभावात् । यदि तस्य स्वोपाध्यन्त:करणद्वारा प्रायिकं हृदयस्थत्वं प्रसिद्धं न वक्तव्यं तर्हीश्वरस्य नियतहृदयस्थत्वं श्रौतहृदयशब्दनिरुक्त्या ईश्वर: सर्वभूतानां हृद्देशे ऽर्जुन तिष्ठतीति स्मृत्या च प्रतिपादितं प्रसिद्धतरमिति सुतरां न वक्तव्यम् । न च वाच्यं ब्रह्मणो हृदये अतिसूक्ष्मत्वस्य दहरशाण्डिल्यविद्ययोरुक्तत्वात्तस्य तदुपाधिकमङ्गुष्ठमात्रत्वं न संभवतीति तर्हि जीवस्याप्याराग्रमात्रत्वेन वालाग्रशतभागशतांशमितत्वेन च श्रुतस्य तन्न संभवति । अथोच्येत श्वेताश्वतरे प्राणाधिप: संचरति स्वकर्मभिरिति जीवं प्रकृत्य अङ्गुष्ठमात्रो रवितुल्यरूप: संकल्पाहंकारसमन्वितो य इत्याहत्य तस्याङ्गुष्ठमात्रत्वं श्रुतं भारते पि दृष्टम् अतस्तस्याराग्रमात्रत्वादिश्रवणं सूक्ष्मसूक्ष्मतरनाडीसंचाराद्युपाधिकं कल्प्यमिति तर्हीश्वरस्याप्यङ्गुष्ठमात्र: पुरुषो ऽङ्गुष्ठं च समाश्रित: ईश: सर्वस्य जगत: प्रभु: प्रीणाति

विश्वभुगिति तैत्तिरीयमन्त्रे अङ्गुष्ठमात्रः पुरुषो ऽन्तरात्मा सदा जनानां हृदि संनिविष्टः हृदा मनीषा मनसाभिक्लृप्तो य एनं विदुरमृतास्ते भवन्तीति श्वेताश्वतरमन्त्रे चाङ्गुष्ठमात्रत्वमाहत्य श्रुतमिति दहरशाण्डिल्यविद्ययोरुक्तमिति सोऽस्यं हृदयाग्रसुषिरोपाधिकं कल्प्यमिति तुल्यं तस्माद्वक्तव्यमिदं केन विशेषेणाङ्गुष्ठमात्रत्वश्रवणस्य ब्रह्मविषयत्वे सति उपाधिसंकीर्तनापेक्षा न जीवविषयत्व इत्यभ्युपगतमिति । उच्यते । ब्रह्मविषयमङ्गुष्ठमात्रत्वश्रवणमुपाधिसंकीर्तनानियतं दृष्टं जीवविषयं तु तत्संकीर्तनरहितमपि* । अत उपाधिसंकीर्तनरहितमिदं जीवविषयमेव भवितुमर्हतीत्यभ्युपगतम् ।

स्वस्य भवितुरनिर्देशे तदनिर्णयस्य स्वभावाऽनिर्णयपर्यवसानेन प्रकृतोपयोगमाह स्वो यो भवितेति । उदासीने स्वरूपे इति । उदासी- १६६ । ३
नस्वभावो भवतीत्यर्थः । सकनिष्ठिक इति । मुक्तकनिष्ठिक इत्यर्थः । नन्वेतद्वै तदिति तच्छब्दो† ऽन्यत्र धर्मादिति प्रकृतं ब्रह्म परामृशेदित्याशङ्क्य पूर्वपक्षे तत्संगमयति एतदिति । अन्यत्र धर्मादिति प्रस्तुतेति । येयं प्रेते इति प्रश्नस्य अन्यत्र धर्मादिति पुनः प्रवर्तने परमात्मविषयतया विवृतत्वात्तदुत्तरगतस्याङ्गुष्ठवाक्यस्य प्रतिपिपादयिषितजीवाभिन्नपरमात्मविषयत्वे सम्भवति केवलजीवपर्यवसानकल्पनं न युक्तमिति भावः । ननु सर्वगतस्यापि ब्रह्मण इत्यादिभाष्यवाक्यं यदि जीवाभिप्रायं तर्हि भाष्यगतस्य ब्रह्मशब्दस्य किं जीवे लक्षणा नेत्याह जीवभावापन्नेति । ब्रह्मैव जीवभावेन वर्तत इत्यभिप्रायो भाष्ये ब्रह्मशब्द इत्यर्थः । कस्य चिन्मुमुक्षोः असंन्यासिनः । एतेन काम्यग्रहणं मोक्षमाणमात्रान्वयीति दर्शितम् । स्वकीयस्येति । आत्मनो दीयमानस्य स्वत्वनिवृत्त्यसंभवादिति भावः । ऋष्यन्तराभावादिति । वसिष्ठादीनामार्षेयवरणे वरणीयवसिष्ठान्तराद्यभावादित्यर्थः । अत्र ऋषिदेवताधिकारविचारे वक्तव्यं देवताधिकरणे‡ वक्ष्यते ।

सिद्धान्तिनापीति । ननु यदि सिद्धान्तिना ऽप्यङ्गुष्ठमात्रः पुरुष „ । २२
इत्येतदनुवाद्यजीवविषयमभ्युपगम्यते कथं तर्हि संशयप्रदर्शनग्रन्थे मन्त्रस्य

---

* अपि दृष्टमिति २ पु· पा· ।   † नन्वेतदिति तच्छब्द इति २ पु· पा· ।
‡ व्या· सू· अ· १ पा· ३ सू· २६-३३ ।

परमात्मपरत्वं पक्षे परिमाणविशेषो न मुख्य इत्युक्तं कथं च परिमाणं जैवं पारमेश्वरं वेति संशय इत्युक्तम् । उच्यते । अस्य मन्त्रस्याङ्गुष्ठमात्रः पुरुषो ऽन्तरात्मेत्यनन्तरमन्त्रवदङ्गुष्ठमात्रजीवानुवादेन तस्य ब्रह्माऽभेदबोधनपरत्वे श्रुतस्याङ्गुष्ठपरिमाणस्योपमर्दो भवति यो ऽयमन्तःकरणोपाधिको ऽङ्गुष्ठमात्रः प्राप्तो जीवः स न तथा मन्तव्यः किं त्वसंकुचितसकलभूतभविष्यद्वर्तमानवस्तु- नियन्तृत्वप्राप्तसकलान्तरावस्थानतया व्यापकः परमात्मैव मन्तव्य इति । एवं च यथा ऽप्यग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थे ग्राह्य इति राजन्य- निमित्तषोडशिग्रहयागाभ्यासविधौ राजन्यस्योक्थसंस्थो ऽग्निष्टोमसंस्थो वा यः क्रतुः प्राप्तः स न तथा कर्तव्यः किं तु षोडशिसंस्थः कर्तव्य इति विधी- यमानया षोडशिसंस्थयोक्थाग्निष्टोमसंस्थोपमर्दः एवमिह भूतभव्यनियन्तृ- परमेश्वराभेदबोधनेन जीवस्याङ्गुष्ठपरिमाणोपमर्द एव तस्या मुख्यता विव- क्षिता । एवं तर्हि मन्त्रस्य परमात्माभेदपरत्वपक्षे भूतभव्यनियन्तृत्वस्या- प्युपमर्दो ऽस्तीति तस्मिन् पक्षे कथं विशिष्य परिमाणविशेषस्यामुख्यतोक्तिः । सत्यम् । तदुपमर्दो न जीवलिङ्गकृतः किं तु ब्रह्माभेदरूपवाक्यार्थविरोध- कृतः । जीवलिङ्गोपमर्दस्तु ब्रह्मलिङ्गादिकृतः ब्रह्मश्रुतिलिङ्गप्रकरणपरामर्शे- नैव कृत्स्नस्य मन्त्रस्य जीवपरत्वमपोद्य जीवानुवादेन ब्रह्माभेदपरत्वपक्ष- स्योन्मेषणीयत्वात् । अनेन विशेषेण सिद्धान्तपक्षे परिमाणविशेषस्यैवामुख्य- त्वमुक्तं पारमेश्वरं वेत्येतत्तु श्रुत्याद्यापादितपरमेश्वरपर्यवसानाभिप्रायम् । श्रुतिरिहेशानशब्दरूपा परमेश्वराभिधानश्रुतियोगेन लिङ्गसमर्पकस्यापि तस्य रूढ्या परमेश्वरबोधकत्वाऽनिवारणात् । काव्येषु तु व्यङ्ग्यार्थप्रधानेषु यस्य शब्दस्य यौगिको ऽर्थो व्यञ्जनव्यापारानुकूलस्तं शब्दं यौगिकार्थएवोपक्षीणं कृत्वा तदीयरूढ्यर्थसमर्पणार्थं क्व चित्क्व चित्पदान्तरमप्युपाददते तत्पदान्त- रोपादानं न यौगिकार्थसंबन्ध्युपादानस्य रूढ्युन्मेषविरोधित्वप्रयुक्तम् । तद- नुपादानेपि ऽपि कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनो ऽन्ये इत्यत्र तद्दर्शनात् । अत्र सिद्धान्ते ऽप्यप्रत्याख्येयेन जीवलिङ्गेनाभिभूतं ब्रह्मलिङ्गं ब्रह्मलिङ्गनिर्वाहकमहावाक्यतारूपोपायकथनात् प्राङ् नोन्मिषतीे- त्यस्पष्टब्रह्मलिङ्गता* ॥

* अत्र सप्तमम् (अष्टमं वा) प्रमिताधिकरणं पूर्णम् ।

तदुपर्य्यपि बादरायणः संभवात् ॥ २६ ॥ १६७ । ३

ननु देवाधिकारचिन्ता नास्मदादीनां प्रवृत्तावुपयुक्ता नापि देवानां तेषां स्वकीयविग्रहवत्त्वे तत्प्रयुक्तसामर्थ्यादिमत्त्वे च सिद्धान्तन्यायनिरपेक्षावगतिसद्भावादित्याशङ्क्याह **अधिकारेति ।** क्रममुक्तिफला देवतापदप्राप्तिद्वारा मुक्तिपर्यन्ता उपास्तयः । एतदुपलक्षणं देवतानां सिद्धावन्तरादित्यविद्यादिष्वादित्यदेवताद्यन्तर्वर्त्तित्वेन ब्रह्मोपासनं न तु ज्योतिर्मण्डलाद्यन्तर्वर्त्तित्वेन उपकोसलपञ्चाग्निविद्ययोरर्च्चिराद्यभिमानिदेवतानां मार्गपर्वत्वेन चिन्तनं न त्वर्च्चिरादीनामचेतनानामित्युपासनायां विशेषसिद्धिः तं देवा भक्षयन्तीत्यादिश्रवणेन वैराग्यसिद्धिः मन्त्रार्थवादाः प्राप्तिविरोधयोरसतोः प्रतीयमाने ऽर्थे प्रामाण्यं न जहति देवताविग्रहप्रसाधनोपयोगिन्यायव्युत्पन्नस्य प्लवा ह्येते अदृढा यज्ञरूपाः जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमित्यादिवाक्यश्रवणेन विवेकवैराग्यादिसिद्धिरित्यादिकमपि देवताधिकरणप्रवर्त्तनस्य फलं द्रष्टव्यम् । विद्वत्तोपयोगादाह **आगमादेरिति ।** आदिशब्देन आगमार्थनिर्णायकन्यायग्रहणम् ।

स्मर्य्यमाण इति । यद्यपि देवानामुपनीताधिकारिकवैधाध्ययना- " । ७
संभवे ऽपि काव्यानामिव लौकिकमध्ययनं वक्तुं शक्यं वैधाध्ययननियमस्य स्वशाखाविषयत्वाद् देवानां शाखानियमाभावात् तथापि स्वयंभातवेदतदर्थानां तेषामध्ययनं न कल्पनीयमिति तात्पर्य्यम् । ननूपनयनं न केवलमध्ययनाधिकारार्थं किं तु सर्वकर्माधिकारार्थम् । अत एव समर्थस्यापि संध्यावन्दनादिकमुपनयनादूर्ध्वमिष्यते । मूकबधिरादीनाम् अध्ययनाभावे ऽपि शक्यनित्यकर्मानुष्ठानार्थमुपनयनमिष्यते । तस्मिँस्तु शिष्यमाणानि जननेन प्रवर्त्तेरन्निति* पूर्वतन्त्राधिकरणे ऽपि तथैव निर्णीतम् । सत्यम् । त्रैवर्णिकानामेव तत्कर्माधिकारहेतुस्तान्प्रति विहितत्वादत एव शूद्राणामुपनयनाभावे ऽपि स्वधर्मेषु सामान्यधर्मेषु वा ऽधिकारः ।

चतुर्थ्यन्तशब्दप्रतीतमात्रमिति । आखण्डलादिः प्रसिद्धार्थ " । ८
इत्यर्थः† । ननु देवताया विग्रहवत्त्वे दर्शिते क्रतुदेशेषु सन्निधानाभावेन

---

* जै॰ सू॰ अ॰ ६ पा॰ ३ सू॰ २१ ।   † मण्डलादिः प्रसिद्धार्थ इति ३ पु॰ ।

कर्मविरोध* इहापि तुल्यः असंभवत्परिहारश्चेति विशेषः । न हि विग्रहवत्या देवताया इवाचेतनदेवताया विग्रहभेदैरनेकत्र क्रतुदेशे सन्निधानमुपपादयितुं शक्यम् । न च विग्रहवतोऽङ्गस्य सन्निधाननियमः विग्रहरहितस्यापि जुह्वादेः सन्निधाननियमदर्शनेन विशेषणवैयर्थ्यात् । उक्तनियमस्य प्रवसद्यजमाने व्यभिचारेण विग्रहरहितस्यैवाङ्गस्य सन्निधाननियमदर्शनाच्च । न च प्रवसद्यजमानकर्तृकविष्णुक्रमादौ व्यभिचारः । मूर्तस्येति विशेषयितुं शक्यत्वादिति शङ्कानिवारणाय गृहीतमर्थोपहितपक्षं व्याचष्टे **तादृगिति** । नन्वेवमर्थस्याङ्गभूतशब्दोपलक्षणताया विग्रहवत्त्वपक्षे ऽपि वक्तुं शक्यत्वान्न तस्मिन् पक्षे कर्मणि विरोधो दूषणमिति चेत् । सत्यम् । असारमपीदं दूषणं देवताविग्रहद्वेषान्धैरुद्भावितमिति पूर्वपक्ष्युपहसनार्थमिन्द्रादीनां वस्तुतः क्रतुदेशे सन्निधानमस्तीति तात्त्विकार्थप्रदर्शनार्थं चानूदितम् ।

१६७ । १३ **इच्छामात्रमिति** । इन्द्रागच्छेत्याद्याह्वानलिङ्गादिन्द्रादीनामागमनं स्वेच्छाधीनं वाच्यमित्यनेकक्रतुदेशागमननिर्वाहार्थमनेकशरीरसृष्टिरपि तदिच्छाधीना पर्य्यवस्येदित्येवं तदिच्छायाः शरीरसृष्टिकारणत्वसिद्धौ तदतिरिक्तकारणमेलनाभावाच्छरीरसृष्ट्याक्षेप इति भावः । **अधिष्ठात्रभावादिति** । ईश्वरस्याधिष्ठातुः सत्त्वे ऽपीन्द्रादीनामिच्छया सृष्टौ तेषामप्यधिष्ठातृत्वं वाच्यं तन्न संभवतीत्याशयः । **एवकारदर्शनादिति** । एतयैव निविदेत्येवकारेण यस्यां निविदि देवतासंख्या पृष्टा तयैव निविदोत्तरमाहेत्यर्थलाभादित्यर्थः । **द्वितीयामिति** । देवतानामङ्गत्वे ऽपि नमस्कार्यत्ववत्केवलमुद्देश्यत्वे कर्तृकरणकर्माधिकरणादिवन्न संनिधानापेक्षेत्युपपादनार्था द्वितीया व्याख्या । **अत एवोपाध्यभाव इति** । उपाधेरपि नरपतित्वादिवत् किंचिद्घटकपदार्थगतजात्यवच्छेदेनानुगतीकर्त्तव्यत्वाद् घटकपदार्थेष्वप्यलौकिकेषु प्रत्यभिज्ञाभावेनानुगतजात्यसिद्धिरित्यर्थः । **मन्त्रसिद्ध इति** । आदित्यादिशब्दानामचेतनमण्डलादिवाचित्वपक्षे ऽपि तत्प्रवृत्तिनिमित्तभूता जातिर्लौकिकप्रत्यभिज्ञानेन न सिद्ध्यति । इदानीन्तनमण्डलादेर्दृश्यमानत्वे ऽपि प्राचीनमण्डलादेरतीतस्यैतद्द्रष्टृदृष्ट्यगोचरत्वात् । अतः

* कर्मणि विरोध इति २ पु. पा. ।

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयद् इत्यादिमन्त्रसिद्धे प्राचीने इदानीन्तने च प्रत्यभिज्ञानमपेक्ष्यते चेद् वेदाधीनमेव तदन्वेष्यं तदिहापि सुलभमिति भावः । इन्द्रादीनां पूर्वोत्तरविग्रहयोः संस्थानविशेषैक्ये जातिपक्षस्तदभावे स्वर्गाधिपत्याद्युपाधिपक्षः ।

शब्दं प्रतीति । शब्दप्रभवत्वहेतुं प्रसञ्जकं कृत्वा शब्दस्वरूपनिर्णि- १६८ । १८
नीषया नायं प्रश्नः तथा सति स्फोटवादिना देवादीनां वर्णप्रभवत्वानुपपत्तेः स्फोटप्रभवत्वोपपत्तेश्चावक्तव्यत्वात् । तस्मादुक्तप्रकारेणाक्षेपो ऽयमित्यर्थः । नन्विन्द्रादिशब्दानां लौकिकपितृकृतपुत्रनामवद् व्यक्तिशब्दत्वे तेषां व्यक्तिवाचित्वं तत्तत्संकेतयितृपुरुषबुद्ध्यधीनं भवेदितीन्द्रादिपदघटितानां विधिवाक्यानां संकेतयितृस्वतन्त्रपुरुषबुद्ध्यधीनार्थप्रतिपादकत्वेन तत्सापेक्षत्वलक्षणाऽप्रामाण्यापत्त्या तच्चोदितकर्मणामननुष्ठानं स्यादिति कर्मणि विरोधापादने तेषां जातिशब्दत्वेन परिहर्तव्ये शब्दप्रभवत्वादिति हेतुः क्वोपयुज्यते शब्देनार्थस्मृतिसापेक्षा सृष्टिः स्रष्टव्यार्थस्य स्मर्यमाणार्थसमानजातीयत्वएव लोके घटादिषु दृष्टेति शब्दप्रभवत्वं जातिवाचित्वहेतु*सिद्ध्यर्थो हेतुरिति चेद् न । लोके दृष्टान्ताऽसंप्रतिपत्तेः । घटादिसृष्ट्यर्थमपेक्षितस्य घटत्वादिजात्यभिव्यञ्जकाकृतिविशेषानुसन्धानस्य प्राक्तनतदनुभवादेव संभवेन घटादिशब्दानपेक्षणादनुष्ठेयार्थस्मृतावुपायान्तरसंभवे ऽपि मन्त्रेणैव संस्मर्तव्य इतिवत् स्रष्टव्यो घटादिर्वाचकशब्देनैव स्मर्तव्य इति नियमहेत्वभावात् । अत एव कैश्चिदुपकरणैः कं चिदर्थं निर्मिमाणं दृष्ट्वा तद्वाचकानभिज्ञा अपि नानाशिल्पनिपुणास्तैरुपकरणैस्तथाभूतं व्यक्त्यन्तरं निर्मिमाणा दृश्यन्ते। उच्यते। शिल्पी शिल्पशास्त्रेभ्यो देवादीनां नामरूपाणि विज्ञाय प्रतिमादिकं निर्मिमातीति लोके दृष्टं तथैव हिरण्यगर्भो वेदेभ्यस्तानि विज्ञाय देवादीन् सृजति तस्य देवसृष्ट्युपयोगिनामरूपज्ञानार्थमेव हि सृष्टाय तस्मै वेदप्रदानमपि श्रूयते यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति । भाष्योदाहृतश्रुतिस्मृतयो ऽप्यत्र प्रमाणम् ।

गृहीतस्येत्यस्य बधिरेणानन्वयादध्याहरति **अबधिरेणेति** । तथा १६९ । ४
च बधिरेणागृहीतस्य गृहीतस्य वेति टीकायां बधिरेणेति श्रुतस्याऽगृहीतेना-

* वाचित्वे हेत्विति २ पु॰ पा॰ ।

न्वयः अबधिरेणेत्यध्याहृतस्य गृहीतेनान्वयः इति विभागः । टीकाया-
मङ्गत इत्यनेनैव संगतेरपि संग्रहादविदितसंगतिरिति पृथङ् न वक्तव्यमि-
त्याशङ्कायां हेतुनिर्देशार्थत्वेन तदुक्तिसाफल्यमुक्त्वा तदपेक्षहेतुकमनुमानं दर्श-
१६९ । ३ यति **शब्द इति** । अङ्गेनेत्येतद्यावदङ्गपरं तेन योग्यतादिमत्किंचिदङ्गज्ञा-
नसाहित्यसंप्रति*पत्त्या न सिद्धसाधनम् । अङ्गत्वं मानविभाजकोपाध्यवच्छिन्नं
प्रति सहकारित्वं तेनादृष्टरूपाज्ञातस्य† सहकारित्वे ऽपि पक्षदृष्टान्तयोर्न बा-
धसाध्यवैकल्ये सिद्ध्यभावादेरज्ञातस्यानुमानमात्रे सहकारित्वाभ्युपगमे तु
दृष्टान्ते साध्यलाभाय भावरूपसहकारित्वं विवक्षणीयम् । हेतौ मानविभा-
जकोपाध्यवच्छेदेन संबन्धग्रहणापेक्षा विवक्षिता तेन कपिसंयुक्तो वृक्ष इति
ज्ञानजनके चक्षुषि न व्यभिचारः । **नार्थधीहेतुत्वइति** । अपूर्वावधार-
णात् प्रागर्थधियो जननाऽसंभवादर्थधीहेतुत्वम् अमानकमिति तदन्यथानु-
पपत्तिर्नोदेतीत्याशयः । **नानावर्णेति** । यथा खलु संध्यक्षरान्तर्गताकारे-
काराद्यतिरिक्तैकसंध्यक्षरावगतेस्तदतिरिक्त एकारादिः यथा वैकत्वसमुदाया-
तिरिक्तशतादिसंख्यावगतेस्तदतिरिक्ता शतादिसंख्या तथेति भावः । तद्धे-
तुत्वेन साहित्यकल्पनायामित्यनुक्तोपालम्भः । एकार्थधीहेतुत्वस्यैकत्वोपा-
धिताया एवोक्तत्वादित्याशङ्क्य व्याचष्टे **साहित्यमेकत्वमिति** । तथा च
बहुषु क्रमिकेषु वर्णेषु तद्धेतुत्वे ऽप्यसिद्धे यदि तद्धेतुत्वाधीनं तेष्वेकत्वं
संपाद्यते न तद्धेतुत्वं समर्थ्यते तदानीमन्योन्याश्रय इति भावः ।

ननु तं च ध्वनय इति प्रत्येकव्यञ्जकत्वपक्षोपपादनमस्थाने ध्वनीनां
स्फोटव्यञ्जकत्वस्य प्रागनुक्ततया तत्र प्रत्येकसमुदायविकल्पानुत्थानादित्याशङ्क्य
१६९ । १७ ततः प्राक् टीकायां विवक्षितौ शङ्कापरिहारौ दर्शयति **नन्वज्ञातेष्विति** ।
ननु वर्णव्यङ्ग्यत्वोपपत्तेरिति कथं स्फोटस्य ध्वानव्यङ्ग्यत्वं हि टीकायामुक्तम् ।
सत्यम् । नित्यवर्णवादिमते वर्णाभिव्यञ्जकत्वाभिमता उदात्तानुदात्तह्रस्वदी-
र्घसानुनासिकनिरनुनासिकत्वादिधर्माश्रया ये ध्वनयस्त एव स्फोटवादिमते
स्फोटाभिव्यञ्जकाः कत्वाद्याश्रया वर्णा ध्वनिस्फोटमध्ये नित्यानामनित्यानां वा
वर्णानामङ्गीकारे गौरवात् । वर्णवादिमते ऽखण्डेष्वेकारादिषु वास्तवाकाराद्यव-

* साहित्यसप्रतीत्यसंगतः पाठः २ पु· । † अदृष्टस्याज्ञातस्येति ५ पु· पा· ।

यथाभावेन तदभिव्यञ्जकक्रमिकध्वनिविशेषाणामेवाकारेकारादिरूपताया वक्तव्यत्वाच्च । सो ऽयं गकारः सो ऽयमुदात्तः सो ऽयं ह्रस्व इत्यादिप्रत्यभिज्ञानाङ्गत्वाद्व्यधिकरणध्वन्यभिव्यक्तेषु दर्पणमुखवदभिव्यञ्जकधर्मरूपिततया प्रतीयमानेषु वर्णस्फोटेष्विव तदेवेदं घटपदं तदेवेदं घटमानयेति वाक्यमित्यादिप्रत्यभिज्ञानां पदवाक्यस्फोटेष्वेव विश्रान्तेरिति स्फोटवादिमतम् । अतो न विरोधः ।

ज्वालादिप्रत्यभिज्ञानबाधोपलम्भाद्भाष्यानुपपत्तिमाशङ्क्य व्याचष्टे **प्रत्यभिज्ञानस्येति । यो ऽनुभव इति ।** गकारेषु परस्परभेदानुभव इत्यर्थः । १७० । १०
उरस्ताडनोत्तया गकारादिभेदोपलम्भस्य शङ्काबीजस्यालाभमाशङ्क्य अतितारत्वं तेन लक्ष्यमित्याह **सोऽर इति । न पूर्वहेत्वर्थमिति ।** न पूर्वप्रस्तुतहेतुसमर्पकमित्यर्थः । **तद्धेतुत्वे चेति ।** पूर्वप्रस्तुतार्थहेतुत्वे केन चिदुभयसिद्धेन हेतुना भेद एव निषेध्यो न त्वेकत्वं सिद्धं कृत्वा तेन हेतुना ऽनेकरूपत्वं निषेध्यं वर्णानां ध्वनिरूपाणामेकत्वस्य प्रतिवाद्यनङ्गीकृतत्वादित्यर्थः । **प्रकृतासंगतेरिति*** ।यद्यपि भेदाभेदयोरेकत्र वास्तवत्वेनोभयप्रामाण्योपपत्तौ किमिति भेदज्ञानप्रत्यभिज्ञानयोर्बाध्यबाधकत्वकल्पनमित्याशङ्कानिराकरणार्थत्वेन प्रकृते कथं चित्सङ्गमयितुं शक्यं तथापि भेदाभेदपक्षस्य स्फोटवाद्यनङ्गीकृतत्वात् प्रकृतासंगतिरुक्ता । **उक्तमपि बाधकमिति ।** ननु वर्णा अपीत्यादिभाष्येणोक्तमप्यभेदबाधकमित्यर्थः । **अनेनावृत्त्येति ।** शङ्काग्रन्थत्वे एक एव सन्नित्यस्य एकश्चेदित्यर्थः । परिहारग्रन्थत्वे प्रत्यभिज्ञावधृतैकभाव† इत्यर्थ इति अर्थभेदो विवक्षितः ।

अशब्दात्मक इति । ननु अशब्दात्मकः श्रावणो ध्वनिः पदार्थान्तरमिति भाष्यानुक्तानुवादः । गगनादिपञ्चभूतगुणः शब्दो ध्वनिरिति १७१ । १०
सिद्धान्तविरुद्धश्च वर्णविशेषाप्रतीतो प्रतीतेरवर्णात्मक इत्यनुवादस्तु वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरतीति भाष्यानुवादो भवति किं त्वयुक्तानुवादः दूरे जनसंघकोलाहलप्रत्ययस्य दूरत्वदोषागृहीतकत्वादिकवर्णविषयत्वोपपत्तेः तत्र वर्णातिरिक्तस्य ध्वनेः कल्पने ऽपि समीपे तदग्रहणस्य सामीप्यदोषप्रयुक्तताया वक्तव्यत्वात् । एवं च तस्य वर्णत्वजातिविषयत्वक-

* प्रकृतासङ्गतिरितीति २ पु॰ पा॰ । † प्रत्यभिज्ञावद्धृतैकभाव इति २ पु॰ पा॰ ।

ल्पनानिराकरणमप्यस्थानविजृम्भितं शब्दत्वादिसामान्यालिङ्गितवर्णव्यक्तिविषयत्वोपपत्तेः । न च तथाभूतवर्णविषयत्वाशङ्कापि ध्वनेर्भिन्नत्वाद् न प्रत्यभिज्ञानमस्तीति प्रत्यभिज्ञाभावोक्त्यैव निराकृतेति वाच्यम् । वर्णेषु सोऽयं गकार इत्यादिवत्त्वया ध्वनित्वेनाभ्युपगते कोलाहले ऽपि स एव कोलाहलः पुनरुत्थित इति प्रत्यभिज्ञानसत्त्वाविशेषात् । ध्वनौ प्रत्यभिज्ञानं तज्जातीयविषयमिति तत्र वर्णे इव व्यक्त्यैक्यप्रत्यभिज्ञानाभाव उक्त इति चेद् न । तुल्यरूपयोः प्रत्यभिज्ञानयोरेकं तज्जातीयविषयम् अन्यद् व्यक्त्यैक्यविषयमिति कल्पनायां विनिगमनाविरहात् प्रत्यभिज्ञानावगतव्यक्त्यैक्येन जात्यसंप्रतिपत्तेर्वर्णे इव ध्वनावपि वक्तुं शक्यत्वात् । तस्मात्सर्वमिदमनुपपन्नमिति चेत् । उच्यते । अशब्दात्मक इति वर्णव्यतिरिक्तत्वमुक्तं पदार्थान्तरमिति प्रकृप्रस्तुतवायुव्यतिरिक्तत्वं न प्रत्यभिज्ञानमस्तीत्येतद् व्यक्त्यैक्यप्रत्यभिज्ञानाभावपरम् । यद्यपि ध्वनौ वर्णे च प्रत्यभिज्ञानस्य व्यक्त्यैक्यविषयत्वमौत्सर्गिकं तथापि भेर्यादिध्वन्युत्थितौ वर्णोत्पत्त्यभावात् क्वचिद्वैदिकवाक्याद्यनुकारिवीणावेणवादिध्वन्युत्पत्तौ कोलाहलवचनवदस्फुटवर्णाकारप्रतीतिसत्त्वेऽपि वर्णोत्पत्तिकारणस्थानकरणाभावेन तेषां वर्णच्छायानुकारिध्वनिमात्रतया वर्णत्वाभावात् तदसार्वत्रिकत्वाच्च भेर्यादिध्वनिषु श्रूयमाणतारत्वमन्दत्वादिभेदकधर्माणां वर्णाश्रयत्वस्य कल्पयितुमशक्यत्वादनन्यथासिद्धभेदप्रत्ययानुरोधेन ध्वनौ प्रत्यभिज्ञानं तज्जातीयविषयं पर्य्यवस्यति वर्णोच्चारणे तु हसितरुदितपशुपक्षिरुतानुकरणशङ्खाध्मानादिस्थले ध्वनिकारणत्वेन क्लृप्तस्य कण्ठादिवाय्वभिघातविशेषस्य सत्त्वात् । तारत्वप्राच्यत्वप्रतीच्यत्वादिश्रूयमाणधर्माणां ध्वनिधर्मत्वस्य क्लृप्तत्वात् कोलाहलप्रत्ययस्य हसितरुदितादिकोलाहलस्थले ध्वनिविषयत्वस्य क्लृप्तत्वेन जनसंघालापकोलाहलप्रत्ययस्यापि ध्वनिविषयत्वकल्पनौचित्याच्च वर्णाभिव्यक्तिकारणैर्ध्वन्युत्पत्तेरपि कल्पनोपपत्तेर्वर्णेषु तत्प्रतीतिस्तदुपाधिकेति बाधकाभावात् तत्र प्रत्यभिज्ञानमप्यौत्सर्गिक*व्यक्त्यैक्यविषयभावमवतिष्ठते । एवं च भिन्नत्वहेतुसाधितेन प्रत्यभिज्ञानाभावेन शब्दत्वादिसामान्यालिङ्गितवर्णविषयत्वमिह साध्यते न

* ज्ञानमनपेतौत्सर्गिकेति_२ पु॰ पा॰ ।

तु शब्दत्वादिसामान्याविषयत्वमेव । श्रावणत्वाद्वायुव्यतिरिक्तो ध्वनिरवर्णा-
त्मकः गत्वादिवर्णविशेषाप्रतीतौ प्रतीयमानत्वादिति पूर्वमुक्तो वर्णविशेषा-
ऽप्रतीतावपि कोलाहलप्रत्ययः सामान्यधर्मालिङ्गितवर्णविषयो ऽस्त्विति
शङ्काया एवावसरप्राप्ताया निराकर्तुमुचितत्वात् ।

नानेवेत्यवयवीति । स्फोटे वर्णभेदभानमवयवित्वभेद*भानम् ।
एकाराद्येकैकवर्णावयवेकाराकारादिभानमवयवभानम् । **विसदृशपदव्यञ्जका
इति ।** पदानि स्फोटाः ।

एकविधेति । यद्यपि नानापापालालाहाहादिशब्देष्वेकविधप्रयत्न- १११ । २५
जन्यानेकाक्षररूपध्वनीनां तत्तत्स्फोटे अनेकाक्षररूपत्वावगाहिभेदभ्रमहेतुता
दृष्टा तथापि प्रायोभिप्रायेणैतदुक्तम् । ननु पदतत्त्वमेकमित्यादिटीकाग्रन्थं
पदबुद्धावित्यादिना गकारादिसादृश्यमित्यर्थ इत्यन्तेन ग्रन्थेन गङ्गौघ्ययादि-
वर्णसमुदायान्तर्गतगकारौकारादिसदृशगकारौकारादिव्यङ्ग्ये गोपदस्फोटे पर-
स्परभिन्नगङ्गौघ्ययादिपदस्फोटसादृश्येन भेदभ्रमोपपादकं व्याख्याय तथा भिन्न-
त्वेन भ्रमकल्पितेषु व्यङ्ग्यभागेषु व्यञ्जकवर्णात्मकतारोपोपपादकतयैवं चेत्या-
दिटीकाग्रन्थः किमर्थं व्याख्यातः । न हि स्फोटे संनिहितवर्णसमुदायरूप-
त्वभ्रमस्तद्वर्णारोपाधिष्ठानतया भागभेदभ्रममपेक्षते तदभावे ऽप्येकस्मिन्
दर्पणे व्याप्तानेकमुखादिप्रतिबिम्बयुक्ते तावन्मुखादिसमुदायरूपताभ्रमवद्व्यञ्ज-
कानेकसमुदायरूपताभ्रमस्योपपत्तेः । विविधमणिकृतहारप्रतिबिम्बव्याप्ते तनु-
दीर्घकाचफलकादौ क्रमिकसजातीयविजातीयानेकमणिरूपताभ्रमवत्क्रमिकाने-
कसजातीयविजातीयानेकवर्णरूपताभ्रमस्योपपत्तेश्च । पदतत्त्वमेकमित्यादि-
टीकाग्रन्थस्त्वित्थं व्याख्यातुं शक्यः । यावन्तो गवादिपर्यायास्तैः सर्वैरप्येक
एव स्फोटो ऽभिव्यज्यते । एकार्थप्रत्ययहेतोस्तस्य प्रतिपर्यायं भेदकल्पने
गौरवात् प्रमाणाभावाच्चेति स्फोटवादिमतम् । एवं सत्येव लोकवेदश्रुताने-
कपर्यायाणां घटादीनां देवादीनां च केन वाचकेनोत्पत्तिमाश्रित्य शब्दप्रभ-
वत्वं समर्थनीयमित्यचाविनिगमाव्यवस्थयोरपि परिहारो भवति । एवं च
गवादिपर्याया एकमेव स्फोटमभिव्यञ्जयन्तो ऽन्योन्यविसदृशघटकुड्यादिपद-

* अवयवत्वभेदेति १ पु॰ पा॰ ।

स्फोटव्यञ्जकघटकुड्यादिवर्णसमुदायसादृश्येन परस्परवैलक्षण्येन स्वव्यङ्ग्यस्य स्फोटस्य मिथो विसदृशघट* कुड्यादिपदस्फोटसादृश्यमापादयन्तस्तेन सादृश्येन हेतुनैकमपि स्फोटं नानेवावभासयन्तीति । अस्मिन् व्याख्याने प्रत्येकमभिव्यञ्जयन्त इत्येतद्गोशृङ्ग्यादिवर्णसमुदायरूपध्वनयः प्रत्येकं स्फोटमभिव्यञ्जयन्तीत्येतत्परम् । तुल्यस्थानकरणनिष्पाद्यतयेत्यादि च तुल्यस्थानकरणनिष्पाद्यतया ये ऽन्योन्यसदृशास्तेभ्यो विलक्षणास्तत्तत्पदव्यञ्जका घटकुड्यादिध्वनयः तत्सादृश्येनेत्येतत्परम् । अभागमपि भागवदिति दृष्टान्तार्थम् । यथा संध्यक्षरमेकारादिकमखण्डमकारादिभागवदिव भाति एवमेकमपि स्फोटं पर्यायभेदा नानेवावभासयन्तीति । एवं व्याख्यानसंभवे ऽप्येकत्र स्फोटे गकारादिवर्णसमुदायरूपताप्रतीतिरेवोपपादनीयत्वेन प्रकृतत्वात् तदनुसारेण व्याख्यातम् । अनेकवर्णरूपत्वकल्पनायां भागकल्पनानपेक्षणे ऽपि तदपेक्षामङ्गीकृत्य तत्संभवो ऽप्युपपादितः ।

१७२ । २ **औपाधिकत्वस्वाभाविकत्वाभ्यामिति ।** अन्यतरस्यौपाधिकत्वे ऽवश्यकल्पनीये एकत्वस्यैवौपाधिकत्वं कल्प्यम् । अन्यथा स्फोटरूपधर्म्यन्तरकल्पनागौरवप्रसङ्गादिति भावः । ननु विपरीतं गौरवं स्फोटपक्षे पर्याये ऽपि तदभिव्यङ्ग्यस्फोटैक्यादेकचैव स्फोटे घटादिशक्तेः कल्प्यत्वाद् वर्णपक्षे प्रतिपर्यायं शक्तिभेदकल्पनापत्तेरिति चेद् मैवम् । धर्म्यन्तरतद्गतशक्तिकल्पनापेक्षया क्लृप्तेषु वर्णेषु भेदेनापि शक्तिकल्पनस्य लघुत्वात् । अन्यथा घटकलशादिपर्यायाभिव्यक्ते स्फोटे गृहीतशक्तिकस्य पुंसो ऽप्रसिद्धपर्यायश्रवणे ऽपि प्रागगृहीतशक्तिकस्यैव स्फोटस्य तेनाभिव्यक्त्या ऽर्थप्रतीत्यापत्तेः । न च तत्पर्याया†भिव्यक्ते स्फोटे शक्तिग्रहस्तत्तत्पर्यायश्रवणे अर्थधीहेतुरिति वाच्यम् । एवं प्रतिपर्यायं शक्तिग्रहावश्यम्भावे तत्तत्पर्यायगतशक्तिग्रहो ऽर्थधीहेतुरिति कल्पनस्यैव लघुत्वात् । तदा हि शक्तिग्रहत्वेनैव कारणता न तु तत्तत्पर्यायाभिव्यक्तिगतशक्तिग्रहत्वेनेत्यवच्छेदकलाघवं लभ्यते । अवच्छेदकलाघवे च तन्निर्वाहाय तत्तत्पर्यायगतशक्तिभेदकल्पनागौरवं फलमुखत्वान्न दोषः । न चैवं वर्णसमुदायस्यैवैकत्वप्रत्ययविषयत्वे संध्यक्षराणामप्यकारादिवर्णसमुदायत्वापत्तिरिष्टत्वात् । अत एव मीमांसकैः ऋत्वु संध्य-

* घटेति नास्ति २ पु. । † तत्तत्पर्यायेति २ पु. पा. ।

स्वराणां सतां गीतिकाले वृद्धत्वं प्राप्तानां ये आईभावा आउभावा न ते स्तो- भवद्वर्णान्तरागमरूपाः किं तु वृद्धेषु संध्यक्षरेषु संश्लिष्टतया स्थितानां- मवर्णावर्णोवर्णानां गानकाले विश्लेषमात्रम् अगीतसंध्यक्षराभिव्यञ्जकमित्यु- क्तम् । आश्वलायनेनापि विविच्य संध्यक्षराणामकारमिति याज्यान्ते प्लुतानां संध्यक्षराणामकारं विश्लेष्य तं श्रावयेदिति विहितम् । पाणिनिनापि प्लुतावैच इदुताविति सूत्रेण ऐतिकायन औपगवेत्याद्युदाहरणेषु गुरोरनृतो ऽनन्त्यस्येत्यादिसूत्रैरैचः प्लुतप्रसङ्गे तस्यान्त्यावयवाविकारोकारौ प्लवेते न तु तदाद्यावयवो ऽकारो ऽपीति नियमितम् । प्लुतावपि तानेकधा समभरत- टेतदोमिति प्रणवस्य मात्रात्रयरूपत्वमुक्तम् । एवं संध्यक्षराणां वर्णसमुदाय- रूपत्वे ऽपि तेषां मातृकासु पृथक् परिगणनं लकारपृथक्परिगणनवत्प्रत्या- हारसूत्रेषु हकारस्य द्विरुपादानवत्कार्यविशेषार्थतयोपपद्यते । एतेन शता- दिसंख्या एकत्वादिसमुदायातिरिक्ता एवं सति न सिद्ध्येदित्यपि शङ्का निरस्ता इष्टापत्ते*रेव । अत एव भाष्यं संभवत्यनेकस्यापि एकबुद्धिविषयत्वं पङ्क्तिर्वनं सेना शतं सहस्रमित्यादिदर्शनादिति । यदि त्वेकत्वसमुदायातिरिक्तशतादि- संख्यानङ्गीकारे कियतामेकत्वानां समुदायः शतसंख्या कियतां च सहस्र- संख्येत्याद्यनवधारणादव्यवस्था स्यात् । शतस्यैकत्वानां समुदायः शतसं- ख्येत्यादिव्यवस्थाकल्पने संख्यागततया शतादिसंख्याकल्पनं वक्तव्यम् । अत एकत्वादिसमुदायातिरिक्तशतादिसंख्याङ्गीकरणमनिवार्य्यम् । शतं सहस्रमिति भाष्यं तु घटादिरूपसंख्येयाभिप्रायमिति समर्थ्येत तर्ह्युपन्यस्त- कल्पकप्रमाणवशादतिरिक्तशतादिसंख्याकल्पने ऽपि वर्णसमुदायातिरिक्तस्फोटो न कल्पनीयः कल्पकप्रमाणाभावादिति द्रष्टव्यम् ।

नन्वेकस्मृतिविषयत्वमेकत्वोपाधिश्चेत् तथाभूतेषु भिन्नदेशस्थेषु
वृक्षादिष्वतिप्रसङ्ग इत्याशङ्क्याह **उपचारे हीति** । न ह्येकदेशावस्थितेषु १७२ । ५
वृक्षेषु वनमित्येकत्वोपचारनिमित्तासंभवमात्रेण घटादिष्वपि तस्यास्तन्नि- मित्तता प्रसज्यतइति भावः । **एतेन समुदितानामिति** । व्यस्तसमस्त- प्रकारद्वयासंभवे स्फोटवादिनोक्ते समस्तपक्ष आश्रितः । एकस्मृतिविषय- त्वेन समुदितत्वोक्तिरित्यर्थः । **एकार्थधीहेतुतामिति** । एकार्थधीहेतु-

* इष्टापत्तिरिति २ पु· पा· ।

त्वरूपवाचकत्वावगत्यैव स्फोटवादिना ऽप्येकपदाध्यवसानं वक्तव्यम् । अन्यथा काव्यश्लोकादिश्रवणे तदन्तर्गतपदानां तत्तदर्थेष्वगृहीतशक्तिकस्यापि पुंस इदमेकं पदमिदमेकं पदमित्यादिक्रमेणैतावन्त्यत्र श्लोके पदानीत्यवधारणापत्तेः । प्रजापतेर्हृदयादिशब्दानां सामविशेषादिषु रूढिमजानतो ऽप्येतदेकं पदमित्यवधारणापत्तेश्च । अतः स्फोटवादिना ऽपि गकारादिवर्णसमुदाये एकस्मृत्यारूढे तत्तदर्थवाचकत्वेनानुसंगृहीते सति तेन स्फोटरूपस्य पदस्याभिव्यक्तिरङ्गीकरणीया एकस्फोटव्यञ्जकतया ऽनुसंहितेन वा तदभिव्यक्तिरङ्गीकरणीयेति तेनाप्युक्तरीत्या अन्योन्याश्रयपरिहार उपपादनीय एव ।

१७२ । १६ **समानाधिकरणश्रुतिगम्यमिति ।** उद्भिदा यागेन पशून् भावयेदिति करणभूतयागसामानाधिकरण्यम् । यदि सामानाधिकरण्यं समभिव्याहाररूपं वाक्यमिष्यते तदा सर्वाणि छन्दांस्यनुब्रूयाद्बहुयाजिन इत्यादिषु बहुयाजिशब्दार्थादिनिर्णयोपायभूता यो ब्राह्मणो बहुयाजी तस्य कुम्भ्या नाम गृह्णीयात् स हि गृहीतवसतीवरीक इत्यादिश्रुतिरुदाहर्तव्या । अत्र हि बहुयाजी सोमयाजी न तु बहुभिर्यागैरिष्टवानिति निर्णयोपायभूता तस्य गृहीतवसतीवरीकत्वप्रतिपादनी श्रुतिरिति निरूपितं संकर्षे* । युगपत्क्रमिकसर्ववर्णविषया स्मृतिर्न पृथक् पदावधारणोपायत्वेन परिगणिता किं तु सर्वोपायानुग्राहकत्वेन साधारण्युक्ता । असाधारण्यपि राजशब्दार्थादिनिर्णयोपायभूता पाणिन्यादिस्मृतिर्द्रष्टव्या । न च नित्यविभुषु वर्णेषु स्वतः क्रमाभावादुच्चारणक्रमो वाच्यः स च नास्ति मौनिश्लोके अनुसंधानक्रमो ऽपि मौनिलिखितलिप्यक्षरैर्युगपद्वर्णानुमितिस्थले नास्तीति वाच्यम् । तत्रापि क्रमिकलिपिभिर्लेखकानुसंधानक्रमविशेषितवर्णानुमित्युपपत्तेः । अवश्यञ्चैवं क्रमिकवर्णानुसंधानं स्फोटवादिना ऽप्युपपादनीयम् । शब्दानामर्थविशेषवाचकत्वस्यैकस्फोटव्यञ्जकत्वस्य वा ऽनुसंधानाभावे स्फोटाभिव्यञ्जकत्वासंभवस्योक्तत्वात् तदनुसंधानस्य च वर्णक्रमविशेषावगतिसापेक्षत्वात् । एतेन गकारादयः प्रत्येकं स्फोटमभिव्यञ्जयन्तीति मतान्तरं निरस्तम् । क्रमिकतावद्वर्णानुसंधाने ऽपि तदीयमर्थविशेषवाचकत्वमेकस्फोटव्यञ्जकत्वं

---

† संकर्षे—संकर्षकाण्डे, मीमांसाखिले इत्यर्थः ।

षा अजानता स्फोटव्यक्तेरेकैकवर्णसाध्यत्वस्य शङ्कितुमप्यशक्यत्वात् । रत्नतत्त्वदृष्टान्तो ऽप्ययुक्तः । प्रतिसन्निकर्षं रत्नप्रत्यक्षवत्प्रतिवर्णं स्फोटप्रत्यक्षस्यानुभवसिद्धत्वाभावात् । रत्नतत्त्वप्रत्यक्षेषु स्पष्टाऽस्पष्टविशेषस्य रत्नजातिव्यञ्जकतल्लक्षणरूपसूक्ष्मविशेषविषयत्वाऽविषयत्वरूपस्यैवानुभवसिद्धत्वेन तद्वद्‌च स्फोटे पूर्वपूर्वाभिव्यक्त्यविषयाणामुत्तरोत्तराभिव्यक्तिविषयाणां च विशेषाणामभावाच्च । तस्मात् क्रमविशेषविशिष्टवर्णसमुदायानुसंधानस्य स्फोटवादिना ऽप्युपपादनीयत्वात् तदुपपादने च तत एव पदैक्यानुभवस्यार्थप्रतीतेश्चोपपत्तेर्व्यर्था स्फोटकल्पना । तदेतत्सर्वं वर्णाश्चेमे क्रमेण गृह्यमाणाः स्फोटं व्यञ्जयन्ति स स्फोटो ऽर्थं व्यनक्तीति गरीयसी कल्पना स्यादिति भाष्येण दर्शितं स्पष्टमेवेति टीकाकल्पतरुग्रन्थयोर्न विवृतम् ।

ननु प्रत्यभिज्ञया वर्णानां नित्यविभुत्वाभ्युपगमे ध्वनीनामपि तथा तदुभयमभ्युपगन्तव्यं स्यात् । तारत्वादयस्तदुभयव्यञ्जकवायुधर्मा इत्यपि कल्पयितुं शक्यत्वात् । किं च वर्णा नित्यविभवस्तदभिव्यञ्जकध्वनयस्तारत्वाद्याश्रया इति कल्पने ध्वनय एव कत्वगत्वादीनामप्याश्रया इत्यपि कल्पनासंभवाद्वर्णा एवात्मानं न लभेरन् तैर्ध्वनिभिः पर्य्यायभेदेनाभिन्नस्यैकस्यैव स्फोटस्याभिव्यक्त्या ततो ऽर्थप्रतीत्युपपत्तेरित्याशङ्कमानानां तुष्ट्यर्थं भाष्यटीकयोर्वर्णानित्यत्वपक्षो ऽपि समाश्रितः स स्फुटत्वान्न व्याख्यातः ।

अवान्तरप्रलयस्थत्वमिति । यत्किञ्चित्प्रलयस्थत्वसाधने सौषुप्तिकप्रलयस्थत्वेनार्थान्तरं यावत्प्रलयस्थत्वसाधने महाप्रलयस्थत्वाभावेन बाध इत्यतो ऽवान्तरेति विशेषितम् ।

दृढीकृतमिति । मन्त्रार्थवादानां प्रतीयमाने ऽर्थे प्रामाण्यमङ्गीकृत्य १७३ । २
हीन्द्रादीनां विग्रहः समर्थ्यते । तथा सति मन्त्रकृतो वृणीते संहिताकारपदकारसूचकारब्राह्मणकाराणां विश्वामित्रस्य सूक्तं भवतीत्यादिप्रामाण्याद्वेदस्य पौरुषेयत्वमङ्गीकार्य्यमित्याशङ्कानिराकरणेन दृढीकृतमित्यर्थः । तन्निराकरणमपि देवर्षिप्रभृतीनां वेदशब्दप्रभवत्वहेतोरत एवेति परामर्शादेव चतुर्मुखो हि वैदिकाच्छब्दात्तेषामसाधारणानामरूपकृत्यविशेषाननुसंधाय तथैव सृजति ततश्च विश्वामित्रादीनामपि वेदशब्देभ्यः पूर्वकल्पस्थितविश्वामित्रादिनामरूपकृत्यविशेषाननुसंधाय तथैव स्रष्टृत्वलाभे सत्यतीतवर्तमानकल्पगताः

सर्वे ऽपि विश्वामित्रादयो विश्वामित्रादिपदप्रापकपूर्वकल्पानुष्ठितपुण्यवशाद्विश्वामित्रसूत्रादीननधीत्यैव पश्यन्तीति तत्तत्सूक्तादिद्रष्टृत्वमेव तत्तत्कर्तृत्वं न तु सूक्तान्तरादिकर्तृत्वमिति पर्य्यवस्यति । विश्वामित्रस्य सूक्तमित्यादिवाक्यैर्विशिष्य विश्वामित्रादिसूक्तत्वेन यद्यन्निर्दिष्टं तत्तदेव* सूक्त तैस्तैर्वाक्यैर्विश्वामित्रादिसूक्तत्वेनानुसंधाय तत्तत्सूक्तकर्तृत्वेन कल्पान्तरे विश्वामित्रादयः स्वयंभुवा सृज्यन्तइति वक्तव्यत्वात् । अन्यथा वेदशब्देभ्यस्तत्तत्कृत्यविशेषाननुसंधाय तेषामृषीणां स्रष्टृत्वा†नुपपत्तेरिति ।

१७२ । २४ महाप्रलये इति । नन्विन्द्रादीनां विग्रहवत्त्वप्रयुक्ता शङ्का ऽत्र निराकार्या । न चेयं शङ्का तत्प्रयुक्ता तेषां विग्रहानङ्गीकारे ऽपि यः कश्चिदिन्द्रादिप्रातिपदिकार्थः कल्प्यते यश्च गवादिशब्दार्थस्तस्य सर्वास्यापि महाप्रलये विनाशेन निराश्रयजात्यवस्थानायोगशङ्कायास्तुल्यत्वात् । उच्यते । पूर्वसूत्रदृढीकृतस्य वेदनित्यत्वस्य प्रकृतिमात्रावशेषे महाप्रलये वेदविच्छेदावश्यम्भावेन शैथिल्यशङ्कायां तन्निराकरणार्थमिदं सूत्रम् । तेन तदा जात्यभावप्रयुक्तशब्दविरोधशङ्कानिराकरणमप्यानुषङ्गिकतया लभ्यते महाप्रलयावृत्तावपीन्द्रादीनां समानरूपनामत्वात् तथात्वे च पूर्वकल्पे यैर्वेदवाक्यैरिन्द्रादिरूपं ज्ञात्वा तद्भावप्रेप्सया कैश्चित्कर्म्माण्यनुष्ठितानि तैरेव तत्कल्पितेन्द्रादिनामरूपाणि स्मृत्वा पुनः सृष्टौ तत्समाननामरूपेन्द्रादिभावेन तेषां सृष्टवाच्यत्वाद् वेदनित्यत्वसिद्धिः । तत्सृष्ट्यर्थं पूर्वकल्पवेदानुसंधानावश्यम्भावेन पुनः शब्दार्थानुपूर्वीभिन्न‡वेदान्तरसृष्टिकल्पकाभावादिति समाननामरूपत्वेन वेदनित्यत्वे साध्यमाने तत एव पूर्वोत्तरेन्द्राद्यनुगतजातेरपि सिद्धि§रिति देवताविग्रहाभावपक्षसाधारण्ये ऽपि सा शङ्का कण्ठत उपन्यस्ता । भाष्यटीकयोर्जात्यभावशङ्कासमाधानमस्फुटमपि सूत्रमावस्यासत्त्वेनत्या सूचितमिति प्रदर्शनार्थं मुख्यतया तत्र निराकरणीया‖ तु शङ्का पूर्वसूत्र¶लिखिता ऽनुमानसाध्यस्य विशिष्यावान्तरप्रलय**स्थत्वरूपतया विवरणेनैवोन्मिषन्ती स्पष्टेति नोपन्यस्ता । शङ्काद्वयोपन्यासस्तु टीकायां स्पष्ट एव ।

---

* तदेवेति २ पु॰ पा॰ ।

† सृष्टत्वेति २ पु॰ पा॰ । १ पु॰ उपरितनपाठो बहिः शोधितः ।

‡ आनुपूर्व्यभिन्नेति २ पु॰ पा॰ । § सिद्धेरिति १ पु॰ पा॰ ।

‖ मुख्यनिराकरणीयेति २ पु॰ पा॰ । ¶ पूर्वसूत्रे इति २ पु॰ पा॰ । ** विप्रलयेति २ पु॰ पा॰ ।

नन्वाधुनिककृतकाव्याद्यव्यापकपरम्पराविच्छेदे ऽपि तदन्तर्गतवर्णानां नित्यत्वं दृष्टं तथा वेदस्यापि स्यादित्याशङ्क्य व्याचष्टे **वाक्यरूपस्येति** । १७२ ।
प्रमाणानाश्रयत्वादिति । प्रमाणापेक्षज्ञानानामविद्यावतामेव प्रमाणाश्रयत्वं निर्विषयस्य तु सर्वप्रपञ्चाधिष्ठानतया प्रमाणाधिष्ठानत्वे ऽपि न प्रमाणवत्त्वरूपं तदाश्रय*त्वम् । न हि कालस्य सर्वाधारस्य रूपाधारत्वे ऽपि घटादिवद् रूपवत्त्वमिति भावः । ननु सृष्टिसहकारिभूतवासनानपेक्षत्वं ब्रह्मणो न युज्यतइति तस्यैव यथा कथं चिद्वासनाश्रयत्वं प्रशासितृत्वाद्याश्रयत्ववदङ्गीकार्य्यं वासनामात्रावशेषतया जीवानां वा स्थितिरङ्गीकार्य्या । अन्यथा पूर्ववासनानुवृत्त्यभावे महासर्गादिकालसृष्टानां तत्प्रसूतानां च मनुष्यपशुपक्षिसरीसृपादीनां हिंस्राऽहिंस्रत्वादिविशेषतत्तज्जात्यन्तरविषयविरोधादिप्रतिपत्तेः स्तनपानादिप्रवृत्तेश्चासंभवादिति शङ्कानिराकरणार्थत्वेन ब्रह्मणश्चेति ग्रन्थमवतारयति **अथानपेक्ष्येति** । नकाररहितः पाठश्चेत् सृजेदित्येतत्काक्वा योजनीयम् । सृजेत्किं न सृजेदित्यर्थः । यस्मात्सकलकार्यप्रपञ्चविलयकाले अन्तःकरणोपहितानां जीवानां तद्वासनानां व्यवस्थानमुपपादयितुमशक्यं तस्मात्स्वप्नदृष्टमनुष्यादिष्विव प्राग्वासनारहितेषु नवनवेष्वेव जीवेषु हिंस्राऽहिंस्रादिरूपा सर्वा ऽपि व्यवस्थोपपादनीया महाप्रलयवादिभिरिति शङ्काभिप्रायः । **तासां वासनाभि†रिति** । पूर्ववासनाभावे हिंस्राऽहिंस्रत्वादिव्यवस्थानुपपत्तेरवश्यं वासनाऽवशेषः स्वीकार्यः । स्वप्नदृष्टमनुष्यादीनां प्राचीनवासनाभावे ऽपि स्वप्नद्रष्टुर्व्यवस्थितत्वात्तज्जातिस्वभावानुभवजन्यवासनया तथा तथाऽध्यास उपपद्यते । अत्र सर्वेषां जीवानां विलीनानां वासनाश्रयत्वाभावे कस्य वासनया व्यवस्थोपपद्येत ब्रह्मणः पूर्ववासनातत्प्रयुक्तभ्रमवत्त्वाभावादिति भावः ।
साक्षिसिद्धस्येति। सदा साक्षिण्यध्यस्ततया भासमाने ऽज्ञाने नागमस्य १७३ ।
प्रामाण्यं तस्य अप्राप्तार्थविषयत्वात् । नानुमानस्य सिद्धसाधनात् । चक्षुराद्यप्रवृत्तिः स्पष्टा । तत्रागमानुमानार्थापत्त्युपन्यासस्तु साक्षिसिद्धस्य तस्याभावरूपत्वशङ्कानिवृत्तये इत्यर्थापत्तिरूपप्रमाण‡पर्यवसायि भवति । तथापि जीवब्रह्मभेदं प्रपञ्चसत्यत्वं च मन्यमानं परं प्रत्यन्यत्प्रमाणमुपन्यसनीयमित्याकाङ्क्षाया-

* तदाश्रयेति २ पु॰ पा॰ । † वासनास्ताभिरिति २ पु॰ पा॰ ।
‡ प्रामाण्येति २ पु॰ पा॰ ।

माह **प्रमाणं त्विति ।** डित्थगतत्वविशेषितप्रमाभावत्वानधिकरणत्वमनादेर्विशेषणादृष्टान्ते डित्थगतत्वविशेषणानधिकरण*रूपतया पर्य्यवस्यतीति दृष्टान्तसिद्धिः पक्षे प्रमाभावत्व†रूपविशेष्यानधिकरणत्वरूपतया पर्यवस्यतीति डित्थप्रमानिवर्त्त्यानादिभावरूपाऽज्ञानसिद्धिः । अन्यगतप्रमाभावस्य डित्थगतसुखाद्यभावस्य च डित्थप्रमाविरोधित्वाभावेन तन्निवर्तकतया पक्षे साध्यपर्यवसानासम्भवात् ।

१७३ । २० **एतत् सुखादीनामिति ।** न च साध्ये प्रमाविशेषणं व्यर्थं न देयम् । अतः साध्यमेतत्सुखादिषु नास्तीति नोपाधेः साध्यव्यापकत्वभङ्ग इति वाच्यम् । एवं सोपाधिकत्वनिवारणेन व्याप्तिग्रहौपयिकतयैव प्रमाविशेषणस्य सप्रयोजनत्वात् । नन्वेवं डित्थगतत्वविशेषितप्रमाविरोधित्वानधिकरणानादिनिवर्तकत्वमप्युक्तहेतुना साधयितुं शक्यं तेन डित्थप्रमायाः स्वभावस्वसमानविषयातिरिक्ताऽनादिनिवर्त्तकत्वमपि सिद्ध्येदित्याभाससमानयोगक्षेमत्वपरिहारार्थमनुमानानुग्राहिकामर्थापत्तिमुपन्यस्यति **त्वदुक्तमिति ।** यद्यपि त्वदुक्तमर्थं न जानामीति प्रत्यक्षमप्यज्ञाने ऽस्ति तथापि तस्य स्वमते साक्षिरूपत्वेन प्रमाणत्वाभावात् साक्षिसिद्धाज्ञाने‡ ऽभावत्वशङ्काव्यावृत्त्यर्थं प्रमाणोपन्यासस्य प्रस्तुतत्वाद् विवदमानस्य परस्य प्रत्यक्षेण तुष्ट्यभावाच्च तथाभूतव्यवहारान्यथानुपपत्तिरूपमर्थापत्तिप्रमाणमुदाहृतम् । सम्भावितभावविषयत्वशङ्कानिरासप्रकारस्तु प्रत्यक्षार्थापत्त्योरुभयोरपि समानः ।

१७४ । १ **सविषयस्येति ।** नन्वज्ञानविषयस्य साक्षिणा ऽवभासे ऽपि को मदुक्तो ऽर्थ इति पृष्टस्तमनुवदेदिति दूषणं समानम् । अज्ञानसुखदुःखादिवत्साक्षिभास्यव्यवहारयोग्यत्वात् । न च सामान्याकार एवाज्ञानविषयः साक्षिभास्यश्च न विशेषाकार इति सांप्रतमवगताऽनवगताकारयोरज्ञानविषयाऽविषयत्वोक्तेर्विरुद्धत्वात् प्रमाणावगतो हि सामान्याकारः तदनवगतश्च विशेषाकारः । अस्ति कश्चिद्वक्तृवाक्यस्यार्थ इति सामान्याकारस्यावगमे ऽपि त्वदुक्तमर्थं न जानामीत्यनुभवव्यवहाराङ्गीकारे वक्तृवाक्यमश्रुतवतः श्रुतवतो ऽपि तदर्थवत्तामजानतश्च तत्प्रसङ्गाद् विशेषाकारस्य प्रमाणतो

---

* अनधिकरणत्वेति २ पु. पा. ।
† प्रभावत्वेति २ पु. पा. ।
‡ साक्षिसिद्धज्ञाने इति १ पु. ।

ऽवगते चोपन्यस्ताऽज्ञानानुभवव्यवहाराऽनुदयात् । तस्मात्प्रमाणाऽनवगत*विशेषाकारविषयमेवाज्ञानं तदवगतसामान्याकारावच्छेदेनानुभूयते व्यवह्रियते च । न चान्यविषयाज्ञानस्यान्यावच्छेदेनानुभवे ऽतिप्रसङ्गः सामान्यविशेषभावस्य नियामकत्वादित्यनुभवसिद्धं प्रकारमास्थायोपपादनीयं तज्ज्ञानाभावाऽज्ञानवादे ऽपि तुल्यम्। शास्त्रार्थजिज्ञासेति सकलानुभवसिद्धजिज्ञासानुभवो ऽप्येवमेवोपपादनीयः । अस्ति कश्चित्फलवान्वेदान्तशास्त्रस्यार्थ इति सामान्यनिश्चयरहितस्यायमेव तदर्थ इति विशेषनिश्चयवतश्च तज्जिज्ञासाऽनुदयेनाऽनवगतविशेषाकारजिज्ञासैवावगतसामान्याकारावच्छेदेनानुभूयते व्यवह्रियते चेति निर्वाहमन्तरेण गत्यन्तराभावात् । अतस्त्वदुक्तमर्थं न जानामीत्यनुभवस्य क्लृप्ताभावविषयत्वोपपत्तेर्न वस्त्वन्तरकल्पनं युक्तमिति चेत् । उच्यते । अभावत्वप्रकारकाधिकरणविशेषवृत्त्यभावज्ञाने तदधिकरणवृत्त्यवृत्तिधर्मावच्छिन्नप्रतियोगिज्ञानापेक्षानियमोऽस्ति घटवति भूतले स घटो नास्तीति घटान्तराभावप्रतीतेरिव घटो नास्तीति तत्प्रतीतेः कदाप्यनुदयात्। तथाभूतप्रतियोगिज्ञानं तु ज्ञानाभावज्ञानापेक्षितं तदा संभावयितुं न शक्यम् । शास्त्रार्थज्ञानत्वस्य तदानीं तस्मिन्सति सामान्यज्ञाने सत्त्वात् । तस्मिन्नसतस्तद्विशेषज्ञानत्वस्य प्राग्विशेषानवगत्या ज्ञातुमशक्यत्वात् । अतः कारणाभावान्न तस्याभावज्ञानत्वमुपपादयितुं शक्यम् । विषयिज्ञाने तु न विषयतावच्छेदकावच्छिन्नविषयज्ञानापेक्षानियमो ऽस्ति जिज्ञासाज्ञानेन व्यभिचारा†दनवगतशास्त्रार्थविशेषज्ञानेच्छायाः शास्त्रार्थे जिज्ञासा इत्यवगतसामान्याकारावच्छेदेनानुभवदर्शनादतः कारणसंभवादज्ञानविषयमेव तदङ्गीकर्तुं युक्तम् । एतदभिप्रेत्य सविषयस्येति विशेषितम् । एवं च मम शास्त्रार्थज्ञानं नास्तीति ज्ञानमप्यज्ञानविषयमेव ज्ञानाभावस्य तु विशेषज्ञानानन्तरमेतावन्तं कालमित्थमिमं विशेषं नाज्ञासिषमित्यनुभव इति द्रष्टव्यम् ।

न च मानाभाव एवेति स्वयूथ्याशङ्का। **इच्छा ईक्षणमिति।** १७४ । ६
तदैक्षतेति स्थाने सो ऽकामयतेति श्रुत्यन्तरदर्शनादिति भावः । वाचस्पतिना प्रपञ्चाकारपरिणाम्यविद्याश्रयत्वं जीवस्याभ्युपगतमिति तत्परिणाम-

---

* प्रमाणाऽवगतेति २ पु॰ पा॰ । † ज्ञाने व्यभिचारादिति ३ पु॰ पा॰ ।

भूतज्ञानेच्छादिमत्त्वमपि जीवस्यैव युज्यते नेश्वरस्य अत ईश्वरसद्भावं
व्यवहरन्नपि तत्र सर्वज्ञत्वाद्यनुपपत्तिहेतुमाश्रयन्वाचस्पतिः पर्य्यायेण परमे-
३।७ श्वरमपललापेति केषांचिद् दूषणं प्रत्याचष्टे **ईक्षितुरिति।** जीवज्ञाते परमेश्वरे
शुक्तिशकले रजतस्येवारोप उपपद्यतइति परिहाराभिप्रायः । **घनाघना
निबिडा मेघा इति।** वर्षुकाब्दा घनाघना इति कोशकारः। घनश-
ब्दस्य चलाचलपतापतादिवद् द्विर्वचनमागागमश्च। वर्षुकाब्दाः प्रायेण
निबिडा भवन्तीत्यर्थतो निबिडा इति व्याख्यातम्। केषुचित्कोशेषु घना-
निबिडा घना मेघा इति पाठो दृश्यते स पाठो घनघनेति दीर्घरहितं
मूलपाठमाश्रित्य। नन्वासेकसुहितानीत्ययुक्तो निर्देशः पूरणगुणसुहितार्थस-
दव्ययतव्यसमानाधिकरणेनेति समासनिषेधादित्याशङ्क्य व्याचष्टे **बृंहिता-
नीत्यर्थ इति।** तृप्त्यर्थानां सुहितादिशब्दानां षष्ठीसमासप्राप्तौ तन्निषेधपरं
तत्र सुहितार्थग्रहणम्। इह तु बृंहितार्थोन्य एव सुहितशब्द इति तस्या-
सेकशब्देन तृतीयासमासो युक्त इति भावः। न ह्यग्नेर्देवतान्तरमग्निरस्तीति
टीकाग्रन्थो ऽनुपपन्नः। अतीतकल्पाग्निसत्त्वात् तस्येदानीमग्निपदतन्नामनि-
वृत्तावपि पित्रादीनां श्राद्धे इव पूर्वनाम्नोद्देशसम्भवाद् यष्टरीव भाविनी
वृत्तिः यष्टव्ये वा भूता वृत्तिरित्यत्र नियामकाभावादित्याशङ्क्याह **सत्त्वे वेति।**
अतीतानन्तकल्पाग्निषु को यष्टव्य इत्यत्र श्राद्धे तज्जन्मपित्रादयस्तद्रूपेण
वसुरुद्रादयश्च यष्टव्या इत्यत्रैव व्यवस्थितनियामकाभावादविनिगमपरीहारार्थं
यष्टव्यदेवतावाहनलिङ्गानुरोधार्थं वा ऽग्निना यष्टव्यस्याग्नेस्तदिष्टिकाले सत्त्वम-
भ्युपेयम्। तथा चास्माभिरेको ऽग्निर्यष्टव्यस्तेनान्यो ऽग्निरिति व्यवस्थायां
प्रमाणाभावात्स एवाग्निरस्माभिरपि यष्टव्यः स एवाग्न्यधिकारिकसर्वकर्मनि-
र्वहणक्षम इति प्राचीनवैयर्थ्यमित्याशयः। तस्य ये प्राञ्चो रश्मय इति श्रुतौ
१।३ तस्येत्यस्य व्याख्यानम् **आदित्यस्येति।** पुष्पाश्रया अपः समादाय
मधुकरैर्मधु निर्वर्त्यते अत्र कास्ता आपः याः समादाय मन्त्रभ्रमरैर्मधु निर्व-
र्त्यते इत्याकाङ्क्षायां श्रुतावुक्तं ता अमृता आप इति। अत्र का आपः श्रुत्यु-
क्ता* इति न ज्ञायते तच्छब्दश्च कथं प्रकृतपरामर्शी अपां च कथममृत-
त्वमित्याकाङ्क्षायां तत्सर्वं विशदयितुं व्याचष्टे इत्याह **ता अमृता इति।**

---

* प्रयुक्ता इति २ पु० पा०।

घादृङ् मधुकरैरिति । ऋच एव मधुकृत इत्यत्र मधुकरैर्निर्वर्त्यं मधु
तदुपसर्जनतया प्रस्तुतं तच्छब्देन परामृश्यते तच्छब्दस्य च स्त्रीलिङ्गबहु-
वचनान्तत्वम् अप्शब्दसामानाधिकरण्यात् । अप्शब्दश्च पुष्पानुप्रविष्टद्रवां-
शतुल्यकर्मानुप्रविष्टसोमादिद्रव्यपर इत्यौचित्यादेव लभ्यतइति भावः ।
टीकायां तु यानि चेत्यादिना सोमाद्याहुतिद्रव्यपरामर्शित्वमप्शब्दस्योक्तं तत्तु
ताः कर्मणि प्रयुक्ताः सोमाज्यपयोरूपा इति छान्दोग्यविवरणानुसारि । तस्मिन्
पक्षे श्रुतौ यद्वसूनां प्रातःसवनमित्यादिपूर्वाध्यायावसानखण्डे सवनद्वारा
सोमादीनां बुद्धिस्थत्वात् तत्परामर्शित्वमुपपादनीयम् ।

अमृतसाधनत्वादिति । पाकद्वारेणामृतीभावसाधनत्वादित्यर्थः ।
ऋङ्मन्त्रैः प्रयुक्तमिति । ननु यथा हि भ्रमरा इत्यादिटीकावाक्येन १७५ । ११
कर्मपुष्पेभ्यो रसस्यादित्यमधुरूपस्वस्थाननयनं भ्रमरसाम्यमुक्तं कथं तस्य
तस्य वाक्यस्य तात्पर्यं वक्तुमुपक्रम्य कर्मपुष्पेभ्यः फलरसस्रावणं तत्साम्य-
मित्युच्यते । नैष दोषः । टीकोक्तं साम्यं स्पष्टं मत्वा ता वाएता ऋच
इत्यादिश्रुत्युक्तसाम्ये ऽपि टीकाग्रन्थस्य तात्पर्यमिति दर्शयितुं तथोक्तेः ।
तस्याः श्रुतेरयमर्थः । ता एताः कर्मसु प्रयुक्ता ऋचः एतदृग्वेदविहितं
कर्मोद्दिश्यातपन् आलोचनमकुर्वन् । तप आलोचने इति धातुः । आलोचन-
पूर्वकं व्यापारमकुर्वन्निति यावत् । भ्रमरा हि यथा पुष्पाणि स्वानुप्रविष्टद्रवां-
शरूपं रसं मुञ्चन्ति तथा मनस्यालोचनपूर्वकं चूषणव्यापारं कुर्वन्ति
तद्व्यापारेण च मधुरसो जायते एवं मन्त्राः प्रयोगसमवेतार्थस्मृतिरूपं स्वव्या-
पारमकुर्वन् तेन यशःप्रभृतिफलरूपरसस्रुतिरजायतेति । इदमेव भ्रमरसाम्यं
श्रुतावुक्तं मधुनः स्वस्थाननयनरूपमपि तत्साम्यमर्थाल्लभ्यतइति टीकायां
तदुक्तम् । कर्मकुसुमेभ्य आहृत्याग्नौ हुतमिति । यद्यप्यग्नौ होमः
कर्मकुसुममेव तथापि होमशरीरानुप्रविष्टद्रव्यम् अग्नौ पाकेन रसात्मना
परिणामस्य नयनार्थं तस्य यो निष्कर्षः सो ऽत्राहृत्येत्यनेन विवक्षितः ।
अग्नौ हुतमित्यनेन अग्नाववाढ्व्यानि* सुरभीणि कृत्वेति मन्त्रोक्तपाकवि-
शेषो विवक्षित इति द्रष्टव्यम् । यद्वा यजतिचोदनाचोदितेषु सोमादिषु

* अवढ्व्यानीति २ पु॰ पा॰ ।

देवतोद्देश्यकद्रव्यत्यागात्मकयागरूपात्प्रधानकर्मणो ऽन्यद् यागविनियुक्तद्रव्यसंस्काररूपं होमकर्मेत्याचार्यपक्षमनुसृत्य क्त्वाप्रत्ययेन पृथग् निर्देशः ।

१७५ । २५ **विकल्पेनेति ।** नन्वष्टदोषदुष्टो विकल्पः किमर्थमाश्रीयते ऋच एव पुष्पमित्यादिप्राचीनपर्यायचयसारूप्यार्थमथर्वाङ्गिरस एव मधुकृत इति प्रथमश्रुतरूपकानुसाराद् इतिहासपुराणशब्दस्य आथर्वणं चतुर्थमितिहासपुराणं पञ्चममिति श्रुत्यन्तरावगतपौर्वापर्यसंबन्धेन लक्षणा ऽङ्गीकर्तुमुचिता । एवं च श्रुतमधुकृतां पुष्पाध्याहारः श्रुतपुष्पस्य मधुकृदध्याहारश्चेति क्लेशश्च परिहृतो भवति । न च इतिहासपुराणमन्त्रप्रयोज्यं कर्म वाचः स्तोम इत्यपि युज्यते । वाचः स्तोमे सर्वाण्याख्यानानि पारिप्लवं* शंसतीति वाक्यस्य तद्वाक्यशेषाम्नातमन्वाद्याख्यानपरतायाः† पारिप्लवाधिकरणे‡ वक्ष्यमाणत्वेतिहासपुराणगतोपाख्यानानां तत्र प्रयोगाऽप्रसक्तेः तेषां ऋगादिवन्मन्त्रत्वाभावाच्चेति चेत् सत्यम् । इतिहासपुराणं पुष्पमित्यस्य मुख्यार्थानुरोधेन पारिप्लवशब्दस्य वैदिकमैतिहासिकं पौराणिकं वा यदेव किं चिदाख्यानं मनसि परिप्लवते तादर्थ्ये परिकल्प्य कर्मप्रयोज्यत्वेनोपाख्यानानां मन्त्रत्वमुपचर्यार्थान्तरमपि वक्तुं शक्यमिति प्रौढ्येदं व्याख्यानान्तरं कृतम् ।

आदेशा उपासनानीति । उपासनान्यत्र प्रथमाध्यायनिरूपितानि कर्मावबद्धान्युद्गीथोपासनानि प्रणवालम्बनानि विवक्षितानि न तु स्वतन्त्राणि प्रणवालम्बनोपासनानि तेषु ता अमृता आप इत्याद्यनन्वयात् । ज्ञातृज्ञेयभावश्चेति टीका अनुपपन्ना मधुविद्यायामुपास्योपासकभावातिरेकेण ज्ञातृज्ञेयभावाऽनुपदेशादित्याशङ्क्य वस्वादिगतस्योपासकभावपरतया व्याचष्टे **वस्वादौ तु स चेति । देवान् प्रीणयतीति ।** प्रीणातेरेव सकर्मकत्वे ऽपि तत्स्फुटीकरणार्थं णिजध्याहारेण व्याख्यातम् ।

१७७ । १२ **उत्सर्गप्राप्तमपीति ।** नन्वौत्सर्गिकदेवताविग्रहसमर्थक§मन्त्रपदानामर्थपरत्वं कथमनपेक्षामात्रेणापोद्यते । न ह्यनपेक्षामात्रेण रथ्यापतिततृणादिज्ञानप्रामाण्यमौत्सर्गिकं त्यज्यते कथं चात्रानपेक्षा उद्दिश्य त्यागार्थे

* पारिप्लवे इति २ पु० पा० । † आख्यानसामान्यपरताया इति २ पु० पा० ।
‡ व्या० सू० अ० ३ पा० ४ सू० २३ । § समर्पकेति २ पु० पा० ।

ह्यवश्यं देवतापदैः कश्चिदर्थः समर्पणीयः स तु समभिव्याहृतपदान्तरसामर्थ्यप्राप्तौ विग्रहवानेवास्तु तमुपेक्ष्यार्थान्तरान्वेषणे को हेतुरिति चेदुच्यते । लोके तावदादित्यश्चन्द्रः कुजो बुधः कृत्तिका रोहिणीत्येवमादि*पदानामचेतनेषु ज्योतिर्विशेषेषु व्युत्पत्तिर्गृहीता इन्द्रो मित्र इत्यादिपदानामप्यनूराधा नक्षत्रं मित्रो देवता रोहिणी नक्षत्रमिन्द्रो देवतेत्यादिश्रौतसामानाधिकरण्येन ज्योतिर्विशेषेषु वृत्तिरवगम्यते । पृथिव्यादिशब्दानां मृदादिषु वृत्तिः सुप्रसिद्धैव । न चैते ज्योतिरादिवचना अप्यादित्यादिशब्दाः समभिव्याहृतपदान्तरस्वारस्यानुरोधेन ज्योतिरभिमानिविग्रहवद्देवतापर्यन्ताः कल्पनीयाः । तथा सति सर्वेषामपि जुह्वादीनां यज्ञाङ्गानां जुहूरसि घृताचीनाम्ना शृणोत ग्रावाणः उच्छ्रयस्व वनस्पते इत्यादिमन्त्रलिङ्गैश्चेतनत्वकल्पनाप्रसङ्गात् । तस्मान्मन्त्रगतदेवतापदैरचेतनानां ज्योतिरादीनां समर्पणेन तत एवोद्देशाकाङ्क्षाशान्त्या पदान्तरसमर्पिततद्विग्रहाणामनपेक्षिततया प्रथमगृहीताचेतनव्युत्पत्तिविरोधेन च त्यागो युक्त इति भावः ।

साध्याविशिष्टत्वादिति । हेतोरसिद्धत्वेन साध्यतुल्यत्वादि- १७७ । १८
त्यर्थः । **यथा प्रमाणान्तराविरोधइति ।** यत्र विधिशेषे ऽर्थवादे प्रमाणान्तरविरुद्धो यथाश्रुतार्थः तत्र गुणवादः परिग्राह्य इत्यर्थवादाधिकरणे† सामान्यतो व्युत्पादितम् । तत्र यजमानः प्रस्तर इत्यादिषु के गुणा इत्याकाङ्क्षायां तत्सिद्ध्यादयो गुणा इति तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया इति गुणाश्रया इति तत्सिद्ध्यधिकरण‡सूत्रेणोक्तमित्यर्थः । सूत्रे गुणाश्रया इत्यस्य गुणशब्दप्रवृत्तिनिमित्तानीत्यर्थः । प्रस्तरे यजमानशब्दवृत्तौ यजमानस्य यत्कार्यं क्रतुनिर्वर्तनं तस्य सिद्धिः प्रस्तरेणापि भवतीति तत्सिद्धिर्निमित्तम् । आदित्यशब्दस्य यूपे वृत्तौ प्रत्यक्षदृश्यं तेजस्वित्वं निमित्तम् । एवं जात्यादिष्वप्युदाहार्यम् । तात्पर्याविषयस्य विशेषणस्याप्रमि-

---

* रोहिणी विद्युन्नक्षत्रमित्येवमादीति २ पु॰ पा॰ ।

† जै॰ सू॰ अ॰ १ पा॰ २ सू॰ १–१८ ।

‡ जै॰ सू॰ अ॰ १ पा॰ ४ सू॰ २३ अत्र जातिः २४ सारूप्यात् २५ प्रशंसा २६ भूमा २७ लिङ्गसमवायात् २८ इति यथाक्रमं सूत्राणि पृथक् पृथग् दृश्यन्ते आनन्दाश्रममु॰ अ॰ र॰ मा॰ पुस्तके कलकत्ताएशियाटिक्सोसाइटीमुद्रितशाबरभाष्यपुस्तके च । परमेकसूत्रत्वमेवास्योचितम् । उपरितनसूत्राकारप्रदर्शनाद्गुणाश्रया इति पदार्थप्रदर्शनात्तेषु च गुणाश्रया इति पदस्यानुपलम्भात् । तन्त्रवार्तिकपुस्तके एकमेव सूत्रं दृश्यते । अग्रे प्रतीकरूपेण पृथक् ।

त्वे विशिष्टे ऽप्यप्रामाण्यापात इत्युक्ते तेन विशेषणाविधाने विशिष्टविध्यप्रवृत्तिरुक्तेति मन्यमानः शङ्कते **ननु विशिष्टविधिरिति ।** विशेषणाप्रसिद्ध्यभिप्रायोद्घाटने कृते तदप्रसिद्धिरसिद्धा दध्ना जुहोति सोमेन यजेतेत्यादिषु दधिसोमादिविशेषणानां लोकप्रसिद्धत्वादिति पुनः शङ्कते **नन्विति ।**

१८० । ४ **यथैतस्यैवेति ।** अश्वं नत्वा वारवन्तमित्यस्यामृचि गीतं साम वारवन्तीयं तस्य रेवतीर्नः सधमाद इत्यादितृचसंबन्धः कवतीषु रथन्तरं गायेदिति वाक्येन कवतीरथन्तरसंबन्ध इव वाक्यान्तरेण न प्रसिद्ध इत्यनेनैव विधिवाक्येनावगम्यः । अस्य तत्र तात्पर्याभावेनाप्रामाण्ये तत्सिद्धिर्न स्यादित्यर्थः । नन्वप्रसिद्धविशेषणविशिष्टविधिरपर्य्यवस्यन् विशेषणविधिमिवाप्रसिद्धविशेषणस्वरूपमपि कल्पयेदेव तदभावे ऽपि विशिष्टविध्यपर्यवसानाविशेषात् । वस्तुतस्त्वत्र सर्वविशिष्टविधिसाधारण्येन कल्प्यो विशेषणविधिरेव तात्पर्येण विशेषणस्वरूपप्रसिद्ध्यर्थो भवतीति न तत्प्रसिद्ध्यर्थं शब्दान्तरकल्पनमपेक्ष्यते एवं खलु मीमांसकमर्य्यादा । चत्वारः साहस्रा इत्येकशब्दोपादानलक्षणसंघाताख्या निकायिन उपक्रम्य त्रिवृदग्निष्टुदग्निष्टोम इति प्रथममग्निष्टुतं विधाय वारवन्तीयमग्निष्टोमसाम कार्य्यमिति तस्य वैशेषिकगुणविधानानन्तरमेतस्यैव रेवतीष्विति श्रूयते निकायिनां च पूर्वस्योत्तरे*-ष्वित्यष्टमाध्यायाधिकरणे निकायिषूत्तरेषां प्रथमविकारत्वस्य स्थापितत्वादेतद्विधिविधेयः क्रतुः प्रथमाग्निष्टुद्विकारो भवति । ततश्चात्र रेवत्याधारवारवन्तीयसामसाध्याग्निष्टोमस्तोत्रभावनाविशिष्टक्रतुभावनाविधिना कल्प्यो विशेषणविधिर्नाग्निष्टोमस्तोत्रस्य न वा तद्गुणस्य वारवन्तीयस्य प्राप्त्यर्थः द्वयोरप्यतिदेशतः प्राप्तेः किं तु तदप्राप्तरेवतीवारवन्तीयसम्बन्धप्राप्त्यर्थ इति तत एव तत्सिद्धेर्न तत्सिद्ध्यर्थं कल्पनान्तरमपेक्षणीयम् । अतो विशिष्टविधितात्पर्याऽविषयस्यापि विशेषणस्यात्र कल्प्यविशेषणविधितात्पर्यविषयत्वान्नाप्रामाणिकत्वप्रसक्तिरिति चेन्मैवम् । विशिष्टविधिरूपेणैव प्रमाणेन रेवतीवारवन्तीयसम्बन्धरूपविशेषणस्याप्यप्रमितौ तद्विशिष्टविषयस्य विधेः कल्पकस्य प्रमाणसिद्धत्वाभावापत्त्या ततो विशेषणविधिकल्पनस्यासम्भवेन तत्कल्पकस्य विशिष्टविधेरेव विशेषणस्वरूपे ऽपि प्रामाण्यस्यावश्यवक्तव्यत्वात् । यदाग्नेयो

* जै. सू. अ. ८ पा. १ सू. १९ ।

ऽष्टाकपालः सप्तदश प्राजापत्यान् पशूनित्यादीनां प्रथमप्रतीतद्रव्यदेवतासंबन्धकल्पितद्विशिष्टयागविधीनां यागकल्पके द्रव्यदेवतासंबन्धरूपविशेषणे ऽपि प्रामाण्यभावे कल्पकप्रमित्यभावेन यागकल्पनाऽनुपपत्त्या तद्विशिष्टयागविधेरेवाप्रवृत्तिप्रसङ्गेन तस्यैवाप्रसिद्धविशेषणस्वरूपे तात्पर्याविषये ऽपि प्रामाण्यकल्पनावश्यम्भावाच्च । तद्वदर्थवादानां* तात्पर्याविषये ऽपि स्वार्थे प्रामाण्यं युज्यतएव । न च तात्पर्याभावमात्रेण शब्दसामर्थ्याज्जायमानं ज्ञानं तस्य ज्ञानस्यौत्सर्गिकं बाधकाभावेनानपोदितं प्रामाण्यं च निवारयितुं शक्यम् । न चादित्यादिपदानां ज्योतिरादिषु व्युत्पत्तिग्रहे बाधको ऽस्तीति शङ्कनीयम् । यथा स्रक्चन्दनवनिताहिमोष्णादिषु सुखजनकत्वतदजनकत्वदशयोः स्वर्गशब्दप्रयोगाऽप्रयोगदर्शनेनान्वयव्यतिरेकाभ्यामैहिकसाधारण्येन सुखमात्रवाचकत्वेनावगतस्य स्वर्गशब्दस्य यन्न दुःखेन संभिन्नमित्याद्यर्थवादावगताऽलौकिकसुखविशेषवाचकत्वावधारणादैहिकसुखेषु तत्प्रयोगो लाक्षणिकः कल्प्यते । एवं मन्त्रार्थवादावगतदेवताविशेषवाचिनां शब्दानां तत्तदभिमानविषयेषु ज्योतिरादिषु प्रयोगो लाक्षणिक इति कल्पनोपपत्तेः । यदि स्वर्गफलकर्मविध्यपेक्षितत्वादर्थवादावगते ऽपि सुखविशेषे स्वर्गशब्दस्य शक्तिकल्पनं तथाभूतसुखभोगोपयोगिभोगस्थानभोगोपकरणादिरूपलोकविशेषादिप्रतिपादकार्थवादानां तत्तल्लोकादिषु प्रामाण्यं चाभ्युपगम्येत तर्हि तच्छन्दोगब्राह्मणाद्याम्नातदेवतादर्शनसम्भाषणवशीकरणसालोक्यसायुज्यादिप्राप्तिफलककर्मोपासनाविध्यपेक्षितत्वान्नानाविधमहिमयुक्तदेवतातत्प्रतिपादकार्थवादानामपि तत्र तत्र प्रामाण्यमभ्युपगन्तव्यमिति समानम् । एवं च रोहिणी नक्षत्रमिन्द्रो देवतेत्यादिनक्षत्रदेवतावाक्येषु तस्यपदमध्याहर्तव्यमिति रोहिणीनक्षत्रस्येन्द्रो देवतेत्यादिरर्थो ग्राह्यः । अत एव नक्षत्रेष्टियाज्यानुवाक्यास्विन्द्रो ज्येष्ठामनुनक्षत्रमेतीत्यादिभेदनिर्देश इत्यलं विस्तरेण ।

समुदायस्येति । यदि लोकसिद्धानुभवानपलापार्थं पदार्थसंसर्गो वाक्यार्थ १८० । १५
इष्यते तथापि तत्तत्पदार्थसंसर्गस्वरूपस्य वाक्यार्थस्य प्रतियोगिभेदेन भेदाद्वाक्यभेदो दुर्वारः । तस्मादेकार्थे विभागे साकाङ्क्षं पदकदम्बकं वाक्यमिति लक्षणेन देवस्य त्वेत्यत्र वाक्यैक्यं न सिद्ध्येदिति भावः । **एकप्रयोजनेति** ।

* तदर्थवादानामिति २ पु· पा· ।

स्यादयं दोषो यदि लक्षणे ऽर्थशब्दः प्रतिपाद्यवाची स्यात्। प्रयोजनवाची त्वयम्। तथा चानुष्ठेयत्वेनोपयोगी मुख्यः प्रयोजनरूपो यो विशिष्टो ऽर्थो निर्वापरूपः तस्य सकलविशेषणविशिष्टस्यैकत्वादुक्तलक्षणेन देवस्य त्वेत्याद्येकं वाक्यमिति युज्यतएव। न च तथापि निर्वपामीत्यस्य देवस्य त्वा सवितुः प्रसवे निर्वपामीत्यादिप्रकारेण प्रत्येकमन्वयाद् वाक्यचतुष्टयं स्याद् भगो वां विभजत्वित्यादाविवार्थैक्ये ऽपि गुणानुसारेण प्रधानावृत्त्ययोगात्। चित्पतिस्त्वा पुनात्वित्यादिवाक्यत्रये गुणभूतस्यैवाच्छिद्रेणेत्यादिकस्याप्यावृत्तेश्चित्पत्यधिकरणे* वक्तव्यत्वादिति भावः। एवमधिकशङ्कापरिहारौ न च द्वाभ्यां द्वाभ्यामित्यादिटीकातद्व्याख्यानयोः स्पष्टीभविष्यत इति इहाधिकरणं संक्षेपेण लिखितम्।

१८१।१ स्तुतिप्रतिपत्तिद्वारमिति। न चात्रापि प्रयाजवाक्यवदवान्तरतात्पर्यमिष्यतामिति शङ्कनीयम्। अर्थवादवृन्दस्य तल्लक्षणीयायां प्रयाजादिवद्विध्यन्वितायां स्तुतौ अवान्तरतात्पर्ये अवश्यवक्तव्ये सत्यत्वासत्यत्वौदासीन्येन प्रतीतमात्रतया स्तुत्युपकारिणि तद्द्वारभूते ऽप्यर्थे ऽवान्तरतात्पर्यकल्पनस्यायुक्तत्वात् तदभावे ऽपि मानान्तरप्राप्तिबाधरूपापवादराहित्यप्रतिष्ठितौत्सर्गिकप्रामाण्यबलाद् देवताविग्रहादिसिद्धौ तत एव देवताध्यानविधेर्देवतासायुज्यादिफलनिर्देशस्य चापेक्षाशान्त्या तदपेक्षाशान्त्यर्थमपि देवताविग्रहादितात्पर्यवद्वाक्यान्तरकल्पनस्यार्थवादपदवृन्दस्यैवावान्तरतात्पर्यकल्पनस्य चानपेक्षितत्वात्। व्युत्पत्तिविरोधस्य च फलनिर्देशापेक्षितदेवताविग्रहादिवाक्यप्रामाण्यस्यावश्याभ्युपगन्तव्यत्वेन तद्बलेनैव निरसनोपपत्तेः व्युत्पत्तिविरुद्धे तात्पर्यं न कल्पनीयमिति शङ्कायां तद्विरोधपरिहारार्थमस्यैव न्यायस्यापेक्षणीयत्वात्। देवताविग्रहाणामुद्देशोपयोगप्रदर्शनं फलनिर्देशोपयोगप्रदर्शनस्याप्युपलक्षणम्। तेन इन्द्रादिशब्दविषयो भविष्यत्युद्देशः। ऐन्द्रं दधीत्यादौ प्रथमोपस्थितस्येन्द्रादिशब्दस्य देवतात्वेनान्वयसंभवे तदधीनचरमोपस्थितिकस्यार्थस्य तथात्वेनान्वयकल्पनायोगात् शब्दे कार्यासंभवएवार्थे कार्यविज्ञानात् प्रसिद्धज्योतिरादिविषयो भविष्यत्युद्देशः। न ह्यश्वमेधे यन्मेहसि तस्मै स्वाहा यच्छकृत्करोषि तस्मै स्वाहेत्यादिमन्त्रानुष्ठेयहोमानां प्रसिद्धमेध्याश्वमूत्रपुरीषादिकमन्तरेणोद्देश्यमस्तीति शङ्कानिरासो लभ्यते शब्दस्याचेत-

---

* जैमिनिसू॰ अ॰ ३ पा॰ १ सू॰ ४८।

नस्य वा देवतात्वे तदच देवतादर्शनसंभाषणादिफलकर्मोपासनाविधीनामप्रामाण्यप्रसङ्गेन सङ्कर्षादिषु तथोक्तेरन्वारुह्यवादत्वात् प्रथमोपस्थिते शब्दे कार्यान्वयस्यौत्सर्गिकत्वे च ऋचि प्रणवं दधातीत्यचापि प्रणवशब्दस्यैवानुवाक्यान्ते निधानापत्त्या तदर्थस्यौङ्कारस्य निधानमिति व्यवस्थापयता संकर्षगतेनैवाधिकरणान्तरेण विरोधापत्तेश्च यत्नसाध्ययागभावनां यत्नरूपां प्रति स्वरूपेण यागस्य करणत्वासंभवात् फलशिरस्कभावनाकरणत्वं वाच्यम् तत्तु विवक्षितविवेकेन स्वर्गादिफलकरणत्वपर्य्यवसन्नमित्यभिप्रेत्य पक्षान्तरमाह तदीयफलांशं वेति ।

तदस्मन्मते ऽप्यविरुद्धमिति । नन्वतिथौ तत्प्रधानत्वं भाव: १८२ । २
कर्मणि स्यात्तस्य प्रीतिविधानत्वा*दिति देवताधिकरणगुणसूत्रेण यज्ञस्यातिथ्यवैषम्यम् आतिथ्यमतिथिप्रीत्यर्थं न तु यज्ञो देवताप्रीत्यर्थं इत्येवंरूपं दर्शितं तद्विरोधो यज्ञेन देवताप्रीतिमभ्युपगच्छतां दुर्वार इति चेत् । नैष दोष: । तत्र हि तस्य प्रीतिविधानत्वादिति हेतोरयमर्थ: । येन येन यावता ऽतिथि: प्रीयते तेन तेन द्रव्येण तावता स पूजनीय इत्यातिथ्यमतिथिप्रधानम्† । कर्मणि तु नास्ति प्रीतिविधानं येन द्रव्येण यावता या देवता प्रीयते तेन तावता सा पूजनीयेति किं तु देवतैक्येपि तत्तत्कर्मविशेषव्यवस्थितैराज्यचरुपुरोडाशादिभिश्चतुर्गृहीतद्व्यवदानादिपरिमितै: स्वरुप्रस्तरादिभि‡रनदनीयैश्च यष्टव्यमित्येव विधानम् । अतस्तस्य प्रीतिविधानत्वादिति हेतुना ऽपि विरोध: । अस्माभिस्तु एतद्वै दैव्यं मधु यद् घृतं यद्वै देवा हविर्जुषन्ते अल्पमप्येकामाहुतिमपि तद्गिरिमात्रं वर्द्धयन्तइत्याद्यर्थवाददर्शनेन हविषां देवतोचितद्रव्यरूपेण देवताभोजनपर्याप्तपरिमाणेन च विपरिणतिमङ्गीकृत्य देवताप्रीत्यर्थत्वं समर्थ्यते न त्वस्मिन्मते ऽप्यातिथ्यन्यायेन तत्तद्देवताप्रीतिकरद्रव्यपरिमाणविधानमस्तीति न कश्चिद्विरोध: ।

देवादीन् स्मृत्वेति । ननु एते असृग्रमिति मन्त्रस्यायमर्थ: । ,, । ४
एते इन्दव: सोमास्तिरपवित्रं तिर्यग्भूतं दशापवित्रं प्रति आशव: शीघ्रगामिन: विश्वा सौभगा सर्वाणि सौभाग्यानि अभि उद्दिश्यासृग्रमसृज्यन्तेति । एवं प्रतीयमानार्थानुसारेणैव सोमलतादेवत्ये§ विनियोगो ऽस्य

---

* जै॰ सू॰ अ॰ ६ पा॰ १ सू॰ १० ।

† इत्यातिथिप्रधानमिति २ पु॰ पा॰ ।

‡ स्वरप्रस्तरादिभिरिति २ पु॰ पा॰ ।

§ रेवत्ये इति २ पु॰ पा॰ ।

मन्त्रस्य श्रूयते बहिष्पवमानेन वै यज्ञः सृज्यते यदेते असृग्रमिन्दव इति प्रस्तौति यज्ञमेव तत्सृष्टं देवेभ्यः प्राहेति कथमेवमन्यपराणामेतइत्यादीनां देवतास्मारकत्वं कथं च साधारणे रेत इत्यादिभिस्तत्तद्देवाद्यसाधारणाग्निसूर्यादिपदैरिव तत्तद्देवादिजातीयव्यक्त्यन्तरसृष्ट्यनुकूलपरस्परव्यावृत्तजातिसंस्थानविशेषावच्छिन्नतत्तद्देवाद्युपस्थितिः । उच्यते । एते असृग्रमिन्दव इति बहुभ्यः प्रतिपदं कुर्यादेतइति सर्वामेवैनां वृद्धिं भूत्याअभिवदतीति विनियोगानुसारेण सोमविशेषणतया स्थितस्याप्येतइत्यस्य सर्वादियजमानप्रकाशकत्वं वक्तव्यम् । तद्वदेतइति वै प्रजापतिरित्यादिवाक्यानुसारेण स्रष्टारं प्रत्येतइत्यादिपदानां तत्तद्देवताविशेषरूपादिस्मारकत्वमपि भविष्यतीति न काचिदनुपपत्तिः ।

१८३ । ८ **जिते** वशीकृते । **अणिमादाविति ।** पार्थिवाद्यैश्वर्योपलक्षणमेतत् । सन्ति हि पार्थिवादीनि प्रत्येकमष्टावष्टावैश्वर्याणि ।

ह्रस्वता स्थूलता बाल्यं वार्द्धकं यौवनं तथा ।
नानाजातिस्वरूपत्वं तथा सुरभिगन्धता ॥
पार्थिवांशं विना मूर्तैश्चतुर्भिर्देहधारणम् ।
गन्धतन्मात्रतत्त्वोत्थमेतदष्टगुणं महत् ॥

इत्याद्यागमप्रसिद्धानि । **शक्तिभिश्च तद्बिम्बैरिति ।** पृथिव्यादिशक्तयो निवृत्तिप्रतिष्ठाविद्याशान्तिशान्त्यतीताख्याः पृथिव्यादिबिम्बाश्चतुरस्रधनुराकारत्रिकोणषट्कोणबिन्दुरूपाणि मण्डलानि । **सारूप्यमिति ।** स्वात्मरूपतोपासनां कृत्वेत्यर्थः* ॥

११ । १४ **शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥ ३४ ॥**

ननु शूद्रस्याध्ययनाभावे विद्यानधिकारशङ्कायामग्न्यभावे ऽपि तदधिकारः संभवतीति समाधानमसंगतमित्याशङ्क्य तत्साङ्गत्यार्थं पूर्वतन्त्राधिकरणेन† न गतार्थत्वशङ्क्येयमित्यवतारयति **आगन्तुकं शास्त्रीयमिति ।** पूर्वतन्त्रे शूद्रस्य कर्माऽनधिकारे ऽग्न्यभावो मूलयुक्तिरुक्ता तस्या विद्याया-

* अत्र अष्टमं देवताधिकरणं पूर्णम् । † पूर्वत्राधिकरणेनेति ग पु· पा· ।

मप्रवृत्तेः शूद्रस्य कर्मानधिकारे ऽपि विद्याधिकारः संभवेदित्यधिकपूर्वपक्ष-सद्भावाद् न गतार्थत्वमिति परिहारग्रन्थाशयं दर्शयति **तत्राऽनग्नेरिति ।**

नन्ववैद्यत्वमपि तत्र सिद्धान्तयुक्तित्वेनोक्तमतो गतार्थत्वं तदवस्थमि-त्याशङ्क्याह **अवैद्यत्वमिति ।** नन्वनग्नित्वं तत्र मूलयुक्तिः अवैद्यत्वमभ्युच्चय १८३ । २२
इत्युभयमप्ययुक्तम् । चातुर्वर्ण्यमविशेषा*दिति पूर्वतन्त्राधिकरणे निर्देशत्र-याणां स्यादग्न्याधेये† इति सूत्रेण वसन्ते ब्राह्मणो ऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इत्याधानविधिवाक्यैस्त्रयाणामेषामाधाने निर्देशादनग्नेः शूद्रस्य नाधिकार इति सिद्धान्तयुक्तिं प्रथमं प्रदर्श्य निमित्तार्थेन बादरि-स्तस्मात्सर्वाधिकारः स्या‡दित्यादिसूत्रैर्य एवं विद्वानग्निमाधत्तइति वाक्ये-नाधाने सर्वसाधारणे विहिते वसन्तादिवाक्यानि ब्राह्मणादिनिमित्तेन वस-न्तादिकालविधायकानि । अतो वसन्तादिवाक्यपर्यालोचनात् शूद्रस्याऽनग्नि-त्वासिद्धेस्ततः कर्माऽनधिकारो न सिध्यतीति तामुक्तिं दूषयित्वा तदन्त-रम् अपि वा वेदनिर्देशादपशूद्रं प्रतीयेते§ति सूत्रेण वेदाध्ययनार्थोपनयने वसन्ते ब्राह्मणमुपनयीतेत्यादिवाक्यैस्त्रयाणामेव निर्देशादुपनयनरहितः शूद्रो ऽध्ययनाभावात्कर्मसु नाधिकारीति सिद्धान्तयुक्तिं प्रदर्श्य गुणार्थि-त्वान्नेति चे‖दिति सूत्रेण शूद्रः कर्मानुष्ठानायाध्ययनार्थित्वादुपनयनाभावे ऽपि स्वयमेव गत्वा ऽध्येष्यतइत्याशङ्कामुद्भाव्य संस्कारस्य तदर्थत्वा¶दिति सूत्रेणोपनयनसंस्कारस्याध्ययनार्थत्वादुपनयनाभावे स्वयमेव गत्वा ऽध्ययनं विगुणं स्यादिति तां शङ्कां परिहृत्य विद्यानिर्देशान्नेति चेदि**ति सूत्रेण कर्मानुष्ठानार्थमवश्यग्राह्यया विद्यया ऽऽत्तेपाल्लौकिकाध्ययनं भविष्यतीत्युपन-यनपूर्वकवेदाध्ययनाभावेन न किं चिद्वैकल्यमिति शङ्कामुद्भाव्यावैद्यत्वा††दिति सूत्रेण न शूद्रेणाध्येतव्यमिति शूद्रस्याध्ययनमात्रनिषेधाद्विद्यारहितस्य तस्य कर्मसु नाधिकार इत्युक्त्वा तथा चान्यार्थदर्शन‡‡मिति सूत्रेण पद्यु वाएतदित्या-

---

* जैमिनिसू· अ· ६ पा· १ सू· २५ ।

† जै· सू· अ· ६ पा· १ सू· २६ । निर्देशस्त्रयाणामिति २ पु· । निर्देशाद्वा त्रयाणामिति सौत्रः पाठः ।

‡ जै· सू· अ· ६ पा· १ सू· २७ । सर्वाधिकारमिति सौत्रः पाठः ।

§ जै· सू· अ ६ पा· १ सू· ३३ । अपशूद्राणां प्रतीयेतेति सौत्रः पाठः ।

‖ जै· सू· अ· ६ पा· १ सू· ३४ ।

¶ जै· सू· अ· ६ पा· १ सू· ३५ ।

** जै· सू· अ· ६ पा· १ सू· ३६ ।

†† जै· सू· अ· ६ पा· १ सू· ३७ ।

‡‡ जै· सू· अ· ६ पा· १ सू· ३८ ।

दिश्रुतेः शूद्रसमीपे ऽध्ययनप्रतिषेधात् शूद्रस्य कथं चिदप्यध्ययनं न संभवतीति कैमुतिकन्यायदर्शनेनावेद्यत्वादिति सूत्रोक्तयुक्तेर्दृढीकरणात् । न हि सूत्रकृता स्वयमेव निराकृता युक्तिर्मूलयुक्तिः बहुभिराक्षेपसमाधानैरुपपादिता ऽभ्युच्चययुक्तिरिति युज्यतइति चेत् । उच्यते । अनग्नित्वं मूलयुक्तिर्भवत्येव । द्वितीयाधानाधिकरणे* वसन्तादिवाक्यानां निमित्तार्थत्वं निराकृत्य ब्राह्मणादिसंयुक्ताधानविधायकतायाः समर्थितत्वात् । अन्यथा तत्समर्थनार्थमेव प्रवृत्तस्य तस्याधिकरणस्यात्यन्तवैयर्थ्यापत्तेः । अत एव शबरस्वामिभिरस्मिन्नधिकरणे य एवं विद्वानग्निमाधत्तइति वाक्यं संभारविधिशेषार्थवादो न त्वाधानविधायकम् । तद्विधायकानि तु वसन्तादिवाक्यान्येवेति सूत्रकाराभिप्रायवर्णनेनानग्नित्वस्य मूलयुक्तित्वं प्रतिष्ठापितम् । एवमाधानाधिकरणसिद्धानग्नित्वस्य पुनः कीर्तनमाभिप्रायिकपरिहारेण य एवं विद्वानग्निमाधत्तइति वाक्यावलम्बनशङ्कानिरासार्थमेव । अन्यथा महर्षिवरनिर्मितानां सूत्राणां परस्परविरोधापत्तेः । एवमनग्नित्वेन सिद्धे ऽनधिकारे ऽध्ययनाभावो ऽभ्युच्चय इत्येतत् तदुपपादकस्याध्ययनविधिपुरुषार्थत्वनिरासस्याभावादिति मूले एव स्पष्टम् ।

नन्विहापि शास्त्रे ऽध्ययनविधिपुरुषार्थत्वनिरासः सूत्रकृता न कृत
१८४ । २ इत्याशङ्क्याह **इह संस्कारेति** । ननु संस्कारपरामर्शा†दिति सूत्रं शूद्रस्य विद्याङ्गोपनयनाभावाद् विद्यानधिकारपरम् । न च तदनन्तरमध्ययनस्य संस्कारकर्मत्वव्यवस्थापकं सूत्रान्तरमस्तीति चेत् । उच्यते । पूर्वतन्त्राधिकरणे ऽनग्नित्वयुक्त्या ऽपि कर्मानधिकारसिद्धेस्तत्रानुपपादितमप्यध्ययनस्य संस्कारकर्मत्वम् इहावेद्यत्वमात्रेणोपपादनीयस्य विद्याऽनधिकारस्य समर्थनार्थमवश्यमुपपादनीयम् । अतस्तदुपपादनमपि संस्कारपरामर्शादित्यनेन स्वाध्यायस्याध्ययनसंस्कारसंबन्धादित्यर्थकेन विवक्षितमिति वक्तव्यमेव । अत एव टीकाकृता तदेव सूत्रं मूलं मनसिकृत्याध्ययनस्य संस्कारकर्मत्वं व्यवस्थापितम् । ततश्चाध्ययनसंस्कारः शूद्रेणापि क्रियतामित्याशङ्कापरिहारार्थं संस्कारपरामर्शादित्येतदेवाध्ययनाङ्गत्वेनोपनयनसंस्कारविधानादित्येतदर्थत्वेनापि योजनीयम् । अस्त्वध्ययनाङ्गोपनयनं शूद्रस्यापि शिष्यस्य

* जै. सू. अ. २ पा. ३ सू. ४ । † ब्रा. सू. अ. १ पा. ३ सू. ३६ ।

स्वयमुपगमने ऽप्याचार्यानुमतिरूपं तत्कर्तृकस्वसमीपप्रापणं विना ऽध्येतुमशक्यतया ऽर्थप्राप्ते उपनयने वसन्तादिवाक्यानां निमित्तार्थत्वोपपत्तेरिति शङ्कायां तदभावाभिलापा*च्चेत्येतद् न च संस्कारमर्हतीत्यनेनाध्ययनाङ्गोपनयनाभावस्याप्यभिलापादित्येतत्परमपि योजनीयम् । एवमर्थभेदेन सूत्रभेदमभिप्रेत्य संस्कारपरामर्शादित्यादिसूत्रैरिति बहुवचननिर्देश इति सर्वमनवद्यम् ।

इदं तु चिन्त्यते । वहत्याधिकरणगतसंस्कारशब्दस्येव पूर्वतन्त्रापशूद्राधिकरणगतस्य संस्कारस्य तदर्थत्वा†दिति सूत्रस्थितसंस्कारशब्दस्याप्यध्ययनसंस्कारार्थत्वमपि परिकल्प्य शक्यमुपपादयितुं तथाप्यध्ययनस्य संस्कारकर्मत्वं प्रसाधितमिति कर्म वा विलक्षणा‡मिति नावमिकाधिकरणेनापि तत् सिद्धम् । तत्र ह्यधिकरणे द्वितीयसप्तमाध्याययोर्गीतिक्रियारूपत्वेनोक्तस्य साम्नो ऽर्थकर्मत्वनिरासेन ऋगक्षराभिव्यञ्जकतया संस्कारकर्मत्वं व्यवस्थापितम् । तद्व्यवस्थापनं च स्वरविशेषविशिष्टतया ऋग्वर्णाभिव्यञ्जकस्य उच्चारणस्यैव संस्कारकर्मत्वव्यवस्थापनं पर्य्यवस्यति । सामाध्ययनकाले तद्व्यतिरेकेण क्रियान्तराभावात्तदेवोच्चारणं गुरुमुखोच्चारणानन्तरभावि सदध्ययनमुच्यतइति । तेन सामाध्ययनस्य संस्कारकर्मत्वसिद्धौ न्यायसाम्याद् वेदान्तराध्ययनस्यापि तथात्वं सिध्यति । किं बहुना । अथातो धर्म्मजिज्ञासेति§ प्रथमाधिकरणेन कृत्स्नस्याप्यध्ययनस्य संस्कारकर्मत्वं कण्ठत एव प्रसाधितम् । तत्र ह्यतःशब्दोक्तेन वेदस्य विवक्षितार्थत्वेन सूचितम् अविवक्षितार्थत्वपूर्वपक्षं लिखद्भिर्व्याख्यातृभिस्तदुपपादनार्थम् अध्ययनस्य स्वर्गार्थत्वोक्त्या पुरुषार्थत्वं स्पष्टमुक्तम् । तत्सिद्धान्ते अक्षरावाप्त्यर्थज्ञानान्यतरफलकत्वेन स्वाध्यायसंस्कारत्वं समर्थितम् । किं चात्र प्रसाधितेनाध्ययनस्य संस्कारकर्मत्वेन शूद्राधिकारशङ्का नापैतीति व्यर्थमिह तत्प्रसाधनम् । स्वाध्यायाध्ययनविधेः स्वशाखाध्ययनविषयत्वेन शूद्रस्य सर्वापि शाखा न स्वशाखेति तदध्येतृभ्यो गृहीत्वा विद्यानुष्ठानोपपत्तेः । अन्यथा मैत्रेयीवाचक्नवीप्रभृतीनां स्त्रीणां विद्यानुष्ठाने का गतिः । तस्मान्नेयं गतार्थत्वशङ्कापरिहाररीतिर्युक्तेति ।

---

* व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ३६ ।
† जै॰ सू॰ अ॰ ६ पा॰ १ सू॰ ३५ ।
‡ जै॰ सू॰ अ॰ ६ पा॰ २ सू॰ १ ।
§ जै॰ सू॰ अ॰ १ पा॰ १ सू॰ १ ।

अथैवमुत्तरम् । शास्त्रभेदे ऽपि गतार्थत्वं परिहरणीयं चेद् विद्याधिकारिणः शूद्रेत्यामन्त्रणेन लिङ्गेन शूद्रस्य कर्मानधिकारे ऽपि विद्याधिकारो ऽस्तीत्यधिकशङ्कया न गतार्थत्वम् । न च शूद्रशब्दो यौगिक इति युक्तं रूढेर्बलवत्त्वात् । जानश्रुतेर्दुव्याप्तं ज्योतिर्नास्तीति मनुष्याद्यसंभावितगुणभाववचनरूपहंसवाक्यानादरश्रवणेन गगनमयं खादितुं न शक्नोतीति वाक्यश्रवणेनैव न तस्य शोकः किं तु रैक्वोपास्यदेवतोपासकस्य तदन्यस्यापि तदुपासना महाफलेति कथनेन रैक्वस्य महामहिमकीर्तनरूपस्तवनेन सयुग्वानमिति रैक्वचिह्नोपन्यासरूपेण तदुपगमनोपायोपदेशेन च महाफलविद्याग्रहणोपायो लब्ध इति जानश्रुतेर्मुदेवास्य संजातेति कल्पनौचित्येन शुगाद्रवणरूपयौगिकार्थासिद्धेश्च । न चात्र रूढिबाधकमस्ति येन यथा कथं चिद् योगः समाश्रीयेत अध्ययनसंस्काराभावस्य तदबाधकतायाः समर्थितत्वात् । कर्मस्विव विद्यासु मन्त्राभावेन श्रवणादिप्रतिषेधस्याप्यबाधकत्वादिति । तदेतत्सूत्रभाष्यपर्यालोचनया स्फुटमिति न विवृतम् । विद्यान्तरेणागतार्थत्वं तु यथा कथं चिट्टीकोपपादनार्थमुपन्यस्तमित्यलं विस्तरेण ।

१८५ । १ **न हि करणसामान्यमिति ।** कर्मादिभिः करणैः संयोगविभागादिफलेषु जननीयेष्वितिकर्तव्यतापेक्षाभावादिति भावः । **किं तु विहितइति ।** विहितस्य करणविशेषस्य कथमनेन फलापूर्वमुत्पादनीयमिति तत्प्रकारस्यानिर्ज्ञातत्वात् कथंभावापेक्षोदेतीति भावः । **मा भूवन्नध्ययनादयः पुमर्था इति ।** बहुवचनमविवक्षितम् । अध्ययनं स्वाध्यायमात्रपरमर्थज्ञानस्य हितैषिवचनावगम्ययागादिफलसन्निकृष्टतया पुरुषार्थत्वमभ्युपगम्य तत्र नियमाशङ्कनात् । **द्वौ हीह पूर्वपक्षाविति ।** यथा कथं चित्सम्भवमात्रेण द्वितीयपूर्वपक्ष उपन्यस्तः । रैक्वेणानुष्ठीयमानां विद्यां संवर्गविद्येत्यविज्ञाय सामान्यतो या तदीया विद्या तां लप्स्ये इति धियोपसन्नस्य धार्मिकस्य विवेकिनो जानश्रुतेः शूद्रेत्यामन्त्रणलिङ्गेन विद्यासामान्याधिकारपूर्वपक्षस्यापि दृढत्वात्* । अध्ययनाभावस्याबाधकताया उक्तत्वात् । ननु टीकाया विध्यपेक्षितत्वमप्यार्थवादिकार्थसिद्धावपेक्ष्यमित्युक्तमिति प्रतिभाति तदयुक्तम् । बाधकाभावमात्रेण तत्सिद्ध्युपपत्तेरित्याशङ्क्य प्रयोजनकथनमात्रपरा तदुक्तिरिति

* दृष्टत्वादिति २ पु· पा· ।

व्याचष्टे **विधिना चापेक्षतइति** । **सप्रयोजनतेति** । उक्तेत्यनुषङ्गः ।
अवयववृत्तीति । शुचा दुद्रावेत्याद्यर्थेषु शूद्रशब्दस्य रुजं द्रावयतीत्यर्थे १८५ । २४
रुद्रशब्दस्यैव नैरुक्तप्रक्रियया निष्पत्तिः । उकारदैर्घ्यस्यापि तत एव सिद्धिः ।
राज्ञो विशिष्टविद्योपदेष्टृगुरुसद्भावावगमेन मोद इव हंसो यदभावान्मामदूदु-
हत् सा विद्या सत्यपि संनिहिते गुरावपि इयन्तं कालं मया न लब्धा तेन
तत्प्रयुक्तदूषणपात्रमभवमिति शोको ऽपि संभवत्संजिहान एव क्षत्तारमुवा-
चेति वाक्यप्रतीतकालाक्षमत्वलिङ्गाद्यवगमितो ऽस्त्येव मा प्रसाङ्क्षीरिति
विहितस्य सत्यकरणस्य फलवचनतया योजयितुं शक्यमपि मैतत्त्वा धाक्षी-
रित्येतदज्ञानात् तत्सक्तिकरणे ऽपि दाहो मा भूदित्याशीर्वचनतया योजयति
यदि करोषीति । धाक्षीरिति प्रथमपुरुषविषये मध्यमपुरुषश्छान्दसः । ननु
वरो वराकः शोच्य इति वरशब्देनैकदेशद्वारोच्यते चेत् प्रथमान्तस्य कथम-
न्वय इत्याकाङ्क्षायां वाक्यभेदेनोद्देश्यसमर्पकपदाध्याहारेण च योजयति
एष तावद्वराक इति । के चिदरे इति हीनसंबोधनार्थतया पदविभागं
कुर्वन्ति । तथा पदविभागे मय उञो वो वेत्युकारस्य वकारादेशेन
भाव्यम् पक्षे निपात एकाजनाङिति प्रगृह्यसंज्ञया प्रकृतिभावे सति कमु
अरइति वा भाव्यम् । अतः कम्वर*इति श्रुतिसंधिसिद्ध्यर्थं वकारोपजन
उकारोपजनो वा छान्दसः समाश्रयणीयः । न वा उ एतन्म्रियसे नरिष्य-
सीत्यादिवत् । **एनमित्थं सन्तं कमिति** । उद्दिश्येत्यध्याहार्यम् । ब्रूचि-
शासिगुणेन चेति संगृहीतमकथितकर्मत्वं वा कथं चित् समर्थनीयम् एतद्व-
चनमिति कर्मान्तरोपादानात् । यद्यप्येतत्सन्तमित्यस्य प्राणिमात्रमिति
टीकाया विवरणादीदृशं सन्तं मनुष्यसामान्यमर्यादामनतिक्रम्य वर्तमानमि-
त्यर्थो विवक्षित इति भाति तथापि छान्दोग्यविवरणानुसारादेतद्वचनमात्थे-
त्यन्वयो दर्शितः । **ब्राह्मणायन**मित्यस्य ब्राह्मणवंश्यमित्यर्थः । नडादिभ्यः
फगिति सूत्रेण नडादिगणपठिताद् ब्राह्मणशब्दाद् गोत्रापत्यार्थे फक्प्रत्यये
फस्यायनादेशे च सति तद्रूपनिष्पत्तेः । इदं ब्राह्मणवंश्यत्वं वेषेण ज्ञातव्यमिति
तज्ज्ञापकमुपन्यस्तं **ब्राह्मणवेषमिति** । **निष्कव्याख्या हारमितीति** ।
यद्यपि निष्कं पदकरुचकशब्दाभिधेयं स्वर्णाभरणं हारो मणिमालेत्यस्ति

* कमुवरइति २ पु॰ पा॰ ।

लोके भेदव्यवहार: तथापि निष्कशब्दोक्तस्याग्रे हारे त्वेति हारशब्देन
विवरणादेवं व्याख्यातम् । **अश्वतरीभ्यामिति** । अश्वायां गर्दभादुत्पन्ना
गर्दभ्यामश्वादुत्पन्ना वा स्त्रीव्यक्तिरश्वतरी। **आ अधिकरणसमाप्तेरिति** ।
अनेन भाष्ये शूद्राधिकारनिषेधार्थत्वेनावतारितानां संस्कारपरामर्शा*दित्यादि-
सूत्राणामपि शूद्रामन्त्रणलिङ्गान्यथाकरणार्थत्ववचने तल्लिङ्गावलम्बनेवाधिका-
शङ्का ऽत्र निराकरणीया । अन्यत्सर्वं पूर्वतन्त्रएव सिद्धमिह न व्युत्पादनीय-
१८६ । २० मिति सूचितम् । **तथापि द्योतकतयेति** । व्यभिचारमभ्युपेत्य परिहार: ।
अस्मिन्प्रकरणे संवर्गविद्यान्वयिनो ब्राह्मणस्य द्वितीय: क्षत्रिय इति नियमे तु
नास्ति व्यभिचार: ।

ननूपन्यस्तलिङ्गसिद्ध्यर्थं प्रथममभिप्रतारिण: कापेययाज्यत्वं निर्द्धारणीयं तत्कुतो निर्द्धार्यते न हि भोजनार्थं कापेयाभिप्रतारिणो सहोपविष्टावित्येतावता तयो: किं चित्संबन्धान्तरं सिध्यति । सिध्यद्वा तयोरेकविद्यत्वमेव तत्सिद्ध्येत् । विद्याङ्गोपाख्यानेषु सहप्रस्थितानां प्राचीनशालसत्ययज्ञादीनां तस्यैव संबन्धान्तरस्यान्योन्यस्माद्विद्याङ्गगतविशेषग्रहणार्थत्वेन क्लृप्तत्वात् । तस्य कथं चित्कापेययाज्यत्वसिद्धावपि नामभेदेन चित्ररथादन्यस्य तस्य चैत्ररथित्वं कुत: सिद्ध्यति समानान्वयानां समानान्वया याजका इति नियमाभावात् । कुलक्रमागता ऋत्विज: पितृभूता: कस्य चित्कस्य चिदाधानप्रभृति यावज्जीवमृत्विजो मनुष्यभूतास्तत्र तत्र कर्मणि दैवात् प्राप्ता ऋत्विजो देवभूता इति त्रिविधानामृत्विजां शाट्यायनिशाखायां दर्शितत्वाद् देवभूतऋत्विगभिप्रायेणैव राजसूये प्रतितन्त्रं दक्षिणाभेदेन तदा नेतव्यऋत्विक्क्रमभेदे ऽपि ऋत्विक्काधिष्ठानभूता: पुरुषा राजसूयारम्भे यावत्समाप्ति नियता एव ग्राह्या न तु तत्र तन्त्रे भिन्ने ऽभिन्नापेक्षा† कर्तुमुचिता कालविशेषकर्तव्येषु तन्त्रान्तरेषु कदा चिदृत्विङ्मेलनेन कर्मविघ्नप्रसङ्गादित्येकादशे राजसूयान्तर्गतकर्मणां भिन्नतन्त्राणामपि ऋत्विक्तन्त्रत्वमुक्तम्‡ । तथा तस्य चित्ररथवंश्यत्वसिद्धावपि क्षत्रियत्वं कुत: सिध्यति एतेन वै चित्ररथं कापेया अयाजयन् तमे-

* व्या· सू· अ· १ पा· ३ सू· ३६ ।   † भिन्ने भिन्नापेक्षेति २ पु· पा·
‡ तन्त्रमुक्तमिति २ पु· पा· ।

काकिनमन्नाद्यस्याध्यक्षमकुर्वंस्तस्माच्चैत्ररथो नामैकः क्षत्रपतिर्जायते इति चित्ररथानुष्ठितद्विरात्रक्रतुमहिम्ना तद्वंश्यैरपि क्षत्रपतित्वं लब्धमित्येतावदेव ह्युक्तं न तु तद्वंश्यानां क्षत्रियत्वम् अक्षत्रियस्यापि निषादस्थपत्यधिकरण*पूर्वपक्षन्यायेन क्षत्रपतित्वोपपत्तेरित्याशङ्क्याह सर्वं च वैदिकं लिङ्ग- १८६ । २०
मिति । अभिप्रतारिणा सह पठिते कापेये श्रुत्यन्तरबलाच् चित्ररथयाजकत्वेन प्रत्यभिज्ञायमाने कापेययाज्योयमभिप्रतारीति बुद्धिर्भवति । अविदितपूर्वस्य हस्तिनो निकटे दृश्यमाने पुरुषे हस्तिपकोयमिति प्रत्यभिज्ञायमाने सत्ययमस्य शिक्षणीयो हस्तीति बुद्धिवद् ऋत्विक्षु पितृभूतानां मुख्यत्वात् पूर्वराजचरित्रेषु बहुशो याज्ययाजककुलव्यवस्थादर्शनाच्च कापेययाज्यत्वेन चित्ररथवंश्यत्वबुद्धिर्भवति । अथ यस्य ज्योतिरुक्थ्यः† पूर्वमहर्भवत्यायुरुत्तरइति द्विरात्रप्रकरणे श्रुतस्यैकाकिनमेवैनमन्नाद्यस्याध्यक्षं करोतीत्यर्थवादस्यैनं द्विरात्रयाजिनमेकमेव भ्रातृवर्गादिज्ञातिमध्ये ऐश्वर्यस्याध्यक्षं करोतीत्यर्थः । ननु सर्वेष्वपि लोकेष्वेनमेकमेवैश्वर्य्यस्याध्यक्षं करोतीति तदधिकैश्वर्यादीनामिन्द्रादीनां सत्त्वात् ततश्च तदनन्तरश्रुते एतेन वै चित्ररथमित्युपाख्याने फलरूपतया श्रुतं क्षत्रपतित्वं ज्ञातिप्राधान्यरूपमिति ज्ञातीनां क्षत्रियत्वेन फलभागपि क्षत्रिय इति बुद्धिर्भवति । ततश्चोक्तहेत्ववलम्बनबुद्धीनां क्व चित्क्व चिद् बाधकोपनिपातेन प्रमात्वाभावे ऽप्यत्र बाधकाभावेनौत्सर्गिकप्रमात्वबलादुदाहृतलिङ्गसिद्धिरित्यभिप्रायः ।

अमात्यप्रेषणादिनेति‡ । ,, । २३

वैश्याद् ब्राह्मणकन्यायां क्षत्ता नाम प्रजायते ।
जीविकावृत्तिरेतस्य राजान्तःपुररक्षणम् ॥

इत्युक्तलक्षणस्य क्षत्तुरमा राज्ञः समीपे भावाद्यौगिकममात्यत्वमस्तीत्यमात्यशब्देन निर्देशः । टीकायां रेफयुक्तः प्रष्ठशब्दश्चेत् प्रष्ठो ऽग्रगामिनीति वैयाकरणनिपातेन§ तस्याग्रगामिवाचित्वात् षष्ठीसमास एव ग्राह्यः । ऋकारयुक्तं पाठं दृष्ट्वा तु क्लिष्टः परसप्तम्यन्तपदबहुव्रीहिराश्रितः । तत् क्षत्रियस्य दृष्टमिति । इदमपि प्रायिकमुख्यत्वाभिप्रायलिङ्गम् । सम्भवति ह्यतिक्रान्तमर्या-

* जै० सू० अ० ६ पा० १ सू० ५१ ।　　† उक्थ्य इति २ पु० पा० ।
‡ प्रेषाठीति मूले पाठः ।　　§ निपातनेनेति पाठन्तरम् ।

दस्य शूद्रस्यापि बलवतो ऽवेष्ट्यधिकरण*दर्शितया रीत्या राज्यपालयितृत्वेन चतुर्प्रेषणादिकम्। **आद्यसूत्रएवेति।** न चाध्ययननियमसंस्कारपरामर्शादिति सूचयिष्यतइति प्रथमसूत्रे स्थित्वोक्तमाचार्यैः कथमिह तस्याद्यसूत्रे सूचितत्व†मुच्यते। नैष दोषः। शूद्रशब्दस्य न्यायतो रूढिप्रच्यावनार्थं प्रवृत्ते प्रथमसूत्रे ऽध्ययनाभावं हेतुमुपन्यस्तवतो भाष्यकारस्य तदुपपादको ऽध्ययनसंस्कारनियमो ऽप्याद्यसूत्रएव सूचित इत्यभिप्रायः। अत एवाच सूत्रे संस्कारशब्दो विद्याङ्गोपनयनपरतयैव भाष्ये व्याख्यात इत्यालोच्य तदभिप्रायानुसारेणाच पुनरुक्तिशङ्का स्वयं त्वध्ययनसंस्कारनियमः शब्दादुक्तत्वात्संस्कारसूत्रार्थं एव वक्तुमुचित इत्यभिप्रेत्याद्यसूत्रे तथा ऽवोचत्। कस्तर्हि स्वमते रूढिप्रच्यावकन्यायः सूच्यतइति सूत्रशेषसूचित एव तेन हि शुगाद्रवणस्याख्यायिकया सूचितत्वात्। **स बुद्धिस्थे इति** अबुद्धिस्थरूढितो बुद्धिस्थयोगो बलीयानिति न्यायः सूचितः।

१८१। ३ उपसदनेति। ननु तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति विहितं शिष्यकर्तृकं गुरुकर्मकमुपसदनं तं होपनिन्यइत्यादिलिङ्गावगतकर्तव्यताकम् आचार्यकर्तृकं शिष्यकर्मकम् उपनयनमिति भेदसत्वात् कथं पर्यायतोक्तिः। उच्यते। शिष्येणोपसदने कृते ऽपि तस्याचार्यकर्तृकं शिष्यभावं स्वसमीपावस्थानानुमत्यादिरूपोपनयनं विना विद्योपदेशपर्यवसायित्वासंभवाद्यचोपसदनमात्रं श्रुतं तत्र तदेवोपनयनस्य गमकमिति व्यञ्जयितुं गमकवाचिशब्दस्य गम्ये पर्यायतोक्तिः पर्यायोक्तालंकारे। ननु शूद्रश्चतुर्थो वर्ण एव जातिरिति स्मृत्या द्वितीयजन्मरूपोपनयनाऽसंभवे ऽपि सच्छूद्राणाममन्त्रकं विद्याङ्गोपनयनं संभवति। मानवधर्मशास्त्रे न च संस्कारमर्हतीत्येतदनन्तरं

धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तिमनुव्रताः।
मन्त्रवर्ज्यं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च॥

इत्यमन्त्रकसंस्काराभ्यनुज्ञानात्। तस्य वैशेषिकनिषेधगोचरद्वितीयजन्मरूपोपनयनाऽविषयत्वे ऽपि विद्याङ्गोपनयनाऽविषयत्वस्यापि कल्पने प्रमाणाभावात्। न च सत्यकामस्य शूद्रस्वभावसिद्धात् तत्त्वरहितवचनेन शूद्रत्वाभावनिर्द्धारणे सत्येव विद्याङ्गे सत्यकामोपनयने गौतमप्रवृत्तिलिङ्गेन

* जै. सू. अ. २ पा. ३ सू. ३।
† आद्यसूत्रे तत्त्वमिति २ पु. पा.।

शूद्रस्य विद्याङ्गोपनयने ऽपि निषेधोन्नयनात्संस्काराभ्यनुज्ञानं तदतिरिक्तविषयमपि कल्प्यमिति वाच्यम् । गोत्रप्रश्नलिङ्गेन सत्यकामोपनयनस्याध्ययनाङ्गोपनयनत्वावगत्या तच्छूद्रत्वाभावनिर्द्धारणस्य तत्रैवोपयोगादिति चेत् । उच्यते । न चास्योपदिशेद्धर्ममित्युदाहरिष्यमाणमानववचनानुसारेण तदीयस्य संस्काराभ्यनुज्ञानस्य शूद्रं प्रति विशिष्य ये ऽभ्यनुज्ञाताः पाकयज्ञादयस्तन्मात्रविषयत्वकल्पनौचित्यात् । विद्याङ्गोपाख्यानश्रुतस्य शूद्रत्वाभावनिर्द्धारणस्य विद्यार्थतायाः अप्युपपत्तावन्यमात्रार्थत्वकल्पनाऽयोगेन तस्य विद्याङ्गोपनयनविद्योपदेशार्थताया अपि कल्पनौचित्याच्च ।

अनृतं चातिवादश्च पैशुन्यमतिलोभता ।
निकृतिश्चाभिमानश्च जन्मतः शूद्रमाविशत् ॥

इति मनूदितं शूद्रभावप्रयोजकम् ।

तान् हेति निषिध्यतइति । ननु समीपप्रापणनिषेधे कथं विद्योपदेशलाभः । नैष दोषः । शिष्यभावतत्कार्यशुश्रूषाद्यनुमतिपूर्वकं वैधमुपनयनं निषिध्यते न तु समीपप्रापणमात्ररूपं लौकिकमपि । अत एव क्षत्रियेणाजातशत्रुणा वा लोके ब्राह्मणस्य ब्रह्मविविदिषयोपसन्नस्य शिष्यभावेनानुव्रजनमननुमत्य तं पाणौ गृहीत्वैव यष्टिघातोत्थापनाय सुप्तपुरुषसकाशं प्रति प्रस्थितमित्याम्नातम् । तत इह* बालाकिः समित्पाणिः प्रतिचक्रामोप त्वा यानीति तं होवाचाजातशत्रुः प्रतिलोममेव† तत्स्याद्यत् क्षत्रियो ब्राह्मणानुपनयेत्‡ देहि व्येव त्वाज्ञापयिष्यामीति तं पाणावभिपद्य प्रवव्राज तौ ह सुप्तं पुरुषमीयतुरिति । ब्रह्मपराणां पुनः किमर्थं ब्रह्मविविदिषेत्याशङ्क्य व्याचष्टे **अपरं ब्रह्मेति** । १८१ । ४

त्रपुजतुभ्यामिति । ननु शूद्राणां वेदश्रवणादिषु दण्डविधानेन निषेधावगमे ऽपि वेदविद्भ्यो ऽवगत्य वेदाध्ययनरहितानां स्त्रीणामिव विद्यानुष्ठानं किं न स्यात् । तस्मात्

न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् ।
न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥

---

* तदहेति २ पु॰ पा॰ ।
† प्रतिलोमरूपमेवेति २ पु॰ पा॰ ।
‡ ब्राह्मणमुपनयेदिति २ पु॰ पा॰ ।

यो ह्यस्य धर्ममाचष्टे यश्चैवादिशति व्रतम् ।
सो ऽसंवृतं नाम तमः सह तेनैव गच्छति ॥

इति शूद्राणां ये वैशेषिकधर्माः ये च सामान्यधर्माः शूद्रसाधारणास्तद्व्यतिरिक्तवैदिकार्थग्राहणे* सह तेनैव शूद्रेण गुरोर्नरकपातोक्तेः । कथं तर्हि भाष्ये तेषां पुराणेतिहासादिमूलविद्यानुष्ठानाभ्युपगमः । श्रावयेच्चतुरो वर्णानिति स्मरणात् । तस्य दृष्टार्थत्वाय पुराणेतिहासशैववैष्णवाद्यागमवर्णितयजमानकर्तृकवैदिकमन्त्राद्युच्चारणाऽनपेक्षव्रतनियमोपासनादि संभवतीति तदभिप्रायः ।

ननु दानस्य द्विजात्यसाधारण्योक्तिः दानं च दद्यात् शूद्रो ऽपि पाकयज्ञैर्यजेत चेति स्मृत्यन्तरविरुद्धेत्याशङ्क्य व्याचष्टे **द्विजातीनामिति** । द्विजातीनामध्ययनमिज्या दानमित्येतदनन्तरं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहा इति प्रतिग्रहस्य ब्राह्मणाऽसाधारण्यवचनात् पूर्ववाक्ये दानस्य प्रतिग्रहवैलक्षण्येन त्रैवर्णिकसाधारण्यमात्रं विवक्षितं न तु शूद्रस्य दाननिषेध इति भावः † ॥

१८७ । १४ **कम्पनात् ॥ ३९ ॥**

ननु श्रुतिबलाद् वाक्यभेदाभ्युपगमो न युक्तः । प्राणे बाह्यवायुभेदे ऽपि तदुभयभेदे विषयविद्याविध्यैक्येन तदप्रसङ्गादित्याशङ्क्य प्रकारान्तरेण वाक्यभेदप्रसङ्गं दर्शयन्नवतारयति **स्यादेतदिति** । ननु बाह्यवायौ वज्रशब्दः कथं श्रुतिः वायुविकारभूताशनिवाचिनस्तस्य वायावपि लक्षणावश्यम्भावादित्याशङ्क्याह **वायुपरिग्रहइति** । अशन्याकारपरिणतस्यैव वायोरुपास्यत्वाङ्गीकारे वज्रशब्दः श्रुतिर्भवतीति भावः । ननु प्राणबाह्यवायू द्वावुपास्यौ किमित्यभ्युपगम्येते प्राण एक एवोपास्य इत्यभ्युपगम्यतां तृतीयपादे प्राण इत्यस्यानुषङ्गनिमित्तार्थैताङ्गीकारेण‡ तृतीयपादस्यापि प्राणविषयत्ववर्णनोपपत्तेरित्याशङ्क्याह **न हि प्राणमात्रस्येति** । न हि कश्चिदपि प्राणो वज्रोद्यमनहेतुरस्ति । यद्यनुषक्तस्य§ प्राणशब्दस्य

---

* ग्रहणे इति १ पु० पा० ।
† अत्र नवमम् अपशूद्राधिकरणं पूर्णम् ।
‡ अङ्गीकारे इति २ पु० पा० ।
§ आनुषङ्गिकस्येति २ पु० पा० ।

प्राणभेदोपचारेण बाह्ये वायौ वृत्तिराश्रीयते तदापि वज्रोद्यमनहेतुत्वेन बाह्यवायुरेवोपास्यः पर्यवस्येदिति इष्टापत्तिरेव । तथा सति वज्रशब्दस्य मुख्यार्थत्वं च शङ्काशूकरहितं भवतीति भावः । अत एवायमर्थः पूर्वपक्षार्थत्वेन सिद्धान्ते प्रदर्शयिष्यते । ननु सूत्रे पक्षनिर्देशाभावेन न्यूनता*माशङ्क्य शब्दात्प्रमित इत्यनुवृत्त्या तत्परिहारः कृतः । तत्रानुवृत्तेन शब्दादित्यनेनाचौचित्यात् प्राणशब्द एव हि निर्देष्टव्यः ततो न कश्चिदर्थः
प्रमितो ऽस्ति सिद्धान्तस्थितेः प्रागित्याशङ्क्याह **शब्दो ऽत्रेति** । तथा च १८८ । ६
सर्वशब्दवशात् सर्वजगत्कम्पयितृत्वेन यः प्रमितः सो ऽत्र पक्ष इति भावः । सर्वशब्दस्योपपदानुसारिसंकोचाऽसंकोचभेदे सत्यपि साकल्यमर्थ इति निश्चितमेव । **नियन्तृत्वादीनीति** । ननु नियन्तृत्वादिवत् प्राणबाह्यवायूपासनमपि ब्रह्मप्रतिपत्त्यङ्गमिति प्रकरणाऽविरोधो वक्तुं शक्यः । एवं चोपासनस्यामृतत्वफलकीर्तनमपि न विरुद्ध्यते । पश्वाप्तिफलकसोमापौष्णपश्वङ्गयूपप्रकृत्युदुम्बरताविध्यर्थवादे ऊर्जं पशूनाप्नोतीति प्रधानफलस्यैवाधानाङ्गपूर्णाहुत्यर्थवादे सर्वान्कामानवाप्नोतीति तदुपकर्तव्येष्टिसोमादिफलस्यैव च ब्रह्मप्रतिपत्तिफलस्यानुवादोपपत्तिरिति चेन्नैवम् । पूर्वापरमन्त्रप्रतिपाद्यसर्वलोकाश्रयत्वं शासितृत्वादिपदे तन्मन्त्रप्रतिपाद्यस्यापि दृष्टद्वारा प्रतिपत्त्यङ्गत्वे संभवत्यदृष्टद्वारकोपासनारूपत्वकल्पनाऽयोगात् ।

एजति चेष्टतइति । न प्राणेन नापानेनेति मन्त्रसिद्धार्थपरत्वेनेदं, व्याख्यानम्† । यद्यपि टीकायामेजतीत्येतत् स्वशासनातिलङ्घने किमयं करिष्यतीति भयात् कम्पतइत्येवंपरं व्याख्यातं ब्रह्मणो हि बिभ्यदित्यादिना तदेव चोत्तरमन्त्रानुगुणं तत्रास्येति पदेनैतन्मन्त्रप्रकृतं भयहेतुं परामृश्य सामान्येन निर्दिष्टस्य तदीयसकलभयहेतुत्वस्याग्निसूर्यादिप्रसिद्धदेवताभयहेतुत्वप्रदर्शनेन स्थैर्यं क्रियतइत्येवमेकवाक्यतासामञ्जस्यात् । तथापि ब्रह्मसद्भावमजानतां मनुष्यपशुपक्षिसरीसृपादीनां तच्छासनातिलङ्घनप्रयुक्तभयाऽभावेन सर्वशब्दस्य तत्सद्भावज्ञातृषु संकोचावश्यम्भावेन पूर्वपक्षे संकोचदोषापादनमलग्नं स्यादित्यभिप्रेत्यैवं व्याख्यातम् । उत्तरमन्त्रस्य तु महद्भयमित्युक्तार्थस्थिरीकरणार्थत्वेनैतदेकवाक्यता सामञ्जस्यमश्नुते ।

* नूतनतामिति २ पु॰ पा॰ । † व्याख्यातमिति २ पु॰ पा॰ ।

तच्च तत एवेति । यद्यपि प्राणे ततो निःसृतं सर्वं जगदेजतीत्यवान्तरवाक्यभेदं विना योजयितुं शक्यं तथापि तथा योजनायां सर्वान्निमन्त्रितानानयेत्यत्रेव सर्वशब्दस्य संकोचसहिष्णुत्वशङ्का स्यात् सा मा भूदित्येतदर्थमवान्तरवाक्यभेदेन व्याख्यातम् । **व्यष्टिरिति** । पृथक् पृथक् तत्तत्प्राणादिरूपेण विविधा व्याप्तिर्व्यष्टिः समन्तात्सर्वसाधारणेन सूत्ररूपेण व्याप्तिः समष्टिः । अशू व्याप्ताविति धातोरष्टिशब्दो व्याप्तिवाची । कम्पनस्य प्राणसाधारण्यशङ्काभिभूतत्वादस्पष्टब्रह्मलिङ्गता* ॥

१८८ । २३ **ज्योतिर्दर्शनात् ॥ ४० ॥**

उत्कर्षवाचीति । ननु पूर्वपक्षइव परशब्दयोगे ऽपि फलप्राप्तिपरत्वाभावो ऽस्तु । मैवम् । पूर्वपक्षे प्राक् तयोर्ध्वमायन्निति तावदादित्यं गच्छेदिति चोत्तरयोरुद्गमनादित्यप्राप्त्योरिह प्रत्यभिज्ञानात्तद्यथैतान्यमुष्मादाकाशादित्याद्यव्यवहितपूर्ववाक्ये परं ज्योतिरित्यस्यादित्यतेजःपरत्वस्य क्लृप्तत्वाच्च तदनुरोधेन फलप्राप्तिपरत्वाभावोपपत्तावपि तदुभयमविगणय्य विवेकज्ञानाद्यर्थान्तरं वर्णयतः सिद्धान्तिनः पक्षे परशब्दानुरोधेन फलप्राप्तिपरत्वस्यावश्यवक्तव्यत्वादिति भावः । **श्रुतिसंकोचादिति** । क्त्वाश्रुतेः पूर्वकालत्वमपहाय समानकर्तृकत्वमात्रे वृत्तिः संकोचः । **आदित्यप्रकरणाच्चेति**† । यद्यपीह तस्य‡ तदुपासनस्य वा प्राधान्यमिति प्रधानस्याङ्गाकाङ्क्षस्य वचनं प्रकरणमिति पूर्वाधिकरणोक्तलक्षणं प्रकरणमादित्यस्य नास्ति । सन्निधानमात्रमपि बहुव्यवहितत्वान्नास्ति तथापि मूर्द्धन्यनाड्या निष्क्रम्यादित्यं प्राप्तस्य केन द्वारेण निरुपाधिकाऽमृतत्वप्राप्तिरित्याकाङ्क्षायां परं ज्योतिरित्यादिवाक्येनादित्यस्य समीपे ब्रह्मलोके स्थितस्य तस्य तत्रोत्पन्नज्ञानेन तत्प्राप्तिरिति तदुपपादनस्य कर्त्तव्यत्वात्तदाकाङ्क्षा युक्ता स्यादित्यप्राप्तिवचनं तत्प्रकरणत्वेनोपलक्षितं द्रष्टव्यम् ।

१८९ । १८ **ध्वनितेति** । पूर्ववत् श्रुतिसंकोचाभावादिति टीकया कण्ठोक्ता प्रत्युदाहरणसंगतिः प्रागुपन्यस्ता इदानीं प्रत्युतेति तदनन्तरोक्त्या ध्वनिता दृष्टान्तसंगतिरुपन्यस्तेति विवेकः । **स्वरार्थमिति** । अन्हः खः क्रताविति

---

* अत्र दशमं कम्पनाधिकरणं पूर्णम् ।
† आदित्यप्रकरणादिति २ पु॰ पा॰ ।
‡ यद्यपि दहरस्येति २ पु॰ पा॰ ।

सूत्रविहितप्रत्ययादेशे आद्युदात्तश्चेति सूत्रेण तदादेरीकारस्योदात्तत्वेनाहीनशब्दस्य मध्योदात्तस्वरलाभार्थमित्यर्थः । **सिद्धान्तितत्वादिति** । १९० । ४
अहीनो वा प्रकरणाद् गौण* इति पूर्वपक्षव्यावर्तनपूर्वकमुत्कर्षस्यासंयोगात्तु मुखस्य तस्मादपकृष्येते† ति सूत्रे सिद्धान्तितत्वादित्यर्थः । निवीतं गलवेणिकेति के चित् । परिकरबन्ध इत्यन्ये । तदुभयालम्बनेन व्याचष्टे **कण्ठालम्बीति** । **इष्टदेवता** यागोद्दिष्टदेवता । **आनर्थक्यप्रतिहतानामिति** । अवघातस्य व्रीह्यर्थत्वे तन्नियमो ऽनर्थकः स्याद् व्रीहिषु वैतुष्यस्योपायान्तरतो ऽपि संभवेन व्रीहिस्वरूपे तदन्वयादन्यस्य च तदन्वययोग्यस्याप्रतीतेरित्यानर्थक्यप्रतिहतां व्रीहिश्रुतिं भङ्क्त्वा प्राकरणिकाऽपूर्वीयत्वलक्षणा ऽऽश्रीयत‡ इत्यादिकमिहोदाहरणम् ।

आनर्थक्यस्योक्तत्वादिति । स्तुतिरप्यनर्थकप्रायेति भावः । न च क्रममुक्त्यभिप्रायमिति न च तद्द्वारेण क्रममुक्तिरिति ग्रन्थयोः पौनरुक्त्यमाशङ्क्य दूषणैक्ये ऽपि शङ्कामुखभेदेनापौनरुक्त्यं दर्शयति **तत्र वक्तव्यमिति** । अत्र प्रजापतिविद्यायाः सगुणोपासनविषयत्वशङ्कया जीवाभिन्ननिर्विशेषप्रकरणानुवृत्तिः सूत्रे दर्शनादिति हेतुकृता न स्पष्टेत्यस्पष्टब्रह्मलिङ्गता । सा शङ्का तत्परिहारश्चेत्युभयमपि दहराधिकरणे§ स्फुटीकृतमस्माभिः‖ ॥

आकाशो ऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥ १९३ । ३

नैवमिहेति । नन्विहापि नामरूपव्याकर्तृत्वं स्पष्टं ब्रह्मलिङ्गमस्ति निर्वहितेत्यस्य निरुपसर्गाभावे वोढृपरत्वे ऽपि तत्सत्त्वेन कर्तृपरत्वादिति चेदुच्यते । वै नामेति निपातद्योतिता प्रसिद्धिरिहोद्देश्यविशेषणमित्याकाशो वै नामेत्यतः प्रसिद्धाकाश इति धर्मनिर्देशो लभ्यते । अतस्तस्य विशेषणस्याप्रसिद्धाकाशरूपं ब्रह्म व्यावर्त्य पर्य्यवस्यति । न हि भूतवद् ब्रह्म लोकवेदसाधारण्येनाकाश इति प्रसिद्धम् । सर्वाणि ह वा इमानि भूतानीत्यत्र तु वैशब्दद्योतितप्रसिद्धेर्नाकाशे धर्मिण्यन्वयः किं तु सर्वजगत्का-

---

* जै॰ सू॰ अ॰ ३ पा॰ ३ सू॰ १५ ।
† जै॰ सू॰ अ॰ ३ पा॰ ३ सू॰ १६ ।
‡ श्रूयतइति २ पु॰ पा॰ ।
§ व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ १४ ।
‖ अत्र एकादशं ज्योतिरधिकरणं पूर्णम् ।

रणत्वरूपे धर्मे तस्य धर्मस्य लोके प्रसिद्धिर्नास्तीत्यगत्या केवलवैदिक्येव ग्राह्या । सा च ब्रह्मलिङ्गान्वयिनीति सिद्धान्त एवोपयुज्यते । तस्मादिहेव तत्र न प्रसिद्धिलिङ्गमवलम्ब्य पूर्वपक्षशङ्कावकाश इति विशेषः । अतः प्रसिद्धिलिङ्गानुगृहीतोपक्रमगताकाशश्रुतिविरोधात् सत्यपि निरुपसर्गे यथा कथंचिदवकाशरूपाधिकरणतया वोढृत्वमेव निर्वहितेत्यनेनोच्यतइत्युपपादनीयमिति भावः ।

नामरूपाभ्यामन्यत्वमिति । अन्तराशब्दोक्तमध्यत्वोपलक्षितेन सारत्वेनान्यत्वमाक्षिप्यतइति भावः । **निर्वोढा च आकाश इति ।** यथा देवदत्तश्चैत्रमैत्रयोः प्रेषयिता* यस्तावदन्तरा वर्तते स यज्ञदत्त इत्युक्ते देवदत्तयज्ञदत्तयोर्भेदः प्रतीयते एवमिहाप्याकाशब्रह्मणोरिति भावः । **नियन्तृत्वमिति ।** व्याकर्तृत्वमस्येदं वाच्यमिति नियमनरूपमिति भावः ।

१९३ । १६ **सत्यप्यवकाशदातृत्वइति ।** सकलनामरूपावकाशदातृत्वं भूताकाशस्य वस्तुतो नास्त्येव स्वात्मनि वृत्तिविरोधात् । यथा कथं चित्तदस्तु नाम तथापि तन्निर्वहितेति निरुपसृष्टेन नोच्यते† किं तु तद्व्याकर्तृत्वमेव । न च प्रसिद्धलिङ्गानुरोधेन निर्वहितेत्येतदवकाशदातृत्वपरतया योज्यमिति शङ्कनीयम् । यतो निपातसमुदायो नाकाशशब्दविषयस्य तेन रूपेण प्रसिद्धिद्योतकः किं तु नामरूपनिर्वोढृत्वरूपविधेयवत्त्वेन । तथैव व्युत्पत्तेः । न हि देवदत्तः खलु विद्वानित्युक्ते यः प्रसिद्धो देवदत्तः स विद्वान्न त्वप्रसिद्धस्तदन्यो देवदत्त इति प्रतीयते किं तु विद्वत्त्वेन देवदत्तः प्रसिद्ध इत्येव प्रतीयते । एवं च सकलनामरूपनिर्वोढृत्वेन श्रुत्यन्तरप्रसिद्धं ब्रह्मैवाकाशशब्दोक्तमिति लभ्यते । एवं च यद्यपि नामभेदेन धर्मिनिर्देशाद् भिन्नधर्म्मिनिर्देशाच्च देवदत्तश्चैत्रमैत्रयोरित्यादिलौकिकवाक्यच्छायापत्त्या तिस्र एव साह्नस्येत्यादिवैदिकवाक्यच्छायापत्त्या चाकाशब्रह्मणोर्भेदः प्रतीयते तथापि नामरूपव्याकर्तृत्वतद्वदन्यत्वयोर्ब्रह्मलिङ्गतया तद्वशादभेदोऽपि प्रतीयते भेदाऽभेदप्रत्यायकोपनिपाते चाऽभेदप्रत्यायकानुरोध एव युक्तः प्रतिपत्तिलाघवात् । एकवाक्यतानुग्रहात् । ते यदन्तरेति प्रकृतपरामर्शियत्पदानुग-

---

* प्रेषयितेति ३ पु॰ पा॰ । † निरुपसृष्टेनोच्यतइति २ पु॰ ।

हाच्च । किं च नामभेदधर्मिभेद*रूपभेदलिङ्गावगतिराकाशब्रह्मविषयभागद्वयपरामर्शापेक्षा विलम्बिता नामरूपव्याकर्तृत्वतद्वदन्यत्वरूपब्रह्मलिङ्गावगतिरेकैकभागमात्रपरामर्शापेक्षा शीघ्रा । ततश्च यथा ऽऽग्नावैष्णवमेकादशकपालं निर्वपेत् सरस्वत्याज्यभागा स्याद् बार्हस्पत्यश्चरुरित्यत्र प्रकृता ऽऽग्नेयाऽग्नीषोमीयस्थानसाम्याद्वाक्यत्रयपरामर्शापेक्षत्वेन विलम्बितादाग्नावैष्णवबार्हस्पत्ययोर्नाग्नेयाग्नीषोमीयधर्मप्राप्तिः किं तु तत्तद्वाक्यमात्रपरामर्शापेक्षत्वेन शीघ्राद् द्विदेवत्यैकदेवत्यसामान्यादाग्नेयाग्नीषोमीयधर्मप्राप्तिः तथात्रापि विलम्बितलिङ्गान्न भेदावगतिः किं तु शीघ्रलिङ्गात् तदभेदावगतिर्भवतीत्येव युक्तम् । एवमर्थान्तरत्वादिव्यपदेशस्याकाशब्रह्मभावसाधकत्वपर्यवसानमस्पष्टमित्यस्पष्टब्रह्मलिङ्गता ।

ननु टीकायां ते यदन्तरेत्यस्य ते नामरूपे अन्तरा यद्वर्तेतइति योजनया ब्रह्मणो नामरूपधारत्वमर्थमुक्त्वा ते नामरूपे यदाकाशमन्तरेति ग्रन्थेन ते नामरूपे यदन्तरा यस्य ब्रह्मणो ऽन्तरा मध्ये वर्तेते इति छान्दोग्यविवरणदर्शितयोजनान्तरेण नामरूपाधारत्वमर्थान्तरमुच्यतइति व्याख्यातुं शक्यम् । तद्व्याख्यानं श्रुतान्तराशब्दस्याऽव्यवहितान्वयस्वारस्यानुकूलं च भवति । तथा किमिति न व्याख्यातमिति चेत् । उच्यते । अन्तराशब्दयोगे त्वां च मां चान्तरा कमण्डलुरित्यादाववधिद्वयनिर्देशदर्शनेन श्रुतावन्तराशब्दस्य व्यवहितान्वयपक्ष एव युक्तः । उदाहृतटीकावाक्यमपि व्यवहितान्वयेन पूर्वोक्तार्थोपसंहारपरमित्यभिप्रेत्य तस्य तथा व्याख्यानं न कृतम् । तथा व्याख्याने ऽपि न दोषः ।

ततः खड्गं समुद्यम्य रावणः क्रूरविग्रहः ।
वैदेहीमन्तरा क्रुद्धः क्षणमूचे विनिःश्वसन् ॥

इति भट्टिकाव्ये विना ऽप्यवधिद्वयमन्तराशब्ददर्शनात्† ॥

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥ १९३ । २२

कर्तृस्तुतिरिति । नन्वनन्वागतपुण्येनेति स न साधुना कर्मणा भूयानिति च प्रतिपाद्यस्यात्मनः कर्मास्पर्श उच्यते स कथं कर्माधिकारि-

* धर्मभेदेति २ पु॰ पा । † अत्र द्वादशम् अर्थान्तरत्वादिव्यपदेशाधिकरणं पूर्णम् ।

स्तुतिः स्यात् । नैष दोषः । तयोर्वाक्ययोः सुषुप्तौ कर्मफलभोगाभावाभिप्रायत्वात् । स न साधुनेत्याद्यपि सुषुप्तविषयमेव । य एषो ऽन्तर्हृदयआकाशस्तस्मिन् शेतइत्युपक्रमात् सुषुप्तिप्रसङ्गाभावे मृत्वापि कर्मसंबन्ध उक्त एवेति भावः । ननु संसार्यनुवादेन तस्याऽसंसारिब्रह्मरूपताविधानपरमिदं प्रकरणमिति सिद्धान्तस्य सुषुप्त्युत्क्रान्तिसूत्रा*नुगुणमङ्गुष्ठवाक्यइव सुषुप्त्युत्क्रान्तिवाक्ययोर्जीवब्रह्मपरपदसामानाधिकरण्याभावात् प्रत्युताऽभेदप्रतिकूलस्य भेदव्यपदेशस्य सत्त्वाच्चेत्याशङ्क्य विकल्पोत्तरत्वेन सूत्रद्वयप्रवृत्तिरित्याशयेन टीकायां विकल्पः कृतः । तत्र प्रथमविकल्पस्य निरालम्बनतामाशङ्क्य
१९४ । ७ तदलम्बनं प्रदर्शयन्नवतारयति **नन्वसिद्धे इति** । जीवातिरिक्त ईश्वर एव नास्ति चेतनविषयसर्वश्रुतीनां क्लृप्तजीवविषयत्वोपपत्तौ तासु कासां चित्तदतिरिक्तविषयत्वकल्पनस्य गौरवपराहतत्वात् । न चानन्दमयादिवाक्यानां जीवाद्यतिरिक्तेश्वरविषयत्वं प्राचीनाधिकरणैः प्रसाधितमिति शङ्कनीयम् । जीवातिरिक्तमीश्वरं तदसाधारणानि श्रुतिलिङ्गादीनि च सिद्धवत्कृत्य खलु तैस्तत्प्रसाधितम् । ईश्वर एव नास्तीति मूले कुठारनिधाने तदीयश्रुतिलिङ्गादीनीह निरस्तानीति तैस्तत्प्रसाधितं कथमवतिष्ठेत । एवं च ब्रह्मश्रुतित्वाभिमताः सर्वे शब्दा यथायथं जीवसामान्यस्य जीवविशेषाणां च श्रुतयः । लिङ्गानि च कारणत्वादीन्यदृष्टद्वारकाणि प्रशंसार्थान्यौपचारिकावस्थाभेदकृतभेदावलम्बनानि च सन्ति जीवविषयाण्येव । अत्यन्तभेदव्यपदेशो ऽप्यात्मशब्दस्य स्वरूपपरत्वेनौपचारिकः । अतो न सिद्धान्तसिद्धिरिति प्रथमविकल्पस्य हृदयमित्याशयः । प्रागविचारितानां वाक्यानामीश्वरमभ्युपगम्याप्यन्यपरत्वमस्त्विति शङ्कानिरासार्थं प्रदर्शिता ये श्रुतिलिङ्गादयस्तैरेव मा भूदीश्वर इति शङ्कापि निरस्ता भवति । न हि लाघवमात्रलोभेन सर्वज्ञं सर्वशक्तिकमनादिसकलप्रपञ्चप्रवाहस्रष्टारं सकलजीवजडविलक्षणमेकमीश्वरं प्रतिपादयतामेतावतामौपनिषदवाक्यानामतिक्लिष्टनयनं युक्तमिति प्रथमविकल्पदूषणाभिप्रायः ।

८ **द्वितीयं विकल्पमिति** । इहेश्वरो न संकीर्त्यतइति द्वितीयविकल्पो ऽपि द्वेधा विकल्पनीयः किं संसारिव्यतिरिक्तत्वेनात्र न संकीर्तित

---

* व्या० सू० अ० १ पा० ३ सू० ४२

उत सत्यपि व्यावहारिकभेदेन संकीर्तने तात्त्विकाऽभेदबोधनानुकूलं तत्-
संकीर्तनं नास्तीति । तत्राद्यकल्पनिरासः प्रथमसूत्रविवक्षितो न चात्रापी-
त्यादिग्रन्थेन प्रदर्श्यतइति भावः । अनुवादमात्रमनर्थकमिति । कर्म १९४ । १४
स्तुतिरप्यनर्थकप्राया सा ऽपि न प्रतीयते । साधुकर्मणि सति तत्प्रयुक्त-
भूयस्त्वावश्यंभावेन तन्निषेधानुपपत्त्या ततः कर्माभावस्यापि सिद्धेः । तद-
सिद्धौ वा तस्य वाक्यस्य कृतमपि साधु कर्म निष्फलमित्यर्थपर्यवसन्नतया
ततः कर्मनिन्दाया एव प्रतीतेः कर्मविधिसन्निधानाभावादपि सा ऽपि न
संभवतीति भावः । तस्मात् सुषुप्त्युत्क्रान्त्योरित्यादिटीकाग्रन्थेन प्रथमसूत्रा-
र्थानुवादपूर्वकं पत्यादि*सूत्रार्थोपन्यासेन द्वितीयविकल्पनिरासः कृतस्तमाह
अन्ते चेति । स वा एष महानज आत्मा यो ऽयं विज्ञानमय इत्याद्युप-
संहारे अभेदबोधनानुकूलं सामानाधिकरण्यमस्तीति भावः । परमेश्वर एव
नास्तीति प्रथमविकल्पनिरासस्तु सूत्राद् बहिरेवेति द्रष्टव्यम् । यद्वा भावं तु
बादरायण† इति सूत्रादस्तीत्यस्य पूर्वसूत्रात्‡दर्थान्तरत्वादिव्यपदेशादित्यस्य
चानुवृत्तिमभिप्रेत्यास्ति जीवातिरिक्तः परमेश्वरः तस्य तद्भिन्नत्वज्ञापकानां
तत्स्रष्टृत्वादिहेतूनां पूर्वोत्तराधिकरणविषयवाक्येषु विशिष्य प्रतिपादनादिति
तदर्थमादाय प्रथमविकल्पनिरासः कृत इति नेतव्यम् । वशः शक्तिरिति । ,, । १८
वश आयत्ततायां स्याद् वश इच्छाप्रभुत्वयोरित्यभिधानकोशः§ ॥

वैकुण्ठाचार्य्यवंशाम्बुधिहिमकिरणश्रीमदद्वैतविद्या-
चार्यश्रीरङ्गराजाद्ध्वयविस्तृतयशोविश्वजिद्याजिसूनोः ।
ग्रन्थे वेदान्तकल्पद्रुवरपरिमले सर्वजिद्याजिनो ऽस्मिन्
पूर्णः पादो ऽजनिष्ट भ्रमरहितहिते निर्विशेषप्रधानः ॥

इति श्रीवेदान्तकल्पतरुपरिमले प्रथमाध्यायस्य
तृतीयः पादः समाप्तः ॥

---

* व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ४३ । † व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ३३ ।
‡ व्या॰ सू॰ अ १ पा॰ ३ सू॰ ४१ ।
§ यत्र प्रयोदर्शं सुषुप्त्युत्क्रान्त्यधिकरणं पूर्णम् अत्र कल्प॰ १६५ पृष्ठे † टि॰ द्रष्टव्या ॥

अथ प्रथमाध्यायस्य चतुर्थः पादः ।

१९६ । १ **आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥**

परशब्द आहेति । नन्वत्र परशब्दः श्रेष्ठ्यवचनः इन्द्रियेभ्यः परा ह्यर्था इत्यादिपूर्ववाक्येषु श्रुतस्य तस्य तथात्वात् । सांख्यैरप्यव्यक्तात्पुरुषः पर इत्यत्र श्रुतस्य तथैव व्याख्येयत्वात् प्रधानस्याकार्यत्वात् । कठवल्लीषु श्रुते

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् ।
सत्त्वादधि महानात्मा महतो ऽव्यक्तमुत्तमम् ॥

इति मन्त्रान्तरे परशब्दस्थाने उत्तमशब्ददर्शनाच्चेति चेत् । सत्यम् । इह पूर्वपूर्वस्मादुत्तरोत्तरस्य श्रैष्ठ्यमुच्यमानं यस्य यथा संभवति तस्य तथोपपादनीयम् । अतः स्मार्तक्रमप्रत्यभिज्ञानादिह महदादिपदानां स्मार्तमहदादितत्त्वपरत्वस्थितौ महत्तत्त्वात्प्रधानस्य श्रैष्ठ्यं कारणत्वेनैव भवेदिति पर्यवसितार्थकथनमिदं न तु परशब्दाभिधेयकथनमिति न विरोधः । **पूर्वत्र हीति ।** एवं च टीकायां व्यभिचारशब्दो दोषमात्रपर इति ईक्षत्यधिकरणा*र्थानुवादकवाक्यश्रुतस्य तस्यासंभवे पर्यवसानं प्रवर्तयिष्यमाणाधिकरणार्थानुवादकवाक्यश्रुतस्यातिव्याप्तेरित्याशयः ।

,, । १५ **सांख्यानां श्रुतिस्मृत्योरिति ।** इदं न सर्वश्रुतिस्मृत्यभिप्रायम् । यागादिश्रुतितन्मूलस्मृतीनां सांख्यमते ऽप्यनुमानसिद्धार्थानुवादित्वाभावात् । त्रिविधं प्रमाणं तत्सिद्धौ सर्वसिद्धेरिति कपिलसूत्रे† सांख्यसप्तत्यां च शब्दस्य स्वतन्त्रप्रमाणत्वेन परिगणनात् । किं तु महतः परमव्यक्तमित्युदाहृतश्रुत्यव्यक्तविषयसांख्यस्मृत्यभिप्रायम् । उदाहृतश्रुतिर्हीन्द्रियादिपुरुषान्तपरापरभावपरेन्द्रियादीनामिवाव्यक्तस्याप्यन्यत्प्रापकमपेक्षते । अव्यक्तविषयसांख्यस्मृतिः स्मृतित्वादेव मूलमानमपेक्षते । तद्यद्यपि सदेव सोम्येदमित्यादि-

* व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ ५ । † कपिल (सांख्य) सूत्र॰ अ॰ १ सू॰ ८७–८८ ।

कमिति वक्तुं शक्यं कपिलसूत्रवार्तिके प्रथमाध्याये सद्विद्यादीनां प्रधानपरत्वस्य व्यवस्थापितत्वात् तथापि इन्द्रियेभ्यः परा इत्यादिकमनुमानसिद्धार्थविषयमित्येव तन्मतम् । अत एव स्थूलात्पञ्चतन्मात्रस्योत्पत्यादीनि परार्थत्वात् पुरुषस्ये*त्यन्तानि कपिलसूत्राणि तद्वार्तिककृतेन्द्रियेभ्यः परा इत्यादेरिन्द्रियार्थादिपुरुषान्तानामुत्तरोत्तरोत्कर्षे तात्पर्यं वर्णयितुं प्रवृत्तानीति प्रतिपादयतोक्तं रूपादिबुद्धिकार्यानुमेयेभ्य इन्द्रियेभ्यः स्थूलभूतकार्यानुमेयेभ्यः पञ्चतन्मात्रेभ्यश्च परस्तात्कारणत्वेनानुमेयो मनःशब्दोदितो ऽहंकारः । उभयेषामहंकारकार्यत्वाविशेषे ऽपि महाभूतप्रकृतित्वेन विशेषेण तन्मात्राणामिन्द्रियेभ्यः परत्वम् । एवमव्यक्तपर्यन्तानां पूर्वकारणत्वेनानुमेयत्वात् परत्वं पुरुषस्य व्यक्तात् परत्वं भोक्तृत्वादिति । अत एव चानुमानिकमप्येकेषामिति सूत्रेणानुमानसिद्धमव्यक्तम् एकेषां शाखायामनूद्यत इत्युक्तमित्यभिप्रेत्य तयोरनुमानसिद्धार्थानुवादित्वमुक्तम् ।

सत्कार्य्यवादे इति । इत्थं सांख्यानां सत्कार्य्यवादः । घटोत्पत्तेः १९६ । २
प्रागपि मृद्यनभिव्यक्ता घटावस्था वर्तते तदनभिव्यक्तिः पिण्डावस्थया ऽऽवृतत्वाद् घटसामग्र्या पिण्डावस्थोपमर्द्दे सति खनने कूपजलमिव चालने पटशौक्ल्यमिव च प्रतीयते । न च तथा सति मुद्गरपातानन्तरमपि घटावस्थाप्रतीतिप्रसङ्गः । इष्टापत्तेः । कपालानि चूर्णीकृत्य जलमृदन्तरसंयोजनमर्दनव्यापारैर्मार्दवं प्रापय्य दण्डचक्रादिमेलने घटाभिव्यक्तिदर्शनात् । न च दग्धपटकारणानां पुनः पटभावो न दृश्यतइति वाच्यम् । तद्भस्मनां क्षितिपतितानां कार्पासतरुफलपरिणतिक्रमेण पटभावोपपत्तेः । न च तन्त्ववस्थायाः पटावस्थावरणत्वे विरलतन्त्वारब्धपटे पटावस्था ऽनभिव्यक्तिप्रसङ्गः । फलबलेन संयोगविशेषरहिततन्त्ववस्थायास्तदावरकत्वादिति । अतो मृदादिकमव्यक्तघटाद्यवस्थावद् घटाद्यात्मना ऽनभिव्यक्तमित्यव्यक्तशब्दप्रयोग उपपन्न इति भावः ।

सामान्येनात्र व्याप्तिरिति । यद्यद्रूपानुरक्तं प्रतीयते तदनभिव्यक्ततद्रूपानुरक्तकारणमिति सामान्यव्याप्तौ प्रागुक्तरीत्या ऽनभिव्यक्तघटावस्थादिविशिष्टमृदादिकारणको घटादिरेव दृष्टान्तः । पक्षे च सुखदुःखमोह-

* कपिलसू॰ अ॰ १ सू॰ ६२–६६ ।

गुणकवस्तुप्रकृतिकं तद्गुणकत्वाद् घटवदिति घटो येन प्राप्यते तं प्रति सत्त्वगुणोद्भवात् सुखरूपो यदीयः सो ऽन्येनापह्रियते तं प्रति रजोगुणोद्भवाद् दुःखरूपो यस्य तस्मिन्नुपेक्षया निरीक्षणाभावः तं प्रति तमोगुणोद्भवान्मुह वैचित्यइति धात्वर्थानुगमेनाज्ञानरूपो मोहो भवति । तानि च घटावस्थापेक्षाणि सुखादिरूपाणि मृदवस्थायामप्यनभिव्यक्तानि सन्त्येव ।

कारणगतेति । कारणगतं यदव्यक्तं कार्यं तदेव शक्तिर्न तद्व्यतिरेकेण शक्तिर्नाम किं चिद्वस्त्वस्तीति भावः । **नृशृङ्गवत्कारणत्वायोगाद्** इत्युपलक्षणम् । तिलेभ्य एव तैलं न सिकताभ्य इत्यादिव्यवस्थित्ययोगादित्यपि द्रष्टव्यम् । **अनभिव्यक्तकार्याश्रयो ऽस्तीति ।** अन्यथा तदनन्तरकल्पे ऽत्यन्ताऽसत उत्पत्तौ नृशृङ्गादेरप्युत्पत्तिप्रसङ्ग इति भावः । ननु किं करणं कश्च परिशेषः कथं च ताभ्यामव्यक्तशब्दस्य शरीरार्थत्वसिद्धिरित्याकाङ्क्षायां तत्सर्वं भाष्ये विवक्षितं संक्षिप्य विशदयति **अयं भाव इति ।**

११ **रथादिरूपितान्येव गृह्यन्तइति ।** प्रकरणाम्नातत्वेन बुद्धौ विपरिवर्तमानानि षट्संख्यया च समानानि इन्द्रियादीनि गृह्यन्तइत्यर्थः । ननु विष्णुपदशब्दोक्तः पुरुषः स्वरूपेण प्रतिपिपादयिषिततया न प्रधानं किं तु निरतिशयपरत्वेन प्रतिपिपादयिषिततया परमित्युपक्रान्तस्यपरत्वस्य सा काष्ठेत्युपपादनादतस्तन्निरतिशयपरत्वप्रतिपादनं कृत्स्नस्य जगतः परत्वावधितया ऽङ्गभावमपेक्षते । न च कृत्स्ने जगत्स्वरूपकवाक्ये गृहीतं शरीरेन्द्रियार्थमनोबुद्धिभोक्तॄणामेव तत्र ग्रहणात् । अतस्तदाकाङ्क्षानुसारेण सांख्याभिमतपुरुषाऽवरचतुर्विंशतितत्त्वात्मकसकलप्रपञ्चसमर्पकत्वमेवावेन्द्रियाद्यव्यक्तान्तशब्दानां युक्तम् । दश ज्ञानकर्मेन्द्रियाणि दश भूततन्मात्राः मनो ऽन्तःकरणं बुद्धिरहङ्कारः महानात्मा महत्तत्त्वमव्यक्तं प्रधानमिति सांख्याभिमतानां चतुर्विंशतेस्तत्त्वानां* ग्रहणसंभवात् । यद्यपि सांख्यानां महत्तत्त्वएव बुद्धिशब्द आत्मशब्दश्च न महत्तत्त्वे तथापि परत्वावधितया सकलतत्त्वनिर्देशाकाङ्क्षानुसारेण सांख्यतत्त्वे प्रत्यभिज्ञापक†-

---

* चतुर्विंशतितत्त्वानामिति २ पु॰ पा॰ । † तत्त्वप्रत्यभिज्ञापकेति २ पु॰ पा॰ ।

भूयस्त्वानुसारेण च कार्ये कारणोपचारादहङ्कारे बुद्धिशब्दः महत्तत्त्वे व्यापकत्वाभिप्रायेणात्मशब्दः। यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनीत्यत्रैवोपरितनमन्त्रे ज्ञाने ऽप्यात्मशब्ददर्शनादिति समर्थयितुं शक्यमित्याशङ्कां निवर्तयितुमेवकारः । न सांख्याभिमतानामपि सर्वेषां तत्त्वानामिह ग्रहणं संभवति अर्थशब्दस्येन्द्रियसमभिव्याहारेणेन्द्रियेभ्यः परत्वलिङ्गेन चेन्द्रियग्राह्यपरत्वात् । इन्द्रियेभ्यो ऽर्थानां परत्वस्येन्द्रियाणां पुरुषवशीकर्तृताया अर्थापहाराधीनतया वशीकृतानामपि तेषामतिसुन्दरार्थसन्निधाने क्षोभदर्शनेन च समर्थनीयत्वात् । यदि साक्षाद् भोग्यानामिन्द्रियग्राह्याणां पुरुषाऽवरत्वोक्तेरेतत्साधनत्वेन परम्परया पुरुषार्थपर्य्यवसायिनां भूतसूक्ष्माणां तत्कैमुतिकन्यायेन सिध्यतीति सांख्यतत्त्वग्रहणे सर्वतत्त्वव्यापिपरत्वावधिताप्राप्तिः समर्थ्येत तर्हि संनिहितग्रहणे ऽपि कण्ठोक्त्या कैमुतिकन्यायेन च कृत्स्नस्य जगतस्तत्प्राप्तिः समर्थयितुं शक्येति व्यर्थः प्रकरणाम्नातबुद्धिविपरिवर्तमानवैदिकपरित्यागस्तद्विपरीततत्त्वपरिग्रहश्च । अवश्यं च कठवल्लीष्वेवोत्तरत्राम्नातयोः

इन्द्रियेभ्यः परं मनो मनसः सत्त्वमुत्तमम् ।
सत्त्वादधि महानात्मा महतो ऽव्यक्तमुत्तमम् ॥
अव्यक्तात्तु परः पुरुषो व्यापको लिङ्ग एव च* ।
यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ॥

इति मन्त्रयोः कृत्स्नस्य जगतः पुरुषावरत्वसिद्ध्यर्थं कैमुतिकन्यायः समाश्रयणीयः । तत्रार्थानामपाठात् स इहाप्यस्त्विति भावः ।

एवं प्रकरणवशादिहेन्द्रियादयो रूपकवाक्याम्नाता एव ग्राह्या इति सामान्यतः सिद्धाविहाव्यक्तशब्देन शरीरं ग्राह्यमिति विशेषः परिशेषात्सिध्यतीति दर्शयति **एवं स्थिते इति** । ननु यथोपपादयिष्यमाणपारिशेष्यनि- १९७ । १२
मित्तप्रत्यभिज्ञया शरीरोपस्थितिः तथा सांख्यतन्त्रसिद्धमहदव्यक्तपुरुषक्रमप्रत्यभिज्ञया प्रधानोपस्थितिरस्ति किमत्रान्यतरग्रहणे विनिगमकमित्याकाङ्क्षायां तत्र विनिगमकं बलाबलविभागं दर्शयति **पौरुषेयेति** । प्रधानश-

* कठ ६ पु० पा०

रीरप्रत्यभिज्ञाप्राबल्यहेत्वोर्मध्ये प्रकरणाधीतपदार्थाश्रयत्वात् शरीरप्रत्यभिज्ञाहेतुः प्रबल इति तमुपपादयति रथत्वेनेति ।

१९७ । १५ इतरथेति । ननु नास्ति निष्प्रयोजनत्वम् । न हि परत्वावधित्वेनान्वयार्थमात्मशरीरादयो रथिरथादिभावेन रूपिताः । तत्र रथिरथादिरूपणस्यानुपयोगात् तत्रैव परत्वावधीन्द्रियाद्याम्नानसन्त्वेनेतरत्र इन्द्रियादिग्रहणाऽनपेक्षणाच्च । किं तु निदिध्यासनोपकरणानां तेषां वशीकार्यत्वार्थं वशीकृतानि ह्येतानि तदुपकरणानि भवन्ति । यतस्तत्रैव श्रूयते ।

यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥
यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ इति ।

सत्यम् । रथिरथादिरूपेण वशीकार्यत्वज्ञापनार्थमिति तज्ज्ञापनमपि वशीकार्याणां परापरभावविवेचनं विना न प्रयोजनपर्यवसायि । यत्नेन वशीकार्यमुपेक्ष्यान्यवशीकरणप्रवृत्तौ प्रयोजनलाभाऽसंभवात् । अतो वशीकार्यताज्ञापनरूप*स्वप्रयोजनसिद्ध्यर्थमेव रथित्वादिना रूपिताः षडपि इन्द्रियेभ्यः परा ह्यर्था इत्यादिवाक्यान्वयमपेक्षन्तइत्यस्ति शरीरस्यापि तदन्वयापेक्षा । तत्र हीन्द्रियेभ्यस्तद्विषयाः वशीकार्यत्वे पराः वश्येन्द्रियस्यापि विषयसन्निधाविन्द्रियविजृम्भणात् । तेभ्यो ऽपि मनः परं मनसि विषयध्यानप्रवृत्ते विषयाऽसंनिधाने ऽपि रागविजृम्भणात् । तस्मादपि बुद्धिः परा इदमित्थं कर्तव्यमित्यध्यवसायाभावे मनसो ऽकिञ्चित्करत्वात् । ततो ऽप्यात्मा परः बुद्धिवृत्तेरप्यात्माधीनत्वात् । तस्मादपि शरीरं परं तदायत्तत्वात्सर्वेषामपि तत्तदिन्द्रियार्थमनोबुद्धिप्रयुक्तपुरुषव्यवहाराणाम् । अतो हितमितमेध्याशनादिभिः शरीरवशीकरणे ऽत्यन्तमेव प्रयतितव्यमिति वशीकार्यत्वे परापरभावो विविच्यते । यद्यपीन्द्रियेभ्यः परा इत्यादेः कृत्स्नस्यापि सर्वापेक्षया पुरुषपरत्वे महातात्पर्यमित्याध्यानाधिकरणे† निरूपयिष्यते । तथापि महातात्पर्यविषयस्य तस्यैव प्रमितावुपायत्वेन वर्ण्यमानमुत्तरोत्तरपरत्वं यया कया चिद् विधयोपपादनीयमिति प्राचीनवशीकार्यत्वज्ञापनप्रयोजनपर्यवसा-

* ज्ञानरूपेति २ पु० पा० । † व्या० सू० अ० ३ पा० ३ सू० १४ ।

नार्थं विश्वस्मादिन्द्र उत्तर इतिवत् सर्वस्मात् परः पुरुष इत्येतावदनुक्त्वा क्रमिकपरापरभाववर्णनस्य साफल्यार्थं च प्रदर्शितप्रकारेणेन्द्रियादीनां पराऽपरभावे ऽवान्तरतात्पर्यमपि युज्यतएव । रूपितान्येवेत्येवकारेण प्रकरणाम्नातेन्द्रियादिग्रहणे कस्य चिन्न्यायस्य सूचने कृते ऽपि सर्वसाधारणमेव न्यायान्तरं शरीरे दर्शितमिति द्रष्टव्यम् ।

श्रैष्ठ्यवचन* **इत्यर्थ इति ।** श्रैष्ठ्यं च वशीकार्यतापेक्षं विवक्षितमिति १९८ । ४
न तत्प्रयोजकत्वेनापि कारणत्वमपेक्षणीयमिति भावः । **शरीरमेवेति ।** ननु रूपकविन्यस्तशरीरगृहीतेरिति वक्तव्यम् विशेषणस्य पूर्वनिपातित्वादिति चेद् न । तथा सति हि रूपकविन्यस्तव्यतिरिक्तमपि शरीरमङ्गीकृत्य तद्व्यावर्त्तनार्थं विशेषणमिति स्याद् रूपकविन्यस्तेन्द्रियादिव्यावर्तनमिहे†ष्यते तत्तु शरीरविशेषणेनैव लभ्यतइति तल्लाभार्थं विपरीतविशेषणविशेष्यभावविवक्षया शरीरं पूर्वं निवेशितम् । **रूपकेण रथेनेति ।** स्वेन रूपेण रथत्वेनोपमेयं रूपवत्करोतीत्यर्थे रूपवच्छब्दात् तत्करोतीति णिचि णाविष्ठवद्भावेन मतुब्लोपे टिलोपे रूपीत्यतो धातोः कर्त्तरि ण्वुलि णेरनिटीति णिलोपे च सति रूपकशब्दनिष्पत्तिः । **रूपितमिति ।** रूपवत्कृतमित्यर्थः । रूपीत्यतः पूर्ववत्सनाद्यन्तधातोः कर्मणि क्तप्रत्यये वलाद्यार्द्धधातुकनिमित्ते इडागमे निष्ठायां सेटीति णिलोपे च सति रूपितशब्दनिष्पत्तिः । भाष्यटीकयोस्तत्त्वाऽतत्त्वाभ्यामनिर्वाच्यत्वमव्यक्तपदप्रवृत्तिनिमित्तमित्युक्तमयुक्तं न व्यज्यतइति व्युत्पत्तिबलादस्पष्टत्वस्य तत्प्रवृत्तिनिमित्तत्वादित्याशङ्क्य व्याचष्टे **प्रमाणैरिति ।** व्युत्पत्तिवाक्यगतस्य व्यज्यतइत्यस्याच निरूप्यतइत्यर्थो ग्राह्यः अविद्यायां प्रत्यक्षादिप्रमाणैः स्पष्टायामस्पष्टत्वरूपप्रवृत्तिनिमित्तत्वाभावादित्याशयः । **अप्रधानेनेति ।** परमेश्वरप्रेर्यत्वेनाऽस्वतन्त्रयैवाऽविद्यया ऽन्तःकरणादिरूपेण परिणतयेत्यर्थः । अप्रधानेति स्थाने क्व चिदज्ञानेनेति पाठः सुगमः‡ । मायादिकमिति पाठा-
न्तरम्§ । **अविवेकप्रतियोगित्वेनापी**त्यपिशब्देन प्रपञ्चोपादानत्वेनापि १९८ । २३

---

* श्रैष्ठ्यपर इति २ पु॰ पा॰ । † व्यावर्तमानमिहेति २ पु॰ पा॰ ।

‡ पाठः स तु सुगम इति २ पु॰ पा॰ ।

§ मायेत्यादि नास्ति २ पु॰ । मायादिकमिति क्वचिः शोधितम् १ पु॰ ।

प्रधानं नाभ्युपगन्तव्यम् प्रपञ्चस्याविद्याविषयब्रह्मविवर्तत्वप्रतिपादनादिति
१९९ । १ दर्शयति **निरवद्यमितीति** । निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जन-
मिति श्रुतिः । **निर्दोषेति** । न च दोषवाच्यवद्यशब्दोऽयमज्ञानमपहाय
शोकादिमात्रे संकुचितवृत्तिः कल्पयितुं युक्तः साक्षान्न्निरनिष्टो निरवद्यः
शोकं मोहमत्येति नित्यमुक्त इति मोहशब्दिताऽज्ञानाऽनाश्रयत्वं श्रूयते
नित्यमुक्त इति बन्धराहित्योक्त्या च तदेव स्थिरीक्रियते । अज्ञानमेव
हि मूलभूतं बन्धकम् । एवं ज्ञाऽज्ञौ द्वावजावीशाऽनीशाविति श्रुतिरपि
जीव एवाज्ञानाश्रयो न ब्रह्मेत्यत्र प्रमाणम् । मायिनं तु महेश्वरमिति
श्रुताविनिप्रत्ययस्तु गृही धनी रथीत्यादाविव संबन्धान्तरविषयत्वेन चरि-
तार्थः । **बिम्बं त्विति** । तथा च बिम्बभूतेश्वरविषया निरवद्यत्वादि-
श्रुतिः जीवस्याऽज्ञत्वश्रुतिस्त्वज्ञानकार्यभयशोकादिमात्रपरेति भावः ।
स्वरूपस्यैवेति । बिम्बस्य स्वरूपाऽनतिरेके बिम्बस्य यन्निरवद्यत्वं तत्स्व-
रूपस्यैवेति पर्यवसितमिति स्वरूपस्याऽविद्याश्रयत्वं न युक्तं बिम्बप्रतिबि-
म्बानुगतस्वरूपस्याऽविद्याश्रयत्वे च बिम्बस्य निरवद्यत्ववचो रिक्तमेव
स्यादिति भावः । ननु मुखप्रतिमुखानुगतमुखमात्रस्योपाध्याश्रयत्वे ऽपि
यथा न बिम्बस्योपाधिसंसर्गः तथेहापि स्यादित्याशङ्क्याह **मुखमात्रस्य
त्विति** । ननु परिच्छिन्नत्वमप्रयोजकमित्यपरितोषाद् वस्तुतस्तत्रापि मुख-
मात्रस्य नोपाधिसंसर्गः । बिम्बे तत्संसर्गाऽप्रतीतेः किं तूपाधिविषयता-
मात्रमित्याह **अपि चेति** । **मुखमात्रस्य त्विति** प्रागवतारितो ऽधस्त-
नग्रन्थः केषु चित्कोशेषु **अपि चेति** ग्रन्थमध्ये **न त्वित्यतः** प्राक् पठ्यते
तस्मिन्पाठे मुखमात्रस्योपाधिसंसर्ग इत्येतदभ्युपेत्यापि प्रकृते तन्न्यायानव-
तारहेतुं वैषम्यं दर्शयितुमयं ग्रन्थ इति योजनीयम् ।

परिच्छिन्नत्वादिति । नन्वप्रयोजकमिदं वैषम्ये परिच्छिन्नवदप-
रिच्छिन्नस्याप्युपाधिसंसर्गसंभवादित्याशङ्क्याह **न त्विति** ।

अयमाशयः । निर्विशेषे यत्काल्पनिकं विशेषं संपादयति तत्स्वक-
ल्पितविशेषोपहितएव संसृज्यते यथा प्रदेशभेदरहिते नभस्यवकाशात्मके
संसृज्यमानो घटः स्वावच्छेदकृतप्रदेशभेदोपहितएव त्वस्मिन् संसृज्यते
प्राच्यादिदिग्विभागोपाधयश्चोदयादिदशापन्नतपनादयः स्वावच्छेदकृतविभा-

गोपहितएव प्राच्यादिदिग्विशेषे संसृज्यन्ते कालोपाधयश्च नयनपरिस्प-
न्दादयः स्वावच्छेदकृतवर्त्तमानादिभेदोपहितएव कालविशेषे संसृज्यन्ते
तएव खल्विह घटो न तत्र प्राच्यां तपनो न प्रतीच्याम् इदानीमयमस्ति
न प्रागासीद् इत्यादिव्यवहारः । एवमिहाप्यहमज्ञो न त्वीश्वरः ज्ञाऽज्ञौ
द्वौ द्वावजावित्यादिलौकिकवैदिकव्यवहारदर्शनादज्ञानकृतभेदोपहिते जीवे
एवाज्ञानं संसृज्यतइति युक्तम् । न चाज्ञानस्य जीवाश्रयत्वे बन्धमोक्षयो-
र्वैयधिकरण्यापातः । मोक्षदशायां जीवत्वाभावेन मोक्षस्य स्वरूपाश्रित-
त्वादिति वाच्यम् । ब्रह्मण्यनतिप्रसङ्गार्थं जीवत्वोपधानमर्यादाभ्युपगमे
ऽप्यज्ञानस्य तदुपहितस्वरूपाश्रितत्वाऽनपायात् । न हि स्वकृतभेदोपहिता-
ऽऽकाशदिक्कालाश्रया घटादयो नाकाशाद्याश्रयाः । एतेन शाखावच्छिन्ने वृक्षे
कपिसंयोगवदन्यावच्छेदकृतभेदएवाश्रये ऽन्यस्यासंकीर्णावस्थितिरुपपाद-
नीया न स्वावच्छिन्ने एवाऽऽत्माश्रयादित्यादिशङ्का दूरनिरस्ता वेदितव्या ।
किं च कपिसंयोगादिष्वपि स्वावच्छेदकृतभेदोपधानमेवाश्रयितुं युक्तं शाखा-
वच्छेदे ऽपि सैव गतिराश्रयणीया । अन्यथा ऽनवस्थाद्यापत्तेरिति ।

तस्मादीश्वरस्य प्रतिबिम्बधारिणीति । तथा चेश्वरस्य चोपाधि- १९९ । ११
मायापरिणामरूपे कामकृतौ परिणामश्च प्रपञ्चः सर्वसाधारणः अज्ञात-
सत्तायोगी चेत्युपपद्यतइति भावः । **जीवाविद्याविवर्त्त इति** । जीवा-
विद्याविषयेश्वरविवर्त्त इत्यर्थः । **ब्रह्मविक्रियेति** । न ब्रह्मोपाधिमा-
यापरिणाम इत्यर्थः । **प्रतिमाणवकेति** । वर्णेषु यद् ध्वनिगतोदात्ता-
दिवैषम्यं प्रतिमाणवकवर्त्त्यविद्याकृतं तद्वैशिष्ट्येन क्रमस्येति वेदविशेष-
णम् । इदमुपलक्षणं शुक्तिरजतादिसाधारण्यप्रसिद्धेरपि । यदि तत्र युग-
पद्भ्राम्यद्बहुपुरुषाविद्याकृतमेकमेव रजतं कस्य चिद् भ्रमनिवृत्तौ पुनर्भ्र-
मानुवृत्तिस्तदा तदितरसकलपुरुषाविद्याकृतं रजतान्तरमिति साधारण्यमुप-
पाद्यते तदा स एव न्यायः प्रपञ्चे योजनीयः । तदिदमाह **अधिष्ठानेति** ।
वर्णग्रहणं शुक्त्यादेरप्युपलक्षणम् । नन्वधिष्ठानैक्यं प्रपञ्चे नास्ति वियदाद्य-
धिष्ठानब्रह्मैक्ये ऽपि तत्तद्देहेन्द्रियाद्यधिष्ठानजीवभेदात् । देहेन्द्रियादिकं
हि जीवाधिष्ठानकम् अत एव ज्योतिरधिकरणे* टीका कोक्षेयं हि ज्योति-

* व्या॰ सू॰ अ॰ २ पा॰ ४ सू॰ १४ ।

र्जीवभावेनानुप्रविष्टस्य परमात्मनो विकारो जीवाभावे देहस्य शैत्याज्जीवतश्चौष्ण्याज्ज्ञायतइति । अयं न्यायो देहादावपि तुल्यः । जीवोत्क्रमणे देहादिविशरणदर्शनात् । तस्मादधिष्ठानैक्याभावाद् नेह साधारण्यमुपपद्यतइत्याशङ्क्याह **सर्वप्रत्यक्त्वादिति** । वस्तुतो ऽधिष्ठानैक्यमिहाप्यस्तीति भावः । **स्वेन्द्रियादिवदिति** । न हि मायिकत्वं व्यावहारिकसत्त्वे प्रयोजकत्वेन क्लृप्तमाविद्यकत्वं तु तत्रापि तथा क्लृप्तमेवेन्द्रियादाविति भावः ।

१९९ । २१ **न मायाप्रतिबिम्बस्येति** । नन्विदं दूषणं स्वमते ऽपि तुल्यं न हि स्वमते नास्ति सविशेष ईश्वरः न च तस्य मुक्तप्राप्यत्वं तज्ज्ञानात्सर्वविज्ञानं चास्ति अस्ति चेन्मायाप्रतिबिम्बस्यैवास्तु को न्वत्र विशेषः । न चाविद्याप्रतिबिम्बस्य जीवस्याविद्योच्छेदे तत्प्रतिबिम्बभावो गच्छति परं न प्रतिबिम्बान्तरभावो भवति । एकप्रतिबिम्बविज्ञानाच्च न सर्वप्रतिबिम्बतद्धर्मविशेषविज्ञानं भवतीत्यस्ति विशेष इति वाच्यम् । कूपमध्यनिहितघटजलान्तर्गतसवितृकरमण्डलप्रतिबिम्बस्य घटनाशे कूपजलप्रतिबिम्बतापत्तिवद् व्यष्ट्यविद्याप्रतिबिम्बस्याविद्यानाशे व्यापकसमष्टिमायाप्रतिबिम्बतापत्तिसम्भवाद् व्यापकोपाधिप्रतिबिम्बे व्यष्ट्युपाधिप्रतिबिम्बानामन्तर्भूतत्वेन तज्ज्ञानात् सर्वविज्ञानोपपादनसंभवाच्चेति चेत् । उच्यते । मायोपाधिः किमर्थं कल्पनीयः किं मायाप्रतिबिम्ब एव मुक्तप्राप्यत्वसर्वविज्ञानश्रुतिविषयो वाच्य इति तद्विषयलाभार्थमुत जगद्भ्रमोपयोग्यधिष्ठानावरणसिद्ध्यर्थमिति विकल्पद्वयनिरासार्थं श्लोकद्वयम् । निर्विशेषब्रह्मभावप्राप्तिः परममुक्तिरित्यङ्गीकारान्मायाप्रतिबिम्बस्य मुक्तप्राप्यतैव नेष्यते अधिष्ठानज्ञानेन तदध्यस्तसर्वविज्ञानस्योपपादनीयत्वात् । प्रतिबिम्बस्याध्यस्तत्वनियमेन मायाप्रतिबिम्बस्याप्यध्यस्ततया तस्य महाकाशरीत्या ऽनवच्छिन्नस्य ब्रह्मण इवाधिष्ठानत्वायोगात्तज्ज्ञानतः सर्वविज्ञानं न संभवतीति न तदुभयश्रुतिविषयलाभार्थं मायोपाधिः कल्प्य इति प्रथमश्लोकार्थः । अधिष्ठानावरणमन्धकारवद्विषयाश्रितेनैवेति न नियमः नयनपटलवद् ग्रहीतृगतेनापि तदुपपत्तेरिति द्वितीयश्लोकार्थः ।

भ्रमे कर्तृदोषवद्विषयदोषेणापि भाव्यमिति तदर्थं मायावरणकल्पनमित्याशङ्क्य तन्नियमभङ्गमाह **पित्तस्येवेति*** । जीवाऽविद्ययोः पौर्वापर्या-

* पीतस्येवेति मूले प्रमादान्मुद्रितं तदेवं शोध्यम् ।

भावे ऽपि तदध्यासयोस्तदस्त्वित्याशङ्क्य तन्नियमो नास्ति बीजाङ्कुरवदना-
दित्वादित्याह **पौर्वापर्ये चेति । अप्रसङ्गेनेति च्छेद इति ।** तथा
च प्रकृतहानाऽप्रकृतप्रक्रियाप्रसङ्गपरिहारेणैकवाक्यत्वं संभवतीत्यव्यवहिता-
न्वयो लभ्यतइति भावः । तृतीयान्तस्य न वाक्यभेदो युज्यतइति व्यव-
हितेनान्वये तु न प्रश्लेषः* ।

अन्नोपघातीति† । सूक्ष्मशरीरएवाव्यक्तपदप्रवृत्तिनिमित्तमस्तीति २०० । ८
वदता किं तत्प्रवृत्तिनिमित्तमिष्यते । यदि भाष्याद्युक्तं तत्त्वाऽतत्त्वाभ्याम-
निर्वाच्यत्वं तर्हि‡ तत् साक्षाद् अविद्यायामेव । यदि तत्परिणामत्वात्
सूक्ष्मशरीरे ऽपि तर्हि तत् स्थूलशरीरे ऽपि स्यादित्यविशिष्टमव्यक्तपदस्य
शरीरद्वये ऽपि मुख्यत्वम् । यदि प्रत्यग्भिन्नत्वेन तदभिन्नत्वेन वा स्पष्टत्वं
तत्प्रवृत्तिनिमित्तमिष्यते तदा स्थूलशरीरएव तन्मुख्यं स्यात् स्थूलो ऽहं मम
शरीरमित्युभयथा ऽपि प्रतीत्या तत्रैव प्रत्यग्भेदाभेदाऽस्पष्टतासत्त्वात् ।
यदि प्रत्यक्षाऽगोचरत्वं तत्प्रवृत्तिनिमित्तमिष्यते तदा टीकातद्व्याख्यानयो-
रजहल्लक्षणोक्तेति द्रष्टव्यम् । स्नायवः सिराः मज्जा ऽस्थिगतस्नेह इत्यनेने-
त्यस्य टीकाप्रतीकस्य व्यवधायकविषयत्वे ऽपि व्यवहितपदार्थमाहेति तद-
वतारणं यथेत्यादिप्रतिवचनं व्यवहितमित्येतदेव युक्तम् । हन्तेत्याद्यर्धमा-
त्रस्य व्यवधायकत्वोक्तिस्तु न हृदयङ्गमा । येयं प्रेते इति मन्त्रानन्तरमा-
म्नातं देवैरत्रापि विचिकित्सितं पुरेति मन्त्रमुपक्रम्य प्रवृत्तस्य यस्मिन्नेतावु-
पाश्रितावित्यन्तस्य हन्तेत्यतः प्राचीनस्य महतः परमात्मविषयस्य प्रप-
ञ्चस्य व्यवधायकस्य सत्त्वादित्यभिप्रेत्य । एवं च भाष्ये हन्तेत्याद्यर्धे
व्यवधायकसमर्पकतया क्लेशेन न योजनीयं किं तु यथेत्यादिवज्जीववि-
षयान्तर्गततयैव योजनीयम् । यथेत्यादिना जीवं प्रस्तुत्य

तदेव शुक्रं§ तद् ब्रह्म तदेवामृतमुच्यते ।
तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥

इत्यादिना जीवस्यैव|| ब्रह्मभावोपदेशेन तस्यापि ब्रह्मवचनप्रतिज्ञा-
संस्पर्शात् ।

---

* प्रश्लेष इति २-५ पु॰ पा॰ । उपरितनः पाठः शोधितः १ पु॰ ।
† मूले प्रमादादन्नोपघातेति मुद्रितं तदेवं शोध्यम् ।
‡ तर्हीति नास्ति २ पु॰ । § शुक्रमिति २ पु॰ पा॰ । || एवकारो नास्ति २ पु॰ ।

१०० । २३ चशब्द एवेति । ननु चशब्दो वृताऽवृतसमुच्चयार्थो न भवति येन वृतानग्निविद्यादीनवृतां सृङ्कां* च ददाविति तदर्थो वर्ण्येत किं तु वृताऽग्निविद्यादित्रयव्यतिरिक्ताऽवृतदेयान्तरसमुच्चयार्थः ।

तमब्रवीत्प्रीयमाणो महात्मा वरं तवेहाद्य ददामि भूयः ।

तवैव नाम्ना भवितायमग्निः सृङ्कां चेमामनेकरूपां गृहाण ॥

इति हि श्रूयते । एवं तर्हि तवैव नाम्नेत्यादिदेयद्वये यथा पृथग्वरदानमस्ति नैवमव्यक्ते इति विशेषो द्रष्टव्यः । नन्वेवमव्यक्तपदस्य शरीरार्थकत्वे ऽप्यग्निविद्यादित्रयमात्रविषयप्रश्नोपन्यासविरोधस्तुल्यः पृष्टस्य परमात्मन एव निरतिशयपरत्वेन प्रतिपादनार्थं परत्वावधितया शरीरस्य निर्देश इति चेत् प्रधानस्यैवास्तु को न्वत्र विशेषः । उच्यते । निष्प्रपञ्चजीवब्रह्माऽभेदप्रतिपादनार्थं प्रवृत्तमिदं प्रकरणम् । येयं प्रेते इति प्रश्नो हि मृतजीवास्तित्वनास्तित्वविषयः । तत्र तस्य स्वारस्यात् । नचिकेतःप्रलोभनप्रस्तावे मरणं मा नु प्राक्षीरिति मरणप्रश्नप्रतिषेधदर्शनात् । यथा च मरणं प्राप्येत्यादिमृतजीवास्तित्वनिर्द्धारणविषयप्रतिवचनदर्शनाच्च । यद्यपि स्वर्गसाधनाग्निप्रश्नादिना नचिकेतसः परलोकानुबन्धिजीवास्तित्वनिश्चयवत्त्वमवसीयते तथापि तस्यैव स्थिरीकरणपूर्वकं तदीयपारमार्थिकरूपविविदिषया प्रश्न उपपद्यते । अत एव नचिकेतसो विषयवैराग्यदर्शनानन्तरं विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्तेति वैवस्वतवचनम् । अन्यत्र धर्मादिति प्रश्नः परमात्मविषय इति निर्विवादम् । प्रश्नद्वयस्य चैकविषयत्वं वरचित्वबलादविचलम् । अत्र च प्रकरणे योनिमन्ये प्रपद्यन्त इत्यादिषु जीवस्य कर्मोपासनाकर्तृत्वात्फलभोक्तृत्वादयो धर्मा दर्शिताः । तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चनेत्यादौ परस्य जीवव्यावृत्ताः सर्वप्रपञ्चाश्रयत्वसर्वान्तरत्वादयो धर्मा दर्शिताः । विरुद्धधर्माश्रययोः कथमैक्यमित्याकाङ्क्षायां

यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।

एवं धर्मान् पृथक् पश्यन् तानेवानु विधावति ॥

इत्यभेदविरोधिधर्मव्यवस्थां मन्वानस्तानेव धर्माननुवर्ततेति संसारानुवृत्तिदोषमुक्त्वा यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजा-

* सृङ्कां=रत्नमालाम् ।

मत आत्मा भवति गौतमेत्यध्यस्तसकलविरुद्धधर्मप्रहाण्या जीवपरैक्यं
जानन्नेव मुक्तो भवतीति प्रतिपादितम् । एवं चात्र ब्रह्मपरतन्त्राणां शरीरे-
न्द्रियादीनां तदीयपरत्वावधितयोपन्यासो युज्यते न तु साङ्ख्याभिमतस्य
स्वतन्त्रप्रधानस्य प्रकरणप्रतिपाद्यप्रधानार्थविरोधादिति भावः । अत्रायान्
पृष्ट इत्यादिपूर्वोत्तरग्रन्थविवरणे क्व चदित एवैक एव जीवप्रश्नः तत्क-
र्तृप्रशंसा ऽपीति पाठः । अत एकत्वमेव* एवं जीवप्रश्नतत्कर्तृप्रशंसा ऽपी-
त्यन्यत्र पाठः । अत एकत्वमेव जीवप्रश्नतत्कर्तृप्रशंसापीत्यपरत्र पाठः । सर्वे
ऽपि तुल्यार्थाः । आद्ये पाठद्वये वाक्यभेदः तृतीये वाक्यैक्यमिति विशेषः ।

अधिकरणादाविति । नन्वधिकरणादौ वैदिकं प्रकरणं† पौरुषेयी २०१ । ८
रूढिर्वैदिकप्रकरणापरिशेषविरोधादेवानुपयोगिनीत्युक्तम् । तस्मादधिकरणादौ
पौरुषेयत्वमात्रेणानुपयोग उक्तः । महद्वच्चे‡ति सूत्रे प्रकरणविरोधादिना
बाध उच्यत इति भेदकथनमयुक्तमिति चेत् । उच्यते । अधिकरणादौ शरी-
रगृहीतिहेतुत्वेनात्मानं रथिन विद्धीत्यादिप्रकरणं शरीरपरिशेषश्चेत्युभयमु-
पन्यस्तम् । अस्य सिद्धान्तहेतोः प्राबल्यसिद्ध्यर्थं सांख्यरूढेः पौरुषेयत्वेन
दौर्बल्यं भाष्यादिषूक्तं प्रबलेन सिद्धान्तहेतुना सांख्यरूढेरर्थात् परं बाधः
सिध्यति न तु तद्बाधनार्थत्वेन तदुपन्यस्तम् । इह तु त्रयाणा§मिति
सूत्रेण जीवप्रश्नकर्तृप्रशंसाद्यवगमितं ब्रह्मात्मैक्यप्रकरणम् । यत् साक्षाद-
व्यक्तपदरूढेर्बाधकमिति सूचितं तत्र तस्मिन्नेव ब्रह्मात्मैक्यप्रकरणे श्रुतस्य
महत्पदस्येवाव्यक्तपदस्यापि सांख्यरूढिर्गृह्यत इत्याशङ्कायां महद्वदिति सूत्रेण
तद् ब्रह्मात्मैक्यप्रकरणं न केवलमव्यक्तपदरूढेरेव बाधकं किं तु महत्पद-
रूढेरपीति दृष्टान्तव्याजेन प्रदर्श्यान्ते ब्रह्मात्मैक्यप्रकरणे भेदवाद्यभिमतस्य
महतः प्रधानप्रसक्तिरित्ययमर्थ उच्यते । अतो न पौनरुक्त्यम् । एवं च
महद्वदिति समुच्चयोपमा ।

हतान्यपि रक्षांसि पेतुर्वानरकोटिषु ।
रजांसि समरोत्थानि तच्छोणितनदीष्विव ॥

इत्यादाविवेति द्रष्टव्यम् ।

---

* अत एव कर्तृत्वमेवेति २ पु॰ पा॰ ।
† वैदिकप्रकरणमिति १ पु॰ पा॰ ।
‡ व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ ७ ।
§ व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ ६ ।

अधिकरणादावित्यादिग्रन्थे इदानीं महच्छब्दस्येव वेदविरोधाद् बाध्याव्यक्तशब्दस्येति क्व चित् पाठः । इदानीं महच्छब्दस्येव विरोधाद्बाध इत्यन्यत्र पाठः । पाठद्वयमप्यर्थतस्तुल्यम्* । एवमन्यत्रापि यत्र पाठभेद-स्तुल्यार्थः स्पष्टार्थश्च तत्र सर्वत्राप्येवैव रीतिरिति तत्र पाठभेदो नोदाहि-यते । प्रकरणादीत्यादिशब्देन महान्तं विभुमात्मानमित्यादि भाष्योदाहृतं गृह्यते ।

स्वरूपपर इति ।

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥

इत्यत्र तल्प्रत्ययः स्वार्थिको न तु प्रवृत्तिनिमित्तधर्मवाची । तस्य भावः सत्तेति टीकायामपि भावशब्दः स्वरूपवाचीति भावः । **जीवं चाहे-ति ।** जीवाभिन्नब्रह्मस्वरूपोपदेशार्थतयेति भावः† ॥

२०२ । ४ **चमसवदविशेषात् ॥ ८ ॥**

त्रिगुणत्वादिनेति । आदिशब्देनैकत्वादिवत् सृजमानामिति कृदुक्तस्वातन्त्र्यस्य जहातीत्युक्तस्य त्यागस्य च संग्रहो ऽपि द्रष्टव्यः । परमेश्वराधीनयोर्मूलाऽवान्तरप्रकृत्योः स्वातन्त्र्याभावाद् मुक्तिदशायामवि-द्याया निरवशेषोच्छेदाभ्युपगमेनानुवर्तमाने प्रधाने एव त्यागोक्तिसाङ्गत्याच्च । **सांख्यानामप्यस्ति भ्रम इति ।** स गृहीतासंसर्गधर्मधर्मिविषयज्ञानद्वयरूप-स्तदुभयसंसर्गाविषयकज्ञानरूपो वेत्यन्यदेतत् । यस्य ब्रह्मणो जगदुत्पत्ताविति टीकायामपेक्षितमध्याहरति **साध्यायामिति ।** ब्रह्मैक्ययोजकत्वाद् ब्रह्मैक्यप्रापकत्वात् । ननु ध्यानयोगेनात्मानं गत्वा प्राप्ता यदि मुक्ताः तर्हि कथं तेषां पुनरविद्यादर्शनमुच्यतइत्याशङ्क्य व्याचष्टे **आत्मप्राप्तिस्त्वना-त्मविरहेण स्थितिरिति ।** अनात्मविरहो ऽनात्मदर्शनविरहः । **जात्य-भिप्रायमिति ।** गुणसंघातरूपे प्रधाने ऽप्येकत्वं संघाताभिप्रायं वाच्यमिति तुल्यमेव । सृजमानामिति कर्तृप्रत्ययालम्बनं स्वातन्त्र्यमन्यप्रेर्यत्वे ऽपि न हीयते न हि यन्त्रा प्रेर्यमाणो गजो न गच्छति । कल्पनोपदेशे च ज्ञानेनावि-

* तुल्यं द्रष्टव्यमिति २ पु० पा० । † अत्र प्रथमम् आनुमानिकाधिकरणं पूर्णम् ।

योच्छेदे मुच्यमानकर्तृकत्यागत्वकल्पना न विरुद्धा । ननु छागत्वकल्पनैव नोपपद्यते अजो ह्येकः अजो ऽन्य इत्यजशब्दयोश्चेतनवाचिनोरचेतनवाचिनश्चाऽजाशब्दस्य ह्याऽज्ञौ द्वावजावीशाऽनीशावजा ह्येका भोक्तृभोगार्थयुक्तेति प्राकरणिकमन्त्रान्तरगतशब्दवद्यौगिकतौचित्यादत्यन्तमेव प्रकृतिसंबन्धविमुक्तस्य परब्रह्मरूपतां प्राप्तस्य पुनः छागासंसर्गयोग्यातिमूढप्राणिप्रथमोदाहरणे छागत्वकल्पनाऽयोगाद् असौ वा आदित्य इत्यादौ मध्वादित्यादिपदद्वयसमभिव्याहारवदुपासनाप्रयोजनवत्त्वाच्च कल्पनोपदेशत्वकल्पकाभावाच्चेति चेद् न । द्वा सुपर्णेत्याद्यनन्तरमन्त्रे प्रथमप्रतीतरूढ्यपरित्यागेन प्रहीणजात्यवलम्बनस्याऽपि प्रतिपत्तिसौकर्यप्रयोजनस्य कल्पनोपदेशस्य दृष्टत्वेन तथेहाप्युपपत्तेः ।

प्रकरणादविद्यानिश्चयादिति । अनेन मूलप्रकृतिरजेत्येव मुख्यसिद्धान्तः । अजा ह्येका मायां तु प्रकृतिमित्यादिपूर्वापरमन्त्रानुरोधस्य शाखान्तरोक्तरोहितादिशब्दप्रत्यभिज्ञानतो बलवत्त्वादिति सूचितम् । ननु देवात्मशक्तिमित्यत्र दीव्यमानत्ववाचिदेवविशेषणमनावृतज्ञाने परमात्मन्येव युक्तमतस्तच्छक्तित्वोक्तिर्विरुद्धेत्याशङ्क्य व्याचष्टे **देवात्मविषयामिति*** ॥

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥ २०३ । १२

योगरूढ्यविनिगमादिति । रूढियोगयोः स्वतः प्राबल्यदौर्बल्यविशेषे सत्यपि निस्तात्पर्यकत्वप्रसङ्गतत्परिहारलाभाभ्यां समबलत्वापादनेनाविनिगम उक्तः । **रक्तपटन्यायेनेति ।** ननु श्रुतविशेषणसजातीये तद्विरोधिनि च नास्ति रक्तपटन्यायः यथा रक्तो रक्तः पट इत्यत्र मृण्मयो हिरण्मयो घट इत्यत्र । सत्यम् । यथैकया संख्यया विशेषितानामर्थानां सजातीयेन विजातीयेन वा संख्यान्तरेण विशेषणात्संवर्द्धनेन महासंख्यालाभस्तत्र रक्तपटन्यायः प्रवर्ततएव । यथा पञ्चभिर्धाता विदधाविदं यदिति मन्त्रे तासां स्वसृरजनयत् पञ्चपञ्चेति । अत्र हि पञ्चविंशतिरूपा संवर्धनसंख्या विवक्षिता त्रिंशत् स्वसार इति वाक्यशेषात् । यथा वा पञ्चपञ्चाशतस्त्रिवृतः संवत्सरा इत्यादौ वाक्यचतुष्टये । अत्र पञ्चाशदुत्तरशतद्वयरूपा महासंख्या

---

* अत्र द्वितीयं चमसाधिकरणं पूर्णम् ।

विवक्षिता विश्वसृजां सहस्रसंवत्सरमिति वाक्यशेषात् । निस्तात्पर्यमिति पदस्यार्थं कथयन्नेव तद्धेतुवचनमवतारयति **निस्तात्पर्यइति** । अर्थाभावेऽव्ययीभावः । तृतीयासप्तम्योर्बहुलमित्यम्भावस्य बाहुलकत्वात् । तात्पर्यइति सप्तम्यन्तरूपम् ।

२०३ । २१ **जायन्तइति व्युत्पत्त्येति** । जनिधातोः पचाद्यचि । एवं च संज्ञायामेव संख्यासमासविधाने ऽप्यगत्येह छान्दसत्वेनाऽसंज्ञायां तदुपपादनं कार्यमिति भावः । ननु तत्रापीत्यादिटीकाग्रन्थेन पञ्चजनशब्दार्थपरिग्रहे संभावितं प्रकारद्वयमुपन्यस्य प्रथमप्रकारं विरोधाद् निरस्य द्वितीयप्रकारः सांख्यतत्त्वग्रहणपर्यवसायी व्यवस्थाप्यतइति भाति । एवं सति तत्रेति तच्छब्देनाव्यवहितं योगं परामृश्य योगपक्षे प्रकारद्वयोपन्यासो ऽयं योजनीय उत तेन व्यवहितां रूढिं परामृश्य रूढिपक्षे । नाद्यः । मनुष्यसंबन्धिषु प्राणादिषु रूढिपूर्वलक्षणोपपत्तौ योगपरिग्रहाऽनौचित्यात् । न द्वितीयः । योगं विना पञ्चविंशतिसंख्यालाभाऽसंभवे रूढिपक्षे सांख्यतत्त्वग्रहणाऽयोगादित्याशङ्क्यावतारयति **रूढ्यत्यागेनेति** । तदतिरिक्ता एव* के चिदिति द्वितीयप्रकारोपन्यासो न सांख्यतत्त्वविषयः किं तु निषादपञ्चमाश्चत्वारो वर्णा इत्याचार्यैकदेशिमतोपन्यासः । तत्र सदेवासुरमानुषसकलप्राण्याधारस्य परमेश्वरस्य तावदाश्रयत्वमात्रोपन्यासे वाक्यं निस्तात्पर्यं स्यादिति प्रागुक्तदोषानुवृत्तिं स्पष्टत्वादनुद्भाव्य प्रकारद्वयमपि विहाय तस्मात्कानि चिदेव तत्त्वानीत्याद्यग्रिमटीकाग्रन्थेन योगमाश्रित्य सांख्यतत्त्वग्रहणं समर्थ्यतइति

,, । २३ तात्पर्यम् । **वाक्यविरोधं व्यनक्तीति** । प्राणादयो न विवक्षणीया इत्यध्याहरणीयसाध्ये हेतुवाक्यविरोधमित्यर्थः । **पञ्चविंशतिस्तत्त्वानीति** । समासान्तर्गतया संख्यया प्रथमं पञ्चधा विभागे कृते पुनरेकैकस्मिन्विभागे पञ्चसंख्यानिवेशे सति पञ्चविंशतिस्तत्त्वानि संपद्यन्तइत्यर्थः । ननु तासां स्वसृरजनयत्पञ्चपञ्चेत्यत्र पञ्चपञ्चाशतस्त्रिवृतः संवत्सरा इत्यत्र चैकैकोपाधिक्रोडीकारं विना ऽप्यवान्तरसंख्यानिवेशो दृष्टः तत्र प्रथमं पञ्चधा पञ्चाशद्धा च विभक्तेषु प्रत्येकं पञ्चसंख्यानिवेशेन महासंख्यालाभो न भवति

---

* तदतिरिक्ता अन्ये एवेति २ पु. पा. ।

किं तु पञ्चपदद्वयेन पञ्चपञ्चाशत्पदद्वयेन च महासंख्यालक्षणया । न चेह तथा व्यस्तसमस्तयोः पञ्चपदयोरेकमहासंख्यालक्षकत्वमुपपद्यतइति चेत्तर्ह्यत्रापि मा भूत्समासः असमस्तेन पञ्चपदद्वयेन पञ्चविंशतिसंख्या लक्ष्यतामिति पूर्वपक्षान्तरमुद्भावयतीत्यवतारयति **समासार्थ इत्यादिना ।**

विग्रहएवार्थात्मनेति । अपेक्षाबुद्धिरव्यक्ततया सतामेव द्वित्वा- २०४ । २
दीनां व्यञ्जिका नोत्पादिकेति भावः । भाषिकेण स्वरेणैकपदत्वनिश्चयादिति भाष्यवाक्यस्य ब्राह्मणभवेन स्वरेण समासनिश्चयादित्यर्थः । भाषाशब्दस्य ब्राह्मणभागे प्रवचनशब्दस्य मन्त्रभागे च वैदिकानां निरूढिः । अत एव भाषास्वरोपदेशेष्वैरवत्प्रवचनप्रतिषेधः स्या*दिति जैमिनीयं सूत्रम् । तन्मूले चाधिकरणे मन्त्रसमाम्नाये स्वरान्तरेण समाम्नातानां विनियोजकब्राह्मणस्वरान्तरेणोपात्तानां मन्त्राणां मन्त्रसमाम्नायस्वरे प्रावचनिकस्वर इति ब्राह्मणस्वरे भाषिकस्वर इति च मीमांसकानां व्यवहारश्च । एवं चाद्यऽन्तानुदात्तरूपेण भाषिकस्वरेण कथं समासनिश्चयः । समासे ह्यन्तोदात्तेन भाव्यमित्याशङ्क्य तदभिप्रायमाह **भाषिकेण स्वरेणेत्यस्यार्थ**† **इति ।** परसंलग्नतयेति टीकाग्रन्थश्च‡ प्रतिष्ठित इत्यर्द्धइव विरामं विनोच्चार्यस्येत्यर्थः । ननु पञ्चजना इत्यत्राम्नानसिद्धस्यान्तानुदात्तस्वरस्य भाषिकग्रन्थविहितब्राह्मणपठितमन्त्रत्वनिमित्तोदात्तादेशरूपतया तत्स्थानिना अन्तोदात्तस्वरेण समासनिश्चय इत्येतदयुक्तम् । असमासे ऽपि जनशब्दस्य पचाद्यजन्ततया चित इति सूत्रेणान्तोदात्तलाभादिति चेत् । तथा सति नकारोपरितनस्य ब्राह्मणगतोदात्तस्यान्त्यनुदात्तस्वरसंभवे ऽपि पञ्चशब्दगतयोरकारयोः समासं विना तदसंभवात् । चित्स्वरसूत्रापवादकेन वृषादीनां चेति सूत्रेण वृषादिगणपठितस्य जनशब्दस्याद्युदात्तस्य विहिततया तस्य§ प्राग्विहितसकलपदस्वरापवादार्थं प्रवृत्तेनान्तोदात्तरूपेण समासस्वरेणैवापवदनीयत्वाच्च ।

हे आज्येति । आज्यग्रहणातन्त्रत्वाद् विनियोगानुसारेण संबोधन- २०५ । २०
मध्याहृतम् । कृतइत्यव्ययं तादर्थ्ये । यन्त्राय घर्त्राय गृह्णामीति मन्त्रशे-

---

* जै॰ सू॰ अ॰ १२ पा॰ ३ सू॰ २०। स्वरोपदेशेष्विति ५ पा॰ स्वरोपदेशादिति सौत्रः पाठः।
† स्वरेणेति तस्यार्थ इति २ पु॰ । ‡ आकाग्रश्चेति शोधितं ५॰ पु॰ ।
§ विहितस्य तस्येति ३ पु॰ पा॰ ।

षाम्नातियन्त्वधर्वशब्दोक्तशरीरादिनियमनधारणार्थमित्यर्थः । यद्यपि जना यदग्निमयजन्त पञ्चेत्यसमासो ऽपि वेदे दृश्यते तथापि यत्र पञ्चशब्दद्वयं तत्र जनशब्दपूर्वपठितस्य पञ्चशब्दस्य समासनियमो दृष्ट इति तात्पर्यम् ।

२०५ । २१ द्विः पञ्चशब्दप्रयोगेति । अनेन भाष्यटीकयोर्वीप्सापदं स्वतन्त्रस्य पञ्चशब्दस्य द्विःप्रयोगमात्रपरं न तु नित्यवीप्सयोरिति सूत्रोक्तव्याप्तिविवक्षापरमिति दर्शितम् । ननु सूत्रोक्तायामेव वीप्सायामयं द्विःप्रयोगो ऽस्तु तथा च यथा दश चैकैकं चमसमनुप्रसर्पन्तीत्यत्र न द्वैगुण्येन विंशतिसंख्यालाभः शतं ब्राह्मणाः सोमं भक्षयन्तीति वाक्यशेषाद् एवमिहापि पञ्चविंशतिसंख्यालाभः स्यात् । मैवम् । तत्रानुप्रसर्पणीयानां चमसानां दशसंख्यत्वात्तदनुप्रसर्पकाणां प्रतिचमसं दशसंख्यानां ब्राह्मणानां शतसंख्या निषिध्यते एवमत्र जनानामधिकरणानि यदि पञ्च निर्दिष्टानि स्युः तदा प्रत्यधिकरणं पञ्चसंख्यजनसंबन्धरूपव्याप्तीच्छया पञ्चविंशतिसंख्या निष्पद्येत न त्वत्राधिकरणपञ्चकनिर्देशो ऽस्तीति वैषम्यात् । नन्वेवं सति तासां स्वसृरित्यत्रापि दशानामेव लाभः स्यात् । यदि तत्रैका पञ्चसंख्या पञ्चसंख्यान्तरेण विशेष्यते तर्ह्यत्रापि तथा ऽस्त्वित्याशयवतः शङ्कां निराकरोतीत्याह असमासपक्ष एवेति । तासां स्वसृरित्यत्र वाक्यशेषानुसारेणागत्या विशेषणान्वयस्वीकारेणात्रावयवद्वारा दशसंख्यालक्षणया पञ्चशब्दद्वयोपपादने संभवत्यनन्यगतिकविशेषणसंक्रमकल्पनाऽयोगात् । दशसंख्यया च ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्कृतमित्यादिश्रुत्यन्तरप्रसिद्धसंख्येयग्रहणे संभवत्यप्रामाणिकसांख्यतत्त्वपर्यवसायिपञ्चविंशतिसंख्याग्रहणाऽयोगाच्च नात्र तन्न्यायः प्रवर्तत इति भावः ।

२०५ । २७ दूषितमपीति* । ननु यदि विशेषणस्य भिन्नपदोपात्तविशेषणान्तरान्वयो न संभवति तासां स्वसृरित्यत्र पञ्चपञ्चाशत इत्यत्र का गतिः । यदि तत्र क्रोडीकारकधर्ममनपेक्ष्यैव प्रथमं पञ्चधा पंचाशद्वा च विभक्तेषु पुनः पञ्चसंख्यान्वयात् संवर्द्धनसंख्यालाभस्तर्हि अत्रापि तथा ऽस्त्वित्यनुशयवन्तं प्रथमपूर्वपक्षिणं प्रकारान्तरेण दूषयितुमुत्थापयतीत्याह नानाभावेनेति । ननु व्यस्तपञ्चसंख्यायाः न विशेषान्वयः आकाङ्क्षाविरहाद् नापि विशेष-

* दूषितमपीति न दृश्यते १ पु॰ ।

णान्वयः **असामर्थ्या**दित्युक्तं दूषणमयुक्तम् । संवर्द्धनसंख्यालाभार्थं सजातीयविजातीय**संख्या**न्तराकाङ्क्षोपपत्तेः । तदाकाङ्क्षाविरहेऽपि संख्यान्तरस्य शब्दगत्या **साक्षाद्** विशेषणान्वयमसामर्थ्यपराहतं परित्यज विशिष्टान्वयिन एव तस्य **सप्तदशार**त्निवाक्ये विधेरेव विशेषणसंख्यासंक्रमकल्पनोपपत्तेः । अन्यथा तासां **स्वसृ**रित्यादौ का गतिरिति चेत् । उच्यते । तत्र वाक्यशेषानुसारात्संवर्द्धन**संख्या**लम्भकम् आकाङ्क्षोत्थापनं विशेषणसंक्रमणं चाभ्युपगम्यते इह तु **संवर्धन**संख्याविवक्षागमकवाक्यशेषाभावान्न तदुभयमाश्रयणीयमिति भावः ।

कथं चेति भाष्यमयुक्तमिति । ननु कथं चेति भाष्यं नायुक्तं २०६ । ५
किं तु तद्भाष्य**मयुक्त**मित्येतदेव वचनमयुक्तम् । न हि तेन पञ्चविंशतिसंख्याया अलाभ उक्तः किं तु यौगिकेन समस्तपदेन तल्लाभमभ्युपेत्य तथापि तत्**संख्येयानि** सांख्यतत्त्वानीति न सिद्ध्यतीत्युक्तम् । अत एव तत्सिद्धिः किं **जन**शब्दशक्तिवशादुत पञ्चविंशतिसंख्यायाः संख्येयान्तराभावेन **परिशेषादिति** विकल्पं मनसि निधाय पक्षद्वयमपि भाष्ये क्रमेण दूषितम् । तत्र **द्वि**तीयविकल्पदूषणस्यायमर्थः । ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि भूतानि **तन्मात्रा**णि मनोबुद्धिभोक्तृस्थूलसूक्ष्मशरीराणि चेतीन्द्रियेभ्यः परा ह्यर्था **इत्यादि**श्रुतिप्रसिद्धाः सन्ति । देवाः पितरो गन्धर्वा दैत्या दानवा राक्षसा **भूता**ः प्रेताः पिशाचाश्चत्वारो वर्णाः षडनुलोमाः षट् प्रतिलोमाश्चेत्ये**वमपि** पञ्चविंशतिः श्रुतिप्रसिद्धा एव जनशब्दमुख्यार्थाः सन्ति । एवं **श्रुत्यन्तर**प्रसिद्धसंख्येयोपसंग्रहे कर्तुं शक्ये नाऽप्रामाणिकसांख्यकल्पिततत्त्वोप**संग्रहः** कार्यः । एवं च संख्येयानामात्मनि प्रतिष्ठितत्ववर्णनमपि सङ्गच्छते । न हि सांख्यतत्त्वोपसंग्रहे तत्सङ्गतिरस्ति प्रधानस्य स्वतन्त्रत्वा**दन्येषां** प्रधानाश्रितत्वात् । आकाशग्रहणमपीन्द्रियादीनां संख्येयतायामव्या**कृताका**शपरतया देवादीनां संख्येयतायां तावतामवकाशात्मनोपकारको **भूताकाशो** महानिति तत्परतयोपपद्यत इति । तस्माद् भाष्याऽयुक्तत्ववचनं **तावद**युक्तम् । तथा पञ्चसंख्याद्वयात्पञ्चविंशतिसिद्धेरति तदयुक्तत्वहेतुवचनं **प्राक्**पञ्चविंशतिसंख्यालाभस्य नानाभावाकाङ्क्षाविरहाऽसामर्थ्यहेतुभिर्दूषित**त्वाद**प्ययुक्तम् । न हि दूषितपक्षस्य प्रौढ्या ऽभ्युपगमेन

दूषणान्तरोक्तिवद् दूषितपक्षमेवावलम्ब्य शङ्कोत्थापनं संगच्छते । तस्मात्सर्वमिदमनुपपन्नमिति चेत् ।

अत्रायमाचार्याणामाशयः । कथं चेत्यादिभाष्येण पञ्चविंशतिसंख्यामभ्युपगम्य ततः सांख्यतत्त्वोपसंग्रहस्य वस्तुतः पञ्चविंशतिसंख्यालाभस्य चाक्षेपः प्रतिज्ञातः । प्रथमाक्षेपे जनशब्दस्येत्यादिहेतुद्वयमुक्तम् । द्वितीयाक्षेपानुपपत्तिं कथं तर्हि पञ्च पञ्चजना इतीति भाष्येणोद्भाव्य तदुपपत्तिरुच्यतइत्यादिना दर्शिता । तत्र द्वितीयाक्षेपानुपपत्त्युद्भावनावाक्यस्यायमर्थः । पञ्चजना इत्यस्य क्लृप्ते योगे संभवति न रूढिः कल्पनीया यौगिकत्वे च असमस्तः पञ्चशब्दो न पञ्चसंख्याप्रतिपत्त्यर्थः समस्तपञ्चशब्देन तल्लाभात् । नापि द्वैगुण्यलाभार्थः व्यस्तसमस्तयोः पञ्चशब्दयोरेकार्थलक्षकत्वाऽसंभवात् । एवं चाऽसमस्तं पञ्चपदं पञ्चधा विभक्तेषु प्रत्येकमन्वितां विशेषणसंक्रान्तां वा पञ्चसंख्यां यदि न समर्थयेत् तदा व्यर्थमेव स्यादिति वाक्यशेषाभावे ऽप्यसमस्तपञ्चपदान्तरसमभिव्याहारबलात् पञ्चविंशतिसंख्यासिद्धिरनिवार्या इति कथं तत्सिद्ध्यभावो ऽपि प्रतिज्ञात इति । एवं कथं चेत्यादेः कथं तर्हि पञ्च पञ्चजना इत्यन्तस्य* भाष्यस्यार्थं सिद्धं कृत्वा टीकाकारैरुच्यतइत्यादिभाष्यस्याभिप्रायवर्णनं कथं चेति प्रघट्टकादिप्रतीकग्रहणपूर्वकं द्विकसंख्ये इत्यादिग्रन्थेन क्रियतइति । एवमभिप्रेत्य कथं तर्हीत्यादिशङ्काभाष्यार्थः कथं चेत्यादिभाष्यमयुक्तमित्याद्यवतारिकया संगृहीतः । एवं च टीकाकारैः कथं चेति भाष्यप्रतीकमुपादाय कथमुच्यतइत्यादिभाष्याभिप्रायवर्णनं कृतमित्यपि शङ्का निरवकाशा वेदितव्या ।

अथ त्वसौ न धाक्ये संबन्धार्हः पूर्वापरवाक्यविरोधी वेत्यनयोः
२०७ । १ क्रमेणोदाहरणे दर्शयति इह मनुष्येति† । यथा श्येनेनेत्यादिदृष्टान्तवाक्ये रूढिपूर्वकलक्षणोदाहृता तथेत्यादिदार्ष्टान्तिकवाक्ये तु रूढिसमर्थनमात्रं कृतं न तु तत्पूर्वलक्षणासमर्थनम् । अतस्तथेत्यादि दृष्टान्ताननुगुणं भवतीति शङ्कामपनयति‡ दार्ष्टान्तिकमाहेति । दृष्टान्ताननुगुणत्वाशङ्कां टीकाग्रन्थापेक्षिताध्याहारेण निरस्यति तत्संबन्धादिति । तत्त्वेषु लाक्ष-

* इत्येतस्येति १ पु॰ पा॰ । † इह रूढमनुष्येति २ पु॰ पा॰ । मूले ऽप्येवमेव ।

‡ अतस्तथेत्यादि कथं दार्ष्टान्तिकं भवतीति शङ्कामपनयतीति २ पु॰ पा॰ ।

णिक इति । तत्त्वानामपि प्राणादिवद् मनुष्यसंबन्धित्वादिति भावः ।
ननु विधिश्रवणमसिद्धं मनसैवेति तृतीयावधारणाभ्यां मनोन्वयव्यतिरेक-
प्रदर्शनपराभ्यां तदन्वयव्यतिरेकानुविधायित्वेनोपासनानुवादप्रतीतेः । सुषुप्त्यु-
त्क्रान्त्यधिकरण*विषयवाक्यभूतनिष्प्रपञ्चप्रत्यगभिन्नब्रह्मप्रकरणमध्यपतितमन-
सैवानुद्रष्टव्यमित्येतदनन्तरं नेह नानाऽस्ति किं चन मृत्योः स मृत्यु-
माप्नोति य इह नानेव पश्यतीति भेदनिषेधाम्नानेन च विरुद्धस्योपासना-
विधानस्याङ्गीकर्तुमयुक्तत्वाच्चेत्याशङ्क्याह **तत्रान्वयव्यतिरेकेति** । अन्व- २०१ । ३०
यव्यतिरेकांशेऽनुवादत्वेऽपि तव्यप्रत्ययश्रवणादुपासने विधिरङ्गीकर्तुं
शक्यः । अनुवादत्वेऽपि सत एवानुवाद इति विध्युन्नयनमुपपद्यते विश्व-
जित्सर्वपृष्ठ इति सर्वताविधावनूद्यमानं तदाश्रयपृष्ठविध्युन्नयनवद् अभेदप्र-
करणेऽपि तत्प्रतिपत्त्युपायतयोपासनाविधिर्युज्यते । तत्रैव प्रकरणे यज्ञादि-
विधेः संन्यासविधेश्च दर्शनादिति भावः । **शेषग्रहणमिति** । तेनान्नम-
यादीनां पञ्चसंख्यानां मनुष्यसंबन्धिनामपि नात्र ग्रहणमसंनिहितत्वादिति
द्योत्यते । ज्योतिःप्राणमन्त्रयोरर्थान्तरपरत्वेन शर्कराञ्जनविध्यर्थवादरीत्या
पञ्चजनवाक्यशेषत्वाभावेऽपि संनिधानमात्रमस्ति सूत्रे तावदेव विवक्षित-
मित्यपि द्योत्यते । **अपिधायेति** । रूढिव्यवस्थापनावन्तौ नातिदृढावित्यु-
पेक्षेत्यर्थः । अत एव विवक्षितोपसर्जनन्यायातिरेकप्रदर्शनस्थले तद्रूढौ
रूढ्यैव संपादनीयमित्यभिप्रेत्य टीकायामत्र तावद्रूढौ सत्यां न योगः संभ-
वतीति वक्ष्यत इति वक्ष्यमाणा रूढिः स्मारिता । **प्रौढ्या तु रूढिमिति** ।
प्राणादिष्विति शेषः । ननूद्भेदनमूर्ध्वविदारणमनेन क्रियत इति योगं प्रदर्श्य
खनित्रादौ प्रसिद्धिः संपादनीया सा पशुफलस्योद्भेदनं प्रकाशनमुत्पादनं वा
कुर्वति यागेऽपि संपादयितुं शक्येत्याशङ्क्याह **नामत्वे चेति** । **मत्वर्थ-
लक्षणेति** । न च नामत्वपक्षेऽप्युद्भिन्नामकत्वार्थे लक्षणाया जघन्यत्वा-
दिति भावः । **वैरूप्यापातादिति** । प्रतियोगिभेदेन साध्यत्वसाधनत्व- २०८ । ९
योरविरोधेऽप्येकस्य यजेः साध्यसाधनोभयावस्थासमर्पकत्वं न संभवतीति
भावः । **अतः** स्वरूपेणोपस्थितस्यैव यजेर्यथार्हं तेन तेनान्वयः स्यादित्या-
शङ्क्याह **विध्यावृत्त्येति** । यत्पाञ्चजन्यया विशेन्द्रे घोषा असृक्षतेत्यत्रस्यार्थः

* व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ ४४ ।

कथितस्तेन पञ्चजनसंबन्धिन्याः प्रजाया मनुष्यत्वोक्त्या पञ्चजनशब्देनेह मनुष्याणां ग्रहणमित्युक्तं भवति । तच्च पञ्चसंख्या चतुरो वर्णानन्तरप्रभवत्वेनैकीकृता न तु लोमप्रतिलोमांश्चापेक्ष्य योजनीया । **यत्पूर्वार्द्धे इति ।** यस्मा*दर्वाक् संवत्सरो ऽहोभिः परिवर्त्तते इति पूर्वार्द्धम् । **षष्ठ्यन्तज्योतिषेति ।** श्रुतौ बहुवचने सत्यप्यत्र सूत्रे चैकवचनं ज्योतिष्ट्वेनैकीकृत्य अन्यथा हि पञ्चसंख्यातिरेकः स्यादिति† ॥

२०९ । ४ **कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥**

परेति । कारणश्रुतीनामिव कार्यश्रुतीनामपि विरोधस्या‡त्रैव समाधेयत्वे ऽपि द्वितीयाध्याये परकर्तृकदोषसाम्यापादनप्रसक्तौ तत्समाधानम् ।

बाधे दृढे ऽन्यसाम्यात् किं दृढे ऽन्यदपि बाध्यताम् ।
क्व ममत्वं मुमुक्षूणामनिर्वचनवादिनाम् ॥

इति खण्डनकरीतिमवलम्ब्यानिर्वचनीयवादिभिरपि तत्समाधानप्रक्रियाया नोदासितव्यम् । तथा सति तत्त्वनिर्णयासिद्धिप्रसङ्गादिति शिष्यबोधनार्थमत्रैव तत्समाधाने कृते तद्विषयस्फुटबोधोदयासंभवादित्यर्थः ।

क्वाचित्कस्येति । क्वाचित्कप्रधानवादप्रतिपादनच्छायापन्नवाक्यगतिनिरूपणमेव पादार्थो न भवति किं तु ब्रह्मवादविरोधिवादमूलच्छायापन्नं क्व चित्क चि§दाम्नातं यद्यावद्वाक्यमस्ति तस्य सर्वस्य गतिनिरूपणं पादार्थः । अत एवोत्तराधिकरणद्वये जीववादमूलच्छायापन्नवाक्यगतिनिरूपणमपि क्रियतइति भावः । ननु पूर्वाधिकरणत्रयइवात्र क्वाचित्कवाक्यगतिनिरूपणं न क्रियते किं तु सर्ववेदान्तव्यापिब्रह्मप्रमाणत्वाभावप्रसक्तौ तत्समाधानम् । इदं तु समन्वयाधिकरणसन्निधौ संगतं न त्वत्र । किं चाग्रिमाधिकरणद्वयमपि विवक्षितरीत्या ऽत्र संगमयितुमयुक्तम् प्रधानसमर्पणाभासवाक्यगतिनिरूपणार्थपरः संदर्भः प्रवर्त्ततइति प्रतिपादयता पादारम्भ-
,, । १६ भाष्येण विरोधादित्याशङ्क्याह **अथ वेति । कर्मकर्त्रभिधानादिति ।** न च कर्मण्ययं लकारः स्यादिति शङ्क्यम् । तथात्वे कर्त्राक्षेपगौरवप्रसङ्गात् ।

---

* तस्मादिति २ पु॰ पा॰ । † अत्र तृतीयं संख्योपसंग्रहाधिकरणं पूर्णम् ।

‡ विरोधस्येति २ पु॰ पा॰ । § क्व चिदिति सकृदेव २ पु॰ ।

न च कर्मकर्तरि लकारे ऽप्येष दोषस्तुल्यः अलूयत केदारः स्वयमेवेत्यत्र सत्येवान्यस्मिन् लवनकर्तरि सौकर्यातिशयेन कर्मणः साध्वसिश्छिनत्तीत्यत्र करणस्येव कर्तृत्वविवक्षणात् ।

क्रियमाणं तु यत् कर्म स्वयमेव प्रसिध्यति ।
मुख्यस्य स्वगुणैर्युक्तं कर्मकर्तेति तं विदुः ॥

इति शब्दाभियुक्तवचनादिति वाच्यम् । कर्मकर्तृविवक्षायां कर्त्रन्तराक्षेपनियमाऽभावात् । महाभाष्ये कर्मणः कर्तृत्वरूपस्य स्वातन्त्र्यस्य किं सतो विवक्षा उत विवक्षामात्रमिति विमृश्य सत इति पक्षं परिगृह्य तत्र भिद्यते कुसूलेनेत्युदाहृत्य तत्राप्यन्ये भेदनकर्तारो वातवृष्ट्यादयो* ये ऽकालाः† सन्तीत्याशङ्क्य वातवृष्ट्यभावे चिरकालकृतस्य कुसूलस्य भेदने नान्यः कर्ता ऽस्तीति तत्रैवोक्तत्वाच्च ।

स्वयंकर्तृकत्वान्यकर्तृकत्वाभ्यां सर्गे इति । ननु स्वयंकर्तृकत्वे विगानाऽनुवृत्तौ कथं स्रष्टृर्यविगानम् । न च स्वयंकर्तृकत्वपक्षे स्वयमेव कर्ता ऽस्तीति तत्राऽविगानसिद्धिः । न हि स्रष्टृमात्रे इहाऽविगानं विवक्षितं किं तु सर्वज्ञत्वसर्वेश्वरत्वादिविशिष्टे स्रष्टरि । अग्रे भाष्यटीकयोस्तथैवाऽविगानप्रदर्शनात् । किं च कर्मकर्तरि लकारेण प्रपञ्चस्य स्वव्यापारं भवनं प्रत्येव कर्तृत्वं सिध्यति न तु तत्प्रयोजकव्यापारं भावनरूपं सर्गं प्रतीति न तेन स्रष्टृमात्रे ऽप्यविगानसिद्धिः । लूयते इत्यत्रापि केदारस्य स्वव्यापारं द्विधाभवनं प्रत्येव कर्तृत्वमर्थो न तु प्रयोजकव्यापारं द्विधाभावनं प्रति । यथोक्तं कैयटेन लुनातिस्तावद् द्विधाभावनोपसर्जने द्विधाभवने वर्तते । लुनाति केदारं देवदत्तः द्विधा भवन्तं द्विधा भावयतीत्यर्थः । यदा तु केदारस्य सौकर्यातिशयविवक्षायां देवदत्तव्यापारो न विवक्ष्यते तदा द्विधाभवनमात्रे लुनातिर्वर्तते अनेकार्थत्वाद् धातूनां भिन्ना एव वा धातवो भिन्नार्थाः सारूप्यात्तु तत्त्वाध्यवसायः तत्र द्विधाभवने केदारस्य कर्तुः कर्मवत् कर्मणा तुल्यक्रिय इति कर्मकार्याण्यतिदिश्यन्ते । तेन लूयते केदारः स्वयमेवेत्यादयः प्रयोगा उपपद्यन्ते इति । एवमन्यकर्तृकत्वपक्षे ऽप्यसत्कर्तृकत्वं सत्कर्तृकत्वं वेत्यान्तरालिकविवादसत्त्वान्न विवक्षितरूपविशिष्टे स्रष्टृर्यविगानसिद्धिः । तस्मात् स्वयंकर्तृकत्वान्यकर्तृकत्वविगानानुवृत्तिमभ्युपेत्य स्रष्टृर्यविगानवचनमयुक्तमिति चेत् । २१० । ६

---

* वातातपवृष्ट्यादय इति ५ पु· पा· । † प्रकाला इति ५ पु· पा· ।

अत्रायमाचार्याणामाशयः । व्याक्रियतेति कर्मकर्तृलकारेण सृज्यस्य प्रपञ्चस्य प्रपञ्चात्मना कर्तृत्वमुच्यतइति न पूर्वपक्षः किं तु तदात्मानं स्वयमकुरुत बहु स्यां प्रजायेयेत्यादिश्रवणात्परमेश्वरस्यैव प्रपञ्चभावेन परिणाम इति तदभेदं सिद्धं कृत्वा प्रपञ्चस्य परमेश्वरात्मना स्वकर्तृत्वमुच्यतइति । एवं श्रुत्यन्तरार्थसिद्धवत्कारसूचनार्थमेव पूर्वपक्षे* तन्नामरूपाभ्यां व्याक्रियतेत्यादीनीत्यादिग्रहणं कृतम् । ततश्च स्वयंकर्तृकत्वविगानानुवृत्तावपि स्रष्टृविगानमस्तीति तद्वचनमुपपन्नम् । अन्यकर्तृकत्वकोटिरसद्वादनिराकरणे प्राक्प्रवृत्तानन्दमयाधिकरणा†दिपर्यालोचनमेवात्रापि यथाव्यपदिष्टोक्तेरिति हेतुना पुनः प्रवर्तितया ऽसत्कर्तृकत्वकोटि‡र्निरस्तेति ब्रह्मपरमेश्वरकर्तृकत्वपर्यवसायिनीति तस्यामपि कोटौ स्रष्टृविगानवचनमुपपन्नम् । एवमन्यकर्तृकत्वकोटेः स्रष्टृविगानपर्यवसानमसद्वादनिराकरणसापेक्षमिति तन्निराकरणमिति श्लोके संगृहीतम् । तन्निराकरणं च यथाव्यपदिष्टोक्तिहेतुनैव सिध्यतीत्याविष्कर्तुमेवाग्रे तन्निराकरणप्रपञ्चनानन्तरं कारणत्वेनेति सूत्रं व्याख्याय स्वयंकर्तृकत्वनिराकरणं समाकर्षसूत्र§तात्पर्यविषयत्वाभिप्रायेण तदनन्तरं कृतम् ।

२११ । २५ **कर्मकर्तरि कर्मणि वेति** । कर्मणीति पक्ष एव युक्ततरः । अव्याकृत‖मासीदिति कर्मण्येव निष्ठान्तस्य प्राक् प्रयोगात् । एकविषययोः प्रागव्याकृतं पश्चाद्व्याक्रियतेति प्रयोगयोः प्रागच्छिन्नं वनमिदानीमच्छिद्यतेति प्रयोगयोरिवैकार्थपरत्वावश्यंभावात् । न ह्यव्याकृतमित्यपि कर्मकर्तरि प्रयोग इति वक्तुं शक्यम् । अनेनाव्याकृतमिति तृतीयाप्रसङ्गात् । कर्मणः कर्तृत्वविवक्षायां हि धातोरकर्मकत्वाद्भावे निष्ठेति कर्तुरनभिधानात् तृतीययैव भाव्यम् । न च कर्मकर्तरि कर्मणि वा लकारेण कर्त्राक्षेपे ऽपि सकर्तृश्रुत्यन्तरानुसारात् प्रपञ्चाभिन्नं स्यादिति स्वकर्तृत्वशङ्का तदवस्थेति वाच्यम् । आरम्भणाधिकरणादिषु¶ परिणामवादस्य निराकरणीयत्वादिति भावः । एवं तर्ह्यानन्दमयाधिकरणा**दिनिर्णीतार्थस्यारम्भणाधिकरणादिनि-

* पूर्वेति नास्ति २ पु॰ ।
† व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ १२ ।
‡ असत्कर्तृकत्वकोटिरिति नास्ति ५ पु॰ ।
§ व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ १५ ।
‖ प्रागव्याकृतमिति २ पु॰ पा॰ ।
¶ व्या॰ सू॰ अ॰ २ पा॰ १ सू॰ १४ ।
** व्या॰ सू॰ अ॰ १ पा॰ १ सू॰ १२ ।

णीतार्थस्य च पर्यालोचनेनैवासत्कर्तृकत्वपरताशङ्कायाः परिणामवादावलम्बनस्वकर्तृकत्वपरताशङ्कायाश्च निरसनसम्भवान्निरालम्बनपूर्वपक्षमिदमधिकरणमिति चेत् । सत्यम् । तथाप्यसदादिशब्दश्रवणमात्रसंतुष्टः सांख्यः कारणवाक्येषु परस्परविरोधं तेषामनिर्णायकत्वं चोद्घाट्य स्मृतिन्यायाभ्यामेव जगत्कारणं निर्णेतव्यमिति मन्यमानस्तदनुसारेणैव पूर्वापरवाक्ययोजनायां प्रयतते तदनुशयनिराकरणार्थमिदमधिकरणम् । अत एव भाष्ये पूर्वपक्षोपसंहारवाक्यं स्मृतिन्यायप्रसिद्धिभ्यां तु कारणान्तरपरिग्रहो न्याय्य इति । अतो मिथ्याभूतायां सृष्टौ विगानं न दोष इति । अकल्पितवस्तुप्रतिपत्त्युपायतया कल्प्यमाने विगानं क्व चिदपि न दोषः । यथा तात्त्विकारुन्धतीप्रतिपत्त्युपायतया नानापुरुषैः कल्प्यमानायां तत्प्राच्योदीच्यादिनक्षत्ररूपायां स्थूलारुन्धत्या यथा वा रेखागवयन्यायेन नित्यशब्दप्रतिपत्त्युपायतया नानाव्याकरणैः परस्परभिन्नप्रकृतिप्रत्ययविभागेन कृत्रिमशब्द इति भावः* ॥

जगद्वाचित्वात् ॥ १६ ॥ २१२ । १३

हैरण्यगर्भेति । ननु किमिह हैरण्यगर्भं मतं विवक्षितम् । सत्यलोकादिप्राप्त्यर्थं हिरण्यगर्भ उपास्य इति मतमिति चेद् न । सिद्धान्तेऽपि श्रुतिषु तत्र तत्र तदुपासनस्याङ्गीकृतत्वेन तस्यासाधारण्येन हैरण्यगर्भमतत्वाभावात् । अधिकरणस्य ब्रह्मवादविरोधिकृन्मतनिरासार्थत्वाभावे विषयवाक्यस्य हिरण्यगर्भोपासनापरत्वनिरसनमात्रेण विवक्षितपादसंगत्यलाभाच्च । हिरण्यगर्भ एव मुमुक्षुभिरुपास्यं परं ब्रह्मेति मतमिति चेद् न । पूर्वपक्षे तदनुवादस्य सिद्धान्ते तन्निरसनस्य चाप्रदर्शनात् । हिरण्यगर्भस्य परब्रह्मपरत्वमङ्गीकृत्यैव परिच्छिन्नफलकतदुपासनापरत्वस्य पूर्वपक्षावसरे प्रदर्शनादिति चेत् । उच्यते । उपन्यस्तो हिरण्यगर्भपूर्वपक्षोऽयम् । अजातशत्रोर्भ्रान्तत्व†मृषावादित्वदोषपरिहारार्थं हिरण्यगर्भ एवोपक्रान्तं मुमुक्षूपास्यं परं ब्रह्मास्त्विति हैरण्यगर्भमतमादाय परिष्कर्तुं शक्यतइति कक्षान्तरे तत्पर्यवसायो भवेद् अतस्तन्मतनिरसनमपि कर्मशब्दे योगव्यवस्थापनादिना तन्मतोपस्थापकं लिङ्गमिह नास्तीति प्रदर्शनेन विवक्षितमित्या-

---

* अत्र चतुर्थं कारणत्वाधिकरणं पूर्णम् ।

† भ्रान्तत्वेत्यसमञ्जसः पाठः १ पु० ।

चार्याणामभिप्रायः । अत एव तस्य मतस्य द्योत्यत्वमेवोपन्यस्तं नानुवाद्यत्वम् ।

२१३ । ३ **जीवाज्ज्ञे इति ।** परकीय उपालम्भकश्लोकः । अध्यारोपापवादाभ्यां यन्निष्प्रपञ्चं वेदान्तानां प्रतिपिपादयिषितं तत्र खलु तेषां समन्वयः । एवं च वाचस्पतिमते जीवएव समन्वयः पर्यवस्यति तन्मते जीवाश्रिताविद्यापरिणामस्य प्रपञ्चस्य जीवे ऽध्यारोपेण तत्रैवापवदनीय*त्वात् । अतो जीवे समन्वयं पूर्वपक्षीकृत्य निरस्यन् वाचस्पतिः कथं न लज्जितवानित्यर्थः । **सकारणमिति ।** कारणशब्दः सूक्ष्मभूतपरः अविद्यापरो वा तस्या अपि प्रवाहाऽनादिभ्रमकल्पितत्वात् । **अधिष्ठानं हीति ।**

अधिष्ठानं विवर्त्तानामाश्रयो ब्रह्म शुक्तिवत् ।
जीवाविद्यादिकानां स्यादिति सर्वमनाकुलम् ॥

इति प्रागेवाचार्यैर्वाचस्पतिमते ब्रह्मणः सजीवाविद्यासकलप्रपञ्चाधिष्ठानत्वमुक्तमिहानुसंधेयम् ।

पूर्वपक्षत्वादिति । नन्वसद्वादवदस्य निराकरणं न दृश्यतइति चेत् । दृश्यतएव मृषा वै खलु मा संवादयिष्ठा इति । तर्हि मृषावादित्वेन बालाकिमपोद्य स्वयमप्यजातशत्रुरब्रह्मोपदिशति चेत् सो ऽपि मृषावादी स्यादिति चेद् न । बालाकिवद् ब्रह्मोपदिशामीत्युपक्रम्य ब्रह्मोपदेशे हि मृषावादित्वं स्यात् तदुपक्रमाभावे कुतो मृषावादित्वप्रसङ्गः । ब्रह्मोपदेशार्थं प्रवृत्तस्य बालाकेरब्रह्मोपदेशाद् मृषावादित्वेन निरसनानन्तरं स्वयमब्रह्मोपदेशे का संगतिरिति चेत् । एषा संगतिः । त्वदुक्तं तावत् किमपि ब्रह्म न भवति अहमपि ब्रह्म न पश्यामि अत इदानीं फलार्थिना त्वया हिरण्यगर्भ एव वेदितव्य इति । दृश्यते हि रसवादिनं ब्रवाणीति प्रतिज्ञातवतो-दाहृतान् पुरुषान् विप्रलम्भकत्वादिनतत्स्वरूपोपन्यासेन प्रत्याख्याय ततः परमुदाहरणीयपुरुषाभावात् तूष्णींभूते तस्मिन् प्रतिवक्ता स्वयमपि रसवादिनमपश्यता राजेव धनार्थिनोपसर्पणीय इत्युच्यतइति ।
,, । २५ **न भ्रान्तो ब्रह्मोपक्रम इति ।** ब्रह्म ते ब्रवाणीति प्रतिज्ञावाक्येन ब्रह्मोपक्रान्तमित्येतद् न

---

* अथ वदनीयेति २ पु. पा. ।

बाधितमित्यर्थः । तदेवोत्तरवाक्यगतेन लिङ्गेन द्रढयति **सहस्रमिति । दत्तत्वादिति ।** प्रतिश्रुतं दत्तप्रायम् । यद्वा आशंसायां भूतवत्क्तः । दातु- २१३ । २
माशंसितत्वादित्यर्थः । एवं ब्रह्मोपक्रमसिद्धौ गार्ग्यस्य भ्रान्तत्वे ऽपि यस्य कस्य चिद् वाक्येनास्मिन् प्रकरणे ब्रह्म निर्णिनीषितमित्यवसीयते अन्यथा ब्रह्मोपक्रमोपाख्याननिबन्धनस्य प्रकृतविद्यानुपयोगितापाताद् वैश्वानरविद्यादिषु प्राचीनशालादीनां भ्रान्तत्वे ऽपि वैश्वानराद्युपक्रमस्य प्राकरणिकतत्तन्निर्णयार्थत्वदर्शनाच्च । तथा च लौकिकरसवादवचनादिदृष्टान्तो ऽत्र न क्रम इति तात्पर्यम् ।

उपसंहारे इति । अनन्यथासिद्धौपसंहारिकजीवनिर्णयानुसारेण ब्रह्मोपक्रमस्तदभेदाभिप्रायेण योजनीय इति भावः । जीवपूर्वपक्षो ऽयं जीवोपासनाविधिविषयो न भवति किं तु परब्रह्मवज् ज्ञेयो जीवः प्रतिपाद्य इत्येतद्विषयः । अत एवास्मिन् पूर्वपक्षे प्रथमपूर्वपक्षइव पादसंगतिर्न प्रदर्शिता समनन्तराधिकरणे वक्ष्यमाणेव सा ऽत्राप्युन्नेतुं शक्येत्यभिप्रायात् । अन्यथा पूर्वाधिकरणसंगतिवत्पादसंगतिरपि पृथगुच्येत । अत एव च जीवे समन्वयनिरसनमयुक्तमिति परकीयोपालम्भः प्राग् दर्शितः । जीवोपासनाविधिपरत्वमात्रेण हि जीवे* समन्वयो न प्रसज्यते अन्यथा पञ्चाग्निविद्यादीनां तत्समन्वयप्रसङ्गात् । **लाक्षणिक इति ।** धर्माधर्मलक्षणया हि वेदितव्यस्यादित्यादिपुरुषकर्तृत्वं कीदृशं विवक्षितमित्याकाङ्क्षायामपूर्वद्वारकं विवक्षितमित्याकाङ्क्षितार्थसमर्पकतया प्रकृतोपयोगि भवति न परिस्पन्दपरतायामिति लक्षणैव ज्यायसीति भावः ।

सप्तमीप्रथमाभ्यामिति । क्व प्राणे इति सप्तमी क्वैष इति २१४ । १
प्रथमा प्रतिवचने प्राणवाक्ये ऽप्यन्वयिनी । तथा च सुषुप्ताधारः प्राणो वेदितव्यः पुरुषो न सुषुप्त इति भावः । जीवपूर्वपक्षे तु प्राकरणिकजीवव्यतिरेकनिर्देशं निरस्य वाक्यं योजनीयम् । क्वैष इति प्रश्नस्य प्राणे इति प्रतिवचनं न संभवति किं तु हिता नाम नाड्य इति नाडीः प्रक्रम्याम्नातं तासु तदा भवतीति वचनं कदेत्याकाङ्क्षायां यदा सुप्तः स्वप्नं †न कं चन पश्य-

---

* मात्रेणापि जीवे इति २ पु॰ पा॰ ।

† सुप्तं स्वप्नमिति १ पु॰ ।

तीति तच्छेषः। अथास्मिन् प्राण एवैकधा भवतीति प्राणशब्दनिर्दिष्टे नाडीस्थे जीवे करणमण्डलस्य लय उच्यते तदेनं वाक् सर्वैर्नामभिः सहाप्येतीत्याद्यग्रिमविवरणदर्शनात् । स यदा प्रतिबुध्यतइति प्राणशब्दनिर्दिष्टस्य प्रबोधोपन्यासाच्चेति । तामेतां योजनामभिप्रेत्य भाष्यटीकयोः प्राणभृत्त्वेन जीवस्य प्राणशब्दवाच्यत्वमुपपादितं व्यतिरेकनिर्देशो जीवनाडीविषयः । अतो जीव एव वेदितव्य इति योजना तावदयुक्ता । तथा सति वेदितव्यस्वरूपस्यैव प्रष्टव्यतया तदाधारप्रश्नाऽयोगात् । न च तस्य नाड्याधारत्वेन पापाऽस्पृष्टतया वेदितव्यत्वोपपादनार्थमाधारप्रश्न इति वाच्यम् । तथा सति पापास्पर्शस्यापि वक्तव्यत्वापत्तेः । न च सौषुप्तिकनाडीः प्रविष्टस्य पापाऽस्पर्शः तं न कश्चन पाप्मा स्पृशति तेजसा हि तदा संपन्नो भवतीति छान्दोग्यप्रसिद्धत्वान्नोक्त इति वाच्यम् । क्वैष एतदिति प्रश्नानन्तरं तदु ह बालाकिर्न विजज्ञावित्युक्तत्वेन सुषुप्तौ* नाडीप्रवेशमेवाऽजानतो बालाकेस्तत्प्रवेशकृतपाप्मास्पर्शप्रसिद्ध्यभावात् । तस्माज्जीवाधारो वेदितव्यः पुरुष इति प्रतिपादनार्थ एव स प्रश्नः । एवं च तासु तदा भवतीत्येतन्न तदुत्तरं नाडीनां वेदितव्यपुरुषत्वाभावात् । तत्तु ता हि प्रत्यवसृप्य पुरीतति शेते इति श्रुत्यन्तरानुसारेण हृदयावच्छिन्नब्रह्मप्राप्तेर्मार्गोपदेशपरम् । द्वितीयप्रश्नः करणग्रामाधिकरणविषय इत्यपि न युक्तम् । क्वैष एतद् बालाके †पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागादिति प्रश्नत्रये ऽपि प्रथमप्रश्ननिर्दिष्टस्यैव कर्तुरन्वयप्रतीत्या कर्त्रन्तराध्याहाराऽयोगात् । तथा सति प्रथमद्वितीयप्रश्नयोः पुनरुक्तिः स्यादिति चेद् न । द्वितीयप्रश्नस्य प्राण एवैकधा भवतीत्युत्तरानुसारेण तादात्म्येन भवनविषयत्वाद् निर्देश इति सिद्धवत्कृत्य हिरण्यगर्भपूर्वपक्षे पर्यवसानं कृतम् । कुत एतदागादित्यपादानप्रश्नस्यापि कुतस्तादात्म्यभवनाधिकरणादागत इत्यर्थपरिग्रहे ऽस्यैव साफल्यस्योपपादनीयत्वात् । यच्च धर्मिणि शयितस्तत आगादिति स्वत एव ज्ञातुं शक्यत्वेनापतिता हि तन्नैष्फल्यशङ्का तादात्म्यभवनाधिकरणस्यालौकिकत्वेनाऽसंभावितत्वात्तद्दृढीकरणार्थस्तथाभूताधिकरणादागमनप्रश्न इत्युपपादनेन परिहरणीया ।

* सुप्ताविति १ पु० पा० । † एतद्वा लोके इति २ पु० पा० ।

तदेनं वागिति । अत्रैतत्पदं प्राणपरामर्शि तस्य सप्तम्यन्तनिर्दिष्टत्वे २१५ । १
ऽपि प्रतिपिपादयिषितत्वेन प्राधान्यात् । ततश्च वाक्चक्षुःश्रोत्रमनसां सर्वैः
स्वस्वविषयैः सहाप्ययोक्तौ जीवस्यापि मनोविषयत्वान्मनउपाधिकत्वाद्वा
तस्मिन्नप्यय उक्तो भवतीति शयनप्रश्नोत्तरत्वलाभः । शयनप्रश्नस्योत्तरा-
न्तराऽदर्शनात् तदेनमित्यादेस्तदनुत्तरत्वे भवनापादानोत्तरद्वयमध्याम्ना-
तस्य तस्य वैफल्यप्रसङ्गाच्च । एवमेवैतस्मादात्मन इत्यादेः सामान्यमुखेन
जीवोद्गमनापादानप्रश्नोत्तरत्ववत्तदेनं वागित्यादेरपि सामान्यमुखेन जीवशय-
नाधिकरणत्वस्य प्रबोधे तदुद्गमनापादानत्वस्य चासंभवाच्चेति भावः । **आत्म-
शब्दादपीति** । आप्लृ व्याप्ताविति धातुतादात्म्यशब्दादित्यर्थः । **निर्णीता-
र्थवाक्ये इति** । रूढिमभ्युपेत्य तद्बाधनार्थमेवमुक्तिः । वस्तुतस्तु परि-
स्पन्दे विशिष्य शक्तिर्नाभ्युपेया बर्हिराज्यादिशब्दानां संस्कृतेष्विव द्वितीयातृ-
तीयादिशब्दानां तिथिविशेषेष्विव च योगरूढ्या सामान्यशक्त्यैव तत्र प्रयोग-
निर्वाहे विशिष्य शक्त्यन्तरकल्पनस्य गौरवपराहतत्वात् । किं च परिस्पन्दे
विशिष्य शक्त्यन्तरकल्पने परिस्पन्दाऽनपेक्षयोर्मानसपुण्यपापयोरपि कर्मशब्द-
प्रयोगसत्त्वेन तत्रापि विशिष्य शक्त्यन्तरस्य कल्पनीयतया रूढिद्वये परस्परं
कलहायमाने लब्धोन्मेषेण योगेन कर्ममात्रोपस्थितिः संभवतीत्यपि द्रष्टव्यम् ।

अर्थात्सूचनाज्ञानादिति* । नन्वर्थात् सूत्रेण सूचितमर्थं जानतां २१६ । १८
सूक्ष्मधियां वा कथमिदं प्राणपूर्वपक्षनिराकरणसमर्थमिति धीः स्याद् यष्टिघा-
तादिना हि व्यष्टिप्राणान्यत्वं स्याद् न तु समष्टिप्राणाभिमानिदेवतारूपहिर-
ण्यगर्भान्यत्वमपि । न चामन्त्रणे बृहद्विशेषणेन तल्लाभः । व्यष्टेरपि चक्षु-
राद्यपेक्षमहत्त्वसत्त्वात् सुषुप्तिदशायामुपरतव्यापारेभ्यः शरीरेन्द्रियेभ्यो ऽन्यत्वं
सुज्ञानमिति तस्यामपि दशायामनुपरतव्यापाराद् व्यष्टिप्राणादन्यत्वज्ञापने-
नैवामन्त्रणादेः साफल्यस्योपपादनीयत्वाच्चेति चेत् । सत्यम् । अभ्युच्चययु-
क्तिरियम् । अत एव भाष्ये ऽपि तथैवोक्तम् । एवं वाजसनेयशाखायां
प्राणशब्दस्थाने आकाशशब्दाम्नानमभ्युच्चयान्तरम् । स हि परमात्मनि
प्रसिद्धो न हिरण्यगर्भे । इदमप्याकाशशब्दश्चेति भाष्येण सूचितम्† ॥

* आर्थार्थात्सूचनादिति २-५ पु॰ पा॰ ।

† अत्र पञ्चमं जगद्वाचित्वाधिकरणं बालाक्यधिकरणं वा पूर्णम् ।

२१७ । ३ **वाक्यान्वयात् ॥ १९ ॥**

वाक्यसंदर्भं व्याख्यातीति । पतिः प्रियो भवतीत्यादिभिर्वाक्यैः पत्यादीनां प्रेमविषयत्वोक्तिः कथं तेषु वैराग्योत्पादनीत्यादिशङ्कानिरासायेत्यर्थः । पतिजायादिवाक्येषु वैशब्दः प्रसिद्ध्यनुवादकः । प्रसिद्धं ह्येतत्तत्रापि मैत्रेयि पत्यादयो जायादीनां पत्यादिप्रयोजनाय प्रिया न भवन्ति किं तु स्वप्रयोजनाय । अत एव तेषु स्वेष्टसंपादकत्वदशायामिव स्वानिष्टसंपादकत्वदशायां न प्रेमा । अतः सोपाधिकं प्रियत्वमेतेषामात्मन एव निरुपाधिकमिति पतिजायादिवाक्येषु परिहारप्रक्रिया । टीका स्पष्टेति न विवृता । यद्येवं तर्हि पत्यपेक्षया स्वात्मनः प्रियत्वं मैत्रेय्याः स्वानुभवसाक्षिकं प्रसिद्धं तद्दृष्टान्तेनोत्तरवाक्यानामपि प्रसिद्धार्थविषयतया सिद्धिः इत्येवं निरुपाधिकप्रेमास्पदत्वं जीवलिङ्गमेव पर्य्यवसितम् । एतदनुसारेण श्रवणादिवाक्यगतस्याप्यात्मशब्दस्य जीवविषयत्वं प्राप्नोतीति कथमिदं पूर्वपक्षलिङ्गं सिद्धान्तोपपादकतया टीकायां लिखितं जीवलिङ्गमेवेदम् अमृतत्वोपक्रमादिवशात् प्रातर्दनन्यायेन* परमात्मनि पर्य्यवस्यतीत्याशयेनैतदुपन्यस्तम् । अत एव प्रातर्दननयेन गतार्थतामाशङ्क्येत्यवतारिकाग्रन्थः ।

विदितं भवतीति वाक्यशेष इति टीकाग्रन्थेन भवतिमात्रस्याध्याहारो विवक्षितो विदितमित्यस्य श्रुतावाम्नानादित्याह **विदितमित्यस्यानन्तरमिति । अनात्मदृष्टाविति ।** आत्मव्यतिरिक्तस्तात्त्विकः प्रपञ्च इति दृष्टावित्यर्थः । एवं च यो ऽन्यत्रात्मन इति वाक्येषु प्रथमार्थे त्रल्प्रत्ययो द्रष्टव्यः । समं समाधानमन्यत्राभिनिवेशाद् अन्यत्र भीष्माद्गाङ्गेयादित्यादिलौकिकप्रयोगेष्वपि हि तस्य प्रथमार्थएव स्वारस्यं दृश्यते । एवं प्रथमार्थपरिग्रहएवाग्रिममिदं ब्रह्मेदं क्षत्रमिमे लोका इमे वेदा इमानि भूतानि इदं सर्वं यदयमात्मेति सामानाधिकरण्यवाक्यं समञ्जसं भवति ।
,, । १९ **नियोज्यत्वाविर्भावनेनेति ।** ब्राह्मणादिजातिभेददर्शनं न साक्षान्मोक्षाद् भ्रंशयति किं तु टीकोक्तं ब्राह्मणो ऽहमित्याद्यभिमानमपेक्ष्य सो ऽपि ब्राह्मणादिकर्मणि नियोज्यत्वाधिकारित्वबुद्धिमपेक्ष्य तया हि बुद्ध्या संसा-

---

§ व्या· सू· अ १ पा· १ सू· १८ ।

रिक्तफलकर्मानुष्ठानेन साक्षात्पुरुषः प्रच्युतो भवतीत्यभिप्रेत्य नियोज्यत्वा-
दिभावनापर्यन्तोक्तिः ।

दुन्दुभिवाक्यमात्मैव प्रपञ्चस्य तत्त्वमित्यत्रोपपत्तिपरतया स्पष्टं न
प्रतीयतइत्याशङ्क्य व्याचष्टे **यथा* लोके इति** । नन्वक्लिष्टमर्थान्तरमस्य वर्ण- २१७ । २२
यितुं शक्यम् । दुन्दुभौ हन्यमाने ततो बहिर्निःसरतः शब्दान् न कश्चि-
दपि निरोद्धुं शक्नुयात् किं तु दुन्दुभेर्निरोधेन तदाहन्तृपुरुषनिरोधेन वा
दुन्दुभिशब्दो निरुद्धो भवतीति । सत्यम् । इतो ऽप्यक्लिष्टतरम् अर्थान्तरं
वर्णयितुं शक्यम् । दुन्दुभौ हन्यमाने बाह्यान् दुन्दुभिशब्दव्यतिरिक्तान्
मानुषादिशब्दान् दुन्दुभिशब्दाभिभूतान् ग्रहीतुं न शक्नुयाद् दुन्दुभेस्त-
दाहन्तृपुरुषस्य वा निरोधेन मानुषादिशब्दो गृहीतो भवतीति । अत्र हि
बाह्यशब्दः सफलः । बहिर्निःसरत इत्यर्थवर्णने तु निष्फलः दुन्दुभिशब्दे
ततो बहिर्निस्सरणस्य स्वाभाविकत्वेन वाक्याभावात् । न च चोरादेरिव
शब्दस्य निरोधो ऽस्ति । उत्पत्त्यभिव्यक्तिप्रतिबन्धस्तु न निरोध इति
प्रसिद्धः । पूर्वापरपरामर्शानुसारेणार्थवर्णने तु प्रकृतः सार्वात्म्योपपादकदा-
र्ष्टान्तिकानुगुण एवार्थो वर्णनीयो न प्रकृतानुपयोग्यर्थान्तरम् । ननु दुन्दुभि-
हननानुवृत्तौ दुन्दुभिशब्द इवेन्द्रियव्यापारानुवृत्तौ बाह्यार्थप्रत्ययो निरोद्धुं न
शक्यते । तस्मादात्मदर्शनार्थिना तद्विरोधी बाह्यार्थप्रत्यय इन्द्रियनिरो-
धेन तद्विजृम्भणहेतुमनोनिरोधेन वा निरोद्धव्य इत्यक्लिष्टार्थवर्णनस्यापि
प्रकृतोपयोगित्वमुपपादयितुं शक्यमिति चेत् । एवमेव दुन्दुभिशब्देन प्रति-
बन्धे सति मानुषादिशब्दो ग्रहीतुं न शक्यतइति तदग्रहणाय दुन्दुभिनि-
रोधकं यथा ऽपेक्ष्यते एवं बाह्येन्द्रियव्यापारेण प्रतिबन्धे सत्यात्मस्वरूपं
ग्रहीतुं न शक्यतइति तन्निरोधकमपेक्ष्यतइति दार्ष्टान्तिककल्पने प्रकृतोप-
योगित्वमक्लिष्टतरार्थवर्णनस्यापि कल्पयितुं शक्यमेव । किं त्विदं सर्वं यद-
यमात्मेत्यव्यवहितपूर्ववाक्यप्रकृतार्थोपपादकदार्ष्टान्तिककल्पनया तदनुगुण-
दृष्टान्तपरत्ववर्णनमेव युक्ततममित्यलं विस्तरेण ।

दुन्दुभ्याघातसंज्ञक इति । वीरादिरससंयुक्तो दुन्दुभ्याघात उच्य- ,, । २५
ते इति वार्तिककाराः । **धूमग्रहणमिति** । एतदुक्तं भवतीत्याद्यग्रिमटीकायां

* स यथेति २ पु॰ पा॰ ।

धूमस्थाने विस्फुलिङ्गोपन्यासात् तदुपलक्षणत्वोक्तिः । **अथर्वाङ्गिरसोऽन्त इति ।** अथर्वाङ्गिरस इत्येतदन्त इत्यर्थः । **देवयजनविद्येति ।** देवविद्या देवताकाण्डविचारितो यज्ञाङ्गदेवतास्वरूपसमर्थको* वेदभागः । यजनविद्या इष्टिपशुसोमादिविधिप्रपञ्चः ।

२१८ । ११ **अर्थादर्थसृष्टिरुक्तेति ।** यद्यपि षष्ठे मैत्रेयीब्राह्मणे सूत्राण्यनुव्याख्यानानीत्येतदनन्तरमिष्टं हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानीति रूपप्रपञ्चसृष्टिरपि कण्ठत एवोक्ता पृथक्कर्मप्रपञ्चसृष्टिरप्यधिकोक्ता । तदनुसारेण केषु चिद् भाष्यकोशेषु नामरूपकर्मप्रपञ्चकारणतां व्याचक्षाण इति कर्मग्रहणमपि दृश्यते । तथापि चतुर्थे मैत्रेयीब्राह्मणे भाष्यकारैर्विषयवाक्यत्वेनोदाहृते इष्टं हुतमित्याद्यनाम्नानादेवमुक्तिः । एवं चतुर्थे मैत्रेयीब्राह्मणे यथार्द्रैधाग्नेरभ्याहितादिति पञ्चम्यन्ताम्नाने सत्यपि टीकायामभ्याहितस्येति षष्ठमैत्रेयीब्राह्मणगतषष्ठ्यन्तपाठलेखनं पञ्चम्यर्थे षष्ठ्याविति तद्व्याख्यानं च षष्ठ्यन्ताम्नातस्यापि प्रसङ्गादस्यैवार्थनिर्णयो भवत्वित्यभिप्रेत्येति द्रष्टव्यम् ।

नन्वधिकरणाऽनारम्भशङ्कावसरे सिद्धान्तभाष्यव्याख्यानस्य का सङ्गतिरित्याकाङ्क्षायामाह **सिद्धान्त एवेति ।** सिद्धान्तस्य स्फुटत्वाद् न पूर्वपक्षो ऽस्तीति खल्वत्र शङ्का क्रियते अतः सिद्धान्तस्फुटत्वोपपादनसमये सिद्धान्तभाष्यव्याख्यानस्य प्रासङ्गिकी सङ्गतिरित्यर्थः । **यथा सैन्धवेति ।** स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेतेत्यादिचतुर्थमैत्रेयीब्राह्मणगतदृष्टान्तोक्तिपूर्वकवाक्येनेत्यर्थः । सैन्धवखिल्यवाक्यात् प्राचीनं स यथा सर्वासामित्याद्येकायनवाक्यजातमप्यात्यन्तिकलये प्राकृतलयं दृष्टान्ती-
,, । १४ कर्तुं प्रवृत्तमिति टीकार्थं दर्शयन्नवतारयति **आत्यन्तिक इति ।** नन्वात्यन्तिकलये प्राकृतलयो दृष्टान्तश्चेत् सर्वेषां स्पर्शानामित्यादिना दृष्टान्तमुक्त्वेति वक्तव्यं कथं सर्वासामपामित्यादिना दृष्टान्तमुक्त्वेति टीकाग्रन्थ इत्याशङ्क्य सर्वासामित्यादिप्राकृतलयदृष्टान्तवचनमप्यात्यन्तिकलयदृष्टान्तोपपादकतया तद्दृष्टान्तकोट्यन्तर्भूतमिति ततः प्रभृति दृष्टान्तवाक्यतया टीकायामुपात्तमित्याशयेनाह **समुद्रे अपां लय इति ।**

* स्वरूपसमर्पक इति पाठान्तरम् ।

ननु त्वगादिवाक्यजातं वा कथमात्यन्तिकलयदृष्टान्तवचनं स्यात्
तेन हि सर्वासामपामित्यादिदृष्टान्तोक्तिपूर्वकमिन्द्रियाणां स्वस्वविषयायतन-
त्वमुच्यते न तु ब्रह्मणः प्राकृतप्रपञ्चचयाधारत्वमित्याशङ्क्य व्याचष्टे **तत्र** २१८ । १७
हीति । सर्वासामपामित्यादिदृष्टान्तवचनेन समुद्रस्य नद्यादिसकलचयाधा-
रत्वमुच्यते यथा नद्यः स्यन्दमाना इत्यादिश्रुत्यन्तरेषु तथैव समुद्रस-
लिलदृष्टान्तवर्णनदर्शनात् । ततश्च तदनुसारेण दार्ष्टान्तिकवचने त्वगादि-
शब्दैः स्पर्शादिसामान्यानि लक्षयित्वा तेषु तद्विशेषाणां लयप्रतिपादनद्वारा
क्रमेण परमकारणे ब्रह्मणि स्पर्शादिसामान्यानामपि लयप्रतिपादने तात्पर्यं
वर्णनीयम् प्राकृतस्य लयस्यापि परमकारणपर्यन्तताया: श्रुत्यन्तरेषु पुरा-
णेषु च प्रतिपन्नत्वादिति भाव: । **एवं वा अरे इति** । इयं श्रुतिरौपाधिक-
खिल्यभावनिवृत्त्या लवणं समुद्रभावमिव जीवो ब्रह्मभावं प्राप्नोतीति धर्म-
विशेषघटितसादृश्यप्रतिपादकयथैवंशब्दयोगात् सैन्धवखिल्यवाक्योक्तदृष्टा-
न्तस्य दार्ष्टान्तिकशब्दाभावादेकायनवाक्यजातोक्तदृष्टान्तस्य दार्ष्टान्तिकं
त्वर्थगत्येति विशेष: । अमृतत्वोपक्रमात् तदुपपादनादिति हेतुद्वयं तद्वि-
षयश्रुत्युदाहरणेन स्फुटीकरोति **येनाहमिति** । **आख्यातप्रतिरूपक-
मिति** । अत एव जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षतीत्यादय:
प्रयोगा: । **अनुवाद्यविधेययोरिति** । सत्यप्यभेदे भेदेनापि भाव्यम्
अत्यन्ताभेदे अनुवाद्यविधेयभावाऽयोगादित्याश्मरथ्यादिमतमिह मुख्य:
पूर्वपक्ष इत्यर्थ: । **प्रतिज्ञासिद्धयइति** । सर्वविज्ञानप्रतिज्ञा त्वभेदांशे-
नोपपादनीया न तु भेदांशेन इत्यनुपयोगाद् भेदांशोऽत्र न परामृष्ट
इत्याश्मरथ्यमतम् । **वृद्धवैशेषिकदृष्ट्येति** । गौतमसूत्रे ऽप्यनादे: संसा-
रस्य निवृत्तौ प्रागुत्पत्तेरभावनित्यत्ववदिति प्रागभावनिवृत्तिं दृष्टान्तीकृत्य
प्रागभावाऽसंप्रतिपत्तावनादिभावनिवृत्तौ दृष्टान्तेन भाव्यमित्यनुशये चाणु-
श्यामतानित्यत्ववद्वेति परमाणुश्यामतानिवृत्तिदृष्टान्तेनानादिभावनिवृत्तिर-
भ्युपगता । **अर्थसाम्यात्त्विति*** । यथा नद्य इत्यादिर्मुण्डकोपनिषन्मन्त्रो २२० । २
यथेमा नद्य: स्यन्दमाना: समुद्रायणा: समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते
त्वासां नामरूपे समुद्र इत्येव प्रोच्यतइति प्रश्नोपनिषद्वाक्यम् । अस्य मन्त्र-

---

* अर्थसामर्थ्यात्त्विताति २. ३ पु. ।

पूर्वोद्दिष्टार्थसाम्यादित्यर्थः । **आत्मानं जानात्विति*** **शङ्कायामिति** कर्माभावदूषणमात्रोद्धारेण शङ्का । तथापि करणाभावं स्वयमेव प्रकाशमानस्य ज्ञानकर्मताऽनपेक्षां चोद्घाट्याथ परिहारः ।

२२० । १७ **आत्मैवाभूदिति ।** इदं दूषणद्वयमुपलक्षणम् । केन कं विज्ञातारमिति विशेष्यत्रये ऽप्यन्त्यन्तभिन्नत्वविशेषणाध्याहारगौरवप्रसङ्गाच्चेत्यपि द्रष्टव्यम् । एतेन यत्र यस्यामवस्थायां द्वैतं स्वतन्त्रमिव भवति तदानीं स्वतन्त्र इतरः स्वतन्त्रं वस्त्वन्तरमनुभवति । यदा तु सर्वं ब्रह्मपरतन्त्रं प्रकाशते तदा कश्चेतनः करणेन कं स्वतन्त्रमर्थमनुभवेदिति केषां चिद्यत्र हि द्वैतमिवेत्यादिवाक्यार्थकल्पनमप्यध्याहारगौरवेणैव निरस्तम् । किं च षष्ठे स्वप्नावस्थायां जीवस्य स्वयंज्योतिष्ट्वे सुषुप्त्यवस्थायां तस्य बाह्याभ्यन्तरवेदनराहित्ये चोक्ते कथं ज्योतिःस्वरूपस्य वेदनराहित्यमिति शङ्कायां विषयाभावाद् न तु द्रष्टृस्वरूपाया दृष्टेर्विपरिलोपा†दित्येतत्प्रतिपादनार्थं प्रवृत्तेषु यद्वैतन्न पश्यति पश्यन्वैतन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वाद् न तु तद् द्वितीयमस्ति ततो ऽन्यद्विभक्तं यत् पश्येदित्यादिवाक्येषु श्रुतं द्वैतं तावत् स्वातन्त्र्येण विशेषयितुं न शक्यते सुषुप्तौ स्वतन्त्रस्येव परतन्त्रस्यापि द्वैतस्य प्रतीत्यभावात् । ततश्च तेषु श्रुतं द्वितीयमपि तेन विशेषयितुं न शक्यते द्वैतमात्रप्रतीत्यभावस्य द्वैतविशेषाभावेनोपपादयितुमशक्यत्वात् । एवं च तदनन्तरश्रुते यत्र वा अन्यदिव स्यात् तत्रान्यो ऽन्यत् पश्येदन्यो ऽन्यद् जिघ्रेदित्यादिवाक्ये अन्यदपि स्वातन्त्र्येण विशेषयितुं न शक्यते सुषुप्तौ यस्य विषयस्य व्यतिरेकात्प्रतीत्यभाव उक्तः तस्यैव स्वप्नजागरयोरन्वयात् प्रतीतेर्वक्तुमुपक्रान्तत्वात् । एवं च सुषुप्तावस्थाविषयोदाहृतवाक्यसमानप्रकारकेषु मुक्तावस्थाविषयेष्वपि वाक्येषु स्वातन्त्र्यविशेषणं विवक्षितुमयुक्तमिति ।

२२१ । ४ **बहुप्रमाणदृष्टिरिति ।** अवश्यम्भावोक्त्या अस्मिन्विषये श्रुतिस्मृतिरूपबहुप्रमाणदर्शनं सूचितमिति भावः । विरोधादित्युक्तं हेतुं पक्षान्तरे बाधकोपन्यासेनोपपादयति **अविरोधश्चेदिति ।** यद्यविरोधस्तर्हि

---

* विजानात्विति २ पु· पा· । † विलोपादिति ३ पु· पा· ।

भेदाङ्गीकारे ऽप्यत्यन्ताभेदः प्रकारविशेषानपेक्ष्याभेदः स्याद् विरोधे हि
केन चित्प्रकारेण भेद इति भेदोपाधिप्रकारं परिहृत्य तदन्येन प्रकारेणा-
ऽभेद इति वक्तव्यं स्यात् तथा च भेदः कथं निविशताम् । यदुच्येत
विरोधाभावाद् भेदाभेदौ गन्धपृथिवीत्ववदसंकरोपपादकप्रकारभेदाऽनपेक्षौ
निवेष्टुमर्हत इति तर्ह्येकस्यामेव व्यक्तौ गन्धवती पृथिवीति गन्धपृथिवीत्व-
बुद्धोरिव घटो भवति घटो न भवतीति बुद्ध्योरपि समावेशः स्यात् तद-
दर्शनात् तयोर्व्यवस्थितघटपटादिविषयत्वस्यैव च दर्शनाद् गन्धपृथिवी-
त्वयोरिव न भेदाभेदयोरविरोध इत्यर्थः ।

भास्करग्रन्थेषु विरुद्धयोरपि समबलयोरपि भेदाभेदयोरसंकरोपपादनं
कृतं भेदो घटशरावादिकार्यात्मना अभेदस्तावदनुवृत्तमृदादिकारणात्मनेति
तन्निरस्यति **भेदाऽभेदव्यवस्था चेदिति । भेदवाद एव स्यादिति*।** २२१ । १९
भेदाभेदयोराश्रयभेदवाद एव स्यादित्यर्थः । ननु कार्य्यकारणयोर्नात्यन्तं
भेद इष्यते किं त्वत्यन्तभेदे ऽत्यन्ताऽभेदे वा ऽनुपलभ्यमानाद् मृद् घटः
हिरण्यं कुण्डलमित्यादिसामानाधिकरण्याद् भेदाऽभेदे इष्येते तथा च कार्याणां
भेदः कारणमपि स्पृशति कारणस्याभेदः कार्याण्यपि स्पृशति अतो भेदाऽभे-
दयोर्नात्यन्तिकाश्रयभेद इति तन्मतमाशङ्क्य निरस्यति **सामानाधिकरण्यं
यदिति । यावत्कार्यमवस्थायेति** प्रकृताऽविद्योपाध्यभिप्रायेणोक्तम् । अल-
क्तकादौ तु यावत्कार्यमवस्थानं न नियतं बहुषु स्फटिकेषु सत्सु रक्तं स्फटिक-
मानयेति स्फटिकान्तरव्यावृत्त्यर्थं विशेषिते सत्यानयननियोगकालमात्रे ऽल-
क्तकसन्निधानेनापि तद्व्यावर्त्तनफलसिद्धेः । उपाधिपदप्रयोगलभ्यं स्वसंनिहिते
स्वधर्मप्रतीत्याधायकत्वमेवोपाधेर्विशेषणोपलक्षणव्यावृत्तं रूपम् । **कादाचि-
त्कतयेति ।** कादाचित्कत्वं कार्यकालाऽवस्थाननियमाभावः । तेन काकस्य
यावद्गृहगमनकालं कदा चिदवस्थितावप्युपलक्षणत्वमेव । उपाधितस्तूपल-
क्षणस्य भेदः परत्र स्वधर्मप्रतीत्यनाधायकत्वरूपो द्रष्टव्यः । **त्वया ऽपि लिङ्ग-** २०२ । २
शरीरेति । भास्करमते जीवब्रह्मणोरभेदः स्वाभाविकः भेदस्तु बुद्धी-
न्द्रियदेहोपाधिकृत इष्यते । तत्र बुद्ध्यादिषु विशेषणत्वादिचोद्यमुपाधित्वेन
तत्परिहारवचनं चेत्युभयमपि समानम् । वस्तुतस्तु तन्मते परिहारो न

---

* व्यवस्थावाद एव स्यादिति ३ पु॰ पा॰ । मूले ऽप्येवं पाठद्वैविध्यं दृश्यते ।

लगति उपाधिप्रयुक्तस्य संसारस्य स्फटिकरक्तिमवदारोपितत्वनियमादिति भावः । **नन्वैक्यसिद्धाविति ।** गुहानिहितस्य ब्रह्मणश्चैक्ये खलु यत्नेन भानाऽभानसमर्थनं कार्यम् । जीवभानात् तदभिन्ने ब्रह्मणि भासमाने गुहानिहितमन्यदिष्यतामिति शङ्कार्थः । **व्याघातादिति ।** जीवस्य तदाश्रितमोक्षस्य च कृतकत्वे नित्यत्वं व्याहतमित्यर्थः*। **विकत्थनं** निरर्थकं वचः । **भागवत्त्वमात्रमिति ।** भेदकोपाध्यधीनसत्यभागवत्त्वमात्रमित्यर्थः । **संस्थानभेद इति ।** तथा च नद्या अवयवसन्निवेशविशेषरूपेण अवयविरूपेण स्वारम्भकपरमाणुरूपेण वा समुद्राभेदप्राप्त्यभावे ऽपि समुद्रप्राप्तौ नद्यवयविनाशात्तदीयनामरूपप्रहाणमस्तीत्येतावत्यंशे श्रुतौ नदीसमुद्रदृष्टान्तः । अत एवास्तं गच्छन्तीत्येव दृष्टान्तभागे श्रवणमिति भावः* । शब्दश्रवणाऽयोग्यत्व†विशेषणं सत्यत्वोपपादनार्थमित्याह **शब्देति ।** प्राप्ताऽप्राप्तविवेकेनेत्यादिग्रन्थं व्याचष्टे **नेम्याकारेति ।**

२२४ । ७ **अनवस्थेति शङ्कां परिहरतीति ।** एवं च कृत्स्नस्य प्रपञ्चस्य कल्पितत्वे यथा कार्यलिङ्गकपूर्वपूर्वश्रोत्रानुमितिरूपभ्रमतत्संस्कारप्रवाहकल्पितमुत्तरोत्तरश्रोत्रं कार्यजनकम् एवं श्रुतिजन्यसृष्टितत्क्रमादिविषयाऽनादिपूर्वशाब्दज्ञानसंस्कारप्रवाहकल्पितं वियदादिकं तत्तत्सृष्टिवाक्याद्यालम्बवतां विवक्षितमिति द्रष्टव्यम् । अनयैव रीत्या मीमांसकैरपि वक्तृविवक्षारूपतात्पर्यावधारणं वेदार्थनिर्द्धारणोपयोगीति पक्षमुपपादयद्भिर्वेदाभिमानिदेवतानां तत्तन्न्यायसंप्रदायाभिज्ञमीमांसकयाज्ञिकानां च तत्तद्वाक्यार्थनिर्द्धारणाधीनतत्तदर्थप्रतिपादनेच्छारूपं तदिति समर्थितम् । वक्तृविवक्षारूपतात्पर्यज्ञानं वेदार्थनिर्द्धारणे कारणमिति तदाधारतयेश्वरसिद्धिमिच्छतो नैयायिकान् दूषयद्भिरपि तैः तत्तद्वाक्यार्थनिर्द्धारणाधीनपूर्वपूर्वमीमांसकयाज्ञिकविवक्षाप्रवाहेणान्यथासिद्धिरुक्ता । यथाहुः ।

तथर्ग्वेदादयो वेदाः प्रोक्ता ये च पृथक्पृथक् ।
भोग्यत्वेनात्मनां ते ऽपि चैतन्याऽनुगताः सदा ॥

---

* भावत्वमित्यादिमात्रमित्यर्थ इति ग्रन्थ एतदग्रे दृश्यते २ पु· ।

† श्रवणयोग्यत्वेति २ पु· ।

तेषामन्तर्गतेच्छानां वाक्यार्थप्रतिपादने ।
विवक्षा चाविवक्षा च ज्ञायते शब्दशक्तितः ॥

इति न्यायेन संप्रदायेन ये मीमांसकयाज्ञिका वेदं व्याचक्षते तेषामभिप्रायो ऽयमुच्यतइति । य एवं विद्वान् साम्ना स्तुवीतेत्यादिविधिषु यच्छब्दानूदिताऽविधीयमानकर्मकर्तृप्रसिद्धिर्यजमानो वा आहवनीय इत्याद्यर्थवादेषु वैशब्दानूदिता स्तुत्यालम्बनतत्तदर्थप्रसिद्धिश्च पूर्वपूर्वतत्तद्वाक्यार्थावगतिमूलैवोत्तरोत्तरतत्तद्वाक्यार्थावगतेरालम्बनमित्युपपादनीयमित्येतादृशान्युदाहरणान्यन्यत्रानुसंधेयानि ।

अथ नैकैकस्येति । यद्यपि प्रवाहानादित्वनिर्वचनासंभवे ऽपि भ्रम- २२४ । १८
संस्कारोपाधिकं सत्त्वमित्युक्त्वा ऽर्थस्य न क्षतिः सर्वदा यस्य कस्य चित्सं-
स्कारजातीयस्य सत्त्वात् । दर्शितं च तन्निर्वचनमाचार्यैरध्यासग्रन्थे । सर्वस्य
प्रपञ्चस्य संस्कारोपाधिकं सत्त्वमिति पक्षे संस्कारे का गतिरिति चेत् ।
शब्दानुमानमूलकस्य सकलसंस्कारविषयतया तद्विषयस्यापि सतः संस्कार-
स्यानुवृत्त्या तदप्युपपद्यतएव । तथापि मायायामनुपपत्तिरलंकार इति न
मायावादे अत्यन्तमुपपादनार्थं प्रयतितव्यमिति व्युत्पादनाय शङ्केयम् ।
अस्तु वेति प्रतीकोपादानानन्तरं नोपपद्यते ऽर्थः परमार्थसत्त्वं यस्याः सा
तथेति पाठः साधुः । निरुपाधिकभ्रमविषयेष्वेव सत्त्वं प्रातीतिकमिति
नियमः श्रोत्रं तु न तथेति स्वयं परिहारान्तरमाह **कर्णनेमीति ।** कर्णने-
म्यवच्छिन्नं नभः श्रोत्रमिति नैयायिकादिमते तदवच्छिन्ना दिक् श्रोत्रमिति
कौमारिलमते च तदवच्छेदोपाधिकस्यांशस्य दृष्टान्तीकरणमुपपद्यते । स दृष्टान्तः
स्वसिद्धान्तसंमतो न भवतीति स्वयं युक्त्यन्तरमाह **आरभ्यमिति । सां-
शत्वतः** सावयवत्वतः । यद्यपि सावयवत्वमपि भेदाऽभेदतत्समुच्चयविकल्प-
दूषणेन दूषितप्रायं तथापि स्वमते सत्यो भाग इति व्यावहारिकसत्यत्व-
स्यैव कथनात् स न दोष इत्याशयः । **सत्यश्च संभवेदिति ।** संभाव- ,, । २३
नार्थेन लिङा जीवस्य ब्रह्मांशत्वं परोक्तरीत्या परमार्थसत्यमिति कथमपि
संभावयितुं न शक्यते । मुक्तिदशायामभेदज्ञाननिवर्त्यस्य स्वाश्रयगताऽभेद-
रूपमुक्तिकालानुवृत्त्या ऽत्यन्ताभावप्रतियोगिनश्च संसारदशायां प्रतीतस्य

भेदस्य मिथ्यात्वाऽनतिलङ्घनादिति द्योतितम् । **अहं वेदेति** । सूक्तद्रष्टुरहमिति परामर्शः* ॥

२२५ । १ **प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥**

व्यवहितसंबन्धाऽपौनरुक्त्ये फले इति । व्यवहितेन जन्माद्यधिकरणेन संबन्धः । तेनैवापौनरुक्त्यं च । **पादसंगतिरिति** । बालाक्यधिकरण†प्रथमसंगतिग्रन्थानुसारिणीयं संगतिः । **अद्वैताव्यासेधकत्वाच्चेति** । तद्व्यासेधकत्वे हि लक्ष्यसमर्पकब्रह्मशब्दोपात्तवस्त्वपरिच्छेदात्मकलक्ष्याकारविपरीताकारोपस्थापकं लक्षणं लक्ष्ये संभवदपि विवक्षितलक्ष्याकारानुगुणत्वेन तदव्यापनदोषदुष्टं स्यादिति भावः । **समन्वयावसान इति** । बालाक्यधिकरणद्वितीयसंगतिग्रन्थे यत्प्रतिज्ञातं प्रकृताधिकरणस्याध्यायावसाने लेखनिमित्तं वक्ष्यतइति तदनेन दर्शितम् । **समन्वयो दुष्प्रतिपाद इति** । जगत्कारणब्रह्मणि समन्वय इत्यर्थः । कथं प्रतिज्ञादृष्टान्तयोजनेति शङ्कायामयं परिहाराभिप्रायः । ब्रह्मज्ञानेन वियदादेः सर्वस्य मृत्पिण्डलोहमणिनखनिकृन्तनज्ञानैर्घटशरावकटकमुकुटखनित्रकुद्दालादीनां च तत्तज्ज्ञानानन्तरमपि संशयविषयत्वेनानुभूयमानानां मुख्यवृत्त्या ज्ञातत्वासंभवाद् गौणत्वं त्वया ऽप्यास्थेयमिति । **प्रधानपरौ**‡ प्राधान्याभिप्रायौ । अनुमानबाधादिति पूर्वपक्षलिखितान्यनुमानानि । **अस्त्वागमो निमित्तपर**§ **इति** । तथा च नानुमानवृन्दस्यागमबाध इति भावः ।

२२६ । ७ **कार्यस्य विवर्तत्वेनेति** । तथा च सद्रूपस्य ब्रह्मणः प्रपञ्चतादात्म्यं सदात्मना सन् घट इत्यादिप्रतीतिषु भासतइति सदात्मना ब्रह्मज्ञानं सदात्मना प्रपञ्चतत्त्वविषयमपि भवति एवं मृत्पिण्डस्वर्णमणिनखनिकृन्तनरूपोपादानतादात्म्यं घटादिषु मृत्सुवर्णकालायसात्मना मृद् घटः सुवर्णं कुण्डलं कालायसं खनित्रमित्यादिप्रतीतिषु भासतइति तेन तेन कार्यानुविद्धेन मृदादिरूपेण मृत्पिण्डादिज्ञानं तेन तेन रूपेण तत्तत्कार्यविषयमपि भवति । न हि प्रपञ्चतादात्म्यापन्नं सद् घटादितादात्म्यापन्नं मृदादिकं वा तत्तदुपादानातिरिक्तं येन सन्मृदाद्यात्मना ब्रह्म मृत्पिण्डादि-

* अत्र षष्ठं वाक्यान्वयाधिकरणं पूर्णम् । † व्या॰ सू॰ अ॰ १ पा॰ ४ सू॰ १६ ।
‡ प्राधान्यपराविति ३ पु॰ पा॰ । § निमित्तत्वपर इति ४ पु॰ पा॰ ।

ज्ञानं तेन तेन रूपेण तत्तत्कार्यविषयं न स्यात् । ननु भवेदेवं मृत्पिण्डा-
दीनां घटाद्युपादानत्वे तदेव नास्ति घटादीनामिव पिण्डादीनामपि
मृदादिकार्यविशेषत्वाद् घटादिषु पिण्डाद्याकारानुवृत्त्यभावाच्च सर्वमृण्मया-
दीनामेकैकमृत्पिण्डादिकार्यत्वस्य कथमप्युपपादयितुमशक्यत्वाच्च । तथा च
दृष्टान्तभागस्योपादानाऽविषयतया दार्ष्टान्तिकवाक्यस्यापि तद्विषयता न
युक्तेति चेद् न । मृत्पिण्ड एव घटः कृत इत्याद्यबाधितव्यवहारेण
मृत्पिण्डादीनां घटादिकार्यान्तरोपादानत्वाद् मृत्पिण्डादिगतमृत्त्वादिरूपाकिं-
चिदाकारानुवृत्तेर्घटादिषु सत्त्वाद् उपादानगतयावदाकारानुवृत्तिनियमस्य
क्षीरादिकार्येषु दध्यादिषु व्यभिचारात् सर्वं मृण्मयमित्यादिषु सर्वशब्दाना-
मेकैकमृत्कूटादिकार्यपरत्वात् । तस्माद् दृष्टान्तानुसारेणापि दार्ष्टान्तिकवा-
क्यस्योपादानविषयत्वं युक्तमेव ।

ननु पञ्चमी न कारणमात्रे स्मर्यतइत्ययुक्तं ज्ञापकेन तत्सिद्धिरित्या-
शङ्क्य तत्तात्पर्यमाह **ज्ञापनेनेति*** । ननु नैतद्युक्तं पाणिनीये ज्ञापकयोगवि- २२६ । ११
भागलभ्यस्य व्याकरणान्तरे प्रत्यक्षविधानावश्यम्भावात् तद् दृष्ट्वैव व्याख्यातॄणां
ज्ञापकाद्यन्वेषणप्रवृत्तेः पाणिनीयस्यैव वेदार्थनिर्णयोपयोगित्वादित्याशङ्क्य
ज्ञापकस्यान्यथासिद्धिमाह **अपि चेति** । हेतुग्रहणमगुणवचनाद्धेतुपञ्चम्या
न ज्ञापकं तस्य विभाषा गुणे ऽस्त्रियामिति सूत्रविहितां गुणवचनेभ्यः
पञ्चमीमादाय चारितार्थ्यात् । जाड्यादागतं जाड्यरूप्यमिति तदुदाहरणसं-
भवात् । वस्तुतस्तु हेतुमनुष्येभ्य इति सूत्रे हेतुत्वं न पञ्चम्यर्थविशेषणं
येन हेतौ पञ्चम्यन्वेषणीया स्यात् किं तु मनुष्यवाचित्वमिव हेतुवाचित्व-
मपि प्रातिपदिकविशेषणम् । एवं च हेतुवाचिभ्यो मनुष्यवाचिभ्यश्च
प्रातिपदिकेभ्यस्तत आगत इत्यर्थे रूप्यप्रत्ययविधिः । तत आगत इत्य-
धिकारसूत्रे च तत इत्यपादानपञ्चमी तत्रापि मुख्यं यदपादानं विवक्षितं
तद् ग्राह्यं न तु नान्तरीयकम् । अत एव स्रुघ्नादागच्छन् मध्ये वृक्षमूले
स्थित्वा ततोऽप्यागत इत्येतावता तत आगत इत्यर्थे स्रौघ्न इतिवद्
वार्क्षमूल इति तद्धितो न भवति । एवं च यः स्वहेतुभूताज्जन्मभूम्यादे-
रपादानादागतः यश्चाहेतोरमनुष्याद् देवदत्तादेरपादानादागतस्तत्रोभय-

* ज्ञापकेनेति२-५ पु॰ पा॰ ।

षापि हेतुवाचिनो मनुष्यवाचिनश्च प्रातिपदिकाद्रूप्यप्रत्ययविधायकस्यास्य सूत्रस्य हेतुपञ्चमीज्ञापकतायाः कथमपि न प्रसक्तिः । नन्वस्य सूत्रस्य हेतुपञ्चमीज्ञापकत्वाभावे ऽपि विभाषा गुणे ऽस्त्रियामिति सूत्रे योगविभागादगुणवचनेभ्यो ऽपि हेतुपञ्चमी भविष्यतीति चेद् न । योगविभागाऽनपेक्षणात् । पुत्रात्प्रमोदो जायते पश्चिमाद्यामिनीयामात्प्रसादमिव चेतनेत्यादिप्रयोगाणां निमित्ते ऽप्यन्तरङ्गकारणत्वज्ञापनार्थम् अपादानत्वारोपेण निर्वाहात् । समनन्तरापत्ये ऽपि गोत्ररूपाध्याहारेण रामो जामदग्न्य इति गोत्रापत्यविहितष्यञ्प्रत्ययदर्शनाद् धूमवत्त्वादित्यादिपञ्चमीनिर्वाहः । हेतुपञ्चमीसद्भावे वा कथं तन्निर्वाहः । न हि धूमवत्त्वं वह्नेः कारणं ज्ञापकं तु स्यात् । न ज्ञापके पञ्चमीविधानमस्ति । तस्मात् तदशिष्यं संज्ञाप्रमाणत्वाद् लुब्योगाप्रख्यानादिति सूत्रकारप्रयोगाज् ज्ञापके पञ्चम्याः साधुत्वम् । कारकहेतौ तु हेताविति सूत्रेण तृतीययैव भाव्यम् । अस्तु वा कारकहेतावपि पञ्चमी । तथापि कारकविभक्तेर्बलीयस्त्वादिहापादानपञ्चम्येव । जनिकर्त्तुरिति पुत्रात्प्रमोदो जायतइत्यादिपञ्चमीसंग्रहार्थं प्रकृतिपदं कारणसामान्यपरमिति व्याख्यानमयुक्तं तथा सति कारकइत्यधिकृतस्य पदस्य कारणसामान्यवाचिनो निर्द्धारणसप्तम्यन्तस्यानन्वयप्रसङ्गात् । न हि कारणानां मध्ये यदुपादानकारणमितिवत्कारणानां मध्ये यत्कारणमित्येतदन्वितार्थं भवति ।

२२६ । १९ **कार्यकारणाऽभेदसूचनादिति ।** न च यथा ऽग्ने यन्मे तनुवा ऊनं तन्म आपृणेति मन्त्रे यन्मे प्रजायै पशूनामूनं तन्म आपूरयेति वावैतदाहेति तदर्थप्रदर्शकब्राह्मणानुसारेण यजमानस्य स्वस्मिन् प्रजापश्वभेदोपचारवद् ब्रह्मणः स्वस्मिन् सत्यमाणतेजःप्रभृत्यभेदोपचारः स्यादिति शङ्कनीयम् । प्रतिज्ञातसर्वविज्ञानोपपादनार्थं प्रवृत्ते प्रपञ्चे तथोपचारकल्पनाऽयोगात् । **श्रौतावधारणेति ।** ननु श्रुतावेवकारार्थ उपादानान्तराभावः कथं साक्षात्पदेन तदशक्तेन प्रदर्श्यते । उच्यते । उभयाम्नानादित्येतावति सूत्रणीये साक्षादिति विशेषणमुभयाम्नानवाक्ये तदनुवादेनान्यः कश्चिदर्थो मुख्यतया प्रतिपाद्यो ऽस्तीत्यवगमयति । कोऽसाविति विचारणायामेवकारघटितवाक्यस्यात्र ह्येवावपन्तीत्यादिवदितरव्यवच्छेदप्रधानत्वादुपादानान्त-

राभावो मुख्यतया प्रतिपाद्यो ऽवतिष्ठते तर्हि विषयवाक्यं ब्रह्मण उपादानत्वप्रतिपादकं न भवतीति सूत्रमपि तद्व्यवस्थापनार्थं न भवेत् तथा च कथमितश्च प्रकृतिर्ब्रह्मेति भाष्यमित्याशङ्क्याह **भाष्यइति ।** विषयवाक्यप्रतिपाद्यस्य प्रकृत्यन्तराभावस्य प्रकृतिग्रहणम् उपलक्षणमित्यर्थः । प्रकृत्यन्तराभावव्यवस्थापनस्यापि ब्रह्मणः प्रकृतित्वस्थिरीकरणं फलमिति फलाभिप्रायेण भाष्यमिति तात्पर्यवर्णने तु नोपलक्षणत्वं कल्पनीयम् । यद्वा प्रकृतिग्रहणमुपलक्षणमित्यात्मकृति*टीकाग्रन्थापेक्षितो भाष्यइत्यध्याहारो ऽनेन ग्रन्थेन दर्शितः । कथं च तद् ब्रह्मणो रूपमिति टीकाग्रन्थं ब्रह्मणि उपादानत्वाभावे तदभेदश्रवणं न घटेतेति व्यतिरेकप्रदर्शनार्थत्वेन योजयन्नेव यदीत्यादितदनन्तरग्रन्थम् अन्वयप्रदर्शनार्थत्वेनावतारयति **द्वे वा-** २२६ । २६
वेति ।

यद्यपि सच्च त्यच्चाभवदित्यभेदेन श्रुतमिति वक्तव्यं तस्यैव वाक्यस्य प्राक् प्रकृतत्वात् तथापि द्वे वाव ब्रह्मणो रूपे इति टीकावाक्येन स्मारिते द्वे वावेत्यादिवाक्ये षष्ठ्या पृथिव्यादिवाय्वादिरूपयोर्मूर्तामूर्तयोर्ब्रह्मभेदः प्रतीयतइति शङ्कानिरासाय तस्या अपि न भेदे तात्पर्यम् अथात आदेशो नेति नेतीति तदनन्तरवाक्ये ब्रह्मातिरिक्तमूर्तामूर्तनिषेधादिति दर्शयितुं तद्वाक्यमुपन्यस्तम् । कथं च तद् ब्रह्मणो रूपमिति टीकाग्रन्थस्य व्यतिरेकप्रदर्शनार्थत्वलाभाय यदि ब्रह्मोपादानं न स्यादिति शेषो ऽध्याहृतः । एवमध्याहारापेक्षव्यतिरेकप्रदर्शकवाक्यार्थस्याऽस्फुटस्य गम्यत्वाद्व्यतिरेकमुक्त्वेत्येतद्विहाय व्यतिरेकं सिद्धवत्कृत्येत्युक्तम् । यदि तस्य ब्रह्मोपादानमित्यन्वयप्रदर्शनस्यापेक्षितांशमध्याहरति **तर्ह्येवं रूपं स्यादिति शेष इति ।** रूपं स्वरूपमभिन्नमिति यावत् । यदि न तस्य ब्रह्मोपादानमिति केषु चित् टीकाग्रन्थेषु नकारयुक्तः पाठो दृश्यते तस्मिन्पाठे कथं चेत्याद्युपादानमित्यन्तमेकं वाक्यम् अध्याहारानपेक्षं व्यतिरेकमात्रप्रदर्शनार्थमिति द्रष्टव्यम् ।

योनिरितीति । पृथिवी योनिरोषधिवनस्पतीनामित्यादिप्रसिद्धिः २२७ । २
परिणामिविषयैव दृष्टेति भावः । **नासत इति ।** यदसत् तत्सर्वदेवासदिति

* व्या· सू· अ· १ पा· ४ सू· २६ ।

न स्यान्निष्पाद्यत्वं यत् सत् तत्सर्वदा सदिति निष्पत्त्यर्थप्रवृत्त्यानर्थक्यम् । ननु नित्यस्य निष्कलस्येति हेतुगर्भनिर्देशाभ्यां सिद्धस्यार्थस्य नित्यत्वादनेकदेशत्वादिति पुनः कीर्तनं व्यर्थमित्याशङ्क्य तद्विवरणमित्याह **हेतुगर्भनिर्देशयोरिति । यथाश्रुतमाश्रित्येति ।** अस्तु परिणामस्तथापि लौकिकपरिणामवदनिर्वचनीयत्वमायातीत्येवं प्रतिपादयतीत्यर्थः । संक्षेपशारीरके ऽप्येवमुक्तम् प्रतिष्ठिते ऽस्मिन् परिणामवादे स्वयं समायाति विवर्तवाद इति । **प्रधानानुरोधेनेति ।** यथा स्वर्गकामकर्तव्यज्योतिष्टोमप्रकरणमध्यपातिनः को हि तद्वेद यदमुष्मिन् लोके ऽस्ति वा न वेति परलोकसंदेहवाक्यस्य प्रधानाविरोधाय तदङ्गभूतातीकाशविध्यपेक्षितवस्तुस्तवनपरतया पामरजनसिद्धसंदेहानुवादकत्वम् एवमिहापि प्रधानप्रतिपाद्याऽद्वैतसिद्ध्यविरोधाय तदङ्गभूतप्रपञ्चनिषेधोपयिकतया भ्रान्तजनकल्पितपरिणामानुवादकत्वमित्यर्थः । **न चेति ।** यथा ह्यसत्यो घटाभावः सत्यं घटं सहते एवमनिर्वाच्यो विकारः स्वात्यन्ताभावं निर्वाच्यं सहते इत्यन्वयमुखेन सिद्धिः* ॥

२२८ । १ **एतेन सर्वे व्याख्याता व्याख्याताः ॥ २८ ॥**

अदृश्यमानगुणनिर्देशादिति न किं चन भगव इत्युक्तेरणुवादे सालम्बनत्वसिद्ध्यर्थमदृश्यमानत्वविशेषणम् । **अणिम्न इति सूक्ष्मता चोक्तेति ।** स य एषो ऽणिमेत्यादिसंप्रतिपन्नब्रह्मवाक्येष्विवेति भावः† ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ कल्पतरुव्याख्याने परिमले प्रथमस्याध्यायस्य चतुर्थः पादः समाप्तः ॥

संपूर्णश्च समन्वयाख्यः प्रथमो ऽध्यायः ॥

---

* अत्र सप्तमं प्रकृत्यधिकरणं पूर्णम् ।

† अत्राष्टमं सर्वव्याख्यानाधिकरणं पूर्णम् ।

अथ द्वितीयो ऽध्यायः ।

स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥ २२९ । १

सर्वज्ञेति । यः सर्वज्ञ इति श्रुत्या ब्रह्मण इव ज्ञानैर्बिभर्तीति श्रुत्या कपिलस्यापि सार्वज्ञ्यं प्रसिद्धम् अतः सर्वज्ञभाषितत्वं वेदसांख्ययोः सममित्यर्थः । ननु स्मृत्यन्तरेभ्यो निरवकाशत्वेन प्राबल्ये ऽपि श्रुतिभ्यः प्राबल्याभावात्कथं पूर्वपक्ष इत्यत्राह **पूर्वपक्षमाहेति** । वेदं कृत्वा वेदिमिति पदार्थधर्मक्रमविषयश्रुतितः क्षुतआचामेदिति स्मृतेः पदार्थविषयत्वेनैव सावकाशश्रुतितो ऽपि निरवकाशत्वेन स्मृतेः प्राबल्यं भवेदतः पूर्वपक्षो युक्त इत्याशयः ।

अर्थापहारेणेति । सर्ववेष्टनरूपस्मृत्यर्थापहारेण तन्मानभूतश्रुतेरप्यपहारात्तदनुमानं बाधितविषयमित्यर्थः । क्षुतनिमित्तकाशुद्ध्यपनयार्थमाचमनकरणे ऽपि न वेदवेदिक्रमविरोधः । आचमनस्य शुद्धिद्वारा वेदिकरणाङ्गत्वादङ्गस्य चाव्यवधायकत्वात् । उक्तं हि वार्तिके ।

> वेदं कृत्वा यदा वेदिमकृत्वा ऽऽचामति क्षुते ।
> वेदीमेव करोतीति स वक्तुं शक्यते तदा ॥
> वेदिरेव ह्यनाचम्य कुर्वतो विगुणीभवेत् ।
> तामेव सगुणां कर्तुं शुद्ध्या न व्यवधास्यते ॥ इति ।

सत्यपि व्यवधाने श्रौतस्मार्तसकलपदार्थप्राप्त्यनन्तरमेवानुष्ठानाय क्रमस्य संग्राह्यत्वात् पश्चात्संग्राह्यस्य पूर्वप्राप्त्यनुरोधेन संग्रहौचित्यान्न विरोधः । तदप्युक्तं वार्तिके ।

> प्राप्तेषु हि पदार्थेषु क्रमः पश्चादपेक्ष्यते ।
> यदा प्राप्तिष्वसौ क्लृप्तः केन पश्चाद्विरुध्यते ॥ इति ।

नन्वधिकरणारम्भे तटस्थेनाक्षिप्ते तदारम्भः सिद्धान्तिना समर्थ-

नीयः कथं पूर्वपक्षी समाधत्तइत्युक्तिरित्याशङ्क्य पूर्वपक्षोपपादकत्वसाम्यात् सिद्धान्त्येव पूर्वपक्षिशब्देन लक्षणयोक्त इति व्याचष्टे **पूर्वपक्षीति** ।

२२९ । १७ **पौरुषेयत्वेनेति** । ननु वेदस्यार्थज्ञानपूर्वकत्वेन पौरुषेयत्वमवत्यसिद्धान्तवक्ष्यमाणयैव युक्त्या शास्त्रयोनित्वाधिकरणे* निराकृतं कथमिह पुनः पौरुषेयत्वशङ्का एवं तर्हि सांख्यतन्त्रमप्यपौरुषेयमेव तद्वक्तुः कपिलस्य वासुदेवांशत्वेन परब्रह्मरूपतया तस्यापि तन्निःश्वसितत्वाऽविशेषादित्याशयः । ननु श्रुतीनामपि स्फुटतरत्वं विवक्षितं यथा कथं चन श्रुतिस्थेनास्फुटत्वकल्पने कपिलवचसामपि सूत्रत्वेन शक्यं तत्कल्पनम् अतः स्फुटाऽस्फुटत्वं न वैषम्यम् । अत एव श्रुतयः कपिलवचने निर्णयार्थीमन्त्सापेक्षा इत्यधिकरणानारम्भशङ्कायाः प्रथमसमाधानमापातत इति टीकायामुक्तम् । अन्यथा हि सृष्टोद्गायेदिति श्रुतिरपि सर्ववेदनस्मृत्या निर्णयार्थी तत्सापेक्षेति कल्पनं प्रसज्येतेत्याशङ्क्य व्याचष्टे **अनन्यपरत्वमिति** । पूर्वपक्ष्याशयं निराकरोति **सगरपुत्रप्रतप्तुरिति** । यच्च वासुदेवांशेन वेदिकार्थो वर्ण्यते तच्च तस्य सार्वात्म्योपदेष्टृत्वं दृष्टम् अतस्तद्विरुद्धार्थोपदेष्टुस्ततो ऽन्यत्वं निश्चीयतइति भावः । तदर्थस्मृतिपूर्वकाणीत्यत्रापि बहुव्रीहिसमासमाह **तेषामिति** । तदर्थानुभवपूर्विका इत्यत्र तमाह **तासामिति** । यद्यपि तदर्थस्मृतिपूर्वकाणीत्यत्रापि बहुव्रीहिगर्भबहुव्रीहिरविशिष्टस्तथापि तदर्थानुभवपूर्विका इत्यत्र बहुव्रीहिद्वयप्रदर्शनेन तत्रापि तद्वक्तुं शक्यमिति लाघवार्था तदनुक्तिः । **कथं चिदित्यर्थ इति** । विलम्बेनेत्यर्थ इत्यर्थः । अनेनाग्रिमस्य तावदित्यस्य ततः प्रागेवेति शैघ्र्यमर्थ इत्यर्थादुक्तं

२३१ । ३ भवति । **दौहित्रस्य कर्मेति** । ब्राह्मणादेराकृतिगणत्वात् कर्मणि ष्यञ् प्रत्यय इति भावः । अव्यक्तस्योत्पत्तौ स्मृतिं प्रदर्श्य तल्लये स्मृत्यन्तरप्रदर्शनात्तस्य प्रलये नाशो ऽभ्युपगत इति प्रतिभाति तथा ऽभ्युपगमो न युक्तः तस्य ज्ञानैकनिवर्त्यत्वाभ्युपगमादित्याशङ्क्य व्याचष्टे **ज्ञानात्प्रलीयतइति** । अव्यक्तोत्पत्तिस्मृतिस्तु भूतसूक्ष्मोत्पत्तिविषया । एवं च यद्यपि लयस्मृतिरपि तद्विषया योजयितुं शक्या मूलकारणविषयत्वे ऽपि प्रलये सूक्ष्मावस्थापत्तिविषया योजयितुं शक्या तथापि स्वमते मूलकारणमविद्या-

---

* व्याससू॰ अ॰ १ पा॰ १ सू॰ ३ ।

रूपमिति विभावयितुं ज्ञानादित्यध्याहृतम् । ऋषिं प्रसूतमित्यादिमन्त्रार्द्ध-स्यायमर्थः । अग्रे सर्गादौ स्वस्मात्प्रसूतमृषिं कपिलं कनकवर्णं हिरण्यगर्भं ज्ञानैस्तत्प्रकरणैर्वेदैर्यो बिभर्ति अयं सकलवेदार्थविद्भवत्वित्यनुग्रहकटाक्षेण जायमानावस्थायामेव पश्यति चेति यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै हिरण्यगर्भं पश्यति जायमानमित्यादिमन्त्रान्तरैकार्थ्यात् । अत्र बिभर्तीत्येतद् भृञ्धातोः पोषणमर्थमादाय व्याचष्टे पूरयतीति ।

मन्त्रगतयच्छब्दप्रतिनिर्देशकतच्छब्दघटितं वाक्यं दर्शयति यः स २३१ । १०
सर्वेषामात्मेति । यद्यपि यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वा इति पूर्वार्द्धयुक्ते ऽस्मिन् मन्त्रे नास्तीदं वाक्यं नापि पूर्वेतरमन्त्रयोरस्ति तयोः विद्याविद्ये ईशते यस्तु सो ऽन्य इति सर्वाधिपत्यं कुरुते महात्मेति च विधेयान्तरपरत्वात् तथापि पुरुष एवेदं सर्वं त्वं स्त्री त्वं पुमानसीत्यादितत्तन्मन्त्रान्तरप्रतिपन्नार्थ इह विधेयत्वेन गृहीतः । तद्ग्रहणं च सार्वात्म्यप्रतिपादनप्रधानायामस्यां श्वेताश्वतरोपनिषदि न भेदनिष्ठसांख्यतन्त्रकर्तृमहिमप्रतिपादनस्य प्रसक्तिरस्तीति तेनापि हेतुना मन्त्रस्य तद्विषयत्वनिराकरणार्थं सांख्यकर्तृविषयत्वे ऽपि तेन तस्य वेदार्थज्ञानवत्त्वमात्रं सिध्यति न तु क्व चिदपि विषये ऽस्य भ्रमो विप्रलम्भश्च नास्तीत्येतदपि । मनोस्तु यद्वै किं चेति वीप्साशब्देन भेषजत्वोक्त्या च तदुक्तेः सर्वेष्वप्यर्थे तदुभयराहित्यं सिध्यतीत्यपि विशेषो द्रष्टव्यः । यजुर्वेदे यो ब्रह्मवर्चसकामः स्यात्तस्मा एतं सोमारौद्रं चरुं निर्वपेदिति ब्रह्मवर्चसकामस्येष्टिं विधाय आज्यं प्रोक्षणमाज्येन मार्जयन्ते इत्यन्तेन तस्य प्रत्येकं ब्रह्मवर्चसोपयोगार्थसहितं वैशेषिकमङ्गकलापं विधाय यावदेव ब्रह्मवर्चसं तत्सर्वं करोतीति फलार्थवादानन्तरम् अतिब्रह्मवर्चसं क्रियत इत्याहुरीश्वरो दुश्चर्मा भवतीत्येवंरूपेष्ट्यनुष्ठानेनातिब्रह्मवर्चसं क्रियते तेन यजमानः श्वित्री भवितुं प्रभवतीत्येवं फलमेव पुनर्दोषरूपं संकीर्त्य तत्परिहारार्थं मानवीऋचौ धाय्ये कुर्यादिति मनुना दृष्टे ऋचावग्निं वः पूर्व्यं गिरा देवमीडे वसूनामित्यादीनां पञ्चानाम् ऋचां मध्ये ये के चिद्वे ऋचौ सामिधेनीमध्ये धाय्यारूपेण योजयेदिति विधाय कथं मानवीभ्यामृग्भ्यां श्वित्रपरिहार इत्याकाङ्क्षायां यद्वै किं च मनुरवदत्तद्भेषजं भेषजमेवास्मै करोतीत्यर्थवादेन तत्संघटनं कृतम् ।

धर्मवक्त्रा मनुना यन्मन्त्रजातं दृष्टं तत्सर्वं भेषजं भवतीति तदिदमत्रोदाहृतम् । ननु यद्वै किं चेति वचनं न स्वायम्भुवमनूक्तीनां भेषजत्वोक्तिपरं किं तु समष्टिमनोऽभिमानिहिरण्यगर्भोक्तीनाम् । तैत्तिरीयशाखायां हि मानवीऋचौ धाय्ये कुर्यादिति विधिशेषार्थवादरूपम् इदं वचनं श्रूयते । अत्रानूद्यमाने ऋचौ न मनोः प्रकाशिके किं तु मनसः । देवानां यन्मन* इति ह्यनूद्यमानयोः ऋचोः श्रूयते अतो मानवी इत्यत्र समष्टिमनोभिमानित्वधर्मेण हिरण्यगर्भः प्रकृत्यंशेनोक्त इति स एव यद्वै किं चेति वाक्ये ऽपि मनुशब्दोक्तो भवितुमर्हतीति चेद् यद्येवं किं चिदिष्टिविकृतौ मनोः ऋचः सामिधेन्यो भवन्तीति विधिशेषतया श्रुतं मनुर्वै यत्किं चिदवदत्तद्भेषजमिति वचनमुदाहरणमस्तु । न हि तत्र मनःप्रकाशिका ऋचो विनियुज्यन्ते किं तु मानससूक्तगता एव तत्र रूढिभञ्जकाभावात् । अत एव तन्त्रवार्तिके मनूक्तीनां भेषजतायामिदमेव वचनमुदाहृतम् । भाष्ये यद्वै किं चेत्युदाहरणमनादरेण । **सर्वज्ञत्वादिभिरिति ।** ननु सर्वज्ञत्वादिव-
२११ । २५ चनाद् ममान्तरात्मेत्यादिकमन्तर्यामिविषयं स्यान्न तु जीवैक्यविषयमिति चेन्न । बहवः पुरुषा ब्रह्मन्नित्यादिना प्रश्नोत्तरत्वेन जीवविषयत्वावश्यंभावात् परमेश्वर एक एव जीवभावेन सर्वशरीरेषु वर्ततइति एतद्दृष्ट्या परमेश्वरगुणवर्णनस्याप्यविरोधात्† ॥

एतेन योगः प्रत्युक्तः ॥ ३ ॥

योगस्वरूपतत्साधनेत्यादिटीकाग्रन्थं व्याचष्टे **एषामिति । श्रुतौ‡ सांख्ययोगशब्दाभ्यामिति ।** नन्विदं श्रौतलिङ्गमालम्ब्याधिकशङ्कापरिहारौ सांख्ययोग§साधारणौ कथं योगमात्रविषयत्वं तयोरुक्तम् । उच्यते । कपिलमितिवदिदं श्रुतिसामान्यमात्रमिति पूर्वाधिकरणएवोक्तप्रायम् अतो नेदं लिङ्गमधिकशङ्काबीजं किं तु योगशास्त्रे योगनिरूपणं श्वेताश्वतरोपनिषदाद्युपदिष्टयोगप्रपञ्चनरूपमिति प्रत्यक्षश्रुतिमूलत्वमधिकशङ्काबीजं तस्मिन्नंशे तस्य प्रामाण्ये ऽपि न तात्पर्याविषये स्वतन्त्रप्रधानादौ प्रामाण्यम् अतो न तेन स्वतन्त्रप्रधानादिसिद्धिरिति तत्परिहारः‖ ॥

---

* देवानां य इन्मन इति शोधितं ५ पु· । † अत्र प्रथमं स्मृत्यधिकरणं पूर्णम् ।

‡ श्रौतेति १ पु· पा· । § सांख्यशब्दयोगेति २ पु· पा· ।

‖ अत्र द्वितीयं योगप्रयुक्त्यधिकरणं पूर्णम् ।

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥ २३२ । १२

अचेतनप्रकृतिकमिति । ननु अविद्याप्रकृतिकत्वेन सिद्धसाधनं चेतनप्रकृतिकं न भवतीत्यर्थकल्पने सिद्धान्तिमते दृष्टान्ते साध्यवैकल्यं हेतुविशेषणे वैयर्थ्यं चेति चेद् उच्यते। कार्यद्रव्यं चेतनप्रकृतिकं न भवति द्रव्यत्वादात्माविद्यावदित्यनुमानमत्र विवक्षितम् । कार्यद्रव्यमात्रपक्षीकरणज्ञापनाय हेतुविशेषणम् । घटस्यापि पक्षीकरणान्न तत्र साध्यवैकल्यशङ्का । घटयतीति घटः घटेर्ण्यन्तात्पचाद्यच् । णेरनिटीति णिलोपः । अघटितसंघटनापटीयो ऽज्ञानं तद्वदित्यर्थः । भाष्यटीकयोः प्रत्युदाहरणसंगतिरग्रिमटीकायाः* प्रदर्शितेति तात्पर्यमुक्त्वा स्वयमस्याधिकरणस्य दृष्टान्तसंगतिमाह **वेदेति । प्रत्यक्षतेति ।** स्वदृष्टलिङ्गकस्य स्वविशेषतोदृष्टानुमानस्य प्रत्यक्षवदतिविश्वसनीयत्वात्प्रायः प्रत्यक्षमिदमिति संभावनाविषयता भवतीत्यर्थः । अनुश्रवो वेदः तद्गम्यमानुश्रविकम् । सुखाद्यात्मत्वं सुखदुःखमोहात्मत्वं† सद् उच्चावचविशेषणेनानेकप्रकारत्ववाचिना सातिशयत्वादिसूचनेन दर्शितम्। **तद्यथाचष्टइति ।** लोकतो ऽनवगम्यमानस्य चेतनप्रकृतिकत्वस्य केवलश्रुतार्थापत्त्या कल्पनायामचेतनत्वप्रतिपादकशब्दविरोधस्य दूषणतयोद्भावनसामर्थ्याल्लोकानुभवसद्भावे श्रुतार्थापत्तेस्तद्विरोधो न दूषणं किं तु प्रत्यक्षश्रुतिरेव चैतन्यानभिव्यक्तिपरतया व्याख्येया भवेदिति सूचितं भाष्ये तद्विवृणोतीत्यर्थः ।

आर्थत्वे उपोद्बलकापेक्षा तदेव नेत्याहेति । ननु आर्थत्वमि- २३३ । ३
हापि तुल्यमेव भूतेन्द्रियाणां वक्तृत्वविवदितृत्वान्यथानुपपत्त्या चैतन्यस्य कल्प्यत्वाद् देवतात्वस्य मनुष्यत्वादिवच्चैतन्यव्याप्यजातिविशेषतया तस्य तदनुमेयत्वाच्च । न चेक्षतिश्रवणं चैतन्यश्रवणमेवेति वाच्यम् । ईक्षत्यधिकरणे‡ तस्य भाक्तत्वेनोक्तत्वात्§ । प्रलये सुषुप्तानां चेतनानामपञ्चीकृतभूतसृष्टिसमये चैतन्योद्भवाभावेन तस्य तदभिमानिदेवतेक्षणपरत्वस्यायुक्ततया भाक्तत्वावश्यम्भावाच्चेति चेदुच्यते । श्रुतचेतनप्रकृतिकत्वनिर्वाहाय भूते-

* अग्रिमपेटिकाया इति २–५ पु॰ पा॰ । † सुखमोहात्मत्वमिति २ पु॰ पा॰ ।
‡ ब्र॰ सू॰ अ॰ १ पा॰ १ सू॰ ५ । § भाक्तत्वादिति १ पु॰ पा॰ ।

न्द्रियाणां चेतनत्वमेवाभ्युपगम्यतइति शङ्काग्रन्थे तेजःप्रभृतीक्षणस्य मुख्य-
त्वमेव संभवतीतीक्षत्यधिकरणोक्तभाक्तत्वाक्षेपेणाच शङ्का तदभाक्तत्वोपोद्ब-
लकतया । मृदब्रवीदित्याद्युदाहरणम् । ननु तेजआदिशब्दानां तदधिष्ठातरि
परमेश्वरे शक्तिरेव भाष्यटीकयोरभिमता ऽस्तु किमिति लाक्षणिकत्वमुक्त-
मित्याशङ्क्याह **तदिदमुक्तं कथं चिदिति ।** ईक्षणस्य मुख्यत्वे कथं चिदि-
त्येतन्नान्वेति परमेश्वरस्य मुख्येक्षणसद्भावादतस्तदीयेक्षणस्य मुख्यत्वे तेज-
आदिशब्दानाममुख्यत्वमायातीत्येतत्सूचनार्थमिति लाक्षणिकत्वमेव तेषां*
मूलाभिमतमिति भावः ।

२३३ । ८ **पक्ष एवेति ।** व्यतिरेकिहेतुव्यावृत्त्यर्थं साध्यासाधकविशेषणम् ।
ननु विशेषव्याप्त्यपेक्षायामसाधारण्ये ऽपि जगच्चेतनप्रकृतिकं न भवति
चेतनविशेषगुणानुगतिरहितत्वाद् यद्यद्विशेषगुणानुगतिरहितं न तत्तत्प्रकृ-
तिकं यथा सुवर्णविशेषगुणानुगतिरहितं पटादि न सुवर्णप्रकृतिकमिति
सामान्यव्याप्त्यपेक्षायां नासाधारण्यम् । न च सामान्यव्याप्तिर्यतद्भ्यामननु-
गता नानुमानोपयोगिनीति शङ्कनीयम् । यो यस्य ग्रन्थस्य प्रणेता स
तस्मादधिकविषयज्ञानवानित्येवमादिरूपायाः सामान्यव्याप्तेः सिद्धान्तिना
ऽप्यनुमानाङ्गतया प्रागङ्गीकृतत्वात् । आचार्यैरधिकरणारम्भे प्रदर्शितस्य
विशेषव्याप्तिमूलकस्यैवानुमानस्यासाधारण्यशङ्कारहितत्वाच्चेति चेदुच्यते ।
यत्तद्भ्यामननुगता सामान्यव्याप्तिर्न स्वतन्त्रा ऽनुमानाङ्गम् । ईश्वरो वेदा-
धिकद्रष्टेत्याद्यनुमानं बुद्धिसंवादेन श्रुत्यवगतसार्वज्ञ्यदृढीकरणार्थं न स्वय-
मेव कस्य चिदर्थस्य साधनार्थमिति तत्राननुगतापि सामान्यव्याप्तिरुपन्य-
स्यते । तदभावे ऽपि हि यथा सोम्यैकेन मृत्पिण्डेनेत्यादौ दृष्टान्तोपन्याससमा-
वेण बुद्धिसंवादो जायते । आचार्यैः प्रदर्शितमप्यनुमानमप्रयोजकत्वपरिहा-
राय यदि चेतनप्रकृतिकं स्यात्तद्विशेष†गुणानुगतिमत्स्यादिति तर्कमपेक्षमाणं
तन्मूलभूतां सामान्यव्याप्तिमुपजीवतीति तदपि नावतिष्ठते किं त्वापाततो
ऽननुगतसामान्यव्याप्त्यनपेक्षमिव भासमानं पूर्वपक्षावलम्बनमस्त्वित्याशयेन
न विलक्षणत्वादिति सोऽत्रानुमाने स्पष्टे विद्यमाने ऽप्यनुमानान्तरमाचार्यैरु-

---

* एषामिति १ पु॰ पा॰ ।

† तर्हि येवेति १ पु॰ ।

पन्यस्तं तत्तु महांश्चायं पारिणामिकः स्वभावविप्रकर्षः पुरुषादीनां केशन-
खादीनां च रूपादिभेदादिति भाष्योद्भावितव्यभिचारेणैव तर्कमूलसामान्य-
व्याप्तेरपि शैथिल्यापादनाद् दूषितमिति तद्दूषणे फलान्तरमाचार्यैर्न कृतम् ।

ननु प्रमाणविषयविवेचकतयेत्ययुक्तं श्रुत्यैव प्रमाणमूर्द्धन्यया तद्वि-
षयविवेकसिद्धेरित्याशङ्क्य व्याचष्टे **वचनयुक्त्याभासनिरासेनेति ।** आपा- २३३ । १०
ततस्तद्विरोधित्वेन भासमानानां युक्त्याभासानां चानुसंधाने संजातस्य
चित्तक्षोभस्यापनयनेन श्रुतिविषयदार्ढ्यापादनं तद्विवेचनमित्यर्थः । ननु
पूर्वपक्षोपन्यस्तेषु तर्कमूलाक्षेपहेतुषु ब्रह्मणः सिद्धरूपत्वेन पृथिव्यादिसाम्यं
मननरूपतर्कादरणं चेति हेतुद्वयमेव परिहृतं न तु निरवकाशत्वप्रधानप्र-
त्यासत्तिहेतुद्वयमिति चेत् । उच्यते । ब्रह्मणः सिद्धरूपत्वे ऽपि श्रुत्यनुग्रा-
हकतर्कादरणे ऽपि स्वतन्त्रानुमानविषयत्वं नास्तीति प्रसाधिते शब्दसाध-
नाक्षमस्य चक्षुषस्तद्बाधनइव* ब्रह्मसाधनाक्षमस्यानुमानस्य तद्बाधने
सामर्थ्याभावः फलितो भवतीत्युपले क्षुरतैक्ष्ण्यस्येव तत्र कुण्ठीभवतो ऽनुमा-
नस्य श्रुतितः प्राबल्यहेतुकथनमस्थानविजृम्भितमिति स्वत एव सिद्धेस्तद्धे-
तुद्वयमाहत्य न दूषितम् ।

न ह्यचेतनस्येत्यादिग्रन्थं व्याचष्टे **अचेतनस्य जगत्कारणस्येति ।**
नन्वचेतनाच्चेतनस्येवोद्भूतविशेषगुणादनुद्भूतविशेषगुणस्याप्युत्पत्तिर्न संभवतीति
चेद् न । काष्ठज्वालाभाण्ड†तद्गतवारिस्थतेजसो दीपात्तुषाग्नेश्चोत्पत्तिद-
र्शनात्तत्रोद्भूतरूपावयवान्तरकल्पने गौरवात् । घटः प्रकाशतइत्यनुभवदर्शने-
न घटादिषु चैतन्यमुद्भूतमित्यपि कल्पनोपपत्तेश्च । कस्य चित्प्रकाशते कस्य
चिन्न प्रकाशतइति व्यवहारस्तु चैत्रात्परो ऽयं न मैत्रादिति व्यवहारवदु-
पपद्यते परत्ववच्चैतन्यस्यापि सप्रतियोगिकगुणत्वकल्पनोपपत्तेः । **न तवेति ।** ,, । २३
सत्कार्यवादिनस्तव शरावादिदृष्टान्ते ऽप्युक्तदोषापत्तिस्तुल्येति भावः । **कार-
णानुवृत्त्येति ।** न तु कार्यरूपानुवृत्त्या ऽतो नोभयत्राप्युक्तदोषापत्तिरिति
भावः । ननु जाग्रत्प्रपञ्चदोषेणेव स्वप्नप्रपञ्चदोषेणापि ब्रह्मणो दूषणमापा-
द्यमेव कथमदूषणे दृष्टान्तीक्रियतइत्याशङ्क्य जीवे तददूषणस्यानुभवसिद्ध-

---

* चक्षुष इवेति १ पु॰ पा॰ । † ज्वालाद्भाण्डेति १ पु॰ पा॰ ।

तया जीवो ऽच दृष्टान्तो विवक्षित इति व्याख्यातमित्याह **अतो न साध्यसमत्वमित्यर्थ इति** । यो ऽन्यचात्मन इत्यचान्यचेत्येतत्प्रथमार्थे ऽन्यच भूताच्च भव्याच्चेतिवत् । सिद्धमर्थमाह **आत्मव्यतिरेकेणेति*** ॥

२३४ । १३ एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १२ ॥

अतिदेशस्येति । स्मृतेर्मूलाभावे ऽपि तर्कस्य व्याप्त्यादिमूलसत्त्वात्तद्विरोधेन समन्वयः सङ्कोचनीय इति पूर्वाधिकरणेन प्रत्युदाहरणसंगतिरित्यर्थः । तेन दृष्टान्तसंगतिमपि दर्शयन्नतिदेशाधिकरणस्याभ्यधिकाशङ्कामाह **यथा हीति** । **इयमारम्भणेति** । न कार्यं कारणाऽभिन्नं नापि तद्भिन्नं सत्यं किं त्वनिर्वचनीयमित्युपपादयितुमारम्भणाधिकरणे† कार्यकारणभेदशङ्का निरसनीया इह तु भेदगर्भकार्यकारणभावे प्रत्यक्षत्वाऽप्रत्यक्षत्वावसेयसत्त्वाऽसत्त्वविरोधाभ्यां तन्निरसनमभ्युच्चयमाचमित्यर्थः ।

असदकरणादित्यादीति ।

असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् ।
शक्तस्य शक्यकरणात्कारणभावाच्च कार्यस्य‡ ॥

इति सांख्यानां सत्कार्यवादप्रधानश्लोकः । अस्यार्थः । कार्यं कारणव्यापारात्प्रागपि सदेव नीलरूपस्य पीतभावेनेवाऽसतः सत्त्वेन कर्तुमशक्यत्वात् । उपादानग्रहणाच्च प्रागपि सदेव कार्यम् । उपादानानि कारणानि तेषां कार्येण ग्रहणात् कारणैः कार्यस्य संबन्धादिति यावत् । कारणसंबद्धं हि कार्यं भवद् भवेत् । कारणाऽसंबद्धमेव कार्यमुत्पद्यतामिति चेद् न । सर्वसंभवाभावात् । असंबद्धस्य कार्यत्वे हि असंबद्धत्वाविशेषा§त्सर्वं कार्यं सर्वस्मात्संभवेद् न चैतदस्ति । असंबद्धमपि कारणं तदेव करोति यच शक्तमिति चेद् न । शक्तस्य शक्यकरणात् । शक्तमपि हि कार्यं शक्यं करोति नाशक्यम् । अव्यवस्थातादवस्थ्यात् । शक्यं करोति चेत्कथमसति शक्तिविषयतारूपा शक्यता कार्यस्य कारणात्मत्वादपि कार्यं सदेव । तस्य कारणात्मत्वं च घटशरावादिकं पूर्वाह्णे मृत्कूट एवासीदित्यनुभवेन गुरुत्वद्वैगु-

---

* अत्र तृतीयं विलक्षणत्वाधिकरणं पूर्णम् । † व्या॰ सू॰ अ॰ २ पा॰ १ सू॰ १४ ।
‡ भावाच्च सत्कार्यमिति सांख्यकारिकापाठः । § असंबन्धाऽविशेषादिति २ पु॰ पा॰ ।

ण्यानुपलम्भादियुक्त्या चेति । (ननु पृथुबुध्नोदरादिसंस्थानविशेषाणां सदातनत्वे ऽपि कदा चित्प्रत्यक्षत्वं कदा चित्परोक्षत्वं च पटकूर्माङ्गादिपरिणाहानामिवाविर्भावतिरोभावाभ्यामुपपद्यते)* । न हि पटकूर्माङ्गादिपरिणाहानां संकोचनावस्थायामप्रत्यक्षत्वमनुत्पत्त्या नाशेन वा किं तु तिरोधानेन । ततश्च तेषां विकाशव्यापारेणैव दण्डचक्रादिव्यापारेण पृथुबुध्नोदरादीनामभिव्यक्तौ प्रत्यक्षता अभिव्यक्तिश्च तत्तिरोधायकपिण्डावस्थोपमर्दः । मुद्गरपातेन घटावस्थोपमर्द इति कपालावस्थाभिव्यक्तिः । कपालानि चूर्णीकृत्य जलमृदन्तरसंयोजनमर्दनादिभिर्मार्दवं प्रापय्य दण्डचक्रादिव्यापारेण तिरोहितायाः घटावस्थायाः पुनरभिव्यक्तिः । एवं पटावस्थायां दाहेन तिरोहितायां तद्भस्मनां क्षितितलपतितानां तत्क्षितिप्ररूढकार्पासतरुकुसुमफलपरिणतौ क्रमेण तिरोहितायाः पटावस्थायाः पुनरभिव्यक्तिरिति । अवस्थानामपि सदातनत्वे प्रत्यक्षत्वपरोक्षत्वव्यवस्थायां न क्व चि†दनुपपत्तिरिति चेद् एवं द्रव्यतदवस्थाविशेषाणां सदातनत्वसमर्थने ऽपि तदाविर्भावतिरोभावौ प्रागसन्तौ आगन्तुकावेवाभ्युपगन्तव्यौ । तयोरपि सदातनत्वे घटावस्थायां‡ कदा चित्प्रत्यक्षत्वं कदा चित्परोक्षत्वमिति व्यवस्थाऽनुपपत्तेस्ततश्च तयोरसदकरणादिहेतूनां प्रतिहतेः । तद्वदेव घटादिद्रव्याणां तदाकारविशेषाणां चागन्तुकत्वमभ्युपगन्तुं युक्तम् । इदानीं मृत्पिण्ड एवास्ति घटो नास्तीत्यादिव्यवहारदर्शनात् कारणचक्रव्यापारानन्तरमिदानीं घट आसीदित्यादिव्यवहारदर्शनाच्च पटपरिणाह इदानीमभिव्यक्त आसीत् प्राक् तिरोहित आसीदित्यादिवदाविर्भावतिरोभावव्यवहाराभावाच्च । शेषमारम्भणाधिकरणे§ वक्ष्यते ।

प्रकृतौ हि‖ द्वादशाहे इति । नन्वहर्गणानां प्रकृतौ समूहे द्वादशाहे २३५
त्रयाणां त्रयाणामह्नां त्रिवृत्स्तोमकत्वादिकं नास्ति । सत्यं यत्रास्ति तदुपलक्षणमेतत् । तद्यथा क्व चिदेकोनपञ्चाशद्रात्रविशेषे श्रूयते अतिरात्रो नव त्रिवृद्न्त्यहानि नव पञ्चदशान्यहानि नव सप्तदशान्यहानि नवैकविंशान्यहानि द्वादशाहस्य दशाहस्य दशाहानि महाव्रतं चातिरात्रश्चेति । **निश्चितार्थैरिति** । यद्यपि

---

* ( ) एतन्मध्यस्थो ग्रन्थो नास्ति १ पु॰ । † क्वा चिदिति १ पु॰ पा॰ ।
‡ घटाद्यवस्थायामिति १ पु॰ पा॰ । § व्या॰ सू॰ अ॰ २ पा॰ १ सू॰ १५ ।
‖ हिशब्दो नास्ति १-५ पु॰ ।

त्रिवृदादिशब्दाः स्तोत्रीयाणामृचां नवसंख्यादिवाचिनो नाहर्वाचिनः तथापि तेषामन्यत्र लक्षणया ऽहःपरत्वं दृष्टमित्येतावता तादर्थ्यनिश्चयोक्तिः । ननु तेषां संवत्सरपरत्वमपि त्रयस्त्रिवृतः संवत्सरास्त्रयः पञ्चदशा इत्यादिद्वादशवार्षिकसत्रोत्पत्तिवाक्येषु नव त्रिवृतः संवत्सरा नव पञ्चदशा इत्यादिषट्त्रिंशत्संवत्सरसत्रोत्पत्तिवाक्येषु च दृष्टं न च तेषु संवत्सरशब्दस्यार्थानवधारणमस्ति संवत्सरसत्राणां प्रकृतिभूते गवामयने चत्वारो ऽभिप्लवाः षडह एकः पृष्ठ्यः षडहः समास इति त्रिंशति अहस्सु मासत्वोक्तिलिङ्गाद् यावत्यश्चतुर्विंशोक्थ्यस्य स्तोत्रीयास्तावत्यः संवत्सरस्य रात्रय इति संवत्सररात्रीणां षष्ट्युत्तरत्रिंशत्संख्याकचतुर्विंशोक्थ्यस्तोत्रीयाभिः समसंख्यत्वोक्तिलिङ्गात्सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृत इति स्मरणाच्च सावनपरत्वावधारणेनानुष्ठानपर्यन्तत्वदर्शनात् । तथेहापि मुख्यवृत्त्यैव सावन-
२३५ । १६ संवत्सरपरत्वमुपपादयितुं शक्यमिति पूर्वास्वरसादाह **औषधादिसिद्धिकल्पनापीति ।** सहस्रसंवत्सरजीवनोपायभूतमौषधादिकं क्वचित्प्रामाणिकशास्त्रे दृष्टं क्लृप्तं नास्ति येन सहस्रसंवत्सरा ऽऽयुरर्थितया स्वत एवौषधादिसिद्धानामधिकार इति विध्याक्षेपगौरवं परिह्रियेत किं तु सहस्रसंवत्सरविधिबलादेव तथाभूतमौषधादिकमस्तीति कल्पनीयम् । न च तथा कल्पनया ऽप्यधिकारनिर्वाहः । सामान्यतः कल्पितस्याप्यौषधादेरिदन्तया परिज्ञानाभावेन तत्सेवया तावदायुःसंपादनाभावात् । न ह्यग्निसंवर्द्धनं स्वरवर्णप्रसादनं वलीपलितनाशनमित्यादिरसायनानामिव तावदायुःसंपादकस्य रसायनस्येदन्तया परिज्ञानं कथमपि लब्धुं शक्यम् । तावदायुषां गन्धर्वादीनामधिकाराश्रयणे ऽपि* तेषां ब्राह्मण्यादिकं तदभावे ऽप्यग्निसंपानम् अग्न्यभावे ऽपि क्रत्वनुष्ठानं वा कल्पनीयमिति विध्याक्षेपगौरवमपरिहार्यमतस्तत्परिहाराय पञ्चपञ्चाशत इति संख्यावाचिशब्दस्य संवत्सरा इति कालवाचिशब्दस्य वा लक्षणीयत्वेन वाक्यार्थे वक्तव्ये संख्याशब्दस्य व्यवस्थितार्थत्वात् संवत्सरशब्दस्यापाततो ऽनेकार्थतया प्रचलदवस्थत्वादहरेव संवत्सर इत्यहनि दृष्टप्रयोगत्वाच्च अहर्लक्षणात्वमभ्युपेत्य वाक्यार्थो निर्णेतव्य इति भावः ।

* श्रयणे ऽपीति २ पु· पा· ।

दूषणाकारेति । यद्यारम्भणाधिकरणे स्फुटीकरिष्यमाणं विवर्तवादं प्रच्छाद्य समनन्तरभोक्त्रापत्त्यधिकरणावलम्बनं परिणामवादमाश्रित्य परमाणुवाददूषणं वक्तव्यं तदोपादानोपादेययोरल्पाधिकपरिमाणत्वनियमस्य प्रचितपरिमाणतूलपिण्डाद्यारब्धेषु पिचुप्रभृतिषु व्यभिचार उद्भावनीयः । मेरुसर्षपयोरनन्तावयवारब्धत्वाविशेषे ऽपि तदानन्त्ययोरेवातीतवर्णकल्पानन्त्ययोरिव विशेषोपपादनेन तुल्यपरिमाणप्रसङ्गं निरस्य चोदीयोर्थान्तरकल्पनापत्तिप्रसङ्गेन च परमाणुकारणवादो दूषणीयः* ॥

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ १३ ॥ २३५ । २१

ननु केवलागमगम्यब्रह्मविषयत्वं साधकस्येव बाधकस्यापि तर्कस्य न संभवतीति शङ्काया मन्त्रार्थवाददृष्टान्तेन परिहारो न संभवति मन्त्रार्थवादयोर्मानान्तरगम्यविषययोरेव मानान्तरबाधेनान्यथानयनाङ्गीकारादित्याशङ्क्याचापि मानान्तरगम्यप्रपञ्चाभावश्रुतीनामेव तत्सत्त्वग्राहिमानान्तरेण बाधः शङ्क्यतइति तत्तात्पर्यमाह **तर्हि जगद्भेद इति** । एतदनुसारेण प्रवृत्तप्रवर्तमानशब्दो व्याख्यातुमयं ग्रन्थः† ॥

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १४ ॥ २३६ । ०

लौकिकप्रमाणानां तत्त्वावेदकत्वप्रच्यावनरूपो विशेषो ऽत्राभिधित्सितः कुतो ऽवसीयतइत्याकाङ्क्षायां सोचपदेन तद्विषयमिथ्यात्वप्रतिपादनादित्याह **तदनन्यत्वपदेनेति** । ननु सोचपदाद्बलवति विषयवाक्ये पूर्वाधिकरणव्यवस्थापितभेदाभेदानुगुणदृष्टान्तोपादानात्तद्दृढीकरणे तात्पर्यं कुतो नावसीयतइति शङ्कोत्तरत्वेन प्रतिज्ञावाक्यतात्पर्यवर्णनपरं ग्रन्थमवतारयति **श्रुताविति** । **तत्त्वज्ञानं चेतीति** । तत्त्वस्याबाधितरूपस्य ज्ञानमित्यर्थः । तथा चेदन्तया प्रतीयमानस्य भुजगस्य रज्ज्विदमंश इव सतया प्रतीयमानस्य विश्वस्याधिष्ठानसदंशस्तत्त्वमिति सद्रूपे तस्मिन् विज्ञाते विश्वमारोपितत्तद्विशेषिकरूपेणाऽज्ञातमपि तत्त्वतो ज्ञातं तज्ज्ञानेनैव विषयीकृतं भवतीत्यर्थः । एतेनासाधारणं स्वरूपं धर्मो वा तत्त्वं न तु भ्रमाधिष्ठानम् ।

---

* अत्र चतुर्थं शिष्टापरिग्रहाधिकरणं पूर्णम् ।

† अत्र पञ्चमं भोक्त्रापत्त्यधिकरणं पूर्णम् ।

तथा सति सदंशस्तत्त्वमिति ब्रह्मशुक्त्याद्यधिष्ठानस्यानन्दशुक्लत्वादेरतत्त्वप्रसङ्गादिति निरस्तम् । स्वरूपं धर्मो वा बाध्यो तत्त्वमित्यबाधितत्वविशेषणावश्यंभावे सत्यसाधारणविशेषणवैयर्थ्यात् । नष्टशब्दो यद्यपि प्रयोगप्राचुर्याद्ध्वस्ते प्रसिद्धस्तथापि दृष्टनष्टस्वरूपत्वादिति हेतोर्व्यतिरेकव्याप्तिप्रदर्शनपरे तथा हीत्यादिटीकाग्रन्थे त्रिविधपरिच्छेदराहित्यस्य वस्तुसत्त्वरूपसाध्याभावव्यापकत्वप्रदर्शनात् त्रिविधपरिच्छेदो ऽत्र हेतुर्विवक्षितो न तु कालपरिच्छेदमात्रम् । न च त्रिविधोपादानवैयर्थ्यम् । ध्वंसात्यन्ताभावान्योन्याभावप्रतियोगित्वरूपहेतुत्रयपरत्वोपपत्तेः । अभावत्वेन सर्वक्रोडीकरणेनाभावप्रतियोगित्वरूपैकहेतुपरत्वोपपत्तेश्च । न च ब्रह्मणि व्यभिचारः । स्वान्यूनसत्ताकत्वेनाभावविशेषणादित्यभिप्रेत्य त्रिविधसंग्रहार्थं नश अदर्शने इति धात्वर्थकथनानुसारेण समभिव्याहृतदृष्टप्रतिद्वन्द्विविषयतौचित्यानुसारेण च
२३६ । १९ नष्टशब्दं व्याचष्टे **अदृष्टमित्यर्थ इति** । एवं च कालान्तरदेशान्तरवर्तितया वस्त्वन्तरतादात्म्येन चादृष्टत्वोक्त्या तत्तदर्थाभावाक्षेपात् कालपरिच्छिन्नत्वादिहेतुलाभः । नन्वेवं सति नष्टपदेनैव हेतुलाभात् किं दृष्टग्रहणेनेत्याशङ्क्य ध्वंसकालाद्यवच्छिन्नः सत्त्वाभाव इह साध्यते स दृष्ट एवेति भ्रान्तशङ्कावारणार्थं प्रतीतिकालादिसाधारणः सत्त्वाभावः साध्य इति साध्यशरीरज्ञापनार्थं तदित्याह **प्रतीतिसमये इति** । क्व चिददृष्टमित्यर्थ इति स्थाने अनित्यमित्यर्थ इति पाठस्तु नष्टशब्दस्य ध्वस्ते प्रसिद्धिप्राचुर्यमाश्रित्य । अस्मिन् पक्षे कालपरिच्छेदमात्रस्य हेतुत्वाद् ब्रह्मणि व्यतिरेकव्याप्तिप्रदर्शनपरे टीकाग्रन्थे न ह्यसौ कदा चित्क्व चित्कथं चिद्वा ऽस्तीति देशवस्तुपरिच्छेदयोरप्यभावकथनं कालपरिच्छेदाभावे दृष्टान्तार्थमिति योज्यम् । टीकायां ये हि दृष्टस्वरूपा इत्यनेन विवक्षितस्यानुमानस्य प्राथमिकतथाहिग्रन्थेन व्यतिरेकव्याप्तिः प्रदर्शिता तस्यैव विपक्षबाधकं द्वैतीयीकतथाहिग्रन्थेनोच्यत इति निष्कृष्य तदनुमानप्रदर्शनपूर्वकमवतारयति **विमतमिति । सावधिकत्वादिति** । पूर्वोक्तरीत्या त्रिविधावधिमत्त्वादनित्यत्वादिति वा ऽर्थः । सावधिकसत्त्वादिति पाठे सावधिकस्थितिकत्वादित्यर्थमादायोक्तार्थ एव पर्यवसानं द्रष्टव्यम् । अन्यथा कदा चित्सत्त्वमङ्गीकृत्य तेन त्रैकालिकसत्त्वाभावसाधने विरोधात् ।

टीकायामाद्यविकल्पद्वयं सत्त्वासत्त्वोभयविषयमुपन्यस्याऽर्थान्तरत्वा-
दिविकल्पद्वयमसत्त्व*मात्रविषयमुपन्यस्तं तत् स्वयं सत्त्वेनासत्त्वेन चानि-
र्वचनीयत्वा†भावसिद्ध्यर्थं सत्त्वे ऽप्यतिदिशति **असत्त्ववदित्यादिना** । २३७ । २
ननु सत्त्वं भावधर्मः असत्त्वं त्वभावरूपमर्थान्तरमित्यभ्युपगमे नास्ति
दोषः । न चाकिंचित्करतायामर्थान्तरस्य विरोधित्वानुपपत्तिस्तस्य प्रति-
योगिन्यकिंचित्करत्वे ऽपि स्वभावादेव प्रतियोगिप्रतिक्षेपरूपविरोधित्वोप-
पत्तेः । अन्यथा प्रतियोगिनि किंचित्करस्यैव (विरोधित्वनियमे ऽवैव
वियद्वाचकसमर्थेनार्थस्य सदसतोरेकत्वविरोधादिति टीकाग्रन्थस्य सत्स्व-
भावस्याऽसत्त्व)‡विरोधादित्यस्य ग्रन्थस्य चानिर्वाहात् । उच्यते । सत्त्वा-
सत्त्वे भावधर्मावित्यभ्युपगमे विकारनित्यत्वापात इति यो दोष उक्तः स
सत्त्वमेकमेव भावधर्मो न कदापि भावस्यासत्त्वमित्यभ्युपगमे ऽपि तुल्यः ।
असत्त्वमर्थान्तरं न चासत्त्वान्तरकरमित्यभ्युपगमे त्वसन् घट इति सामा-
नाधिकरण्यानुपपत्तिः । न हि सत्त्वासत्त्वगोत्वाश्वत्वादीनां स्वभावादेव
परस्परविरोधसद्भावे ऽपि सदसद्गौरश्व इत्यादिसामानाधिकरण्यमस्ति । न
चासन् घट इति सामानाधिकरण्यमभावप्रतियोगी घट इत्यर्थकमिति
वाच्यम् । तथा सति प्रतियोगित्वधर्माश्रयतया विकारसत्त्वापातात् । एवं
सत्त्वासत्त्वाभ्यामनिर्वचनीयत्वमिह विश्वस्योपपादितम् । भेदाभेदाभ्यामनि-
र्वचनीयत्वमपि पूर्वाधिकरणे कार्यकारणभेदवादिभिश्च दर्शितैः परस्परं
प्रतिक्षेप्तुमशक्यैर्न्यायैः सिद्धमित्यनुसंधेयम् ।

ननु मृदात्मना शरावादीनामेकत्वं मृदश्च शरावाद्यात्मना नाना-
त्वमिति परोक्तमापाद्य विकल्पपूर्वकं दूषणमयुक्तोपालम्भः§ । मृदेका शरा-
वादयो नानेत्येतावत एव परोक्तत्वात् । भाष्ये यथा वृक्ष इत्येकत्वं
शाखा इति च नानात्वमिति प्रथमदृष्टान्तानुसारेण मृदात्मना घटशरावा-
द्यात्मनेति आत्मशब्दयोरविवक्षितार्थत्वादित्याशङ्क्य तात्पर्यमाह **मृदे-** ,, । ७
केति । यदि तथा परमतं स्यात्तदा सर्वविज्ञानप्रतिज्ञानिर्वाहार्थमस्मदुक्ता
रीतिरनुसरणीयेति परमते ऽपि शुद्धाद्वैतमेव सिध्येद् न नानात्वस्य

---

* द्वयसत्त्वेति २ पु॰ पा॰ ।
† सत्त्वेन च निर्वचनीयत्वेति २ पु॰ पा॰ ।
‡ ( ) एतदन्तर्गतो ग्रन्थो नास्ति १ पु॰ ।
§ अनुक्तोपालम्भ इति १ पु॰ पा॰ ।

सत्यता । अतस्तत्सत्यतामनुसृत्य प्रतिज्ञां निर्वोढुं कार्यकारणयोर्द्वयोरपि परस्परात्मनैकत्वं नानात्वं च पराभिमतमिति वक्तव्यम् । अत एव नन्वनेकात्मकं ब्रह्मेति भाष्ये कारणस्य कार्यात्मताभिप्रायेण नानात्वमुक्तमिति तत्र विकल्प्य दूषणकथनं युक्तमित्यर्थः । अभेद एव स्यादिति पाठमनुसृत्य शुद्धाद्वैतमेव सिध्येदिति तत्तात्पर्यं वर्णितम् । अत्यन्तभेद एव

२३१ । १३ स्यादिति पाठस्तु सुगमः । **न भवेदपीति** । भेदमाश्रित्य भवनवदभेदमाश्रित्याभवनमपि वक्तुं शक्यमिति भावः । तस्करदृष्टान्तः छान्दोग्ये पुरुषं सोम्योत हस्तगृहीतमानयन्त्यपहार्षीत् स्तेयमकार्षीत् परशुमस्मै तपते इत्यादिना प्रपञ्चितः । **असत्यादिति** । असत्यादहिज्ञानान्मरणकार्यसमभयोत्पत्तिर्वक्ष्यते । नन्वसन्नप्यसन्‌ इवाहिज्ञानवदहेरुपलक्षणत्वेन तादर्थ्यसंभवाद् नाऽहिज्ञानस्यासत्यत्वमिति चेद् न । असद्विकल्पस्यासद्विशिष्टत्वेनासत्त्वे बाधकाभावात् । न च शशशृङ्गमस्तीति ज्ञानाद् भ्रान्तस्य प्रवृत्त्यभावप्रसङ्गो बाधकः । असतः साधकत्वदर्शनस्य प्रातिभासिकव्यावहारिकाणां साधकत्वोपपादने कैमुतिकन्यायेनानुकूलत्वात् । अत एव खण्डनकारैरसतः साधकत्वं यत्नेनोपपादितम् । ननु तथापि व्यावहारिकत्वादिनिर्वचनेष्वपेक्षितमसत्प्रातिभासिकवैलक्षण्यं व्यावहारिकमभ्युपेयम् । असतः प्रातिभासिकस्य च तद्वैलक्षण्यस्यासति प्रातिभासिके च सत्त्वेनाव्यावर्तकत्वात् । अतस्तत्रासत्प्रातिभासिकवदहेरप्युपलक्षणत्वं स्यादिति चेन्न । तत्र विशिष्टरूपेणासदपि प्रातिभासिकमपि स्वरूपेण तद्वैलक्षण्यं विशेषणमिति विवक्षया व्यावर्तकत्वोपपत्तेः । क्व चित्कस्य चिद्बाधकवशादुपलक्षणत्वकल्पनेऽपि प्रकृते विशेषणत्वे संभवति तद्दृष्टान्तेनोपलक्ष्याकारान्तरसापेक्षोपलक्षणत्वकल्पनायोगात् । महासर्पभ्रमजन्यभये क्षुद्रसर्पभ्रमजन्यभयादुत्कर्षदर्शनेन कार्योत्कर्षानुविधेयोत्कर्षस्य सर्पस्य विशेषणतया भयप्रयोजककोटिनिवेशनावश्यंभावाच्च ।

,, । २४ **परिहारसाम्यमाहेति** । ननु कथं परिहारसाम्यं सत्यत्वाविशेषेऽपि यत्कारणतावच्छेदकावच्छिन्नं ततः सत्यं कार्यं नान्यस्मादिति नियमः सत्यपक्षे संभवति । आरोपपक्षे त्वजिनमजीनमित्युभयोरपि दैर्घ्यारोपाऽविशेषे धूमबाष्पयोर्व्याप्त्यारोपाविशेषे च कथं नियमः । उच्यते । यादृशेन ज्ञानेन

सत्यत्वं कार्य*कारणभावानतिप्रसङ्गोपपादकं सिद्धं परो मन्यते तादृशज्ञानसिद्धं व्यावहारिकसत्वमस्माकं तदनतिप्रसङ्गोपपादकं तत्तु ज्ञानं परस्य सर्वथैव बाध्यमित्यभिमानः । अस्माकं तु तद्युक्त्या ब्रह्मज्ञानेन च बाध्यमिति सिद्धान्तः । एवं च धूमएव वन्हिव्याप्तिज्ञानात् तत्सत्त्वसिद्धिः न तु धूमत्वभ्रान्तिविषये बाष्पे तज्ज्ञानादिति पराभिमानात् । अस्माकं धूमे एव वह्निव्याप्त्यारोपाद्व्यावहारिकवह्निप्रमा नान्यत्रेति व्यवस्था । यदि क्व चिद्बाष्पधूमभ्रमस्थले ऽपि संवादिनी सा जायतइति न वस्तुसद्व्याप्तिमत्वं तत्प्रयोजकं किं तु साध्यवति लिङ्गज्ञानमात्रमारोपानारोपसाधारणमितीष्यते तदा यतः साध्यवत्त्वज्ञानात्पक्षे साध्यत्वस्य वस्तुसतः सिद्धिं परो मन्यते तदस्माकमारोपरूपमिति तत्सिद्धं व्यावहारिकं साध्यत्वं तत्प्रयोजककोटौ निवेश्यम् । एवमजीनमजिनमित्यत्राप्युपपादनं वर्णदैर्घ्यादेश्च सत्यत्वमशक्योपपादनम् । न च दीर्घादिध्वनिसाहित्यं तदभिव्यक्तत्वं वा तत् । न हि दीर्घादिध्वनिसहिता इमे वर्णास्तदभिव्यक्ता वेति प्रतियन्ति लोकाः किं तु दीर्घो ऽयं ह्रस्वो ऽयमित्येव प्रतियन्ति । लोकविरोधेन चानुभवव्याख्याने रजतभ्रमादीनामपि रजतसदृशमिदमित्यादिव्याख्यानं को वारयेत् ।

ध्वस्ते इति । ध्वंसु गतौ चेति गत्यर्थमादाय यथा चेयं ध्वस्तेति २३८ । ६
पाठस्य गतिरुक्ता । स्तब्धेति पाठः सुगम इति त्यक्तः । **तर्ह्येवेति** । कथं चेत्येतत्प्रकृतार्थानुगुण्यार्थं तर्ह्यत्रेत्यर्थं योजनीयम् । आक्षेपार्थत्वे स्वप्नदृगनुभवभ्रान्तित्वस्यैव प्रतिपिपादयिषितत्वापत्तेरिति भावः । **नानात्वांशेन तु कर्मकाण्डाश्रया इत्यादिनेति** । नन्वयं ग्रन्थो भाष्ये पूर्वपक्षग्रन्थः टीकायां तु यच्चोक्तमित्यतः प्रागयं ग्रन्थ एव नास्ति तदनन्तरं तु पूर्वपक्षभाष्यानुवादरूपो ऽयं ग्रन्थः कथमयं ग्रन्थो नाद्य इत्युक्तमिति सिद्धान्तग्रन्थतया ऽवतारितः । उच्यते । अनेन ग्रन्थेनानूदितः पूर्वपक्षः सर्वव्यवहाराणामेव प्राग् ब्रह्मात्मताविज्ञानात्सत्यत्वोपपत्तेरित्यादिभाष्येण तात्पर्यप्रदर्शकटीकाग्रन्थेन च निराकृत इति प्रदर्शनार्थं पूर्वपक्षग्रन्थोपन्यास इति न दोषः । केषु चित्कोशेषु नानात्वांशेनेत्यादिप्र-

* सत्यकार्येति १ पु॰ पा॰ ।

तीकग्रहणमेव नास्ति तस्मिन् पाठे नाद्य इत्युक्तमित्येतावतैव सर्वव्यव-
हाराणामित्यादिभाष्यतद्व्याख्यानाभ्यामिति ज्ञातुं शक्यत्वात्प्रतीकाग्रहणम् ।
२३८ । १६ **यथा खल्विति** । घटध्वंसो नाम घटविरोधिकपालरूपकार्यान्तरोदय एव
न त्वभावरूपः । तदतिरिक्ताभावरूपध्वंसकल्पने गौरवात् कपालरूपविरो-
धिकार्यान्तरोदयेनैव ध्वंसव्यवहारोपपत्तेश्च । ननु कपालोत्पत्त्यनन्तरं
घटो नास्तीति व्यवहारविषयः कश्चिदभावो ऽपि स्वीकर्तव्यः स एव
मुद्गरपातादिसाध्यो घटध्वंसो ऽस्त्वित्यत आह **तस्य तुच्छत्वेनेति** । सो
ऽभावो न कस्य चित्कार्यो ऽभावत्वादेव । तथा च घटापनयनानन्तरमिव
मुद्गरपतनानन्तरमपि घटो नास्तीति व्यवहारो नित्यसंसर्गाभावविषय
एव ध्वंसव्यवहारस्तु कपालोत्पत्तिविषयः । अत एव कपालोत्पत्तिदशायां
कपालान्युत्पद्यन्तइति व्यवहारवद् घटो ध्वस्त* इति व्यवहारः । उत्प-
न्नेषु कपालेषु कपालान्युत्पन्नानीति व्यवहारवद् घटो ध्वस्त इत्येव व्यव-
हारः कपालतदुत्पत्त्योरदर्शने घटो ध्वस्तो ध्वंसत†इति च व्यवहारयोर-
भावश्च । यद्वा तुच्छत्वेनेत्यस्याभावत्वेनेति नार्थः किं त्वलीकत्वेनेति ।
तथा च भावविशेषैरेवाभावस्य व्यवहारोपपत्तेर्भावातिरिक्ताभावस्याऽप्रामाणि-
कत्वेन कार्यत्वशङ्कानास्पदत्वादित्यर्थः ।

तत्रापि व्यभिचारस्योक्तत्वादिति । तद्भावनानुरक्तधीबोध्यत्वं
न तत्तादात्म्यधीबोध्यत्वम् । भाष्योदाहृते पटे तन्तुतादात्म्यबुद्ध्यभावाद-
तस्तद्वैशिष्ट्यबुद्धिबोध्यत्वं तदिति वक्तव्यं तत्त्वालोकसंयुक्तत्वेनैव चाक्षुषधी-
वेद्यत्वनियते घटे व्यभिचार इति प्रागेवोक्तम् । तस्मात्तद्भावोपलब्धिनियत-
भावोपलब्धिकत्वरूपहेत्वर्थप्रदर्शनपरमिदं भाष्यमित्यर्थः । प्रागनुपलब्ध-
त्वादित्यनेन किं पटाकारोल्लेखेनानुपलब्धिर्विवक्षिता उत स्वरूपेण । नाद्यः ।
तदानीमातानवितानरूपाकारविशेषाभावेन तदाकारोल्लेख्युपलब्ध्यभावस्यो-
पपन्नतया तस्य द्रव्यभेदासाधकत्वादित्यभिप्रेत्य द्वितीयमसिद्ध्या दूष-
२३९ । २५ यति **अभेदवादिन इति** । ननु कारणवत्कार्यमपि सत्यमित्येतावता सत्य-
द्वयं न प्रसज्यते रज्ज्वदन्तायां भुजङ्गइवारोपिते कार्ये कारणब्रह्मसत्ताया

* ध्वंसते इति १ पु॰ पा॰ । † ध्वस्त इति २ पु॰ ।

एव प्रतीतिः । तदनन्यत्वं च न तदभेदः किं तु तद्व्यतिरेकेणाभाव
इत्यधिकरणारम्भे वर्णितत्वादित्याशङ्क्याह **उक्ताभिप्रायानभिज्ञ इति** । २४० । १३
भावे चोपलब्धेः* सत्त्वाच्चावरस्येति† सूत्रद्वयभाष्यटीकाग्रन्थच्छायया कार्य-
कारणयोरभेद इष्ट इति प्रतिभासेन प्रागुक्तमर्थमननुसंदधानस्यैवेयं
शङ्केत्यर्थः । **सत्त्वं चेदिति** । सापेक्षं वाक्यमध्याहारेण पूरयति **त्रिष्विति** ।
यद्येवमिति टीकावाक्यमस्यैव वाक्यस्यार्थसंग्राहकमिति न पौनरुक्त्यम् । सत्त्वं
चैकं कार्यकारणयोरिति षष्ठी भेदगर्भसंबन्धार्था चेदग्रिमहेतूक्तिर्विरुध्येते-
त्याशङ्क्य स्वरूपपदाध्याहारेण व्याचष्टे **कार्येति** । कार्यकारणयोरबाधित-
स्वरूपभूतं यत्सत्त्वं तदेकमित्यर्थः । **तस्यापि** तस्यैवेत्यर्थः । वैपरीत्य-
मेवास्त्विति खल्वियं शङ्का । अस्यां शङ्कायां तथा सति हीति ग्रन्थस्य
परिहारसमर्पकत्वेनान्वयाभावात्तत्संघटनार्थमभिप्रायानभिज्ञं शङ्कावादिनं प्रति
स्वाभिप्रायोद्घाटनपरं वाक्यमध्याहरति **न हीति** । साक्षादभेदं मुख्याभेदं
न ब्रूम इत्यर्थः ।

तत्र तयोरारोपितत्वेनेति । ननु कारणमिह ब्रह्म यत्सदेव
सोम्येदमिति श्रुतं यद्विज्ञानाच्च सर्वतत्त्वविज्ञानं प्रतिज्ञातं ततश्च सद्रूपे
कारणे कार्यस्यैव समारोपः कथमिह कारणस्यापि समारोपोक्तिः । उच्यते ।
कार्यकारणे उभे अपि सत्ये वस्तुतः परस्परं भिन्ने इत्येवंरूपेण द्वयोरपि
सद्रूपे कारणे ब्रह्मण्यारोपितत्वं विवक्षितमिति न दोषः । एवमभिप्रायो-
द्घाटने कृते पुनस्तस्याप्युपरि वैपरीत्यशङ्कां परिहारग्रन्थनिवर्त्यत्वेन
दर्शयति **यदि मन्येतेति** । ननु सत्त्वमारोपितं चेदारोपितसत्त्वे कार्यका- ,, । १८
रणे अप्यारोपिते स्यातां कथं त‡त्सत्त्वमेवेत्यवधारणम् । उच्यते । सत्त्वस्या-
भिन्नत्वेनारोपो विवक्षितः । एवं च§ द्वे सत्त्वे स्यातामिति नाभेदसिद्धिरि-
त्येषा प्राक् कृतैव शङ्का स्थापितैव भवति तयोः सत्त्वस्य वा समारो-
पितत्वप्रसङ्ग इति टीकाग्रन्थो ऽप्युपपादितो भवति । अन्यथा सत्त्वस्य
समारोपितत्वे तद्धर्मिणोः कार्यकारणयोरपि समारोपितत्वमवर्जनीयमिति
वाकारेण विकल्पतः समारोपस्य प्रसञ्जनमनुपपन्नं स्यात् । ननु भिन्नत्वेन

---

* ब्या॰ सू॰ अ॰ २ पा॰ १ सू॰ १५ । † ब्या॰ सू॰ अ॰ २ पा॰ १ सू॰ १६ ।
‡ तच्छब्दो नास्ति १ पु॰ । § एवं चेदिति १ पु॰ पा॰ ।

कार्यकारणयोः समारोपितत्वं सिद्धान्तिना स्वीकृतम् अभिन्नत्वेन सत्त्वस्य
समारोपितत्वं पूर्वपक्षिणा । एवमुभाभ्यां स्वीकृतस्यान्यतरसमारोपितत्वस्य
प्रसञ्जनं कस्यानिष्टमिति क्रियतइत्याशङ्क्य स्वीकृतार्थप्रसञ्जनं फलमाह
२४० । १९ **अयुक्तं दर्शयितुमिति** । उभाभ्यामङ्गीकृतयोरारोपयोर्मध्ये ऽयुक्तमारोपं
निर्द्धारयितुं स्वीकृतप्रसञ्जनमित्यर्थः । अयुक्ततामिति पाठे पूर्वपक्ष्यङ्गीकृ-
तारोपस्यायुक्ततां दर्शयितुमित्यर्थः । **तामेवेति** । द्वितीयपाठानुसारी स्त्रीलि-
ङ्गनिर्देशः । प्रथमपाठे तु तमेवेति पुँल्लिङ्गनिर्देशेन भाव्यम् । ननु कार्य-
कारणयोः सत्त्वस्य वा समारोप इति प्रसक्तस्य पक्षद्वयस्य कथं भेदाभेद-
योरन्यतरसमारोपकल्पनायामित्यनुवाद इत्याशङ्क्य भेदाऽभेदशब्दौ* लाक्ष-
णिकाविति व्याचष्टे **भेदइति** । भिन्नत्वेन कार्यकारणयोरभिन्नत्वेन सत्त्वस्य
च समारोपौ सिद्धान्तिपूर्वपक्षिभ्यां विवक्षितौ न स्वरूपेणेति विभावयितुमित्थं
लाक्षणिकशब्दप्रयोग इति भावः । एवं च कार्यकारणभावसमारोपोक्तिः
फलतो भेदसमारोपपर्यवसिता सत्त्वसमारोपोक्तिश्च अभेदसमारोपपर्यवसि-
तेति फलितार्थमवलम्ब्य वयं त्वित्यादिना भेदस्य समारोपितत्वं व्यवस्था-
पितमिति द्रष्टव्यम् ।

स्वस्मादपीति । न च स्वस्माद् भेदः स्वस्मिन्नास्तीति विषयाभा-
वादेव तद्ग्रहणं न प्रसज्यतइति वाच्यम् । एक एव भेदः स्तम्भकुम्भयोरन्यो-
न्यप्रतियोगिको वर्ततइति प्रकृते पक्षे यः स्तम्भे कुम्भाद्भेदः तस्यैव कुम्भे
ऽपि वर्तमानतया विषयाऽभावस्य वक्तुमशक्यत्वादिति भावः । एवं च
यद्यपि कुम्भएव कुम्भभेदप्रतीतिरुत्पन्ना प्रमा स्याद् विषयाबाधादिति वक्तुं
शक्यं तथापि स्तम्भाद्भेदः कुम्भएव कुम्भाद्भेदः स्तम्भएव उभावपि भेदौ प्रति-
योगिभेदेन भिन्नाविति पक्षे नेदं दूषणं प्रसरेदिति तत्साधारण्यार्थं दूषणान्त-
रमाह **सो ऽसाधुरित्यादिना** ।

तत्र भेदाधिकरणत्वेन भेदप्रतियोगित्वेन च प्रतीत्यपेक्षया† मूलो-
क्तमन्योन्याश्रयं योजयित्वा तत्परिहारार्थम् अधिकरणत्वप्रतियोगित्वयोर्भेद-
२४१ । ६ विशेषणाऽनिवेशने स्वयं दोषमाह **यस्य कस्य चिदिति** । ननु नेदं दोषा-

* भेदाभेदाविति १ पु० पा० ।
† अपेक्षायामिति १ पु०

पादनं युक्तं शुक्तिरजतभ्रमस्थले प्रतियोग्यधिकरणज्ञानरूपभेदग्रहकारणसत्त्वे ऽपि दोषात्तदग्रहोपपत्तेरिति चेन्न । तथा सति भ्रमानन्तरं शुक्तित्वे विशेषदर्शनात् प्राग् दोषनिवृत्तौ तद्दर्शनमनपेक्ष्य रजतभेदग्रहापत्त्या यावद्विशेषदर्शनं भ्रमानुवृत्तेरभावप्रसङ्गात् । न च विशेषादर्शनमेव भेदग्रहप्रतिबन्धको दोष इति न विशेषदर्शनात्प्राग् दोषनिवृत्तिसंभव इति वाच्यम् । एवं हि विशेषदर्शनं रजतभेदग्रहे कारणमङ्गीकृतं स्यात् तच्च न शुक्तित्वदर्शनमात्रं शुक्तित्वरजतत्वयोरविरोधभ्रमदशायां सत्यपि शुक्तित्वदर्शने रजतएव भेदप्रत्ययानुदयात् किं तु रजतभेदव्याप्यत्वेन तद्दर्शनमिति वक्तव्यम् । ततश्च नान्योन्याश्रयानतिवृत्तिः । न चाभेदभ्रमोत्तरभेदप्रत्यये विशेषदर्शनापेक्षायामपि सर्वत्र तदनपेक्षणात्प्राथमिकं भेदप्रत्यक्षं न भेदज्ञानापेक्षमिति नान्योन्याश्रयापत्तिरिति वाच्यम् । तथापि शुक्तौ रजताद्भिन्नत्वसंकीर्णधर्म*प्रतियोग्युल्लेखार्थं भेदव्याप्यत्वेन शुक्तित्वरजतत्वग्रहस्यावश्यापेक्षणीयत्वेनान्योन्याश्रयाऽनिवारणात् । न च वाच्यं शुक्तित्वरजतत्वयोः परस्परं संसर्गाऽभावव्याप्यत्वग्रहस्तदर्थमपेक्ष्यतामिति शुक्तित्वरजतत्वयोरभेदभ्रमदशायां तयोः परस्पराभावव्याप्यत्वाग्रहेण तद्ग्रहार्थं तदुभयभेदग्रहापेक्षणाद् धर्म्यभेदभ्रमदशायां तदुभयभेदग्रहाऽसंभवे† तद्ग्रहार्थं धर्मिभेदग्रहस्याप्यपेक्षितत्वाच्चान्योन्याश्रयाऽनिवारणात् । नन्वन्योन्याश्रयेण भेदे प्रतीतिदूषणे तत्रापि मिथ्याभूतभेदप्रतीतिर्न स्यात् कारणाभावात् । न चेष्टापत्तिः । प्रतीतिमात्रापलापे ऽनुभवविरोधात् । उच्यते । सत्यत्व लोकमर्यादया प्राप्तं भेदग्रहघटितकारणकलापं विना भेदप्रतीतिर्न संभवतीति दूषणमुच्यते न तु व्यावहारिकभेदप्रतीतिरपलप्यते । अस्मन्मते भेदतत्प्रतीत्योर्मायामयत्वेन लोकमर्यादया प्राप्तकारणानपेक्षणात् । न ह्यैन्द्रजालिकप्रदर्शितानेकप्रासादनगरादीनि तदपेक्षाणि न वा ऽस्मन्मते रज्जुसर्पादीनि तदपेक्षाणि । स्वप्नेषु च कदाप्यदृष्टं दृश्यमानं विनैव पूर्वानुभवसंस्कारं प्रागनुभूतमिति प्रत्यभिज्ञायमानं दृश्यते । न च सत्यत्वे ऽपि ईश्वरसामर्थ्यात् क्लृप्तकारणं विना कार्योत्पत्तिः शङ्कनीया । पुरुषसामर्थ्यस्य क्लृप्तकार्यकारणव्यवस्थानतिलङ्घित्वात् । न हीश्वरो ऽपि गगनपर्वतादीन् वैपरीत्येन सृजति संहरति चेति सत्यत्व-

* धर्ममिति २ पु· पा· ।   † संभवेनेति १ पु· पा· ।

बादिभिरुपेयते । अस्माकं त्वध्यारोपापवादेन ब्रह्मात्मैक्यपराणां स्वार्थतात्पर्याभावान्मायिकप्रपञ्चसृष्टिर्यथा तथा वा ऽस्तु । प्रतियोग्यधिकरणयोः स्वरूपेण प्रतीतिमात्रं न पर्याप्तं किं तु परस्परव्यावृत्तधर्मावच्छेदेन प्रतीतिरपेक्षितेति शङ्कायामप्येतदेव दूषणं शुक्तीदमंशरजतयोर्भेदग्रहप्रसङ्गादिति । न हि शुक्तीदन्त्वं रजतत्वं च न परस्परव्यावृत्तं परस्परव्यावृत्तत्वेन ग्रहापेक्षायां तु प्रागुक्त एवान्योन्याश्रयः ।

२४१ । ११ अत एव शुक्तिरजतभेदग्रहेण भ्रमानुदयप्रसङ्गादेव । नन्वसाधारणत्वं न भिन्नत्वं येन भेदान्तरापेक्षा स्यात् किं तु तत्तत्प्रतियोगिकत्वम् । तथा च भ्रमस्थले घटादिप्रतियोगिकत्वभाने ऽपि दोषाद् रजतप्रतियोगिकत्वाऽभानान्न तद्भेदग्रहरूपता धर्मिज्ञानस्य प्रसज्यतइत्याशङ्क्याह **इति दिगिति** । शुक्तित्वाऽग्रहे ऽपि दोषनिवृत्तौ रजतभेदग्रहापत्त्या भ्रमानुवृत्तिर्न स्यादित्यादिदूषणजातमत्रापि भवेदिति भावः । **भेदेनोपजीव्यत्वादिति** । ननु स्तम्भकुम्भोभयवृत्तिभेदो वस्तुत एकमेकं स्तम्भं कुम्भं चाश्रयतु नाम न तावता स्तम्भकुम्भयोः प्रत्येकं सदैक्यं भेदस्योपजीव्यं तदुभयगतपृथिवीत्वादिवद् भेदाश्रयतायामप्रयोजकत्वात् । अस्तु वा यथा कथं चित्स्तम्भकुम्भादिष्वैक्यस्य भेदाश्रयतायामुपजीव्यता किमायातं प्रकृते । न हि तावता कतरः समारोप्य इति विचार्ययोः सद्रूपाऽभेदकार्यकारणभेदयोरुपजीव्योपजीवकभावः समर्थितो भवति । उच्यते । कार्यकारणयोर्भेदमात्रमिह न निराकार्यं व्यावहारिकभेदस्य सिद्धान्तिना ऽप्यङ्गीकृतत्वात् किं तु सत्यभेदो निराकार्यः । भेदसत्यत्वं च धर्मिसत्यत्वसापेक्षम् । अतः कार्यकारणयोः सद्रूपाभेदप्रतीतिमपेक्ष्य तयोः सत्यभेदप्रतीतिः संपादनीयेति* तदभिप्रायेयमुपजीव्यत्वोक्तिः । **भ्रान्तभेदानुवाद इति** । तदनुवादस्य चेदं फलं

,, । १६ यत्सद्रूपानुगतप्रत्ययात्सद्रूपेण कार्यं कारणाभिन्नमिति खल्वभेदप्रतिपादनं कार्यं तत्रासंकीर्णधर्मिप्रतियोग्युल्लेखार्थं भेदप्रतीतिरपेक्षणीया । अतो भेदस्याप्यभेदोपजीव्यता तुल्येति शङ्काया निवर्तनम् । तन्निवर्तनं चैवं विवक्षितम् । अस्मादिदमभिन्नमित्यनेनेदमसदृशमित्यत्र सादृश्यस्येव भ्रान्ति-

---

* उपपादनीयेति १ पु० पा० ।

प्रसक्ततया ऽनुप्रविष्टस्य भेदस्य यौ धर्मिप्रतियोगिनौ तयोरुल्लेखो ऽयं न
त्वभेदस्य । असादृश्यवदभेदस्य निष्प्रतियोगिकत्वात् । ततश्च नोपजीव्य-
तया प्राबल्यं प्रतिषेध्यत्वात् । अन्यथा नेदं रजतमिति प्रतीतौ प्रसक्तितया
रजतप्रतीतिरपेक्षणीयेति तस्याः प्राबल्यं भवेदिति । नान्यासतीति भाष्ये
असतीति पदच्छेदमभिप्रेत्य नकारानुषङ्गेण नाप्यसतीति यद्वाक्यान्तरं
दर्शितं* तच कार्यरूपेणेत्यधिकाध्याहारस्य फलमाह कार्येति । कार्यरूपेण २४१ । १८
शक्तेः सत्त्वमिहापाद्यते प्रसाध्यते तथा सत्येव हि कार्यस्य प्रागुत्पत्तेरस-
त्त्वप्रतिक्षेपः सिसाधयिषितः सिध्यति न स्वरूपतस्तत्सत्त्वप्रसाधनमात्रेण अत-
स्तत्सिद्ध्यर्थमध्याहार इत्याशयः ।

पुनरुक्तिमाशङ्क्येति । यद्यपि समवायदूषणार्थत्वे ऽपि समवायाभ्युप-
गमाच्च साम्यादनवस्थितेः†रिति द्वितीयपादसूत्रे वक्तव्येन पुनरुक्तिर्भवेत् तथापि
तस्यैव संगृह्य स्मरणार्थत्वेन तदपुनरुक्तिर्द्रष्टव्या । **व्यासक्तत्वादिति** ।
व्यापाराविष्टतया पूर्वापरीभूतत्वादित्यर्थः । **इतरथा हीति** । सांख्यानाम-
स्माकं च सत्कार्यवादोपपादनच्छायासाम्ये ऽपि कार्ये कारणसत्तयैव सद्रूपं
स्वतस्त्वनिर्वचनीयमिति भाष्यसंदर्भतात्पर्या ऽकथने सांख्यवाद एवाङ्गीकृतः
प्रसज्येतेत्यर्थः । **नटवदिति** । भाष्योदाहृतदृष्टान्तानुसारि वाचस्पतिमतमि-
त्याह **अज्ञातं नटवदिति** । नटो हि द्रष्टृभिरविज्ञातनिजरूप एव तत्तदभि-
नेयासत्यरूपतां प्रतिपद्यते एवं जीवैरविज्ञातं ब्रह्मासत्यवियदादिप्रपञ्चाकारतां
प्रतिपद्यतइति दृष्टान्तोक्त्या वाचस्पतिमतं भाष्याभिमतं निश्चीयतइत्यर्थः‡ ॥

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥ २४३ । १

ब्रह्मात्मैक्यमुक्तमिति । विषयवाक्यश्रुतसर्वविज्ञानप्रतिज्ञानिर्वाहार्थे
ब्रह्मात्मैक्यमप्यत्र विवक्षितम् । अत एव सूत्रे जीवेष्वभेदं जडेषु तद्व्यतिरे-
केणाभावं च संग्रहीतुं तदनन्यत्वमित्युक्तमिति भावः । स्वाभाविकं ब्रह्म-
णैकत्वं जीवा अविद्योपहिता न जानन्तीत्येकवाक्यतया पाठः सङ्गतः । न
जानन्तीति स्थाने स्वेष्टं न जानन्तीति पाठे तेषामज्ञानमस्तीति पाठे च
स्वाभाविकमित्यारभ्य वाक्यत्रयमिति योजनीयम्§ ॥

---

* वाक्यान्तरीयदर्शितमिति १ पु· पा· । † व्या· सू· अ· २ पा· २ सू· १३ ।

‡ अत्र षष्ठम् आरम्भणाधिकरणं पूर्णम् । § अत्र सप्तमम् इतरव्यपदेशाधिकरणं पूर्णम् ।

२४३ । १३ **उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥ २४ ॥**

अद्वितीयत्वप्रयुक्तामनुपपत्तिमिति । नन्वद्वितीयस्यापि ब्रह्मणो मायया सगुणेश्वरभावापन्नस्य कर्मसापेक्षता वैषम्यनैर्घृण्ये न सापेक्षत्वा*-दित्यधिकरणे दर्शयिष्यते अत उपादानैक्ये ऽपि कर्मवैचित्र्यात्कार्यवैचित्र्यं कर्मक्रमात्कार्यक्रमश्च भविष्यतीति चेद् न । दृष्टसाधनभेदतत्क्रमावनपेक्ष्य अदृष्टभेदतत्क्रममात्रेण कार्यभेदतत्क्रमादर्शनादिति भावः । **साधयत्येवेति ।** साधनमिति करणार्थे ल्युटा अतिशयितं साधकं करणमाहुः । अतिशयो ऽव्यभिचाररूपो विवक्षित इति भावः । **कालान्तरे ऽपि† वा स इति ।** सो ऽपि क्षीरस्य धर्म इति भावः । ननु पयोम्बुवच्चेत्तत्रापीति‡ द्वितीयपादसूत्रेण क्षीरपरिणामे ऽपि परमेश्वरसङ्कल्परूपं तद्धर्मभूतं कारणान्तरमस्तीति वक्ष्यते । सत्यं परमेश्वरं कारणं प्रत्याचक्षाणस्य ह्ययं पूर्वपक्षः । न तस्य लोकदृष्टानुवर्तिनः क्षीरपरिणामे कारणान्तरमस्तीति तं प्रत्ययं दृष्टान्तः ।

असहायस्याधिष्ठातृत्वसमर्पकमिति । ननु मन्त्रार्थवादादरे तत एवेश्वरस्य सङ्कल्पमात्रेण स्रष्टृत्वं सिध्यति तदनादरे देवादिदृष्टान्तेनापि न सिध्यतीति कथमिदं सूत्रं देवादिदृष्टान्तप्रदर्शकमुपपद्यतइति चेदुच्यते । अचेतनस्य बाह्यसहकारिनिरपेक्षस्य कारणत्वमुपगम्य चेतनस्यैव तत्प्रत्याचक्षाणः पूर्वपक्षी पादादिमारभ्यानुवृत्तः सांख्य एव । स च परमेश्वरस्य स्रष्टृत्वमसहमानो ऽपि देवादीनामाजानसिद्धं मनुष्यादीनां योगसाध्यं च अणिमादिसत्यसङ्कल्पत्वापरपर्यायप्राकाम्यपर्यन्तमैश्वर्यमन्तःकरणधर्ममङ्गीकरोतीति भूतवशिनां देवादीनां सङ्कल्पमात्रेण स्रष्टृत्वादिकमपि हैरण्यगर्भवदङ्गीकरोत्येव तेषां तदङ्गीकुर्वतश्च तद्विषयमन्त्रार्थवादप्रामाण्यमनुमतमिति तदवलम्ब्य सूत्रप्रवृत्तिः§ ॥

२४४ । १७ **कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २६ ॥**

द्व्यणुकमिति । द्व्यणुकारम्भार्थमेकः परमाणुरणवन्तरेणाऽधश्चोर्ध्वं च पार्श्वतश्चतसृो दिशश्चेति षण्णां दिशां मध्ये यत्किंचिद्दिग्गतेन यदा संसृ-

---

* व्या. सू. अ. २ पा. २ सू. ३ । † अपिशब्दो नास्ति ५ पु. ।

‡ व्यासू. अ. २ पा. २ सू. २४ ।

§ अत्र अष्टमम् उपसंहारदर्शनाधिकरणं पूर्णम् ।

ज्यते तदा दैवादवशिष्टषड्दिग्गतैरपि कैश्चिदणुभिरस्य संसर्गो भवन्न निवारयितुं शक्यः । ते च षडपि परमाणवो मध्यगतपरमाणौ भिन्नभिन्नप्रदेशावच्छिन्ने संसृज्यन्ते चेत्स परमाणुः षडंशः स्यादिति तत्परिहाराय समानदेशा इति वक्तव्यम् । तथा च प्रथिमानुपपत्तिरित्यर्थः । द्व्यणुकएव प्रथिमानुपपत्तिदोषे वक्तुं शक्ये ऽपि तार्किकाऽनभिमतं सप्तपरमाण्वारब्धं द्रव्यं युक्त्या अङ्गीकर्त्तव्यमापाद्य तत्रैतद्दोषाभिधानम्

> षट्केन युगपद्योगात्परमाणोः षडंशता ।
> षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः ॥

इति न्यायवार्तिकोदाहृतं परमाणुवाददूषणश्लोकमनुसृत्य । ननु मूर्तानां समानदेशताविरोधादेकस्मिन् परमाणौ षट्परमाणुसंयोगा व्यापका न संभवन्तीति सप्तपरमाण्वारब्धद्रव्याऽसंभवाद् द्व्यणुकएव प्रथिमानुपपत्तिदोषो वक्तुं युक्त इति चेन्न । द्व्यणुकैस्त्र्यणुकारम्भं वदतस्तार्किकस्य मते परमाणुषु मूर्त्तत्वे ऽपि समानदेशताविरोधस्य वक्तुमशक्यत्वादेकद्व्यणुकारम्भकपरमाणुसंयोगे सत्येव तदारम्भकपरमाण्वन्तरे द्व्यणुकान्तरारम्भकपरमाणुसंयोगस्यापि तेनाङ्गीकर्त्तव्यत्वात् कारणाऽकारणसंयोगात्कार्याऽकार्यसंयोग इति तन्मते यदवयवावच्छेदेनावयविद्वयसंयोगस्तयोरवयवयोरपि संयोगावश्यम्भावात् । तस्मात् षण्णां समानदेशत्वइति श्लोकानुसरणं युक्तमेव । तदनुसरणं च द्व्यणुके कैमुतिकन्यायेनैतद्दोषसंयोजनार्थं शङ्कान्तरनिवर्त्तनार्थं च । तच्च शङ्कान्तरमेवं मा भूत् परमाण्वारब्धद्रव्येषु महत्त्वं तदारब्धेषु त्र्यणुकेषु तत्संभवाद् दृश्यमानघटादिमहत्त्वोपपत्तिरिति तन्निवर्त्तनमेव विवक्षितम् । त्र्यणुकेषु वा कथं महत्त्वं भवेत् कारणमहत्त्वाभावात् । कारणबहुत्वाद्भवेदिति चेन्न । सप्तपरमाण्वारब्धद्रव्ये सत्यपि कारणबहुत्वे महत्त्वाऽभावाद् व्यभिचारेण कारणबहुत्वस्य कार्यमहत्त्वाऽप्रयोजकत्वात् । ननु निरवयवेष्वसंयुक्तप्रदेशासंभवेन तद्बहुत्वस्य कार्यमहत्त्वाप्रयोजकत्वे ऽपि सावयवककारणबहुत्वं कार्यमहत्त्वप्रयोजकं स्यादिति चेन्न । सावयवानामपि परमाण्वारब्धद्रव्याणां संयोगस्तदारम्भकपरमाणुद्वयसंयोगावच्छेदेन वाच्यः हस्तपुस्तकसंयोगावच्छेदेनेव कायपुस्तकसंयोगः । परमाणुद्वयसंयोगश्चेद्व्याप्यवृत्तिस्तदा तत्कार्यद्रव्यसंयोगो ऽपि तदवच्छेदेन भवन् व्याप्यवृत्ति-

रेव स्यादिति परमाण्वारब्धद्रव्येष्विव तदारब्धेषु त्र्यणुकेष्वपि महत्त्वापत्तिः समानैव ।

२४५ । ३ **द्व्यणुकपिण्ड इति** । कैमुतिकन्यायसिद्धार्थप्रदर्शनार्थं द्व्यणुकग्रहणम् । **अव्याप्यवृत्ताविति** । व्याप्यवृत्त्यभावे संयोगस्य तत्र वृत्तिरेव न स्यादित्यव्याप्नुवन्त्वेत्यादिग्रन्थेनोक्तमित्यर्थः । अव्यापने वेत्यनुवादस्याव्याप्नुवन्त्वेत्यनुवादाद् भिन्नार्थत्वसिद्धये प्रदेशभेदेनाव्याप्यवृत्तित्वं तदर्थमाह **अथेति** । **तत्राहेति** । ननु परमाणूनामवयवाभावे ऽपि नानादिगवच्छेदभेदेन तत्संयोगानामव्याप्यवृत्तितोपपद्यतइति चेन्न । दिशामप्यसंबद्धानामवच्छेदकत्वासम्भवे तत्संबन्धानां संयोगरूपाणां व्याप्यवृत्तित्वेनातिप्रसक्ततया तदव्याप्यवृत्तितोपपादकावच्छेदकत्वाऽसम्भवात् तत्राप्यवच्छेदकान्तरान्वेषणे अनवस्थानात् । ननु मेरुसर्षपपरिमाणसाम्यप्रसङ्गरूपप्रतिकूलतर्केण मूर्तत्वलिङ्गकोक्तानुमानपराहतिर्वक्तुं न शक्यते । अनन्तक्षणघटितयोरवान्तरकल्पमहाकल्पयोरिवाऽनन्तपरमाण्वारब्धयोर्मेरुभूगोलकयोरिव चानन्त्यविशेषो*पपत्तेरित्याशङ्क्य नानेनेत्थं प्रतिकूलतर्कपराहतिरुच्यते किं तु मेरुसर्षपौ समानपरिमाणौ मूर्तत्वात्संप्रतिपन्नसाध्यघटद्वयवदित्यनुमानस्य धर्मिग्राहकप्रत्यक्षेणेव शङ्कितानुमानस्य धर्मिग्राहकानुमानेन बाध उच्यते लाघवसहकृतेनानुमानेन परमाणोर्निरवयवत्वेन सिद्धेरित्याहुः ।

यदि प्रत्यक्षेति । एवं च बाध एवात्र विपक्षे दण्डो विवक्षितः । इत्थं परप्रक्रियेहानूदिता । न हि स्वमते परमाणोस्तन्निरवयवत्वस्य वा
,, । ६ सिद्धिरभ्युपगम्यते । **कार्यकारणभाव इति** । कार्यकारणयोर्भाव इति द्विवचनान्ताद् भावशब्देन तयोः पृथग्भावो लभ्यतइत्यारम्भवादे पर्यवसानम् । अन्यत्रापि कृत्स्नैकदेशविकल्पेन दूषणं विवक्षितम् । अवयव्यवयवे वर्तमानः कार्त्स्न्येन वर्तते एकदेशेन वा । आद्ये क्व चिदेवावयवे ऽवयविपरिसमाप्तेरवयवान्तरस्य तदनारम्भकत्वप्रसङ्गः । द्वितीये त्वेकदेशो ऽवयव एवेति तत्राप्यवयविनो वृत्तिविकल्पे ऽनवस्था । तथा अवयवः कृत्स्नमवयविनमारभते तदेकदेशं वा । आद्ये अवयवान्तरस्याननुप्रवेशप्रसङ्गः ।

---

* विशेषाद्विशेषेति १ पु॰ पा॰ ।

द्वितीये सो ऽप्येकदेशो ऽवयव इति तस्याप्येकदेशान्तरारम्भकत्वे अनवस्थेति । इदं दूषणमारम्भणाधिकरण*भाष्येण सिद्धमित्यत्र नोपन्यस्तम्† ॥

सर्वोपेता च तद्दर्शनात् ॥ ३० ॥ २४५ । ७

अशरीरस्य न मायेति । शरीरग्रहणमिन्द्रियवर्गस्याप्युपलक्षणम् । विकरणत्वादिति हि सूत्रकृता पूर्वपक्षबीजमुद्भावयिष्यते । सूत्रे ऽपि करणग्रहणं शरीरस्याप्युपलक्षणम् । शरीरेन्द्रियरहितस्य मायाशक्तिर्न संभवतीति तर्कस्य श्रुतेस्तु शब्दमूलत्वादि‡त्यत एव परिहारे सिद्धे ऽपि शुष्कतार्किकः श्रुतिमात्रेण न परितुष्येदिति तत्परितोषाय प्रमेयसम्भावनाजनकश्रुत्यनुग्राहकन्यायप्रदर्शनार्थमधिकरणारम्भः । तदर्थमेव पूर्वाधिकरणे ऽपि श्रुतेस्त्विति तुशब्दद्योत्यतच्छ्रुत्यनुग्राहकन्यायोपन्यासः§ ॥

न प्रयोजनवत्त्वात् ॥ ३२ ॥ ११ । १८

स्वापादौ प्रयोजनानभिसंधिरूपे श्वासे साध्याभाववदिति । अत्रादौ सप्तम्यौ समानाधिकरणे । सर्वज्ञानोपरमरूपो हि स्वापादिः प्रयोजनाऽनभिसंधिरूपो ऽपि भवति । श्वासादौ प्रयोजनाऽनभिसंधिरूपे साध्याभाववदिति क्वचित्पाठः । तस्मिन् पाठे प्रयोजनाभिसंधिरहितइत्येतदर्थकं द्वितीयसप्तम्यन्तं श्वासादिविशेषणम् । पाठद्वये ऽपि चेतनक्रिया प्रयोजनाभिसंधिपूर्विकेति टीकोपदर्शितव्याप्तौ व्यभिचाराभावशङ्का । सूत्रे लीलाशब्दस्य क्रियामात्रं विलासरूपक्रिया चेत्यर्थद्वयं संभवति लीलाक्रियाविलासश्चेति स्मरणात् । तत्र क्रियामात्रार्थत्वमादाय यादृच्छिकाङ्गुलीचलनादिक्रियायां स्वाभाविकश्वासनिमेषादिक्रियायां च प्रयोजनोद्देशरहितायां व्यभिचार उक्तः । अथ विलासार्थ॥मादाय व्यभिचार उच्यते तत्रापि तात्कालिकक्षुद्रसुखादिप्रयोजनज्ञानमस्तीति न व्यभिचार इत्याशङ्कां निरस्यतीत्याह **यदुक्तमिति । लीलया कर्तरि सव्यभिचारमिति ।** सुखितस्य सुखानुभवप्रयुक्ता हासगानादिरूपा प्रयोजनोद्देशरहिता दृश्यते । न हि तत्र

---

* व्यासू॰ अ॰ २ पा॰ १ सू॰ १४ ।

† अत्र नवमं कृत्स्नप्रसक्त्यधिकरणं पूर्णम् ।

‡ व्या॰ सू॰ अ॰ २ पा॰ १ सू॰ २७ ।

§ अत्र दशमं सर्वोपेताधिकरणं पूर्णम् ।

|| विलासार्थत्वमिति १ पु॰ पा॰ ।

प्रयोजनमणवपि संभावयितुं शक्यते । दुःखोद्रेके रोदनवत्सुखोद्रेके हासगा-
नादेः प्रयोजनोद्देशरहितस्य सर्वानुभवसिद्धत्वात् । अत एव हसितरुदिता-
२४६ । १३ दिषु कारणमेव पृच्छन्ति न प्रयोजनम् । **न लीलादौ व्यभिचार इति ।**
लीलायादृच्छिकस्वाभाविकक्रियासु च व्यभिचार इत्यर्थः ।

क्रीडार्थं सृष्टिरित्यन्ये भोगार्थमिति चापरे ।
देवस्यैष स्वभावोऽयमाप्तकामस्य का स्पृहा ॥

इति माण्डूक्योपनिषदि तात्कालिकानन्दप्रयोजनलीलात्वमेव क्रीडार्थं सृष्टिरित्यन्यइत्यनेनानभिमतं प्रदर्शितं न तु हासगानादितुल्यप्रयोजनोद्देशरहितं लीलात्वम् ।

स्वभावमेके कवयो वदन्ति कालं तथान्ये परिमुह्यमानाः ।
देवस्यैष महिमा तु लोके येनेदं भ्राम्यते ब्रह्मचक्रम् ॥

इति श्वेताश्वतरोपनिषदि सृष्टेः सृज्यवस्तुस्वभावतैवानभिमतत्वेन प्रदर्शिता न तु स्रष्टृस्वभावता । अतो लीलास्वभावपक्षयोर्न श्रुतिविरोधः । **एतच्छक्यत्वे निदर्शनमिति ।** पर्वतसेतुबन्धनं बहुकर्तृकत्वाद्दुष्करं सत् शक्यमित्यत्र निदर्शनमित्यर्थः । महयां चकारेति पाठः साधुः । मह पूजायामिति धातुः स्वार्थण्यन्तः तस्य कथयतिवदकारान्तत्वादत उपधाया इति वृद्ध्यभावः । महीचकारेति पाठस्त्वस्मादेव धातोरेरजिति कर्मार्थकाजन्तात् च्विप्रत्यये सति अभूततद्भावे तदर्थे अभूतत्वाविवक्षायां योजनीयः । प्रसङ्गात्प्रतिबिम्बेश्वरवादे सैवलीलाशब्दसामञ्जस्यमाह **प्रतिबिम्बगता इति ।** लीलाशब्दस्य क्रीडावाचितायामिदं दूषणं न क्रियमाणवाचितायामनायाससाध्यक्रियालक्षकतायां वा* ॥

२४७ । ७ **वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॥ ३४ ॥**

व्यभिचारमाहेति । युक्तवादित्ववचनरूपविषमवाक्यस्रष्टरि सभ्ये निग्रहानुग्रहरूपविषमकृत्यस्रष्टरि सभापतौ च निरवद्ये हेतुसत्त्वेन व्यभिचार इत्यर्थः । **तत्तत्प्राणिकर्मवासने इति ।** स्यादेव विषमकर्मानुष्ठापनेन वैषम्यं परमेश्वरस्य यदि तत्र स्वातन्त्र्यं भवेन्न त्वेवं सुखदुःखानु-

---

* अत्र एकादशं प्रयोजनवत्त्वाधिकरणं पूर्णम् ।

भावनइव तद्धेतुकर्मानुष्ठापने ऽपि तस्य तत्पूर्वकर्मवासनासापेक्षत्वादिति भावः । **आगताविति ।** पुण्यपापे विना फलभोगाभ्यागतावित्यर्थः ।
वेदान्तानर्थक्यमिति । अकस्मात्पुण्यपापफलाभ्यागतौ यथा विधिनिषेध- २४८ । ९
शास्त्रानर्थक्यम् एवं पुनः संसारोद्भूतौ मोक्षशास्त्रानर्थक्यमिति भाष्ये विवक्षितमिति व्याचष्टे इत्यर्थः । **अनादिकर्मतैवेति*** । स्यादेव कर्मानुष्ठापने वैषम्यं यदि क्व चित्सर्गादौ पूर्वकर्मवासनानपेक्षः किं चित्कर्मानुष्ठापयेत् क्व चिदपि कल्पे तन्नास्ति बीजाङ्कुरन्यायेनानादित्वात् कर्मतद्वासनाप्रवाहस्येत्यर्थः । **भविष्यच्छ्रपणमपेक्ष्येति ।** इदमगत्या ऽङ्गीकृतम् । प्रकृतावपि तुषोपवापसमये कपाले सिद्धस्य पुरोडाशसंबन्धस्याभावात् । यत्र तु प्रकृतौ सिद्धसंबन्धो लभ्यते न तत्र भविष्यत्संबन्ध आश्रीयते यथा ऽग्निहोत्रहवण्या हवींषि निर्वपतीत्यत्र तत्र ह्यग्निहोत्रं यया हुतं सा ऽग्निहोत्रहवणी गृह्यते न तु यया होष्यते सापि प्रकृत्यारम्भात् पूर्वमग्निहोत्रस्य हुतत्वेन प्रकृतिभूतयोर्दर्शपूर्णमासयोः सिद्धसंबन्धवत्त्वात् । यत्र तु तद्विकृतौ पवमानेष्टौ सिद्धाग्निहोत्रसंबन्धा ऽग्निहोत्रहवणी न लभ्यते तत्राऽसंभवाद् निर्वापगुणभूताया अग्निहोत्रहवण्या लोप इत्येव गुणलोपे च मुख्यस्येत्यधिकरणे† प्रतिपादितम्‡ ॥

सर्वधर्मोपपत्तेश्च ॥ ३७ ॥ २४८ । १३

निर्गुणे ऽप्यविरुद्धमिति । इदमत्र वक्तुं शक्यम् । ब्रह्मणो निर्गुणत्वमसिद्धं सर्वज्ञत्वादिगुणकत्वात्तस्य निमित्तोपादानभावोपपादनार्थं सर्वज्ञत्वसर्वशक्तिकत्वयोः सर्वधर्मोपपत्तेश्चेत्यनेनैव सूत्रेण प्रतिपादनादन्योन्यधर्मांश्चाध्यस्येत्यादिभाष्यवाक्यैरपि तदनुमोदनाद् वस्तुतो धर्मिभिन्नं ज्ञानादिकं ब्रह्मणि नास्तीति चेन्न । घटाद्युपादानेष्वपि वास्तवतद्भिन्नरूपादिगुणाऽसंप्रतिपत्तेः । तत्त्वतो ब्रह्मणि व्यावहारिकगुणत्वमपि नास्ति किं तु स्वरूपप्रकाश एव तत्तद्विषयोपरागेण तत्तज्ज्ञानत्वव्यपदेशमात्रमिति चेन्न । श्रुतिस्मृतिसिद्धसर्वज्ञत्वादिव्यवहारालम्बनया व्यावहारिकधर्मधर्मिभेदकल्पनोपपत्तौ व्यपदेशमात्रत्वाभ्युपगमाऽयोगाज्जीवब्रह्मणो-

* अनादितैवेतीति १ पु॰ पा॰ । † जै॰ सू॰ अ॰ १० पा॰ २ सू॰ ६३ ।
‡ अत्र द्वादशं वैषम्यनैर्घृण्याधिकरणं पूर्णम् ।

रिव ब्रह्मतज्ज्ञानयोरप्यनादिविभागाङ्गीकारेण धर्मज्ञानएवागमापायिविषयो-परागप्रयुक्तावान्तरभेदकल्पनोपपत्तेश्च । तथापि ब्रह्मणि प्रपञ्चगतरूपादिगुणो नास्तीति चेत् किं ततः । सगुणमेवोपादानमिति नियममातिष्ठमानस्य कुतार्किकस्य परितोषाय गुणवत्त्वमुपपादितमेव । न च तन्मते ऽप्यस्ति नियमः कार्यगतगुणेनोपादानेन भाव्यमिति । द्व्यणुकेषु महत्त्वाभावात् । न च विशेषगुणविषयो ऽयं नियमः । परिमाणादिव्यावृत्तविशेषगुणत्वाऽनिर्वचनात् । किं च निर्गुणस्य नोपादानत्वमिति परमते ऽपि नास्ति नियमः । प्रथमक्षणे ऽस्येव घटस्य रूपादिसमवायिकारणत्वाभ्युपगमात् । उपादानशब्देन द्रव्यसमवायिकारणविवक्षायामप्रयोजकत्वादिति । तदेतत्सर्वमाचार्याणामपि हृदयस्थमेव । पूर्वाधिकरणेषु विवर्तवादमनपेक्ष्यापि परिहारान्तरप्रतिपादनात् । किं तु सूत्रभाष्याद्यालोचनया स्फुटमिति कण्ठतो न प्रतिपादितम् ।

२४८ । १० **नित्यत्वाद्यारोपोपलब्धेरिति** । ननु जातिर्नित्येति न प्रत्यक्षारोपो ऽस्ति शब्दानुमानजारोपेषु न प्रातिभासिकविषयोत्पत्तिरस्ति । अनित्यत्वारोपोपलब्धेरिति पाठे ऽप्ययमेव दोषः । न हि घटे दृश्यमाने घटत्वं नष्टमिति प्रत्यक्षारोपः संभवति । नष्टे घटे तत्संभवे ऽपि तत्र घटत्वस्य धर्मिणो ऽनभिव्यक्त्या न तद्धर्मिको नष्टत्वारोपः प्रत्यक्ष इत्युपपद्यते । सत्यम् । दशमस्त्वमसीति बोध्यस्येव यस्य सन्निहिते विषये नष्टत्वभ्रमः स व्यवस्थितविषयश्चेत्तस्य तद्गतजातिनष्टत्वभ्रमः सन्निहितजातिधर्मिकः प्रत्यक्ष उपपद्यतइति तदभिप्रायमनित्यत्वारोपोपलब्धेरिति वचनम् । नित्यत्वेति पाठस्तु मिथ्यात्वेन ज्ञाननिवर्त्यायां जातौ शब्दानुमानजे नित्यत्वारोपे ऽपि प्रातिभासिकविषयोत्पत्तिरस्तीति पक्षमाश्रित्य नेतव्यः । इदमुपलक्षणम् । रात्रौ दीपप्रभायां नीलोत्पलवर्णे रक्तवर्णत्वारोपः विभागे संयोगाभावत्वारोप इत्यादिकमप्युदाहरणं द्रष्टव्यम् * ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीवेदान्तकल्पतरुपरिमले द्वितीयाध्यायस्य प्रथमः पादः ॥

---

* अत्र त्रयोदशं सर्वधर्मोपपत्त्यधिकरणं पूर्णम् ।

अथ द्वितीयाध्यायस्य द्वितीयः पादः ।

रचनानुपपत्तेश्च नानुमानम् ॥ १ ॥ २५० । ७

मोक्षमाणानामिति । मुचो ऽकर्मकस्य गुणो वेति सूत्रेण
कर्मणः कर्तृत्वविवक्षणादकर्मकस्य सन्नन्तस्य मुचेर्गुणः । अत्र लोपो ऽभ्या-
सस्येत्यभ्यासलोपः । **संयोगादयो हीति ।** स्थूलपिण्डस्य यः केन चित्सं-
योगस्तद्विभागः परिमाणविशेषो गुरुत्वविशेषो वा न तेषां कारणपर्यन्तमनुवृत्ति-
रस्तीति न तेषु व्यभिचार इत्यर्थः । ननु तथापि रूपे व्यभिचारः स्थूलपिण्डे
यद्रूपं तस्यैव कणे ऽपि दृश्यमानत्वादिति चेद् न तावत्कार्यकारणभेदवादिमते
व्यभिचारः । तन्मते कारणे कार्ये च रूपभेदात् । नापि कारणातिरिक्तकार्यानि-
र्वचनीयत्ववादिमते । तन्मते कार्यवत्तद्रूपस्याप्यनिर्वचनीयस्याभ्युपगमसंभ-
वात् । नापि कार्यकारणाऽभेदवादिनः सांख्यस्य मते । तन्मते पञ्चतन्मात्रप्र-
कृतौ तामसाहङ्कारे रूपाभावेन तस्य सूक्ष्मकारणपर्यन्तानुवृत्त्यभावात् । ननु
चेतनानधिष्ठितत्वं सांख्येन साध्ये न प्रवेशितमतो विरुद्धत्वाभिधानमयुक्त-
मित्याशङ्क्य तदप्रवेशने सिद्धसाधनं स्यादिति तत्परिहाराय तत्प्रवेशना-
वश्यंभावमापाद्येदं विरुद्धत्वाभिधानमिति योजयति **अयमत्रेति ।**
एवंशब्दस्येति । तथा च यथा कृतकत्वं विरुद्धम् एवं समन्वयादि-
विरुद्धशब्दानुषङ्गेण वाक्ययोजनेति भावः । ननु सांख्यानुमाने विरुद्ध-
त्वोद्भावनपरं सूत्रमित्युक्तं सिद्धान्त्युद्भावनीयकिंचिदनुमानपरमिति नोक्त-
मत उपाधिशङ्केयमस्थानविजृम्भितेत्याशङ्क्य विरुद्धत्वोपपादनाय हेतोः
साध्यविपर्ययव्याप्तिर्या सिद्धान्तिना उपपादनीया तत्रेदमुपाध्युद्भावनमित्य-
वतारयति **सत्त्वाद्यन्वितत्वादिति ।** ननु साधनोपाध्योः साध्यव्या- २५१ । २१
प्यत्वेन प्रतीयमानयोरुपाधिरेव वस्तुतः साध्यव्याप्यः साधने तु तद्गतं
साध्यव्याप्यत्वं सन्निधानादारोप्यते । अत एवोप समीपे स्थित्वा ऽन्यत्र
स्वधर्माधायकत्वाज् जपाकुसुमादिवन्निषिद्धत्वादिरुपाधिरित्युच्यते । ततश्च
साधनमेव सर्वत्र सोपाधिकं न साध्यमतो ऽत्र साध्यस्य सोपाधिकत्व-

शङ्का न युक्तेत्याशङ्क्य समानन्यायत्वात्साधनवत्साध्यस्यापि सोपाधिकत्वं
२५१ । २३ वक्तुं युक्तमित्युपपादयति यथेति । एवं चान्तरङ्गत्वे स्वधर्मासञ्जकत्व-
लक्षणमुक्तमुपाधिपदप्रवृत्तिनिमित्तं यद्यपि नास्ति किं तु साध्यान्तरएव तथा-
प्यन्यदेव प्रवृत्तिनिमित्तं किं चिदनुमानदूषणोपाधावस्तु । न हि सर्वत्र
उपाधिपदस्य तदेव प्रवृत्तिनिमित्तमिति नियमः उपाधिर्ना धर्मचिन्ता कुटु-
म्बव्यापृतस्तु यः स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयमित्याद्यभि-
धानकोशेषु तस्योक्तप्रवृत्तिनिमित्तरहितार्थान्तरवाचकत्वस्यापि स्मरणादिति
भावः । ननु व्यतिरेकव्याप्त्यनवधारणे ऽप्यन्वयसहचारमात्रेण केवलान्व-
यिनीवान्वयव्याप्तिर्ग्रहीतुं शक्येत्याशङ्क्याह इतरथेति । व्याप्यव्यापकयोर्व्य-
तिरेकवत्त्वे * यत्र व्यापकाभावस्तत्र व्याप्यत्वाभिमतं वर्त्ततइति व्यभि-
चारशङ्काया निरसनाय तत्र तदभावो ऽवधारणीयः । न च तदवधारणं
शक्यम् । पक्षान्यत्वरूपव्यापकाभावो हि पक्षमात्रवृत्तिः तत्र च न साध्या-
२५२ । २२ भावनिर्णयो ऽस्तीत्यर्थः । समपदं मुधेति । प्रवृत्तिनिमित्तलाभार्थं सम-
व्याप्त्यन्वेषणमिति शङ्कायाः समाधानं तु अनुपदमेव सिद्धम् । न च प्रवृ-
त्तिनिमित्तपरिज्ञानार्थमिह लक्षणमुच्यते किं तु दूषकतौपयिकरूपपरिज्ञा-
नार्थं (समव्याप्त्यन्वेषणमिति शङ्का †) तदर्थं च साध्यव्यापकत्वमेवापे-
क्षितं न तु तद्व्याप्यत्वमपि । उपाध्यभावेन पक्षे साध्याभावोन्नयनस्य
साध्यव्यापकोपाधिव्यभिचारित्वेन साधने साध्यव्यभिचारोन्नयनस्य वा
तत एव भावात् । शङ्कितस्त्वनुकूलतर्कैरिति । साधने साध्यव्या-
प्यत्वनिर्णायकैरनुकूलतर्कैः शङ्कितोपाधिरुद्धियते इत्यर्थः । उपाधिलक्ष-
णानुप्रविष्टं व्यापकत्वं व्याप्तिप्रतियोगित्वं न भवति येन व्याप्तिलक्षण-
स्योपाधिगर्भतया चक्रकाश्रयः स्यात्किं तु साध्यवन्निष्ठेत्यादिनिरुक्ताव्य-
भिचाररूपं तदिति नवीनैः कृते समाधाने दूषणमुक्तं नवीनैः ‡ । एवमपि
साध्यत्वस्य व्याप्तिगर्भत्वान्न चक्रकोद्धार इति केश्चिदुक्तं तद्दूषणमुपन्य-
२५३ । ८ स्यति नवीनतरास्त्वित्यति । उपाधेः साध्यव्यापकत्वं सपक्षे ग्राह्यं न तु
पक्षे सपक्षे च संप्रतिपन्नं तन्न साधनीयमिति । तत्र साधनीयत्वं न साध्य-

* व्यतिरेकत्वे इति १ पु० पा० । † ( ) एतदन्तर्गतो ग्रन्थो नास्ति १ पु० ।
‡ नवीनतरैरिति १ पु० पा० ।

पदस्यार्थ इत्यन्यत्र साधनीयतया संभाव्यमानत्वं तदर्थ इति वक्तव्यम् । तथा संभावना साधनव्यापकत्वप्रतिसंधानाधीनेति चक्रकापत्तितादवस्थ्यमित्यर्थः । ननु तदपि व्यापकत्वप्रतिसंधानं साधनवन्निष्ठात्यन्ताभावाऽप्रतियोगित्वविषयमस्तु कुतश्चक्रकमिति नवीनतरमते स्पष्टं तद्दूषणं स्वयं किमिति नोच्यतइत्याशङ्क्य अनास्थयेत्याह **असमाकमिति । एतादिति ।** धूमेन वह्न्यनुमाने ऽप्येतत्पर्वतेतरवह्निसाध्यकता स्यादिति शङ्कार्थः । तत्र लाघवसहकृततया वह्निमात्रनिरूपितव्याप्तिग्राहकप्रमाणेनैवात्र केन चित्प्रमाणेन विरोधो नास्ति सिद्धसाधनपरिहारार्थं तन्निवेशनस्य पूर्वपक्षिणा ऽपेक्षणीयत्वेन लाघवादरणाऽयोगात् प्रत्युत दृढप्रमाणानुगुण्यं चास्तीति परिहारार्थः ।

सुखयति सुखंकरोति । सुखदुःख तत्कृताविति चौरादिको २५३ । १
धातुः । ननु प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्था इति सांख्यैः सत्वादीनां सुखादिरूपत्वमुक्तं कथं सुखादिहेतुत्वं तदुक्तमापाद्य दूषणमुच्यते । अथ पद्मावत्युदाहरणटीकायां सत्वादीनां सुखादिहेतुत्वमपि सांख्याभिमतमुपन्यस्तमिति चेत्तर्हि अचोद्यमानं दूषणं न लगेतत्र प्रतियोगिविशेषव्यवस्थितसत्त्वाद्युद्रेकेण तत्र तत्र व्यवस्थितसुखादिजनकत्वस्य समर्थितत्वात् कथं च चन्दनकण्टकादिषु कालविशेषे प्राणिविशेषे च व्यवस्थितं सुखादिजनकत्वं सिद्धान्तिनापि निरसितुं शक्यम् । अनुभवसिद्धत्वादिति चेत् । अयमिह दूषणाभिप्रायः । भावेषु सुखादिसमन्वयः* तथाभूतकारणानुमाने हेतुः किं प्रत्यक्षसिद्धः उत सुखादिकार्यकल्प्यः । नाद्यः । असिद्धेः । न हि घटः सुखी सुखमिति वा ऽनुभवो ऽस्ति द्वितीये सर्वदा सर्वान् प्रति एकरूपं सुखादिकार्यं तत्कल्पकम् उत कालविशेषेषु चानियततत्कल्पकम्† । नाद्यः । असिद्धेरेव चन्दनकण्टकादिषु सुखादिहेतुत्वनियमाभावात् । न द्वितीयः । अनिच्छाप्रयत्नादिरूपाणामपि भावानामनियतेच्छाप्रयत्नादिजनकत्ववदसुखादिरूपाणामपि‡ तेषामनियतसुखादिजनकत्वसंभवेनाऽनियतसुखादिकार्याणां विषयेषु तादूप्याऽकल्पकत्वादिति । एवं च चन्दनाऽन्वये

---

* सममन्वय इति १ पु· पा· ।

† तत्तत्कल्पकमिति १ पु· पा· ।

‡ प्रयत्नादिजनकादिषु सुखादिहेतुत्वनियमाभावाद्रूपाणामपीति २ पु· पा· ।

ऽपि सुखादिव्यभिचाराच्च नैक्यमित्याहेत्यवतारिका विकल्पान्तरोत्तरावतारिकात्वेन योजनीया ।

ननु प्राग्दूषितएवार्थे हेत्वन्तरसमुच्चयावतारिकात्वेन सुखादिव्यभिचारस्य सत्त्वाद्युद्रेकाभावेनोपपत्त्या हेत्वन्तरपरत्वाऽयोगाद्

भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य ॥

कारणमस्त्यव्यक्तम्

इति सांख्यैः प्रधानसाधका हेतवो दर्शिताः । अस्यार्थः । विश्वरूपमेव वैश्वरूप्यं त्रैलोक्यादिवत्स्वार्थिकः प्रत्ययः । विश्वरूपस्य प्रपञ्चस्य कारणमव्यक्तमस्ति । कुतः कारणे कार्यस्य विभागादविभागाच्च । सत्कार्यवादे हि कारणे सत एव कार्यस्याभिव्यक्तिलयौ विभागाऽविभागौ कूर्मशरीरे सत इव तदवयवजातस्य । ततश्च यत्र कारणे सतः प्रपञ्चस्य विभागाविभागौ तदव्यक्तकार्यावस्थं कारणमस्ति । इतश्च तदस्ति । शक्तितः प्रवृत्तेश्च । कारणशक्तितो हि कार्यं प्रवर्तते अशक्तात्कार्यानुत्पत्तेः । शक्तिश्च कारणगता न कार्यस्याव्यक्तावस्थाया भिन्ना प्रमाणवतीति परिमाणसमन्वयावाकरे एव स्पष्टौ । तत्र समन्वयो विकल्पमभिप्रेत्य दूषितः । परिमाणदूषणप्रदर्शनार्थं मुखतो विकल्पयति **परिमितत्वमिति ।**

२५३ । २२ **स्वसत्तामतिक्रम्येति ।** अत्र सह वर्तनं सामानाधिकरण्यं न विवक्षितं किं तु स्वयं यत्र व्याप्नोति तथाभूतवस्तुसत्त्वमात्रमतस्तथैव नभसि लक्षणानुगतिं दर्शयति **कारणं हीति ।** लोके हि कारणं मृदादि घटमिव शरावादिकमपि व्याप्नोति घटस्तु शरावादिकमपि न व्याप्नोतीति दृष्टम् । अतः कार्यं कर्तृ कार्यान्तरे ऽप्यनुगतं कारणं न व्याप्नोतीत्यर्थः । ननु शब्दतन्मात्रकारणकं नभो गन्धतन्मात्रादिकमपि न व्याप्नोतीति तदव्यापनेन लक्षणानुगतिः किमिति नोक्तेत्याशङ्क्याह **गन्धेति ।** नभो गन्धतन्मात्रं सर्वथा न स्पृशतीति तदव्यापनेन लक्षणानुगतिः सुप्रसिद्धेति स्पष्टत्वात् सा ऽत्र नोक्तेत्यर्थः । ननु सत्त्वरजस्तमस्सु व्यभिचार इति परिहारो न युक्तः ।

अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्रगामिनः ।
नैषामादिः संप्रयोगो वियोगो वोपलभ्यते ॥

इति सांख्यैः सत्वादीनामन्योन्यसंसृष्टत्वेन सदा सर्वच सद्भावस्य
वर्णितत्वादित्याशङ्क्याह परिहरतीति । युक्त एवायं परिहारः कार्यकारणभा- २५३ । २६
वमूलो । यस्तादात्म्येन पूर्णानुप्रवेशः सा व्याप्तिस्तदभावरूपमव्यापनम् इह
परिमितत्वमिति विवक्षितत्वात् । न हि यथा तैः कार्यजातमित्यादिग्रन्थेन
तथैव प्रतिपादनादिति भावः । ननु किमनेन कुसृष्ट्या अर्थविशेषानुन्नीय
विकल्पनेन परिमितत्वं परिच्छिन्नत्वमित्येवास्तु । तथा च सर्वगतेषु गुण-
पुरुषेषु न व्यभिचारः । न च गुणानां सर्वगतत्वे प्रलये तेषां साम्या-
पत्तिः सर्गे वैषम्यापत्तिश्च न स्यादिति वाच्यम् । न हि तावता तेषां प्रलये
क्व चित्क्व चित्कदा चिदेव सत्त्वं सर्गादौ यस्य यदोद्रेकस्तस्य तदा ऽन्य-
त्रापि अव्यापनमित्येष विशेषो ऽङ्गीकार्यः । हेमन्तशिशिररात्रिषु निदाघदिवसेषु
सदा सर्वच सतोरेव हिमातपयोः क्व चित्क्व चिदुद्रेकवत् सदा सर्वच सता-
मेव गुणानां क्व चित्कदा चित्कस्य चिदुद्रेक इत्युपपत्तेः । न च हिमातप-
योरवयवभूयस्त्वरूप उद्रेकः संभवति न तु गुणानां निरवयवानामिति वा-
च्यम् । तथापि परिणतिविशेषरूपोद्रेके अनुपपत्त्यभावादिति चेन्न । उद्रेका-
वस्थाया अपि महदहंकाराद्यवस्थावत् कार्यत्वेन तत्रैव परिमितत्वहेतुसत्त्वेन
व्यभिचारादिति भावः । सापीत्यस्यान्वयसौकर्याय यत्पदमध्याहरति या
प्रवृत्तिरिति ।

साध्यविरुद्धोक्ति*वक्रोक्तिरिति । सांख्यानां प्रवृत्तेरिति हेतु- २५४ । १०
विरुद्धस्तदीयसाध्यसाधको न भवतीति कण्ठतो नोक्तं किं तु तस्यैव हेतो-
स्तदीयसाध्यविरुद्धसाध्यान्तरोक्तिरूपवक्रोक्त्या सूचितम् । नित्यः शब्दः कृत-
कत्वादिति साध्यन्तं प्रति अनित्यः शब्दः कृतकत्वादित्यनुमानमनुकूलत-
र्कसहितं हि न केवलं पूर्वानुमाने बाधकतया ऽवतिष्ठते किं तु तस्मिन्
विरुद्धत्वोद्घाटनपर्यन्तमपि भवति । एवं च हेतुत्वेनाभिधानादिति पर्यन्तं
साध्यविरुद्धोक्तौ न हेतुपरं किं तु तस्या एव विवरणमिति योजनीयम् ।
यद्वा तत्पर्यन्तयोनरुक्त्योपपादकत्वेन पूर्वच योजनीयम् । अङ्गित्व†सूत्रे वैष-
म्याऽसंभवमूला हि प्रकृतेरनुपपत्तिरुच्यते इह तु प्रवृत्ते सांख्यसाध्यविपरीतसा-

* विरुद्धत्वोक्तिरिति मूले पाठः † ब्र॰ सू॰ अ॰ २ पा॰ २ सू॰ ८ ।

धने हेतुत्वमुपपद्यतइति स्यात् । साध्यविरुद्धत्वोक्तिः वक्रोक्तिरिति क्व चित्पाठस्तस्मिन् पाठे हेतुत्वेनाभिधानाद्धेतोर्या साध्यविरुद्धत्वस्योक्तिः सूचनारूपा सा वक्रोक्तिर्भवतीत्यर्थः । अस्मिन् व्याख्याने टीकायां वक्रोक्त्येति न करणतृतीया किं तु प्रकृत्यादितृतीयेति भेदः । **आलोचनमात्रमिति ।** वस्तुस्वरूपमात्रगोचरं ज्ञानमालोचनम् । इदमित्थमित्यध्यवसायरूपा तु वृत्तिः त्रिविधान्तःकरणमध्ये बुद्धिरूपस्यान्तःकरणस्येति सांख्यानां मतम् । **कर्मपरिपाकावसराभिज्ञस्येति ।** ननु कर्मपरिपाकापेक्षा सांख्यपक्षे ऽपि समाना धर्माऽधर्मयोर्मध्ये यः पक्वस्तेनैव तदितरस्य प्रतिबन्ध इति तन्मते ऽपि वक्तव्यत्वादिति चेन्मैवम् । चेतनाधिष्ठानरहितयोः* पाकस्याप्यसंभवाद् उत्तरसूत्रेण धेनूपयुक्तजाठराग्निसंपर्काधीनतृणादिपाके ऽपि चेतनाधिष्ठानापेक्षाया वक्ष्यमाणत्वात् ।

२५५ । २१ **अवास्तवस्य न निषेध इति ।** ननु सांख्यमते ऽप्यवास्तव एव पुरुषस्य भोगः । एवं हि तन्मतम् । पुरुषश्चैतन्यमात्रवपुः कूटस्थो नित्यमुक्तः सांसारिकसुखदुःखानुभवरूपो भोगः परिणामिन्या बुद्धेर्धर्मः पुरुषस्य तु बुद्धिच्छायापत्त्या तदैक्यमिवापन्नस्य तद्दर्शनमात्रं भोगः । तेन तस्य विवेकाऽग्रहादाध्यासिकं भोक्तृत्वम् । विवेकख्यात्या भोक्तृत्वाध्यासमात्रनिवृत्तिर्मोक्षः । वस्तुतः पुरुषो न बद्धो नापि मोक्ष्यतइति । यदाहुः ।

तस्मान्न बध्यतेद्धा† न मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥

सत्यम् । पुरुषस्य भोक्तृत्वमपि सांख्यैरभ्युपगतम् । यदाहुः ।

संघातपरार्थत्वात् त्रैगुण्यविपर्ययादधिष्ठानात् ।
पुरुषो ऽस्ति भोक्तृभावात्कैवल्यार्थं प्रवृत्तेश्च ॥ इति ।

कथमिदं तेषां परस्परविरुद्धवचनमिति चेत्किं कुर्मः । अत एव विप्रतिषेधाच्चासमञ्जस‡मिति वक्ष्यते । यदि त्वविरोधार्थं भोगाश्रयबुद्ध्यैक्यदर्शनं पुरुषस्य भोग इति कल्प्यते तदा तद्दर्शनरूप एव तात्त्विको भोगः पुरुषस्य निर्विकारस्य न संभवतीति दूषणमिहोक्तं द्रष्टव्यम् ।

---

* रहितयोस्तयोरिति १ पु॰ पा॰ । † अद्धेति नास्ति १-२ पु॰ ।
‡ व्याससू॰ अ॰ २ पा॰ २ सू॰ १० ।

एकस्यापि कर्तृकर्मत्वादिति* । पच्यते फलमित्यत्र हि कर्मकर्तरि यक्प्रत्ययः । अतः फलस्यैव कर्तृत्वं कर्मत्वं चाऽविवादमित्यर्थः । **कर्मत्वोपचारादिति** । कर्मकर्ता कर्तैव केवलं न कर्म कर्मकार्ययगात्मने २५७ ।
पदादिभाक्त्वात्तु कर्मत्वोपचारेण कर्मकर्तेति व्यपदेशः । ननु पच्यते फलमित्यत्र फलगतपरिणत्यनुकूलः फलपाचकचैत्रगतदोहनव्यापारः‡ पचिक्रिया तज्जन्यपरिणतिफलशालिनः फलस्य मुख्यमेव कर्मत्वमुपपद्यते किमर्थमुपचाराश्रयणमिति चेत् । उच्यते । इह पचिधातोः फलगता परिणतिरर्थः न तु तदनुकूलपुरुषव्यापारः । येन पुरुषव्यापारं† प्रत्येव सौकर्यातिशयात् कर्तृत्वेन विवक्षितस्य तज्जन्यक्रियाफलशालित्वात्कर्मत्वमपि मुख्यं संभवतीत्युच्येत न त्वेवम् । कर्मकर्तृप्रयोगे धातूनां तत्तत्क्रियाफलवाचित्वात् । यदाह कैयटः । लुनातिस्तावद् द्विधाभवनोपसर्जने द्विधाभावने वर्तते लुनाति केदारं देवदत्तः द्विधा भवन्तं द्विधा भावयतीत्यर्थः । यदा तु केदारस्य सौकर्यातिशयविवक्षया देवदत्तव्यापारो न विवक्ष्यते तदा द्विधाभवनमात्रे लुनातिर्वर्तते अनेकार्थत्वाद्धातूनां भिन्ना एव वा धातवो भिन्नार्थाः सारूप्यात्तु तत्त्वाध्यवसायः । तत्र द्विधाभवने केदारस्य कर्तुः कर्मवत् कर्मणा तुल्यक्रिय इति कर्मकार्याण्यतिदिश्यन्ते तेन लूयते केदारः स्वयमेवेत्यादयः प्रयोगा उपपद्यन्तइति । एवं चात्र परिणतिरेव पचिक्रियेति तामवलम्ब्य परसमवेतक्रियाफलशालित्वस्य कर्मत्वव्यापकस्य समर्थयितुमशक्यत्वाद् व्यापकाभावे च व्याप्यासंभवात् कर्मत्वस्योपचारिकत्वोक्तिर्युक्तैव ।

अत्रैव साक्षित्वेन पाणिनिसूत्रांशमुदाहरति **पाणिनिरिति** । कर्मवत्कर्मणेति सूत्रे वतिना मुख्यकर्मत्वाभावः स्पष्टीकृत इत्यर्थः । **परोक्तदोषानुवाद एवेति** । यद्यप्यध्याहारेणाभ्युपगमाभावस्फोरणइवानध्याहारेण तद्विषयाभावस्फोरणे ऽपीष्टप्रसङ्गकथनरूपदूषणं भायादेव तथापि तथा स्फुटं न भातीति तात्पर्यम् । अविभागापत्तिश्चेत्यत्र अविभागो नैक्यम् । अख्यातिवादिनः सांख्यस्य मते भ्रमविषयैक्यविवर्ताभावादित्याशङ्क्य विवेकाग्रह एवाविभागशब्देन विवक्षित इति व्याचष्टे **अविवेक इति** । भाष्यटीकास्थ २५८ ।

---

* एकस्यापि कर्मकर्तृभावादिति मूले पाठः । † पुरुषे व्यापारमिति २ पु॰ पा॰ ।
‡ दोहदव्यापार इति १ पु॰ ।

मदर्शनशब्दं तमःपरत्वेन व्याचष्टे न दृश्यते नेति । तुशब्द इति । सोऽन्येषु पूर्वपक्षव्यावृत्त्यर्थेषु तुशब्देषु नकारसमानार्थत्वं प्रसिद्धम्* ॥

८ । १७ **महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥**

साम्यकृतेति । परमाणुवादनिराकरणार्थत्वमात्रेण साम्यमिह विवक्षितम् । उभयत्रापि निराकरणीययुक्तिभेदस्य स्वयमेवोक्ततया सर्वथा साम्याभावात् । यद्वा शिष्टापरिग्रहाधिकरण†निराकृति‡युक्तिरप्यत्र टीकायामनुवादरूपेणोपन्यस्ता भाष्ये ऽपि वैशेषिकप्रक्रियोपन्यासेन व्यञ्जितेति तेनापि रूपेण साम्यं विवक्षितम् । **एवकार इति ।** मायाशबलस्य ब्रह्मण उपादानत्वे माया ऽप्युपादानमिति सिद्धसाधनवारणाय टीकायामेवकारः । तेन चेतनोपादानकं न भवतीति साध्यार्थे पर्यवसानान्न सिद्धसाधनमिति भावः । **असंयुक्तानामिति ।** द्व्यणुकमारभ्य स्थूलारम्भकत्वं यत् शङ्कावाद्यभिमतं तदभाव इह साध्यः । स चासंयुक्तावस्थायां शङ्कावादिना ऽपीष्यतइति सिद्धसाधनवारणाय संयुक्तविशेषणमित्यर्थः । **द्व्यणुकमनारभ्येति ।** साध्यविशेषणस्य प्रयोजनमाह **अनेन बाधो ऽपोदित इति ।** परमाणूनां द्व्यणुकारम्भद्वारा स्थूलारम्भकत्वात् स्थूलं नारभन्तइति साध्यं बाधितं स्याद् द्व्यणुकानारभ्येति विशेषणेन तन्निरासः कृत इत्यर्थः । **स्वापेक्षया स्थूलेति ।** स्थौल्यमत्र परिमाणाधिक्यमात्रं विवक्षितं न तु महत्त्वमिति भावः । **न द्वितीय इत्याहेति ।** द्व्यणुकारम्भप्रक्रियायास्त्वया ऽनङ्गीकृतत्वाद् द्वितीयपक्षो न युज्यतइत्यर्थः । **अवयवावयविभावविरहिणामिति ।** जलाऽऽलोकादिविरलद्रव्यव्यतिरिक्तानामिति विशेषणान्तरस्याप्युपलक्षणमेतत् । स्वच्छजलान्तर्गतसिकतादिग्रहणार्थे यत्र जलं तत्रैवाऽऽलोकस्याप्यङ्गीकृतत्वात् । नन्वान्तरालिकं कार्योपलब्ध्यर्थमेव त्र्यणुकारम्भ इष्यतइत्याशङ्कते **अथेति । विशेषो वेति ।** द्व्यणुकान्येव त्र्यणुकारम्भकाणि न परमाणव इत्यत्र विशेषो वक्तव्य इत्यर्थः ।

७ । ९ **अस्ति तावदिति ।** नन्ववयविनामवयवापकर्षोत्कर्षवैषम्यप्रसाधनं द्वित्वप्रभृत्यारम्भकत्वप्रयोजकताप्रसाधनं च क्वोपयुज्यते । द्वयोः

---

* अत्र प्रथमम् अनुमानाधिकरणं पूर्णम् । † व्या· सू· अ· २ पा· १ सू· १२ ।

‡ निराकृतेति २ पु· पा· ।

परमाण्वोः संयोगस्य कदा चिदवर्जनीयत्वाद् द्वयोः संयोगे सति समवाय्यसमवायिकारणसमवधानाद् द्व्यणुकोत्पत्तिरप्रत्याख्येयेति ऋजुना मार्गेण द्व्यणुकं साधयितुं शक्यम् । न च द्वयोः संयोगान्न कार्यद्रव्योत्पत्तिरिति विवदमानं प्रति तत्प्रसाधनमिति वाच्यम् । तथापि कार्यद्रव्येष्ववयवोत्कर्षापकर्षवैषम्यप्रसाधनस्यानुपयोगात् । तन्तुद्वयसंयोगात्सूत्रोत्पत्तिदर्शनेन तथा विवादानवकाशाच्च । तस्माद् द्व्यणुकप्रसाधने नैतावतो यत्नस्योपयोगः । यत् तु परमाणुद्वयेन द्व्यणुकवत्तत्त्रयेण क्व चित् त्र्यणुकोत्पत्तिरस्त्विति शङ्काया निराकरणं तदयुक्तम् । त्रयाणां परमाणूनां द्व्यणुकानामिव कदा चित्संयोगयौगपद्यस्यावर्जनीयतया परमाणुत्रयारब्धत्र्यणुकस्याप्यप्रत्याख्येयत्वात् । परमाणुसाधारण्येन द्वित्वप्रभृत्यारम्भकसंख्येत्यनुपदं स्वयमेव प्रसाधिततया परमाणुत्रित्वं नारम्भकसंख्येति वक्तुमशक्यत्वाच्च । कारणकारणजातीयस्येत्यादिनियमस्त्वसिद्धः । क्व चित्तन्तुत्रयारब्धसूत्रत्रयेण त्रिवृत्सूत्रोत्पत्तिर्दृश्यते क्व चित् तन्तुत्रयेणेति व्यभिचारात् । यदि सूत्रत्रयारब्धात्त्रिवृत्सूत्रात्तन्तुत्रयारब्धं त्रिवृत्सूत्रं विजातीयं तर्हि द्व्यणुकत्रयारब्धात् त्र्यणुकात्परमाणुत्रयारब्धं त्र्यणुकमपि विजातीयमस्तु । अथ परमाणुत्रयारब्धं त्र्यणुकमणवेव भवेदिति भोगभेदाभावेन वैयर्थ्यात्तथाभूतत्र्यणुकोत्पत्तिर्न संभवतीति चेन्न । कारणबहुत्वान्महत्त्वसंभवेन भोगभेदोपपत्तेः सामग्रीसद्भावप्रभावितस्य कार्यस्य प्रयोजनाभावेन प्रत्याख्यानाभावाच्च । न हि प्रयोजनक्षतिभिया सामग्री कार्यं नार्जयतीति न्यायाद् भोगभेदाभावेन सामग्रीसद्भावप्रभावितस्य कार्यस्य प्रत्याख्याने च द्व्यणुकमपि प्रत्याख्यायेत परमाणुवत्तस्याप्यतीन्द्रियत्वेन भोगभेदाभावात् । यदि द्व्यणुकं त्र्यणुकोत्पत्तिप्रणाडिकया भोगभेदोपयोगि तर्हीदमपि तथास्तु । एतेन टीकोपन्यस्तद्व्यणुकद्वयारभ्यद्रव्यनिराकरणमपि निरस्तम् । तस्यापि द्रव्यस्य स्थूलकार्योत्पादनप्रणाडिकया द्व्यणुकवद्भोगभेदोपयोगित्वात् । तस्मात्सर्वमिदमसमञ्जसमिति चेदुच्यते । वैशेषिकप्रक्रियानुवादो ऽयम् । अत एवेत्थमुपालम्भनीयः । अत एव भाष्ये वैशेषिकाभिमतव्यवस्थापक्षाश्रयणेन तदुक्तदूषणस्य व्यभिचारं प्रदर्श्य व्यवस्थापक्षो न स्थायीति सूचनार्थं यदापि बहवः परमाणवो बहूनि द्व्यणुकानीत्यादिवाक्येनाव्यवस्थापक्षमुद्भाव्य तत्रापि व्यभिचारसाम्यमुक्तम् ।

२६१ । २ **महातूलपिण्डयोरिति*** युक्तः पाठः । न तु महत्तूलपिण्डयोरिति । आन्महतः समानाधिकरणजातीययोरित्यात्वनियमात् । ननु महद्दीर्घवद्वेति सूत्रे सामानाधिकरण्ये सत्यपि आत्वं न दृश्यते न च तत्र महद्दीर्घशब्दौ छ्युकयोरितिवद् भावप्रधानाविति पदार्थभेदाद् द्वन्द्वसमासः । अतः सामानाधिकरण्याभावान्नात्वप्रसक्तिरिति वाच्यम् । टीकायां ह्रस्वपरिमण्डलाभ्यामित्यस्य धर्मिपरतायाः प्रदर्शितत्वेन महद्दीर्घशब्दयोरपि तदन्वयार्थं धर्मिपरताया वक्तव्यत्वात् । यदि तत्र पदार्थाभेदे ऽपि पदार्थतावच्छेदकभेदाद् द्वन्द्व इति न सामानाधिकरण्यं तर्हीहापि तथास्त्विति चेदुच्यते । पदार्थाभेदे पदार्थतावच्छेदकभेदेन द्वन्द्वो न संभवति महाभाष्यविरोधात् । तत्र हि चार्थे द्वन्द्व इति सूत्रे याज्ञिकश्चासौ वैयाकरणश्चेत्यादिषु पदार्थतावच्छेदकभेदाद् द्वन्द्वमाशङ्क्य शेषो बहुव्रीहिरिति सूत्रतः शेषइत्यस्यानुवृत्तेस्तस्य समानाधिकरणसमासविषयत्वेन शेषत्वाभावात्तदप्राप्तिरुपपादिता । कथं तर्हि महद्दीर्घवदित्यस्य निर्वाहः । इत्थम् । कानि चित् त्र्यणुकानि महान्ति कानि चिद्दीर्घाणीति त्र्यणुकव्यक्तिभेदविवक्षया इह द्वन्द्वसमास आश्रीयते । यद्यपि सर्वाणि त्र्यणुकानि महान्ति दीर्घाणि च महत्त्वदीर्घत्वयोः समनियतत्वात् तथापि कानि चित् त्र्यणुकानि परितो द्व्यणुकसंयोगैरुत्पद्यन्ते कानि चित्तिर्यग्द्व्यणुकसंयोगैः । तत्र यानि द्वितीयापेक्षया महान्तीति द्वितीयान्याद्यापेक्षया दीर्घाणीति च प्रत्यययोग्यानि भवन्तीति तथाभूतत्र्यणुकव्यक्तिद्वैविध्यापेक्षया द्वन्द्व उपपद्यते । न चेह तथा द्वन्द्वोपपत्तिः द्वयोरपि तूलपिण्डयोर्महत्त्वाधिकरणत्वेन विवक्षितत्वात् ।

२६२ । १६ **स्वाश्रयेति** । स्वेषां विशेषगुणत्वाभिमतानां ये आश्रयास्तेषां व्यवच्छेदे तत्तद्विशेषगुणप्रवृत्तेतरव्यावर्तने उचिता अवच्छेदका ये ऽवान्तरसामान्यविशेषास्तद्वन्त इत्यर्थः । ते चावान्तरसामान्यविशेषा नीलरूपादिषु नीलत्वादयः शुक्लरूपे पृथिव्यादित्रयसाधारणे पाकजत्वाऽपाकजत्वभास्वरत्वाऽभास्वरत्वानि । एवं रसादिष्वप्यूहनीयम् । स्नेहत्वावान्तरसामान्यसद्भावे तेन लक्षणानुगतिस्तदभावे स्नेहत्वेनैवान्तरशब्दस्य व्याप्यपर-

* बृहत्तूलपिण्डयोरिति मु० मूलपु० पा० ।

त्वात् । अभेदे ऽपि व्याप्य*व्यापकभावसद्भावात् । अत्र स्वाश्रयशब्दस्य एकैकाश्रयभूतव्यक्तिपरत्वे नीलत्वादीनां तदितरसकलव्यावर्तकतावच्छेदकत्वाभावादसंभवः लक्षणे सामान्यशब्दस्य जातिपरत्वमपहाय धर्ममात्रपरत्वमङ्गीकृत्य नीलादिषु लक्षणसमर्थने सामान्यगुणेष्वपि तथैव लक्षणसमर्थनसंभवादतिव्याप्तिरित्याशङ्क्याश्रयशब्देन नवानां मध्ये एकैकद्रव्यं सामान्येन
विवक्षितं न तु तत्तद्व्यक्तिमात्रमिति व्याचष्टे नवसु मध्यइति । व्यावर्तकाः २६२ । १८
व्यावर्तकतावच्छेदकाः । ननु नवसु मध्ये ऽप्येकैकद्रव्यव्यक्तिरेकैकविशेषगुणव्यक्तेराश्रय इति तत्तद्द्रव्यव्यक्तिगततदितरसकलव्यावृत्तिप्रयोजकतावच्छेदकगुणगतावान्तरजात्यभावादसंभवतादवस्थ्यम् । न च लक्षणप्रविष्टाऽवान्तरसामान्येन यज्जातीयो गुणो यावत्सु वर्तते तावत्सु तद्गततदितरव्यावृत्तिप्रयोजकतावच्छेदकत्वं विवक्षितम् । अणुपरिमाणादिकं यावत्सु चतुर्विधद्व्यणुकादिषु वर्तते तावद्गतेतरव्यावृत्तिप्रयोजकतावच्छेदकमणुपरिमाणत्वादिकं भवतीति तद्गतामणुपरिमाणादीनां विशेषगुणत्वप्रसङ्गात्तदाश्रयाश्चतुर्विधद्व्यणुकादयो ऽपि हि नवसु मध्ये भवन्त्येव । अथ नवसु मध्यइति विशेषबलान्नवान्यतममात्रवृत्त्वं स्वाश्रयविशेषणं लभ्यतइति नोक्तदोष इति चेत्तर्हि लाघवान्नवान्यतममात्रवृत्तिगुणत्वमेव लक्षणमस्त्वित्याशङ्क्य तत्रैवोक्तलक्षणार्थपर्यवसानमाह एवं चेति । पृथिव्यादीति । अनेकेत्यादिमात्रोक्तावसंभवः स्याद् नीलत्वादीनां विशेषगुणत्वप्रयोजकसामान्यानां काककोकिलकुवलयाद्यनेकलक्षणसामानाधिकरण्यापादकत्वात् । अतो नवलक्षणव्यतिरिक्तव्यतिरिक्तत्वमनेकविशेषणम् । यद्यपि नवानां लक्षणानां मध्ये इत्यन्वयमुखोक्तौ यो ऽर्थः स एवमुक्तावपि पर्यवस्यति तथापि नवानां लक्षणानामननुगतानां नवलक्षणव्यतिरिक्तव्यतिरिक्तत्वेनानुगमार्थं व्यतिरेकमुखेनोक्तिः । नवत्वविशिष्टेति । एकोयं न नवेति प्रतीतेर्नवेमे नैक इति प्रतीतेश्च नवत्वविशिष्टेभ्यस्तत्समुदायान्तर्गतस्याप्येकस्य एकस्मात्तद्घटितानामपि
नवानां भेदो ऽस्तीति भावः । उपलक्षितेति । यत्र विशेषणत्वं न तत्रो- २६३ । ७
पलक्षणत्वमिति नवत्वविशिष्टास्तदुपलक्षितव्यतिरिक्ता इत्युक्तम् । न च ये नवत्वविशिष्टास्ते ऽप्यपेक्षाबुद्धिविनाशान्नवसंख्याविनाशे तदुपलक्षिता भव-

* व्याप्येति नास्ति २ पु॰ ।

न्तीति वाच्यम् । अपेक्षाबुद्धीनां यावदाश्रयभाविद्वित्वादिसंख्याव्यञ्जकत्वेनापेक्षाबुद्धितन्नाशाभ्यां द्वित्वाद्युत्पत्तिनाशानङ्गीकारात् स्वसमवेतेति विशेष्यमात्रं घटत्वादिष्वतिव्याप्तमिति विशेषणोपादानं सामान्येषु समवेतस्य कस्यचिद्धर्मस्याभावादतिव्याप्तिनिरासः । द्रव्यजातीयेति । संख्यादीनामाश्रया नवापि द्रव्याणि द्रव्यत्वेनैकजातीयानि तेषां गुणादिभ्यो व्यवच्छेदकाः संख्यादय इत्यतिव्याप्तिः । नन्वेकजातीयत्वं द्रव्यत्वावान्तरजात्या विवक्षितमित्याशङ्क्य तथा सत्यव्याप्तिरित्याह गगनभेदेति । स्वमते कल्पभेदेन गगनभेदसत्त्वे ऽपि लक्षणवादिमते स नास्तीति भावः* ॥

२६४ । १ **उभयथापि न कर्मातस्तदभावः ॥ १२ ॥**

अनवबोधरूप इति† । जडत्वाविशेषादणवो ऽदृष्टाश्रयास्तव मते किं न स्युरित्युपहासार्थमणुसमवायित्वपक्षोक्तिरित्यर्थः । तस्य चेतनाऽनधिष्ठितस्याप्रवृत्तेरिति कर्मणश्चेतनाधिष्ठितत्वं न केवलं सांख्याधिकरणोक्तरीत्या ऽभ्युपगन्तव्यं किं त्वदृष्टस्य प्रलये ऽपि‡ सत्त्वात्तदापि द्व्यणुकोत्पादककर्म मा भूदित्येतदर्थमपि तदभ्युपगन्तव्यम् । न च परिपक्वमदृष्टं फलजनकं परिपाकश्च सर्गाद्यसमयएव स्यादिति वाच्यम् । ईश्वराधिष्ठानसाहित्यव्यतिरेकेण तत्परिपाकस्य निर्वक्तुमशक्यत्वात् । अणुवादिमते गुणरूपस्यादृष्टस्यौषधादिवत्ततो ऽन्यस्य पाकस्यासंभवात् फलकालादिसाहित्यरूपतया कथंचित्तन्निर्वचने ऽपि तथाभूतपाकयुक्तस्याप्यदृष्टस्य तन्मते ऽपि परमेश्वरविनियोज्यत्वात् । उक्तं हि न्यायवार्तिककृता । कर्म पुरुषस्येश्वरो ऽनुगृह्णाति को ऽनुग्रहार्थः यद्यथाभूतं यस्य च यदा परिपाककालस्तत्तथा तदा च विनियुङ्क्तइति । नन्वस्तु तन्मते ऽपीश्वराधिष्ठितत्वाद्यभ्युपगमः यथा तथैवास्तु को दोष इत्याशङ्क्य तच्च पाशुपताधिकरणे§ दूषणं वक्ष्यतइत्याह **पत्युरिति । प्रयत्नविशेषेति** । प्रायोभिप्रायमेतत् । वायुनापि नोदनदर्शनात् । **तर्हि न क चिदपीति** । वृक्षादिष्विव संयोगस्याव्याप्यवृत्तित्वोपपादकाः प्रदेशविशेषादयो ऽपि वक्तुं न शक्येरन्निति भावः ।

प्रदेशकल्पनया प्रतीतिरवकल्पते चेत्तथैवास्तु को दोष इत्याशङ्क्य तथा

---

* अत्र द्वितीयं महद्दीर्घाधिकरणं पूर्णम् ॥ † अबोधरूप इति ३ पु० पा० ।

‡ अदृष्टप्रलये ऽपीति २ पु० पा० । § व्या० सू० अ० २ पा० २ सू० ३७ ।

सति संयोगतन्मूलद्व्यणुकादि: कल्पित: स्यादिति दूषणे तात्पर्यमाह
प्रदेशकल्पनया ऽपीति । तन्नियामकत्वात्तन्तुपटोभयं संश्लिष्टताप्रयोजक- २६५ । २
त्वात् तत्कारणवत् पटोत्पादनद्वारा तदुभयसंश्लिष्टतापादकवेमादिवत् ।
इदमत्र दूषणं वक्तुं शक्यम् । प्रागभावस्यापि पटकारणत्वात्तस्य तन्तुप
टाभ्यां संबन्धाभावाद्व्यभिचार: । अथ प्रागभावस्य पटे न प्रतियोग्य
नुयोगिभावरूप: स्वरूपसंबन्धस्तस्य तन्तुभिरपि स्वरूपसंबन्ध: कल्प्य:
कारणानां मिलितानां* कार्यजनकत्वेन† कार्योत्पत्तौ तेषां मेलनस्या-
प्यपेक्षितत्वान्मेलनस्य च संबन्धरूपत्वादिति चेत्किं स्वरूपमपि संबन्धो
भवितुमर्हति ओमिति चेत्तर्हि अवयवावयव्यादीनामपि स्वरूपमेव संबन्ध:
स्यादिति किं समवायेन । संबन्धिस्वरूपाणामनन्तत्वाल्लाघवेन सर्वानुगत
एक: समवाय: कल्प्यतइति चेद् न । एकस्यानेकेषां वा कल्पनीयत्वे
खलु लाघवादेकस्य कल्पनमिहानेकेषां क्लृप्तत्वात्तेष्वेव क्लृप्तेषु संबन्धत्व-
मात्रं कल्पनीयं न तु समवायस्तद्गतं संबन्धत्वं चेत्युभयं कल्पनीयं गौर-
वात् । अथ समवायपक्षे समवायस्तद्गतं संबन्धत्वं चेति द्वयमेव कल्प-
नीयम् अवयवावयव्यादिषु संबन्धत्वकल्पने तेषामननुगतत्वेन क्रोडी-
कारकाभावाद् अनन्तानि संबन्धत्वानि कल्प्यानीति समवायपक्षएव लाघ-
वमिति चेन्न । निरूपकभेदेन संबन्धत्वे भेदानङ्गीकारे ऽवयवादिषु तत्त-
दभावसंबन्धत्वस्य क्लृप्तस्यैवावयव्यादिसंबन्धत्वरूपताया अपि संभवेन अव-
यवादिषु संबन्धत्वस्यैकस्याप्यकल्पनीयत्वान्निरूपकभेदेन तद्भेदाङ्गीकारे सम-
वाये ऽपि तत्तन्निरूपकभेदप्रयुक्तानां तत्संबन्धत्वकल्पनावश्यंभावात् सम-
वायपक्षे धर्मिकल्पनागौरवस्याधिकस्य सद्भावादिति । इत्थं दूषणं सम-
वायस्य संबन्धान्तरानपेक्षत्वे संयोगोपि तदनपेक्ष: स्यादिति वक्ष्यमाणरी-
त्यैवोन्नेतुं शक्यमिति भाष्यादिषु न कण्ठरवेणोक्तम् ।

पक्षेतरस्यापीति‡ । यद्यपि पक्षमात्रव्यावृत्त उपाधि: पक्षेतर: ,, । ११
प्रसिद्ध: असंबन्धत्वोपाधिश्च न तथा अपक्षात्संयोगादपि व्यावृत्तत्वात्
तथाप्युपाधिव्यतिरेकेण साध्यव्यतिरेकसाधकं यदुपाध्युत्थाप्यं प्रतिपक्षानु-

* अमिलितानामिति १ पु॰ पा॰ । † कार्याऽजनकत्वेनेति १ पु॰ पा॰ ।
‡ पक्षे तस्यापीति मूले प्रमादान्मुद्रितं तदेवं शोध्यम् ।

मानमुपाधेर्दूषकताबीजं तस्यासाधारणहेत्वाभासदोषग्रस्तत्वं पक्षेतरत्वस्यानुपाधितायां बीजम् । यथा पर्वतीयवह्न्यनुमाने एतत्पर्वतेतरत्वस्यानुपाधितायामयं पर्वतो निर्वह्निः एतत्पर्वतत्वादिति तदुत्थाप्यप्रतिपक्षानुमानस्य सकलसपक्षव्यावृत्तत्वरूपेणासाधारण्येन दुष्टत्वात्तस्यानुपाधित्वम् । तदीयमनुपाधिताबीजमिहापि समानम् । समवायो ऽसंबद्धः संबन्धत्वादित्यत्रापि ह्यस्त्यसाधारण्यमित्यस्य पक्षेतरत्वसाम्येनानुपाधित्वशङ्का । उपाधित्वसमर्थनस्यायमाशयः । पक्षे साध्याभावनिश्चये सति पक्ष एव सपक्षोपि जातो ऽतः सकलसपक्षव्यावृत्तत्वाभावाद् नासाधारण्यमनुपाधिताबीजमस्तीति अगुणत्वे सत्यसंबन्धत्वम् अगुणत्वविशिष्टस्य संबन्धत्वस्याभावस्तथा च संयोगे ऽपि विशेषणाभावप्रयुक्तविशिष्टाभावरूपोपाधिसत्त्वान्न साध्याव्यापकत्वम् ।

२६५ । २५ **संयोगस्य गुणत्वमसिद्धमिति ।** रूपादिचतुर्विंशत्यनुगतस्यैकस्य गुणत्वस्य निर्वक्तुमशक्यत्वादिति भावः । **उभयसिद्धस्थलइति ।** यद्यप्यनुमानवादिमते साध्याव्यापकत्वमप्युपाधिदोष एनं प्रति प्रतिपक्षोन्नयनासंभवात् तथापि तथा निःशङ्कदोषो न भवतीति तात्पर्यम् । **अनध्यवसितत्वमसाधारण्यम्** । **संबन्धत्वे सतीति विशेषणमिति ।** शुद्धसाध्यव्यापकत्वाभावे ऽपि पक्षधर्मावच्छिन्नसाध्यव्यापकोयमुपाधिरित्यर्थः । नन्वेवं प्रतिपक्षोन्नयने शुद्धसाध्यव्यतिरेको न सिध्येदित्याशङ्क्य पक्षधर्मरूपविशेषणवति विशिष्टव्यतिरेकः सिध्यन्विशेष्यव्यतिरेकमादाय पर्यवस्येदित्याह **तथा चेति ।**

२६७ । १ **व्याप्तिः प्रमिता वक्तव्येति ।** न च विपक्षबाधकाभावादिह तर्कमूलव्याप्यप्रमितिः शङ्कनीया रूपादीनां जन्यत्वे हि रूपत्वादिकं प्रयोजकमेष्टव्यम् अनुगतत्वाल्लघुत्वाच्च । न तु कार्यगतरूपत्वं पार्थिवपरमाणुगतपाकजरूपाननुगतत्वाद् गुरुत्वाच्च । तथा च परमाणुष्वपि रूपादिस्वीकारे अग्निसंयोगजन्या रूपादयः स्वोत्पत्तौ* स्वाश्रयकारणगतरूपाद्यपेक्षेति पराभ्युपगतरीत्यैव जलपरमाणुगतरूपादीनां पार्थिवपरमाणुगतश्यामरूपस्य चोत्पत्तावपेक्षितानां रूपादीनामाश्रयत्वेन परमाणूनां कारणीभूता अव-

* अग्निसंयोगजन्यरूपाद्युत्पत्ताविति २ पु० पा० ।

यवा: सिध्यन्तो न निवारयितुं शक्यन्ते । सावयवत्वे चाऽनित्यत्वमप्यनिवार्यम् । तथा त्रसरेणुः समवायिकारणारभ्यः महत्त्वे सति चाक्षुषत्वात् तदपि त्रसरेणुसमवायिकारणं समवायिकारणारभ्यं महदारम्भकत्वादिति परैः परमाणुः साध्यते तथा चाद्यानुमाने विपक्षबाधकतर्क एवमुच्यते । महत्परिमाणस्य जन्यत्वे महत्त्वापकर्षमात्रं प्रयोजकं न तु महत्परिमाणगतमुत्कर्षापकर्षरूपजातिद्वयं गौरवात् । तथा च त्रसरेणुमहत्त्वस्यापकृष्टमहत्त्वरूपतया जन्यत्वेन कारणापेक्षायां तत्र स्वाश्रयसमवायिकारणगतसंख्यापरिमाणप्रशिथिलसंयोगान्यतमावश्यम्भावेन त्रसरेणोः समवायिकारणमवश्यमभ्युपगन्तव्यमिति तत्र महत्त्वस्य जन्यत्वे महत्त्वापकर्षो ऽपि न प्रयोजकः किं तु परिमाणापकर्ष इति युक्तं सामान्यस्य लघुत्वाद्दीर्घपरिमाणानुगतत्वाच्च । ततश्च त्रसरेणुमूलकारणे यद्यपकृष्टपरिमाणमभ्युपगम्येत तदा तस्य जन्यत्वेन कारणपरिमाणाद्यपेक्षया तस्य सावयवत्वं प्रसज्येतेति तत्परिहाराय तत्र परममहत्त्वस्याभ्युपगन्तव्यत्वात् तदुक्तरीत्यैव परिमाणगततज्जन्यताप्रयोजकरूपापेक्षया जगन्मूलकारणानुमानप्रवृत्तौ तेन परममहद्ब्रह्मैव तथात्वेनानुमितं भवेदिति । एवं च स्थौल्यानित्यत्वे प्रसज्येयातामिति तर्के स्थौल्यशब्दितस्य महत्त्वस्य परमात्रानिष्टस्यापादनम् अनित्यत्वस्य तूभयाऽनिष्टस्येति विवेकः ।

सत्प्रतिपक्षतामाशङ्क्येति । ननु जगत्सोपादानं भावकार्यत्वा- २६७ । ७
दिति यद्ब्रह्मपर्यवसाय्यनुमानमुपन्यस्तं यच्च जगदुपादानं न स्पर्शवन्न चाणु नित्यत्वादित्यनुमानान्तरमुपन्यस्तं तत्रोभयत्रापि परमाणुनित्यत्वानुमानं न प्रतिपक्षतां भजते । तत्साध्याभावाविषयत्वाद् जगत्कारणस्य स्पर्शवत्त्वे ऽप्यणुत्वे ऽपि नित्यत्वमकारणकत्वादिभिरुपपद्यतइति द्वितीयानुमानस्याप्रयोजकत्वं परमतैरनुमानैः सिध्यति तदपि द्वितीयानुमानकल्पनापेक्षम् । तस्मात्सामान्यतो जगत्कारणानुमानस्य ब्रह्मपर्यवसानेन * परमाणवसिद्धिदूषणमुक्त्वा नैयायिकोक्तानि परमाणुनित्यत्वानुमानान्यपि दूषयतीत्येवावतारयितुं युक्तमिति चेदुच्यते । तावत्येवार्थे भाष्यटीकयोस्तात्पर्यं तथापि

---

* पर्यवसाने इति २ पु॰ पा॰ ।

तेषामनुमानानां सिद्धान्तविरुद्धार्थविषयतामात्रेण प्रतिपक्षव्यपदेशः* कृतः ।
तदेतदर्थादित्यनेन सूचितम् । **प्रतीत्य प्राप्येति** । निमित्तकारणत्वेन लब्ध्वे-
२६९ । ३ त्यर्थः । उत्सूत्रवाक्यमिति व्याख्याने स्वयमेव हेतुमाह **सौत्रचशब्दव्या-
ख्यानत्वादिति** । **न तादुत्पाद्यत्वं केषां चिद्गुणानां सामान्यादीनां
च तदभावादिति** । यद्यपि द्रव्याधीननिरूपणत्वमपि शब्दगन्धादिषु
नास्तीत्यव्यापकत्वं समानं तथापि द्रव्योत्पाद्यत्वं वह्न्युत्पाद्ये धूमे ऽतिप्रसक्त-
मिति तदुपेक्षणम् । **शुक्लत्वं द्रव्यवृत्तीति** । सामानाधिकरण्यप्रत्यक्षमात्रेण
नैयायिकंमन्यो न परितुष्येदिति तदनुग्राह्यमनुमानमुपन्यस्तम् । नन्वाकारा-
न्तरायोगो ऽसिद्धः गुणत्वादित्याशङ्क्य विशिनष्टि **स्वातन्त्र्यप्रयोजकेति** ।
ननु तामिमामयुतसिद्धिं विकल्प्य दूषयतीत्ययुक्तं द्रव्याश्रितत्वनियमो‡
गुणादीनामयुतसिद्धिरिति निरुक्तत्वात्तत्र च वक्ष्यमाणविकल्पाप्रसरादित्याश-
ङ्क्यावतारयति **भवेदिति** । तथापि तामिमामित्ययुक्तमित्याशङ्क्य तस्यार्थ-
माह **तदर्थविकल्पो ऽपीति** । अपृथग्देशत्वादयो हि धर्मधर्मिभावनिय-
मरूपाऽयुतसिद्ध्युपपादकत्वेन शङ्किता अतस्तदर्थविकल्पस्तद्विकल्पत्वेनोप-
चरित इत्यर्थः । **प्रकारान्तरेणेति** । अपृथगेको देशो ययोरिति व्युत्पत्तिमा-
श्रित्य अपृथक्सिद्धत्वं भाष्ये दूषितम् इदानीं पृथग्देशत्वाभावं तदर्थमा-
श्रित्य शङ्कतइत्युत्तरग्रन्थस्य सामान्यतो ऽवतारिका । तत्राव्यवहितग्रन्थम-
वतारयति **तत्र तावदिति**§ । अन्यदेशत्वं युतसिद्धिरिति युतसिद्ध्युपपा-
दकमन्यदेशत्वमित्यर्थः । सङ्गित्वादिति पाठमाश्रित्य तस्य संबन्धित्वादि-
त्यर्थश्चेद्व्यभिचारः स्यादित्याशङ्क्य व्याचष्टे **संयोगित्वादित्यर्थ इति** ।
अभ्युपेत्यापीति । आकाशात्मनोस्तन्मते संयोगाभावात्तन्मतमर्यादया
२७० । १२ पूर्वोक्तं दूषणं न भवतीत्येतदुक्तापृथग्देशत्वस्याभ्युपगमे मूलम् । **ननु शुक्ल-
त्वमित्यादीति** । शुक्लः पट इत्यादौ शुक्लशब्दस्य शुक्लगुणविशिष्टे द्रव्ये
प्रवीणे कुशलशब्दस्येव निरूढा लक्षणा । न चैवं घटस्य शुक्ल इत्यपि कदा
चित्प्रयोगप्रसङ्गः । निरूढलक्षणया ऽन्यत्र प्रयुक्तस्य पदस्य मुख्ये ऽर्थे|| ऽप्र-

---

* प्रतिपक्षे व्यपदेश इति २ पु. । † न तु ददित्यादिः पाठो मु. मू. पु. ।
‡ द्रव्याश्रयित्वनियम इति २ पु. पा. । § तत्र तावद्यदितीति प्रतीकाकारः १ पु. ।
|| अर्थे इति नास्ति १ पु. ।

योगस्यापि दर्शनात् । न हि कुशलशब्दस्य कुशलवनकर्तरि प्रयोगो ऽस्ति । अतस्तत्र गुणविशिष्टद्रव्यलक्षणकात् शुक्लशब्दाद् भावार्थप्रत्ययोत्पत्त्या शुक्लत्वं शुक्लता शौक्ल्यं शुक्लिमेत्येव प्रयोग इत्यर्थः ।

धर्मिग्राहकप्रत्यक्षविरोधादाभास इति । न च पटस्य शुक्लं रूप- २७० १८
मिति व्यवहारमूलभूतं भेदविषयं प्रत्यक्षमप्यस्ति तद् अभेदप्रत्यक्षं बाधेतेति वाच्यम् । न ह्युक्तव्यवहारो भेदविषयः किं तु षष्ठ्यर्थसंबन्धविषयः । संबन्धेन तु भेदो ऽनुमातव्यस्तदप्यनुमानं शुक्लः पट इत्यभेदसाक्षात्कारो बाधेत तस्माद्राहोः शिर इतिवदौपचारिकं संबन्धव्यपदेशमात्रमिति कल्पनीयम् । किं च पटस्य शुक्लं रूपमित्येतत्पटस्य शुक्लत्वं शौक्ल्यमित्यादिना समानविषयं शुक्लत्वमित्यादिप्रत्यये च गुणगुणिभेदवादिभिर्गुणे यच्छुक्लत्वमभ्युपगम्यते तदेव पटे प्रतीयते ऽतः पटस्य शुक्लं रूपं शुक्लो गुण इत्यादिव्यवहारो ऽपि पटगतशुक्लत्वसामान्यविषय इत्येव वक्तुमुचितम् । शुक्लत्वसामान्ये कथं शुक्लशब्द इति चेत् शुक्लगुणे वा कथं शुक्लत्वं शुक्लिमेत्यादिभावप्रत्ययान्तः शब्दः । शुक्लशब्दस्य द्रव्यलक्षणामाश्रित्येति* चेत् तस्येह सामान्ये लक्षणा ऽस्तु गौर्नित्येति प्रयोगे गोशब्दस्येव । यद्वा शुक्लशब्दः शुक्लद्रव्यस्येव तद्गतशुक्लत्वसामान्यस्यापि वाचकः यथा साक्षात्कारशब्दः प्रत्यक्षज्ञानस्येव तद्गतसाक्षात्त्वसामान्यस्यापि । अत एव घटसाक्षात्कार इति साक्षात्कारिप्रमेति च व्यवहारः । एवं च गुणवचनेभ्यो मतुब्लोपानुशासनमपि सामान्यवाचिभ्यो मतुपः प्रसक्त्या सार्थकं भविष्यति । न चैवमपि साक्षात्कारीतिशब्दवत् शुक्लशब्दादिनिप्रत्ययेन शुक्लीत्यपि प्रयोगः स्यात् तल्लोपानुशासनाभावादिति वाच्यम् । अर्शआदिगणे वर्णशब्दपाठस्याऽर्शआदिभ्यो ऽच्प्रत्ययविधानार्थत्वेन तत इनिठनोर्बाधात् । मतुपस्तु ततो बाधो न भवति प्राणिस्थादातो लजन्यतरस्यामित्यतो ऽन्यतरस्यांग्रहणस्य वैशेषिकप्रत्ययैर्मतुपः समुच्चयार्थमनुवृत्त्यङ्गीकारात् । अतो मतुब्लोपानुशासनं सार्थकम् । एवमभेदप्रत्यक्षानुसारेण व्यवहारव्यवस्थाकरणे लाघवमपि भवति । द्रव्यातिरिक्तगुणाभ्युपगमे हि गुणस्तत्संबन्धश्चेत्युभयमपि कल्पनीयमिति गौरवं भवेत्तस्माल्लाघवानुगृहीताभेदप्रत्यक्षब-

---

* आश्रित्येर्मनिजिति २ पु॰ पा॰ ।

लाद् गुणभेद एव गुणानामास्थेयः । सुरभिर्गन्धफली मधुरो गुडः उष्णो वह्निरिति गन्धादीनामपि द्रव्याभेदप्रत्ययैस्तद्भेदनिरासात् । अयं च गुणगुण्यभेदो गुणिपरिशेषेण प्रतिनियतेन्द्रियग्राह्यनानागुणसंघातपरिशेषेणोभयथाप्यनिर्वचनीयभावेन वा पर्यवस्यतीत्यन्यदेतत् ।

२७० । २४ **पूर्वपक्षिण एव ग्रन्थ इति** । न चेत्ययं शब्दः पूर्वपक्षनिराकरणार्थ इत्येवं सिद्धान्तग्रन्थो न भवति किं तूत्पत्तेः समवायान्यत्वस्य निराकरणार्थः स इति पूर्वपक्षग्रन्थ एवायमित्यर्थः । **यद्युच्येतेति** । प्रतीकग्रहणानन्तरमप्राप्तिपूर्विका प्राप्तिरित्येकं लक्षणम् । अन्यतरकर्मजोभयकर्मजप्राप्त्योरन्यतरेत्यपरं युतसिद्धिलक्षणम् । तद्भावश्च न कार्यकारणसंबन्धस्य भवतीति क्वचित्पाठः । तत्र कर्मजा प्राप्तिरित्येतावदेव वक्तव्यं जनककर्मद्वैविध्यस्पष्टीकरणार्थं विशेषणम् । अप्राप्तिपूर्विका प्राप्तिरन्यतरकर्मजा प्राप्तिः उभयकर्मजा प्राप्तिरिति त्रीणि संयोगलक्षणानि । एतानि च कार्यकारणसंबन्धस्य न भवन्तीति पाठान्तरम् । तत्र यद्यपि द्वितीयतृतीयलक्षणे परस्परलक्ष्याव्याप्तिः तथापि तयोर्लक्षणशब्दः प्रकारभेदमात्रपर इति तत्रापि पाठे कर्मजा प्राप्तिरित्येकमेव लक्षणं लक्षणद्वयोक्त्या पर्यवस्यति । **उत्पन्नं तत्क्षणएवेति** । उत्पत्त्यनन्तरक्षणएवेत्यर्थः । **पटसत्ताक्षणइति** । पटोत्पत्तिक्षणइत्यर्थः । **असति प्राप्तरि प्राप्त्यनुपपत्तेरिति** । यद्यपि समवायनित्यत्वपक्षे पूर्वक्षणे प्राप्तर्यसत्यपि जन्मसमयएव समवायरूपा कारणप्राप्तिरुपपद्यते तथापि तदनित्यत्वपक्षे दूषणमिदं द्रष्टव्यम् ।

एकाकर्षणइति । एकस्मिन्नाकृष्यमाणे इतरेषां तत्संसृष्टानामाकर्षणं सावयवानामेव दृश्यते अतो वायुना द्व्यणुके कृष्यमाणे तदवयवयोः परमाण्वोर्निरवयवद्रव्यत्वादाकाशवत्तत्संसृष्टत्वेऽप्याकर्षणं न स्यादित्यर्थः* ।

२७२ । ५ समुदायउभयहेतुकेऽपि तदप्राप्तिः ॥ १८ ॥

माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकाणाम् आदिबुद्धशिष्याणां सर्वशून्यत्वविज्ञानमात्रास्तित्वविज्ञानाकारानुमेयबाह्यास्तित्वप्रत्यक्षबाह्यास्तित्वविषयाः प्रस्थानभेदास्तेषामेव प्रतिपत्तिभेदादिति के चन बुद्धसमयस्था

* अत्र तृतीयं परमाणुजगदकारणत्वाधिकरणं पूर्णम् ।

वदन्ति। अन्ये त्वाहुः। सर्वज्ञानां तेषां गुरुवाक्यानि शृण्वतां पुरोवर्तिन्येकस्य मैत्रत्वबुद्धिरन्यस्य चैत्रत्वबुद्धिरपरस्य स्थाणुत्व*बुद्धिरित्यादिवद् भ्रान्तिरूपा विरुद्धप्रतिपत्तिर्न संभवति तेषां सर्वज्ञत्वात् षोडशिग्रहणाऽग्रहणप्रत्ययवद्वैकल्पिकार्थविषयापि न संभवति क्रियायामिव सिद्ध†वस्तुनि विकल्पायोगात्। अतः प्रथममादिबुद्धेनोत्तममध्यमाधमभाविविनेयबुद्ध्यनुसारेण सर्वशून्यत्वादिपक्षभेदाः सूचितास्तद्विवरणार्था माध्यमिकादीनां प्रस्थानभेदा
इति। तत्र द्वितीयं तन्मतं विवृणोति **विप्रतिपत्तिर्हीति। असंहता-** २७२ । २
नामिति। कार्यकारणाऽसंहतानामपीन्द्रियसंबन्धादान्तरेण चित्तेन निरूप्यमाणतया ऽऽन्तरसमुदायमध्ये परिगणनमिति भावः। **अहमित्याकारमालयविज्ञानमिति।**

तत्स्यादालयविज्ञानं यद्भवेदहमास्पदम्।
तत्स्यात्प्रवृत्तिविज्ञानं यन्नीलादिकमुल्लिखेत्॥

इति तदीयो व्यवहारः। **विज्ञानस्कन्धो निर्विकल्प इति।** केचिद्देवदत्तादिनाम संज्ञास्कन्ध इत्याहुः। तन्मते विकल्पो ऽपि विज्ञानस्कन्धः। **अनुपलब्धिलिङ्गकमिति।** यद्यपि प्रातश्चत्वरे गजाभावानुमानवदिहानुपलब्धिलिङ्गकत्वेन तान्त्रिकैर्व्यवहृतमनुमानं नास्ति तथापि व्यापकविरुद्धोपलब्ध्या यच्चेतनाऽनधिष्ठितकारणेभ्यः कार्योत्पत्तेर्व्यावर्तनं प्रसाधयिष्यते तदभिप्राया ऽनुपलब्धिलिङ्गकत्वोक्तिः। यद्वा अचेतनत्वादिति चैतन्याभावलिङ्गकं यदनुमानं प्रदर्शयिष्यते तदभिप्राया।

अतो या कार्योत्पत्तिरिति। ननु या कार्योत्पत्तिः सा चेतना- २७३ । ६
धिष्ठितकारणेभ्यो भवतीति प्राग् दर्शितेयं व्याप्तिस्तामुपजीव्य व्यापकविरुद्धोपलब्ध्या परपक्षनिरसनं सिद्धान्त्यभिमतचेतनाधिष्ठितकारणवत्त्वप्रसाधनं च कृतं कथं तदनन्तरमव्याप्तिसिद्धिरुच्यते। नैष दोषः। प्रथमं या कार्योत्पत्तिरिति वाक्येन व्याप्यव्यापके उपन्यस्ते तयोर्व्याप्तिग्रहानुकूलतर्को विपर्ययपर्यवसानसहितः स स्वव्यापकेत्यादिना ऽवतिष्ठत इत्यन्तेन ग्रन्थेन दर्शितः। तदनन्तरमतो या कार्योत्पत्तिरित्यादिवाक्येन व्याप्तिसिद्धिरुक्ता। एवमेवानन्तराधिकरणे ऽपि ये यस्मिन् सत्यपि कादाचित्कास्ते तदतिरि-

* अपरस्याऽणुत्वेति १ पु° पा° ।   † सिद्धासिद्धेति २ पु° ।

त्तापेक्षा इति प्रथमं व्याप्यव्यापकयोरुपन्यासः ततो व्यापकविरुद्धोपलब्धि-
मूलकविपर्ययपर्यवसानसहिततर्कोपन्यासः ततः प्रथमोपन्यस्तव्याप्यव्यापक-
योर्व्याप्तिसिद्धिकथनं च भविष्यति ।

२७३ । १२ **तत्कार्यं प्रति हेतुरित्यपीति** । यद्यप्येवं सति व्यापारवदाश्रय
इति विशेषणं न निवेशनीयम् अत एव कुम्भकारकार्ये कुम्भे ऽतिव्याप्ति-
वारणालाभात्तन्निवेशने यागव्यापाराऽपूर्वाव्याप्त्यापत्तेश्च । तथापि चक्रभ्रमणा-
दिवत्कारणक्रियारूपस्य व्यापारवदाश्रयत्वं नियतं कारणानां कार्यजननाय
प्रवृत्तिरपि तत्क्रियारूपा अतस्तत्र व्यापारव्यापारिणोः समसमयत्वे कार्यका-
रणभावानुपपत्तिर्भिन्नसमयत्वे आश्रयाश्रयिभावानुपपत्तिरिति दूषणं वक्तुं लक्षणे
अनपेक्षितस्यापि तस्य तदनुप्रवेशनेन सद्भावः स्मारितः । बाह्य आभ्यन्त-
रश्च प्रतीत्यसमुत्पादो हेतूपनिबन्धनश्चेति द्वाभ्यां कारणाभ्यां भवतीति
बौद्धा व्यवहरन्ति । तत्र कारणं प्राप्य कार्यमुत्पद्यतइति यद् अयं प्रती-
त्यसमुत्पादः कारणात्कार्योत्पाद इत्यर्थः । हेतूपनिबन्धः एकैककारणसं-
बन्धः । प्रत्ययोपनिबन्धः कारणसमुदायसंबन्धः । तत्र बाह्यकार्ये हेतूपनि-
बन्धस्योदाहरणं बीजादिफलपर्यन्तं प्रत्ययोपनिबन्धस्योदाहरणम् । बीजा-
दङ्कुरजनने महाभूतानि धातुविशेष इति षण्णां धातूनां समवायः आध्या-
त्मिककार्ये हेतूपनिबन्धस्योदाहरणम् । अविद्यादिदौर्मनस्यान्तं प्रत्ययोपनि-
बन्धस्योदाहरणम् । पञ्चभूतान्यहंप्रत्ययरूपो विज्ञानधातुश्चेति षण्णां
धातूनां समवायः । एवं द्विविधयोरपि कारणवर्गयोः कार्योत्पादे स्वस्वनिष्ठ-
चैतन्यापेक्षा वा स्वतन्त्रकारणान्तरगतचैतन्यापेक्षा वा नास्तीत्यपि तेषां
मतम् । तदिदं सर्वं संक्षेपतः प्रतीत्यसमुत्पादलक्षणमुक्तमित्यादिना सो ऽयं
प्रतीत्यसमुत्पादो दृष्टत्वाद् नान्यथयितव्य इत्यन्तेन टीकाग्रन्थेन प्रपञ्चितम् ।
तच्चैतेष्वेव षट्सु धातुष्वित्यादिना तदेतैरविद्यादिभिराक्षिप्तः संघात इत्यन्तेन
टीकाग्रन्थेन भाष्यानुक्रान्ताऽविद्यादिदौर्मनस्यान्तस्वरूपविवरणपूर्वकं तेषां चे-
तनानपेक्षः कार्यकारणभाव उपसंहृतः ।

एवमाशङ्कासूत्रभागतद्भाष्यविवरणपरे टीकाग्रन्थद्वये व्याख्येयांशद्वय-
,, । १८ मुपादाय व्याचष्टे **प्रत्ययोपनिबन्धस्य संग्राहकमित्यादिना** । उत्पादा-
दनुत्पादाद्वेत्येतदन्वयव्यतिरेकपरतया व्याचष्टे **यस्मिन् सतीति । मनो**

विज्ञानं च यो ऽभिनिर्वर्तयतीति । अत्र पूर्ववाक्यस्य च यो ऽभिनिर्व-
र्तयतीत्यनुषङ्गः कृतः । यो नामरूपमभिनिर्वर्तयति यश्च मनोरूपं विज्ञान-
मभिनिर्वर्तयति स विज्ञानधातुरुच्यतइत्यर्थः ।

देहाकारपरिणतेष्विति । के चिदविद्यादिरूपं* क्व चित् क्व चिद्भे- २७४ । २६
देन वर्णयन्ति क्षणिककार्यदुःखशून्येषु स्थायिनित्यसुखवस्तुबुद्धिरविद्या ततो
रागद्वेषमोहास्ततो धर्माधर्मसंस्कारा इत्येतत्सर्वं संस्कारवशाज्जीवस्य गर्भा-
शयद्रव्ये वृत्तिलाभो† विज्ञानं विज्ञानसंसर्गाद्गर्भद्रव्यस्य कललपेश्याद्याका-
रेणाभिव्यक्तिर्नामरूपं तदभिव्यक्तिक्रमेण निर्वृत्तं षडिन्द्रियायतनं शरीरं
षडायतनतन्निर्वृत्तशरीरेन्द्रियस्य गर्भगतविषयेन्द्रियसंसर्गजं ज्ञानं स्पर्शः
तन्निमित्ते सुखदुःखे वेदना सुखप्राप्तिदुःखपरिहारार्था विषयोपादानेच्छा तृष्णा
तया विषयेषु प्रवृत्तिरुपादानं ततः क्रमेण गर्भान्निष्क्रमणं भवः निर्ग-
तस्य मनुष्यत्वादिजात्यभिमानो जातिः क्रमभाविनी जरामरणे प्रसिद्धे
म्रियमाणस्य पुत्रकलत्राद्यभिष्वङ्गादन्तर्दाहः शोकः तदुत्थः प्रलापः परि-
देवना मरणक्लेशः दुःखं मानसं दुःखं दौर्मनस्यमिति आचार्यैरप्यन्योक्त
एवाविद्याशब्दार्थः प्रागुक्तः ।

ननु सूत्रे हेतूपनिबन्धे चेतनानपेक्षामभ्युपगम्य प्रत्ययोपनिबन्धमात्रे
तदपेक्षाकथनमयुक्तम् एकैककारणे ऽपि तद्व्यापारयितृचेतनापेक्षाया वक्तुं
शक्यत्वादित्याशङ्क्याह **हेतूपनिबन्धस्त्विति ।** स्वरूपत एव तदसंभव-
स्योत्तरसूत्रे वक्ष्यमाणत्वादधिष्ठातृचेतनाभावेनापि तन्निरसनं हतहननमित्यु-
पेक्षितमिति भावः । तदेतदङ्गीकृत्येति पूर्वग्रन्थेन सूचितम् । **ननु मिलि-** १७५
तेभ्य इति । ननु चेतनमन्तरेण देहोत्पत्तिरपि पूर्वपक्षिणा‡ समर्थिता
न तत्राङ्कुरोत्पत्तिदृष्टान्तापेक्षा ऽस्तीति चेत् सत्यं पञ्चस्कन्धसमुत्पादस्तु
प्रत्ययोपनिबन्धो न हेतुमात्राधीनोत्पत्तिरिति टीकायां विशिष्य कारण-
समुदायाद्देहोत्पत्तौ चेतनापेक्षा ऽस्तीति समर्थयितुं प्रारब्धम् । तेनाङ्कुरो-
त्पत्तौ चेतनापेक्षा त्यक्तेति भ्रान्तेयमाशङ्का । देहोत्पत्तिमात्रस्य विशिष्य
निर्देशे ऽप्यङ्कुरोत्पत्तिरपि पक्षकोटिरेवेति तत्समाधानम् । **न च सर्वत्र**

---

* स्वरूपमिति १ पु॰ ।   † वृत्तिलाभ इति १ पु॰ पा॰ ।

‡ पूर्वपक्षितेति १ पु॰ पा॰ ।

हेतुत्वइति । अङ्कुरादावपि चेतनस्य हेतुत्वे तत्र कारणान्तरेषु सत्सु चेत-
नमात्रव्यतिरेकादङ्कुरादिव्यतिरेको दर्शनीयः स नास्तीति शङ्कार्थः ।
प्रत्यक्षेण कारणताग्रहे खल्वन्वयव्यतिरेकापेक्षा इह तु घटादिदृष्टान्तेनाङ्कु-
रादौ चेतनकारणसत्त्वमनुमीयते । तत्र चेदानीन्तनज्ञानदृष्टान्तेनाद्यज्ञानस्य
२७६ । १ ज्ञानान्तरजन्यत्वानुमानवत्तदनपेक्षेति परिहारार्थः । **संघातस्याप्रयोजक-
त्वमिति** । संघातस्य कार्यहेतुत्वे हि कार्योत्पत्त्यर्थमपेक्षितस्य सिद्धये
संहन्त्रा भाव्यम् । न तु स कार्यहेतुः किं तु* प्रत्येकसमर्थानाम् आर्थसमाज-
मात्रमित्यर्थः । **अन्ये च बीजक्षणाः सन्तीति** । भक्षणाद्युपयुक्ता इत्यर्थः ।
अनन्तरजन्यबीजजननइति । स्वाव्यवहितानन्तरक्षणजन्यं यद्बीजं
तज्जननइत्यर्थः । **स्वस्वकार्योपजननइत्यनुषङ्ग इति**† । स्वशब्दान्तरा-
ध्याहारेणानुषङ्ग इत्यर्थः । **नन्विति** । पूर्वपूर्वबीजक्षणस्योत्तरोत्तरबीजक्ष-
णजनने भवत्वनपेक्षत्वम् एतावता कथं कुसूलस्थबीजएव कृषीवलः कृती
स्यादिति दूषणं भवेद् अन्त्यक्षणस्य कुसूलाद्बहिर्भाव्यक्षेत्रेषूप्तस्यैवाङ्कुरजन-
कत्वकल्पनो‡पपत्तेरिति शङ्कार्थः । ननु यथाकार्यमनुपपद्यमानं सत्कारणं
नोत्पादयति एवं स्वसामर्थ्येनापि तन्नोत्पादयत्येव अतः किं तु स्वसाम-
र्थ्येनेति कार्यस्य कारणोत्पादकत्वाभ्युपगमो न युक्त इत्याशङ्क्य साध्या-
हारं व्याचष्टे **यदि जनकमिति** । कार्यं कारणस्य जनकं चेत् स्वसामर्थ्येने-
त्येव वक्तव्यं न च तदप्युपपद्यते अविद्यमानस्य सामर्थ्याभावादित्यर्थः ।
क्षणस्याभेद्यत्वादिति क्षणस्य पूर्वभागे अनुपकृतत्वावस्था उत्तरभागे उप-
कृतत्वावस्थेति दर्शयितुम् । क्षणस्य भागशो भेत्तुमशक्यत्वादित्यर्थः । **नित्येष्व-
णुष्विति** भाष्यवाक्ये आश्रयाश्रयिभूतेष्वित्यस्य विशेष्यं दर्शयति **भाष्यइति** ।
टीकायामवतारितं किमङ्ग पुनरिति द्वितीयभाष्यवाक्यस्थमाश्रयाश्रयिशून्येष्वि-
२७७ । १७ त्येतद्भावप्राधान्येन योजनीयमित्याह **आश्रयेति** । **आश्रयाश्रयिभूते-
ष्विति पाठे भोक्तृविशेषणमिति** । यद्यपि भोक्तृरहितेष्विति भाष्यपाठे
नोपसर्जनानां भोक्तॄणामिदं सप्तम्यन्तं विशेषणं§ भवितुं नार्हति तथापि
भोक्तृष्वसत्स्विति पाठान्तरमाश्रित्य तद्विशेषणत्वमुक्तम् । **तद्विशदय-**

---

* किं त्विति नास्ति १ पु॰ । † स्वस्वकार्यइत्यनुषङ्ग इति प्रतीकाकारः ५ पु॰ ।
‡ कल्पनेति नास्ति १ पु॰ । § भोक्तृविशेषणमिति पु॰ पा॰ ।

तीति । नासंहतस्य सामग्रीत्वमिति सिद्धान्त्यभिसन्ध्यवेदनं खलु प्रागुक्तं तदिदानीमस्तु तावदिति ग्रन्थेन विशदीक्रियते । अनेन हि ग्रन्थेन केवलाद्धेतोः कार्यं नोपजायतइत्येतदास्तां तावदिति नासंहतस्य सामग्रीत्वमित्येतद् दूषणमिह नोद्घाट्यतइत्युक्तम् । **सामान्यं हीति** । भूयोवयव- २७८ । १२
सामान्यं खलु सादृश्यन्तदन्यापोहभ्रमाधिष्ठानत्वेन कारणमित्यर्थः । यद्यप्येतावता घटरुचकाद्यनुगता मृत्सुवर्णादिरूपकारणता नायाति तथापि टीकायां श्रुतस्य कारणशब्दस्यार्थोयं दूषणं तु तथा चेत्याद्यनन्तरग्रन्थेन भविष्यतीति तात्पर्यम् । **नन्विति** । कार्यकारणभावे सादृश्यमप्रयोजकं किं तु यस्मिन् सति यद्भवति तत्कारणमित्यर्थः । **तर्हि जातिरेवेति** । जात्युपाधौ कारणत्वग्रहे ऽभ्युपगम्यमाने ऽपि* विवक्षितविवेकेन जातेः कारणत्वग्रह उक्तः स्यात् तथा च व्यक्तीनां कारणत्वं वदता त्वया तासां जात्यवस्थाविशेषणत्वेन जात्यभेदो वक्तव्यः अन्यथा जातेः कारणत्वेन व्यक्तीनां कारणत्वाऽनिर्वाहात् । न च तथेष्यतइति त्वया वक्तुं शक्यम् । जातिरवस्तुभूता व्यक्तयो वस्तुभूता इति त्वयेष्यमाणत्वादित्यर्थः । **वस्तुनो नित्यत्वापादानं द्रष्टव्यमिति** । उत्पादनिरोधशब्दयोर्वस्तुशब्दपर्यायत्वे वस्त्वतिरिक्तोत्पादनिरोधानङ्गीकाराद्वस्तु नोत्पत्तिमन्न निरोधवदिति स्यात् तथा च तस्य नित्यत्वापत्तिरित्यर्थः । **उत्तरक्षणोत्पत्तिकालइति** । उत्तरक्षणस्य कार्यस्योत्पत्तिः पूर्वस्मिन् कारणक्षणएव भवतु तथा च न कारणक्षणस्योत्तरक्षणे ऽप्यनुवृत्त्या स्थायित्वप्रसङ्गः । नापि कार्योत्पत्तेः कारणस्य च समसमयत्वहानिरिति शङ्कार्थः । **नन्वन्त्यसंतानिन इति** । मुक्तिपर्यन्तमनुवर्तमानायां विषयोपप्लुतचित्तसंततावन्त्यस्य सन्तानिन इत्यर्थः । **सादृश्यं हीति** । यद्यपि विषयविशेषोपरागकृतसादृश्यं न विव- २७९ । १५
क्षितं येन चैत्रात्मरूपचित्तसंताने ऽनुवर्तमानएव रूपज्ञानप्रवाहे रसज्ञानोत्पत्तौ तत्सन्तानविच्छेदः स्यात् । नापि सत्तासामान्यकृतं येन सोपप्लवचित्तोपरमे मुक्तौ निरुपप्लवचित्तसन्तानोदये ऽपि पूर्वसन्तानोच्छेदो न स्यात् किं तु विषयोपप्लवकृतं सादृश्यं विवक्षितमिति वक्तुं शक्यम् । तथापि निरन्वयविनाशः क्वापि न संभवति द्वितीयविकल्पदोष एवात्रापि द्रष्टव्यः ।

---

* अपिशब्दो नास्ति २ पु॰ ।

२७९ । २२ **इदानीं प्रत्यक्षेणानुवृत्तिमाहेति ।** ततोऽयं तेजसा मार्तण्डमण्ड-
लमम्बुदत्वायोपनीयतइत्यनुमेयमिति प्रक्रिया । सूर्यकिरणतप्तशिलात-
लपतिताम्बुनि प्रवर्तते न त्वग्नितप्तायःपतिताम्बुनीत्यपरितोषात्प्रकारान्त-
रेण परिहारमाहेत्यर्थः । **तस्य न हि तावदिति ।** भावरूपस्य शब्दस्य
द्रव्यादिषड्भावबहिर्भावप्रसङ्गो नास्तीत्यर्थः । **द्वीन्द्रियग्राह्येति ।** इदं दत्त्वा
इदं देयमिति जरन्नैयायिकमतानुसारेण द्वीन्द्रियग्राह्यघटादिवारणार्थम्
एकविशेषणे दत्ते पश्चाद्वायुवारणार्थमस्पर्शत्वे सतीति विशेषणं देयम् । प्रथ-
ममेव तस्मिन् दत्ते तु एकविशेषणं नापेक्षितम् । **एकस्य नानाकारत्वं
व्याहतमिति ।** ज्ञानातिरिक्ताकाराऽनभ्युपगमादाकारनानात्वं ज्ञाननाना-
त्वमेव पर्यवस्येदित्यर्थः । **एकज्ञानेनेति ।** एकेनैव ज्ञानेन तत्तेदन्ताव-
च्छिन्ननानापदार्थोल्लेखे सत्येव तेनेदं सदृशमिति सादृश्यस्फुरणापेक्षितनाना-
त्वोल्लेखो भवतीत्यर्थः । ननु न वयमिति प्राग्विकल्पितेषु पक्षेषु तत्तेदन्ता-
सादृश्यानि भासन्तएव भासमानानि च ज्ञानस्याकारः ज्ञानं चैकमेवेति पक्षः ।
आकाराणामारोपितत्वेन वास्तवज्ञानैकत्वव्याघातो नास्तीति पुनराशङ्कते*
तथा च तेनेदमिति । यतो भिन्नत्वे ज्ञानान्तरवदकल्पितः स्यात्तत
आकाराणां ज्ञानाभेदे ऽभ्युपगन्तव्ये परस्परमप्यभेदापत्त्या पदार्थानां ज्ञानज्ञे-
ययोश्च लोकप्रसिद्धो भेदो निन्हुतः स्यादित्यर्थः । **तथा च धर्मिभेदे-
नेति ।** कस्य चिज् ज्ञानस्य नित्यत्वमाकारः कस्य चिदनित्यत्वमिति
धर्मिभेदेन व्यवस्थायां विरोधाभावाद्वादिनां विवादो न स्यादित्यर्थः ।
आन्तरस्यानभिधेयस्येति । अनभिधेयत्वम् अशक्यसमयो ह्यात्मेति
स्वयमेव स्फुटीकरिष्यति । **व्यक्तेश्चोक्तमार्गेणाशक्यग्रहत्वादिति ।**
यद्यपि मीमांसकमते शक्यविषयभूताया अपि व्यक्तेः शक्तिविषयसामान्यस-
मानवित्तिवेद्यतया शब्दोल्लेखिसविकल्पकप्रत्ययविषयत्वमस्ति तथापि बौद्धैः
२८३ । ४ स्वलक्षणं निर्विकल्पकमात्रविषय इत्यङ्गीकृतमित्यशक्यग्रहत्वमुक्तम् । **पाशु-
पतस्य तपस्विनां† इति ।** के चन पाशुपताः स्वकीयशिवभागवतचिह्नतया
पूर्वाचारप्राप्तं जङ्घायां किङ्किणीबन्ध्यादिकं कुर्वन्ति तत् पृथग्जनाः जनसम्बाधे
स्वपरविपर्यासो मा भूदिति कृतं चिन्हमित्यारोप्य कथमस्य विपर्यासस्य

---

* आशङ्कतइति १ पु. पा. । † पाशुपतस्य हि तपस्विन इति मूले पाठः ।

प्रसक्तिरित्युपहसन्ति तेनापामरप्रसिद्धमात्मप्रथनमित्यर्थः । वर्षातपाभ्यां
व्योम्नः किं फलमस्ति वर्षेणार्द्रत्वम् आतपेन शुष्कत्वं वा फलं नास्तीत्यर्थः ।
किं तु चर्मणि वर्षातपयोः फलमस्तीति पूर्वार्धस्यार्थे स्थिते उत्तरार्द्धस्यार्थमाह
चर्मोपमश्चेदित्यादिना* ॥

नाभाव उपलब्धेः ॥ २८ ॥ २८४ १७

तथा चार्थात्प्रमेयमिथ्यात्वमापत्स्यतइति । यदा ज्ञानाधिक-
रणके प्रमाणफले अशक्तिव्यावृत्त्यज्ञानव्यावृत्त्यादिसामान्यात्मके तदा तन्मते
सामान्यस्य कल्पितत्वात्कल्पितेन प्रमाणेन तत्फलेन च वस्तुसिद्ध्यभावाद-
र्थाद्बाह्यवस्तुमिथ्यात्वमापततीत्यर्थः । **न च वस्तुतो भिन्नाभ्यामिति†** ।
वस्तुतो भिन्नाभ्यां प्रमाणफलाभ्याम् एकस्याभेदानुपपत्तेरेकज्ञानाभेदात्तयोर्न
भेदसिद्धिरित्यर्थः । मा भूत्प्रमाणफलयोर्भेदसिद्धिः (सत्येन ज्ञानेन तादा-
त्म्यात्)‡ तयोः स्वरूपतः सत्यत्वसिद्धौ तावता तत्प्रमेयस्य बाह्यवस्तुनः
सत्यत्वं सिद्ध्येदित्याशङ्क्य तयोरन्यापोहात्मकसामान्यरूपतया स्वरूपतो
ऽप्यसत्यत्वमुपपादयतीत्यवतारयति **तमेव दर्शयतीति । स्वरूपयन्त-
मिति तु पाठे अर्थमिति शेष इति ।** सद्रूपयत्तदिति पाठे सद्रूपयदित्यस्य
तदिति विशेष्यपदमस्ति न तु स्वरूपयन्तमिति पाठे ऽतस्तदुचितो ऽर्थमिति
पुँल्लिङ्गविशेष्यशब्दो ऽध्याहृतः । **एकपरमाएवात्मनीति ।** एकपरमाणुस्व-
रूपे स्थौल्यं गृह्यते चेत् स्वाभाविकं भवति न त्वेकपरमाणौ स्थौल्यं सम्भ-
वति अतो ऽनेकत्र परमाणौ स्थूलमित्येकाकारेण ग्रहणं न स्वाभाविकमि-
त्यन्योपाधिकं वाच्यमित्यर्थः । **व्याघातादिति ।** भेदे तादात्म्यं व्याहतं
भेदाभेदपक्षस्तु विरोधान्न सम्भवतीति तत्र तत्रोक्तम् । **अश्विनाविति ।**
यद्यप्यश्विनौ देवभिषजावश्वयुजोर्नक्षत्रयोर्देवता न तु नक्षत्रे एव अश्व-
युजो नक्षत्रमश्विनौ देवतेति श्रुतेस्तथाप्यभेदोपचारादश्विनौ नक्षत्रे इत्यु-
क्तम् । स्वभावहेतुरित्यस्य बौद्धव्यवहारसिद्धमर्थमाह **यो यन्मात्रानु-** २८७ । २६
बन्धीति । प्रत्ययत्वमात्रानुबन्धीति । स्वप्नप्रत्ययादिषु बाह्यानाल-
म्बनत्वदर्शनात् प्रत्ययत्वमात्रप्रयुक्तं निरालम्बनत्वमित्यर्थः । निरालम्बन-

* अत्र चतुर्थं समुदायाधिकरणं पूर्णम् ।

† वस्तुभिन्नाभ्यामिति ५ पु० पा० ।   ‡ ( ) एतन्मध्यस्थो ग्रन्थो नास्ति १ पु० ।

म्बनत्वस्येति। सर्वे ऽप्यालयविज्ञानसन्तानक्षणा हेतव इति वक्तव्यमिति। ननु सर्वे हेतव इति वा कश्चिदेव हेतुरिति वा नोच्यते किं तु के चन हेतवः के चिदहेतव इत्युच्यतइति चेद् न। सर्वसन्तानवर्तित्वाविशेषे तथाव्यवस्थितिकल्पनाऽयोगात्। अतो नीलज्ञानकादाचित्कत्वसिद्ध्यर्थं बाह्यसत्त्वमभ्युपेयमिति भावः। तत्प्रबोधसामर्थ्यमित्यस्य विवरणमुत्तरक्षणगतवासनापरिपाकाख्यप्रबोधसामर्थ्यमिति। तदनन्तरचकारस्तु टीकास्थस्य नीलज्ञानोपजननसामर्थ्यसमुच्चयार्थस्यानुवादः।

लायाः प्रत्ययात्मत्वं भावान्तरमभावो हीति तन्मतेनोपपादयति निराल-

२६० । ६ एवं हि संतानान्तरस्य कालविप्रकर्षः स्यादिति। यदीदानीन्तनचैत्रसंतानसंजातनीलज्ञानसमनन्तरपूर्वक्षणएव मैत्रसंतानोत्पत्तिः स्यात्ततः प्राङ् मैत्रसंतानो न स्यात् तदा प्राङ्मैत्रसंतानरूपापेक्षितव्यसहकार्यभावाच्च चैत्रसंताने नीलज्ञानानुदय इति वक्तुं शक्यं न त्वेतदस्ति। तथा सति मैत्रसंतानरूपसंसारस्य सादित्वप्रसङ्गात्। तस्मात्प्रागपि मैत्रसंतानसत्त्वे तु कालविप्रकर्षाऽभावान्नीलज्ञानोदयप्रसङ्ग इति भावः। स्वसंतानमात्रनिमित्तकत्वं विपक्ष इति। हेतोरप्रयोजकत्वेन पक्षस्येव साध्याभाववत्तया विपक्षत्वशङ्कायां हेतोर्विपक्षव्यावृत्तिः संदिग्धा भवति पक्षस्य साध्याभाववत्त्वे तद्वृत्तेर्हेतोर्विपक्षवृत्तितेति। यद्यपि हेतुमति पक्षे साध्यसंदेहः स्वारसिको न व्यभिचारसंदेहत्वेन दोषः। अनुमानमात्रोच्छेदापत्तेः। तथाऽप्यप्रयोजकत्वसंदेहाहितः सो ऽपि तत्र दोष एवेति भावः। स्वसन्तानमात्रनिमित्तत्वमुपपादयितुमिति। संतान*मात्रनिमित्तत्वेपि कादाचित्कत्वमुपपद्यतइति हेतोरप्रयोजकत्वमुपपादयितुमित्यर्थः। नन्वालयविज्ञानक्षणानामिति। चैत्रमैत्रादिभिन्नसंततिपतितानामित्यर्थः। न च संतानो नाम कश्चिदिति ग्रन्थेन संतानस्वरूपं निषिध्यतइति प्रतिभाति। तदयुक्तम्। अग्रे संतानभेदाऽभेदाभ्यां शक्तिभेदाऽभेदव्यवहारदर्शनादित्याशङ्क्य तद्वाक्यं संतानस्य क्षणोत्पादकत्वनिषेधार्थतया योजयति क्षणानां संबन्धीति। संतानस्य क्षणोत्पादकत्वे खलूत्पादकाविशेषादेकविधं सामर्थ्यं स्याद् न तु तदस्तीति भावः। क्षणभेदेपि न सामर्थ्य-

* स्वसंतानेति १ पु० पा०।

भेद इत्युपपाद्येति । ननूक्तमित्यादिशङ्कावादी सौत्रान्तिकः क्षणभेदे ऽपि प्रतिविज्ञानव्यक्ति न सामर्थ्यभेदः एकस्मादालयविज्ञानक्षणान्नीलज्ञाने सति पुनर्नीलज्ञानान्तरानुत्पत्तिप्रसङ्गादतः सर्वेषामपि तेषां सामर्थ्यमास्थेयमिति नीलज्ञानकादाचित्कत्वाभावप्रसङ्गमुपपाद्य स्वमते तत्प्रसङ्गं परिहरतीत्यर्थः । विज्ञानवादी सौत्रान्तिकमते हन्त तर्हीत्यादिना दूषणं वदतीत्यवतारयति **तत्र दूषणमाहेति ।** एकमेव नीलं नीलाकारज्ञानं जनयेदित्येतदनन्तरं न संन्तानान्तरस्य वर्तीति स्थाने नीलान्तरं सन्तनान्तरवदिति क्व चित्पाठस्तत्र नीलान्तरं सन्तानान्तरवर्तिनं नीलाकारज्ञानं जनयेत् पीतसन्तानवर्तिगुणान्तरवदित्यर्थो ग्राह्यः । **यथा च नीलपीतादिसन्तानान्तराणामिति ।** एकस्मान्नीलसन्तानान्तरस्य पीतसन्तानस्य च भेदाऽविशेषे ऽपि क्व चिन्नीलज्ञानजननशक्तिः क्व चिन्नेतिवदेकज्ञानएवैक*विज्ञानसन्ततिपातित्वाविशेषे ऽपि केषु चित्तज्जननशक्तिः केषु चिन्नेतीति व्यवस्था कल्प्यते दृष्टानुसारित्वात्कल्पनायाः । अतः सन्तानभेदः शक्तिभेदइव तद्भेदो ऽपि शक्त्यभेदे न प्रयोजक इति भावः । **अर्थात्पूर्वमिति लभ्य-** २९१ । २
तइति । असंविदितत्वोक्तिसामर्थ्यात् पूर्वज्ञानमिति लभ्यतइत्यर्थः । सामर्थ्यमेवोपपादयति **वर्त्तमानस्येति ।** संविदितत्वात्तदानीं ज्ञायमानत्वादित्यर्थः । मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तप्रत्ययः । असंविदितत्वम् अनागते ऽप्यविशिष्टम् अतस्तद्व्यावर्तनं विधान्तरेण दर्शयति **अनागतस्य चेति । तादृशज्ञानमिति ।** यत्तदानीमज्ञायमानं सिद्धसत्ताकत्वं तथाभूतज्ञानं वासनेत्यर्थः । इदमत्राकूतमित्यादिटीकाग्रन्थेन वक्ष्यमाणमर्थं भाष्यारूढं करोति **तत्रभवतेति ।** तथापीत्यादिटीकार्थं मनसि कृत्वा ऽवतारयति **तत्रासम्भवमिति ।** ततः प्राक्तनग्रन्थं तदुपयोगिनमवतारयति **तत्र बौद्धेनेति । स्थौल्यं ह्यर्थस्येति ।** बाह्यार्थसत्त्वे युगपदनेकदिग्देशव्यापि वस्तु स्थूलमिति वक्तव्यम् । तच्च सर्वात्मना कदापि न दृश्यते करतलामलकादीनामप्यधोभागावच्छेदेन दर्शना†भावात् । अतो दर्शनाऽदर्शनाभ्याम् एकस्यैव स्थूलवस्तुन आवृतत्वमनावृतत्वं च वाच्यमिति विरुद्धधर्माध्यासाद्भेदः प्रसज्यते । विज्ञानवादे तु नायं

* एकैकेति २ पु॰ पा॰ । † तत्प्रदर्शनेति २ पु॰ पा॰ ।

दोषः । तत्र हि विज्ञाने यावानाकारो भासते तावानेवास्ति आवृतस्तु
२९१ । १७ नान्तर्बहिर्व्याप्रियतइत्यर्थः । **इदानीमेतमसम्भवमनुमत्येति ।** आस्तामसम्भवो ममानिर्वचनीयवादिनो मते ते कथं नासम्भव इति प्रतिपादयतीत्यर्थः । टीकायां व्यतिरेकाऽव्यतिरेकवृत्ति*विकल्पौ च परमाणोरंशवत्त्वं चोपपादितानि वैशेषिकपरीक्षायामिति ग्रन्थं विज्ञानवादिमतनिराकरणार्थहेत्वन्तरपरत्वेन योजयति **अर्थस्य ज्ञानाऽभेदे सत्यवयविन्यवयवे चोक्तदोषान्तरमपि ज्ञाने दुर्वारमित्याहेति ।** अवयवी अवयवेभ्यो भिद्यते न वेति विकल्पो व्यतिरेकाऽव्यतिरेकविकल्पः । भेदपक्षे स प्रत्यवयवं कार्त्स्न्येन वर्तते एकदेशेन वेति विकल्पो वृत्तिविकल्पः । एताववयविदोषौ । सूक्ष्मावयवः परमाणुरपि सांशो ऽनंशो वेति विकल्पपूर्वकं सांशत्वावश्यम्भावापादनम् अवयवदोषः । एतद्दोषत्रयं विज्ञानवादिमतेऽपि स्यात् । न हि विज्ञानवादिना ऽस्माभिरिव जगदनिर्वचनीयमित्युच्यते येन तस्येत्थं विचाराऽसहत्वं भूषणं स्यात् किं तु बाह्यास्तित्ववादिभिर्यद्यावद्बहिरस्तीत्युच्यते तत्सर्वमन्तः सत्यमेवास्तीत्युच्यते सत्यत्वे च बहिरिवान्तरप्येते विकल्पदोषाः प्रादुःष्युरिति भावः । अमुमेव टीकाग्रन्थमवयविवादिनं प्रत्युक्ता दोषाः समुदायवादिनं प्रत्यपि स्युरिति प्रासङ्गिकसौत्रान्तिकमतनिराकरणार्थत्वेनापि योजयति **यद्वा विज्ञानादिभिन्नस्थूलार्थइति ।** केषु चित्कोशेषु द्वितीयावतारिकेव यद्वेतिशब्दरहिता दृश्यते न प्रथमावतारिका । यद्यप्ययं व्यतिरेकाऽव्यतिरेकादिटीकाग्रन्थः सर्वैरेव प्रमाणैर्बाह्यार्थ उपलभ्यमानः कथं व्यतिरेकाऽव्यतिरेकादिविकल्पैर्न सम्भवतीत्युच्यतइति भाष्यानूदितविज्ञानवादिकृतबाह्यास्तित्वनिराकरणार्थं† व्यतिरेकादिविकल्पविवरणमत्र न कर्तव्यम् अधस्तादेव कृतमित्येतदर्थः प्रतिभाति तथापि न केवलमयं दोषः ममानिर्वचनीयवादिनो मते न प्रसरतीत्येतावत् किं त्वन्तः सदिति वादिनो बहिः सदिति वादिनश्च बौद्धस्य मते वैशेषिकमतइव प्रसरतीत्युष्ट्रलगुडन्यायो ऽप्यनेन ग्रन्थेन सूचित इति प्रदर्शयितुमस्य ग्रन्थस्य विधान्तरेण द्वेधा तात्पर्यमा-
२९२ । ३ चार्यैरुक्तम् । **परमाणूनिति ।** ज्ञानाकाररूपानित्यर्थः । चाक्षुषस्य प्रभा-

* व्यतिरेकवृत्तीति १ पु० पा० ।

† निराकरणार्थत्वेन १ पु० पा० ।

रूपानुविद्धबुद्धिबोध्यत्वनियमो नास्ति उलूकपिशाचादिचक्षुर्ग्राह्ये व्यभिचारादित्याशङ्क्य मनुजैरिति विशेषितमित्याह **मनुजग्रहणमिति** । **वास्य- २९२ । वासकत्वमविद्योपप्लवे हेतुरिति** । उत्तरज्ञानस्य नीलाद्याकारसमर्पणोपयुक्तवासनाशक्तिमत्पूर्वज्ञानं वासकम् उत्तरज्ञानं वास्यम् । अनयोः संबन्धो वास्यवासकत्वं तस्य सविकल्पकरूपाविद्योपप्लवहेतुत्वोक्त्या विवक्षितविवेकेन वासनाया एव तद्धेतुत्वमुक्तं भवति । अनादिवासनोद्भूतेति संमतिश्लोकेन च तथैव स्फुटीकरिष्यते । **भावमिति** । भावं नीलादिकम् उभयं विज्ञाननरविषाणादिकं च कर्मामूर्तत्वादिरमूर्तत्वं सत्त्वमसत्त्वं च कर्तृ समाश्रयत इति सत्त्वादिशब्दार्थौ भावाभावोभयाश्रय उक्त इत्यर्थः । न चास्त्वेकः प्रतिसंधाता नैतावता बाह्यार्थसिद्धिरित्याशङ्क्याह **त्वया च स नेष्यत इति*** । बाह्यास्तित्ववच्च क्षणिकविज्ञानसन्तत्यतिरिक्तात्मास्तित्वेऽपि तन्मतभङ्गस्तुल्य इति भावः । चोदयतीति ग्रन्थमाशङ्कानिराकरणार्थत्वेनावतारयति **विज्ञानस्य स्वव्यतिरिक्तार्थविषयत्व इति** । **विज्ञानग्रहणमात्र एवेति** । अन्तःकरणवृत्तिरूपं यद्विज्ञानं तन्नीलादिविषयग्रहणं तन्मात्र एव स्वीकृते तत्प्रतिबिम्बितो विज्ञानसाक्षी विज्ञानविषयं ग्रहणान्तरं नापेक्षते स्वयमेव तद्भावरूपत्वादतो नाऽनवस्थेति भाष्यार्थ इत्यर्थः । **अनुभवितुर्व्याप्ताविति** । अनुभवितृकर्तृकव्याप्तावित्यर्थः । अनेन साक्षिविषयेति विज्ञानसाक्षिग्रहणा†काङ्क्षानुत्पादादिति भाष्यं विज्ञानसाक्षिणः कर्तुर्विज्ञानविषयग्रहणाकाङ्क्षानुत्पादादित्येतदर्थपरतया पूर्वं व्याख्यातं तद्वाक्यमनेन ग्रन्थेन विज्ञानसाक्षिकर्मकग्रहणान्तराकाङ्क्षानुत्पादादित्यपि व्याख्यातं भवतीत्यर्थः । **वियद्वस्त्विवेति** । कुम्भस्योत्पत्तौ सत्यां तस्य या वियत्संपूर्णता सा वियद्वस्तुस्वभावानुरोधात्सर्वत्र व्यापकस्य वियतो ऽयं स्वभावो यदवच्छेदकस्य कुम्भादेरुत्पत्तौ सत्यां तेनावच्छिद्यत इति । एवंभूततत्स्वभावानुरोधादेव न तु कारणान्तरतस्सा संपूर्णता । एवं धियां दृशा संपूर्णतापि दृग्वस्तुस्वभावादेवेति श्लोकार्थः । **स्वतःसिद्धप्रकटतया ज्ञानस्य २९४ । ग्राह्यत्वमिति संबन्ध इति** । ज्ञानस्य ग्राह्यत्वमित्यस्यानुषङ्ग इत्यर्थः । **व्यापकसाक्षिसंबन्धस्येति** । अविद्यावच्छिन्नो जीव एव साक्षी स च

---

* नेष्ट इति १ पु॰ पा॰ ।

† विज्ञाने साक्षिग्रहणेति १ पु॰ ।

विषयप्रदेशे ऽप्यस्तीति विषयस्यापि तत्संबन्धस्तुल्य इत्यर्थः । **तदधीना-**
भिव्यक्तिकेति । व्यापको ऽपि साक्षी स्वच्छान्तःकरणावच्छिन्नो ऽनावृतो
विषयावच्छिन्नस्त्वावृत इत्यावरणभङ्गार्थं वृत्त्यपेक्षेत्यर्थः । एतत्प्रपञ्चस्त्वस्म-
त्कृते सिद्धान्तसंग्रहे द्रष्टव्यः ।

२९४ । १७ **यथा चाक्षुषी प्रभेति** । यद्यपि दृष्टान्ते चक्षुःप्रभात्मकं व्यञ्ज-
कमेकं रूपं वायुश्चेति व्यङ्ग्यमव्यङ्ग्यं च भिन्नं दार्ष्टान्तिके व्यङ्ग्यसाक्षिचैतन्य-
मेकम् अन्तःकरणं घटादिकं चेति व्यञ्जकमव्यञ्जकं च भिन्नं तथापि
व्यङ्ग्यव्यञ्जकभावो वस्तुमहिम्ना व्यवस्थित इत्येतावन्मात्रे दृष्टान्तः सर्वा-
त्मतासमस्तु दृष्टान्तः प्रागेवाचार्यैर्दर्शितः । मुकुरतले मुखमित्यनेन घट-
मुकुरयोर्मुखसान्निध्याविशेषेपि स्वच्छो मुकुर एव मुखस्य व्यञ्जको न घट
इति । **आत्मा ज्ञेय इति** । नन्विदं शरीरं सात्मकं प्राणादिमत्त्वादित्या-
नुमानिकज्ञानविषयत्वेन चैत्रो विद्वानित्यादिशाब्दज्ञानविषयत्वेन च सिद्ध-
साधनम् । प्रकाशमानत्वं ज्ञेयत्वं चेत्साध्याऽविशेषः । अन्यच्च दुर्वचमिति
चेत् । आत्मा अपरोक्षज्ञानविषयः अनुमितिशाब्दज्ञानाऽजन्यव्यवहारविष-
यत्वादित्यत्र तात्पर्यात् । **कथं सकलविशेषोपसंग्रहवतीति** । यद्यपि
व्यवहारविषयत्वमेक एव धर्मो हेतुः न तु धूमवदनेकव्यक्तिरूप इति
नात्र सकलहेतुव्युत्पत्त्युपसंग्रहापेक्षा तथापि सकलहेत्वाश्रयोपसंग्रहापेक्षास्ति यो
यो धूमवान् सो ऽग्निमानित्यादिनोदाहरणवाक्येन व्याप्तिबोधकेन वीप्सित-
यच्छब्दोपस्थापितसकलहेत्वाश्रयेषु साध्यसंबन्धबोधनात्तदनुसारेण व्याप्तेर्या-
वद्धेत्वाश्रयवर्तिसाध्यसामानाधिकरण्यरूपताया वक्तव्यत्वादिति भावः ।
आगन्तुको यस्य नास्ति सो ऽनागन्तुकः स चा सौ प्रकाशश्चेति बहुव्रीहि-
गर्भकर्मधारयपरिग्रहे को ऽसावागन्तुको निषेध्य इति जिज्ञासायामाह **अर्था-
दिति** । नित्याऽपरोक्षत्वहेतूपादानसामर्थ्यादागन्तुकस्तद्विषयप्रकाशो निषेध्य
इत्यर्थाल्लभ्यत इत्यर्थः । **भासमानत्वमिति** । आवृतत्वादभासमाने
ऽपि पूर्वोक्तेन भासत इतिशब्देन बोध्यत्वमस्तीति तदपि भासमानं भवे-
दतो बाधविधुरमित्युक्तम् । तथा सत्यसंभवः । ब्रह्मातिरिक्तस्य सर्वस्य
२९५ । ७ बाध्यत्वादिति व्यावहारिकविशेषणम् । **वेदान्तजन्यवृत्त्युपाधाविति** ।
तथा च यदुपहितं ज्ञेयं न तत्स्वप्रकाशत्वेनेष्यते यत्त्वनुपहितं तथेष्यते

न तज्ज्ञेयमिति नासंभव इत्यर्थः । ननु वृत्त्युपहितस्य तेन रूपेण तद्वि-षयत्वं नोक्तं किं तु वृत्त्युपरागे सति वृत्त्यंशं परित्यज्य केवलस्यात्मनस्त-द्विषयत्वमुक्तं वृत्त्युपरागोऽच सत्तयैवोपयुज्यते न प्रतिभास्यतया । अतो वृत्ति-संसर्गे सत्यात्मा विषयो भवति न तु स्वत इति अतः स्वप्रकाशस्य केव-लस्यात्मनो वृत्तिविषयत्वाङ्गीकारादज्ञेयत्ववचनमयुक्तमिति चेद् न । उपाध्य-घटनीयज्ञानविषयत्वाभावस्य विवक्षितत्वात् । न चैवं मुकुरोपाधिघटनीय-ज्ञानविषयभावे मुखप्रतिबिम्बे ऽतिव्याप्तिः । प्रतिबिम्बस्य बिम्बाभिन्नत्वा-द्बिम्बस्य च मुखप्रतिबिम्बोपाधिं विना ऽपि ज्ञेयत्वात् । **संविदभिन्नत्वं चेति** । इन्द्रियत्वावच्छिन्नेन्द्रियजन्यज्ञानत्वं ज्ञानापरोक्ष्यं तद्विषयत्वं विष-यापरोक्ष्यमिति विभागो नेष्यते किं तु सर्वानुगतमापरोक्ष्यं संविदभिन्नत्वं तच्च संविद्रूपस्यात्मनः स्वतःसिद्धं तदन्यस्य बाह्यस्य घटादेरान्तरस्या-न्तःकरणवृत्त्यादेश्च संविद्यभेदेनाध्यस्तत्वादभिव्यक्तसंविदभेदाध्याससिद्ध-मित्यर्थः । **तत्समर्थनार्थमिति** । आत्मनो नित्यापरोक्षसंविदभिन्नत्वस-मर्थनार्थमित्यर्थः । **शश्वदिति** । हेतुद्वये ऽपीदं विशेषणं घटादिव्यावृत्त्य-र्थम् । अत एव तस्य व्यतिरेकदृष्टान्तता । यद्यप्यात्मनो वेदान्तप्रतिपा-द्याखण्डानन्दरूपेणावृतत्वात्तेन रूपेण संदिग्धत्वमस्ति अत एव तस्य शास्त्रविषयतोक्ता प्रथमसूत्रे तथापि तस्य ज्ञानसुखादिसाक्षिचैतन्यरूपेणाना-वृतत्वमसंदिग्धत्वं चास्तीति द्वितीयहेतोर्नासिद्धिः । **न चाप्रसिद्धविशे-षणत्वम्** । प्रथमानुमानस्येति शेषः ।

एतदन्येति । एतस्मात्पक्षीकृतादन्यत्वेन विशेषितं यज्ज्ञेयत्वं २९५ । १५
तद्रहितं यद्भासमानं तदन्येत्यर्थः । दृष्टान्ते पक्षादन्यत्वमादाय साध्य-सिद्धिः । पक्षो हि ज्ञेयः सन्नपि पक्षान्यत्वाभावात्तद्विशिष्टज्ञेयत्वरहितो भवति भासमानश्च तदन्यत्वं पटे संप्रतिपन्नं पक्षे तु न पक्षादन्यत्वमादाय साध्य-सिद्धिः बाधात् । किं तु पक्षादन्यत एव कुतश्चित्पक्षान्यत्वविशिष्टज्ञेय-त्वरहिताद्भासमानादन्यत्वमादाय पक्षे साध्यसिद्धिर्वाच्या प्रसिद्धघटादिमध्ये च पक्षादन्यत्वविशिष्टज्ञेयत्वरहितं भासमानं वस्तु नास्ति सर्वस्यापि भासमानस्य पटादेः पक्षादन्यस्य पक्षान्यत्वविशिष्टज्ञेयत्ववत्त्वात् । अतो यस्मादन्यत्वमादाय पक्षे साध्यपर्यवसानं वाच्यं तत्किंचिदप्रसिद्धं पक्षाद-

न्यत्वविशिष्टज्ञेयत्वरहितं भासमानं वस्त्वनेनानुमानेन सिध्यति । तत्र च विशिष्टराहित्यं न पक्षान्यत्वविशेषणाभावाद्वक्तुं शक्यम् । यतो ऽन्यत्वं पक्षस्य साध्यते तस्य पक्षान्यत्वनियमादतस्तत्र ज्ञेयत्वरूपविशेष्याभावेन विशिष्टराहित्यं वाच्यमित्यज्ञेयभासमानवस्तुसिद्धिः । अतस्तस्य साध्यप्रसिद्ध्युपपादकस्यानुमानस्यानन्तरं क्व चित्क्व चित्कोशे अनुमानान्तरप्रदर्शनं तत्र हेतुविशेषणव्यावर्त्यकथनमाश्रयासिद्धिपरिहरणं साध्यार्थकथनं तत्रैव सिद्धसाधनत्वशङ्कानिराकरणार्थत्वेन न चैतदित्यादिटीकाग्रन्थवाक्यावतारणं च दृष्टं तद्विलिख्यते । तथा देवदत्तस्य तदात्मास्तित्वजिज्ञासायामेकस्मिन् क्षण एव तदात्मनिष्ठतदात्मविषयसंदेहध्वंसो ऽसंदिग्धाऽविपरीततदात्मानुभवजन्यः एतदात्माभावप्रमैतदात्मविपर्ययाभ्यामजन्यत्वे सति जिज्ञास्यमानैतदात्मगोचरसंदेहनिवृत्तित्वात् पुरुषान्तरगततदात्मगोचरतथाविधसंदेहनिवृत्तिवस्तुनि नास्तीत्यभावप्रमया नास्तीति भ्रमेण वा ऽनवधानेन वा भवति । सा च न भावतत्त्वानुभवजन्येति तत्र व्यभिचारः स्यात्तन्निवृत्त्यर्थमेतदात्माभावेत्यादिविशेषणद्वयम् । न च वाच्यमात्मनः शश्वदसंदिग्धत्वे कथं संदेहध्वंसः प्राग्भावात् संदिग्धत्वे च कथं शश्वदसंदिग्धत्वमिति यतः शश्वदसंदिग्धत्वे ऽपि पुरुषान्तरारोपितनास्तित्वकोटिकः संशयः स्यात् स च स्वरूपानुभवान्नेत्स्यते । आत्मानुभवजन्य इत्यत्र चास्तीति व्यवहारहेतुरनुभव उक्तः स स्वरूपभूतो ऽपि संभवतीति ।

ननूक्तविधानुभवजन्यत्वं संदेहध्वंसस्य सिद्धं साध्यते आत्मविषय-
। १७ तथाविधानुभवाभ्युपगमादित्याशङ्क्याह **न चैतदिति** । यदि ततो ऽन्यो ऽनुभवः संशयच्छेत्ता स्यात्तर्हि तदात्मजिज्ञासायामप्यनुभवस्यानुदयसंभावनया ऽऽत्मसंदेहः स्यादित्यर्थः । स्यादेतत् । आत्मजिज्ञासायां तद्विषया संविदुदयत एवेति तत्राह **अनवस्थेति** । यश्चेश्वरतथाविधानुभवजन्यत्वेन सिद्धसाधनत्वमाह तं प्रत्यनीश्वरेति विशेषणीयम् ।

तदाभ्यां तर्काभ्यां परिशोधितमनुमानं स्वयंप्रकाशत्वे पर्यवस्यतीत्याह **तस्मादिति** । सर्वमिदं प्रक्षिप्तमिव प्रतिभाति । न हि साध्यप्रसिद्ध्यर्थानुमानवदिहानुमानान्तरमपेक्षितम् । संदेहानुत्पादनियमवत्संदेहनिवृ-

त्तिनियमो ऽप्यनागन्तुकात्मानुभवसद्भावे साधकान्तरं भवेद् वस्तुतः साधकान्तरमपि न भवति । यतस्तत्राश्रयासिद्धिरपरिहार्या न हि सर्वानुभवसिद्धे सुखाद्यनुभवितरि साक्षिणि प्रत्यक्षदृष्टे घटइव पुरुषान्तरोक्तिमात्रेण नास्तित्वसंदेहः कस्य चिदुदेति यतः संदेहनिवृत्तिः पक्षे सिध्येत् । चार्वाको ऽपि खल्वहमनुभवस्य शरीरं विषयं प्रदर्श्यातिरिक्तमात्मानमपलपति न त्वहमनुभवमेवापलपति । न च चार्वाकोपन्यस्तशरीरात्मवादयुक्तिश्रवणक्षुभितहृदयस्य शरीरातिरिक्तात्मास्तित्वसंदेहो भवतीति तन्निवृत्तिः पक्षे स्यादिति वाच्यम् । तस्य संदेहस्य एक आत्मनः शरीरे भावा*दित्यधिकरणोक्तस्थिरन्यायानुसंधाननिवर्त्यस्य शरीरविषयत्वेन शङ्कितान्यथासिद्धिना ऽनुभवमात्रेण निवृत्त्यसंभवात् । किं च टीकायां स्वात्मनि संदेहानुत्पाद एव प्रपञ्चितः संदेहनिवृत्तिस्तु लेशतो ऽपि न स्पृष्टा । अतस्तत्र संदेहाद्यनुत्पादप्रपञ्चनानन्तरं प्रकृत्य तयोर्न चेतदन्याधीनसंवेदनत्वे घटते अनवस्थाप्रसङ्गश्चोक्त इति वाक्ययोः संदेहनिवृत्तिपक्षकानुमानविषयसिद्धसाधनत्वशङ्कानिराकरणार्थत्वेनावतारणमपि न युक्तम् । उक्तानुमानयोः स्वप्रकाशत्वानुमाने विषयपरिशोधकतर्कत्वोक्तिरप्ययुक्ता । आद्यानुमानस्य साध्यप्रसिद्धिसंपादनार्थत्वात् । द्वितीयानुमानस्य कथं चिददृष्टत्वे ऽपि नित्यानुभवे साधकान्तरत्वात् । तस्मान्न चेतदिति टीकावाक्यमात्मनो नित्यापरोक्षत्वाभावे कदा चिदात्मनि संदेहः स्यादित्येतत्परम् । आत्मविषयसंविदन्तरोत्पादनियमे वस्तुसंदेहानुत्पाद इति शङ्कावारणार्थमनवस्थाप्रसङ्गश्चोक्त इत्येव युक्तम् । तथैवावतारणं कोशान्तरेषु दृश्यते तेषु खलु साध्यप्रसिद्ध्युपपादकमनुमानानन्तरमित्थं न चेतदित्यादिवाक्ययोरवतारणम् ।

विपक्षे दण्डमाह **न चैतदिति** । यदि नित्यसाक्षात्कारत्वमात्मनो न २९५ । १७
स्यात्तर्हि कदा चिदात्मनि संदेहः स्यादित्यर्थः । स्यादेतद् आत्मविषया संविदुदेत्येवेति तत्राह । **अनवस्थेति** । एवंग्रन्थेन व्याख्या†नानन्तरं केषु चित्कोशेषु अधिकशङ्कापरिहारग्रन्थो दृश्यते ननु सुखादीनामपि स्वसत्तायां

---

* व्याससू॰ अ॰ ३ पा॰ ३ सू॰ ५३ । † ग्रन्थव्याख्येति १ पु॰ पा॰ ।

संदेहाभावसाम्ये कथमात्मैव प्रकाश उच्यते आत्मप्रकाशेनैवानुगतेन तेषामापरोक्ष्यसंभवे प्रत्येकं न स्वप्रकाशत्वं कल्प्यमिति स्पष्टार्थो ऽयं ग्रन्थः ।

२९५ । २१ **विपक्षे दण्ड उच्यतइति** । अनुकूलतर्क उच्यते इत्यर्थः । **साधनव्याप्त्यनुमानस्येति** । स्तम्भादिप्रत्ययो निरालम्बन इति दर्शितानुमानस्येत्यर्थः । **औपचारिको व्याख्यातव्य इति** । प्रमाणामिलितसंस्कारजत्वसादृश्यात् स्वप्नज्ञाने स्मृतिशब्दो गौणो व्याख्येय इत्यर्थः । ननूपलब्धिशब्दो ऽनुभवमात्रपरः प्रसिद्धः किमिति षट्प्रमाणजनितत्वेन विशेष्यतइत्याशङ्क्याह **एवमव्याख्यानइति** । तेन संदिग्धवस्तुधर्म इति तेन भाष्येण सूचितमित्यन्वयः । **ननु किमन्याधिष्ठानतत्त्वबोधनेनेति** । प्रत्यक्षादिप्रमाण*बोधितविपरीताधिष्ठानतत्त्वबोधकं प्रमाणं निरधिष्ठानभ्रमं वदतः शून्यवादिनो मते न संभवति चेत्तन्मा भूत्प्रत्यक्षादिप्रतीतवस्तुगतं यद्विचारासहत्वं तदेव बाधकप्रमाणं भूत्वा प्रत्यक्षादीनां सांव्यवहारिकं प्रामाण्यं तद्विषयाणामतात्त्विकत्वं च गमयतीत्यर्थः । **सदसदादिपक्षेति** । विचाराऽसहत्वं नाम कश्चिद्वस्तुभूतो धर्मो ऽस्त्येव स धर्मः सत्त्वासत्त्वसदसत्त्वानुभयात्मकत्वपक्षेष्वन्यतमपक्षपरिग्रहेण वस्तुभूतो व्यवस्थाप्यते स तु वस्तुतः सत्त्वादिरूपेण विचारं न सहतइत्येतावदेवोच्यतइति प्रथमविकल्पार्थः । विचारासहत्वे सत्त्वादिपक्षान् परित्यज्य शून्यमेव लभ्यत†इति द्वितीयविकल्पार्थः । **असत्त्वाऽव्यवस्थाप्रतिज्ञाविरोध इति** । किंचिदपि वस्त्वसत्येन व्यवस्थापयितुं न शक्यतइति तत्प्रतिज्ञाविरोध इत्यर्थः । **इति प्रतिभातीति** । यद्यपि बौद्धव्याकरणे पश्यनादिशब्दाः साधुतया व्युत्पादितास्तथापि अनादिसिद्धप्रयोगसिद्धसकलसाधुशब्दसंग्राहकपाणिनीयाद्यपरिगृहीतत्वादसाधवः प्रतिभान्तीत्यर्थः‡ ॥

२९८ । ६ नैकस्मिन्नसंभवात् ॥ ३३ ॥

अस्तीति कायन्तइति । कैधातोरादेच उपदेशइत्यात्वे कर्मणि घञि आतो युगिति युगागमे च सति काय इति रूपम् । **शास्त्रीयेति** । शास्त्रीयया तप्तशिलारोहणादिशास्त्रप्रभवया बाह्यया चेष्टारूपया प्रवृत्त्ये-

* प्रत्यक्षादिषु प्रमाणेति १ पु. पा. ।
† गम्यतइति १ पु. पा. ।
‡ अत्र पञ्चमम् अभावाधिकरणं पूर्णम् ।

त्यर्थः । आन्तरवृत्ति*र्यन्नरूपा परकीया स्वयमप्रत्यक्षा नापूर्वानुमाने लिङ्गं
भवेद् अतो बाह्यग्रहणम् ।

ऊर्ध्वगमनशीलो हीति । ऊर्ध्वगमनं जीवस्य स्वभावः । देहे २९८ । १६
स्थितिस्तत्प्रतिबन्धककर्माधीनेति मतमाश्रित्योक्तम् । के चित्तु चिरकाल-
शरीरावस्थितप्रयुक्तबन्धमुक्तावूर्ध्वगमनं मन्यन्ते । ते खल्वेवमाहुः । बन्ध-
मुक्तस्योर्ध्वगमनं दृष्टं यथा पञ्जरमुक्तशुकस्य यथा वा वारिनिर्भिन्नपरिणा-
तैरण्डबीजस्य यथा वा दृढपङ्कलिप्तजलनिमज्जनप्रक्षीणपङ्कलेपशुष्कालाबूफ-
लस्य । इह त्वनादिकालप्रवृत्तबन्धविगमात्सततोर्ध्वगमनमिति । आस्रवा-
दिषु पञ्चसु अन्तिमद्वयं फलरूपम् आदिमत्रयं तत्साधनम् । प्रवृत्तिरास्रव-
शब्दोक्तैकविधेति भेदः ।

आस्रवः स्रोतसां द्वारं संवृणोतीति संवरः ।
आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम् ॥

इति जैनोक्तः संवरः शमदमादिरूप इति टीकायामुक्तम् । तथा-
दिशब्देन गुप्तिसमित्यादिर्गृह्यते । कायवाङ्मनोनिग्रहो गुप्तिः । भूमिगत-
जन्तुहिंसापरिहाराय प्रहते मार्गे सम्यगादित्यरश्मिप्रकाशिते निरीक्ष्य संच-
रणं नियताहारविषेवणमित्यादिकं समितिरिति जैनैः परिभाष्यते ।
आस्रावयति गमयतीति । आस्रवत्यनेन जीव इत्यण्यन्तादास्रवशब्दः ।
ण्यन्तात्त्वेदास्राव इति स्यात् । **बन्धोऽष्टविधमिति** । आस्रवः कर्मणा
बन्धो† निर्जरस्तद्विमोचनमिति जिनदत्तोक्ते टीकायामन्ये त्विति दर्शिते
तु मते बन्धः कर्मापादिता जन्मपरंपरेति द्रष्टव्यम् । **पूर्वोक्त आस्रवो** ,, । १९
ऽपीति । आस्रव इन्द्रियप्रवृत्तिः । घात्यघातिकर्मणाकरग्रन्थयोर्विवे-
चितानि । अन्ये तु विधान्तरेण तद्विवेकमाहुः । जैनमते ज्ञानदर्शन-
सुखवीर्यगुणकस्य जीवस्य ज्ञानादिगुणानां मोक्षदशायामाविर्भविष्यतां संसा-
रदशायां प्रतिघातकानि प्रवाहानादीनि पापरूपाणि चत्वारि घातिकर्माणि ।
शरीरसंस्थानतदभिमानतास्थितितत्प्रयुक्तसुखादिनिर्मितानि चत्वार्यघाति‡क-

* प्रवृत्तिरिति १ पु॰ पा॰ ।   † कर्मणो बन्ध इति १ पु॰ पा॰ ।
‡ सुखादिनिमित्तानि मत्वा सकलजनसंघातीति १ पु॰ पा॰ ।

र्माणि पुण्यमिश्रितत्वात्पुण्यरूपाणीति । नाभिकाद्भेदनीयस्य भेदमाह
२९९ । २ **सक्रियस्य बीजस्येति । कायतीति ।** आयुः कायतीत्यर्थे कैधातोरात्वे
आतो ऽनुपसर्गे क इति कप्रत्यये आतो लोप इटि चेत्याकारलोपे सति
गोद इतिवदायुष्कमिति रूपम् । युगपत्तद्विवक्षायामित्युक्तं व्याचष्टे **युगप-
दस्तित्वनास्तित्वयोरिति ।** तत्राशक्तिमुपपादयति **वाचः क्रमवृत्ति-
त्वादिति । आद्या ऽवाच्यविविक्षायामिति** सार्धश्लोके कथमाद्या-
दिशब्दोक्तानां सत्त्वासत्त्वतदुभयसमुच्चयानामवाच्यत्वम् । न ह्यत्र चतुर्थ-
भङ्ग इवा ऽशक्तिरस्तीत्याशङ्क्य तेष्वप्यन्त्येन सह युगपदाद्येन सह युगपदे-
केकेन सह युगपदित्यध्याहारेणाशक्तिमुपपादयति **आद्यो ऽस्तित्वभङ्ग
इत्यादिना ।** एवं व्याख्याने पञ्चमादिभङ्गानां चतुर्थभङ्गात् फलतो भेदा-
भावमाशङ्क्य प्रकारान्तरेण व्याचष्टे **अथ वेति । तेष्वेव पक्षेष्विति ।**
सत्त्वैकान्तपक्षः सांख्याद्यभिमतः सत्कार्यवादः । असत्त्वैकान्तपक्षः शून्य-
वाद्यभिमतो ऽसद्वादः । क्रमेण सदसत्त्वपक्षो वैशेषिकाद्यभिमतो घटादीनां
मध्ये सतां पूर्वं पश्चाच्च प्रागभावप्रध्वंसप्रतियोगित्वरूपमसत्त्वमिति वादः ।
एतेषां पक्षेषु पूर्वपक्षा उत्तिष्ठन्ति सत्त्वं निर्वक्तुमशक्यं प्रागभावादिप्रतियोगित्वं
निर्वक्तुमशक्यमिति तेषां पूर्वपक्षिणां ये तत्तदनिर्वाच्यत्वैकान्त्यवादाः तेषां
भङ्गाः पञ्चमषष्ठसप्तमा इत्यर्थः । **नन्वस्ति स्यादिति ।** अस्तीति वर्तमा-
नत्वं बोध्यते स्यादिति कालत्रयाऽनवमर्शिविधेयत्वम् । तयोः परस्परविरु-
द्धयोः कथमेकस्मिन्नर्थे पर्यवसानं युगपद्बोध्यत्वमित्यर्थः* ॥

३०१ । २४ **पत्युरसामञ्जस्यात् ॥ ३७ ॥**

नकुलीशपाशुपता मन्यन्ते कार्यकारणयोगविधिदुःखान्ताः पञ्च पदार्थाः पशुपाशविमोक्षाय बोद्धव्याः । तत्र कार्याणि पृथिव्यादीनि पञ्चतत्त्वानि रूपादयः पञ्च गुणाश्चेति दशविधानि कारणानि ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च मनोबुद्ध्यहंकाररूपाणि त्रीण्यन्तःकरणानीति त्रयोदशविधानि । ध्यानादिरूपो योगः । धर्मार्थव्यापारो विधिः । स व्रतद्वाररूपेण द्विविधः । भस्मस्नानभस्मशयनोपहारादि व्रतम् । आद्ये प्रसिद्धे । उपहारः

* अत्र षष्ठम् एकस्मिन्नसंभवाधिकरणं पूर्णम् ।

षड्विधः । हसितगीतनृत्तहुडुक्कारनमस्कारजपभेदेन । तत्र हसितमट्टहासः । गीतं गान्धर्वशास्त्रप्रकारेण । हुडुक्कारो जिह्वातालुसंयोगान्निष्पाद्यमानो वृषभनादसदृशो नादः । यत्र लौकिका न भवन्ति तत्र चत्वार्येतानि निगूढं प्रयोक्तव्यानि । जपनमस्कारौ प्रसिद्धौ । द्वाराणि क्रायनस्पन्दनमन्दयानशृङ्गारणातत्करणातद्भाषणभेदेन षड्विधानि । असुप्तस्यैव सुप्तलिङ्गप्रदर्शनं क्रायनम् । वातव्याध्यभिभूतस्येव शरीरावयवानां कम्पनं स्पन्दनम् । उपहतपादेन्द्रियस्येव गमनं मन्दयानम् । रूपयौवनसंपन्नां कामिनीमवलोक्यात्मानं कामुकमिव यैर्विलासैः प्रदर्शयति तदाचरणं शृङ्गारणम् । कार्याकार्यविवेकविकलस्येव लोकनिन्दितकर्मकरणमपि तत्करणम् । व्याहतापार्थकादिशब्दोच्चारणमपि तद्भाषणम् । दुःखान्तो द्विविधः । अनात्मकः सात्मकश्च । अनात्मकः सर्वदुःखानामत्यन्तोच्छेदः । सात्मकस्तु दृक्क्रियाशक्तिलक्षणमैश्वर्यम् । तत्र दृक्शक्तिरेकापि विषयभेदात्पञ्चधोपचर्यते । दर्शनं श्रवणं मननं विज्ञानं सर्वज्ञत्वं चेति । सूक्ष्मव्यवहितविप्रकृष्टाशेषचाक्षुषस्पार्शनादिविषयं ज्ञानं दर्शनम् । अशेषशब्दविषयं ज्ञानं श्रवणम् । निरवशेषशास्त्रविषयं ज्ञानं मननम् । ग्रन्थतोऽर्थतश्चा*संदिग्धज्ञानं विज्ञानम् । सर्वज्ञत्वं प्रसिद्धम् । क्रियाशक्तिरेकाऽपि त्रिविधोपचर्यते । मनोजवत्वं कामरूपित्वं विकरणधर्मित्वं चेति । निरतिशयशीघ्रगामित्वं मनोजवत्वम् । कर्मानपेक्ष्य स्वेच्छयैवानन्तशरीरेन्द्रियाधिष्ठातृत्वं कामरूपित्वम् । उपसंहृतशरीरेन्द्रियस्यापि निरतिशयैश्वर्यशालित्वं विकरणधर्मित्वम् । पशुपतिस्तु परमेश्वरः सर्वत्रापि कार्ये निमित्तं पशूनां कर्मानपेक्ष्य स्वेच्छयैव फलप्रदः । निरतिशयस्वातन्त्र्यशालित्वात् । न चैवं कर्मवैयर्थ्यम् । ईश्वरेच्छानुगृहीतकर्मणः साफल्यात् तदननुगृहीतस्य कर्मणः पर्जन्याननुगृहीतकृषिकर्मण इव नैष्फल्येऽपि दोषाभावात् तदनुग्रहसंभावनया कर्मसु प्रवृत्त्युपपत्तेरिति । एवं पाशुपतानामन्येषां च सांख्यादीनां केवलं निमित्तकारणमीश्वर इति मतमिह निराक्रियते स्वगुणाऽप्रख्यापनेनेति । तदप्रख्यापनं क्रायनस्पन्दनादिभिः । तत्रानुमानं तावन्न संभवतीति टीकायां तत्रेत्यस्य पूर्वग्रन्थानुसारेण यद्यपीश्वरस्य निमित्तमात्रत्वमित्यर्थः प्रतिभाति तथापि पर-

---

* अतो ऽर्थतश्चेति २ पु॰ पा॰ ।

भिमताऽनीश्वरानुमानानि स्वयमुद्भाव्य निराकर्तुकामस्तदर्थं तत्रेत्येतत्तु ईश्वरपरामर्शीति व्याचष्टे ईश्वर इत्यर्थ इति ।

३०३ । २० किं धर्मविषयत्वसंसर्गान्योन्याभाववत्त्वमिति । ननु घटादिष्वपि संसर्गाभावो नाम संसर्गप्रतियोगिकाभावो न भवति येनात्र संसर्गस्य संसर्गाभावो वा तस्यान्योन्याभावो वेति विकल्पः प्रवर्तेत किं तु घटादिप्रतियोगिकावेव संसर्गाभावान्योन्याभावौ तत्र प्रतियोगिनः संसर्गमारोप्य यस्याभावस्य बुद्धिरिदमिह नास्तीति स संसर्गाभावः । प्रतियोगिनस्तादात्म्यमारोप्य यस्याभावस्य बुद्धिरिदमिदं न भवतीति सो ऽन्योन्याभाव इत्येव पराभिमतः संसर्गाभावाऽन्योन्याभावभेदः । अतो धर्मविषयत्वं संसर्गा*भाव इत्युक्तेनेत्थं विकल्पपरंपरा प्रवर्तत इति चेन्न । संसर्गाभावान्योन्याभावबुद्ध्योः प्रतियोगितादात्म्यारोपपूर्वकत्वासिद्धेः । तथा हि । भूतले घटो नास्तीति व्यवहारे भूतलइत्यस्य घटेन नान्वयः येन भूतले घटारोपः सिध्येत् किं तु नास्तीत्यनेनान्वयः । एवं व्यवहारानुसारेण प्रतीतिरपि घटप्रतियोगिकभूतलाधिकरणकाभावविषया न तु भूतलाधिकरणकेन प्रतियोगिना विशेषिताभावविषया । एवं घटः पटो न भवतीति व्यवहारे ऽपि घटः पट इति यत्तन्नेति नान्वयः येनाधिकरणे प्रतियोगितादात्म्यारोपः सिध्येत्किं तु घट इत्यस्य न भवतीत्यनेनान्वयः यो ऽयं घटः स पटो न भवतीति । एवं व्यवहारानुसारेण तन्मूलभूतप्रतीतिरपि घटस्याधिकरणस्य पटप्रतियोगिकान्योन्याभाववत्त्वविषया न तु घटतादात्म्यापन्नेन प्रतियोगिना विशेषिताभावविषया । एवं सत्येव प्रतियोगिना ऽधिकरणेन चाभावो निरूप्यतइति परमतमर्यादा ऽपि संगच्छते । किं च यदि घटसंसर्गाभावो घटप्रतियोगिकः तदा घटापसरणानन्तरं भूतले घटो नास्तीति प्रतीतिर्निरालम्बना स्यात् । न हि कदा चित्तत्र स्थितस्यात्यन्ताभावः संभवति नाप्यन्यत्र तदानीं सतः प्रागभावध्वंसौ संभवतः नाप्युत्पादविनाश्यभावान्तरकल्पनं युक्तम् । तद्धि कल्पमानं घटसंयोगनाशोत्पत्तिकाले उत्पद्यते पुनर्घटसंयोजनकाले नश्यतीत्यभ्युपगन्तव्यम् । एवं च सत्यवश्याभ्युपगन्तव्येन घटापसरणघटसंयोजनमध्यवर्तिना संसर्गप्रतियोगिकाभावसामान्येनैव प्रतीतिनिर्वाहे किं सामयि-

---

* निरवयवत्वसंसर्गेति १ पु० पा० ।

कात्यन्ताभावकल्पनया । अतो घटसंसर्गप्रतियोगिकाभावो घटसंसर्गाभावः घटपटयोः परस्परप्रतियोगिकाभावो ऽन्योन्याभाव इत्येव विभागो वक्तव्य इत्यभिप्रेत्यैवं विकल्पपरम्परा कृता ।

अथ वेति । तत्रानुमानं तावन्न संभवतीति टीकाग्रन्थे तत्रेत्यस्य ३०४ । ९
यः स्वारसिको ऽर्थस्त्यक्तस्तं परिगृह्योत्तरग्रन्थस्तद्विषयतया योज्यते । अस्मिन्व्याख्याने तस्मादनेनास्मिन् ग्रन्थे प्रमाणान्तरमास्थेयमिति टीकाग्रन्थे यदीश्वरस्य निमित्तमात्रत्वे प्रमाणान्तरमास्थेयमित्युक्तं तत्रास्थीयमानमपि न संभवति तदात्मानं स्वयमकुरुतेत्यादिश्रुत्यैव बाधादित्येतावत्पर्यन्तं तात्पर्यं न वक्तव्यं किं तु प्रमाणान्तराकाङ्क्षामात्रपरं तद्व्याख्येयमित्याह **सामान्यतः श्रुतिव्यतिरिक्तेति । व्याप्तेरविशेषादिति** । ईश्वरो न द्रव्योपादनमिति येन चेतनत्वहेतुना ऽनुमीयते तेनैव तस्य रागादिमत्त्वमप्यनुमातुं शक्यम् । उभयत्रापि मूलभूतव्याप्तेरनुकूलतर्कसद्भावाऽसद्भावाभ्यां विशेषाभावात्प्रत्युत रागाद्यनुमानएवानुकूलतर्कः संभवति । संसारिणां रागाद्युपादानतायाम् आत्मत्वमेव प्रयोजकं न तु संसार्यात्मत्वं गौरवादित्येवंरूप इति भावः । **निरवद्यत्वविशेषविरुद्ध इति** । साध्यविरुद्धवदनुमानवाद्यभिमतविशेषान्तरविरुद्धो ऽपि हेतुर्विरुद्धहेत्वाभास इति भावः । **तत्राप्यागमप्रामाण्यादिति** । यद्यागमश्चिरातीतान्निर्व्यापाराद्यागात्स्वर्ग इति बोधयेत्तर्हि तथैवानुमन्येमहि न त्वागमस्तथा बोधयति किं तु यागात्स्वर्ग इत्येतावन्मात्रं बोधयति तन्नुव्यापारकल्पनायामपि न विरुध्यतइत्यविरोधात्तत्र लोकानुसारेणाऽपूर्वकल्पनं न त्विह तथा रागादिमत्त्वकल्पनं प्रवर्तते निरवद्यत्वादिश्रुतिविरोधादिति भावः । यदीश्वर इति ग्रन्थे कारुण्यपर इति विशेषणस्वारस्यमनुसृत्य तेन ग्रन्थेन व्यावर्त्यामितरेतराश्रयदोषपरिहारशङ्कां प्रकारान्तरेण दर्शयति **अथ वेति** । करुणयैव न कर्मभिरतो नान्योन्याश्रय इति भावः । ३०४ । २३
कर्मभिः प्रयोजनैरिति । अध्ययनेन वसतीतिवत्फलस्य हेतुत्वविवक्षया तृतीयेति भावः । पूर्वकर्म कथमीश्वराप्रवर्तितमीश्वरप्रवर्तनलक्षणं कार्यं करोतीति टीकाग्रन्थो न युक्तः पूर्वकर्मणो ऽपीश्वरप्रवर्तितत्वस्य परेणोच्यमानत्वादित्याशङ्क्य तत्तात्पर्यमाह **ईश्वरेण पूर्वकर्म तावदिति । एवं सति प्रवर्तकत्वोपपत्तिमनुक्त्वेति** । ईश्वरेण पूर्वं कर्म प्रवर्तयितुं न शक्यते कुत्सित-

फलानुदयप्रसङ्गादित्युक्तानुपपत्तिपरिहारार्थमीश्वरस्य प्रवर्तकत्वोपपत्तिमनुक्त्वेत्र परः केवलं कर्मेश्वरयोः प्रवर्त्यप्रवर्तकभावस्यानादितामात्रं यद्यवलम्बेत तदानीमन्धपरम्परादोषमाहेत्यर्थः । प्रवर्तकत्वानुपपत्तिमुक्त्वेति पाठे त्वीश्वरस्य प्रवर्तकत्वानुपपत्तिर्या सिद्धान्तिनोक्ता तदनुवादः । **अनुपपत्तिसाम्यादिति ।** ईश्वरस्याद्यतनकर्मणि च प्रवर्तकत्वानुपपत्तेः साम्यादित्यर्थः । अतो यथा केन चिदन्येन स घटो रक्त इत्युक्ते कुत इदं श्रुतमिति परस्याकाङ्क्षायां स यद्यन्यमन्धं तदुपदेष्टारं ब्रूयात्सो ऽप्यनुयुक्तो ऽन्यमन्धं सो ऽप्यपरमन्धं न कं चिदपि स्वोपदेष्टारं चक्षुष्मन्तं ब्रूयाद् अनया ऽन्धपरम्परया प्राप्तः पटरक्तिमा यथैवाऽप्रामाणिकः एवमियमपि कर्मेश्वरयोः प्रवर्त्यप्रवर्तकभावपरम्परोक्ता ऽनुपपत्तिधूननक्षमचक्षुष्मत्स्थानीयश्रुतिमूला यदि न स्यात्तदा कर्मेश्वरयोः प्रवर्त्यप्रवर्तकभावो न प्रामाणिकः स्यादिति भावः ।

भाष्ये प्रधानपुरुषेश्वरत्रयमिति कथमुक्तं पुरुषाणां बहुत्वादित्या-
३०५ । १५ शङ्क्य व्याचष्टे **पुरुषान् जात्यैकीकृत्येति । तथापि प्रवाहनित्यत्वादिति ।** यदि द्रव्यत्वादन्तवत्त्वमनुमीयते तदा सर्वेषां संसारिणामनित्यत्वे ऽपि प्रवाहरूपेण संसारस्यानुवृत्तिर्न निवारिता स्यात्तथा च तच्छून्यतायामीश्वरः किमधितिष्ठेत्किंविषये वास्य सर्वज्ञत्वेश्वरत्वे स्यातामिति भाष्योक्तदूषणमलग्नं स्यात् । अत एव हि विद्वत्सु मुच्यमानेषु सर्वदा ब्रह्माण्डलोके जीवानामनन्तत्वादशून्यतेति श्लोकोक्तप्रकारेणाऽशून्यतानिर्वाहोपपत्तेः । द्रव्यत्वादिहेतुना कुसूलनिहितबीजवदेतावन्त एवेति पुरुषाणामियत्तारूपसंख्यावत्त्वानुमाने तु तेषां सर्वेषां क्रमेण मुक्तौ शून्यतापत्तिरिति दूषणं लग्नं भवतीत्यभिप्रेत्य संख्याविशेषानुमानमादृतमित्यर्थः । एतेन संख्यावत्त्वादेवान्तवत्त्वमनुमेयं चेदपि प्रधानस्येश्वरस्य जात्यैकीकृतानां पुरुषाणां च त्रित्वसंख्यया ऽन्तवत्त्वमनुमीयतां तेषां प्रतिव्यक्तिगतयैकत्वसंख्यया वा तदनुमीयतामित्यपि शङ्का निरस्ता । तावता सर्वशून्यतायामीश्वरस्य ज्ञेयाधिष्ठेयाभावदूषणावकाशासिद्धेः तस्मादियन्त एवेति परिच्छिन्नानां जीवानां मध्ये प्रतिकल्पमेकैकस्मिन्नन्तं प्राप्ते ऽप्यनाद्यतीतकल्पप्रवाहे सर्वे ऽपि जीवा अतीताः स्युरिति कस्य भोगार्थं प्रधानमीश्वरो ऽधितिष्ठेत् किंविषया वा ऽस्य सर्वज्ञता स्याद् इदानीं सर्वशब्दार्थालाभादिति दूषणसिद्ध्यर्थमियत्तारूपसंख्याविशेषानुमानमपेक्ष्यते । ननु

यद्यतीतेषु कल्पेषु इयत्तापरिच्छेदाभावरूपमानन्त्यमिष्यते तदा तत्रैव द्रव्यत्वादिहेतोर्व्यभिचारः । यदि नेष्यते तदा जीवानामियत्तारूपसंख्याविशेषवत्त्वे ऽप्यतीतकल्पापेक्षया ऽधिकसंख्यावन्तस्त इतीदानीं केषां चित्संसारिणामनुवृत्तेस्तद्भोगार्थमीश्वरस्य प्रधानाधिष्ठातृत्वं सर्वज्ञत्वं चोपपद्यते । अग्रे कदाचित्तदुभयं न स्यादिति चेदिष्टापत्तिः । न हि तत्रानुभवविरोधो ऽस्ति अभ्युपगम्यते च सर्वमुक्तिवादिभिरग्रे तथाभावः । किं च प्रधानपुरुषेश्वराणां त्रयाणामप्यन्तवत्त्वमानुमानिकेश्वरवादिनं प्रत्यापादितं केन हेतुना सर्वेषु पुरुषेष्वप्यतीतेषु प्रधानेश्वरयोरवस्थितिमभ्युपगम्येदं दूषणमुच्यते तस्मादयुक्तमिदं दूषणमिति चेदुच्यते । संख्यावत्त्वेन प्रमेयत्वेन पुरुषाणामियत्तानुमाने सर्वैः पुरुषैरनुभाव्यानि यावन्ति दुःखानि तेषामपि इयत्ता हेतुसाम्यात् सिध्यति सा चेयत्ता एकाद्यष्टादशस्थानगतपरार्द्धमध्य एव कं चित्संख्याविशेषमादाय पर्यवस्यति ततश्च सर्वैरपि पुरुषैरनादिकालप्रवाह*प्रवृत्तेतरशरीरेषु प्रतिशरीरमस्मदाद्यनिर्धार्यसंख्याविशेषाणि दुःख्यान्यनुभूयन्त इत्येतावता कालेन सर्वपुरुषगतानां सर्वेषामपि दुःखानामुच्छेदो ऽवश्यम्भावीत्यतो विनैव तत्त्वज्ञानं मुक्तेषु सर्वेषु पुरुषेषु स्वरूपतः स्थितेष्वपीदानीं स्थितेनापि प्रधानेन तेषां भोगार्थं न प्रवर्तनीयम् । नापीश्वरेण तदधिष्ठेयं नापि स्रज्यं वस्तु किञ्चित्तेन ज्ञेयमस्तीति दूषणे तात्पर्यम् । यदि तु द्रव्यत्वहेतुनैव संख्याविशेषवत्त्वानुमानमिष्यत इति दुःखानामानन्त्यमभ्युपगम्येत तदा प्रतिपुरुषवर्तिनां दुःखानामियत्तापरिच्छेदाभ्युपगमे क्रमेण भुज्यमानानां तेषां माषराशिन्यायेन स्वयमेव क्षयः स्यादिति मुक्तेस्तत्त्वज्ञानैकसाध्यत्वाभ्युपगमविरोधः । प्रतिपुरुषवर्तिनामपि दुःखानामानन्त्याभ्युपगमे तत्त्वज्ञाने सति योगसामर्थ्याद् बहूनि शरीराणि परिगृह्य भोगेन नाश्यतया पराभ्युपगतानां दुःखानामानन्त्यात्कदा ऽपि क्षयो न स्यादिति तत्त्वज्ञानान्मुक्त्यभावप्रसङ्ग इति दूषणं द्रष्टव्यम् ।

सप्तमी च निमित्तार्थेति । क्ङिति चेतिसूत्रवद्† निमित्तार्था ३०५ । २२
सप्तमी ज्ञापकहेतुपर्यवसितेति भावः । ननु घटस्य कुलालवज्जगतो ऽपि केन

* प्रवाहेति नास्ति १ पु° ।

† सूत्रे इवेति १ पु° पा° ।

चित्कर्त्रा भाव्यमिति ईश्वरानुमाने स कर्ता कुलालवदेव रागादिमान् स्यात्
कुलालो मृदादिकमिव स्वसंयुक्तमेवाधितिष्ठेद्रूपादिमदेवाधितिष्ठेत् । श्रोत्रस्पर्श-
नादिवद् रूपादिहीनस्याप्यधिष्ठाने तदधिष्ठानवदेव प्रधानाद्यधिष्ठानमप्यधि-
ष्ठातृभोगार्थं स्यात्* कुलालवदेव च जगत्कर्ता शरीरी स्यात् शरीरित्वे च
भोगादिमान् स्यात् प्रधानपुरुषेश्वराश्च संख्यावत्त्वात्परिमाणवत्त्वाच्चान्त-
वन्तः स्युः पुरुषाश्च द्रव्यत्वादिभिः संख्याविशेषवन्तः स्युरित्यनुमानानि
साम्येन दृष्टसाधर्म्यमात्रमवलम्ब्य प्रवृत्तानि पर्वतो महानसवद्वह्निमांश्चेत्तद्व-
३०५ । २४ देव व्यञ्जनवानपि स्यादित्येतत्तुल्यानीत्याशङ्क्याह **सामान्यतोदृष्टानुमा-
नोपन्यासस्त्विति ।** ईदृशेनासारतरेणाप्यनुमानजातेन दूषयितुं शक्य-
त्वादत्यन्ततुच्छः पक्ष इति द्योतनार्थं तदुपन्यासः । न ह्यस्मादनुमानजा-
तात् कार्यमात्रं कर्तृकारकसाध्यमित्याद्यनुमाने कश्चिद्विशेषो ऽस्ति घटादिषु
दृष्टायां कर्तृजन्यतायां लाघवात्कार्यत्वमेवावच्छेदकं न तु घटत्वादिकमन-
नुगमादिति तर्केण दार्ढ्यापादने कार्यमात्रं दानादिवत्संप्रदानजन्यं पर्णपत-
नादिवदपादानजन्यं संप्रदानादिजन्यतायामपि कार्यत्वमेवावच्छेदकं लाघवान्न
तु दानत्वादिकमननुगमादिति तर्कदृढीकृतानुमानैरङ्कुरादिकार्ये कर्तृकारक-
वत्संप्रदानापादानकारकयोरपि अतीन्द्रिययोः सिद्धिप्रसङ्गादिति भावः । ननु
सांख्याधिकरणे कारणानि चेतनाधिष्ठानमन्तरेण कार्याणि न जनयन्तीत्यानु-
मानिकेश्वरसिद्धिरङ्गीकृता इह कथं तद्दूषणं क्रियते । नैष दोषः । तत्र
पूर्वपक्षे मृद्घटादिषु दृष्टं कार्यानुसारिणा कारणेन भाव्यमिति नियममवलम्ब्य
सुखदुःखमोहात्मकस्य जगतस्तथाभूतं कारणमनुमिमानं सांख्यं प्रति मृदा-
दिदृष्टान्तेनैवाचेतनस्य जगत्कारणस्य चेतनेनाधिष्ठानमपि सिध्येत् स्वतन्त्रं
प्रधानं जगत्कारणमिति निरीश्वरसांख्याभिमतं न सिध्येदित्येतावन्मात्रमुक्तं
न तु स्वतन्त्रमीश्वरानुमानमनवद्यमिति । तेन नेश्वरः प्रसाधितः† ॥

३०६ । ५ **उत्पत्त्यसंभवात् ॥ ४२ ॥**

विष्णुभागवता मन्यन्ते भगवान् नारायणः परं ब्रह्म स वासुदे-
वादिचतुर्व्यूहात्मना ऽवतिष्ठते तत्र वासुदेवः परिपूर्णषाड्गुण्यशाली षड्गु-

* भोगार्थं स्यादिति नास्ति १ पु॰ ।
† अत्र सप्तमं पशुपत्यधिकरणं पूर्णम् ।

णाश्च ज्ञानशक्तिबलैश्वर्यवीर्यतेजांसि चेतनाऽचेतनात्मकसकलप्रपञ्चाहम्भा-
वोल्लेखितया सामान्यतो विशेषतश्च सकलवस्तुगोचरं तस्य ज्ञानं ज्ञान-
मुच्यते । जगत्प्रकृतिभावः शक्तिः । जगत्सृजतो ऽस्य श्रमाभावस्तिलका-
लकवदप्रयत्नेन स्वसृष्टसकलजगद्धरणं च बलम् । अप्रतिहतेच्छत्वमैश्वर्यम् ।
जगत्प्रकृतित्वे ऽपि पयसो दधिभावेनेव विकारविरहो वीर्यम् । जगत्स्रष्टो सह-
कार्यनपेक्षत्वं पराभिभवसामर्थ्यं च तेजः । ततो ज्ञानबलोन्मेषेण संकर्षण-
स्ततो वीर्यैश्वर्योन्मेषेण प्रद्युम्नस्ततः शक्तितेजःसमुन्मेषेण अनिरुद्धो
जायते संकर्षणादयश्च जीवमनोहंकाररूपा इति तन्मतम् । तन्निरासस्य
पूर्वाधिकरणेन संगतिमाह **अधिष्ठातैवेति ।**

ननु कापिलपातञ्जलस्मृतिप्रामाण्यनिरसनानन्तरं कर्तृगौरवेण विशे-
षेण पाञ्चरात्रप्रामाण्य*निरसनं पूर्वपादएव सङ्गतमित्याशङ्क्याह **अवान्तर-** ३०६ । १२
संगतिवशादिति । ननु यदि पाञ्चरात्रं बुद्धिपूर्वा कृतिर्निःश्वसितकल्पा
श्रुतिरबुद्धिपूर्वा तर्हि विपरीतं बलाबलम् । अबुद्धिपूर्वकस्य हि प्रामाण्यं
घुणाक्षरन्यायेन क्व चिद्भवदपि न सार्वत्रिकं भवेत् । सर्वज्ञस्य भगवतो
बुद्धिपूर्वा कृतिस्तु मूलदार्ढ्यात्सार्वत्रिकं प्रामाण्यमश्नुतइत्याशङ्क्याह **याव-
द्धीति ।** अयमर्थः । भगवतो बुद्धिरत्र विष्णुस्मृत्यादिमूलबुद्धिवत् स्मृति-
रूपा विवक्षिता उत सर्वज्ञस्य भगवतः प्रत्यक्षं संभवतीति प्रत्यक्षरूपा वा ।
आद्ये स्मृत्यन्तराणामिव पाञ्चरात्रस्मृतेरपि वेदमूलत्वेन प्रामाण्यं समर्थनी-
यम् । द्वितीये भगवतः सार्वज्ञ्यं वेदादवगतमिति समर्थनीयम् । पक्षद्वये
ऽपि वेदप्रामाण्यमुपजीव्य पाञ्चरात्रस्य प्रामाण्यमुपपादनीयम् । अबुद्धिपूर्व-
कस्यैव तस्य वक्तृदोषराहित्येन प्रामाण्यमविचलं बुद्धिपूर्वकस्य तु वक्तृदोष-
संभावनया प्रामाण्यं न तथा स्थिरम् । यद्यपि वेदावगतसार्वज्ञ्यस्य भ्रान्तिर्न
संभवति तथापि वेदविरोधदर्शने सति बुद्धदेशनावत्तदंशे व्यामोहकत्वशङ्का
नापैति सापि शङ्का यद्यपि न भवति तथापि उपजीव्यविरोधे गौणत्व-
कल्पनमावश्यकमिति ।

अत्र के चित्पाञ्चरात्रस्य प्रामाण्यमित्थं समर्थयन्ते । एकायनशाखा-
मूलकं पाञ्चरात्रमिति वेदमूलत्वेनैव तस्य प्रामाण्यम् । एकायनशाखामूलत्वं

* पाञ्चरात्रं प्रामाण्येति १ पु· ।

च पाञ्चरात्रएवोक्तं संकर्षणादयस्तु न जीवमनोऽहंकाराः किं तु तदभिमानिनो भगवद्व्यूहाः तेषां च जननमैच्छिकप्रादुर्भावरूपम् अतो न जीवोत्पत्तिप्रतिपादनाद्वेदविरोधः । न च तथापि वेदेषु ये गर्भाधानादयः चत्वारिंशत्संस्काराः समाम्नाताः तद्विपरीतास्ते पाञ्चरात्रे विहिता इत्यप्रामाण्यं शङ्कनीयम् । तेषामप्येकायनशाखायामाम्नानाच्छाखाभेदेन च कर्मणां प्रकारभेदस्यान्यत्रापि संप्रतिपन्नत्वात् । अत एव तदनुष्ठातॄणामपि न वैकल्यम् । सर्वेषामपि स्व*स्वशाखोक्तप्रकारकर्मानुष्ठानदर्शनात् । एवमेव तेषां ग्रन्थेषु कण्ठरवेणोक्तम् । तथा यदप्युक्तं गर्भाधानादिदाहान्तसंस्कारान्तराऽसेविनां भागवतानामब्राह्मण्यमिति तत्राप्यज्ञानमेवापराध्यति न पुनरायुष्मतो दोषः । यत एते वंशपरम्परया वाजसनेयिशाखामधीयानाः कात्यायनादिगृह्योक्तमार्गेण गर्भाधानादिसंस्कारान् कुर्वते नातो† ब्राह्मण्यात्प्रच्यवन्ते ये पुनः सावित्र्यनुवचनप्रभृतित्रयीधर्मत्यागेनैकायनश्रुतिविहितानेव चत्वारिंशत्संस्कारान् कुर्वते स्वशाखागृह्योक्तमर्थजातमनुतिष्ठन्ति न ते शाखान्तरीयकर्माननुष्ठानेन ब्राह्मण्यात्प्रच्यवन्ते। एवं चतुर्व्यूहं भगवन्तं प्रत्यहं पाञ्चकालिकेनाभिगमनादिपञ्चकेन वार्षशतिकव्रतेन समाराध्य पुरुषः क्लेशैर्मुच्यते । तत्राभिगमनं प्रातर्भगवन्मन्त्रजपस्तुतिनमस्कारादिकम् । तदनन्तरं पूजार्थं पुष्पादिसंपादनमुपादानम् । ततः पूजनमिज्या । ततो भगवच्छास्त्रतदनुगुणपुराणागमश्रवणचिन्तनादिकं स्वाध्यायः । ततः सायंसंध्यानन्तरं भगवति चित्तसमाधानं योग इति । तैः पाञ्चरात्र‡प्रामाण्यसमर्थनव्याजेन वयं पाञ्चरात्रिण एकायनशाखिन इत्यादिमन्यमानानां ब्राह्मण्यवैकल्यमेव प्रतिष्ठापितम् । तथा हि । ये वाजसनेयिशाखामधीत्यातच्छाखागृह्योक्तप्रकारेण संस्काराननुतिष्ठन्ति तेषां शाखारण्डतयैव ब्राह्मण्यवैकल्यं प्रतिष्ठापितम् । ये तु त्रयीविहितान् संस्कारान् परित्यज्य पाञ्चरात्रविहितानेव संस्काराननुतिष्ठन्ति तेषां वैदिककर्माणि परित्यज्याऽवैदिककर्मानुष्ठानेन तत्प्रतिष्ठापितम् । न ह्येकायनशाखेति का चन शाखा क्व चिदधीयमाना दृश्यते येन तन्मूलतया ते संस्कारा वैदिकाः स्युः । खिलशाखात्वकल्पनं

---

* एकं स्वेति नास्ति १ पु. ।

† न ते इति १ पु. पा. ।

‡ पञ्चरात्रेति १ पु. पा. ।

च न प्रमाणमूलम् । अतस्त्रयीविहितसंस्कारविपरीतसंस्कारविधानांशे व्यामोहकत्वं त्रयीधर्मोऽयोग्यानधिकृत्य तद्विधानमिति वा कल्पनीयमित्येषा दिक् । प्रपञ्चस्तु मणिदीपिकायां द्रष्टव्यः ।

व्याख्यातो भाष्यइति । आगमसिद्धान्तदिव्यसिद्धान्ततन्त्रसि- ३०१ । ४
द्धान्ततन्त्रान्तरसिद्धान्तरूपे चतुर्विधे पाञ्चरात्रे परस्परविप्रतिषेधो मा भूद्वेदनिन्दकपरिग्रहवैदिकसंस्कारवर्जनाऽवैदिकसंस्कारविधानक्षुद्रविद्याबाहुल्यादिभिर्वेदविप्रतिषेधोऽपि भूयान् स सर्वोऽपि भाष्यगतादिशब्दगृहीतो बोद्धव्य इत्यर्थः । एवमवैदिकत्वादेव वैदिकापरिग्राह्यत्वं पाञ्चरात्रस्योक्तं वैखानसशास्त्रे ।

> आग्नेयं पाञ्चरात्रं तु दीक्षायुक्तं च तान्त्रिकम् ।
> अवैदिकत्वात्तत्त्यक्त्वं ततो वैखानसेन तु ॥
> सौम्येन वैदिकेनैव देवदेवं समर्चयेत् ॥ इत्यादिना ।

अत्र न हि निन्दान्यायेन वैखानसप्रशंसार्थोऽयमर्थवाद इति केषांचित्समाधानमसाधु । अर्थवादेऽप्यवैदिकत्वहेतूक्तिसामर्थ्येन वेदाऽनधिकृतविषयत्वसिद्धेरनिवारणात् । दृष्टं हि पर्वचतुष्टययुक्ते चातुर्मास्ये द्वयोः प्रणयन्तीति द्वयोः पर्वणोरपूर्वाग्निप्रणयनान्तरविधानस्य तस्माद् द्वाभ्यामेतीति गमनसाधनत्वप्रतिपादकार्थवादवशादूरू वा एतौ यज्ञस्य यद्वरुणप्रघासः साकमेधश्चेत्यूरुसंस्तुतवरुणप्रघाससाकमेधाख्यपर्वद्वयविषयतया व्यवस्थानम् । एवं च सिद्धवदवैदिकत्वकीर्तनमेव पाञ्चरात्रस्य एकायनशाखामूलत्वकल्पनमपि तुच्छीकरोतीत्यलं प्रपञ्चेन* ॥

इति श्रीमद्भरद्वाज†कुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ वेदान्तकल्पतरुपरिमले द्वितीयस्याध्यायस्य द्वितीयः पादः ॥

---

* अत्र अष्टमम् उत्पत्त्यसंभवाधिकरणं पूर्णम् ।   † भारद्वाजेति ३ पु॰ पा॰ ।

अथ द्वितीयाध्यायस्य तृतीयः पादः ।

३०८ । १ **न वियदश्रुतेः ॥ १ ॥**

पादार्थमाह इहेति । भूतविषयवाक्यविरोधपरिहार एव पादार्थः । भोक्तृविषयवाक्यविरोधपरिहारस्तु तत्प्रसङ्गागत इति नार्थभेदात्पादभेदप्रसङ्गः । ननु वाक्यानां परस्परविरोधसमाधानेन वाक्यार्थावधारणया समन्वये स्थिते तत्र मानान्तरविरोधसमाधानार्थो द्वितीयो ऽध्यायः । अस्मिन् वियदादिसृष्टिवाक्यविरोधपरिहारस्य नास्ति सङ्गतिरित्याशङ्क्य विप्रतिषेधप्रसङ्गागतो ऽयमिह तत्परिहार इति प्रदर्शनार्थं विप्रतिषेधाच्चेति भाष्यमित्याह **प्रासङ्गिकीमिति ।**

श्रुतिविप्रतिषेधादित्यर्थ इति । ननु कारणविषयश्रुतिविप्रतिषेधे इव कार्यविषयश्रुतिविप्रतिषेधे ऽपि समाधानं कृतमेव कारणत्वेन चाकाशादि*ष्वित्यधिकरणे । तत्र हि सूत्रस्य एकां योजनामाश्रित्याकाशादिकार्येषु विगाने ऽपि ब्रह्मणः कारणत्वे विगानं नास्ति । अकल्पितकारणवस्तुप्रतिपत्त्युपायतया कल्पितेषु तात्पर्या ऽविषयेषु कार्येषु विगानं तु न दोष इति कार्यविगानमभ्युपेत्यैकं समाधानं कृतम् । योजनान्तरमाश्रित्य कार्यविगानस्य दोषत्वे ऽपि तदिह नास्ति दण्डचक्रादिघृतपूर्णान्तकार्यकर्तृविषययावत्कार्यकर्तृत्वकतिपयकार्यकर्तृत्वानुवादकवाक्यद्वयवत् तैत्तिरीयकच्छान्दोग्यश्रुत्योः प्रामाण्योपपत्तेरित्यपरं समाधानं कृतं किमधिकमिह कर्तव्यं समाधानमवशिष्यते । उच्यते । छान्दोग्ये तैत्तिरीयकश्रुतावाकाशवायूपसंहारमनपेक्ष्य तत्र द्वितीयसमाधानं कृतम् । इह तु तदुपसंहारमप्याश्रित्य तत्र सम्भावितशङ्कानिराकरणेन समाधानान्तरं कर्तुमयमारम्भः ।

,, । ४ **परपक्षेषु सर्वत्रेति ।** यद्यपि स्ववचनविरोध इव श्रुतिविरोधो ऽपि न सर्वेषु परपक्षेषु निराकरणहेतुः बौद्धार्हतपक्षनिराकरणे तान् प्रति श्रुतिविरोधस्य हेतुकरणा ऽयोगात्तथापि तेषामपि पक्षाः श्रुतिविरुद्धा इति

---

* ब्रा॰ सू॰ अ॰ १ पा॰ ४ सू॰ १४ ।

कृत्वा ऽस्माभिर्निरस्यन्त इति श्रुतिविरोधो निरसनीयत्वे सार्वत्रिको हेतुर्भ-
वतीति भावः ।

न वियदिति । यद्यप्यस्तीति सूत्र*माचार्यैः सिद्धान्तसूत्रमिति वक्ष्यते ३०८ ।
तथापि न वियदिति पूर्वपक्षसूत्रमस्ति त्विति सिद्धान्तसूत्रमिति विशिष्टार्था-
भिप्रायेण भ्रमत्वमुक्तम् । ननु किमर्थं तत्र भ्रमत्वमुच्यते तथैवास्तु को दोषः
अनुत्पत्तिं पूर्वपक्षं कृत्वोत्पत्तिसमर्थने ऽपि ह्यनुत्पत्तिशङ्केवोत्पत्त्यनुत्पत्तिश्रुति-
विप्रतिषेधशङ्कापि निरस्ता भवतीति फलितमर्थमादाय प्रागुक्ता प्रसङ्गसङ्गति†-
रुपपद्यते । यथा गुणोपसंहारफलाया विद्याभेदाभेदचिन्ताया गुणोपसंहारपाद-
सङ्गतिः एवं न वियदिति सूत्रस्य पूर्वपक्षसूत्रतायामश्रुतेरित्यस्य वियदुत्प-
त्तिप्रतिपादकवाक्यश्रुत्यभावादित्यर्थे इति नाश्रुतेः क्वाचित्कत्वसार्वत्रिकत्ववि-
कल्पावकाशः । वक्ष्यमाणासम्भवादिहेतुबलेन विशिष्टश्रुत्यभावस्य सार्वत्रिक-
त्वात् । इदं सिद्धान्त्येकदेशिसूत्रमिति पक्षे ऽपि हि मुख्यश्रुत्यभावादित्यर्थे
इत्याचार्यैरयमेवार्थः स्फुटीकरिष्यत इति चेत्सत्यं तथापि साक्षान्निराकरणीयं
पूर्वपक्षं प्रापय्य तत्र सिद्धान्त्येकदेशिनः परिहारं प्रथमं प्रदर्श्य तस्यापि नि-
राकरणेन परमसिद्धान्तप्रदर्शनं क्रियत इत्येवं सूत्राणां प्रसक्तपूर्वपक्षनिराकर-
णार्थत्वे सम्भवति अप्रसक्तपूर्वपक्षान्तरनिराकरणार्थत्वं सूत्राणामङ्गीकृत्य तेन
फलतः प्रसक्तपूर्वपक्षनिराकरणसिद्ध्यङ्गीकारो न युक्त इति तात्पर्यम् ।

एवं तर्हि प्रसक्तो विप्रतिषेधपूर्वपक्ष उत्सूत्रो मा भूद् आद्यसूत्रद्वयं
तत्प्रदर्शनार्थं गौण्यसम्भवा‡दित्यादिसूत्रत्रयमेव सिद्धान्त्येकदेशिमतप्रदर्शना-
र्थमित्यस्त्विति ये मन्यन्ते तन्मतं दूषयितुमुपन्यस्यति **केचित्त्विति** । ,, । ८
दूषयति **किमश्रुतेरिति** । अत्रेदं वक्तव्यम् । क्वाचित्क एवायमश्रुतेरिति
हेतुः न श्रूयते हि छान्दोग्ये सृष्टिप्रक्रियायामन्नेन शुङ्गेनेत्यादिकार्यलिङ्गक-
तत्तदव्यवहितकारणानुमानप्रक्रियायां च कार्यत्वेन वियत् । न चात्र तदुप-
संहारः शक्य इति भाष्य एव स्पष्टमुक्तम् । एवं तावच्छान्दोग्यश्रुतिरश्रवण-
लिङ्गवती उपसंहारमप्यसहमाना वियदुत्पत्त्यसम्भवाद्यनुगृहीता तदुत्पत्तिं
प्रतिक्षिपतीत्ययमर्थो न वियदिति सूत्रेणोच्यते तैत्तिरीयकश्रुतिः सर्वविद्या-

* व्या॰ सू॰ अ॰ २ पा॰ ३ सू॰ २ ।
† प्रासङ्गसंगतिरिति २ पु॰ पा॰ ।
‡ व्या॰ सू॰ अ॰ २ पा॰ ३ सू॰ ३ ।

नप्रतिज्ञाद्यनुगृहीता तां व्यवस्थापयतीत्ययमर्थोऽस्ति त्विति सूत्रेणोच्यते एवं श्रुतिप्रतिषेधपूर्वपक्षसूत्र*द्वयेन पर्यवसिते सर्वविज्ञानप्रतिज्ञानमन्यथासिद्धम् असम्भवादिकमेव त्वनन्यथासिद्धमिति मन्यमानस्य वियदनुत्पत्तिवादिनः सिद्धान्त्येकदेशिनो मतं सूत्रद्वयेनोच्यतइत्यङ्गीकारे ऽपि न काचिदनुपपत्तिरिति ।

३०८ । २१ **अस्ति त्वित्यपि सूत्रं निगूढाभिसंधेः सिद्धान्तिन एवेति ।** नन्वस्य सूत्रस्य सिद्धान्तसूत्रत्वमङ्गीकृत्य सिद्धान्ताभिप्रायाऽनभिव्यक्त्यपेक्षमौपचारिकं पूर्वपक्षसूत्रत्वकथनमिति क्लिष्टयोजना किमर्थं क्रियते पूर्वपक्षसूत्रमेवेदमस्तु एतत्सूत्रव्याख्यानानन्तरं हि भाष्ये ततश्च श्रुत्योर्विरोध इत्यादिना श्रुतिविप्रतिषेधपूर्वपक्षो दर्शितः । तदनन्तरं च तस्मिन् विप्रतिषेधे कश्चिदाहेतीत्युत्तरसूत्रावतारणं च कृतं टीकायामप्येतत्सूत्रव्याख्यानावसान एव तस्मात्सर्वाः श्रुतयः परस्परविरोधिन्यो नास्मिन्नर्थे प्रमाणं भवितुमर्हन्तीति पूर्वः पक्ष इति विप्रतिषेधपूर्वपक्षोपसंहारः कृतः । सत्यम् । टीकायां न वियदिति सूत्रं सिद्धान्त्येकदेशिन इत्युपक्रान्तं तस्य च प्रागेव प्रतिषेधपूर्वपक्षप्राप्तौ सत्यामुत्थानं वाच्यम् । न च विप्रतिषेधपूर्वपक्षनिराकरणार्थं सिद्धान्त्येकदेशिमते प्रवर्तिते तदनन्तरमेव पूर्वपक्षोत्थानमिति युज्यते । न चाद्यसूत्रे सिद्धान्त्येकदेशिसूत्रत्वेन बहिर्भूते सति केवलेन द्वितीयसूत्रेण विप्रतिषेधपूर्वपक्षोपि लम्भयितुं शक्यते तस्माद्बहिःष्ठ एव पूर्वपक्षः सिद्धान्त्येकदेशिसिद्धान्तिसूत्राभ्यां निगूढस्वस्वाभिसंधिभ्यां स्पष्टीकृतो जात इत्येतावता सूत्रद्वयव्याख्यानानन्तरं भाष्यादिषु पूर्वपक्षस्फुटीकरणमिति तात्पर्यम् । **स्थालादिवचनत्वमिति ।** (स्थालं भोजनपात्रम्)† ।

स्थालम्भोजनपात्रे स्या‡दुखायां तु सा स्त्रियाम् ।
स्थाली ना तु महादेव§ इति नैघण्टुका विदुः ॥

३०९ । १२ **षष्ठी तृतीयार्थे इति ।** पूरणगुणेत्यादिसूत्रेण पूरणार्थयोगे षष्ठीसमासनिषेधाज् ज्ञापकात् तृतीयार्थे षष्ठी । **न केवलं विरोधादाकाशज-**

* पूर्वपक्षे सूत्रेति १ पु॰ पा॰ ।
† ( ) एतदन्तर्गतो ग्रन्थो नास्ति १ पु॰ ।
‡ पात्रे क्लीबं स्यादिति २ पु॰ पा॰ ।
§ महादेवश्च इति २ पु॰ पा॰ ।

न्माभावकल्पनेति । छान्दोग्यश्रुतावाकाशस्य जन्माभावो न कल्पनीय
इति यद् इदं तैत्तिरीयश्रुतिविरोधमात्रान्न भवति किं तु छान्दोग्यश्रुतेः क्व
चिदप्युपयोगाभावादपीत्याहेत्यर्थः । ननूपयोगाभावो न च श्रुतेन तदपबा-
धने इत्यादिग्रन्थेनोच्यते ततः पूर्वस्तु लभ्यमित्यन्तग्रन्थः संसर्गः श्रौतः
भेदस्त्वार्थ इति ग्रन्थेन पुनरुक्त इत्याशङ्क्य तदनुवादकत्वमाह **तत्रापीति ।** ३०९ । २५
पूर्वोक्तविरोधानुवाद एवेति । श्रुतिविरोधेनार्थिकस्य बाध्यत्वं यदुक्तं
तस्यार्थिकत्वोक्तिमुखेनानुवाद इत्यर्थः । **वाक्यद्वयमनुमीयतइति ।** श्रुत-
कल्पिताभ्यां* तेजोवियत्सृष्टिवाक्याभ्यां तद्द्वित्वमनुमीयतइत्यर्थः । **उप-
संहारोदाहरणान्तराभिप्रायमिति ।** उपसंहारे उदाहरणान्तरं तद्वायु-
मसृजतेति कल्प्यं वाक्यं तेन सह चित्वाद्बहुवचनमित्यर्थः ।

वियदुत्पत्त्यभ्युपगमेनेति । सिद्धान्त्येकदेशिनं प्रति प्रतिज्ञाहानिर-
व्यतिरेकादिति युक्तां वियदुत्पत्तिमभ्युपगमय्य सत्यं दर्शितं विरुद्धं तु तदित्या-
दिना श्रुतिविप्रतिषेधवादिनं पूर्वपक्षिणमुत्थाप्य तन्निराकरणे प्रस्तुते सिद्धा-
न्त्येकदेशिनं प्रति वक्तव्यस्य वियदुत्पत्तौ हेत्वन्तरस्य कथनमिहासंगतमि-
त्यर्थः । यदि तु अपि च च्छान्दोग्यइत्यादिभाष्यग्रन्थो वियदुत्पत्तौ हेत्वन्त-
रप्रतिपादनार्थो न भवति किं तु प्रस्तुते वियत्तेजःप्राथम्यश्रुतिविप्रतिषेधनिरा-
करणएव । पूर्वं हि छन्दोगश्रुतेः तैत्तिरीयश्रुत्यनुवर्तनमर्थतः श्रुतेर्बलीयस्त्वात्
श्रुतिविरोधा†भावात्क्रमेण पदार्थबाधायोगाच्च समर्थितम् इदानीं छन्दो-
गश्रुत्या वियदुपसंहारस्य स्वयमेवापेक्षितत्वादपि तदनुवर्तनं समर्थ्यतइत्येवं
यदि व्याख्यायेत तदा प्रस्तुतग्रन्थेनैवैकवाक्यतेति न सिंहावलोकितन्याया-
पेक्षेति द्रष्टव्यम् ।

पराधीनसत्ताका इत्यर्थ इति । नन्वेवं सत्यविद्यावदेव ३१० । १७
वियतोऽपि स्वतः सत्ताराहित्येनाध्यस्तत्वमात्रं सिध्यति न कार्यत्वमिति
चेन्मा सैत्सीदितोऽनुमानात् कार्यत्वं संभूतश्रुत्या हि तत्सिद्धिरभिमता
किमर्थं तर्हीदं सूत्रसूचितमनुमानं संभूतश्रुतिगौणत्वापादकासंभवशङ्कानिरा-
करणार्थं तथैव च भाष्ये सूत्रमवतारितम् । असंभवशङ्का च समवायिकार-

---

* श्रुतिकल्पिताभ्यामिति २ पु॰ पा॰ । † श्रुतविरोधेति १ पु॰ पा॰ ।

णाद्यभावप्रयुक्ता पूर्वोत्तरकालयोर्विशेषाभावप्रयुक्ता वा ऽध्यस्तत्वसिद्ध्या निवर्तनत एव। अध्यस्तरजतादिषु रजतावयवतत्संयोगाद्यारम्भकाऽनपेक्षणाद् अध्यस्तस्य ज्ञाननिवर्त्यत्वनियमेन निवृत्त्यनन्तरकालइवोत्पत्तिपूर्वकाले ऽपि विद्यत्कृतविशेषाभावोपपत्तेश्च। उत्पत्तिराहित्यानुमानानि तु हेत्वसिद्ध्यप्रयोजकत्वा-

३१० । १८ दिदोषपराहतानीति स्पष्टमेव। **अविद्यादा**वित्यादिशब्देन षडस्माकमनादय इत्युक्तजीवेश्वराद्यन्तरसंग्रहः। ननु जीवेश्वरौ स्वरूपतः सत्यौ न पराधीनसत्ताकाविति तयोर्व्यभिचारतादवस्थ्यमित्याशङ्क्याह **जीवेश्वराद्यपीति**। आदिशब्देन वैराजाद्यैश्वररूपान्तरसंग्रहः। विभागविशिष्टरूपं विना स्वरूपमात्रविवक्षायां तु तत्र धर्मिसमसत्ताकविभागरूपो हेतुरपि नास्तीति न व्यभिचार इति द्रष्टव्यम्। आत्मान्यत्वे सतीत्यस्य हेतुविशेषणत्वे विशेष्यांशवैयर्थ्यमाशङ्क्य विभक्तत्वहेत्वसिद्धिपरिहारार्थत्वेन योजयति **नन्वद्वैतवादिन इति*** । **आत्मवादे चेति**। आत्मवादे चात्मनो निराकरणाशङ्कानुपपत्तिरिति यदेतद्भाष्यं तत्रात्मवादे चेत्येतदुपादानवादे चेत्येतत्परतया व्याख्येयमित्यर्थः। **आत्मवादे** चेत्येतदनन्तरम् **उपादानवादे चेति** प्रतिपदनिर्देशेन टीकायां दर्शित इत्यर्थः। क्व चिदात्मत्वादेवोपादानत्वादेवेति व्याख्येयमित्यर्थ इति पाठो दृश्यते स पाठ आत्मत्वादेव चात्मनो निराकरणशङ्कानुपपत्तिरिति भाष्यपाठमनुसृत्य तस्मिन् पाठे टीकायामात्मवादे चेति स्वकीयस्यैव शब्दस्योपादानवादे चेति विवरणं तेन भाष्यस्यमात्मत्वादिति पदमुपादानत्वादित्यर्थकं व्याख्येयमित्यर्थात्सूचितं भवतीत्यर्थः।

३११ । १२ **यथा भवतामिति**। न्यायमते क्षीरमविनष्टं न दध्याकारेण परिणमते किं त्ववयवसंयोगनाशात् क्षीरे नष्टे तदारम्भकपरमाणुषु रसान्तरोत्पत्तौ सत्यां द्व्यणुकादिप्रक्रियया दधिरूपद्रव्यान्तरारम्भ इति तथैवाक्षपादसूत्रं न पयसः परिणामो गुणान्तरप्रादुर्भावाद् व्यूहान्तराद् द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेरनुमानमिति। दध्यविनष्टस्य पयसः परिणामो न भवति तद्रसविरुद्धरसान्तरप्रादुर्भावादिति प्रथमसूत्रार्थः। घटपटादिषु सर्वत्र

* अयं प्रतीको नास्ति १ पु०।

कुतश्चिद् द्रव्याद् द्रव्यान्तरस्योत्पत्तिः व्यूहान्तरादवयवसंयोगान्तरादिति दृश्यते तदेतत्पूर्वद्रव्यनिवृत्तौ* क्षीरविनाशस्यानुमापकं क्षीरावयवानां संयोगान्तरं पूर्वसंयोगविनाशं विना न संभवति तद्विनाशे च क्षीरविनाशोऽवश्यम्भावी असमवायिकारणविनाशे सति कार्यस्थित्यसंभवादिति द्वितीयसूत्रार्थः† ॥

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥ ३११ । १६

प्रधानेनाऽप्रधानबाधमुक्त्वेति । यथा स्वर्गकामवाक्येन प्रधानेन को हि तद्वेद यदमुष्मिन् लोकेऽस्ति वा न वेत्यप्रधानस्य फलसंदेहवाक्यस्य बाधस्तथेति भावः‡ ॥

असंभवस्तु सतोऽनुपपत्तेः ॥ ९ ॥ ३१२ । ६

यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति न चास्य कश्चिद् जनिता न चाधिप इति श्रुत्योर्विरोधादप्रामाण्यमिति पूर्वपक्षे प्राप्ते सिद्धान्त्येकदेशिमतरूपतट्ठावर्तकपूर्वपक्षान्तरप्रदर्शकं भाष्यं शङ्कोत्तरत्वेनावतारयतीत्याह **भास्करोक्तेति** । सन्मात्रं हि ब्रह्मेत्यादिभाष्यस्य सत्सामान्यं ब्रह्मोत्पद्यते चेत्स सामान्यान्तरादुत्पद्यते सद्विशेषादसतो वेति विकल्पत्रयनिरासार्थत्वं प्रतीयते टीकायां त्वेतदुक्तं भवतीति तत्तात्पर्यवर्णनमुपक्रम्यान्यदेवोच्यते कथमनयोर्व्याख्यानव्याख्येयभाव इत्याशङ्क्य यथाश्रुतभाष्यव्याख्यानार्थो न भवति टीकाग्रन्थः किं तु भाष्याशयस्ययुक्त्यन्तरविवरणपर इति द्योतयन्नवतारयति **अपि च विवर्त्ततापीति** । **ब्रह्म कार्यमिति हि§ वदन् प्रष्टव्य इति** । यद्यपि कार्यत्वं विवर्तत्वं चेत्सद्रूपस्य ब्रह्मणः कार्यत्वमेव न संभवतीत्यैकध्येन दूषणं वक्तुं शक्यं तथापि प्रपञ्चार्थो विकल्पः । **न द्वितीय इत्याहेति** । आरम्भपरिणामयोः परं समानसत्ताकयोरुपादानोपादेयभावः न तु विवर्तइत्याशयः । **न तृतीय इत्याहेति** । यथाश्रुतभाष्यप्रतीततृतीयविकल्पनिराकरणार्थे ,, । १७
एव नाप्यसत इति भाष्यग्रन्थः स्वविकल्पिततृतीयपक्षनिराकरणार्थत्वेना-

---

* निवृत्तेरिति २ पु॰ पा॰ । † अत्र प्रथमं वियदधिकरणं पूर्णम् ।

‡ अत्र द्वितीयं मातरिश्वव्याख्यानाधिकरणं पूर्णम् । § ह्यति नास्ति १ पु॰ ।

३१२ । २० प्यावृत्त्या टीकाकारैर्योजित इति भावः । **अत्र तु विकारस्य सतो ब्रह्मण इति ।** यत्कारणं तत्कार्यमिति नियमेन ब्रह्मणः कारणाभ्युपगमे तदपि कारणं तेनैव नियमेन कार्यं स्यात् कार्यं च विवर्तरूपमित्युक्तम् । ततश्च ब्रह्मणः कारणत्वाद्युक्तिः समारोपिते क्व चित्तस्य समारोप इत्यर्थेपर्यवसिता भवेत् समारोपिते समारोपश्च क्व चिदपि न प्रमित इत्यप्रामाणिकमित्यर्थः । नन्वसति समारोपो न संभवतीति माध्यमिकमतनिषेधे समर्थितं न तु समारोपिते समारोपो न संभवतीत्यत आह **माध्यमिकेति ।** तत्र हि यथा शुक्तिकेयमित्यन्यतत्त्वमनधिगम्य प्रत्यक्षावगतं रजतं न निषिध्यते एवं प्रत्यक्षादिप्रमितः प्रपञ्चो ऽन्यदधिष्ठानतत्त्वमनधिगम्य निषेद्धुं न शक्यते अधिष्ठानत्वावगमकबाधकप्रमाणानुदये प्रत्यक्षादीनां प्रामाण्याऽविघातेन तैरेव स्वविषयनिषेधमसहमानैर्विरोधात् । अतो बाधकप्रमाणावगम्येन तात्त्विकाधिष्ठानेन भाव्यमित्युपपादितम् । इदमुपपादनमसति समारोपस्येव समारोपिते समारोपस्यापि निषेधकं भवतीति भावः । **अपरमार्थवचन इति ।** समारोपितवचन इत्यर्थः । अनेन च निरधिष्ठानभ्रमपरम्परानादितेत्याहेति प्राचीनटीकाग्रन्थे ऽपि निरधिष्ठानशब्दः समारोपिताधिष्ठानपर इत्यर्थाद्व्याख्यातम् । **अध्याहारः क्लेश इति ।** स्वमते सतो ब्रह्मणः असंभवः उत्पत्त्यभाव उत्पत्त्यनुपपत्तेरिति सूत्रयोजना । अत्राबुद्धिस्थस्य कस्यापि नाध्याहारः प्रतिज्ञाहानिरव्यतिरेका*दित्यत्र यदव्यतिरेकः कृत्स्नस्य जगतो ऽनूदितः तत्सद्रूपं ब्रह्म बुद्धिस्थम् । वियन्मातरिश्वनोः समर्थितोत्पत्तिरपि इह निषेध्यबुद्धिस्था सैवाऽनुपपत्तेरित्यत्राऽनुपपद्यमाना प्रतियोगिनी बुद्धिस्थेति परमते तु गुणादिकं नित्यत्वं चाबुद्धिस्थम् अद्वितीयश्रुतिरप्युत्पत्तिवद् नाव्यवहितबुद्धिस्थेति तदध्याहारक्लेशः । **पूर्वाधिकरणार्थ एवात्राक्षिप्यतइति†** । पूर्वाधिकरणाक्षेपसमाधानार्थत्वासङ्गति-

३१३ । ९ रेव संगतिरिति भावः । **पूर्वपक्षाभासेति ।** आकाशस्य तावदनुत्पत्तिर्न्यायशास्त्रादिसिद्धा भूगोलकादीनामपि न कदा चिदनीदृशं जगदिति सर्गप्रलयानभ्युपगन्तृमते प्रसिद्धा । एवमुत्पत्तिरहितत्वेन प्रसिद्धानामाकाशा-

---

* व्या॰ सू॰ अ॰ २ पा॰ ३ सू॰ ६ ।

† पूर्वाधिकरणमेवाक्षिप्यतइति प्रतीकाकारः १ पु॰ ।

दीनामुत्पत्त्यभिधानं सर्वकार्योपलक्षणार्थमिति नैकदेशोपादानवैयर्थ्यं न चेतरपरिसंख्यानमिति स्पष्टमेव । अतो न पूर्वाधिकरणाक्षेपावकाश इति भावः* ॥

तेजोतस्तथा ह्याह ॥ १० ॥ ३१३ । १९

अत्र पूर्वपक्षसंभावनार्थमिति सिद्धान्त्येकदेशिमतमिह पूर्वपक्षत्वेन व्यपदिष्टम् । तत्तेजो ऽसृजत वायोरग्निरिति श्रुत्योर्विरोध इति पूर्वपक्षः प्रागेव द्रष्टव्यः । **तदीयषोडश्याख्येति ।** षोडशिपात्रस्य खादिरत्वमप्यूर्ध्वपात्रान्तरेभ्यो ऽधिकं यूपसादृश्यमस्तीति विशिष्य षोडशिपात्रग्रहणम् । एवं च वाजपेयाङ्गत्वेन विधीयमानस्य सप्तदशारत्नित्वस्य साक्षाद्वाजपेयाख्ययागक्रियान्वयाऽयोगात्तदङ्गत्वनिर्वाहार्थं वाजपेयान्वय्यरत्निसंबन्धयोग्यकिञ्चिद्द्रव्यापेक्षायां यूपस्य वाजपेयानन्वयित्वात् षोडशिपात्रस्य प्रदेयसोमरसधारणद्वारा वाजपेयान्वयात्तत्संबन्धः सप्तदशारत्नित्वस्य वाजपेयाङ्गत्वश्रुत्या ऽर्थप्राप्तो गौणेन यूपशब्देनानूद्यतइत्यर्थः । **तदङ्गगतयूपइति ।** वाजपेयाङ्गभूता ये पशवस्तद्गते तदङ्गे यूपे सप्तदशारत्नित्वं विधीयते वाजपेयस्येति शब्दस्तु तस्य प्रकरणप्राप्तवाजपेयसंबन्धानुवादकः । यद्यपीतिकर्तव्यताकाङ्क्षालक्षणप्रकरणेन तस्य वाजपेयसंबन्धो न प्राप्नोति वाजपेयाङ्गगतस्य तस्य तदितिकर्तव्यताकाङ्क्षापूरकत्वाभावात्तथाप्यधिकारलक्षणप्रकरणात् तस्य वाजपेयेन परम्परासंबन्धः प्राप्नोतीति स वाजपेयस्येत्यनेनानूद्यतइति भावः । **वास्तवाऽभेदादिति ।** वायौ कारणत्वेनानुगतं यद् ब्रह्मरूपं तदभिप्रायमिदमभेदकथनं न तु विकारांशाभिप्रायम् । अध्यस्तस्य तस्य तात्त्विकब्रह्माभेदायोगाद्वायुभावापन्नस्य ब्रह्मण एव तेजःकल्पनाधिष्ठानत्वस्यानुपदं वक्ष्यमाणत्वाच्च । **पञ्चम्यनुग्रहायेति ।** वायोरिति ३१४ । १६
पञ्चम्या वायोस्तेजसि मृदो घटइवोपादानत्वं प्रतीयते तच्च वायुरूपविकारानुगतस्य ब्रह्मणो ऽधिष्ठानत्वएवोपपद्यते न विकारान्तरानुगतस्य केवलस्य वेति भावः । **तद्भावापन्नेति ।** तच्चाधिष्ठानत्वेन सत इत्यर्थः । **लोके कस्य चिच्छिष्यस्येति ।** अधिकश्च गुणः साधारण्ये ऽविरोधात् कांस्यभोजिवदमुख्येपी†ति पूर्वतन्त्राधिकरणे चिन्तितम् आग्रयणे आग्नेयैन्द्राग्ना-

---

* अत्र तृतीयम् असम्भवाधिकरणं पूर्णम् ।

† जै· सू· अ· १२ पा· २ सू· ३४ ।

ठयो यागाः श्रुताः । तत्र द्यावापृथिव्य एककपालो ऽपि श्रुतः स च वैश्वदेवपर्वगतैककपालयागप्रकृतिक इति ततः प्रसूनं बर्हिः प्राप्नोति । प्रसूनं पुष्पितं लूनं पुनर्जातं वा । आग्नेयादीनां तु प्रसूनमप्रसूनं वेत्यनियतं बर्हिः । तत्राग्नेयादीनां मुख्यत्वात्तदनुरोधेनानियमे प्राप्ते सिद्धान्तः । प्रसूनबर्हिरुपादानेपि मुख्यानामप्याग्नेयादीनां न किं चिद्वैकल्यम् । अप्रसूनबर्हिरुपादाने त्वेककपालस्यास्ति वैकल्यम् अतस्तमनुरुध्य प्रसूनमेव बर्हिरुपादेयमिति अत्र सूत्रकृता दृष्टान्तीकृतः कांस्यभोजिन्याय इह विवृतः* ॥

३१५ । १ **आपः ॥ ११ ॥**

अतिदेशाधिकरणमिदम् । एतस्माज्जायतइत्युपक्रम्य खं वायुर्ज्योतिराप इति श्रुत्या ब्रह्मजत्वमपां प्रतीतम् । आग्नेय इति कारकपञ्चमीश्रुत्या तेजोयोनित्वं तच्छ्रुत्योर्विरोध इति पूर्वपक्षः । स इदं सर्वमसृजतेत्यादिबहुश्रुत्यनुसारेण पञ्चमी क्रमार्थेति श्रुत्योरविरोध इत्येकदेशिमतम् । ब्रह्मतेजसोर्वास्तवाऽभेदात्तेजोयोनित्वे ऽपि ब्रह्मजत्वमविरुद्धम् । तस्मादापः कारकपञ्चम्या तेजोयोनय इत्यधिकरणशरीरं सर्वं पूर्ववत् । अधिकाशङ्कानिरासप्रकारमाह **अत्रिवृत्कृतेति** । अत्रिवृत्कृतयोरप्तेजसोर्विरोधग्राहकप्रमाणाभावादविरुद्धत्वसिद्धिः† ॥

,, । ६ **पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥**

ता अन्नमसृजन्त अद्भ्यः पृथिवी इति श्रुत्योर्विरोधः । अपां व्रीहियवादीनां च वाचकयोरन्यतरलक्षणायां विनिगमनाविरहादिति पूर्वपक्षे सिद्धान्त्येकदेशिमतं परमसिद्धान्तव्यावर्तनीयत्वात्पूर्वपक्ष इति टीकायां व्यवहृतम् । अत्र व्युत्पत्तिप्रसिद्ध्योर्भेदमाह **योगवृत्त्येति** । **रूढ्येति** च **साभ्यासपृथिवीश्रुत्येति** । अद्भ्यः पृथिवी पृथिव्या ओषधय इत्येकस्मिन्प्रकरणे पृथिवीशब्दद्वयश्रवणं यदपां शर इति श्रुत्यन्तरे पृथिवीशब्दश्रवणं चाभ्यासोक्त्या संगृहीतं वर्षनिमित्तबहुभावापत्तिलिङ्गान्यथोपपत्तिप्रदर्शकम् । अन्यथाप्युपपत्तेरित्येतद् व्याचष्टे **अन्यथा पार्थिवव्रीह्यादिपरत्वेनाप्युपपत्तेरिति** । व्रीह्यादीनां पार्थिवत्वात्तेषामद्भ्यो जननोक्त्या पृथिव्या

---

* अत्र चतुर्थं तेजोधिकरणं पूर्णम् ।

† अत्र पञ्चमम् अबधिकरणं पूर्णम् ।

एवाद्भ्यो जननमुक्तं भवतीत्यर्थः । अन्यथा पृथिवीपरत्वेनाप्युपपत्तेरिति पाठे ऽप्ययमेवार्थे पर्यवसानम्* ॥

तदभिध्यानादेव तु तल्लिङ्गात्सः ॥ १३ ॥ ३१५ । १६

ईक्षत्याद्यधिकरणैरिति । ईक्षत्यधिकरणे श्रुतत्वाच्चेति† सूत्रे स कारणं‡ करणाधिपाधिप इति श्रुतिमुदाहृत्य परमेश्वरस्य जगत्कारणत्वं प्रसाधितम् आनन्दमयाधिकरणे च तद्धेतुव्यपदेशाच्चेति§ सूत्रे इदं सर्वमसृजत यदिदं किं चेति श्रुतिमुदाहृत्य तत्र जगत्कर्तृत्वलिङ्गसमन्वयो दर्शितः बालाक्यधिकरणे|| च यो वै बालाके एतेषां पुरुषाणां कर्ता यस्य चैतत्कर्म स वै वेदितव्य इति श्रुतिमुदाहृत्य तत्र तत्समन्वयो दर्शितः । कर्तृत्वं च सकलकारकान्तरप्रयोक्तृत्वम् । तेन परमेश्वरानधिष्ठितानां भूतानां स्रष्टृत्वनिषेधो लब्धः साक्षाच्च सांख्याधिकरणे¶ प्रधानस्य चेतनाधिष्ठानाभावे जगद्रचयितृत्वा**संभवो मृदादिदृष्टान्तेन समर्थितः । स न्यायो भूतेष्वपि तुल्यः । यद्यपि तस्य न्यायस्य पाशुपताद्यधिकरणे††क्तप्रतिन्यायैः पराहत्या स्वातन्त्र्येण नार्थसाधनक्षमता तथापि श्रुतिमनुग्राह्य प्रमाणं‡‡ प्रविष्टस्य तस्य वनप्रविष्टसिंहन्यायेन बलवत्त्वात्सास्त्येव शरणम्§§ । एवमीक्षत्याद्यधिकरणैर्गतार्थः|||| ।

इत्याशङ्कामपनयन्निति । इत्थमाशङ्कापनयनं यथात्मन आकाश ,, । २०
इत्यत्रात्मनः स्वातन्त्र्यमेवमाकाशाद्वायुरित्यादिष्वप्याकाशादीनां स्वातन्त्र्यमुतेश्वरपारतन्त्र्यमिति यदिह विचार्यते नेदमन्यत्र विचारितं किं तु स्वातन्त्र्यपूर्वपक्षे यदीक्षत्याद्यधिकरणेषु भूतानां ब्रह्माधिष्ठितानामेव कारणत्वं स्थितं यच्चान्तर्याम्यधिकरणे¶¶ साक्षाद् ब्रह्मणः सर्वनियन्तृत्वं स्थितं यच्च तेजोत*† इत्यधिकरणे तत्तद्भूतात्मना ऽवस्थितस्य ब्रह्मण

---

* अत्र षष्ठं पृथिव्यधिकाराधिकरणं पूर्णम् ।

† व्याससू॰ अ॰ २ पा॰ २ सू॰ ३६ । ‡ सकारणं करणेत्यादिः पाठः २ पु॰ ।

§ व्याससू॰ अ॰ १ पा॰ १ सू॰ १४ । || व्याससू॰ अ॰ १ पा॰ ४ सू॰ १६ ।

¶ व्याससू॰ अ॰ १ पा॰ ४ सू॰ १ । ** रञ्जयितृत्वेति १ पु॰ पा॰ ।

†† व्याससू॰ अ॰ २ पा॰ २ सू॰ ३७ । ‡‡ प्रमाणं शरणमिति १ पु॰ पा॰ ।

§§ शरणमिति नास्ति १ पु॰ |||| अधिकरणैर्गतार्थेति २ पु॰ पा॰ ।

¶¶ व्याससू॰ अ॰ १ पा॰ ३ सू॰ १८ । *† व्याससू॰ अ॰ २ पा॰ ३ सू॰ १०

एवोत्तरोत्तरकार्योपादानत्वं स्थितं तस्य सर्वस्याप्यनेनाक्षेपो भवतीति
३१५ । २१ विशेषः । **पूर्वपक्षमाहेति ।** आकाशाद्वायुरित्यादिश्रुतेर्य आकाशे तिष्ठन्नि-
त्यादिश्रुतेश्चाकाशादिस्वातन्त्र्यपारतन्त्र्यविषयतया विरोधेनाप्रामाण्यमिति
पादसंगतपूर्वपक्षे* प्राप्ते सत्येकदेशिमतरूपं पूर्वपक्षमाहेत्यर्थः । **आका-
शादिशब्दैरिति ।** यथा आत्मन आकाश इति स्वतन्त्रे ह्यात्मनि पञ्च-
म्यर्थान्वयो दृश्यते तथा ऽऽकाशादित्यादिपञ्चम्यन्तोक्तानामपि तत्प्रायपा-
ठेन स्वातन्त्र्यमवगम्यते । न चाऽचेतनानां स्वातन्त्र्यासंभवः । तत्तदभि-
मानिदेवतार्थपरिग्रहात् । यमाकाशो न वेदेत्यादिश्रुतिष्वाकाशादिशब्दानां
देवतापरत्वस्य दृष्टत्वात् । तत्तेज ऐक्षतेत्यादिच्छान्दोग्यश्रुतावीक्षणलिङ्गेन
तेजःशब्दस्याप्यभिमानिदेवतापरत्वस्य वक्तव्यत्वेनाचापि तथात्वौचित्या-
च्चेति भावः ।

यथा ऽऽकाशाद्यात्मनेति । समुच्चयोपमेयं वाय्वादिषु ब्रह्मस्व-
रूपेण नोपादानम् आकाशादित्यादिपञ्चम्यन्तपदैस्तत्तदभिमानिदेवताप-
दानामधिष्ठातृरूपनिमित्तत्वस्य प्रतिपाद्यतया तैराकाशाद्यनुगतस्य ब्रह्मण
उपादानत्वाऽप्रतिपादनात् किं तु स्वविकारजडाकाशादिभूतरूपेण । नापि
स्वरूपेणाधिष्ठातृ तत्तदभिमानिदेवतानामधिष्ठातृत्वावगमात् । ऐश्वर्यवतीनां
च तासां स्वातन्त्र्योपपत्तेः । किं तु तत्तदभिमानिदेवतात्मनेत्यर्थः । एवं च
सो ऽकामयतेत्यादिश्रुतौ ब्रह्मणो यत् सर्वत्र कार्ये कर्तृत्वमुपादानत्वं च
श्रुतं यच्चान्तर्यामिब्राह्मणे तस्याकाशादिष्वपि नियन्तृत्वं श्रुतं तद्विरोधमा-
शङ्क्य परिहरति **ननु सो ऽकामयतेत्यादिना । मूलकारणस्य च
ब्रह्मण इति ।** अथ मूलकारणत्वविशेषेण ब्रह्मणः सर्वोपादानत्वमपि मूल-
कारणत्वात्पारम्पर्येणेति दर्शितम् । **अभिमानिदेवताद्वारेणेति ।** आका-
शमन्तरो यमयतीत्यादिवाक्यमाकाशाधिष्ठातृदेवतात्मभावेन व्यवहितस्य
ब्रह्मण आकाशादिनियन्तृत्वपरम् । यमाकाशो न वेदेत्यादिकं कर्तृ†कर्म-
३१६ । १२ भावविरोधेन स्वस्य स्ववेद्यत्वाभावपरमिति भावः । **आकाशादिशब्दै-
रिति ।** आकाशादिशब्दानां चेतने तदभिमानिदेवतायां च प्रयोगसद्भावे
ऽपि नोभयत्रापि शक्तिः । प्रसिद्धिप्राचुर्यानुसारेण तेषामचेतने शक्तिः देव-

---

* संगतपक्षे इति २ पु० पा० १ † इत्यादिकर्तृ.इत्यादिः पाठः १ पु० ।

त्तायां लक्षणोत्त्युपपत्तावुभयत्र शक्तिकल्पनाऽयोगात् । एवं मनुष्यादिशब्दानामपि मनुष्यत्वादिजातिमत्सु देहेषु शक्तिः तदधिष्ठातृजीवेषु लक्षणा । न त्वाकाशाद्वायुरित्यादिष्वाकाशादिशब्दानां लक्षणायां कारणमस्तीत्यर्थः । **तत्र रूढतरत्वादिति** । अपादाने पञ्चम्याहत्य विहिता प्रसिद्धतरा हेतौ तु ज्ञापकान्वेषणेन कथं चित्समर्थनीया न प्रसिद्धेत्यर्थः ।

भूतात्मतामापन्नस्योपादानत्वमुक्तमिति भ्रममपनुदतीति । ३१६ । १५
आकाशादिविकाररूपेण तत्तद्विकारावच्छिन्नरूपेण वा ब्रह्मण उपादानत्वमुक्तमिति भ्रान्तिं निराकरोतीत्यर्थः । न विकारात्मना विकारावच्छिन्नेन वा परस्परव्यावृत्तेन रूपेणोपादानत्वं विवक्षितम् । तस्योभयस्यापि कल्पितत्वेन व्यावहारिकाध्यासाधिष्ठानत्वायोगात्सृष्टिनिरूपणस्याध्यारोपापवादन्यायेन निर्विशेषब्रह्मसिद्ध्यर्थताया असकृदावेदितत्वेनात्रोपादानोपादेयभावस्याधिष्ठानाध्यस्तभावरूपस्यैव वक्तव्यत्वात् ।

अधिष्ठानं विवर्तानामाश्रयो ब्रह्म शुक्तिवत् ।
जीवाविद्यादिकानां स्यादिति सर्वमनाकुलम् ॥

इत्याचार्यैः प्रागुक्तया रीत्या सकलचेतनाचेतनप्रपञ्चविवर्ताधिष्ठानं सर्वविकारानुगतं यन्निर्विशेषं तेन रूपेणाकाशविकारानुगतेन सता वायूपादानत्वमित्याद्युक्तमिति समाधानार्थः । नन्वेवं सति आकाशादिपदानामाकाशाद्यनुगते ब्रह्मणि लक्षणा स्याद् लक्षणा चानुपदमेव निषिद्धा आत्मन आकाश इत्यादिषु प्रथमान्तानामाकाशादिपदानां विकारपरत्वस्य दृष्टत्वात्पञ्चम्यन्तानामपि मुख्यवृत्त्या तत्परत्वमेव च युक्तमिति चेत् । उच्यते । ब्रह्मण उपादानत्वोक्तिरियमार्थिकार्थविषया । आकाशाद्वायुरित्यादिशब्दार्थस्तु आकाशवाय्वादीनामेव मृद्घटन्यायेनोपादानोपादेयभावस्तस्मिन् कथिते तदाकाशादिविकारानुगतं ब्रह्म वाय्वाद्यधिष्ठानमित्यर्थात्सिध्यति । अन्यथा सच्च त्यच्चाभवदित्यादिश्रुत्युक्तस्य ब्रह्मणः सर्वप्रपञ्चाध्यासाधिष्ठानत्वस्यानिर्वाहात् । इदमाकाशादित्यादिपदानां मुख्यवृत्त्या विकारमात्रपरत्वं तत्तद्विकारानुगतस्य ब्रह्मणोऽधिष्ठानत्वस्यार्थिकत्वं च विवरणाचार्यैर्न्यायनिर्णये वर्णितम् । तत्रेदमधिकरणमित्थं दर्शितम् । आकाशादीनामुत्तरोत्तरभूतोपादानत्वं पञ्चम्यन्तपदैर्यदवगतं तत्तावदन्याऽनपेक्षं प्रतीयते तावतैव वायोरुपादानाकाङ्क्षापूरणात् ।

व्रीहयो निरपेक्षा हि ज्ञायन्ते यागसाधना: ।
यवाश्चैवमतस्तेषां मिश्रत्वं नावकल्पते ॥

इति न्यायाद् ब्रह्मणो ऽप्यन्यानपेक्षं सर्वोपादानत्वमाकाशादेव समुत्पद्यत इति सावधारणश्रुत्या ऽवगतं तत्रान्यतरोपादाने ऽन्यतरपदार्थबाधप्रसङ्गात् श्रुतपदार्थबाधकल्पनाद्वरं धर्मबाधकल्पनमिति वियदधिकरणोक्तन्यायेन नैरपेक्ष्यधर्मं बाधित्वा समुच्चयो ग्राह्य: । अत: पूर्वपूर्वभूताकारापन्नं ब्रह्मोत्तरोत्तरभूतोपादानमिति । यद्यप्याचार्याणामप्ययमर्थो ऽभिमतस्तथापि वियदधिकरणेन गतार्थमालोच्य टीकानुसारेणाधिकरणशरीरं प्रकारान्तरेण दर्शितं वियदधिकरणन्यायसिद्धस्त्वयमुपादानसमुच्चयस्तेजोऽत इत्यधिकरणएव सिद्धवत्कृत्य व्यवहृत: । अस्माभिस्तु चतुर्मतसारसंग्रहे टीकोक्तं न्यायनिर्णयोक्तंचार्थं संयोज्याधिकरणशरीरं दर्शितम् ।

तत्तद्भूताकारापन्नं सदितरजनकमिति कथं श्रुतिद्वयवैशसाद्
व्योमादीनां पञ्चम्या हि श्वसनमुखजनिषु विदिता स्फुटं निरपेक्षता ।
तेषां स्वातन्त्र्यं चादुष्टं सत एव बहुभवनदृश: श्रुतावुपवर्णना-
दाकाशादेवेत्यप्यन्या श्रुतिरिह समधिगमयते सतो निरपेक्षताम् ॥
बाधं नार्हन्त्येते सर्वे द्विविधवचनसमधिगता यत: खलु धर्मिण:
सन्त्वाकाशाश्चेहासते न हि किमपि विनिगमकं तदन्यतरोज्झितौ ।
तस्माद्बाध्या तद्धर्मत्वाद्वियदधिकृतिकथितनयादियं निरपेक्षता
भूतानां तत्स्वातन्त्र्यं च स्थितवति यमयितरि परे न किञ्चन युज्यते ॥

भुजङ्गविजृम्भितं नामेदं वृत्तम् । अत्र पूर्वपक्षश्लोके यदाकाशादीनां स्वातन्त्र्यं तच्छान्दोग्यश्रुतिमवलम्ब्य निबद्धं तत्र तैत्तिरीयोक्तवियत्पवनोपसंहारे तयोरपि तेजोजलयोरिव बहुभवनवीक्षणायुक्तवाक्यद्वयकल्पनात् । तैत्तिरीयश्रुतिस्तु भूतानां न्यायनिर्णयोक्तनिरपेक्षोपादानत्वप्रतीतिनिर्वाहार्थतया निवेशितेत्याचार्योक्तपूर्वपक्षप्रकाराद्भेद:* ॥

३१६ । २० विपर्ययेण तु क्रमो ऽत उपपद्यते च ॥ १४ ॥

किं दृष्टो ऽप्ययक्रम इत्यादिसिद्धान्तकोटिप्रदर्शकं वाक्यं योजयन्नवतारयति **घटादीनामिति** । घटादीनां यो विपरीतो ऽप्ययक्रमो

* अत्र सप्तमं तदभिध्यानाधिकरणं पूर्णम् ।

दृष्टः स भूतानामस्तु किमित्याहेत्यर्थः । अप्ययस्य क्रमापेक्षायामित्यादिसिद्धान्तग्रन्थं तात्पर्यकथनपूर्वकमवतारयति **सन्निधाने ऽपीति ।** दृष्टानुमानोपनीतेत्येतद् दृष्टपदस्यानुमानोपनीतपदस्य च कर्मधारयमाश्रित्य व्याचष्टे **घटादौ दृष्टेनेति ।** ननु श्रुतिसन्निहितादपि लौकिकक्रमः सन्निहिततर इत्ययुक्तं तथा सत्यश्वदाननिमित्तायां वारुणचतुष्कपालेष्टौ श्रुतिसन्निहितं पौण्डरीके ऽश्वदानं न निमित्तं किं तु सुहृदादिभ्यः क्रियमाणं लौकिकमश्वदानं निमित्तमिति स्यात् । किं च लोकादरणे लोके दग्ध*पटादिषु समकालः कार्यकारणयोरप्ययो दृष्ट इत्यक्रम एवाच किं न स्यात् । यद्युच्येत श्रुतौ भूतानामुत्पत्तिः क्रमवती दृष्टेति तेषामप्ययेनापि क्रमवता भाव्यमिति । तर्हि क्रमाकाङ्क्षोत्थापकत्वेन श्रुतावुत्पत्तिक्रमदर्शनं प्राथमिकमिति श्रौतक्रम एव लौकिकक्रमाद् बुद्धिस्थसन्निधानेन सन्निहिततर इत्यस्वरसाद्वेत्यन्तरोक्तिरित्यवतारयति **दृष्टेन क्रमेणेति ।** भूतानामप्ययक्रमस्तु भूतशुद्धिप्रकारेण द्रष्टव्यः । स यथा गन्धादिपञ्चगुणसंघातरूपा पृथिवी प्रथमं गन्धापचयेन रसादिचतुर्गुणसङ्घातात्मकजलरूपतामापद्यते ततो जलं रसाप्ययेन तेजोरूपतां तेजो रूपाप्ययेन वायुरूपतां वायुः स्पर्शाप्ययेनाकाशरूपतां ततः शब्दतन्मात्राप्यय एवाकाशाप्ययः । एवं रसादिचतुर्गुणसङ्घातरूपं जलतत्त्वं प्रथमं रसाप्ययेन तेजोरूपतामापद्यतइत्यादि द्रष्टव्यम् । गुणसङ्घातातिरिक्ततदाश्रयद्रव्याभ्युपगमे च पञ्चगुणा पृथिवी चतुर्गुणजलरूपतामापद्यतइत्यादिक्रमो ऽनुसंधेयः†॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥ १५ ॥ ३।१ । २०

भूतोत्पत्तिलयशीलनं हीति । यद्यपि तच्छीलनेन पूर्वप्रलयपुनःसर्गमध्यवर्तिकादाचित्कमेवेति निष्प्रपञ्चत्वं लभ्यते न त्वध्यस्तवियदादिप्रपञ्चमिथ्यात्वपरिशीलनेनेव सार्वदिकं निष्प्रपञ्चत्वं तथापि स्थूलतत्त्वाभ्यासन्यायात् तत्र क्रमेणोपयुज्यते इति भावः । कथं बुद्धीन्द्रियाणामुत्पत्तिचिन्तेति करणव्युत्पत्त्याश्रयणेपि मनः सर्वेन्द्रियाणि चेति श्रुतौ सर्वशब्दगृहीतानां कर्मेन्द्रियाणां न संग्रह इति शङ्का अजहल्लक्षणया तेषामपि संग्रह इति समाधानार्थः ।

---

* लोकदग्धेति २ पु॰ पा॰ । † अत्राष्टमं विपर्ययाधिकरणं पूर्णम् ।

श्रुतिविरोधपरिहारेणेति । आत्मन आकाश इत्यादिश्रुतेरेतस्माज्जायतइत्यादिश्रुतेश्च भूतेन्द्रियोत्पत्तिक्रमविषये विरोध इति पूर्वपक्षः । आथर्वणपाठक्रमादिन्द्रियाणां प्रथममुत्पत्तिः छान्दोग्ये तेजसः प्रथमं श्रवणेऽपि तैत्तिरीयकाम्नातवियत्पवनोपसंहारेण तेजःप्राथम्यस्येव तैत्तिरीयके वियतः प्रथमं श्रवणेऽपि आथर्वणाम्नातमनइन्द्रियोपसंहारेण वियत्प्राथम्यस्यापि बाधोपपत्तेः । न च मनइन्द्रियाणां भौतिकत्वेन श्रुतभूतोत्पत्त्यनन्तरभावित्वस्य वक्तव्यतया पाठक्रमादर्थक्रमो बलीयानिति तेषां भूतानन्तरं निवेशो युक्त इति वाच्यम् । तेषामाहङ्कारिकत्वेन भौतिकत्वासिद्धेः । न च यः प्राणः स वायुरिति प्राणभौतिकत्वश्रवणात्तस्य भूतानन्तरं निवेशः कार्यस्तत्प्रायपाठान्मनइन्द्रियाणामपि भूतानन्तरं निवेशः स्यादिति वाच्यम् । प्राणस्यार्थतः पाठक्रमबाधेन पश्चान्निवेशेऽपि मनस इन्द्रियाणां च प्रायपाठरूपेण स्थानप्रमाणेन पाठक्रमबाधनायोगादित्येकदेशिमतम् ।

३१८ । ८ **मनसोऽन्नमयत्वेन निर्देश इति** । त्रिवृत्करणरूपविकारकथनपरे वाक्ये अन्नमयत्वनिर्देशो मयटो विकारार्थत्वे लिङ्गमित्यर्थः । नन्वापोमयः प्राण इत्यत्र मयटो नास्ति विकारार्थत्वम् । अथाऽपां वायुरूपप्राणे कारणत्वं न सम्भवतीति तत्त्यागः तर्हि प्राक्सिद्धे मनसि प्रत्यहमश्यमानस्यान्नस्य कारणत्वं न सम्भवतीत्यत्राप्यसम्भवस्तुल्यः कथं च मनसोऽन्नविकारत्वश्रवणमात्रेण सर्वेषामिन्द्रियाणां भौतिकत्वसिद्धिः । उच्यते । वायुरूपः प्राणोऽपां मुख्यो विकारो न भवतीत्याप्यायनमात्रेणाऽमुख्यं विकारत्वं मयडर्थ आश्रीयते न वाऽन्नमयमित्यत्र तस्य मुख्यार्थपरित्यागे कारणमस्ति । प्राक्सिद्धेऽपि मनस्युपचितरूपावच्छिन्ने कारणत्वोपपत्तेः । दृश्यते हि प्राक्सिद्धेऽपि तडागे वृष्टिजलस्योपचितरूपावच्छिन्ने कारणत्वम् । एवं तेजोमयी वागित्यत्रापि मयटो मुख्यविकारार्थत्वं द्रष्टव्यम् । एवं वाङ्मनसयोर्भौतिकत्वकथनं स्थालीपुलाकन्यायेनोपलक्षणमित्यन्येषामपीन्द्रियाणां सांख्यकल्पिताहंकारप्रकृतिकत्वासंभवाद् भौतिकत्वसिद्धिः* ॥

३१८ । १३ **चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ १६ ॥**

---

* अत्र नवमम् अन्तराविज्ञानाधिकरणं पूर्णम् ।

प्रासङ्गिकीं संगतिमाह **एवं तावत्तत्पदवाच्येति** । पूर्वोत्तराधिकरणयोः संगतिमाह **यदीन्द्रियोत्पत्तिरिति** । तन्मृतो देवदत्त इति पाठमाश्रित्य तदिति तस्मादित्यर्थ इति व्याख्यानं तस्मान्मृत इति पाठस्तु स्पष्टार्थः । **देहेन सहेति** । जीवनित्यत्वश्रुतीनां जीवजननमरणनिमित्तजातकर्मश्राद्धादिविधीनां च विरोधेन पूर्वपक्षे जातकर्मादिविध्यन्यथानुपपत्त्या जीवस्य जनिरङ्गीकार्या । न च तत्र देहजनिर्निमित्तं मृतजातदेहेऽपि जातकर्मादिप्रसङ्गात् । तस्माज्जीवनित्यत्वश्रुतयो भाक्तत्वेन व्याख्येया इत्येकदेशिमतम् । तत्र श्राद्धादिविधेरन्यथोपपादयितुमशक्यत्वाज् जीवनित्यत्वमवश्यमङ्गीकार्यम् । जातकर्मादिविधीनां जीवसंयुक्तदेहजन्म निमित्तं भविष्यतीत्येवं सिद्धान्तयतीत्यर्थः । भक्तिश्च शरीरस्योत्पादविनाशौ तत्तस्तत्संयोग इति टीकायन्यं भक्तिश्च तत्संयोग इति व्यवहितान्वयेन शरीरस्योत्पादविनाशौ स्त इति वाक्यभेदेन च योजयति **भक्तिरित्यादिना** । भक्तिश्च शरीरस्योत्पादविनाशवतः संयोग इति पाठे त्वेकमेव वाक्यम्* ॥

नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥ ३१९ । १

कल्पाद्यन्तयोरुत्पत्तिविनाशवानिति । कल्पादौ परमेश्वरसंकल्पमात्रभवा अयोनिजा जीवा जन्मप्रभृत्येव कर्मानुष्ठानशक्ता इति तत्तदुत्पत्त्यनन्तरकालानुष्ठितसाध्वसाधुकर्मपरम्पराधीना तेषां भोगवैचित्री न पूर्वकल्पानुष्ठितकर्माधीनेति भावः । **न शुद्धस्येति** । शुद्धस्यैव स्वरूपेण प्रविलये मुक्तिभाक्त्वमपि न स्यादिति भावः ।

अविभागस्येति चच्छेद इति । विभागमङ्गीकृत्य सर्वविज्ञानप्रतिज्ञानिर्वाहार्थं कार्यत्वाङ्गीकारे च कल्पादावुत्पन्नानां भोगे वैचित्र्यं न स्यात् । प्राथमिकसाध्वसाधुकर्मकरणस्य तद्वैचित्र्यहेतुत्वे च तत्करणस्य पूर्वकल्पानुष्ठितकर्मापेक्षत्वाभावे तैस्तैर्जीवैः प्रथमं साधून्यसाधूनि च कर्माणि कारयितुमीश्वरस्य वैषम्यनैर्घृण्ये प्रसज्येयातां प्राथमिककर्माचरणेषूदास्ते परमेश्वरस्तदनुसारेणोत्तरोत्तरकर्माण्येव कारयतीत्येवं तस्य सर्वकर्मकारयितृत्ववचनानां द्वितीयादिकर्मविषयतया संकोचकल्पने ऽप्ययमसाधु कर्म करिष्यतीति जानतः परमेश्वरस्य कूपे बालकः पतिष्यतीति जानतस्तत्परिह-

* अत्र दशमं परावरव्यपाश्रयाधिकरणं पूर्णम् ।

रणाऽशक्तस्यैवौदासीन्यकृतस्तदुभयप्रसङ्गो ऽशक्यनिराकरणः । तस्मादनादिकर्मपरम्पराश्रयणाज्जीवानामनादित्वस्य सर्वविज्ञानप्रतिज्ञानस्य चोपपादनार्थमविभाग एवाभ्युपेय इति भावः* ॥

३१९ । १५ **ज्ञो ऽत एव ॥ १८ ॥**

एवं ज्ञानयोग्यत्वस्येति । ब्रह्माभेदविरोधिष्वनित्यत्वास्वप्रकाशत्वाणुत्वस्वाभाविककर्तृत्वेषु निरस्तेषु ज्ञाततदभेदयोग्यताकस्येत्यर्थः । यद्यपि कर्ता शास्त्रार्थवत्त्वा†दित्यधिकरणेनोपपादनीयं जीवगतं कर्तृत्वमध्यस्तमित्येतदेवाभेदयोग्यताज्ञानोपयोगि न तु परात्तु तच्छ्रुते‡रित्यधिकरणे व्युत्पादयिष्यमाणं जीवेश्वरयोः प्रवर्त्यप्रवर्तकत्वमपि । तत्तु भेदसापेक्षं सदभेदयोग्यताविरोधित्वशङ्कास्कन्दितं काल्पनिकभेदेन कथं चिदुपपादनीयं तथापि तद्विषयश्रुतिकलहो ऽपि क्व चिद्वारणीय इति प्रसङ्गादत्रैव पादे तद्वारणं कृतम् । अतो मूलाधिकरणसङ्गत्यैत्र प्रासङ्गिकाधिकरणमप्यत्र सङ्गतमिति भावः§ ॥

३२० । ९ **उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥**

अचलतो ऽपीति । यद्यप्यवयव्युत्पत्तौ उत्क्रमणमूर्ध्वदेशाक्रमण‖रूपं चलत एव भवति तथापि जीववैभववादिनो जीवस्य तदसंभवादुत्क्रमणशब्दस्य देहाभिमाननिवृत्तिमात्रं मरणमिति तत्र रूढिं मन्यन्ते तदाशयानुरोधेनाचलतोऽपि तत्संभव इत्युक्तम् । **सापादाना च सतीति** । उत्क्रान्तिर्देहादपसृप्तिरूपा साक्षादणुत्वसाधनमित्यत्र गत्यागतिश्रवणमिव विश्लेषावधिरूपापादानश्रवणमपि हेतुस्तत्समुच्चयार्थ इत्यर्थः । उत्क्रान्तिरपीत्यपिशब्दस्य भिन्नक्रमतां विनोत्क्रान्त्यन्वयेऽपि घटते गत्यागतिवदुत्क्रान्तिरपि गत्यागतिशिरस्कत्वात्सापादानत्वाच्च देहादपसृप्तिरूपा सत्यणुत्वसाधनमिति न केवलमुपादानश्रुतेरित्यादिटीकाग्रन्थं योजयन्नेव तस्य तात्पर्यमाह **चक्षुष इति ।** केवलमुत्क्रान्तिरणुत्वसाधनमित्येतदपादानश्रुतेरेव न भवति किं तु हृदयादीनां गन्तव्यत्वश्रुतेरपि । यद्यपि हृदयगमनं ततो जागरिते पुनः चक्षुरादिस्थानगमनं च साक्षादणुत्वसाधनं तथापि तथाभूतयोरेव पूर्वोदाहृतगत्यागत्योरुत्क्रान्तेर्देहादपसृप्तिरूपत्वगमकतया तस्या अणुत्वसाधन-

---

* अत्र एकादशम् आत्माधिकरणं पूर्णम् । † व्याससू॰ अ॰ २ पा॰ ३ सू॰ ३३ ।

‡ व्याससू॰ अ॰ २ पा॰ ३ सू॰ ४१ । § अत्र द्वादशं ज्ञाधिकरणं पूर्णम् ।

‖ ऊर्ध्वदेशात्क्रमणेति २ पु॰ पा॰ ।

त्वसिद्धाविवादयोरपि तत्सिद्ध्युपयोगो युज्यत इति तात्पर्यम् । **सुषुप्तः पुनरिति ।** सुषुप्तशब्दस्योत्तरवाक्ये ऽन्वयः न तु व्याप्नोति सुषुप्त इति पूर्ववाक्ये । स एव तास्तेजोमात्रा इत्यादिवाक्यं मुमूर्षुविषयं शुक्रमादाय पुनरेति स्थानं हिरण्मयः पुरुष एकहंस इति मन्त्रः सुषुप्तविषय इति भेदात् । **अत्र मात्रेत्यध्याहार इति ।** आरामिति प्रथमान्ते आराममिति मात्रेत्यंशाध्याहार इत्यर्थः । **उक्तमार्गेणेति ।** त्वगिन्द्रियोदाहरणेनेत्यर्थः । **तथा सति त्वग्जीवसंयोगस्यापीति ।** महदल्पयोः संयोगो ऽल्पानुरो- ३२ । २२
धीति सिद्धान्तिनेवाणोर्जीवस्य सकलशरीरव्यापिनीं वेदनां समर्थयमानेन पूर्वपक्षिणा वक्तुं न शक्यमिति भावः । ननु जीवमनःसंयोगस्य मनोऽनुरोधित्वे ऽपि मनःसंयुक्तायास्त्वचः सर्वशरीरव्यापित्वात्सर्वाङ्गीणशैत्योपलब्धिरित्ययुक्तं जीवमनःसंयोगवत् मनोनुरोधित्वादित्याशङ्कते **ननु त्वङ्मनःसंबन्धो ऽपीति । दण्डवदिति ।** यदेकदेशे गृहीते दण्डः* पुरुषेणाधिष्ठीयते तथेत्यर्थः । ननु जीवमनःसंयोगो ज्ञानासमवायिकारणं तस्य प्रादेशिकत्वे कथं ज्ञानं व्यापीति शङ्कावारणार्थमसमवायिकारणस्य प्रादेशिकत्वे ऽपि कार्यमप्रादेशिकं तन्तुसंयोगस्य तन्त्वेकदेशस्थत्वे ऽपि पटस्य तन्तुव्यापित्वादिति केषु चिद्ग्रन्थेष्वधिकः पाठः । यद्यप्यन्तःकरणमणिवत्यादिटीकावाक्यं तद्व्याख्यानं च मनो ऽणु तस्यात्मना संयोगश्च ज्ञानाद्यसमवायिकारणमिति नैयायिकपक्षमाश्रित्य यदि सिद्धान्तानुसारेण पाञ्चभौतिकमनः प्रदीपप्रभावत्संकोचविकासशीलं तत्संयोगश्च नासमवायिकारणं तदा नैवात्र परिहरणीया शङ्का ऽस्ति । **न चाणोरिति ।** न चाणोर्जीवस्येति पूर्ववाक्योक्तमर्थं विवृणोतीत्यर्थः । नन्वत एव हीत्यादिग्रन्थो न युक्तः समीपे स्थितस्यैव गन्धवद्द्रव्यस्येव शीतद्रव्यस्यापि सन्निहितदेशस्थितस्य व्यापको गुण उपलभ्यत इति वक्तुं शक्यत्वादित्याशङ्क्याह **न चात्रापि विप्रतिपत्तव्यमिति । तत्प्रापणविषयमित्याहेति ।** प्रापणग्रहणं सुषुप्तेरप्युपलक्षणं तथैवाग्रिमभाष्यदर्शनात्† ॥

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥ ३२३ । ४

बन्धमोक्षावस्थाविषयत्वेनेति । बन्धावस्थायामाध्यासिकं कर्तृत्वं मोक्षावस्थायां स्वाभाविकमकर्तृत्वमित्येवं विषयभेदेनेत्यर्थः । यद्यपि

* गृहीतो दण्ड इति १ पु॰ पा॰ । † अत्र त्रयोदशम् उत्क्रान्तिगत्याद्यधिकरणं पूर्णम् ।

जीवस्याल्पपरिमाणवत्कर्तृत्वमपि बुद्ध्युपाधिकमिति वक्तुं शक्यं तथापि शास्त्रप्रतिपन्नं कर्तृत्वं किमर्थमस्वाभाविकमङ्गीकरणीयं बुद्धेरेव तत्स्वाभाविको धर्मः जीवस्त्वकर्तेति विषयभेदेन विरोधपरिहारो ऽस्तु । अथ वा जीवस्यैव संसारदशायां फलमुखकर्तृत्वं न मुक्तिदशायामवस्थाभेदेन तत्परिहारो ऽस्त्विति शङ्काद्वयनिराकरणार्थो ऽधिकरणद्वयारम्भः । **क्रियाश्रयत्वइति** । क्रियावेशो हि विक्रियमाणस्य भवति विक्रियमाणस्य चानित्यत्वं नियतमिति भावः । ये इत्यस्य विशेष्यमध्याहरति **सांख्या इति** । **अनित्यत्वं परिहरतीति** । कर्तृत्वस्याध्यासिकत्वेन टीकायामनित्यत्वपरिहारः कृतः । स्वयं सांख्यान् प्रति भोक्तृत्वप्रतिबन्द्या परिहारान्तरमाह **चित्स्वभावत्वं चेदिति । कोशरूपबुद्धेरभिधानादिति ।** बुद्धिरूपविज्ञानमयकोशपर्याये श्रुतस्य विज्ञानं यज्ञं तनुतइत्यस्य नात्मकर्तृत्वसाधकतेत्यर्थः । **अन्यापेक्षायामपि स्वातन्त्र्यमुपपादनीयमिति ।** न त्वन्याऽनपेक्षोपपादनीयेति भावः । प्रकृतसङ्गते ऽर्थे भाष्यं योजयति **उपलब्धाविति ।** नित्यचैतन्यस्वरूपायां विषयोपलब्धौ तावन्नेन्द्रियाद्यपेक्षा नापि तदपेक्षितजन्योपलब्ध्यन्तरे उपलब्धेरुपलब्ध्यन्तरानपेक्षत्वात् किं तु नित्योपलब्धावेव विषयोपरक्तरूपायाम् । न च तावता स्वातन्त्र्यव्याघातः सर्वत्र कर्तुरुपकरणापेक्षादर्शनादित्यस्मिन्नर्थे भाष्यं योज्यमित्यर्थः* ॥

३२३ । ११ **यथा च तक्षोभयथा ॥ ४० ॥**

स आत्मा तथेति । स आत्मा तत्स्वभावस्येति शब्देनोक्त इत्यर्थः । ननु स्वभावोच्छेदात्स्वभाविनो भावस्य नाशप्रसङ्ग इति धर्मनाशेन धर्मिनाशापादनमयुक्तमित्याशङ्क्य स्वभावसिद्धधर्मनाशे धर्मिनाशः स्यादित्युपपादयति **स्वभाविनि सतीति । परमार्थेति ।** पारमार्थिका शक्तिर्मोक्षे ऽप्यनुवर्ततइति वादिनां मतइत्यर्थः । **भाष्ये कर्तृत्वमात्रस्येति ।** अहङ्कारपूर्वकमपि कर्तृत्वं नोपलब्धुर्भवतीति भाष्ये कर्तृत्वसामान्यस्याहङ्कारिकस्यात्मन्यध्यस्तत्वं निषिध्यतइति प्रतिभाति । न च तद्युक्तम् । आत्मन्याहङ्कारिककर्तृत्वाध्यासस्याध्यासभाष्ये समर्थितत्वादित्याशङ्क्य चैतन्यकर्तृत्वस्यैवात्मन्यध्यसनीयत्वेन निषेध इत्याहेत्यर्थः । तथाविधत्वेनेति

* अत्र चतुर्दशं कर्त्रधिकरणं पूर्णम् ।

स्थाने तथाविरुद्धत्वेनेति* क्व चित्पाठः । तत्र तथा आत्मन्यध्यसनीयत्वेन निषेधः कर्मकर्तृभावस्य विरुद्धत्वादित्यर्थः । यदि बुद्धेरुपलब्धिर्भवेदिति ग्रन्थं व्याचष्टे बुद्धेः कर्त्र्या इति† ॥

परात्तु तच्छ्रुतेः ॥ ४१ ॥ ३२५ । २३

न चेश्वर इत्यादिटीकाग्रन्थेन रागादिरहितस्येश्वरस्य साध्वसाधुकर्मसु प्रवर्तकत्वमेवानुपपन्नमित्युक्त्यनन्तरसमुत्थितशङ्कान्तरनिराकरणार्थं येन धर्माधर्मापेक्षयेत्यादिवाक्यं मध्ये शङ्कान्तरं विना तदनन्वयादिति मत्वा शङ्कान्तरनिराकरणार्थत्वेन योजयति **तत्र प्रवर्तकत्वमेव तस्यायुक्तमित्यादिना** । अनेन न चेश्वरः सन् कर्मपरतन्त्र इति युक्तं येन तस्य प्रवर्तनीयधर्माधर्मापेक्षया साध्वसाधुकर्मप्रवर्तयितृत्ववैचित्र्यमुपपद्येतेत्यस्मिन्नर्थे तद्वाक्यं योजितम् । **विधिप्रतिषेधयोरिति** । ईश्वर एव विधिप्रतिषेधयोर्नियुज्येतेति भाष्यस्येश्वर एव विधिनिषेधशास्त्रनियोज्यः स्याद् न तु जीवो न स्वर्गकामनादिमान् मनुष्य इत्यर्थः प्रतिभाति न तु सोऽर्थो युक्तः । न हीश्वरस्य कर्माऽनपेक्षस्य जीवप्रवृत्तिनिवृत्तिकारयितृत्वे तथा दोष आपद्यते किं त्वीश्वरस्य स्वतन्त्रत्वे स एव विधिनिषेधस्थानाभिषिक्तः स्यादित्येव दोष आपद्यतेऽतस्तथार्थस्फूर्तये भाष्ये स्थानइति पदमध्याहरतीत्यर्थः‡ ॥

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयतएके ॥ ४३ ॥ ३२६ । ७

निरतिशयोपाधिसंपद्विभूतियोगादित्यस्य सकलाविद्योपाधिसम्बन्धादित्यर्थः प्रतीयते सोऽर्थो न युक्तः जीवानामेवाविद्याश्रयत्वाद् ब्रह्मणस्तदनाश्रयत्वादित्याशङ्क्यान्यथा व्याचष्टे **अधिष्ठानेति** । अनेनाधिष्ठाने ब्रह्मणि निरतिशयानां स्वकृतदोषरूपातिशयानाधायिनामुपाधीनां संपद् अविद्योपाधिविषयीकरणं यस्य तस्माद्विभूतियोगाद् अविद्यादोषकृतैश्वर्यपरिच्छेदरहितपारमेश्वररूपसंपादनादिति व्याख्यानं कृतम् । इत्थमपि व्याख्यातुं शक्यम् । उपाधिशब्देन मायोपाधिकृताः सृष्ट्यादिशक्तय उच्यन्ते ताश्च निरतिशया न तु जीवशक्तिवत्कतिपयसृज्यादिविषयत्वेन सातिशयास्तासां

---

* तेषां विरुद्धत्वेनेति १ पु॰ पा॰ । † अत्र पञ्चदशं तत्त्वाधिकरणं पूर्णम् ।

‡ अत्र षोडशं परायत्ताधिकरणं पूर्णम् ।

संपद्बाहुल्यं सैव विभूतिरैश्वर्यं तदयोगादिति । एवं च लोके ऽप्यधिकशक्तयो राजादयो ऽल्पशक्तीनां प्रजादीनामीशतइति दर्शनानथैव निरतिशयशक्तिशाली परमेश्वरो निकृष्टोपाधीनामल्पशक्तीनां देवमनुष्यादिजीवानामीष्टइति वाक्यार्थः परिनिष्पन्नो भवति । निरतिशयोपाधिसंपन्नश्चेश्वरो हीनोपाधिसंपन्नान् जीवान् प्रशास्तीति भाष्यस्याप्येवमेवार्थः । अयमिह पूर्वपक्षः । सन्ति तावज् ज्ञातृज्ञेयध्यातृध्येयनियम्यनियामकाधेयाधिकरणभावादिविषया भेदश्रुतयः । सन्ति चाभेदश्रुतयः । यथा ऽऽथर्वणिकानां संहितोपनिषदि ब्रह्मसूक्ते ब्रह्मदाशा ब्रह्मदासा ब्रह्मेमे कितवा उत स्त्रीपुंसौ ब्रह्मणो जातौ स्त्रियो ब्रह्मोत वा पुमानिति मन्त्रः । यथा वा श्वेताश्वतरोपनिषदादिषु त्वं स्त्री त्वं पुमानित्यादयः । न चोभयविधश्रुत्यनुग्रहाय भेदाभेदपक्षाभ्युपगमो युक्तः । तस्य विरोधादिभिर्दुष्टत्वात् । तस्मादप्रमाणमेताः श्रुतय इति ।

अथ टीकानुसारेण सिद्धान्त्येकदेशिमतम् । ईश्वर एव नास्ति । यतो जीवानां भेदाऽभेदचिन्ता तद्विषयश्रुतयस्तु केवलमर्थवादाः । भेदपक्षे ऽभेदपक्षे भेदाभेदपक्षे च दोषदर्शनात् । न च तद्दोषपरिहाराय जीवा न सन्तीति वक्तुं युक्तम् । तेषां प्रत्यक्षादिसिद्धत्वात् । अतो जीवानामेव जात्यैक्यमवलम्ब्याद्वितीयश्रुतय इति । भाष्यानुसारेण तु भेदश्रुतयः स्वार्थपराः पूर्वाधिकरणनिर्णीतस्य प्रवर्त्यप्रवर्तकभावस्य भेदापेक्षत्वात् स्वामिभृत्ययोस्तथात्वदर्शनात् । अभेदश्रुतयस्तु चेतनत्वसाम्यैक्यनिबन्धना उपचरितार्थाः अभेदे सुखदुःखवैचित्र्यानुपपत्तेरिति । एवमीश्वरापलापेनैव सिद्धान्त्येकदेशिमतं द्रष्टव्यम् । ननु क्रत्वर्थग्रहणेन गोदोहनादिपुरुषार्थप्रवृत्तिः पुरुषाभिप्रायानुरोध्यनुज्ञाधीनाभ्युपगता भवेदिति शङ्कां परिहरतीत्याह **अपि च पुरुषार्थे ऽपीति*** ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य-
श्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षि-
तस्य कृतौ श्रीवेदान्तकल्पतरुपरिमले द्वितीय-
स्याध्यायस्य तृतीयः पादः ॥

---

* अत्र सप्तदशम् अंशाधिकरणं पूर्णम् ।

अथ द्वितीयाध्यायस्य चतुर्थः पादः ।

तथा प्राणाः ॥ १ ॥ ३२९ । १

ब्रह्मवेदने सर्ववेदनप्रतिज्ञा तदुपपादकश्रुतिविरोधादिति टीकायां ब्रह्मवेदनइत्यस्य द्वन्द्वसमासान्तर्गतपूर्वपदार्थभूतया सर्वविज्ञानप्रतिज्ञया ऽन्वयमपेक्षावशेन दर्शयति **कस्मिन्निति ।** कस्मिन्सतीत्यर्थः ।

दोषात्त्विष्टिरिति । प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्च्छत् स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तन्निरवपत् ततो वै स वरुणपाशादमुच्यत वरुणो वा एतं गृह्णाति यो ऽश्वं प्रतिगृह्णाति यावतो ऽश्वान् प्रतिगृह्णीयात्तावतो वारुणां*श्चतुष्कपालान्निर्वपेद् वरुणमेव स्वेन भागधेयेनोपधावति स एवैनं वरुणपाशान्मुञ्चतीति तैत्तिरीयाः समामनन्ति । अस्यार्थः । प्रजापतिर्वरुणाय प्रतिग्रहीत्रे अश्वमनयद् अददात् स प्रजापतिः स्वां देवतां प्रतिग्रहीतृत्वेन स्वदेवताभूतं वरुणमार्च्छत् प्रापद् वरुणग्रहशब्दितः जलोदरव्याधियुक्तो जातः तत्परिहारार्थं वारुणीं चतुष्कपालेष्टिं कृतवानिति ।

एवमुपक्रमानुसारेणेयं दातुरिष्टिरित्युत्तराधिकरणे स्थास्यन्तमर्थं† सिद्धवत्कृत्यैतदधिकरणप्रवृत्तिरित्याह **ततो दाननिमित्तेष्टिरिति ।** ननु उत्तराधिकरणार्थमनपेक्ष्य यो ऽश्वं प्रतिगृह्णातीति यथाश्रुत‡वैदिकशब्दानुसारेण लौकिके ऽश्वप्रतिग्रहे वैदिके वेत्येवमेतदधिकरणप्रवृत्तिः किं न स्यादित्याशङ्क्याह **न तु लौकिके इति ।** वैदिकत्वं वेदविहितत्वरूपं प्रतिग्रहे ,, । २०
न संभवति । यद्यपि प्रतिग्रहैर्ब्राह्मणो§ धनमर्जयेदिति नियमविधिव्यापारो ऽस्ति तथाप्यश्वप्रतिग्रहे सो ऽपि नास्ति नोभयतोदतः प्रतिगृह्णातीति तन्निषेधात् । किं च शास्त्राद्धि वैदिके न दोषः स्यादिति वैदिके दोषाभावः

---

* वारुणयानिति २ पु॰ पा॰ ।

† स्थितमर्थमिति १ पु॰ पा॰ । ‡ यथाश्रुतमिति १ पु॰ पा॰ ।

§ प्रतिग्रहे याजनाध्यापनप्रतिग्रहैर्ब्राह्मणा इत्यादिः पाठः १ पु॰ ।

स्मर्यते न चाश्वप्रतिग्रहे दोषाभावो ऽस्ति । अतो दानविषय एवायं विचार इति भावः । **न केसरिण इति ।** सुहृदादिभ्यो रागप्राप्तमश्वदानं प्रतिषिद्धम् ।

३३० । ९ **प्राप्तस्यानुवादको ऽर्थवादोयमिति ।** नन्वर्थवादो ऽनुपपातादिति* सूत्रेण वरुणग्रहशब्दोर्थवाद एव अश्वदानप्रयुक्ततया जलोदरव्याधेरनुवादादित्युक्तम् इहापि सिद्धान्ते तथैवोक्तं कुतः प्राप्तस्येदानीमनुवादः कीर्त्यते । उच्यते । लोकप्राप्तस्य जलोदरव्याधेरिहानुवादः वरुणो वा एतमश्वदातारं गृह्णातीति निर्देशस्तूपमार्थः । अग्निमेव खलु वा एष प्रविशति यो ऽवान्तरदीक्षामुपैतीतिवद् इवशब्दयोगातच वाच्योपमा इह तु सामानाधिकरण्यनिर्देशाद् गम्येति विशेषः । ततश्च जलोदरव्याधिमता तच्चिकित्सैवाश्वं दत्तवतेयमिष्टिरवश्यं कार्येति सिद्धं भवति । किं च प्रजापतिर्वरुणायाश्वमनयदित्याद्यर्थवादप्रतीतस्य दोषस्याश्वदातृत्वसामान्यादन्येष्वपि प्राप्तस्य वरुणो वा एतं गृह्णातीत्यत्रानुवाद इत्युपपद्यते । नन्वियमिष्टिर्मा भूद्दोषनिर्घातार्था तथापि वैदिकइति कुतः लौकिके ऽपि वा लौकिकएव वा किं न स्यात् । उच्यते । न तावदुभयत्र भवितुमर्हति लौकिके पुरुषार्थत्वं वैदिके क्रतुशेषतेत्येकस्य वाक्यस्य क्रतुपुरुषशेषताप्रतिपादकत्वेन वाक्यवैरूप्यप्रसङ्गात् । नापि लौकिकएव वैदिकस्य नैमित्तिकस्य वैदिकं निमित्तं प्रत्यासन्नमिति तद्विहायाप्रत्यासन्नलौकिकग्रहणायोगात्तद्ग्रहणे फलकल्पनागौरवप्रसङ्गाच्च । अतस्तस्माद्यत्रे प्रतीयेतेति युक्तः सिद्धान्तः ।

लौकिके धातुसाम्यार्थमिति । वमनेनान्तर्गतदोषनिःसरणाद्धातुसाम्यं भवतीति वमनोपायतया वैद्यके सोमपानमुक्तमस्ति तत्कृतं वमनं लौकिकं तस्मिन्नित्यर्थः । **धातुसाम्यकरत्वान्न दोषतेति ।** धातुसाम्यार्थे वमने क्रियमाणे तात्कालिकेन्द्रियशोषो भवति चेद्भवत्वित्यङ्गीकृतत्वान्न दोष

,, । २४ इत्यर्थः । **मन्त्रलिङ्गादिति ।** सोमरसं प्रति नाभिमतिक्रम्य मागा इत्यूर्ध्वमुखत्वनिषेधकमन्त्रलिङ्गादित्यर्थः । नन्वनुत्पत्तौ तत्त्वान्तरत्वापादनमयुक्तमविद्यादिवदनुत्पत्तावप्यतत्त्वान्तरत्वोपपत्तेरित्याशङ्क्याह **अविद्यादीति**† ॥

---

* जैमिनिसू॰ अ॰ ३ पा॰ ४ सू॰ ३५ ।

† अत्र प्रथमं प्राणोत्पत्त्यधिकरणं पूर्णम् ।

सप्तगतेर्विशेषितत्वाच्च ॥ ५ ॥ ३३१ । १२

पूर्वपक्षइति । यस्मात्स्थूलात्सूक्ष्माच्च शरीरात् त्वम्पदार्थो विवेक्तव्यः तस्मिन् भौतिके विषये श्रुतिविरोधपरिहारार्थोयं पादः । तत्र सप्तैव प्राणा लिङ्गशरीरान्तर्गतास्तदा तेभ्य एव त्वम्पदार्थो विवेक्तव्यः एकादश चेदन्येभ्यो ऽपीति प्रयोजनमित्यर्थः । ग्रहानतिशेरतइति व्युत्पत्तिमाश्रित्यातिग्रहशब्दस्य विषयेषु वृत्तौ हेतुमाह **रागोत्पादनेनेति । अपानइति च गन्धइति** । लक्षणयोच्यतइत्यनुषङ्गः । **अपानेनेति** । अपानशब्देन गन्धस्य लक्षणायां हेतुं तद्वाच्येनापश्वासेन करणेनाघ्रेयत्वरूपं संबन्धं श्रुतिरेव वदतीत्यर्थः । **प्राणान्तरव्यावृत्तिरिति** । अशीर्षण्यानां प्राणत्वव्यावृत्तिरित्यर्थः । **उखाधूपनस्तुतिपरत्वादिति** । तथा च ये शीर्षण्याः प्राणास्ते सप्तेति लोकसिद्धार्थानुवादेन सप्तभिर्धूपनस्य स्तुतिरिति युक्तं न तु ये शीर्षण्यास्तएव प्राणा इत्यलौकिकार्थपरत्वमिति भावः । **तथापि सदनुवाद इति विशेष इति** । ननु शीर्षण्याः प्राणाः सप्तेत्यपि सदनुवाद एव को विशेषः नेति ब्रूमः । वस्तुतश्चत्वार एव हि शीर्षण्याः प्राणा इति वक्ष्यते टीकायाम् । एकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानान्न चक्षुर्द्वित्वम् एकविनाशे* द्वितीयाऽविनाशान्नैकत्वमित्यक्षपादेन पूर्वोत्तरपक्षसूत्राभ्यां व्यवस्थापितं चक्षुर्द्वित्वं च दूषयिष्यते । **इयमपरा योजनेत्यादि**ग्रन्थेनेन्द्रियाणामेकादशत्वमङ्गीकृत्यैवोत्क्रामदिन्द्रियसंख्याविषयश्रुतिकलहवारणार्थं वर्णकान्तरमारब्धम् तत्र सप्तैवोत्क्रामन्ति अन्यानि तु शरीरवत्प्रतिजन्म जायन्तइति पूर्वपक्षः । एकादशाप्युत्क्रामन्तीति सिद्धान्तः । अस्मिन् वर्णके पूर्ववर्णकादुत्कर्षं दर्शयितुं पूर्ववर्णके पूर्वपक्षसूत्रयोजनाक्लेशं पूर्वपक्षोपपादनाय तद्विरुद्धश्रुतियोजनाक्लेशं च दर्शयति **पूर्वयोजनायां हीति । वृत्तिभेदविषयत्वकल्पनेति** । यद्यपि द्वितीयवर्णकपूर्वपक्षे ऽपि ते यदाऽस्माच्छरीरान्मर्त्यादुत्क्रामन्त्यथ रोदयन्तीति श्रुतेर्वृत्तिभेदविषयत्वकल्पनाक्लेशो ऽस्ति तथाप्यस्मिन् वर्णके स एक एव क्लेशः पूर्ववर्णके क्लेशत्रयमिति विशेषः । **अध्यात्माधिदैविकोपासनेष्विति** । अध्यात्मं वागादीनाम- ३३२ । २४
धिदैवमग्न्यादीनां च सन्त्येकोपासनाद्ब्रह्मादिशरीरप्राप्तिफलकानि तेषु यानि

---

* विनाश्ये इति १ पु· पा· ।

शरीरान्तरे ऽप्यनुवर्तमानानीन्द्रियाणि तान्येव तत्क्रतुन्यायादुपासनीयानि । अतः पूर्वपक्षे सप्तानामुपासनमेकादशानामपि सिद्धान्त इति फलभेदः* ॥

३३३ । ७ **अणवश्च ॥ ७ ॥**

द्वितीयवर्णकेन सङ्गतिमाह **एकादशानां प्राणानामिति** । पादसङ्गतिस्तु प्रासङ्गिकी श्रुतिकलहनिरासाभावात् सांख्यविप्रतिपत्तिमात्रनिरासात् । **परिच्छेदेति**† । अहमिहैवास्मीति परिच्छेदभानादित्यर्थः । **आधिदैविकव्यापकेति** । यद्यपि व्यष्ट्यन्तःकरणचैतन्यसंवलनरूपास्मदादिव्यष्ट्यहङ्कारवत्समष्ट्यन्तःकरणचैतन्यसंवलनरूपः समष्ट्यहङ्कारो ऽस्ति हैरण्यगर्भः स तु व्यापक इति वक्तुं शक्यं तथापि सांख्याभिमतमहत्प्राकृतिकेन्द्रियप्रकृतिभूतव्यापकाहङ्कारसद्भावे प्रमाणं नास्तीति तात्पर्यम्‡ ॥

,, । ८ **श्रेष्ठश्च ॥ ८ ॥**

आनीदित्यस्येति । सदसदात्मकसकलप्रपञ्चाभिव्यक्त्या महाप्रलयविषयत्वमानीदित्यस्यावगम्यतइत्यर्थः§ ॥

,, । १२ **न वायुक्रिये पृथगुपदेशात् ॥ ९ ॥**

एतस्माज्जायते प्राणः यः प्राणः स वायुरिति प्राणवायुभेदाऽभेदश्रुत्योर्विरोध इति पूर्वपक्षः । श्रुत्योर्विरोधे स्मृत्या तत्तात्पर्यं निर्णेतव्यमतः सांख्यस्मृत्या करणानां साधारणवृत्तिः प्राणो वायोर्भिन्न इति सिद्धान्त्येकदेशिमतम् । **पदभाष्यइति** । प्रतिपदविवरणरूपं छान्दोग्यभाष्यं पदभाष्यं तत्र वागादीन्द्रियप्रायपाठात्प्राणो घ्राणमिति व्याख्यातम् इह तु प्राणश्रुतिः प्रायपाठाद्बलीयसीति प्राणो मुख्यप्राण उक्त इत्यर्थः । कथं चिन्नयनं सिद्धान्तिनो ऽपि तुल्यमित्याह **त्वया ऽपि हीति** । सिद्धान्तिना ऽपि हि वायुप्राणयोः स्वरूपाऽभेदे|| तत्त्वाऽभेदमाश्रित्याभेदश्रुतिः वृत्तितद्वद्भेदाभिप्राया¶ बाह्याध्यात्मिकव्यापारद्वैविध्याभिप्राया च भेदश्रुतिरिति व्याख्यातव्यम् । अतः कथं चिद्योजनं तन्मते ऽपि समानमित्यर्थः । **तर्हि किमिति** । प्राणो न वायुमात्रं नापि वायोस्तत्त्वान्तरमिति सिद्धान्ते भेदाभेदश्रुत्योरुभयोरपि

---

* अत्र द्वितीयं सप्तगत्यधिकरणं पूर्णम् ॥ † अपरिच्छेदेतीति प्रतीकाकारः १ पु· ।

‡ अत्र तृतीयं प्राणाणुत्वाधिकरणं पूर्णम् । § अत्र चतुर्थं प्राणश्रैष्ठ्याधिकरणं पूर्णम् ।

|| स्वरूपाभेदमिति २ पु· पा· । ¶ श्रुतिप्रवृत्तिः तद्वद्वित्यादिपा· २ पु· ।

योजनायां क्लेशो ऽस्ति चेत्तर्ह्यभेद इति प्रथमपूर्वपक्ष एव किमिति नाद्रियते तत्र हि भेदश्रुतिमात्रस्य क्लेशेन योजनेत्याशङ्कार्थः । परिहाराभिप्रायमाह **यदा त्विति ।** यदा प्रथमावस्थायां विरुद्धे श्रुती विनिगमना*विरहात्परस्पररत्याजितार्थे वर्तेते तदा लब्धप्रसरया स्मृत्या करणव्यापारः प्राण इति प्रतिपादिते श्रुती तत्परतया योज्येते तत्र भेदश्रुतेर्योजनाया न कश्चन क्लेशः अभेदश्रुतिस्तु वायुशब्दस्योपचारिकत्वकल्पनया शक्ययोजना । अतः पूर्वं पश्चाच्च भेदाभेदश्रुतिभ्यामभग्नस्वार्थस्मृत्यनुसारेण करणवृत्तिः प्राण इत्येव पूर्वपक्ष आद्रियतइत्यर्थः । प्रत्येकमिन्द्रियाणां वृत्तिः प्राण इति विकल्पे टीकायां दूषणं नोक्तम् । तत्र स्वयं दूषणमाह **प्रत्येकवृत्तित्वइति ।** पुरुषार्थत्वात् पुरुषं प्रति पारतन्त्र्यमिति हेतुसाध्ययोरभेदशङ्कां परिहरति **पुरुषार्थत्वमिति ।** परिच्छेदधारणादिति ग्रन्थे धारणशब्दार्थमाह **धारणं मेधेति ।** परिच्छेदाहरणादीति पाठे ज्ञानेन्द्रियसाध्यो रूपादिप्रत्ययः परिच्छेदः हस्तादिकर्मेन्द्रियसाध्य आहरणादिः† ॥ ३३५ । १

अणुश्च ॥ १३ ॥

साम प्राण इति व्युत्पाद्येति । एष उ एव साम वाग्वै सा अम एष सा चामश्चेति तत्साम्नः सामत्वमिति पूर्ववाक्येन सामशब्दः प्राणे व्युत्पादितः । ननूभयमुभयत्र विषयः तत्र व्यापित्वश्रुतीनामुपासनार्थत्वहेतुरणवश्चेत्यधिकरणे दर्शितः । अस्मिन्नधिकरणे तु प्राणव्याप्तिकश्रुतेराधिदैविकविषयत्वे हेतुरुच्यतइति विशेषमाह **हेतुभेदस्य चाधिकरणाभेदकत्वादिति ।** पूर्वपक्षे विशेषाभावे सैद्धान्तिकहेतुभेदमात्रेण नाधिकरणभेदो भवति ईक्षत्यधिकरणादिषु अधिकरणैक्ये ऽपि सैद्धान्तिकहेतुबाहुल्यदर्शनादिति भावः । स्वमते त्वणवश्चेत्यधिकरणमिन्द्रियविषये सांख्यविप्रतिपत्तिनिरासार्थम् । इदमधिकरणं यद्यपि प्राणविषये श्रुतिविप्रतिपत्तिनिरासार्थं तथाप्यत्रैकेन्द्रियविषयश्रुतिविप्रतिपत्तिनिरासो ऽप्यर्थात्सिध्यति समः प्लुषिणेत्यादेः प्राणे तत्तच्छरीरानुरोधिसंकोचविकासपरतयोपपादनेन हि त्वगिन्द्रियस्यापि तथैव संकोचविकासशालितया‡ सर्वाङ्गीणशैत्योपलब्धिकरणत्वमित्यर्थात्सिध्यति सम एभिस्त्रिभर्लो-

---

* किं निगमनेति १ पु॰ पा॰ । † अत्र पञ्चमं वायुक्रियाधिकरणं पूर्णम् ।

‡ शीलतयेति २ पु॰ पा॰ ।

कैरिति प्राणे विभुत्वाम्नानं परम् आधिदैविकविषयतया योजनीयमिति तत्राधिकयत्नसद्भावात् प्राणप्रधानमिदमधिकरणमित्यणुश्चेत्येकवचनेन दर्शितमिति तात्पर्यम् । कुटो घट इति । घटः कुटो निवापो ऽस्त्रीत्यमरसिंहः । सम एभिस्त्रिभिर्लोकैरित्येतदिति । समोनेन सर्वेणेत्येतत्तु न विभुत्वप्रतिपादनैकान्तिकं प्लुषिमशकनागव्यतिरिक्तमपि यद्यत्प्राण्यस्ति तत्तच्छरीरानुकूलसंकोचविकासशालितया तेन सर्वेणापि सममित्येवमर्थताया अप्युपपत्तेरिति भावः* ॥

३३५ । २१ ## ज्योतिराद्यधिष्ठानं तु तदामननात् ॥ १४ ॥

न तु करणानामिति । ननु यद्गृहीत्यादिटीकोक्तस्योत्सर्गस्येन्द्रियेषु प्रवृत्तिर्बलवदुपपादकाभावेनाभ्युपगन्तुमयुक्ता यश्चक्षुषि तिष्ठन्नित्यादेस्तदपवादकस्य सत्त्वादिति चेत्सत्यम् । ईश्वराधिष्ठानमपरामृश्यायं पूर्वपक्षः । (अत एव सिद्धान्ते करणानि चेतनाधिष्ठितानीत्यनुमानस्येश्वरेण सिद्धसाधनमाशङ्क्य परिहरिष्यते । न चेश्वरेण सिद्धसाधनत्वम् । तदभ्युपगमे त्वयैवोत्सर्गबाधस्येष्टत्वादिति । अथ वा उत्सर्गस्येश्वराधिष्ठितत्वांशइवाग्न्याद्यधिष्ठितत्वाद्यंशे त्यागो न कार्यः । तत्र बलवत्प्रमाणाभावादिति तात्पर्यम् ।)† अत एव करणानि‡ चेतनाधिष्ठितानीति सिद्धान्त्यनुमानस्य पूर्वपक्षे जीवाधिष्ठितत्वे सिद्धसाधनत्वम् । जीवस्य बलवत्प्रमाणवशादधिष्ठातृत्वमङ्गीकृत्यानुपदं वक्ष्यते न च तदस्ति जीवइति । यद्यप्यभिमतार्थग्राहकेन्द्रियमनःसंयोजनतद्ग्रहणार्थचक्षुर्विस्फारणश्रोत्रावधानदानादिना जीवस्येन्द्रियाधिष्ठातृत्वमनुभवसिद्धमुपपद्यते च तदिन्द्रियाणामतीन्द्रियत्वे ऽपि तेषामभिमतार्थे ग्रहणाय नोदनकारिणीषु नाडीषु स्पार्शनापरोक्षज्ञानस्य तन्मूलप्रयत्नस्य च संभवाद् नाडीगोचरप्रयत्नेनैव तन्नोदनीयानां श्वासजमलानामिच्छया मोचनधारणदर्शनात् । अथ यो वेदेदं जिघ्राणीत्यादिश्रुत्यनुमतं च जीवस्येन्द्रियाधिष्ठातृत्वं तथापि जीवाधिष्ठानं न सार्वत्रिकम् । अनिच्छतो ऽप्यनभिमतज्ञानादिदर्शनादिति तात्पर्यम् ।

३३६ । २३ न ह वै देवानिति । ननु अग्न्यादिदेवताः एतदिन्द्रियसाध्यपुण्यफलभागिन्यः तदधिष्ठातृत्वादित्यनुमाने नास्त्यागमविरोधः । सत्यम् ।

---

* अत्र षष्ठं श्रेष्ठाणुत्वाधिकरणं पूर्णम्

† ( ) एतदन्तर्गतो ग्रन्थो नास्ति १ पु. । ‡ अत एव सिद्धान्ते करणानीति १ पु. पा. ।

अप्रयोजकत्वं त्वनुमानस्य तदा भवति । आगमस्तावद्देवतानां पापफलं नास्तीति वदति ततश्च यथा तासां पापहेतुज्ञानकर्मकारयितृत्वे ऽपि तथाभूतज्ञानकर्मताश्रयत्वात् तदुत्पत्तावालोकादिवत्करणानुग्राहकतया सहकारिमात्रत्वाद् न तज्जन्यपापफलभागित्वम् एवं तज्जन्यपुण्यफलभागित्वाभावस्याप्युपपत्तेः । न च पुण्यमेवामुं गच्छतीति श्रुतिबलात्तासां तज्जन्यपुण्यफलभागित्वं शङ्कनीयम् । न ह्येषा श्रुतिरिन्द्रियाधिष्ठातृदेवतानां स्वस्वाधिष्ठेयेन्द्रियजन्यज्ञानकर्मप्रयुक्तपुण्यफलभागित्वं ब्रवीति किं तु वाङ्मनःप्राणरूपत्र्यन्नोपासकस्य सार्वात्म्यफलप्राप्त्यनन्तरम् आत्मान्तरगतपापफलानुभवप्रसक्तौ तन्निवारणं करोति । अमुं त्र्यन्नोपासकमुपासनाजन्यं पुण्यमेव गच्छति न त्वात्मान्तरगतं पापमित्यनेन वाक्येन त्र्यन्नोपासकस्य पापप्राप्त्यभावे प्रतिपाद्ये सामान्यमुखेन तत्समर्थनार्थं न ह वै देवानिति वाक्यं देवतामात्रमेव किमपि पापं न स्पृशति हिरण्यगर्भवदुत्कृष्टदेवताभावं प्राप्तं त्र्यन्नोपासकं किमपि पापं न स्पृशतीति किमु वक्तव्यमिति तदभिप्रायः ।

तत्किमितीति । मृत्युमतीत्य यत्प्राप तत्किमिति प्राप्यविशेषनिर्द्धारणार्थः प्रश्नः । सा यदेत्यादिश्रुतिं तदुत्तरत्वेन व्याचष्टे उच्यत इति । अतिमुक्ता त्यक्तवती । अग्निरेवाभवदिति । एवं चाग्निभावः प्राप्य इत्युक्तं भवति । दर्शनाय चक्षुरित्यस्याभिप्रायमाह न चैतन्यायेति । चैतन्यस्यात्मरूपत्वान्न तत्र चक्षुरपेक्षा किं तु चाक्षुषवृत्ताविति गूढो ऽभिप्रायः । अमुमभिप्रायं विवरीतुम् अथ यो वेदेदमित्यादिश्रुतिवाक्यं तद्विवृणोति अथापीति । अथशब्दो ऽप्यर्थे वर्तत इत्यर्थः । क इहाप्यर्थ इत्याकाङ्क्षायामाह दर्शनाद्यर्थे चक्षुराद्यपेक्षायामपीति । अथ यत्रैतदाकाशमित्यादिवाक्ये चक्षुर्ग्रहणं सर्वेषामिन्द्रियाणां दर्शनग्रहणं सर्वेन्द्रियजन्यवृत्तीनां चोपलक्षणम् अतो दर्शनादीति चक्षुरादीति चोभयत्राप्यादिग्रहणम् । स्वत एव यो वेदेतीति । स्वस्वरूपलाभार्थं कारणमनपेक्ष्य यो वेदेत्यर्थः । स आत्मेति । वेदेत्यत्र प्रकृत्यर्थभूतवेदनस्वरूप आत्मेत्यर्थः । यदि नित्यात्मस्वरूपमेव वेदनं कुत्र तर्हीन्द्रियापेक्षा किंरूपं च वेदेत्यत्र प्रत्ययार्थभूतं वेदनं प्रति कर्तृत्वमित्याकाङ्क्षायां गन्धाय घ्राणमिति वाक्यम् । तत्र गन्धशब्दो वृत्तिरूपगन्धज्ञानपर इति व्याचष्टे तस्येति । एवं च गन्धवेद-

त्स्वरूपचैतन्यावच्छेदकवृत्त्युत्पत्त्यर्थमिन्द्रियाद्यपेक्षा तत्कर्तृकत्वोपाधिकं च तदवच्छिन्नस्य*स्वरूपकर्तृत्वमित्युक्तं भवति† ॥

३३६ । २५ **तइन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ १७ ॥**

भेदश्रुतेरिति‡ वैलक्षण्याच्चेति§ सूत्रयोर्भाष्यकारैरसुरपाप्मविद्धत्वाविद्धत्वगोचरा मृत्युप्राप्तत्वाप्राप्तत्वगोचरा च द्विविधा भेदश्रुतिरुदाहृता टीकाकारैस्तु द्वितीयैवोपात्ता न त्वाद्या तत्किमाद्यशङ्कायामस्वारस्यादित्याशङ्क्य मृत्युप्राप्तशब्देनैवासुरपाप्मविद्धत्वस्यापि संगृहीतत्वादित्याह **मृत्युर्वागादीनां स्व||विषयासङ्ग इति ।** असुरशब्देनासुरपाप्मविध्वस्तानिति शब्देन । उक्तार्थोपपादनार्थं मृत्युप्राप्तेत्यादिटीकामुपादाय श्रुतिद्वयमप्युपन्यस्यति **श्रूयते हीति ।** श्रूयतइत्यस्य विषयासङ्गवत्त्वमित्यनेन संबन्धः । त्वं न उद्गायेति । देवैर्नियुक्तायां वाचि यो भोगः अभिवदनलक्षणं फलं तद्देवेभ्य आगायत्सकलदेवसाधारणं गानेन सा वाक् संपादितवती तच्च यत्कल्याणं स्वरवर्णादिभ्रंशरहितमभिरूपमभिवदनं तदात्मने आगायदिति लिखितश्रुतिभागस्यार्थः । आदिशब्देन तामभिद्रुत्य पाप्मना विध्यन्नित्यन्तो वाक्यशेषः संगृहीतः । तानि मृत्युरित्यादिश्रुत्यन्तरोदाहरणे ऽपि श्रूयतइत्यनुषङ्गः कार्यः । केषु चित्कोशेषु विषयासङ्गवत्त्वमित्यस्य तानि मृत्युरित्यस्य च मध्ये संश्राव्येति पदान्तरयुक्तः पाठो दृश्यते स न साधुरिव लक्ष्यते । यो वाचि भोग इत्यादिश्रुतिरुद्गीथविद्याप्रकरणगता तानि मृत्युरित्यादिश्रुतिः सप्तान्नब्राह्मणगतेति भेदात् । **अर्थालोचनमिति** ज्ञानेन्द्रियाभिप्रायम् । टीकायामन्ये त्वित्यादिना वृत्तिकारमतमुपन्यस्तं तद्भाष्यकारमते सूत्रयोजनाक्लेशो ऽस्तीत्यपरितोषादिति वक्तुं भाष्यकारमते सूत्रयोजनां दर्शयति **भाष्यकारैर्हीति । न केवलमध्याहारापेक्षत्वादिति ।** अनेन भेदशब्दाध्याहारभियेत्येतत्प्रतिज्ञायां तत्त्वान्तराणीत्यध्याहारभियेत्येवमर्थतया व्याख्यातम् । घञ्प्रत्ययो **भवतीति ।** घञ्प्रत्ययान्तो निपात इत्यर्थः ।

३३८ । २२ **तन्मात्रमयुक्तमित्युक्तं भवतीति ।** वस्तुतस्तु भाष्यकारीयायामाद्यसूत्रव्याख्यायामयुक्तत्वप्रदर्शनार्थो न भवति वृत्तिकारमतस्योपन्यासः

* एकः स्वशब्दो नास्ति १ पु० । † अत्र सप्तमं ज्योतिराद्यधिकरणं पूर्णम् ।

‡ व्या० सू० अ० २ पा० ४ सू० १८ । § व्या० सू० अ० २ पा० ४ सू० १९ ।

|| स्वशब्दो नास्ति २ पु० ।

किं तु तस्यैवायुक्तत्वप्रदर्शनार्थः । तस्मिन्नुपन्यस्यमान एव हि तदयुक्तत्वं स्फुटं प्रतीयते । तथा हि । संशयवाक्ये न तावत्प्राणव्यावृत्तत्ववागाद्येकादशानुगतमिन्द्रियत्वं सिद्धान्ते निर्वक्तव्यतया उपक्रान्तम् । अग्रे तु देहाधिष्ठानत्वे सति रूपाद्यालोचनकरणत्वमिन्द्रियत्वमिति कर्मेन्द्रियेभ्यो ऽपि व्यावृत्तं निरुक्तं निष्प्रयोजनं वा ऽधिकरणम् । यदि पूर्वपक्षरीत्या प्राणानुगतमिन्द्रियत्वं निरुच्यते यदि वा सिद्धान्तरीत्या तद्व्यावृत्तम् उभयथापि हि नास्ति प्रयोजनम् । न हि वैशेषिकशास्त्रवत्साधर्म्यवैधर्म्यविचारार्था अस्य शास्त्रस्य प्रवृत्तिः । न च प्राणस्येन्द्रियत्वे इन्द्रियेभ्य एव त्वम्पदार्थो विवेक्तव्यः अनिन्द्रियत्वे तु प्राणादपीति प्रयोजनभेदः शङ्कनीयः । न हीन्द्रियेभ्यो ऽहं भिन्न इति त्वम्पदार्थो विवेक्तव्यः किं त्वन्धः काणो मूको बधिरः कुणिः खञ्ज इत्यादिरूपतत्तदिन्द्रियविशेषाभेदभ्रमनिरासायान्धादहं भिन्न इत्यादिप्रकारेण । अतः प्राणद्वादशानामिन्द्रियत्वे ऽपि प्राणादपि त्वम्पदार्थस्य विवेकः कार्य एव । भाष्यकारीये तु पूर्वपक्षे प्राणाद्विवेकव्यतिरेकेणेन्द्रियेभ्यो विवेको न कार्यः । वृत्तिमतः प्राणात्तत्त्वान्तरस्य तद्वृत्तिभ्यस्तत्त्वान्तरत्वस्य कैमुतिकन्यायेन सिद्धेः । पाणिनिस्मृतिमवलम्ब्य पूर्वपक्षो ऽपि तुच्छः । तामेवावलम्ब्येन्द्रदृष्टेषु विषयेष्विन्द्रजुष्टेषु भोग्येष्विन्द्रसृष्टेषु घटादिष्विन्द्रदत्तेषु ग्रामादिषु चेन्द्रियत्वपूर्वपक्षप्रसङ्गात् । इन्द्रियशब्दरूढिमवलम्ब्यातिप्रसङ्गपरिहारे तत एव प्राणव्यावृत्तेरपि लाभात् । सूत्रयोजनाक्लेशभिया तुच्छाधिकरणार्थपरिग्रहस्तु वदान्यगृहान्तःप्रवेशक्लेशभिया तद्द्वारदृष्टपरिग्रहतुल्यः । न च भाष्यकारमते सूत्रयोजनाक्लेशोपि । तथा हि । प्रतिज्ञाध्याहारस्तावदसिद्धः । ते वागादयः श्रेष्ठादन्यत्र श्रेष्ठादन्ये तत्त्वान्तराणीति सौत्रपदैरेव प्रतिज्ञालाभात् । भेदश्रुतेरित्यनेन पौनरुक्त्यमप्यसिद्धम् । तद्व्यपदेशादित्यस्य उत्पत्तिव्यपदेशादित्येतदर्थकत्वेन भेदव्यपदेशादित्येतदर्थकत्वाभावादुत्पत्तिव्यपदेशः प्राणे ऽप्यस्तीति व्यभिचारवारणाय श्रेष्ठादन्यत्रेति हेतावपि विशेषणम् । इन्द्रियाणीति मनः सर्वेन्द्रियाणि चेत्येतच्छ्रुतिगतशब्दानुकरणम् । तत्र इतिशब्दमात्रमध्याहर्तव्यम् । तथा च श्रेष्ठव्यतिरेकेण श्रेष्ठोत्पत्तिव्यतिरेकेणेन्द्रियाणि जायन्त इति शब्देनोत्पत्तिव्यपदेशादिति हेत्वर्थो भवतीति श्रेष्ठव्यतिरेकोक्त्या श्रेष्ठोत्पत्तिव्यतिरेक इन्द्रियाणामुत्पत्तिव्यपदेशोक्तिसामर्थ्याल्लभ्यते । यथा सिंहतुल्यपराक्रमो राजेत्यत्र राज्ञः पराक्रमोक्तिसा-

मर्थ्यात्सिंहोक्त्या सिंहपराक्रमो लभ्यते एवम्भूत एव हेत्वर्थो भाष्ये व्यपदेशभेदादित्यनेन व्यपदेशविशेषादित्यर्थकेन विवक्षितः । अत एव को ऽयं व्यपदेशभेद इति प्रश्नपूर्वकं हेत्वर्थस्यैव विवरणमुत्तरञ्च क्रियते न तु हेत्वर्थस्य प्रसाधनम् । हेत्वर्थस्वरूपस्यैव प्रश्नदर्शनात् । अतः श्रेष्ठादन्यचेत्येतद्धेतावप्यन्वेति इन्द्रियाणीत्येतद्धेतावेवान्वेतीति । इदं सर्वं भाष्याभिमतमेव । तच्छब्दस्यानन्तरोक्तपरामर्शकत्वमप्युपपद्यतएव । न वियदश्रुते*रित्यारभ्योत्पत्तेः प्रकृतत्वात् तथा प्राणाः† श्रेष्ठश्चे‡ति सूत्रयोः प्राणेन्द्रियविषयतयापि तस्याः प्रकृतत्वात् । एतस्माज्जायतइति विवक्षितमूलश्रुत्युपात्ततया ऽपि तत्परामर्शोपपत्तेश्च । तथा प्राणा इति सूत्रे हि विषयवाक्यसंनिहितोपमानस्यापि तच्छब्देन परामर्शो ऽङ्गीकृतः । इहेन्द्रियाणीति साक्षाच्छब्देनैवोपात्ते मूलश्रुतिवाक्ये तत्संनिहितपरामर्शः सुतरामुपपद्यते । एतेन प्राण इन्द्रियाणीति संज्ञाभेदमात्रं न तत्त्वान्तरत्वसाधकमिति शङ्का ऽपि निरस्ता । प्राणोत्पत्तिव्यतिरेकेणोत्पत्तिकथनस्य हेत्वर्थत्वात् । नन्वेवमपि श्रेष्ठादन्यचेत्यस्य साध्यान्वितस्य हेतावव्यावृत्त्या ऽन्वयः हेताविति शब्दाध्याहारश्चेति क्लेशो ऽस्तीति चेद् न । परमते व्यावृत्त्या तदन्वयावश्यम्भावात् । टीकायां हि तेनेन्द्रियशब्देन तेषां वागादीनां व्यपदेशादिति हेतुरुक्तः स तु वागादीनामेव श्रेष्ठं वर्जयित्वेन्द्रियशब्देन व्यपदेशादित्यवधारणापेक्षः । अन्यथेन्द्रियव्यपदेशस्य प्राणव्यावृत्तत्वाऽप्रतीतौ तत्प्रवृत्तिनिमित्तस्येन्द्रियत्वस्य प्राणाद्व्यावृत्त्यसिद्धेः । अत एव चाचार्यैर्दर्पणे सावधारणो हेतुरुपन्यस्तः । तेनेन्द्रियशब्दे तेषामेव वृद्धव्यवहारे व्यपदेशादिति । एतेन हेताविति शब्दाध्याहारक्लेशो ऽपि निरस्तः । परमतएव भेदश्रुते§रित्यधिकरणान्तरसूत्रे वागादीनीन्द्रियाणि श्रेष्ठात्तत्त्वान्तराणीति प्रतिज्ञाध्याहारार्थबहुक्लेशसद्भावादिन्द्रियाणि श्रेष्ठादन्यचेत्यस्मात्सूत्रादनुषक्तः प्रतिज्ञा लभ्यतइति चेत्तर्हि श्रेष्ठादन्यचेत्यस्य ते वागादयः श्रेष्ठादन्यचेन्द्रियाणीति पूर्वाधिकरणसाध्यान्वितस्य पुनस्तद्धेतावन्वितस्य भेदश्रुतेरिति सूत्रे ऽप्यन्वय इति परमतएवानिक्षेपः । अस्मन्मते त्विन्द्रियाणीत्यस्य विनैवेतिशब्दाध्याहारं तदिन्द्रियाणीति पक्ष-

* व्या· सू· अ· २ पा· ३ सू· १ ।

† व्या· सू· अ· २ पा· ४ सू· १

‡ व्या· सू· अ· २ पा· ४ सू· ८ ।

§ व्या· सू· अ· २ पा· ४ सू· ८ ।

निर्देशार्थत्वेनाप्यस्त्युपपत्तिः । तथा पञ्चनिर्देशस्य मनः सर्वेन्द्रियाणि चेतीन्द्रियोत्पत्तिप्रतिपादकवाक्यस्मरणार्थत्वाद् न वैयर्थ्यं तत एव तत्स्मारणसिद्धेः न हेतावपि तदन्वयापेक्षा इतिशब्दाध्याहारेण हेतौ तदन्वयस्यापि अनुकृतेस्तस्य चेति सूत्रे* तस्य चेत्यंशस्यैव विवक्षितश्रुतिवाक्यसूचनप्रयोजनात् । तस्मात्स्वरूपव्याख्यैव निराक्रियेत्यभिप्रेत्य टीकायां वृत्तिकारमतोपन्यास इत्येव युक्तम्† ॥

संज्ञामूर्त्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥ २० ॥ ३३९ । १

विषयप्रदर्शकं भाष्यमुदाहृत्य व्याचष्ट इति । भाष्यं गृहीत्वा तदुदाहृतं विषयवाक्यं व्याचष्ट इत्यर्थः । **अरुणादाविति ।** यद्यप्यरुणाधिकरणे एकहायनीद्रव्यवदारुण्यस्यापि साक्षादेव क्रयान्वयः शाब्दो व्युत्पादितः तथापि श्रुतक्रयसाधनत्वनिर्वाहार्थमारुण्यस्यैकहायनीद्रव्यावच्छेदकत्वेनार्थः पार्ष्णिकान्वयो ऽभ्युपगत इति तदभिप्राया परम्परासंबन्धोक्तिः सप्तदशारत्निर्वाजपेयस्य यूप इति तु साक्षात्प्रधानसंबन्धाऽसंभवेन शाब्दपरम्परासंबन्धाश्रयणे उदाहरणम् ।

यत्र च कर्ता कर्त्रन्तरं प्रति करणमिति । जीवस्तावत् तृतीयाश्रुत्या करणत्वेन प्रतीयते चेतनस्य चेतनान्तरं कर्तारं प्रति करणतयोपकरणत्वं च प्रयोज्यकर्तृत्वेनैव भवति नान्यथेति भावः । न च पाचयत्योदनं देवदत्तेनेतिवदिह तृतीयायाः कर्त्रर्थत्वं शङ्कनीयम् । तत्र णयन्तधातूक्ताख्याताभिहितकर्तृकप्रयोजकव्यापारव्यतिरेकेण तत्प्रकृतिभूतपचत्यर्था‡नभिहितकर्तृकप्रयोज्यव्यापारवदिहाख्याताभिहितकर्तृकाध्यारोपितप्रयोजकव्यापाररूपव्यापारव्यतिरेकेणा§नभिहितकर्तृकस्य कस्य चित्प्रयोज्यव्यापारस्याभावात् । तस्मादुत्तमपुरुषनिर्दिष्टाया देवतायाः कर्तृत्वेनान्वये सति तृतीयान्तनिर्दिष्टस्य जीवस्य तस्यां करणत्वेनैवान्वयो वक्तव्य इति भावः ।

प्रधानान्वययोग्यतायामिति । यथेष्टकाः पक्त्वा भुङ्क्ते इत्यत्रे- ३४० । १०
ष्टकानां प्रधानक्रियान्वयाऽयोग्यत्वादुपसर्जनक्रियान्वयः तथेहापीत्यर्थः । प्रवेशक्रियान्वयपक्षे ऽपि न कर्तृरि तृतीया । न च यथेष्टकाः पक्त्वा भुङ्क्ते

* व्या॰ सू॰ अ॰ १ पा॰ ३ सू॰ २२ ।

† अत्राष्टमम् इन्द्रियाधिकरणं पूर्णम् ।

‡ पचात्यर्थेति पु॰ पा॰ ।

§ रूपव्याकरणक्रियाव्यतिरेकेणेति २ पु॰ पा॰ ।

इत्यत्रेष्टकानां कर्मत्वस्य क्त्वाप्रत्ययेनानभिधानादिष्टका इति कर्मणि द्वितीया तथेह कर्तरि तृतीया शङ्कनीया। युक्ता तत्र क्त्वाप्रत्ययस्य कर्मानभिधायित्वाद् द्वितीया समानकर्तृकयोः पूर्वकालइति स्मरणादिह क्त्वाप्रत्ययेन कर्तुरभिधानमस्तीति न कर्तरि तृतीया युक्ता। न च क्रियाद्वयकर्तुरैक्यमेव क्त्वाप्रत्ययार्थः न तु तद्गतकर्तृशक्तिरप्यतस्तदनभिधानात्तत्र तृतीया भवितुमर्हतीति शङ्कनीयम्। तथा सतीष्टकाः पक्त्वा ऽहं भोक्ष्यइत्यत्रापि मयेति तृतीयाप्रसङ्गात्। न च भोजनक्रियाकर्तुराख्यातेनाभिधानात्तृतीया न भवतीति वाच्यम्। न ह्यनभिहितसूत्रस्याभिहितकारकशक्त्याश्रये तृतीया न भवतीत्यर्थः किं त्वनभिहितकारकशक्त्याश्रये भवतीति। भाष्यवार्तिकयोः पर्युदासपक्षाश्रयणात्। अत एव प्रासादे आस्तइत्यत्र प्रसीदन्त्यस्मिन् जना इत्यर्थे विहितेन घञा प्रसादनक्रियाधिकरणत्वस्याभिहितत्वे ऽपि आसिक्रियाधिकरणत्वस्यानभिधानात् सप्तमी एवमिहापि भुजिक्रियाकर्तृत्वस्याभिधाने ऽपि पाकक्रियाकर्तृत्वानभिधानात् तृतीया स्यात्तस्मात्तत्र क्त्वाप्रत्ययेन कर्तृशक्त्यभिधानमाश्रित्यैव तृतीयाभाव उपपादनीयः तथेहापि कर्तरि तृतीया न भवतीति करणार्थैव सेति युक्तम्। तदयमर्थः सेयं देवता जीवरूपेणानुप्रविश्य तद्भोगार्थं नामरूपे व्याकरवाणीति संकल्पितवतीति* ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजि-
द्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ वेदान्त-
कल्पतरुपरिमले द्वितीयाध्यायस्य चतुर्थः पादः ॥

समाप्तो ऽविरोधाख्यो द्वितीयो ऽध्यायः ॥

---

* अत्र नवमं संज्ञामूर्तिक्लृप्त्यधिकरणं पूर्णम्।